नैव सर्वेणापि शरीरेण निमग्नम् । तेषां नयनमानसे एव तदायत्ते जाते इति न । किंतु सर्वमपि शरीरं तदायत्तं जातम् । तदीयावयवभूषारत्नेषु सर्वेषामपि शरीराणि प्रतिफलितानीति भावः । सर्वेऽपि सर्वथा तत्परवशा जाता इत्यर्थः । निर्मलत्वादवयवेष्वपि प्रतिबिम्बो युक्तः । भित्तिशब्दः प्रशंसार्थो वा ॥

द्यामन्तरा वसुमतीमपि गाधिजन्मा
यद्यन्यमेव निरमास्यत नाकलोकम् ।
चारुः स यादृगभविष्यदभूद्विमानै-
स्तादृक्तदभ्रमवलोकितुमागतानाम् ॥ ३ ॥

द्यामिति ॥ गाधिजन्मा विश्वामित्रो द्यां वसुमतीमपि अन्तरा स्वर्गभूम्योर्मध्ये यदि अन्यमेव नाकलोकं निरमास्यताकरिष्यत तर्हि स स्वर्गलोको यादृक् यादृशः चारुः सुन्दरोऽभविष्यत्, तर्हि स्वयंवरमवलोकितुमागतानां देवादीनां विमानैः कृत्वा तत् स्वयंवरदेशात् उपरि वर्तमानं अभ्रं गगनं तादृक्तादृशमभूत् । गाधिजो यदि स्वर्गमर्त्यमध्येऽन्यं स्वर्गमकरिष्यत्तर्हि भुवि उत्कृष्टानि विमानानि भैमीवरणार्थं भूमिमागतानां देवानां विमानानि तानि न भवन्ति अद्भुनि विमानानि अन्तरिक्षगानि । तैर्विमानैः कृत्वा तद्गगनं यादृक् चारु, तादृगभविष्यदिति वा । अन्तरिक्षनिर्मितस्वर्गतुल्यं तदाकाशमभूदिति भावः । पूर्वव्याख्याने विश्वामित्रोऽभूदित्यत्र क्रियातिपत्तौ लृङ् न, तावन्मात्रक्रियातिपत्तेः पर्यवसानात् ॥

कुर्वद्भिरात्मभवसौरभसंप्रदानं
भूपालचक्रचलचामरमारुतौघम् ।
आलोकनाय दिवि संचरतां सुराणां
तत्रार्चनाविधिरभूदधिवासधूपैः ॥ ४ ॥

कुर्वद्भिरिति ॥ तत्र स्वयंवरदेशे आलोकनाय दिवि संचरतां सुराणामधिवासार्थं सौगन्ध्यार्थं ज्वालितैः कामशरादिरूपैः कृत्वा अर्चनाविधिः पूजाविधानमभूत् । किंभूतैः—भूपालानां चक्रं तस्य चलानि चामराणि तेषां मारुतौघं वायुसङ्घं आत्मभवसौरभ्यसंप्रदानं दानपात्रं कुर्वद्भिः । चलचामरवायुवशाद्गगनचारिभिर्धूपदेवैः परितुष्टा बभूवुरित्यर्थः ॥

तत्रावनीन्द्रचयचन्दनचन्द्रलेप-
नेपथ्यगन्धवहगन्धवहप्रवाहम् ।
आलीभिरापतदनङ्गशरानुसारी
संरुध्य सौरभमगाहत भृङ्गवर्गः ॥ ५ ॥

तत्रेति ॥ तत्र स्वयंवरदेशे भृङ्गवर्गः भ्रमरसङ्घः सौरभं सौगन्ध्यमगाहत बुभुजे । किं कृत्वा—अवनीन्द्रचयस्य राजसमूहस्य चन्दनचन्द्रः चन्दनयुक्तः कर्पूरः । बहुकर्पूरं चन्दनमिति यावत् । तेन कृतं लेपनेपथ्यमङ्गरागभूषणं तस्य गन्धवहः सौगन्ध्यवाही गन्धवहो वायुस्तस्य प्रवाहं सङ्घं आलीभिः स्वपङ्क्तिभिः संरुध्य कुत्रचिद्गन्तुमदत्त्वा । किंभूतः—आपतन्त आगच्छन्तो येऽनङ्गशरास्ताननुसरत्यनुकरोति एवंशीलः । आपतन्तः स्वर्गात्पतन्तः कामशराः पुष्पाणि तदनुगामी वा । सौगन्ध्यबाहुल्यात्सर्वत्र भ्रमरा विचरन्ति स्मेति भावः । अन्योऽपि वस्त्रादिना वायुं संरुध्य सौरभं गाहते । बन्धुपङ्क्तीनां भ्रमराणां दैर्घ्यात्कामोद्दीपकत्वाच्च कामबाणतुल्यत्वम् ॥

उत्तुङ्गमङ्गलमृदङ्गनिनादभङ्गी-
सर्वानुवादविधिबोधितसाधुमेधाः ।
सौधस्रजः प्रतपताकतयाभिनिन्यु-
र्मन्ये जनेषु निजताण्डवपण्डितत्वम् ॥६॥

उत्तुङ्गेति ॥ सौधस्रजः धवलगृहपङ्क्तयः प्रतपताकतया चलत्पताकतया जनेषु । जनानां समीप इत्यर्थः । निजताण्डवपण्डितत्वं स्वीयनृत्तचातुर्यमभिनिन्युरभिनयेन दर्शयामासुरित्यहं मन्ये । किंभूताः—उत्तुङ्गोऽतितारः मङ्गलमृदङ्गनिनादो विवाहमर्दलध्वनिस्तस्य भङ्ग्यः प्रकारविशेषास्तासां सर्वः सकलोऽनुवादविधिरनूच्चारणविधिः । सकलस्य मृदङ्गशब्दस्य यः प्रतिशब्दविधिरिति यावत् । तेन बोधिता ज्ञापिता साध्वी मेधा लक्षणया गम्भीरता याभिः । अन्या अपि नर्तक्यो मङ्गलमृदङ्गनिनादभङ्गीनामनुवादेन स्वीयं नृत्तकौशलं हस्ताद्यभिनयेन लोकेषु प्रदर्शयन्ति । अन्यो मेधावी गुरुणा व्याख्यातस्यार्थस्यानुवादेन बोधितसाधुमेधः सन् जनेषु स्वीयं पाण्डित्यं प्रकाशयति । एतच्छ्लोकार्थोऽनुभवैकगम्यः । नञ्दुःसुभ्य एव परात् मेधाशब्दादसिच् नान्येभ्यः परादिति नासिच् ॥

संभाषणं भगवती सदृशं विधाय
वाग्देवता विनयबन्धुरकंधरायाः ।
ऊचे चतुर्दशजगज्जनतानमस्या
तत्राश्रिता सदसि दक्षिणपक्षमस्याः ॥ ७ ॥

संभाषणमिति ॥ भगवती षड्गुणैश्वर्यसंपन्ना । तथा—चतुर्दशसु जगत्सु जनतया नमस्या पूज्या वाग्देवता तत्र सदसि अस्या भैम्या दक्षिणं पक्षं पार्श्वम् । अथ च—अनुकूलपक्षम् । आश्रिता सती ऊचे । किं कृत्वा—सदृशं देवादिवर्णनविषयं भैम्या सह सदृशमनुगुणं संभाषणं विधाय । किंभूतायाः—विनयेन बन्धुरा नम्रा कंधरा शिरोधरा यस्याः । भगवती इत्यादिविशेषणैर्देवादिवर्णनसामर्थ्यम् । दक्षिणं पक्षमित्यनेन भैमीपक्षपातित्वं च सूचितम् ॥

किमुवाचेत्याह—

अभ्यागमन्मम भुजामिह कोटिरेषा
येषां पृथक्कथनमन्दशतातिपापि ।

---

१ 'अत्र सापह्नवोत्प्रेक्षा' इति **जीवातुः** । २ 'अत्रातिशयोक्तिरलंकारः' इति **साहित्यविद्याधरी** । 'अभूतोपमेति केचित्' इति **जीवातुः** । ३ 'अत्राधिवासधूपस्य सुरासंबन्धेऽपि तत्संबन्धोक्तेरतिशयोक्तिभेदः' इति **जीवातुः** ।

१ 'अत्रानुप्रासोपमालंकारः' इति **साहित्यविद्याधरी** । २ **साहित्यविद्याधरी** असत्संविधे इतः पर नास्ति । 'उत्प्रेक्षा' इति **जीवातुः** ।

अस्यां वृणीष्व मनसा परिभाव्य कंचि-
द्यं चित्तवृत्तिरनुधावति तावकीना ॥ ८ ॥

अभ्यागमदिति ॥ हे दमयन्ति, इह स्वयंवरे मत्वभुजां देवानामेषा कोटिः अभ्यागमदायया । कोटिसंख्याका देवाः समागता इत्यर्थः । येषां देवानां पृथक्कथनं पार्थक्येन वर्णनं अब्दशतं वर्षशतमतिपतत्यतिक्रामति एवं शीलम् । वर्षशतेनापि कर्तुं न शक्यत इत्यर्थः । तस्मात् त्वं मनसा परिभाव्य विचार्य अस्यां देवकोटौ मध्ये यं कंचित्तावकीना चित्तवृत्तिरनुधावत्यभिलष्यति तं वृणीष्व । मनसा विचार्य वृणीष्व वा । तावकीना चित्तवृत्तिर्मनसा विचार्य इत्यनेन सरस्वत्या अनादरः सूचितः । तावकीना, 'युष्मदस्मदोरन्यतरस्यां खञ्च' इति खञ् 'तवकममकावेकवचने' इति तवकादेशः ॥

एषां त्वदीक्षणरसादनिमेषतया
स्वाभाविकानिमिषतामिलिता यथाभूत् ।
आस्ये तथैव तव नन्वधरोपभोगै-
र्मुग्धे विधावमृतपानमपि द्विधास्तु ॥ ९ ॥

एषामिति ॥ ननु मुग्धे सुन्दरि, एषां देवानां त्वदीक्षणे रसात्प्रीतेर्हेतोः एषा प्रत्यक्षदृश्या अनिमेषता निर्निमेषता स्वाभाविकी सहजानिमिषता तया मिलिता संयुक्ता सती यथा द्विधा द्विप्रकारा भूत् । तथैवामृतपानमपि तवास्ये विधौ मुखचन्द्रेऽधरोपभोगैरधरचुम्बनैः कृत्वा द्विधा द्विप्रकारमस्तु भवतु । तथा देवा देवत्वादनिमिषा अपि त्वदवलोकनप्रसादात्पुनरप्यनिमिषा जाताः । तथा देवत्वात् चन्द्रामृतादा अपि त्वदधरामृतास्वादादमृतादाः पुनरुक्ता भवन्त्वित्यर्थः । चन्द्रास्ययोस्तुल्यत्वं सूचितम् । मुखे त्वोष्ठोपभोगैः, चन्द्रे तु धराव्यतिरिक्तोपभोगैः । स्वर्गोपभोगैरित्यर्थः ॥

एषां गिरेः सकलरत्नफलस्तरुः स
प्राग्दुग्धभूमिसुरभेः खलु पञ्चशाखः ।
मुक्ताफलं फलनसान्वयनाम तन्व-
न्नाभाति बिन्दुभिरिव च्छुरितः पयोधेः १०

एषां गिरेरिति ॥ सकलानि रत्नान्येव फलानि यस्य । तानि फलति इति वा । सकलरत्नफलः स प्रसिद्धः तरुः कल्पवृक्ष एषां देवानां गिरेः सुमेरोः पञ्चशाखः खलु हस्त इव आभाति शोभते । किंभूतस्य मेरोः—प्राक् पूर्वं दुग्धा भूमिरेव सुरभिर्धेनुः येन । घृतगोरूपा भूमिरेव रत्नादीनि दुग्धा येन तस्य । किंभूतस्तरुः—पयोधेः क्षीरसमुद्रस्य बिन्दुभिः तत उत्पन्नत्वाच्छुरितः । 'पयोभिः' इति पाठे दुग्धरूपैर्बिन्दुभिरिति व्याख्येयम् । उत्प्रेक्षते–मुक्ताफलं फलनेन सान्वयं सार्थकमेतदेव नाम यस्यैवंविधं तन्वन्निव । कस्यचित्फलं हि फलशब्देन व्यपदिश्यते, तथा मुक्ताफलस्यापि फलत्वं कल्पवृक्षत्वादिति भावः । प्रारब्धगोदोहनस्य पाणिना विना दोग्धुमशक्तः कल्पवृक्षो मेरोः कर आसीत् । दोहने दुग्धसंपर्कस्यापि संभवात्, तेन च रत्नानामेव दुग्धत्वादस्य च रत्नसहितत्वात्प्रायेण मेरोः पाणिरेवायमित्यर्थः । क्षीरोदात्तस्योत्पन्नत्वान्मुक्तादीनि रत्नानि दुग्धबिन्दुतुल्यानि शोभन्त इत्यर्थः । अथ च—पञ्च शाखाः स्कन्धा यस्य स कल्पवृक्षः किल पञ्च (शाखः ।) करोऽपि अङ्गुलीभिः पञ्चशाखः । पृथूपदिष्टा पृथ्वी मेरुणा रत्नानि महोषधीश्च दुग्धा इत्यागमः । फलनेन इष्टसंपादनेन सान्वयं सयोगं नाम यस्य एवंविधं मुक्ताफलं संपादयन्निवेति वा । गोपालसहचारित्वादग्राम्यनादरः सूचितः ॥

वक्त्रेन्दुसंनिधिनिमीलदलारविन्द-
द्वन्द्वभ्रमक्षममथाञ्जलिनात्ममौलौ ।
कृत्वापराधभयचञ्चलमीक्षमाणा
सान्यत्र गन्तुममरैः कृपयान्वमानि ॥११॥

वक्त्रेति ॥ अथ सरस्वतीवचनानन्तरममरैः सा भैमी अन्यत्र सर्पराजादिसमीपे गन्तुं कृपया अन्वमान्यनुज्ञाता । किंभूता—आत्ममौलावञ्जलिं कृत्वा देवान्नमस्कृत्य अवरणजन्योऽपराधस्तज्जनितं भयं शापादि तेन चञ्चलं यथा तथा देवानीक्षाणा । किंभूतमञ्जलिम्—वक्त्रेन्दोर्मुखचन्द्रस्य संनिधिः, तस्मान्निमीलानि संकुचन्ति दलानि पर्णानि यस्य तदरविन्दद्वन्द्वं तस्य भ्रमे क्षमं समर्थम् । संकुचद्दलयुगतुल्यम् । स्वेष्वननुरागिणीं तां ज्ञात्वा यत्र तवानुरागस्तं वृणु, मा भैषीरिति देवैरनुज्ञातेति भावः । अन्योऽप्येवमीक्षमाणः सकृपैरनुकम्प्यते । निमीलन्ति निमीलानि । पचाद्यच् । 'निमीलिदल–' इति पाठे निमीलनशीलानीत्यर्थः ॥

तत्तद्विरागमुदितं शिबिकाधरस्थाः
साक्षाद्विदुः स्म न मनागपि यानधुर्याः ।
आसन्ननायकविषण्णमुखानुमेय-
भैमीविरक्तचरितानुमया तु[2] जज्ञुः ॥ १२ ॥

तदिति ॥ यानधुर्याः शिबिकावाहिन उदितं समुत्पन्नं तेषु तेषु विरागम् । अर्थाद्भैम्याः साक्षात्प्रत्यक्षेण यद्यपि मनागपि लेशतोऽपि न विदुः स्म जानते स्म । यतः शिबिकाया अधरेऽधोदेशे तिष्ठन्ति शिबिकाधरस्थाः । तथापि आसन्नाः संनिहिता नायका देवादयस्तेषां विषण्णानि म्लानानि मुखानि तैः कृत्वानुमेयानि भैम्या विरक्तचरितानि नमस्कारादीनि तेषामनुमयानुमानेन तर्केण तु पुनः जज्ञुर्जानते स्म । तुरवधारणे । वा जज्ञुरेव । यत एते विवर्णमुखास्तस्मादेतेषु विरक्तिं ज्ञात्वा अनु पश्चाद्–यातेति वचनं विनैवान्यत्र जग्मुरिति तेषां पण्डितत्वं सूचितम् ॥

रक्षःस्वरक्षणमवेक्ष्य निजं निवृत्तो
विद्याधरेष्वधरतां वपुषैव भैम्याः ।
गन्धर्वसंसदि न गन्धमपि स्वरस्य
तस्या विमृश्य विमुखोऽजनि यानवर्गः १३

---

१ 'अत्रानिमिषत्वामृतपानयोर्द्वैविध्यासंबन्धोक्तेरतिशयोक्तिः' इति **जीवातुः** ।

१ 'अत्राञ्जलौ वक्त्रेन्दुसंनिधिसंकुचितारविन्दयुगलभ्रान्तिवर्णनाद्रूपकानुप्राणितो भ्रान्तिमदलंकारः इति संकर' इति **जीवातुः** । २ 'ऽनुजग्मुः' इति **जीवातुसुखावबोधासंमतः** पाठः ।

रक्षःस्विति ॥ यानवर्गः वाहकसार्थो रक्षःसु निजमरक्षणमवेक्ष्य राक्षसा अस्मान् खादिष्यन्तीति भिया तेभ्यो निवृत्तः परावृत्तः । तथा—अश्वमुखनराङ्गेषु नरमुखाश्वाङ्गेषु विद्याधरेषु भैम्या वपुषैव कृत्वा अधरतां न्यूनतामवेक्ष्य विचार्य निवृत्तः । एते भैमीवरणयोग्या न भवन्तीति । तथा—गन्धर्वसंसदि गन्धर्ववर्गे तस्या भैम्याः स्वरस्य कण्ठमाधुर्यस्य गन्धमपि न विमृश्य नावेक्ष्य विमुखोऽजनि जातः । अधरतामवेक्ष्येत्यर्थः । राक्षसादीनामयोग्यत्वात्तान्प्रति न गच्छति स्मेति भावः ॥

दीनेषु सत्स्वपि कृताफलवित्तरक्षै-
र्यक्षैरदर्शि न मुखं त्रपयैव भैम्याम् ।
ते जानते स्म सुरशाखिपतिव्रतां किं
तां कल्पवीरुधमधिक्षिति नावतीर्णाम् १४

दीनेष्विति ॥ यक्षैः त्रपयैव लज्जयैव भैम्यां विषये मुखं न अदर्शि न दर्शितम् । यतः—किंभूतैः—दीनेषु दरिद्रेषु जनेषु सत्स्वपि कृता अफला वित्तरक्षा धनपालनं यैः । दीनेभ्यो न वितीर्णधनैः । अतिकृपणैरित्यर्थः । 'भैम्याः' इति पाठे तस्याः सकाशाल्लज्जयेति योज्यम् । यक्षेषु धनाधिपत्वं प्रसिद्धं लज्जा किमिति जातेत्याशङ्क्याह—ते यक्षाः तां भैमीमधिक्षिति पृथिव्यामवतीर्णां सुरशाखिनः पत्युः कल्पवृक्षस्य पत्युरिव दानशूरत्वलक्षणं व्रतं यस्यास्तां कल्पवीरुधं स्त्रियं कल्पवल्लीमतिबहुदात्रीम् । अथ च सुरशाखी नल एव तस्य पतिव्रतां कल्पवल्लीम् । किं न जानते स्म । अतिवदान्यां तां प्रति अतिकृपणस्यात्मनोऽयोग्यत्वात्तैर्मुखं नादर्शीति भावः । अन्योऽपि कृपणो वदान्यमुखनिरीक्षणेऽपि लज्जते ॥

जन्यास्ततः फणभृतामधिपः सुरौघा-
न्माञ्जिष्ठमञ्जिमवगाहिपदोष्ठलक्ष्मीम् ।
तां मानसं निखिलवारिचयान्नवीना
हंसावलीमिव घना गमयांबभूवुः ॥ १५ ॥

जन्यास्तत इति ॥ ततः जनीं वहन्तीति जन्या वाहकाः तां भैमीं सुरौघाद्देवसमूहात्सकाशात्फणभृतामधिपं सर्पराजं वासुकिं गमयांबभूवुः प्रापयामासुः । किंभूताम्—मञ्जिष्ठया रक्तं वस्त्रं माञ्जिष्ठं तस्य मञ्जिमानं रम्यतामवगाहते एवंशीला पदोष्ठलक्ष्मीः चरणाधरशोभा यस्याः सा । के कस्मात्कां किमिव—नवीना नूतना घना मेघा निखिलवारिचयात्कृत्स्नजलौघात्सकाशाद्धंसावलीं राजहंसपङ्क्तिं मानसं सर इव । 'यान्याः' इति पाठे याने यानवाहने साधुरिति । माञ्जिष्ठम्, 'तेन रक्तम्' इत्यण् ॥

यस्या विभोरखिलवाङ्मयविस्तरोऽय-
माख्यायते परिणतिर्मुनिभिः पुनः सा ।
उद्गत्वरामृतकरार्धपरार्ध्यभालां
बालामभाषत सभासततप्रगल्भा ॥ १६ ॥

यस्या इति ॥ सा पुनः बालां भैमीमभाषत । किंभूता—सभायां सततं प्रगल्भा । सा का—वाल्मीकिप्रमुखैर्मुनिभिरयं वेदादिरखिलवाङ्मयविस्तरः विभोः सर्वव्यापिन्याः यस्या देव्याः परिणतिः परिणाम आख्यायते कथ्यते । तद्रूपेणैव या व्यवस्थिता । किंभूताम्—उद्गत्वर उदयाचलस्थोऽमृतकरश्चन्द्रः तस्यार्धं तद्वत्परार्ध्यं तत्सदृशं भालं यस्यास्ताम् । भया दीप्त्या सह वर्तमानेति भिन्नं वा । वाङ्मयम्, 'एकाचो नित्यम्' इति मयट् । 'गत्वरश्च' इति निपातनादुद्गत्वरः साधुः ॥

आश्लेषलग्नगिरिजाकुचकुङ्कुमेन
यः पट्टसूत्रपरिरम्भणशोणशोभः ।
यज्ञोपवीतपदवीं भजते स शंभोः
सेवासु वासुकिरयं प्रसितः सितश्रीः १७

आश्लेषेति ॥ सोऽयं वासुकिः किंभूतः—शंभोः सेवासु प्रसित आसक्तः । तथा-सितश्रीः श्वेतशोभश्च । स कः—यः शंभोर्यज्ञोपवीतपदवीं लभते । किंभूतः—य आश्लेषेणालिङ्गनेन लग्नं यद्गिरिजाकुचकुङ्कुमं तेन कृत्वा पट्टसूत्रस्य परिरम्भणेनेव संबन्धेनेव शोणशोभो रक्तशोभः । यज्ञोपवीतमपि श्वेतं ग्रन्थिस्थाने पट्टसूत्रेण शोणशोभं भवति । सर्वदा शंभुसेवया संभोगाभावादेनं मा वृणीष्वेति भावः । पुराणे देवानां चातुर्वर्ण्याधिकारे 'ब्रह्मा विप्रः, रुद्रः क्षत्रियः, विष्णुर्वैश्यः, दस्रौ शूद्रौ' 'माञ्जिष्ठं क्षत्रियः' इति वचनाद्यज्ञोपवीतस्यारक्तत्वं कथितमिति वा । 'प्रथितः' इति पाठे सेवासु ख्यातः ॥

पाणौ फणी भजति कङ्कणभूयमैशे
सोऽयं मनोहरमणीरमणीयमुच्चैः ।
कोटीरबन्धनधनुर्गुणयोगपट्ट-
व्यापारपारगममुं भज भूतभर्तुः ॥ १८ ॥

पाणाविति ॥ हे भैमि, सोऽयं फणीन्द्रो वासुकिः ऐशे शाम्भवे पाणौ कङ्कणभूयं कङ्कणत्वं भजति । यातीत्यर्थः । किंभूतं (यं) कङ्कणत्वम्—उच्चैः मनोहरमणीभिः रमणीयम् । कङ्कणमपि रत्नैः रमणीयं भवति । त्वममुं भज । किंभूतम्—भूतभर्तुः शिवस्य कोटीरबन्धनं जटाजूटबन्धनं धनुर्गुणः धनुर्ज्या योगपट्टश्च तेषां व्यापारस्य भवनलक्षणस्य पारगं तत्र कुशलम् । कोटीरबन्धनं धनुर्गुणयोगपट्टीभूतम् । मनोहरमणिः सुन्दरफणरत्नमिति वा । हरस्य कोटीरादिविशेषणेन वरणाभावः सूचितः ॥

धृत्वैकया रसनयामृतमीश्वरेन्दो-
रप्यन्यया त्वदधरस्य रसं द्विजिह्वः ।
आस्वादयन्युगपदेष परं विशेषं
निर्णेतुमेतदुभयस्य यदि क्षमः स्यात् ॥१९॥

धृत्वेति ॥ जटाजूटसंबन्धादेकया रसनया जिह्वया ईश्वरस्येन्दोश्चन्द्रस्यामृतं धृत्वा अन्यया द्वितीयया त्वदधरस्य रसमपि

१ 'विगाहि—' इति जीवातुसंमतः पाठः ।

१ 'मूर्तिः' इति जीवातुसंमतः पाठः । २ 'अत्रैकस्य वासुकेरनेकेषु कोटीरादिषु क्रमेण वृत्तेः पर्यायभेदः । अथानुभावविशेषाद्यौगपद्यासंभवे तु समुच्चयः' इति जीवातुः ।

धृत्वा चन्द्रामृतमोष्ठामृतं च युगपदेककालमास्वादयन्पिबन् एतदुभयस्य चन्द्रामृतौष्ठरसलक्षणस्य द्वयस्य परं विशेषं तारतम्यं निर्णेतुं निश्चेतुं यदि क्षमः समर्थः स्यात्तर्हि अयमेव वासुकिरेव। नान्य इत्यर्थः। यतो द्विजिह्वः द्वे जिह्वे यस्य। युगपदास्वादने हेतुः। परं सूक्ष्मं विशेषं वा तर्हि परं केवलं वा इत्यन्वयः। राज्ञां वरणयोग्यत्वेऽपि चन्द्रामृतसंबन्धस्यासंभवाद्देवानां तत्पानसंभवे द्विजिह्वत्वासंभवात्समकालं पानासंभवात्, सर्पाणां द्विजिह्वत्वसंभवेऽपि चन्द्रामृतसंबन्धाभावात्, एतस्य तूभयसंभवाद्द्वयोर्विशेषनिर्णयेऽयमेव क्षमो नान्य इत्यर्थः ॥

आशीविषेण रदनच्छददंशदान-
मेतेन ते पुनरनर्थतया न गण्यम्।
बाधां विधातुमधरे हि न तावकीने
पीयूषसारघटिते घटतेऽस्य शक्तिः ॥ २० ॥

आशीति ॥ 'आशी तालुगता दंष्ट्रा तया विद्धो न जीवति' इति वृद्धाः। आश्यां विषं यस्यैवंभूतेन एतेन वासुकिना कृतं रदनच्छददंशदानं त्वदधरखण्डनं ते त्वयानर्थतयापमृत्युहेतुतया पुनर्न गण्यं न संभावनीयम्। एतस्य वरणे चुम्बने विषसंचारादपमृत्युभयेनैनं न वृणे इति न शङ्कनीयम्। हि यस्मात् पीयूषसारघटितेऽमृतसारसृष्टे त्वदीयेऽधरे बाधां विधातुं अस्य दन्तरछदस्य वासुकेर्वा शक्तिः सामर्थ्यं न घटते युज्यते। अमृते हि विषं न प्रभवतीत्यर्थः। आशिपि दंष्ट्रायां विषं यस्येति सकारान्तस्य पृषोदरादित्वात्सलोपो वा। ते, 'कृत्यानाम्-' इति षष्ठी। गण्यं गणयतेर्यत् ॥

तद्विस्फुरत्फणविलोकनभूतभीतेः
कम्पं च वीक्ष्य पुलकं च ततोनु तस्याः।
संजातसात्त्विकविकारधियः स्वभृत्या-
न्भृत्याख्यषेधदुरगाधिपतिर्विलक्षः ॥ २१ ॥

तदिति ॥ उरगाधिपतिः विलक्षः सलज्जः सन् स्वभृत्यान्स्वसेवकान्भृत्यान्[1]र्तितुमहाङ्कुलकादिपदार्थात्सकाशाद्व्यवारयत्। किंभूतान्स्वभृत्यान्—तस्य वासुकेः विस्फुरतः फणस्य विलोकनाद्भूता संजाता या भीतिः तस्याः सकाशात्तस्याः कम्पं समीक्ष्य, ततोनु अनन्तरम्। अविलम्बितमित्यर्थः। पुलकं च समीक्ष्य, संजाता सात्त्विकविकारसंबन्धिनी धीर्बुद्धिः येषां तान्। भैम्याः कम्पं पुलकं च दृष्ट्वा अस्मास्वामिन्यनुरक्तेयमिति विचार्य नृत्यं कुर्वत इत्यर्थः। 'तद्विस्फुरत्-' इति तस्या विशेषणं वा। भूता भीतिर्यस्या इति विग्रहः। स्वाम्यभिलाषे पूर्णे भृत्या नृत्यन्ति। 'भयेनास्याः कम्पादि प्रवृत्तम्, न त्वनुरागादिति नृत्यं मैवं कृढ्वमिति न्यषेधदित्यर्थः। भृत्यमौर्ख्यात्, भैम्या चाद्भुतत्वात्सलज्जत्वम्। 'फणा द्वयोः' इति फणशब्दः पुंलिङ्गेऽपि। ततोनु निपातसमुदायः। नृत्यात्, ऋदुपधात्क्यप् ॥

तदृर्शिभिः स्ववरणे फणिभिर्निराशै-
र्निःश्वस्य तत्किमपि सृष्टमनात्मनीनम्।
यत्तान्प्रयातुमनसोऽपि विमानवाहा
हा हा प्रतीपपवनाशकुनाञ्च जग्मुः ॥२२॥

तदृर्शिभिरिति ॥ तदृर्शिभिरवृतस्वामिविलोककैर्वासुकिवैलक्ष्यदर्शिभिर्वा अत एव स्ववरणे निराशैः फणिभिः कर्कोटकादिभिः निःश्वस्य फूत्कृत्य तत् किमप्यपूर्वमनात्मनीनं स्वीयमहितं सृष्टं कृतम्। यत् तान्सर्पान्प्रयातुमनसोऽपि गन्तुकामा अपि विमानवाहाः प्रतीपपवनः प्रतिकूलवातः तद्रूपं यदशकुनं तस्माद्धेतोः हा हा कष्टं अशुभमेतदिति कृत्वा न जग्मुः। प्रतिकूलस्य वायोरशकुनत्वात्सर्पसंमुखं न जग्मुः। अयोग्यत्वान्न गता इति भावः। आत्मने हितमात्मनीनम्, 'आत्मन्विश्वजन-' इति खः ॥

ह्रीसंकुचत्फणगणादुरगप्रधाना-
त्तां राजसङ्गमनयन्त विमानवाहाः।
संध्यानमद्दलकुलात्कमलाद्विनीय
कह्लारमिन्दुकिरणा इव हासभासम् ॥२३॥

ह्रीति ॥ विमानवाहाः ह्रिया संकुचत्फणंगणं फणवृन्दं यस्य तस्मादुरगप्रधानात्सर्पराजाद्वासुकेः विनीयापनीय तां राजसङ्गमनयन्त प्रापयामासुः। के कस्मात्कां कमिव—इन्दुकिरणाः संध्यायां नमन्ति संकुचन्ति दलकुलानि पत्रसमूहा यस्य तस्मात्कमलाद्विनीय हासभासं विकसन्तीं दीप्तिं कह्लारं सौगन्धिकमिव ॥

देव्याभ्यधायि भव भीरु धृतावधाना
भूमीभुजो भजत भीमभुवो निरीक्षाम्।
आलोकितामपि पुनः पिबतां दृशैना-
मिच्छा विगच्छति न वत्सरकोटिभिर्वः २४

देव्येति ॥ सा भैमी देव्या अभ्यधायि वक्ष्यमाणमुक्ता। हे भीरु, चलत्फणदर्शनाद्भयशीले त्वं धृतावधाना सावधाना भव। भयं परित्यज्य राज्ञो विलोकयेत्यर्थः। हे भूमीभुजो राजानः, यूयं भीमभुवो भैम्याः निरीक्षां दर्शनं भजत भैमीं पश्यत। दृष्टायाः पुनर्दर्शनेन किमित्यत आह—आलोकितामप्येनां पुनर्दृशा पिबतां सादरं पश्यतां वो युष्माकमेतद्दर्शनेच्छा वत्सराणां वर्षाणां कोटिभिरपि न गच्छति न शाम्यति। अतः पुनर्यथेच्छं विलोकयतेत्यर्थः। 'त्यजत' इति पाठे भैमीविलोकनं मा कृढ्वम्। युष्मासु पश्यत्सु लज्जावशादियं युष्मान्न पश्येत्। तस्माल्लज्जां विहाय यथा पश्यति तथा कुरुतेत्यर्थः। वरणे संदेहादर्शनमपि कथं त्याज्यमित्यत आलोकितामिति वा ॥

लोकेशकेशवशिवानपि यश्चकार
शृङ्गारसान्तरभृशान्तरशान्तभावान्।
पञ्चेन्द्रियाणि जगतामिषुपञ्चकेन
संक्षोभयन्वितनुतां वितनुर्मदं वः ॥ २५ ॥

लोकेशेति ॥ यो वितनुः कामः लोकेशो ब्रह्मा, केशवः शि-

१ 'अत्र भृत्यानां भैमीभयसात्त्विकेषु शृङ्गारभ्रान्त्या भ्रान्तिमदलंकरः' इति जीवातुः।

वश्च एतानपि त्रीन् शृङ्गारेण रसेन सान्तरो व्यवहितः भृशोऽतिशयित आन्तरो मानसः शान्तभावो विरक्तत्वं येषां तान्विरक्तानप्यनुरक्तांश्चकार स कामो वो युष्माकं मुदं वितनुतां विस्तारयतु । किं कुर्वन्–इषुपञ्चकेन जगतां चक्षुरादीनि पञ्चेन्द्रियाणि क्षोभयन्विकारं प्रापयन् । सृष्टिस्थितिप्रलयकारिणो देवेशानपि यः स्ववशांश्चकार तस्य भवद्वशीकरणे कः प्रयास इति तदधीनाः सन्तः पुनः पुनर्यथेच्छमेनां विलोकयतेति भावः । सृष्ट्यादिक्रमेणाभ्यर्हितत्वात्पूर्वनिपातः । पञ्चकेन पञ्च परिमाणमस्य सङ्घस्येत्यर्थे 'संख्यायाः संज्ञासङ्घ–' इति कन् ॥

पुष्पेषुणा ध्रुवममूनिषुवर्षजप्ति-
हुंकारमन्त्रबलभस्मितशान्तशक्तीन् ।
शृङ्गारसर्गरसिकद्व्यणुकोदरि त्वं
द्वीपाधिपान्नयनयोर्नय गोचरत्वम् ॥ २६ ॥

पुष्पेति ॥ शृङ्गाररसस्य सर्गे निर्माणे रसिकं प्रीतिमत् पुनः पुनः तन्निर्माणशीलं द्व्यणुकं तद्वदतिकृशं तदेव वा उदरं यस्यास्तत्संबुद्धिः हे कृशोदरि, त्वं अमून्द्वीपाधिपान्पुष्करादिसप्तद्वीपेश्वरान्राज्ञो नयनयोर्गोचरत्वं नय प्रापय । अनुग्रहबुद्ध्या विलोकयेत्यर्थः । किंभूतान्–पुष्पेषुणा ध्रुवं निश्चितम् । इषुवर्षे बाणमोचने जप्यत इति जप्तिः जपितो हुंकाररूपो मन्त्रः तस्य बलेन शक्त्या कृत्वा भस्मिता नाशिता शान्तशक्तिः उपशमप्रभावो तेषां तान् । जप्तिरित्येव युक्तः पाठः । अन्योऽपि हुंफडादिमन्त्रबलेन कस्यचिच्छक्तिं दूरीकृत्य वशीकरोति ॥

स्वादूदके जलनिधौ सवनेन सार्धं
भव्या भवन्तु तव वारिविहारलीलाः ।
द्वीपस्य तं पतिममुं भज पुष्करस्य
निस्तन्द्रपुष्करतिरस्करणक्षमाक्षि ॥ २७ ॥

स्वाद्विति ॥ हे निस्तन्द्रस्य विकसितस्य पुष्करस्य कमलस्य तिरस्करणे जये क्षमे अक्षिणी लोचने यस्यास्तत्संबुद्धिः भैमि, स्वादूदके मधुरसलिले जलनिधौ समुद्रे सवनेन नाम्नाऽनेन राज्ञा सार्धं तव वारिविहारलीला जलक्रीडाः भव्या रम्याः भवन्तु । तस्मात्पुष्करस्य द्वीपस्य पतिं तं प्रसिद्धं सवननामानममुं राजानं भज वृणीष्व । 'तन्द्रा निद्राप्रमीलयोः' इत्यमरः ॥

सावर्तभावभवदद्भुतनाभिकूपे
स्वर्भौममेतदुपवर्तनमात्मनैव ।
स्वाराज्यमर्जयसि न श्रियमेतदीया-
मेतद्गृहे परिगृहाण शचीविलासम् ॥ २८ ॥

सावर्तेनेति ॥ आवर्तेन दक्षिणावर्तेन सह वर्तमानः सावर्तस्तस्य भावस्तेन भवदुत्पद्यमानमद्भुतमाश्चर्यं यस्मादेवंभूतो नाभिकूपो यस्यास्तत्संबुद्धिः सलक्षणगम्भीरनाभिकूपे भैमि, एतस्य सवनस्योपवर्तनं देशः आत्मनैव भौमं भूमौ भवं स्वः स्वर्गोस्ति । त्वमेतदीयामेतद्देशसंबन्धिनीं एतद्राजसंबन्धिनीं वा श्रियमेव स्वाराज्यं स्वर्गराज्यं नार्जयसि । अपि त्वर्जय । त्वम् एतद्गृहे शचीविलासं परिगृहाण । इन्द्रतुल्यमेनं शचीवत् त्वं वृणीष्वेति भावः । कूपस्य च सावर्तत्वमाश्चर्यकारि । 'नीवृज्जनपदौ देशविषयौ तूपवर्तनम्' इत्यमरः ॥

देवः स्वयं वसति तत्र किल स्वयंभू-
र्न्यग्रोधमण्डलतले हिमशीतले यः ।
स त्वां विलोक्य निजशिल्पमनन्यकल्पं
सर्वेषु कारुषु करोतु करेण दर्पम् ॥ २९ ॥

देव इति ॥ तत्र पुष्करद्वीपे हिमवच्छीतलच्छाये न्यग्रोधमण्डलतले मण्डलाकारवटवृक्षाधःप्रदेशे यः स्वयंभूर्ब्रह्मा देवः स्वयं साक्षात्स्वरूपेण किल प्रसिद्धं वसति, स ब्रह्मा त्वां त्वल्लक्षणमनन्यकल्पमनन्यसदृशं निजशिल्पं निजनिर्माणं विलोक्य सर्वेषु कारुषु शिल्पिषु विषये करेण दर्पं गर्वं करोतु । एवं सुन्दरतरशिल्पनिर्माणकुशलो मदन्यस्य हस्तो न विद्यत इति त्वां वीक्ष्य तस्य बुद्धिरुदेष्यतीति भावः । अन्येन कल्प्यते निर्मीयत इत्यन्यकल्पं तन्न भवति । अन्येन निर्मातुमशक्यमित्यर्थः । अन्यस्मादीषदूनमेवं न भवति । कल्पवन्तं वा ॥

न्यग्रोधनादिव दिवः पतदातपादे-
र्न्यग्रोधमात्मभरधारमिवावरोहैः ।
तं तस्य पाकिफलनीलदलद्युतिभ्यां
द्वीपस्य पश्य शिखिपत्रजमातपत्रम् ॥ ३० ॥

न्यग्रोधेति ॥ हे भैमि, त्वं तं न्यग्रोधं वटं तस्य द्वीपस्यातपत्रमिवातपत्रं छत्रतुल्यं पश्य । किंभूतं न्यग्रोधम्—दिव आकाशात्पतत आतपादेरुष्णवृष्ट्यादेः न्यक् अधोदेशे रोधनान्निराकरणादिव न्यग्रोधं 'न्यक् रुणद्धि' इति न्यग्रोधः इति सान्वयम् । अतिशीतलच्छायमित्यर्थः । तथा—अवरोहैः शाखोत्पन्नमूलैः कृत्वा आत्मभरं धारयति एवंभूतमिव स्थितम् । किंभूतमातपत्रम्—पाकीनि फलानि नीलानि दलानि पर्णानि च तेषां द्युतिभ्यां रक्तनीलशोभाभ्यां कृत्वा शिखिपत्रजं रक्तनीलमयूरपत्रविरचितम् । समस्तमपि द्वीपं तच्छाये वर्तत इति शेषः । अन्योऽपि बहुतरं भारं हस्तादिना धारयति । 'न्यग्रोधस्य च केवलस्य' इति निपातान्न्यग्रोधशब्दः साधुः ॥

न श्वेततां चरतु वा भुवनेषु राज-
हंसस्य न प्रियतमा कथमस्य कीर्तिः ।
चित्रं तु यद्विशदिमाद्वयमाविशन्ती
क्षीरं च नाम्बु च मिथः पृथगातनोति ३१

१ 'जप्त' इति जीवातुसंमतः पाठः ।

१ 'एतद्भूरेव स्वर्गः, एतद्राज्यमेव स्वाराज्यम्, अयमेवेन्द्रः, त्वमेवेन्द्राणी भव, इति रूपकालंकारः' इति जीवातुः । २ 'प्रसिद्धमातपत्रं तद्वत्स्थितम्' इति निमित्तगुणजातिस्वरूपोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या । अस्याश्च प्रथमोत्प्रेक्षया अङ्गाङ्गिभावेन सजातीयसंकरः । द्वितीयया सजातीयसंसृष्टिः' इति जीवातुः ।

नेति ॥ अस्य राजहंसस्य राजसु श्रेष्ठस्य प्रियतमात्यन्तमभिमता कीर्तिः श्वेततां शुभ्रतां कथं न चरतु गच्छतु । अपितु गच्छत्येव । तथा-भुवनेषु लोकत्रयेऽपि कथं न गच्छतु । लोकत्रयमपि व्याप्नोत्येव । यद्वा-कथं न श्वेततां? श्वेता भवतु । अपितु श्वेता भवत्येव । त्रैलोक्ये चरत्येव । हंसस्यापि प्रियतमा योषिदपि श्वेता भवति । तथा—भुवनेषूदकेषु वा क्रीडति विषादि भक्षयति वा अत्र नाश्चर्यम् । विशदिम्नो धवलताया अद्वैतं ऐक्यमादिशन्ती त्रैलोक्यं श्वेतीकुर्वती क्षीरं दुग्धं चाम्बु च मिथः परस्परस्मात्पृथक् नातनोति भिन्नं न करोति इदं तु चित्रम् । हंसी हि मिश्रं क्षीरनीरं विविक्तं करोति इयं तु तयोरभेदं करोतीत्याश्चर्यम् । अतिशुभ्रा त्रैलोक्यव्यापिनी चास्य कीर्तिः, वदान्यश्चायमिति भावः । अद्वैते चाभेद एव युक्तः । 'जीवनं भुवनं वनम्' । 'विष्टपं भुवनम्' इत्यमरः । पक्षे 'श्विता वर्णे' इत्यस्माल्लोटस्तङ् ॥

शूरेऽपि सूरिपरिषत्प्रथमार्चितेऽपि
शृङ्गारभङ्गिमधुरेऽपि कलाकरेऽपि ।
तस्मिन्नवद्यमियमाप तदेव नाम
यत्कोमलं न किल तस्य नलेति नाम ३२

शूर इति ॥ इयं भैमी तस्मिन्राज्ञि तदेवावद्यं दूषणं नामेति प्रसिद्धौ । आप । तत्किम्-यत्तस्य सवनस्य किलेति प्रसिद्धं नल इत्यामन्त्रणयोग्यं संबुद्ध्यन्तं कोमलं मधुराक्षरं नाम नास्तीत्येतदेव दूषणम् । किंभूते-शूरेऽपि । तथा-सूरिपरिषदि विद्वत्सभायां प्रथमार्चितेऽपि प्रथमगण्येऽपि । तथा शृङ्गारभङ्ग्या शृङ्गाररचनया मधुरे मनोज्ञेऽपि । यथा-कलानां गीतादिचतुःषष्टिकलानामाकरेऽपि । शौर्यपाण्डित्यशृङ्गारित्वकलाकौशलादिगुणयुक्तेऽपि । वरगुणेषु सत्स्वपि नलेऽनुरागात्तं नावरीष्टेति भावः ॥

भ्रूवल्लिवेल्लितमथाकृतिभङ्गिमेषा
लिङ्गं चकार तदनादरणस्य विज्ञा ।
राज्ञोऽपि तस्य तदलाभजतापवह्नि-
श्चिह्नीबभूव मलिनच्छविभूमधूमः ॥ ३३ ॥

भ्रूवल्लीति ॥ अथ विज्ञा ज्ञात्री एषा भैमी तदनादरणस्य सवनानादरणस्य लिङ्गं चिह्नं भ्रूवल्लिवेल्लितं भ्रूलताचेष्टितमेवाकृतिभङ्गिमाकारविच्छित्तिम् । यद्वा पूर्वं भ्रूवल्लिचेष्टितं अथानन्तरं आकृतिभङ्गिमङ्गमोटनं च चकार । भ्रूचलनेनाङ्गमोटनेन च तं निराचकारेत्यर्थः । तस्य राज्ञोऽपि मलिनच्छवेर्मलिनकान्तेः यो भूमा बाहुल्यमेव धूमस्तस्या अलाभाज्जातस्तापस्तल्लक्षणो वह्निस्तस्य चिह्नीबभूव लिङ्गमासीत् । श्यामशोभां दृष्ट्वा जनेन तस्य विरहज्वरोऽनुमित इत्यर्थः । धूमोऽग्नेर्लिङ्गम् ॥

राजान्तराभिमुखमिन्दुमुखीमथैनां
जन्या जनीं हृदयवेदितयैव निन्युः ।
अन्यानपेक्षितविधौ न खलु प्रधान-
वाचां भवत्यवसरः सति भव्यभृत्ये ॥३४॥

राजेति ॥ अथ जन्या यानवाहाः इन्दुमुखीमेनां जनीं वधूं हृदयवेदितयैव भैम्याशयज्ञातृतयैव 'पुरो गच्छत' इत्यादिभैमीवचनमन्तरेणैव राजान्तरस्याभिमुखं निन्युः । यतोऽभिप्रायज्ञाः । खलु यस्मादन्येन स्वामिवचनादिना स्वीयप्रवर्तनाविषयत्वेनानपेक्षितो विधिर्व्यापारो यस्यैवंविधे स्वामिवचनानपेक्षकारिणि भव्ये कुशलतरे भृत्ये सेवके सति प्रधानवाचां स्वामिवचसामवसरः प्रस्ताव एव न भवति । तस्मात्तदभिप्रायं ज्ञात्वान्यत्र निन्युरिति युक्तम् । अनपेक्षितमन्यत्स्वामिवचनादि येन एवंविधो विधिर्यस्येति वा । अन्यशब्दस्याहिताग्न्यादित्वात्पूर्वनिपातः ॥

ऊचे पुनर्भगवती नृपमन्यमस्यै
निर्दिश्य दृश्यतमतावमताश्विनेयम् ।
आलोक्यतामयमये कुलशीलशाली
शालीनतानतमुदस्य निजास्यबिम्बम् ३५

ऊच इति ॥ भगवती देवी दृश्यतमतया सुन्दरत्वेनावमतौ जितावाश्विनेयावश्विनीकुमारौ येन एवंभूतमन्यं नृपमस्यै निर्दिश्य दर्शयित्वा पुनरूचे । किमूचे इत्यत आह—अये भैमि, शालीनतया लज्जया आनतं नम्रं निजास्यबिम्बमुदस्योन्नमय्य कुलशीलाभ्यां शालत एवंभूतोऽयं राजा आलोक्यताम् ॥

एतत्पुरःपठदपश्रमबन्दिवृन्द-
वाग्डम्बरैरनवकाशतरेऽम्बरेऽस्मिन् ।
उत्पत्तुमस्ति पदमेव न मत्पदाना-
मर्थोऽपि नार्थपुनरुक्तिषु पातुकानाम् ३६

एतदिति ॥ हे भैमि, एतस्य पुरः पठत् अपश्रमं गतश्रमं यद्बन्दिवृन्दं तस्य वाग्डम्बरैर्वचनविलासैः कृत्वा अनवकाशतरेऽतितरां निरवकाशेऽस्मिन्नम्बर आकाशे मत्पदानां मम एतद्वर्णनसंबन्धिनां सुबन्ततिङन्तानां पदानामुत्पत्तुमुदेतुं पदमेवावकाश एव नास्ति आकाशाश्रिता हि शब्दास्तैस्तस्य च निरवकाशत्वान्मद्वचनानवकाशः । तथा—अर्थपुनरुक्तिषु पातुकानां मत्पदानामर्थोऽपि नास्ति । मयाभिधेयाः शब्दास्तेषामर्थाश्चैतदीयैर्मागधैरेवोच्यन्ते । ततश्च शब्दपौनरुक्त्यमर्थपौनरुक्त्यं च दोषो मम आपत्स्यत इत्यर्थः । एतद्वर्णनं ममापि संमतमित्येनं वृणीष्वेति भावः । बहुभिर्व्याप्तेऽन्यस्मिन्नपि स्थाने चरणावकाशो न भवति । उत्पत्तुम्, अनिटः पद्यतेस्तुमुन् ॥

नन्वत्र हव्य इति विश्रुतनाम्नि शाक-
द्वीपप्रशासिनि सुधीषु सुधीभवन्त्या ।
एतद्भुजाबिरुदबन्दिजयानयापि
किं रागि राजनि गिराजनि नान्तरं ते ३७

१ 'स चाविवेको धावल्यगुणतो, न स्वरूपत इति विरोधसमाधानाद्विरोधाभासोऽलंकारः । तथा—'विशदिमाद्वयमादिशन्ती' इत्यनेन सामान्यालंकारः । तस्य विशेषणगत्या क्षीरनीराविवेकहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम् । पूर्वार्धे च श्वैत्यभुवनचारित्वराजहंसप्रियतमात्वाख्यश्लिष्टौ श्लिष्टप्रस्तुतकीर्तिविशेषणसाम्यादप्रस्तुतराजहंसप्रतीतेः श्लेषसंकीर्णार्थसमासोक्तिरित्येतैस्त्रिभिः सहाङ्गाङ्गिभावेन पूर्वोक्तस्य विरोधाभासस्य संकरः' इति जीवातुः ।
२ 'अत्रानुमानालंकारः' इति जीवातुः ।

१ 'जनाः' इति जीवातुसुखावबोधासंमतः पाठः । २ 'अर्थान्तरन्यासः' इति जीवातुः ।

नन्विति ॥ ननु भैमि, ते आन्तरं मानसमेतस्य राज्ञो भुजयोर्विरुदं प्रतापः तस्य स्तुतिपाठका ये बन्दिनस्तेभ्यो जाता एवंभूतयाप्यनया गिरा हव्य इति विश्रुतनाम्नि अत्रास्मिन्राजनि रागि अनुरागयुक्तं किं नाजनि । प्रश्नकाकुः । कुतो नाजनीति वा । किंभूते—शाकद्वीपप्रशासिनि शाकद्वीपाधिपे । किंभूतया गिरा—सुधीषु पण्डितेषु सुधीभवन्त्या अमृतीभवन्त्या । आकर्णयतां विदुषामेवामृतरूपया । विदुषामेवामृतरूपया न त्वन्यजनानामिति विरागसूचनम् ॥

शाकः शुकच्छदसमच्छविपत्रमाल-
भारी हरिष्यति तरुस्तव तत्र चित्तम् ।
यत्पल्लवौघपरिरम्भविजृम्भितेन
ख्याता जगत्सु हरितो हरितः स्फुरन्ति ३८

शाक इति ॥ तत्र द्वीपे स शाकनामा तरुस्तव चित्तं हरिष्यति । किंभूतः—शुकच्छदः कीरपक्षः समा छविर्येषामेवंभूतानि पत्राणि तेषां मालां बिभर्तीति । स कः—यस्य शाकस्य पल्लवौघानां परिरम्भः संबन्धस्तस्य विजृम्भितेन विलसितेन हरितो नीलवर्णाः सत्यो जगत्सु हरित इति ख्याताः स्फुरन्ति । एतत्पत्रसंबन्धेन दिशां हरित इति सान्वयं नाम जातमित्यर्थः । मालभारी, 'इष्टकेषीका-' इति ह्रस्वः ॥

स्पर्शेन तत्र किल तत्तरुपत्रजन्मा
यन्मारुतः कमपि संमदमादधाति ।
कौतूहलं तदनुभूय विधेहि भूयः
श्रद्धां पराशरपुराणकथान्तरेऽपि ॥ ३९ ॥

स्पर्शेनेति ॥ तत्र शाकद्वीपे स चासौ तरुश्च तत्तरुः शाकः तस्य पत्रेभ्यो जन्म यस्य एवंभूतो मारुतः स्पर्शेन कृत्वा कमप्यपूर्वं संमदं हर्षमादधाति करोतीति यत् किल श्रूयते त्वं तत् कौतूहलमनुभूय भूयः पुनः पराशरपुराणस्य विष्णुपुराणस्य कथान्तरेऽप्याख्यानान्तरेऽपि श्रद्धामास्तिक्यबुद्धिं विधेहि कुरु । 'यत्पत्रवातसंस्पर्शादाह्लादो जायते परः' इति विष्णुपुराणवचनम् । अस्य श्रवणात्सत्यत्वं विद्यते । अनुभवादपि सत्यत्वं जानीहीत्यपि भूयःशब्दार्थः । भूयसी चासौ श्रद्धा चेति वा ॥

क्षीरार्णवस्तव कटाक्षरुचिच्छटाना-
मन्वेतु तत्र विकटायितमायताक्षि ।
वेलावनीवनततिप्रतिबिम्बचुम्बि-
किर्मीरितोर्मिचयचारिमचापलाभ्याम् ॥४०

क्षीरेति ॥ हे आयताक्षि विशालनयने, क्षीरार्णवः वेलावन्यां वेलाभूमौ वनततिर्वनपङ्क्तिः तस्याः प्रतिबिम्बचुम्बी प्रतिबिम्बधारी । अत एव किर्मीरितः नानावर्णो जातः विचित्रित ऊर्मिचयस्तरङ्गसङ्घस्तस्य चारिमा सौन्दर्यं चापलं चञ्चलत्वं च ताभ्यां कृत्वा तव कटाक्षस्य रुचीनां कान्तीनां छटाः परम्परास्तासां विकटायितं विलसितमन्वेत्वनुकरोतु । क्षीरमयत्वात्स्वतः शुभ्राः दीर्घवृक्षप्रतिबिम्बसंबन्धाच्च नीलाः क्षीरोदतरङ्गास्त्वदीयभेदनीलविशालकटाक्षकान्तितुल्या भवन्त्वित्यर्थः । विकटायितम्, लोहितादेराकृतिगणत्वात्क्यप्यन्तात्भावे निष्ठा ॥

कल्लोलजालचलनोपनतेन पीवा
जीवातुनानवरतेन पयोरसेन ।
अस्मिन्नखण्डपरिमण्डलितोरुमूर्ति-
रध्यास्यते मधुभिदा भुजगाधिराजः ॥४१॥

कल्लोलेति ॥ अस्मिन्क्षीरोदे मधुभिदा श्रीविष्णुना भुजगाधिराजः शेषोऽध्यास्यतेऽधिष्ठीयते । किंभूतः शेषः—अनवरतेन भूयसा पयोरसेन दुग्धरसेन कृत्वा पीवा परिपुष्टः । किंभूतेन—कल्लोलजालस्य तरङ्गसङ्घस्य चलनेन कृत्वा उपनतेनाभिमुखागतेन । तथा—जीवातुना प्राणधारणहेतुत्वाज्जीवनौषधभूतेन । किंभूतः अखण्डं सर्वदा परिमण्डलिता उर्वी मूर्तिः शरीरं यस्य । श्रीविष्णुस्त्रत्र पूज्यो देव इत्यर्थः । पीवा, कनिपि 'घुमास्था-' इनीकारः ॥

त्वद्रूपसंपदवलोकनजातशङ्का
पादाब्जयोरिह कराङ्गुलिलालनेन ।
भूयाच्चिराय कमला कलितावधाना
निद्रानुबन्धमनुरोधयितुं धवस्य ॥ ४२ ॥

त्वदिति ॥ हे भैमि, इह क्षीरोदे कमला श्रीः पादाब्जयोश्चरणकमलयोः कराङ्गुलिभिर्लालनेन संवाहनेन धवस्य श्रीविष्णोर्निद्रानुबन्धं निद्रानैरन्तर्यं चिरायानुरोधयितुं वर्धयितुं कलितावधानाङ्गीकृतावधाना सावधाना भूयाद्भवतु । किंभूता—त्वद्रूपस्य या संपत्तस्या अवलोकनेन जाता शङ्का भयं यस्याः । अयं श्रीविष्णुरिमां चेद्वीक्षयति, तर्हि मां विहायास्यामनुरक्तो भविष्यति, तन्मा भूदिति भिया सुतरां निद्रागमनार्थं करतलेन चरणसंवाहनपरैव भवित्यर्थः । भैम्या लक्ष्मीनोऽप्यतिसौन्दर्यं सूचितम् ॥

बालातपैः कृतकर्गरिकतां कृतां द्वि-
स्त्वय्युदयाचलशिलाः परिशीलयन्तु ।
त्वद्विभ्रमभ्रमणजश्रमवारिधारि-
पादाङ्गुलीगलितया नखलाक्षयापि ॥४३॥

बालेति ॥ तत्र शाकद्वीपे उदयाचलास्यस्य पर्वतस्य शिलाः बालातपैरुदयाचलस्यसूर्यकिरणैः, तथा नखलाक्षयापि कृतां कृतकर्गरिकतां कृत्रिमगैरिकतां द्विः परिशीलयन्त्वनुभवन्तु । द्वाभ्यां प्रकाराभ्यां गैरिकतुल्या भवन्त्वित्यर्थः । किंभूतया नखलाक्षया—

---

१ 'दिक्षु हरिच्छब्दप्रवृत्तेर्हरितवर्णनिमित्तायाः शाकतरुपल्लवच्छायाच्छुरणनिमित्तत्वासंबन्धेऽपि संबन्धोक्तेरुत्प्रेक्षातिशयोक्तिः तया च तस्य तरोः(वि) स्तारो व्यज्यत इत्यलंकारेण वस्तुध्वनिः' इति जीवातुः । २ 'अध्येतु' इति जीवातुस्थपाठः ।

१ 'अत्र किमीरितोर्मिचयस्य सितासितत्वसादृश्यात्तद्विलासस्य कटाक्षविलाससंस्मारकत्वात्तया स्मरणालंकारः' इति जीवातुः । २ अयमुत्तरश्च श्लोको जीवातु-सुत्रावबोधयोर्नास्ति ।

तव विभ्रमेण विलासेन भ्रमणं वनविहारस्तस्माज्जातं श्रमवारि खेदजलं तदारयन्त्येवंशीलाभ्यः पादाङ्गुलीभ्यो गलितया निःसृतया। एतस्मिन्भूते उदयाचले क्रीडिष्यसीति भावः ॥

नृणां करम्बितमुदामुदयन्मृगाङ्क-
शङ्कां सृजत्वनघजङ्घि परिभ्रमन्त्याः।
तत्रोदयाद्रिशिखरे तव दृश्यमास्यं
कश्मीरसंभवसमारचनाभिरामम् ॥ ४४ ॥

नृणामिति ॥ हे अनघजङ्घि सुन्दरजङ्घि, तत्र द्वीपे प्रसिद्धे वा उदयाद्रिशिखरे परिभ्रमन्त्यास्तव दृश्यं दर्शनयोग्यमास्यं मुखं करम्बितमुदां संजातानन्दानां नृणामुदयन्मृगाङ्क उदयावस्थश्चन्द्रस्य शङ्कां भ्रमं सृजतु करोतु। किंभूतं मुखम्—कश्मीरसंभवं कुङ्कुमं तस्य समारचनया उद्वर्तनेनाभिरामं रमणीयम्। उदयाचले आरक्तत्वदीयमुखदर्शनात् चन्द्र एवायमुदितः किमिति बुद्ध्या सर्वेषां हर्षो भविष्यति। तस्मादेनं वृणीष्वेति भावः। अनघजङ्घि, 'नासिकोदरौ-' इति ङीप् ॥

एतेन ते विरहपावकमेत्य ताव-
त्कामं स्वनाम कलितान्वयमन्वभावि।
अङ्गीकरोपि यदि तत्तव नन्दनाद्यै-
र्लब्धान्वयं स्वमपि नन्वयमातनोतु ॥४५॥

एतेनेति ॥ हे भैमि, एतेन राज्ञा ते तव विरहपावकमेत्य प्राप्य कामं निश्चितं तावत्प्रथमं हव्य इति स्वनाम कलितान्वयमनुगतार्थमन्वभाव्यन्वभूयत। हव्येनाग्निं प्राप्य यथानुभूयते, तद्वदनेनानुभूतमित्यर्थः। अतो हूयते इति हव्यम्। यदि अधुना स्वमेनमङ्गीकरोपि वृणुषे तर्हि अयं तव नन्दनाद्यैः पुत्रपौत्राद्यैः कृत्वा स्वमात्मानमपि लब्धान्वयं ननु निश्चितं प्राप्तवंशमातनोतु। ननु संबोधने वा। अन्वयः संबन्धो वंशश्च। यदीत्यनेन स्वीकारस्य पाक्षिकत्वं द्योतयति ॥

लक्ष्मीलतासमवलम्बभुजद्रुमेऽपि
वाग्देवतायतनमञ्जुमुखाम्बुजेऽपि।
सामुत्र दूषणमजीगणदेकमेव
नार्थी बभूव मघवा यदमुष्यदेवः ॥ ४६ ॥

लक्ष्मीति ॥ सा भैमी अमुत्र हव्ये एकमेव दूषणमजीगणत्। यत्—मघवा देवोऽमुष्य अर्थी याचको न बभूव। किंभूते—लक्ष्मीरूपाया लतायाः समवलम्ब आधारभूतो भुजलक्षणो द्रुमो वस्य तस्मिन्समृद्धराज्येऽपि। तथा—वाग्देवतायाः सरस्वत्या आयतनं स्थानं मञ्जु सुन्दरं मुखाम्बुजं यस्य एवंविधेऽपि चतुःषष्टिकलाप्रवीणेऽपि। इन्द्रो नलस्य याचको जातो न स्वस्य। नलस्यास्य महदन्तरमित्यर्थः ॥

लक्ष्मीविलासवसतेः सुमनःसु मुख्या-
दस्माद्विकृष्य भुवि लब्धगुणप्रसिद्धिम्।
स्थानान्तरं तदनु निन्युरिमां विमान-
वाहाः पुनः सुरभितामिव गन्धवाहाः ४७

लक्ष्मीति ॥ विमानवाहा अस्मात् राज्ञो विकृष्यापनीय तदनु तदनन्तरं पुनः स्थानान्तरं इमां भैमीं निन्युरन्यं राजानं प्रापयामासुः। के कस्मात्कामिव—गन्धवाहा वायवः सुमनःसु पुष्पेषु मुख्यात्पद्माद्विकृष्य सुगन्धितामिव। स्थानान्तरं नयन्ति तथेत्यर्थः। किंभूतादस्मात्—लक्ष्मीविलासस्य वसतेर्गृहात्। पद्ममपि तथा। तथा—सुमनःसु पण्डितेषु मुख्यात्। किंभूतामिमाम्—भुवि लब्धा गुणेन सौन्दर्यादिना प्रसिद्धिर्यया ॥

भूयस्ततो निखिलवाङ्मयदेवता सा
हेमोपमेयतनुभासमभाषतैनाम्।
एतं स्वबाहुबहुवारनिवारितारिं
चित्ते कुरुष्व कुरुविन्दसकान्तिदन्ति ॥ ४८ ॥

भूय इति ॥ ततः सा निखिलवाङ्मयदेवता हेमा नाम देवाङ्गना तदुपमेया तत्सदृशी तनुभाः कायकान्तिर्यस्यास्तामेनां सुवर्णसदृशकायकान्तिं वा भैमीं भूयोऽभाषत ऊचे। हे कुरुविन्दैः माणिक्यमणिभिः सकान्तयः सदृशा दन्ता यस्यास्तत्संबुद्धिः, त्वं स्वबाहुभ्यां बहुवारं निवारिता अरयो येन तमेनं पुरोवर्तिनं नृपं चित्ते कुरुष्व। वृणीष्वेत्यर्थः। 'स्वबाहु-' इत्यनेन परानपेक्षं शौर्यं सूचितम्। 'कुरुविन्द-' इत्यनेन बहुताम्बूलभक्षणाद्दन्तानामारक्तत्वं सूचितम्। सकान्तीत्यत्रसदृशशब्दपर्यायेण सहपदेनास्वपदविग्रहः समासः कार्यः। तत्र 'वोपसर्जनस्य' इति सभावः। दन्ती इत्यत्र संयोगोपधत्वेऽपि 'नासिकोदर'— इति ङीप् ॥

द्वीपस्य पश्य दयितं द्युतिमन्तमेनं
क्रौञ्चस्य चञ्चलदृगञ्चलविभ्रमेण।
यन्मण्डले स परिमण्डलसंनिवेशः
पाण्डुश्चकास्ति दधिमण्डपयोधिपूरः ॥४९॥

द्वीपस्येति ॥ हे भैमि, त्वं क्रौञ्चस्य द्वीपस्य दयितं पतिं द्युतिमन्तमानम्। अथ च तेजस्विनं राजानं चञ्चलो यो दृगञ्चलः दिक्प्रान्तस्तस्य विभ्रमेण विलासेन कटाक्षेण पश्य। अनुरागेण पश्येत्यर्थः। यस्य राज्ञो मण्डले राज्ये क्रौञ्चद्वीपं परितो मण्डलो वर्तुलः संनिवेशोऽवस्थानं यस्य स प्रसिद्धः पाण्डुः शुभ्रो दधिमण्डसंज्ञकः पयोधिः तस्य पूरः प्रवाहश्चकास्ति। किल इति पुराणेषु श्रूयते-'क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन च। आवृतः सर्वतः क्रौञ्चद्वीपतुल्येन मानतः' इति विष्णुपुराणम्। मरीचशर्करादिमिश्रं मस्तु इत्यपरपर्यायं किंचिद्द्रवीभूतदधि मण्डमित्युच्यते। 'मण्डं दधिभवं मस्तु' इत्यमरः ॥

तत्राद्रिरस्ति भवदङ्घ्रिविहारयाची
क्रौञ्चः स्फुरिष्यति गुणानिव यस्त्वदीयान्।

१ 'संदेहभ्रान्तिमतोरन्यतरोऽलंकारोऽस्तु' इति जीवातुः। २ 'समवलम्ब्य-' इति सुखावबोधास्यपाठः। ३ 'तदेव' इत्यपि पाठः।

हंसावली कलकलप्रतिनादवाग्भिः
स्कन्देषुवृन्दविवरैर्विवरीतुकामः ॥ ५० ॥

तत्रेति ॥ तत्र द्वीपे स क्रौञ्चोऽद्रिः भवत्यास्तवाङ्घ्रिविहारश्च रणविलासगतिस्तं याचते एवंशीलोऽस्ति । स कः—यः त्वदीयान्गुणान्सौन्दर्यादीन् हंसावल्याः कलकलानां विरुतानां प्रतिनादः प्रतिशब्दः स एव वाग्येषामेवंभूतैर्मुखतुल्यैः स्कन्दस्य इषवो बाणास्तेषां वृन्दानि तैः कृतानि विवराणि छिद्राणि तैः कृत्वा विवरीतुं काम इव वर्णयितुकाम इव स्फुरिष्यति । स्कन्देन बाणैः पर्वते छिद्राणि कृतानि, तेन क्रौञ्चदारण इति तस्य नाम जातमिति पुराणम् ॥

वैदर्भि दर्भदलपूजनयापि यस्य
गर्भे जनः पुनरुदेति न जातु मातुः ।
तस्यार्चनां रचय तत्र मृगाङ्कमौले-
स्तन्मात्रदैवतजनाभिजनः स देशः ॥५१॥

वैदर्भीति ॥ हे वैदर्भि भैमि, जनो यस्य दर्भदलेन या पूजना तयापि मातुर्गर्भे जातु कदाचिदपि पुनर्नोदेति नोत्पद्यते । तन्मात्रेणैव मुक्तत्वात्पुनः संसारं न यातीत्यर्थः । पुष्पादिपूजया पुनर्नोदेतीति किं वाच्यमित्यपरेर्थः । त्वं तत्र देवे तस्य हरस्यार्चनां पूजां रचय । यतः स देशः स एव तन्मात्रं शिव एव दैवतं येषां ते जनाश्च तेषामभिजन उत्पत्तिस्थानम् । तस्मात्त्वमपि तं पूजयेत्यर्थः । 'कुलेऽप्यभिजनो जन्मभूमावप्यथ हायनाः' इत्यमरः ॥

चूडाग्रचुम्बिमिहिरोदयशैलशील-
स्तेनाः स्तनंधयसुधाकरशेखरस्य ।
तस्मिन्सुवर्णरसभूषणरम्यहर्म्य-
भूभृद्घटा घटय हेमघटावतंसाः ॥ ५२ ॥

चूडाग्रेति ॥ तस्मिन्द्वीपे स्तनंधयो बालः सुधाकरश्चन्द्रः शेखरे मौलौ यस्य शिवस्य सुवर्णरस एव भूषणमेवंभूतानि अतएव रम्याणि यानि हर्म्याणि तान्येव भूभृतः पर्वतास्तेषां घटाः परम्पराः घटय रचय । किंभूताः—हेमघटावतंसाः उपरि सुवर्णकलशभूषिताः अत एव चूडाग्रचुम्बी शृङ्गाग्रे स्थितः सूर्यो यस्य एवंभूत उदयशैलस्तस्य शीलं स्वभावः स्वरूपं तस्य स्तेनाश्चौराः । शिवप्रीत्यर्थमुदयाचलतुल्यान्प्रासादान् रचयेति भावः । घटयेति मित्वाद्ध्रस्वः ॥

तस्मिन्मलिम्लुच इव स्मरकेलिजन्म-
घर्मोदबिन्दुमययौक्तिकमण्डनं ते ।
जालैर्मिलन्दधिमहोदधिपूरलोल-
कल्लोलचामरमरुत्तरुणि छिनत्तु ॥ ५३ ॥

तस्मिन्निति ॥ भो तरुणि प्रादुर्भूतयौवने, तस्मिन्देशे जालैर्गवाक्षैः मिलन्नागच्छन् दध्नो महोदधिस्तस्य पूरः तस्य लोलाः कल्लोलास्त एव शुभ्रत्वाद्दैर्घ्याच्च चामराणि तेषां मरुत् मलिम्लुचश्चौर इव स्मरकेलेर्जन्म येषां ते घर्मोदबिन्दवः तन्मयानि मौक्तिकानि तद्रूपं मण्डनं छिनत्त्वपनयतु अपहरतु । शीतलवायुसंस्पर्शात्सुरतश्रमजातं घर्मोदकं शाम्यत्वित्यर्थः । चौरोऽप्यपरद्वारेण प्रविश्य मुक्ताद्याभरणं हरति । उदबिन्द्वित्यत्र 'मन्थौदन–' इत्युदादेशः ॥

एतद्यशो नवनवं खलु हंसवेषं
वेशन्तसंतरणदूरगमक्रमेण ।
अभ्यासमर्जयति संतरितुं समुद्रा-
न्गन्तुं च निःश्रममितः सकलान्दिगन्तान् ॥

एतदिति ॥ हंसस्य वेष आकारो यस्य नवनवं प्रतिदिनमपूर्वं भवत् एतस्य यशः वेशन्तस्य पल्वलस्य संतरणदूरगमनयोः क्रमेण परिपाट्या, पल्वलस्य संतरणे विषये दूरगमक्रमेण पूर्वं सरसोऽर्धं पश्चात्कियदधिकं ततोऽपि परतीरं अनया परिपाट्या वा समुद्रान्संतरीतुमुत्तरीतुं इतः समुद्रेभ्य एतद्देशाद्वा निःश्रमं श्रमरहितं यथातथा सकलान्दिगन्तान्दिक्प्रान्तांश्च गन्तुं प्राप्तुमभ्यासमर्जयति । खलु निश्चये उत्प्रेक्षायां वा । श्वेतत्वाद्धंसानां तद्रूपं यशसा धृतम् । हंसा न भवन्ति किं त्वेतद्यश एव । अन्योऽपि महानद्यादितरणार्थं वाप्यादौ तरणेनाभ्यासं करोति । नवं चाभ्यासयोग्यं भवति बालाभ्यासो हि दृढतर इत्यर्थः । नवनवमिति प्रकारे द्विरुक्तिः । अर्जयतीति वर्तमानप्रयोगाद्यशसोऽल्पत्वसूचनादस्मिन्ननादरः सूचितः ॥

तस्मिन्गुणैरपि भृते गणनादरिद्रै-
स्तन्वी न सा हृदयबन्धमवाप भूपे ।
दैवे निरुन्धति निबन्धनतां वहन्ति
हन्त प्रयासपरुषाणि न पौरुषाणि ॥ ५५ ॥

तस्मिन्निति ॥ सा तन्वी भैमी गणनादरिद्रैरसंख्यैर्गुणैः भृते पूर्णेऽपि तस्मिन्भूपे द्युतिमति हृदयबन्धं मनोऽभिलाषं नावाप । गुणवति तस्मिन्कथं न प्रापेत्यत आह—दैवे निरुन्धति कार्यप्रतिबन्धके सति प्रयासेन युद्धादियत्नेन परुषाणि दुःसहान्यपि पौरुषाणि पुरुषकाराः कार्यं प्रति निबन्धनतां कारणतां न वहन्ति न धारयन्ति । हन्त खेदे । दैवनिरोधाद्गुणवत्ताप्यनुरागहेतुर्नाभूदित्यर्थः । वागुरादिगुणेषु हरिणादिर्बन्धनं प्राप्नोति । अस्यास्तु हृदयं गुणेषु पतितमपि बन्धनं न प्रापेत्याश्चर्यमित्यर्थः ॥

ते निन्यिरे नृपतिमन्यमिमाममुष्मा-
दंसावतंसशिबिकांशभृतः पुमांसः ।
रत्नाकरादिव तुषारमयूखलेखां
लेखानुजीविपुरुषा गिरिशोत्तमाङ्गम् ॥५६॥

त इति ॥ अंसयोः स्कन्धयोरवतंसा भूषणीभूताः शिबिकांशास्तान्बिभ्रति ते पुमांसो यानवाहाः इमां भैमीममुष्माद्राज्ञः सकाशादन्यं नृपतिं निन्यिरे । तत्र दृष्टान्तः—लेखा देवा एवानुजीविपुरुषाः सेवकपुरुषा रत्नाकरात्तुषारमयूखलेखां चन्द्रकलां गिरिशोत्तमाङ्गं शंकरमूर्धानमिव । 'लेखा अदितिनन्दनाः' इत्यमरः ॥

एकैकमद्भुतगुणं धुतदूषणं च
हित्वान्यमन्यमुपगत्य परित्यजन्तीम् ।
एनां जगाद जगदञ्चितपादपद्मा
पद्मामिवाच्युतभुजान्तरविच्युतां सा ॥५७॥

एकैकमिति ॥ जगदञ्चितपादपद्मा त्रिलोकीपूजितचरणकमला सा सरस्वती एनां भैमीं जगाद । किंभूताम्—अद्भुता गुणा यस्य तम्, तथा—धुतदूषणं गतदूषणमेकैकं नृपं हित्वा अन्यमन्यं तादृशमेव नृपमुपगत्य प्राप्य परित्यजन्तीम् । तथा—अच्युतभुजान्तराद्विष्णुवक्षःस्थलाद्विच्युतां समागतां पद्मां लक्ष्मीमिव स्थिताम् । लक्ष्मीरपि चाञ्चल्यादेकैकं त्यक्त्वान्यमन्यं प्राप्य तमपि त्यजति । यथा लक्ष्मीर्विष्णुं विनान्यत्र स्थिरा न तथा भैमी नलं विनान्यत्र स्थिरा नेति सूचितम् ॥

ईशः कुशेशयसनाभिशये कुशेन
द्वीपस्य लाञ्छिततनोर्यदि वाञ्छितस्ते ।
ज्योतिष्मता सममनेन वनीघनासु
तत्त्वं विनोदय घृतोदतटीषु चेतः ॥ ५८ ॥

ईश इति ॥ हे कुशेशयं कमलं तस्य सनाभी तत्तुल्यौ शयौ हस्तौ तस्याः तत्संबुद्धिः, कुशेन कुशस्तम्बेन लाञ्छिततनोः चिह्नितवपुषो द्वीपस्य ईशः स्वामी यदि ते तव वाञ्छितोऽभीष्टस्तर्हि त्वं ज्योतिष्मतानेन राज्ञा समं सह वनीभिर्वनैर्घनासु निबिडासु घृतोदो घृतसमुद्रस्य तटीषु चेतो विनोदय हर्षय । निबिडच्छायेषु घृतसमुद्रतटेषु एतेन सार्धं विहर । एनं वृणीष्वेति भावः । घृतोद इति 'उदकस्योदः संज्ञायाम्' इत्युदादेशः । कुशेशय इति 'शयवास–' इत्यलुक् ॥

वातोर्मिदोलनचलद्दलमण्डलाग्र-
भिन्नाभ्रमण्डलगलज्जलजातसेकः ।
स्तम्बः कुशस्य भविताम्बरचुम्बिचूड-
श्चित्राय तत्र तव नेत्रनिपीयमानः ॥५९॥

वातेति ॥ हे भैमि, तत्र द्वीपे नेत्रनिपीयमानः नेत्राभ्यां सादरमवलोक्यमानः कुशस्तम्बः तव चित्रायाश्चर्याय भविता । किंभूतः—अम्बरचुम्बिचूडो गगनलग्नशिखः । तथा -अत एव वातोर्मीणां वातपरम्पराणां यद्दोलनं तेन चलन्ति चञ्चलानि दलानि पत्राणि तान्येव मण्डलाग्राः खड्गास्तैर्भिन्नं विदारितं यदभ्रमण्डलं तस्माद्गलता स्रवता जलेन जातः सेकः सेचनं यस्य । दलमण्डलस्य दलसमूहस्य अग्रैरिति वा ॥

पाथोधिमाथसमयोत्थितसिन्धुपुत्री-
पत्पङ्कजार्पणपवित्रशिलासु तत्र ।
पत्या सहावह विहारमयैर्विलासै-
रानन्दमिन्दुमुखि मन्दरकन्दरासु ॥ ६० ॥

पाथोधीति ॥ हे इन्दुमुखि, तत्र कुशद्वीपे त्वं मन्दरकन्दरासु पत्या सह विहारमयैः क्रीडाबहुलैः कटाक्षविक्षेपादिभिर्विलासैरानन्दमावह धारय । किंभूतासु—पाथोधेः समुद्रस्य माथसमये मन्थनकाले उत्थिता या सिन्धुपुत्री लक्ष्मीस्तस्याः पत्पङ्कजार्पणेन पवित्राणि शिलातलानि यासु । लक्ष्मीवत्त्वमपि शिलासोपानान्यलंकुर्वित्यर्थः । 'विहारभवैः' इति पाठे सुरतादिक्रीडासमुत्पन्नैरित्यर्थः ॥

आरोहणाय तव सज्ज इवास्ति तत्र
सोपानशोभिवपुरश्मवलिच्छटाभिः ।
भोगीन्द्रवेष्टशतघृष्टिकृताभिरब्धि-
ध्रुव्धाचलः कनककेतकगोत्रगात्रि ॥ ६१ ॥

आरोहणायेति ॥ हे कनककेतकं स्वर्णकेतकं तस्य गोत्रं सदृशं गात्रं यस्यास्तत्संबुद्धिः अनिगौरि, तत्र द्वीपे अब्धेः ध्रुव्धाचलो मन्थाचलो मन्दरः तव आरोहणाय सज्जः संनद्ध इवास्ति । किंभूतः—भोगीन्द्रो वासुकिस्तेन कृतं वेष्टशतं तेन कृता या घृष्टयः घर्षणानि तत्कृताभिरश्मवलिच्छटाभिः शिलाभङ्गिपरम्पराभिः कृत्वा सोपानैरिव शोभि वपुः स्वरूपं यस्य । आरोहणाय इवेति वा । 'ध्रुव्धस्वान्त–' इति ध्रुव्धः साधुः । गात्रीति, 'अङ्गगात्र–' इति ङीप् ॥

मन्था नगः स भुजगप्रभुवेष्टघृष्टि-
लेखावलद्धवलनिर्झरवारिधारः ।
त्वन्नेत्रयोः स्वभरयन्त्रितशीर्षशेष-
शेषाङ्गवेष्टिततनुभ्रममातनोतु ॥ ६२ ॥

मन्था इति ॥ हे भैमि, स मन्था नगो मन्दरः त्वन्नेत्रयोः स्वस्य मन्दरस्य भरेण यन्त्रितान्याक्रान्तानि शीर्षाणि मस्तका यस्य शेषो नागराजस्तस्य शेषेणावशिष्टेनाङ्गेन वेष्टिता तनुस्तस्य भ्रममातनोतु । किंभूतः—भुजगप्रभुर्वासुकिस्तस्य वेष्टेन घृष्टिर्घर्षणं तया कृतासु वलयाकारासु लेखासु वलयाकारेण वलन्त्यो धवलनिर्झरवारिधारा यस्मिन् । शेषस्य शुभ्रत्वाद्वारिधाराणां च रेखासु वलितत्वाद्भ्रान्तिः । शिरसि गाढं येनाक्रान्तः सर्पोऽवशिष्टेन तस्यैव जङ्घादि वेष्टयतीति सर्पजातिः । मन्थदोरकः शेष इति केचित् ॥

एतेन ते स्तनयुगेन सुरेभकुम्भौ
पाणिद्वयेन दिविषद्द्रुमपल्लवानि ।
आस्येन स स्मरतु नीरधिमन्थनोत्थं
स्वच्छन्दमिन्दुमपि सुन्दरि मन्दराद्रिः ६३

एतेनेति ॥ हे सुन्दरि, स मन्दराद्रिः ते एतेन स्तनयुगेन कृत्वा सुरेभ ऐरावतस्यस्य कुम्भौ, तथा–ते पाणिद्वयेन दिविषद्द्रुमः कल्पवृक्षस्तस्य पल्लवानि, तथा—ते आस्येनेन्दुमपि स्वच्छन्दं यथेच्छं स्मरतिति सर्वत्र संबन्धः । किंभूतमेतत्सर्वम्–नीरधिमन्थनोत्थं समुद्रमन्थनादुत्थितम् । समुद्रमथनसमये एतत्सर्वं दृष्टमा-

१ उद्भूतगुणम् ।

१ 'अत्र कविसंमतसादृश्यमूलाङ्भ्रान्तिवर्णनाङ्भ्रान्तिमदलंकारः' इति जीवातुः ।

सीत् । इदानीं त्वां दृष्ट्वा तत्सर्वं स्मरतु । ऐरावतकुम्भसदृशौ ते स्तनौ, कल्पवृक्षपल्लवसदृशं ते पाणिद्वयं, चन्द्रसदृशं ते मुखमिति भावः । अतः सुन्दरीति संबोधनम् । स्वच्छन्दमिति सर्वत्र संबन्धः । 'छन्दः पद्येऽभिलाषे च' इत्यमरः । 'नपुंसकमनपुंसकेन–' इत्येकवद्भावो नपुंसकत्वं च ॥

वेदैर्वचोभिरखिलैः कृतकीर्तिरत्रे
हेतुं विनैव धृतनित्यपरार्थयत्ने ।
मीमांसयेव भगवत्यमृतांशुमौलौ
तस्मिन्महीभुजि तयानुमतिर्न भेजे ॥ ६४ ॥

वेदैरिति ॥ तया भैम्या तस्मिन्महीभुजि अनुमतिः संमतिर्न भेजे । कया कस्मिन्निव—पूर्वमीमांसया भगवत्यमृतांशुमौलौ शिव इव । किंभूते—अखिलैर्लोकैर्वेदतुल्यैः सत्यैर्वचोभिः कृत्वा कृता कीर्तिः स्तुतिर्यस्य स कृतकीर्तिश्चासौ रत्नं चेति । कृतं कीर्तिरत्नं यस्येति वा । तथा–हेतुं कारणं विनैव धृतो नित्यं परार्थे परकार्ये यत्नो येन । स्वोपकारानपेक्षं कृतोपकारे । किंभूते शिवे–अखिलैश्चतुर्भिर्वेदैः वचोभिर्महावाक्यैः कृत्वा कृतं कीर्तिरत्नं यशोरत्नं यस्येति । तथा–हेतुं कारणमन्तरेण धृतनित्यपरार्थयत्ने । परमकारुणिक इत्यर्थः । मीमांसापि वेदं प्रति कर्तृत्वमात्रेणेश्वरमङ्गीकृतवती न तु सर्वथा नास्तीति । 'विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे । श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥' इति नमस्कारश्रवणात् ॥

तस्मादिमां नरपतेरपनीय तन्वीं
राजन्यमन्यमथ जन्यजनः स निन्ये ।
स्त्रीभावधावितपदामविमृश्य याच्ञा-
मर्थी निवर्त्य विधनादिव वित्तवित्तम् ६५

तस्मादिति ॥ अथ अनन्तरं स जन्यजनो वाहकलोकः स्त्रीभावेन स्त्रीत्वेन धावितपदां चालितचरणां गच्छतेति चरणचालनेन संज्ञापयन्तीमिमां तन्वीं कृशाङ्गीं भैमीं तस्मान्नरपतेरपनीयाकृष्य अन्यं राजन्यं निन्ये प्रापयामास । तत्र दृष्टान्तः–अर्थी याचकः अविमृश्य दातुं निर्धनत्वमविचार्य याच्ञां विधनाद्दरिद्राद्यिवर्त्य वित्तेन धनेन वित्तं प्रसिद्धं धनिनम् । वित्तं प्रसिद्धं वित्तं यस्य इति वा । एवंभूतमिव प्रापयन्तीत्यर्थः । किंभूतां याच्ञाम् 'यजयाचयतविच्छप्रच्छरक्षो नङ्' इत्यस्मिन्सूत्रे सर्वेषु पुंल्लिङ्गेषु पदेषु याच्ञाशब्दो नङन्तो व्युत्पादितः । शक्तिस्वाभाव्यात्स्त्रियां वर्तते इति स्त्रीस्वभावेन स्त्रीलिङ्गतया धावितं शोधितं पदं रूपं यस्यास्ताम् ॥

देवी पवित्रितचतुर्भुजवामभागा
वागालपत्पुनरिमां गरिमाभिरामाम् ।
अस्यारिनिष्कृपकृपाणसनाथपाणेः
पाणिग्रहादनुगृहाण गणं गुणानाम् ॥६६॥

देवीति ॥ पवित्रितः शोभितः चतुर्भुजवामभागो यया एवं भूता वाग्रूपा देवी पुनरिमां भैमीमालपदुवाच । किंभूताम्—गरिम्णा कुलशीलसौन्दर्यादिगौरवेण सरस्वत्यागमनाद्वा गौरवेण अभिरामां मनोज्ञाम् । हे भैमि, अरिषु निष्कृपः कृपाणेन खड्गेन सनाथो युक्तः पाणिर्यस्य एवंभूतस्यास्य पाणिग्रहात्परिणयात्स्वीयं गुणानां सौन्दर्यादीनां गणम् । अस्य गुणसङ्घं वानुगृहाण । तुल्यगुणस्यास्य लाभात् ॥

द्वीपस्य शाल्मल इति प्रथितस्य नाथः
पाथोधिना वलयितस्य सुराम्बुनायम् ।
अस्मिन्वपुष्मति न विस्मयसे गुणाब्धौ
रक्ता तिलप्रसवनासिकि नासि किं वा ६७

द्वीपस्येति ॥ सुरा एव मदिरैवाम्बु यस्य एवंभूतेन पाथोधिनाब्धिना वलयितस्य वेष्टितस्य शाल्मल इति प्रथितस्य द्वीपस्य पतिरयम् । हे तिलस्य प्रसवः पुष्पं तत्समाननासिकि, त्वं गुणाब्धौ गुणसमुद्रे वपुष्मन्नामनि । अथ च सुन्दरशरीरेऽस्मिन्राजनि न विस्मयसेऽद्भुतं किमिति न प्राप्नोषि । अपि त्वाश्चर्यं प्राप्तुमुचितम् । एवंविधेऽस्मिन् रक्ता वा किं नासि । अपि तु रक्ता भव । एनं वृणीष्वेत्यर्थः । सुरासमुद्रपतित्वं दोषः । शरीरधारिणि गुणसमुद्रे विस्मयो युक्तः । वपुष्मति, अतिशायने मतुप् । नासिकेति, 'नासिकोदर—' इति ङीप् ॥

विप्रे धयत्युदधिमेकतमं त्रसत्सु
यस्तेषु पञ्चसु बिभाय न सीधुसिन्धुः ।
तस्मिन्नेन च निजालिजनेन च त्वं
सार्धं विधेहि मधुरा मधुपानकेलीः ॥६८॥

विप्र इति ॥ यः सीधुसिन्धुः सुरासमुद्रः विप्रेऽगस्त्ये एकतमं क्षारजलार्धं धयति पिबति सति तेषु पञ्चसु दधिमण्डादिसमुद्रेषु अस्मानयं पास्यतीति त्रसत्सु सत्सु न बिभाय तत्रसे । ब्राह्मणस्य सुरापाननिषेधात् मां न पास्यतीति यो भयं तत्याज । एवं तस्मिन्नक्षये सीधुसमुद्रेऽनेन च राज्ञा सार्धं निजालिजनेन च सार्धं मधुरा रम्या मधुपानकेलीः मधुपानक्रीडा विधेहि कुरु । एतद्वरणे मधुपानं सुलभम् ॥

द्रोणः स तत्र वितरिष्यति भाग्यलभ्य-
सौभाग्यकार्मणमयीमुपदां गिरिस्ते ।
तद्द्वीपदीप इव दीप्तिभिरौषधीनां
चूडामिलज्जलदकज्जलदर्शनीयः ॥ ६९ ॥

द्रोण इति ॥ तत्र द्वीपे स प्रसिद्धः लक्ष्मणविशल्यीकरणार्थं हनूमता नीतो द्रोणनामा गिरिः भाग्येन सुकृतविशेषेण लभ्यं सौभाग्यसंबन्धि कार्मणं औषधीभिर्मूलैः वशीकरणं तद्रूपामुपदामुपायनं अन्यपरित्यागेन स्वयमेव पतिर्यथोपभुङ्क्ते तथा वशीकरणमौषधिरूपमुपहारं ते तुभ्यं वितरिष्यति । एवंविधमौषधं महता पुण्येन विना न लभ्यते तव तु तत्प्रीतिस्वादप्रयत्नेन तल्लाभो भविष्यति धन्या त्वमित्यर्थः । किंभूतः—औषधीनां मृतसंजीवन्यादीनां दीप्तिभिः तस्य द्वीपस्य दीप इव स्थितः । यतश्चूडासु शिखरेषु मिलन्तः संलग्ना जलदा एव कज्जलं तेन दर्शनीयः

१ 'अत्र कविसंगतसादृश्यस्मृतिनिबन्धनात्स्मरणालंकारः' इति जीवातुः । २ 'पूर्णोपमा' इति जीवातुः । ३ 'श्रीभाव' इति पठित्वा 'संपत्स्वभावेन' इति व्याख्यातं सुखावबोधायाम् ।

सुन्दरः। 'मूलकर्म तु कार्मणम्' इत्यमरः। वशीकरणे कज्जलादि भवति[1] ॥

तद्द्वीपलक्ष्मपृथुशाल्मलितूलजालैः
क्षोणीतले मृदुनि मारुतचारुकीर्णैः।
लीलाविहारसमये चरणार्पणानि
योग्यानि ते सरसमारसकोशमृद्वि ॥७०॥

तदिति ॥ हे सरसं नूतनं सारसं कमलं तस्य कोशो मुकुलं राशिर्वा तद्वन्मृद्वि सुकुमाराङ्गि, मारुतेन चारु संनिवेशविशेषेण निबिडं वा कीर्णैः प्रस्तारितैस्तस्य द्वीपस्य लक्ष्म चिह्नभूतः पृथुर्महाञ्शाल्मलिर्वृक्षस्तस्य तूलजालैः कार्पाससमूहैः कृत्वा मृदुनि क्षोणीतले लीलाविहारसमये विलासगमनकाले ते तव चरणार्पणानि योग्यानि। भवन्त्विति शेषः। अतिमृद्व्या हि अतिमृदुनि स्थले गतिर्युक्ता ॥

एतद्गुणश्रवणकालविजृम्भमाण-
तल्लोचनाञ्चलनिकोचनसूचितस्य।
भावस्य चक्रुरुचितं शिबिकाभृतस्ते
तामेकतः क्षितिपतेरपरं नयन्तः ॥ ७१ ॥

एतदिति ॥ ते शिबिकाभृतः भावस्य भैम्यभिप्रायस्योचितं योग्यं व्यापारं चक्रुः। किंभूतस्य—एतस्य राज्ञो गुणश्रवणकाले विजृम्भमाणा सा भैमी तस्या लोचनाञ्चलनिकोचनेन नेत्रप्रान्तसंकोचनेन सूचितस्य नृपालंकरणरत्नेषु दृष्टेन भैमीनेत्रसंकोचेन ज्ञापितस्य। किंभूतास्ते—एकतः क्षितिपतेरेकस्मान्नृपात्। अस्माद्वपुष्मत इत्यर्थः। तां भैमीमपरं राजानं नयन्तः प्रापयन्तः। नयतिर्द्विकर्मा ॥

तां भारती पुनरभाषत नन्वमुष्मि-
न्काश्मीरपङ्कनिभलग्नजनानुरागे।
श्रीखण्डलेपमयदिग्जयकीर्तिराजि-
राजद्भुजे भज महीभुजि भैमि भावम् ७२

तामिति ॥ भारती तां पुनरभाषत। ननु भैमि, त्वं अमुष्मिन्महीभुजि भावमनुरागं भज कुरु। किंभूते—काश्मीरपङ्कनिभेन कुङ्कुमानुलेपनव्याजेन लग्नः जनानामनुरागो यस्मिन्। तथा—श्रीखण्डलेपनमयी चन्दनानुलेपनरूपा दिग्जयजनिता कीर्तिराजिः कीर्तिपरम्परा तया राजन्तौ भुजौ यस्य। रागस्य लौहित्यात्कीर्तेश्च शुभ्रत्वात्कुङ्कुमत्वं चन्दनत्वं च युक्तम्। जनानुरागेणातिसमृद्धित्वं सूचितम् ॥

द्वीपं द्विपाधिपतिमन्दपदे प्रशास्ति
प्लक्षोपलक्षितमयं क्षितिपस्तदस्य।
मेधातिथेस्त्वमुरसि स्फुर सृष्टसौख्या
साक्षाद्यथैव कमला यमलार्जुनारेः ॥७३॥

द्वीपमिति ॥ हे द्विपाधिपवन्मत्तमातङ्गराजवन्मन्दपदेऽलसगमने भैमि, क्षितिपः प्लक्षाख्येन वृक्षेणोपलक्षितं द्वीपं प्रशास्ति पालयतितराम्। तत्तस्मात् त्वं अस्य मेधातिथिनाम्नो राज्ञ उरसि आलिङ्गनेन सृष्टसौख्या सती तथैव स्फुर राजस्व। यथा यमलार्जुनारेर्विष्णोरुरसि साक्षात्कमला सृष्टसौख्या सती स्फुरति। मेधा धारणावती बुद्धिरतिथिर्यस्य। अस्यैव त्वं योग्येत्येवकारो योज्यः। सृष्टसौख्यैवेति वा ॥

प्लक्षे महीयसि महीवलयातपत्रे
तत्रेक्षिते खलु तवापि मतिर्भवित्री।
खेलां विधातुमधिशाखविलम्बिदोला-
लोलाखिलाङ्गजनताजनितानुरागे ॥७४॥

प्लक्ष इति ॥ तत्र द्वीपे महीवलयस्यातपत्ररूपे छत्ररूपे महीयस्यतिमहति प्लक्षे ईक्षिते सति खलु निश्चितं तवापि खेलां दोलारूपां क्रीडां विधातुं कर्तुं बुद्धिर्भवित्री भविष्यति। किंभूते—अधिशाखं शाखासु विलम्बिन्यो दोलास्ताभिर्लोलं अखिलमङ्गं यस्याः तया जनतया जनितोऽनुरागो यस्मिन्। तस्यां समुदितोऽनुरागो येन वा। लोकं दोलारूढं दृष्ट्वा दोलाक्रीडायां तवापीच्छा समुदेष्यतीत्यर्थः ॥

पीत्वा तवाधरसुधां वसुधासुधांशु-
र्न श्रद्दधातु रसमिक्षुरसोदवाराम्।
द्वीपस्य तस्य दधतां परिवेषवेषं
सोऽयं चमत्कृतचकोरचलाचलाक्षि ॥७५॥

पीत्वेति ॥ हे चमत्कृतो भीतश्चकोरः तद्वच्चलाचले चञ्चले अक्षिणी यस्यास्तत्संबुद्धिः। सोऽयं वसुधायां सुधांशुर्भूचन्द्रो राजा तवाधरसुधामोष्ठामृतं पीत्वा इक्षुरसोदवारामिक्षुरससमुद्रोदकानां रसं स्वादं न श्रद्दधातु नाभिलषतु। किंभूतानां वाराम्—तस्य द्वीपस्य परिवेषवेषं परिवेषाकारं दधतां बिभ्रताम्। अन्यत्र चकोराश्चन्द्रस्य सुधां पिबन्ति, अत्र चन्द्र एव चकोराक्ष्यास्तवाधरसुधां पिबतीति चमत्कृतेत्यनेन सूचितम् ॥

सूरं न सौर इव नेन्दुमवीक्ष्य तस्मि-
न्भाभ्राति यस्तदितरत्रिदशानभिज्ञः।
तस्यैन्दवस्य भवदास्यनिरीक्षयैव
दर्शेऽभ्रतोऽपि न भवत्यवकीर्णिभावः ७६

सूरमिति ॥ तस्मिन्द्वीपे यश्चन्द्रभक्तो जन इन्दुमदृष्ट्वा नाभ्राति। यतः तस्मादितरोऽन्यो यस्त्रिदशो देवस्तस्यानभिज्ञश्चन्द्रातिरिक्तदेवानभिज्ञः। कः कमिव—सौरः सूर्यभक्तो जनः सूर्यव्यतिरिक्तदेवतानभिज्ञः सूरं सूर्यमदृष्ट्वा नेव नाभ्राति। तस्य ऐन्दवस्य इन्दुभक्तस्य चन्द्रलेखारहितेऽपि दर्शेऽभ्रतोऽपि भुज्रानस्यापि भवदास्यनिरीक्षयैव भवन्मुखचन्द्रदर्शनेनैवावकीर्णिभावो न भवति लुप्तत्वं न भवतु। चन्द्राधिकं भवन्मुखं दृष्ट्वैव भोजनादित्यर्थः।

---

१ अत्र 'कार्मणमयीमुपदाम्' इति परिणामालंकारः। आरोप्यमाणो यदीयस्तद्विषयकार्मणाकारपरिमाणेन प्रकृतप्रभुचित्तावर्जनोपयोगित्वात्। अस्य 'दीप इव' इत्युत्प्रेक्षया संसृष्टिः। तस्यास्तु 'जलदकज्जल' इति रूपकेण संकरः' इति जीवातुः। २ 'अत्रानुरूपयोगोक्तेः समालंकारः' इति जीवातुः।

एतदेव चन्द्रस्थाने भविष्यतीति भावः । सौरः, ऐन्दवः, इत्यत्र 'भक्तिः' इत्यण् ॥

उत्सर्पिणी न किल तस्य तरङ्गिणी या
त्वक्षेत्रयोरहह तत्र विपाशि जाता ।
नीराजनाय नवनीरजराजिरास्ता-
मस्राञ्जसानुरज राजनि राजमाने ॥ ७७ ॥

उत्सर्पिणीति ॥ तस्य द्वीपस्य या तरङ्गिणी विपाडनाम्नी नदी प्रावृट्कालेऽप्युत्सार्पिणी कूलंकषा नेति अहह आश्चर्ये किलेति । अन्यद्वीपे प्रसरन्ती दृश्यते, अत्र तु नेति पुराणप्रसिद्धिः । तत्र तस्यां विपाशि नद्यां जाता नवा तत्कालं विकसिता नीरजराजिः कमलपङ्क्तिस्त्वक्षेत्रयोर्नीराजनायास्तां भवतु । त्वं राजमाने शोभमानेऽस्मिन्राजनि अद्य मया स्वत एवानुरज अनुरागं प्रामुहि । अस्यां नद्यां पूराभावात्सदा कमलानां सत्त्वान्नीराजनमप्यविच्छिन्नं भविष्यतीति नोत्सार्पिणीत्यनेन सूचितम् । अत एवैनं भजेत्यर्थः । नीराजनायेति नेत्रापेक्षया कमलानां हीनत्वं सूचितम् । अनुरज इति, 'रञ्जेश्च' इति नलोपः ॥

एतद्यशोभिरखिलेऽम्बुनि सन्तु हंसा
दुग्धीकृते तदुभयव्यतिभेदमुग्धाः ।
क्षीरे पयस्यपि पदे द्वयवाचिभूयं
नानार्थकोषविषयोऽद्य मृषोद्यमस्तु ॥७८॥

एतदिति ॥ हंसाः अखिलेऽम्बुनि एतद्यशोभिर्दुग्धीकृते सति तयोरुभयोः क्षीरनीरयोर्व्यतिभेदः परस्परविवेकस्तद्विषये मुग्धा मूर्खाः सन्तु । सर्वपयसि दुग्धरूपे जाते सति प्रतियोगिनोऽभावात्सर्वं दुग्धत्वेन जानन्त्वित्यर्थः । तथा—नानार्थकोषविषयः नानार्थकोषसंग्राहिनिघण्टोरमरकोषादेर्विषयः प्रतिपाद्यं क्षीरे पदे पयस्यपि पदे विषये द्वयवाचिभूयमुभयार्थवाचित्वम् । 'पयः क्षीरं पयोऽम्बु च' इति । अद्य त्वया एतस्मिन्नङ्गीकृते सति मृषोद्यं मिथ्यावाक्यमस्तु भवतु । अस्य यशसा क्षीरनीरयोरेकत्वे कृते प्रतियोगिनो जलस्याभावाद्द्वितीयस्य अभिधेयस्याभावाद्व्यर्थवाचित्वमयुक्तमित्यर्थः । एवंविधं यशोऽन्यस्य कस्यापि न विद्यत इति भावः ॥

ब्रूमः किमस्य नलमप्यलमाजुहूषोः
कीर्तिं स चैप च समादिशतः स्म कर्तुम् ।
स्वद्वीपसीमसरिदीश्वरपूरपार-
वेलाचलाक्रमणविक्रममक्रमेण ॥ ७९ ॥

ब्रूम इति ॥ हे भैमि, वयं सर्वोत्कृष्टं नलमपि अलमत्यर्थमाजुहूषोः स्पर्धमानस्यास्य संबन्धि किं ब्रूमः । अस्य चरितं वागगोचरमित्यर्थः । स्पर्धामेवाह—स च नलः, एष च मेधातिथिश्चोभौ कीर्तीः स्वयशांस्यक्रमेण युगपत्स्वद्वीपयोर्जम्बूप्लक्षद्वीपयोः सीमायां मर्यादारूपो वा यः सरिदीश्वरः समुद्रस्तस्य पूरः प्रवाहस्तस्य पारवेलायां परतीरमर्यादायां योऽचलः पर्वतस्तस्याक्रमणविक्रममारोहणलक्षणं पराक्रमं कर्तुं समादिशतः स्म संदिष्टवन्तौ । त्वदीया कीर्तिर्दूरगामिनी मदीया वेति निर्णेतुं युगपत्कीर्ती प्रेषितवन्ताविति यावत् । नलस्पर्धयैतस्य न्यूनत्वं सूचितम् । आह्वातुमिच्छति, न त्वाह्वयते इति वा । 'वेलाबला–' इति पाठे वेलाया बलेनाक्रमणमित्यर्थः । नलम्, 'न लोका–' इति षष्ठीनिषेधः ॥

अम्भोजगर्भरुचिराथ विदर्भसुभ्रू-
स्तं गर्भरूपमपि रूपजितत्रिलोकम् ।
वैराग्यरूक्षमवलोकयति स्म भूपं
दृष्टिः पुरत्रयरिपोरिव पुष्पचापम् ॥ ८० ॥

अम्भोजेति ॥ अथ अम्भोजस्य गर्भो मध्यमत्यद्भुचिरा सातिगौरी विदर्भसुभ्रूः रूपेण सौन्दर्येण जितत्रिलोकं गर्भरूपं वयःसंधौ वर्तमानं युवानमपि तं भूपं वैराग्येणाननुरागेण रूक्षं यथा तथावलोकयति स्म । अनुरक्ता नासीदित्यर्थः । का कमिव—पुरत्रयरिपोर्हरस्य दृष्टिः पुष्पचापं काममिव । स्वप्रियनलस्पर्धितया सक्रोधत्वात्परुषेक्षणं ज्ञेयम् । 'द्विगोः' इति ङीप्विधेः संज्ञापूर्वकत्वेनानित्यत्वाद्बहुव्रीहिणा वा जितत्रिलोकमिति समर्थनीयम् ॥

ते तां ततोऽपि चकृषुर्जगदेकदीपा-
दंसस्थलस्थितसमानविमानदण्डाः ।
चण्डद्युतेरुदयिनीमिव चन्द्रलेखां
सोत्कण्ठकैरववनीसुकृतप्ररोहाः ॥ ८१ ॥

त इति ॥ ते अंसस्थले स्थिताः समानास्तुल्या विमानदण्डा येषां ते शिबिकाभृतः तां भैमीं तेजस्वित्वाज्जगदेकदीपालोकत्वैकदीपरूपात्ततोऽपि तस्मादपि राज्ञः सकाशाच्चकृषुः । अन्यं प्रापयामासुरित्यर्थः । के कस्मात्कामिव—सोत्कण्ठा उत्सुका कैरववनी कुमुदवनी तस्याः सुकृतप्ररोहाः पुण्याङ्कुराः चण्डद्युतेः सूर्यादेशं सूर्ये प्रविष्टामुदयिनीमुदयोन्मुखां शुक्लपक्षे प्रतिपदादिक्रमेण चन्द्रलेखामिव समाकर्षन्ति ॥

भूपेषु तेषु न मनागपि दत्तचित्ता
विस्मेरया वचनदेवतया तयाथ ।
वाणीगुणोदयतृणीकृतपाणिवीणा-
निक्काणया पुनरभाणि मृगेक्षणा सा ॥८२॥

भूपेष्विति ॥ अथ तया वचनदेवतया सरस्वत्या मृगेक्षणा पुनरभाणि उक्ता । किंभूता—तेषु भूपेषु मनागपि न दत्तचित्ता । अत एव किंभूतया—विस्मेरया विस्मितया । तथा—वाण्याः गुणोदयेन माधुर्यादिगुणोदयेन कृत्वा तृणीकृतो जितः पाणौ स्थितायां वीणाया निक्काणः स्वनो यया ॥

यन्मौलिरत्नमुदितामि स एष जम्बू-
द्वीपस्त्वदर्थमिलितैर्युवभिर्विभाति ।

---

१ अत्र 'व्रतभङ्गदोषाभावेनैव तन्मुखेन्दुभ्रमाद्भ्रान्तिमदलंकारो व्यज्यते इति वस्तुनाऽलंकारध्वनिः' इति जीवातुः । २ अत्र 'अखिलेऽम्बुनि दुग्धीकृते' इति सामान्यालंकारः । तदुपजीवनेन हंसानां क्षीरनीरविवेकसंबन्धेऽपि क्षीरपयःपदयोरप्यर्थद्वयसंबन्धे तदसंबन्धरूपातिशयोक्तिद्वयोत्थापनात्संकरः' इति जीवातुः ।

दोलायितेन बहुना भवभीतिकम्प्रः
कंदर्पलोक इव खात्पतितस्त्रुटित्वा ॥८३॥

यन्मौलीति ॥ हे भैमि, यस्य मौलिरत्नं शिरोरत्नं त्वं उदितास्युत्पन्नासि, स एष जम्बूद्वीपः त्वदर्थमिलितैस्त्वदर्थमागतैर्युवभिः कृत्वा भवाद्वराङ्गीत्या कम्प्रः कम्पनशीलः बहुना दोलायितेन दोलनेन कृत्वा त्रुटित्वा विच्छिद्य खात्पतितः कंदर्पलोक इव विभाति । सर्वेऽपि युवानः कामतुल्या इत्यर्थः । द्वीपे रत्नमुत्पद्यते । अन्यदप्यान्तरालिकं वस्तु बहुना दोलनेन गगनात्त्रुटित्वा पतति ॥

विष्वग्वृतः परिजनैरयमन्तरीपै-
स्तेषामधीश इव राजति राजपुत्रि ।
हेमाद्रिणा कनकदण्डमहातपत्रः
कैलासरश्मिचयचामरचक्रचिह्नः ॥ ८४ ॥

विष्वगिति ॥ हे राजपुत्रि, अयं जम्बूद्वीपः तेषां शाकद्वीपादीनामधीश इव राजेव राजति । राजचिह्नमेवाह—किंभूतः—अन्तरीपैः सिंहलादिद्वीपैरेव परिजनैः सेवकैर्विष्वक् सर्वतो वृतः । तथा—हेमाद्रिणा मेरुणा कृत्वा कनकदण्डं सुवर्णदण्डं महातपत्रं महच्छत्रं यस्य । तथा—कैलासस्य रश्मिचयः किरणसमूहरूपं चामरचक्रं चामरसङ्घश्चिह्नं यस्य । अन्योऽपि राजा परिजनैः सेव्यते । कनकदण्डातपत्रश्च चामरचिह्नितश्च भवति ॥

एतत्तरुस्तरुणि राजति राजजम्बूः
स्थूलोपलानिव फलानि विमृश्य यस्याः ।
सिद्धस्त्रियः प्रियमिदं निगदन्ति दन्ति-
यूथानि केन तरुमारुरुहुः पथेति ॥ ८५ ॥

एतदिति ॥ हे तरुणि, एतस्य जम्बूद्वीपस्य चिह्नं तरू राजजम्बू राजति । एष कः—सिद्धस्त्रियो यस्या जम्ब्वाः फलानि स्थूलोपलानिव स्थूलपाषाणतुल्यानि विमृश्य दृष्ट्वा प्रियं भर्तारं प्रति इदं इतीदृशं निगदन्ति पृच्छन्ति । इति किम्—हे प्रिय, दन्तियूथानि हस्तिसमूहाः केन पथा तरुं जम्बूवृक्षमारुरुहुरारूढाः । जम्बूसंबन्धादेवास्य जम्बूद्वीप इति नाम । राजजम्बूः, राजदन्तादित्वात्परनिपातः ॥

जाम्बूनदं जगति विश्रुतिमेति मृत्स्ना
कृत्स्नापि सा तव रुचा विजितश्रि यस्याः ।
तज्जाम्बवद्रवभवास्य सुधाविधाम्बु-
र्जेम्बूसरिद्वहति सीमनि कम्बुकण्ठि ॥८६॥

जाम्बूनदमिति ॥ भोः कम्बुकण्ठि शङ्खवद्रेखात्रययुतकण्ठि, 'रेखात्रयाङ्किता ग्रीवा कम्बुग्रीवेति कथ्यते' इति हलायुधः । सा जम्बू सरित् अस्य जम्बूद्वीपस्य सीमनि मर्यादायां वहति । किंभूता—तस्या जम्ब्वाः जाम्बवानि फलानि तेषां द्रवो रसः तस्माद् भवा जाता । तथा—सुधाया विधा प्रकारो यस्य तादृशमम्बु यस्याः पीयूषतुल्यजला । सा का—यस्या जम्बूनद्याः कृत्स्ना सकलापि मृत्स्ना प्रशस्ता मृत्तिका जगति तव रुचा कान्त्या विजितश्रि जितशोभं जम्बूनद्या इदं जाम्बूनदं सुवर्णमिति विश्रुतिमेति । यन्मृत्तिका उत्तमं सुवर्णं, तदपि त्वदङ्गकान्त्या जितम् । 'प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका' इत्यमरः । 'मृदस्तिकन्' सस्तौ प्रशंसायाम्' इति स्नप्रत्ययः । जाम्बवम्, 'जम्ब्वा वा' इत्यण् । कम्बुकण्ठि 'अङ्गगात्रकण्ठेभ्यः—' इति ङीष् ॥

अस्मिञ्जयन्ति जगतीपतयः सहस्र-
मस्रास्रुसार्द्ररिपुतद्वनितेषु तेषु ।
रम्भोरु चारु कतिचित्तव चित्तबन्धि-
रूपान्निरूपय मुदाहमुदाहरामि ॥ ८७ ॥

अस्मिन्निति ॥ अस्मिन्द्वीपे सहस्रमनेके जगतीपतयो राजानो जयन्ति सर्वोत्कर्षेण वर्तन्ते । हे रम्भोरु, अस्रास्रुभ्यां रक्तनेत्राम्बुभ्यां यथाक्रमं सार्द्रा रिपवस्तेषां वनिताश्च येषां तेष्वतिशूरेषु राजसु मध्येऽहं कतिचिद्राज्ञ उदाहरामि चारु वदामि । त्वं चारु वा तान् मुदा निरूपय पश्य । किंभूतान्—तव चित्तबन्धिरूपान्मनोहारिसौन्दर्यान् ॥

प्रत्यर्थियौवतवतंसतमालमालो-
न्मीलत्तमःप्रकरतस्करशौर्यसूर्ये ।
अस्मिन्नवन्तिनृपतौ गुणसंततीनां
विश्रान्तिधामनि मनो दमयन्ति किं ते ८८

प्रत्यर्थीति ॥ हे दमयन्ति, गुणसंततीनां सौन्दर्यादिगुणसङ्घानां विश्रान्तिधामनि विश्रान्तिस्थानेऽस्मिन्नवन्तिनृपतौ मनः किं वर्तत इति शेषः । किंभूते—प्रत्यर्थिनां यौवतं स्त्रीसमूहः तस्य वतंसभूतास्तमालमाला एवोन्मीलन्ति प्रकटीभूतानि तमांसि तेषां प्रकरः समूहस्तस्य तस्करो विनाशकः शौर्यमेव सूर्यो यस्य । वैरिणां मृत्युरूपः । वीरानुरागिण्यो हि योषित इति प्रायेणास्मिन्ननुरक्तासीति मम प्रतिभातीति युक्तमिति भावः ॥

तत्रानुतीरवनवासितपक्षिविप्रा
शिप्रा तवोर्मिभुजया जलकेलिकाले ।
आलिङ्गनानि ददती भविता वयस्या
हास्यानुबन्धिरमणीयसरोरुहास्या ॥ ८९ ॥

तत्रेति ॥ तत्र अवन्त्यां शिप्रा नदी तव वयस्या सखी भविता भविष्यति । (किंभूता—) अनुतीरं तीरसमीपे वनेषु वासिनस्तपक्षिनो विप्रा यस्याः । तथा—जलकेलिकाले जलक्रीडासमये ऊर्मिभुजया तरङ्गबाहुना तवालिङ्गनादि ददती । तथा—हास्यस्य विकारस्यानुबन्धो नैरन्तर्यं तेन रमणीयं सरोरुहं कमलमेवास्यं यस्याः । तीरमनु समया तीरवदायतानि वेति 'अनुर्यत्समया' 'यस्य चायामः' इति वाव्ययीभावः ॥

---

१ 'अत्र जम्बूफलेषु दन्तिभ्रमोक्त्या भ्रान्तिमदलंकारः' इति जीवातुः ।

१ 'तस्मिन्' इति जीवातुसंमतः पाठः ।

अस्याधिशय्य पुरमुज्जयिनीं भवानी
जागर्ति या सुभगयौवतमौलिमाला ।
पत्याऽर्धकायघटनाय मृगाक्षि तस्याः
शिष्या भविष्यसि चिरं वरिवस्ययाऽपि ९०

अस्येति ॥ हे मृगाक्षि, या भवानी पार्वती अस्य उज्जयिनीपुरमधिशय्याधिष्ठाय जागर्ति स्फुरद्रूपा वर्तते । किंभूता—सुभगं सुन्दरं यौवतं स्त्रीवृन्दं तस्य मौलिमाला शिरोमाला । त्वं तस्या भवान्या वरिवस्यया शुश्रूषया एतेन पत्या अर्धकायघटनाय शिष्यापि भविष्यसि । एतद्वरणेन प्राणेशार्धशरीरत्वं सुलभमित्यर्थः । रूपेण शिष्या जातैव सेवयापि शिष्या भविष्यसीति चापेरर्थः । स्वीयं प्राणेशार्धत्वं तवापि करिष्यतीत्यर्थः । पुरम् 'अधिशीङ्—' इत्याधारस्य कर्मत्वम् । भवानी 'इन्द्रवरुण—' इति पुंयोगे ङीषानुक ॥

निःशङ्कमङ्कुरिततां रतिवल्लभस्य
देवः स्वचन्द्रकिरणामृतसेचनेन ।
तत्रावलोक्य सुदृशां हृदयेषु रुद्र-
स्तद्देहदाहफलमाह स किं न विद्मः ॥९१॥

निःशङ्कमिति ॥ तत्रोज्जयिन्यां स देवो रुद्रः स्वचन्द्रकिरणामृतसेचनेन सुदृशां हृदयेषु रतिवल्लभस्य कामस्य निःशङ्कं निर्भयमङ्कुरिततां प्रादुर्भावमवलोक्य तद्देहदाहस्य फलं प्रयोजनं किमाह किं ब्रूते वयं तत् न विद्मः । तत्रत्याः स्त्रियः सर्वदा सकामा दृष्टा मया कृतः कामदाहो व्यर्थ एव जात इत्यर्थः । पुनः सहम्बधोत्पत्तेः ॥

आगःशतं विदधतोऽपि समिद्धकामा
नाधीयते परुषमक्षरमस्य वामाः ।
चान्द्री न तत्र हरमौलिशयालुरेका-
नध्यायहेतुतिथिकेतुरपैति लेखा ॥ ९२ ॥

आग इति ॥ वामाः स्त्रियः आगःशतं सपत्नीसंभोगादिनापराधसहस्रं विदधतोऽपि कुर्वतोऽप्यस्य राज्ञः परुषं निष्ठुरमक्षरं नाधीयते न ब्रुवते । यतः—समिद्धकामाः । सकामत्वादस्यापराधं न गणयन्तीति भावः । वामा इत्यनेन वक्रस्वभावत्वात्परुषभाषणयोग्यत्वेऽपि सकामत्वान्नोचुरित्यर्थः । अनध्याये हेतुमाह—तत्रोज्जयिन्यां हरमौलौ शयालुः स्थिता अनध्यायहेतुस्थितिः प्रतिपत् तस्याः केतुश्चिह्नं चान्द्री एका लेखा कला नापैति न गच्छति । सदा तत्र शंभोः सत्वाच्चन्द्रकलाया अपि सत्वाच्चन्द्रकलादर्शनात्समुत्पन्नकामाः सत्यः परुषं न भाषन्त इति भावः । अथ च 'प्रतिपत्पाठशीलस्य' इति वचनात्सर्वानध्यायापेक्षया प्रतिपदो मुख्यत्वम् । सर्वास्वपि तिथिषु शुक्लप्रतिपद्वुद्धेरक्षरमपि न पठन्तीति युक्तमित्यर्थः । आगःशतकारित्वमेवास्य दोषः ॥

भूपं व्यलोकत न दूरतरानुरक्तं
सा कुण्डिनावनिपुरंदरनन्दिनी तम् ।
अन्यानुरागविरसेन विलोकनाद्वा
जानामि सम्यगविलोकनमेव रम्यम् ॥९३॥

भूपमिति ॥ सा कुण्डिनावनिपुरंदरस्य भीमस्य नन्दिनी पुत्री दूरतरं सुतरामनुरक्तम् (अपि) सानुरागमपि तं भूपं न व्यलोकयत् । वा यस्मादन्यस्मिन्नलेऽनुरागेण तदतिरिक्ते विरसेन विगतेन रसेन अननुरागेण विलोकनात् विलोकनापेक्षयाविलोकनं सर्वथानवेक्षणमेव रम्यं श्रेष्ठं जानामि मन्ये । यत्रानुरागो नास्ति तद्विलोकनेनापि प्रयोजनं नास्तीत्यर्थः ॥

भैमीङ्गितानि शिबिकामधरे वहन्तः
साक्षान्न यद्यपि कथंचन जानते स्म ।
जज्ञुस्तथापि सविधस्थितसंमुखीन-
भूपालभूषणमणिप्रतिबिम्बितेन ॥ ९४ ॥

भैमीति ॥ अधरेऽधोभागे शिबिकां वहन्तो दधाना भैमीङ्गितानि जृम्भणादीनि अनुरागचिह्नानि यद्यपि साक्षात् कथंचन केनापि प्रकारेण न जानते स्म, तथापि सविधे समीपे स्थिताः संमुखीना भूपालास्तेषां भूषणमणिषु रत्नादिषु प्रतिबिम्बितेन हेतुना जज्ञुः । अननुरागचिह्नानि प्रतिबिम्बवशाज्जानते स्मेत्यर्थः । संमुखं दृश्यतेऽस्मिन्नित्यत्र प्रतिबिम्बाधिकरणे रत्नादौ 'यथामुखसंमुखस्य दर्शनः खः' इति खः । भूषणमणीनां विशेषणं वा ॥

भैमीमवापयत जन्यजनस्तदन्यं
गङ्गामिव क्षितितलं रघुवंशदीपः ।
गाङ्गेयपीतकुचकुम्भयुगां च हार-
चूडासमागमवशेन विभूषितां च ॥ ९५ ॥

भैमीमिति ॥ जन्यजनः वाहकसङ्घः भैमीं तस्मादन्यं नृपमवापयत । कः का किमिव—रघुवंशदीपो भगीरथः गङ्गां क्षितितलमिव । किंभूतां भैमीं गङ्गां च—गाङ्गेयं सुवर्णं तद्वत्पीतं गौरं कुचकुम्भयुगं यस्याः । गाङ्गेयाभ्यां स्कन्दभीष्माभ्यां पीतं कुचकुम्भयुगं यस्याः उभयोः पुत्रत्वात् । तथा—हारो मुक्काभूषणं कण्ठस्थितम्, चूडा बाहुभूषणं शिरःस्थितं वा भूषणं तयोः समागमवशेन विभूषितां शोभमानाम् । हरस्येयं हारी चूडा शिरोभागस्थस्याः समागमवशेन विभूषितामलंकृताम् । विशेषेण भुवि उषितां च । गाङ्गेयः 'स्त्रीभ्यो ढक्' । हारी चासौ चूडा च । पुंवद्भावः[1] ॥

तां मत्स्यलाञ्छनदरोञ्छितचापभासा
नीराजितभ्रुवमभाषत भाषितेशा ।
व्रीडाजडे किमपि मूढय चेतसा चे-
त्क्रीडारसं वहसि गौडविडौजसीह ॥९६॥

तामिति ॥ भाषितस्य वाचः ईशा वाणी तां भैमीमभाषत । किंभूताम्—मत्स्यलाञ्छनेन कामेन दूरं ईषदाञ्छितस्याकृष्टस्य चापस्य भासा कान्त्या नीराजिते भ्रुवौ यस्यास्ताम् । किमुवाचेत्यत आह—हे व्रीडाजडे लज्जयाप्रगल्भे, इहास्मिन्गौडविडौजसि

---

१ 'कटु.' इति सुबोधबोधासंमतः पाठः । २ 'दरांचित' इति जीवातुसुखावबोधासंमतः पाठः ।

गौडदेशाधीशे गौडेन्द्रे चेतसा चेत् क्रीडारसमुपभोगेच्छां वहसि लज्जया साक्षाच्चेन्न कथयसि तथापि किमपि कटाक्षादिना मां सूचय बोधय । ततोऽहमेनं वर्णयिष्यामीति ॥

एतद्यशोभिरमलानि कुलानि भासां
तथ्यं तुषारकिरणस्य तृणीकृतानि ।
स्थाने ततो वसति तत्र सुधाम्बुसिन्धौ
रङ्कुस्तदङ्कुरवनीकवलाभिलाषात् ॥ ९७ ॥

एतदिति ॥ हे भैमि, एतस्य यशोभिस्तुषारकिरणस्य इन्दोः भासां किरणानाममलानि शुभ्राणि कुलानि तृणीकृतानीति तथ्यं सत्यम् । ततस्तस्मादेव हेतो रङ्कुः चिह्नहरिणः सुधालक्षणमम्बु तस्य सिन्धौ समुद्रे तत्र तस्मिंश्चन्द्रे तेषां कान्तितृणानामङ्कुरास्तेषां वनी वृन्दं तस्याः कवलाभिलाषाद्ग्रासाभिलाषाद्वसति इदं स्थाने उचितम् । मृगो हि स्वादुजलतृणाङ्कुरबहुले देशे वसति चन्द्ररूपे स्थाने इति वा । अतितरामयं यशस्वीति भावः ॥

आलिङ्गितः कमलवत्करकस्त्वयाऽयं
श्यामः सुमेरुशिखयेव नवः पयोदः ।
कंदर्पमूर्धरुहमण्डनचम्पकस्र-
ग्दामत्वदङ्गरुचिकञ्चुकितश्चकास्तु ॥ ९८ ॥

आलिङ्गित इति ॥ हे भैमि, त्वया आलिङ्गितोऽयं नृपः नवः पयोदो मेघ इव चकास्तु भासताम् । किंभूतः—भाग्यचिह्नं कमलं तद्वान्करो यस्य । तथा—स्वभावाच्छ्यामः । तथा—कंदर्पस्य मूर्धरुहाः केशास्तेषां मण्डनं चम्पकपुष्पस्रग्दाम तद्वत् या त्वदङ्गरुचिः । स्रग्दामरूपा मदनोदयकारिणी अतिगौरी त्वदीयाङ्गकान्तिर्वा । तया कञ्चुकितः संवलितः । मेघोऽपि—कमलं जलं तद्वत्यः करका वर्षोपला यस्य । तथा—सजलत्वाच्छीलः । तथा—सुमेरुशिखया आलिङ्गितः संबद्धः । विद्युता संवलितश्च । गौरश्यामयोः संबन्धः सुतरां शोभते । स्रग्दामेति समुदितो मालावाचकः शब्दः ॥

एतेन संमुखमिलत्करिकुम्भमुक्ताः
कौक्षेयकाभिहतिभिर्विबभुर्विमुक्ताः ।
एतद्भुजोष्मभृशनिःसहया विकीर्णाः
प्रस्वेदबिन्दव इवारिनरेन्द्रलक्ष्म्या ॥ ९९ ॥

एतेनेति ॥ हे भैमि, एतेन राज्ञा कौक्षेयकाभिहतिभिः खड्गप्रहारैः कृत्वा विमुक्ताः कुम्भस्थलेभ्यो भूमौ पातिताः संग्रामार्थं संमुखं मिलतामागच्छतां करिणां कुम्भस्थलस्था मुक्ता मुक्ताफलानि एतस्य राज्ञः भुजोष्मणो बाहुप्रतापस्य भृशं अतिशयेन निःसहया सोढुमसमर्थया अरिनरेन्द्रा एतस्य वैरिणो राजानस्तेषां लक्ष्म्या विकीर्णा विसृष्टाः प्रस्वेदबिन्दवः प्रकृष्टघर्मोदबिन्दव इव विबभुः । हस्तियोधित्वादतिशूरोऽगमिति भावः । 'कौक्षेयको मण्डलाग्रः' इत्यमरः । कुक्षौ भवः 'कुलकुक्षि–' इति खड्गेऽभिधेये ढक्प्र ॥

आश्चर्यमस्य ककुभामवधीनवाप-
दाजानुगाद्भुजयुगादुदितः प्रतापः ।
व्यापत्सदाशयविसारितसप्ततन्तु-
जन्मा चतुर्दश जगन्ति यशःपटश्च ॥१००॥

आश्चर्यमिति ॥ अस्य आजानुगाजानुपर्यन्तगामिनो दीर्घाद्भुजयुगात् उदितः प्रतापः ककुभां दिशामवधीन्प्रान्तानवापप्राप एतदाश्चर्यम् । तथा—संश्वासावाशयश्च तेन शुचिना चित्तेन विसारिताः कृताः सप्ततन्तवो मखास्तेभ्यो जन्म यस्य एवंभूतो यशःपटः चतुर्दश जगन्ति व्यापत् एतदप्याश्चर्यम् । अस्य राज्ञो दिक्प्रान्तगामि—चतुर्दशजगद्व्यापिनोः प्रताप यशःपटयोर्दर्शनादेवाश्चर्यम् । अथवा—कारणगुणानां कार्ये समवायस्यावश्यकत्वाज्जानुपर्यन्तगामिनो भुजयुगादुत्पन्नस्य प्रतापस्यातिदूरदिक्प्रान्तगामित्वादाश्चर्यम् । तथा—सदा सर्वदा शयेन हस्तेन प्रसारिताः सप्तसंख्यास्तन्तवस्तेभ्योऽल्पपरिमाणेभ्यः कारणेभ्यः समुत्पन्नस्य पटस्य चतुर्दशजगद्व्यापित्वान्महदाश्चर्यमित्यर्थः । एवंविधः प्रतापवान्यशस्वी चान्यः कोऽपि नास्तीति भावः । 'सप्ततन्तुर्मखः क्रतुः' इत्यमरः ॥

औदास्यसंविदवलम्बितशून्यमुद्रा-
मस्मिन्दृशोर्निपतितामवगम्य भैम्याः ।
स्वेनैव जन्यजनतान्यमजीगमत्तां
सुज्ञं प्रतीङ्गितविभावनमेव वाचः ॥१०१॥

औदास्य इति ॥ जन्यजनता जन्यजनसमूहः स्वेनैव वचनं विना आत्मनैव तां भैमीमन्यं नृपमजीगमत्प्रापयामास । किं कृत्वा—अस्मिन्नृपे निपतितां भैम्या दृशोरौदास्यस्य संवित् बुद्धिः इयति वर्णने कृतेऽप्यनवलोकनेनौदास्यज्ञानं तयावलम्बिता शून्यमुद्रा तां प्रेमराहित्यचिह्नं (ताम्) अवगम्य ज्ञात्वा । आज्ञां विना कथं नीतवान् । अत्रार्थेऽर्थान्तरन्यासमाह—सुज्ञं पण्डितं प्रति इङ्गितविभावनं चेष्टितज्ञापनमेव वाच उपदेशाः । उदास्त इत्युदासः पचाद्यजन्तः ब्राह्मणादित्वाष्ट्यञ् ॥

एतां कुमारनिपुणां पुनरप्यभाणी-
द्वाणी सरोजमुखि निर्भरमारभस्व ।
अस्मिन्नसंकुचितपङ्कजसख्यशिक्षा-
निष्णातदृष्टिपरिरम्भविजृम्भितानि[1] १०२

एतामिति ॥ वाणी सरस्वती कुमारी चासौ निपुणा च नलान्यतारतम्यज्ञा तामेतां पुनरपि इत्यभाणीत् । हे सरोजमुखि, अस्मिन्नृपे असंकुचितस्य विकसितस्य पङ्कजस्य सख्यशिक्षायां सादृश्याभ्यासे निष्णाता निपुणा दृष्टिः । विकसितकमलतुल्येत्यर्थः । तया तस्या वा परिरम्भविजृम्भितान्यालिङ्गनविलासाञ्चिरं सुतरामारभस्व । एनं सादरमवलोकयेति भावः ॥

प्रत्यर्थिपार्थिवपयोनिधिमाथमन्थ-
पृथ्वीधरः पृथुरयं मथुराधिनाथः ।

१ 'विजृम्भणानि'—इति जीवातुसुखावबोधासंमतः पाठः ॥

अश्मश्रुजातमनुयाति न शर्वरीशः
श्यामाङ्ककर्बुरवपुर्वदनाब्जमस्य ॥ १०३ ॥

प्रत्यर्थीति ॥ हे भैमि, अयं पृथुनामा मथुराया अधिनाथो राजा । किंभूतः—प्रत्यर्थिपार्थिवाः शत्रुनृपास्त एव पयोनिधयस्तेषां माथे मथने मन्थपृथ्वीधरः मन्थशैलो मन्दरः । तथा—शर्वरीशश्चन्द्रः अस्याश्मश्रुजातमनुत्पन्नश्मश्रु कचरहितं वदनाब्जं नानुयाति नानुकरोति । यतः—श्यामेनाङ्केन कलङ्केन कर्बुरं विचित्रं वपुर्यस्य । सकलङ्कश्चन्द्रः श्मश्रुरहितैतन्मुखचन्द्रतुल्यो न भवतीत्यर्थः । वयःसंधौ वर्तत इति भावः । न जातं श्मश्रु यस्मिन्, 'वाहिताग्न्यादिषु' इति परनिपातः । पार्थिव इति, 'तत्र विदितः' इत्यण् ॥

बालेऽधराधरितनैकविधप्रवाले
पाणौ जगद्विजयकार्मणमस्य पश्य ।
ज्याघातजेन रिपुराजकधूमकेतु-
तारायमाणमुपरज्य मणिं किणेन ॥१०४॥

बाल इति ॥ हे अधरेणोष्ठेनाधरितानि जितान्यनेकविधानि नानाजातीयानि प्रवालानि पल्लवा विद्रुमा वा यया । तथा—बाले, त्वं अस्य राज्ञः पाणौ जगद्विजयस्य कार्मणं वशीकरणं मणिं कङ्कणरत्नं पश्य । किंभूतं मणिम्—ज्याघातजेन किणेनोपरज्य श्यामीभूय रिपुराजकस्य रिपुनृपवृन्दस्य तदर्थं धूमकेतुतारायमाणं धूमकेतुनक्षत्रवदाचरितम् । धूमकेतुनक्षत्रमुदितं सद्यथा राजक्षयं करोति तथेति । नैकविधं विविधं प्रवालं ययेति वा । रिपवश्च तद्राजकं च । अन्यथा आदिवृद्धिः स्यात् । संज्ञापूर्वकविधेरनित्यत्वाद्वृद्ध्यभावः ॥

एतद्भुजारणिसमुद्भवविक्रमाग्नि-
चिह्नं धनुर्गुणकिणः खलु धूमलेखा ।
जातं ययारिपरिपन्मशकार्थयाश्रु-
विश्राणनाय रिपुदारदृगम्बुजेभ्यः ॥१०५॥

एतदिति ॥ धनुर्गुणकिणः ज्याघातजः किणः एतस्य भुज एवारणिर्वह्न्युत्पत्तिकाष्ठं तस्मात्समुद्भवविक्रमाग्निः समुत्पन्नप्रतापवह्निस्तस्य चिह्नं चिह्नभूता धूमलेखा खलु निश्चये । यथा धूमोऽग्नेर्लिङ्गम् । यया धूमलेखया रिपूणां दारास्तेषां दृगम्बुजेभ्योऽश्रुविश्राणनाय रोदनवितरणाय जातम् । पतिवधादित्यर्थः । किंभूतया—अरिपरिपद्वैरिसङ्घस्तल्लक्षणा मशकास्तन्निवृत्तिरूपोऽर्थः प्रयोजनं यस्याः सा तया । अत्रार्थशब्दो निवृत्तिवचनः । धूमलेखा हि दृशां चाश्रूणि जनयति । अतिशूरोऽयमिति भावः । 'अर्थोऽभिधेयैरवस्तुप्रयोजननिवृत्तिषु' इत्यमरः ॥

श्यामीकृता मृगमदैरिव माथुरीणां
धौतैः कलिन्दतनयामधिमध्यदेशम् ।
तत्राप्तकालियमहाह्रदनाभिशोभा
रोमावलीमिव विलोकयितासि भूमेः १०६

श्यामीति ॥ तत्र मथुरायां अधिमध्यदेशे कलिन्दतनयां यमुनां भूमेः रोमावलीमिव त्वं विलोकयितासि । किंभूताम्—माथुरीणां मथुराङ्गीणां धौतैर्जलक्रीडाक्षालितैर्मृगमदैः कस्तूरीभिरिव श्यामीकृतां न तु स्वतः श्यामामित्यर्थः । तथा—आप्ता प्राप्ता कालियस्य सर्पराजस्य महाह्रदेन कृत्वा नाभिशोभा यया ताम् । रोमराजिः स्वतः श्यामापि मृगमदैः श्यामतरा, कालियमहाह्रदवद्गभीरया नाभ्या प्राप्तशोभा च, मध्यप्रदेशे च भवति । अनेन सह कालिन्द्यां जलक्रीडां कुर्विति भावः ॥

गोवर्धनाचलकलापिचयप्रचार-
निर्वासिताहिनि घने सुरभिप्रसूनैः ।
तस्मिन्ननेन सह निर्विश निर्विशङ्कं
वृन्दावने वनविहारकुतूहलानि ॥ १०७ ॥

गोवर्धनेति ॥ हे भैमि, तस्मिन् श्रीकृष्णक्रीडयातिप्रसिद्धे श्रीसरूपं वृन्दमवतीति वृन्दावनं मथुरासमीपवनं (तस्मिन्) । वृन्दस्य गोपालसङ्घस्य वने वा । त्वं अनेन राज्ञा सह निर्विशङ्कं सर्पादिभयरहितं यथा तथा पुष्पावचयादीनि वनविहारकुतूहलानि वनक्रीडाकौतुकानि निर्विशोपभुङ्क्ष्व । किंभूते—गोवर्धननामाचलो गिरिस्तत्र वर्तमानाः कलापिचया मयूरसङ्घास्तेषां प्रचारेण संचरणेन निर्वासिता निष्कासिता अहयः सर्पा यस्मात् । तथा—घने निबिडच्छाये । तथा—सुरभीणि सुगन्धीनि प्रसूनानि पुष्पाणि यस्मिन् । वृन्दावने 'वनगिर्योः संज्ञायाम्' इति कोटरादित्वाद्ङीर्घः ॥

भावी करः कररुहाङ्कुरकोरकोऽपि
तद्वल्लिपल्लवचये तव सौख्यलक्ष्यः ।
अन्तस्त्वदास्यहृतसारतुषारभानु-
शोकानुकारिकरिदन्तजकङ्कणाङ्कः ॥१०८॥

भावीति ॥ हे भैमि, तस्य वृन्दावनस्य वल्लिपल्लवचये लताकिसलयवृन्दमध्ये कररुहा एव नखा एवाङ्कुरास्त एव कोरका यस्य एवंभूतस्तव करः सौख्येनानायासेन लक्ष्यो ज्ञेयः भावी भविष्यति । रक्तत्वात्तिमृदुत्वात्कोरकाकारनखरूपकोरकयुक्तत्वाच्च किमयं कोरकयुक्तः पल्लवः, अथवा नखयुक्तो भैमीकर इति संदेहविषयत्वयोग्योऽपीत्यपिशब्दार्थः । यतः—अन्तः मध्ये त्वदास्येन हृतसारस्त्वदीयमुखनिर्माणार्थं हृतः मध्यदेशसंबन्धिश्रेष्ठभागो यस्य एवंभूतो वा तुषारभानुश्चन्द्रस्तस्य शोभानुकारित्वात्तदाकारं करिदन्तजकङ्कणं तदेवाङ्कश्चिह्नं यस्य । हस्तिदन्तवलययुक्तो भैमीकरः, तद्रहितश्च पल्लव इति पल्लवमध्ये करः सुखेन ज्ञास्यत इत्यर्थः । तत्रत्याः स्त्रियः प्रायशो दन्तवलयानि बिभ्रति ॥

तज्जः श्रमाम्बु सुरतान्तमुदा नितान्त-
मुत्कण्टके स्तनतटे तव संचरिष्णुः ।
खञ्जन्प्रभञ्जनजनः पथिकः पिपासुः
पाता कुरङ्गमदपङ्किलमप्यशङ्कम् ॥ १०९ ॥

तज्ज इति ॥ हे भैमि, तज्जः वृन्दावने जातः प्रभञ्जनजनो वायुसङ्घः, वायुलक्षणो वा जनः कुरङ्गमदेन कस्तूरिकया पङ्किलं

१ 'साभिप्रायविशेषणत्वात्परिकरालंकारः' इति जीवातुः ।

भूभर्तुरस्य रतिरेधि मृगाक्षि मूर्ता
सोऽयं तवास्तु कुसुमायुध एव मूर्तः ।
भातं च ताविव पुरा गिरिशं विराद्ध-
माराद्धुमाशु पुरि तत्र कृतावतारौ ॥१२१॥

भूभर्तुरिति ॥ हे मृगाक्षि, अस्य भूभर्तुः मूर्ता साक्षाद्रतिः कामप्रिया एधि भव । सोऽयं नृपस्तव मूर्तः शरीरधारी कुसुमायुध एवास्तु भवतु । त्वय्यस्य रतिबुद्धिर्भवतु, अस्मिंश्च तव कामबुद्धिर्भवत्वित्यर्थः । अथ च शरीरधारिणी प्रीतिरेव भव । अयं च तव मदनोदयकारित्वान्मूर्तोऽनुराग एव भवतु । परस्परस्मिन्नतितरामनुरक्तौ भवेतामित्यर्थः । युवां ताविव रतिकामाविव भातं शोभेताम् । किंभूतौ युवाम्—पूर्वं विराद्धं प्रकोपितं गिरिशमाशु आराद्धुं तदीयं क्रोधं परिचर्यया शीघ्रमपनेतुं तत्र तस्यां पुरि काश्यां कृतावतारौ कृतनिवासौ । अतिसुन्दरौ युवां दृष्ट्वा काशीस्थो लोक एवमेव संभावयत्वित्यर्थः । अवनीर्यतेऽनेनेत्यवतारो देहः । कृतो धृतो देहो याभ्यामिति वा । 'अवेतृस्रोः—' इति करणे घञ् । एवमन्यत्रापि ज्ञेयम् ॥

कामानुशासनशते सुतरामधीती
सोऽयं रहोनखपदैर्महतु स्तनौ ते ।
रुष्टाद्रिजाचरणकुङ्कुमपङ्कराग-
संकीर्णशंकरशशाङ्ककलाङ्ककारैः ॥ १२२ ॥

कामेति ॥ हे भैमि, कामानुशासनस्य वात्स्यायनादिशास्त्रस्य शते सुतरां अधीतमध्ययनमस्यास्तीत्यधीती सोयं राजा रहः नखपदैस्ते स्तनौ महतु पूजयतु । कीदृशैः—रुष्टायाः क्रुद्धाया अद्रिजायाश्चरणयोः कुङ्कुमपङ्कारागः कुङ्कुमलौहित्यिमा तेन संकीर्णाया मिश्रितायाश्चरणपतितस्य शंकरस्य चरणाघातवशेन कुङ्कुमसंबन्धालोहितायाः शशाङ्ककलायाश्चन्द्रकलाया अङ्ककारैः प्रतिमल्लैः । अङ्कं द्वन्द्वयुद्धं कुर्वन्तीत्यङ्ककाराः । वक्रत्वादारुणत्वाच्च तत्सदृशैः । एनं वृणीष्वेति भावः । 'कलाङ्कुराभैः' इति वा पाठः । अधीतमनेनेत्यधीती, 'इष्टादिभ्यश्च' इतीनिः । तद्योगे शासनशते इत्यत्र 'क्तस्येन्विषयस्य कर्मण्यपि' इति सप्तमी ॥

पृथ्वीश एष नुदतु त्वदनङ्गताप-
मालिङ्ग्य कीर्तिचयचामरचारुचापः ।
सङ्ग्रामसंगतविरोधिशिरोधिदण्ड-
खण्डिक्षुरप्रशरसंप्रसरन्प्रतापः ॥ १२३ ॥

पृथ्वीश इति ॥ एष पृथ्वीशस्त्वामालिङ्ग्य त्वदनङ्गतापं त्वदीयं मदनज्वरं, त्वद्विषयं स्वीयं वा त्वदिति पृथक्कृत्य त्वद्धेतुकमिति वा, नुदतु हरतु । किंभूतः—कीर्तेश्चापसमुत्पन्नत्वात्कीर्तिचयचामरेण कीर्तिसमूहरूपचामरेण चारु चापं यस्य सः । तथा—सङ्ग्रामे संगता मिलिता विरोधिनो वैरिणस्तेषां शिरोधिदण्डा कंधरादण्डास्तान् खण्डयन्त्येवंशीलाः क्षुरप्राख्याः शरास्तैः तेभ्यो वा सम्यक्प्रसरन्नतितरां विवृद्धः प्रतापो यस्य । 'वीरानुरागिण्यो हि योषितः' इति न्यायात् । अतियशस्विनः प्रतापवतश्चास्य लाभेन तव मदनज्वरः शाम्यत्वित्यर्थः । अथ च विरुद्धप्रतापालिङ्गनेन तापशान्तिराश्चर्यकारिणी । अतिधनुर्धरस्य चापे चामरं भवति । 'शिरोधिः कंधरेत्यपि' इत्यमरः ॥

वक्षस्त्वदुग्रविरहादपि नास्य दीर्णं
वज्रायते पतनकुण्ठितशत्रुशस्त्रम् ।
तत्कन्दकन्दलतया भुजयोर्न तेजो
वह्निर्नमत्यरिवधूनयनाम्बुनापि ॥ १२४ ॥

वक्ष इति ॥ तव उग्रो दुःसहो विरहो वियोगानलस्तस्मादपि न दीर्णं अस्य वक्षः वज्रायते वज्रवदाचरति अविदीर्णत्वाद्वज्रवदतिकठिनं भवति । यतः—पतनेन कुण्ठितानि भग्नानि । शत्रुशस्त्राणि यस्मिन् । कुलिशमपि वह्निसंबन्धाद्विदीर्णं न भवति । पतनकुण्ठितशत्रुशस्त्रं च भवति । अस्मादेतद्वक्षो वज्रतुल्यम् । अथ च हीरकवदाचरति । हीरकोऽपि वह्निसंबन्धान्न स्फुटति इति प्रसिद्धिः । शस्त्राणि च कुण्ठयति । 'पृथिव्यां यानि रत्नानि ये चान्ये लोहजातयः । तानि वज्रेण लिख्यन्ते वज्रं नान्येन लिख्यते' इत्यादि ज्ञातव्यम् । सामुद्रिकलक्षणयुक्तमेतद्वक्ष इत्यर्थः । अत एव एतस्य भुजयोस्तद्वक्षोलक्षणो यः कन्दो मूलं तस्य कन्दलौ नवाङ्कुरौ तयोर्भावस्तत्ता तया वज्रीभूतवक्षःस्थलमूलप्रकाण्डतया हेतुना भुजसमुत्पन्नस्तेजोवह्निः प्रतापरूपोऽग्निः अरिवधूनां नयनाम्बुना नेत्रबाष्पेणापि न नमति न शाम्यति । विद्युद्वह्नेरम्बुना शा(न्त्य)भावात्कारणगुणानां च कार्ये समवायात् विद्युद्रूपवक्षःस्थललक्षणस्य भुजकारणस्य गुणोऽग्निः शान्त्यभावलक्षणः तत्कार्यभूते प्रतापाग्नावपि वर्तते । यतः स वैरिवनितास्रुणापि न शाम्यतीति युक्तं वक्षसो वज्रत्वम् । अतिकठिनवक्षःप्रभवबाहुसमुत्पन्नोऽत्युद्भटो यस्य प्रतापो वैरिणो हत्वापि न शाम्यति । वैरिविषये निष्कृपोऽयमिति भावः । त्वदुग्रविरहविदारितहृदयावस्थमेनमनुगृहाणेति भावः । 'कन्दलं तु कपाले स्यादुपरागे नवाङ्कुरे' इति विश्वः ॥

किं न द्रुमा जगति जाग्रति लक्षसंख्या-
स्तुल्योपनीतपिककाकफलोपभोगाः ।
स्तुत्यस्तु कल्पविटपी फलसंप्रदानं
कुर्वन्स एष विबुधानमृतैकवृत्तीन् ॥१२५॥

किमिति ॥ तुल्यः समान उपनीतो दत्तः पिकानां कोकिलानां काकानां फलैः कृत्वा उपभोगो जीवनवृत्तिर्यैरेवंविधा आम्रादयो लक्षसंख्या द्रुमाः जगति भुवनमध्ये किं न जाग्रति विद्यन्ते । अपितु विद्यन्त एव, परं वर्णनीया न भवन्तीत्यर्थः । तु पुनः अमृतैकवृत्तीन्सुधैकजीविनो विबुधान्देवान्फलसंप्रदानं स्वीयफलानां दानपात्रं कुर्वन्स एष कल्पविटपी स्तुत्यः स्तोतुमर्हः । अतिप्रसिद्धत्वेन कल्पवृक्षः पुरः स्थित इव एष इत्यभिनयनिर्दिष्टः । उत्तमजातीयानामुत्तमफलवृत्तीनां पिकानां हीनजातीयानां कदर्यवृत्तीनां काकानां च तुल्यदानात्साम्यापादनादतिमूर्खत्वादाम्रादयो न स्तुत्याः । कल्पवृक्षस्तु रसाधिकामृतजीवनेभ्यो देवेभ्य एव स्वफलानि ददानो विशेषज्ञत्वात्स्तोतुमर्ह इत्यर्थः । अथ च—पण्डितेषु मूर्खेषु च तुल्यदानात्तारतम्याज्ञानादचेतनद्रुमतुल्या बहवो

१ अत्र भुजतेजसोऽनम्बुहार्यत्वेन वज्रायितवक्षःकार्यताद्वारादन्यतेजस्त्वोत्प्रेक्षणादुत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या' इति जीवातुः ।

राजानः कति न सन्ति, परं यज्ञैकवृत्तीनयाचितवृत्तीन्वा मोक्षैकवृत्तीन्मुमुक्षून्वाञ्छादिदानपात्रं कुर्वन्नतिवितरणशीलत्वात्कल्पवृक्षतुल्यः काशीश्वर एव विशेषज्ञः स्तोतव्य इति भङ्ग्याभिहितम् । सर्वनृपाधिकः सर्वेभ्यो दाता पण्डितश्चाहं तस्मादेनं वृणीष्वेति भावः । 'द्वे याचितायाचितयोर्यथासंख्यं मृतामृते' इत्यमरः । 'अमृतं यज्ञशेषे स्यात्' ॥

अस्मै करं प्रवितरन्तु नृपा न कस्मा-
दस्यैव तत्र यदभूत्प्रतिभूः कृपाणः ।
दैवाद्यदा प्रवितरन्ति न ते तदैव
नेदंकृपा निजकृपाणकरग्रहाय ॥ १२६ ॥

अस्मा इति ॥ सर्वे नृपाः अस्मै नृपाय करं बलिं कस्मात्कथं न प्रवितरन्तु प्रयच्छन्तु । अथ च—दासभूतत्वात्स्वामिनेऽस्मै हस्तं कथं न वितरन्तु । दासेन हि स्वामिने हस्तो दीयते । यद्यस्मात् तत्र द्विविधेऽपि करदाने कृपाणः खड्गः अस्यैव प्रतिभूरभूत । ते राजानो दैवाद्विनाशकाले विपरीतदैववशाद्यदा न द्विविधमपि करं प्रवितरन्ति ददति तदा निजस्य कृपाणस्य हस्तेन धारणाय इदंकृपा अस्य कृपा नैव भवति । तदा क्रुद्धः सन् खड्गतोलनेन ताडनेन बलात्करं गृह्णात्येव । तदैवेत्यविलम्बार्थ एवकारो वा । हस्ते गृहीतखड्गमेनं दृष्ट्वा भीताः सन्तस्मै बलिमस्मै प्रयच्छन्ति । अथ च—दासा भूत्वा हस्तदानं प्रयच्छन्ति । उभयविधकरदाने तव खड्गस्य प्रतिभूत्वास्ते चेन्न प्रयच्छन्ति तर्हि त्वत्त एवोभयविधं करं गृह्णामीत्युक्त्वा बलात्करं गृह्णातीति भावः । लोके ऋणी चेन्न प्रयच्छति तदा बलात्कारेण लग्नक एव गृह्यते । अस्य कृपा इति षष्ठीसमासः ॥

एतद्बलैः क्षणिकतामपि भूखुराग्र-
स्पर्शायुषां रयरसादसमापयद्भिः ।
दृक्पेयकेवलनभःक्रमणप्रवाहै-
र्वाहैरलुप्यत सहस्रदृगर्वगर्वः ॥ १२७ ॥

एतदिति ॥ एतद्बलैरेतस्य सैन्यभूतैर्वाहैरश्वैः सहस्रदृगिन्द्रः तस्य अर्वाश्च उच्चैःश्रवास्तस्य गर्वः खुराग्रैर्भूमिं न स्पृशामि, गगने चरामि, वेगवांश्च मादृशोऽन्यो न विद्यत इत्येवंरूपः अलुप्यत लुप्तो विनाशितः । किंभूतैर्वाहैः—भुवः खुराग्रैः कृत्वा यः स्पर्शस्तद्वापि यान्यायूंषि स्थितयस्तेषां क्षणिकतामपि क्षणमात्रं या स्थापिता तामपि रयरसाद्वेगाभिनिवेशादसमापयद्भिः । क्षणमात्रमपि खुराग्रैर्भूमिमस्पृशद्भिरित्यर्थः । तथा—दृग्भिर्नेत्रैः पेयाः सादरमवलोकनीयाः केवलं नभःक्रमणप्रवाहाः गगनगमनपरम्परा येषाम् । वेगवशादलक्ष्यभूगमनैः । केवलं नभसि क्रमणं येषां (तेषां) वायूनां प्रवाहाः सङ्घाः । दृक्पेया दृश्याश्च ते वायुसङ्घाश्च तद्रूपैरिति वा । वायोः सवेगत्वेऽप्यचाक्षुषत्वादेतेषां तत्तुल्यवेगत्वेऽपि चाक्षुषत्वाच्चाक्षुषवायुरूपैः वायोरप्यधिकैरेवंविधैर्वा । 'सहस्रदृग्वर्गवः' इति पाठे सूर्याश्वानामित्यर्थः ॥

---

१ 'अत्राप्रस्तुतकल्पवृक्षकथनात्प्रस्तुतकाशिराजप्रतीतेरप्रस्तुतप्रशंसालंकारः' इति जीवातुः ।

तद्वर्णनासमय एव समेतलोक-
शोभावलोकनपरा तमसौ निरासे ।
मानी तया गुणविदा यदनादृतोऽसौ
तद्भूभृतां सदसि दुर्यशसेव मम्लौ ॥१२८॥

तद्वर्णनेति ॥ तस्य काशीश्वरस्य वर्णनासमय एव समेताः समागता लोका नूतनराजलोकास्तेषां शोभा तस्या अवलोकनपरा असौ भैमी तं काशीश्वरं निरासे निराचकार । अन्यावलोकनेनैव निराकरणं जातमित्यर्थः । तया गुणविदात्तिविदुष्या भूभृतां सदसि राजसभायां यद्यस्मान्मानी अभिमानवान् असावनादृतोऽवज्ञातः, तत्तस्मात् दुर्यशसेवाकीर्त्येव मम्लौ । लज्जावशान्कालिमानं प्राप्त इत्यर्थः । गुणिना हि राजसमक्षं कृताऽवज्ञाभिमानिनो दुर्यशसे भवति, न तु मूर्खेण कृता । निरासे, 'उपसर्गादस्यायूह्योः' इति णत्वं । 'परासे' इति क्वचित्पाठः ॥

सानन्तानाप्यतेजःसखनिखिलमरुत्पार्थिवान्दिष्टभाज-
श्चित्तेनाशाजुषस्तान्सममसमगुणान्मुञ्चती गूढभावा ।
पारेवाग्वर्तिरूपं पुरुषमनु चिदम्भोधिमेकं शुभाङ्गी
निःसीमानन्दमासीदुपनिषदुपमा तत्परीभूय भूयः१२९

सेति ॥ सा भैमी एवंभूतं नलाख्यं पुरुषमनु लक्ष्यीकृत्य भूयोऽतिशयेन बहु अत्यर्थं तत्परीभूय नल एव तात्पर्यं यस्या एवंविधा भूत्वा उपनिषदो रहस्यभूतायाः श्रुतेरुपमा यस्या एवंविधा उपनिषत्तुल्या आसीत् । किंभूता सा—तेजसः सख्यायस्तेजःसखाः तेजस्विनो निखिलाः सकला मरुतश्च देवाः पार्थिवाश्च राजानस्तानाप्य प्राप्य एतत्समीपं गत्वा समं युगपत्यजन्ती । यतो—गूढभावा गूढाशया नलविषयमनुरागं गोपायन्ती । किंभूतांस्तान्-अनन्तानवधीन्गणयितुमशक्यान् । तथा—दिष्टभाजः स्वयंवरकाले समागतान्दैवभाजो बहुसंपदो वा । तथा—चित्तेन चेतसा आशाजुषो भैमीप्राप्त्यभिलाषिणः स्वस्मिन्नभिलाषिणः । तथा—असमगुणानतुल्यसौन्दर्यादिगुणान्परस्माद्गुणैरधिकान् । पुनः किंभूता सा-—शुभाङ्गी सुन्दरी । किंभूतं पुरुषम्—पारेवाग्वर्तिरूपम् । वाचः पारे परतीरे वर्त(मा)नशीलं वाग्गोचरो वर्णयितुमशक्यं सौन्दर्यं यस्य । अतिसुन्दरम् । तथा—चिदम्भोधिं ज्ञानसमुद्रं सकलशास्त्रपारगम् । तथा—निःसीमानन्दमपरिमितानन्दं, सदोत्साहशक्तियुक्तं, भैमीप्राप्तिनिश्चयाद्वा निःसीमानन्दम् । एकं मुख्यम् । निःसीमानन्दं यथा तथा तत्परीभूयेति वा । समं प्राप्येति वा । सममाशाजुष इति वा । मया राज्यलक्ष्म्या सह वर्तमानमिति पुरुषविशेषणं वा । उपनिषदपि—अनन्तेनाकाशेन सहितान्यानन्तान् । तथा—दिष्टभाजः कालसहितान, चित्तेन मनसा समं सार्धमाशाजुषो दिग्भाजो दिक्स्थानोयुक्तान , असमगुणानतुल्यसंख्यरूपरसगन्धादिगुणयुक्तान् । तथा—पंशोपिकादिप्रक्रियासिद्धा आप्या उदकजन्याः पदार्थाः, तेजः तेजस्याः पदार्थाश्च, आप्यतेजस्या सख्याय आप्यतेजःसखाः आप्यतेजसपदार्थसहिता निखिलाः सकला ये मरुतो वायवः पृथिवीसंबन्धिनः पार्थिवाश्च पदार्थांस्तान् । यद्वा अनन्तान्विनाशरहितान् आप्यतेजांसि च खेनाकाशेन सहितास्ते निखिलमरुत्पार्थिवाश्च तान् । पृथिव्यग्नेजोवाय्वाकाश-

कालदिग्मनोलक्षणानष्टौ पदार्थान्युगपदद्वैतप्रतिपादनेन निराकुर्वती । अविद्यमानोऽन्तो विनाशो येषां तेऽनन्ता नित्याः सामान्यविशेषसमवायास्तैः सहितानाप्यादीनष्टौ पदार्थान् । तथा—न समममसमं पञ्चसंख्यायोगित्वाद्विषमसंख्यं कर्म च गुणाश्च रूपादयस्तांश्च षडपि पदार्थान् हेयत्वेन प्रतिपादयन्ती वा । तथा—गूढभावा अतिगहनत्वादुर्ज्ञेयाभिप्राया । गूढस्तिरस्कृतो भावः सत्ता यया कस्यापि वस्तुनः सत्त्वमनङ्गीकुर्वतीति वा । गूढो रक्षितः ब्रह्मणः सत्तालक्षणो भावो ययेति वा । तथा—शुभाङ्गी व्याकरणादिषडङ्गयुक्ता । उपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गयुक्ता वा । यमनियमाद्यङ्गोपेता वा । 'यतो वाचो निवर्तन्ते' इत्यादिश्रुतिप्रामाण्याद्वागगोचरस्वरूपम् । तथा—चितो ज्ञानस्य समुद्रम् । चिच्चासावम्भोधिश्चेति वा । निःसीमश्चासावानन्दश्च एवंभूतं परमानन्दरूपमात्मलक्षणनवमद्रव्यपदार्थरूपम् । 'एकमेवाद्वितीयं ब्रह्म' इति श्रुतिप्रामाण्यादद्वितीयं एकं ब्रह्मरूपं परमपुरुषमुद्दिश्य अत्यर्थं तत्रैव परब्रह्मस्वरूपपरमपुरुषे तात्पर्यं यस्या एवंभूता भवति । 'अनन्तं सुरवर्त्म खम्' इत्यमरः । आप एव आप्यमिति चातुर्वर्ण्यादित्वाद्ष्यञ् । शुभाङ्गी, 'अङ्गगात्र-' इति ङीप् । उपनिषत्पक्षे शुभाङ्गीव शुभाङ्गी ॥

श्रीहर्ष कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
शृङ्गारामृतशीतगावयमगादेकादशस्तन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्वलः ११

श्रीहर्षमिति ॥ शृङ्गारलक्षणस्यामृतस्य शीतगौ चन्द्ररूपे शीतगौ भाषितपुंस्कम् ॥

इति श्रीवेदरकरोपनामकश्रीमन्नृसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे एकादशः सर्गः ॥

द्वादशः सर्गः ।

इदानीं नूतनसमागतराजवर्णनार्थं द्वादशं सर्गमारभते—

प्रियाहियालम्ब्य विलम्बमाविला
विलासिनः कुण्डिनमण्डनायितम् ।
समाजमाजग्मुरथो रथोत्तमा-
स्तमा समुद्रादपरेऽपरे नृपाः ॥ १ ॥

प्रियेति ॥ अथो अनन्तरं अपरे अपरे अन्ये अन्ये नृपाः आ समुद्रात्समुद्रमवधीकृत्य । दिगन्तेभ्यः सकाशादित्यर्थः । कुण्डिनस्य मण्डनायितं भूषणवदाचरितं अलंकारकं समाजं स्वयंवरसभामाजग्मुः । किंभूताः—प्रियाभ्यः स्वनायिकाभ्यः सकाशाद्या ह्रीः (तया) तासामनुरागजनितमुखदाक्षिण्येन कृत्वा विलम्बं स्थैर्यमालम्ब्य आविला व्याकुलान्तःकरणाः । प्रियामुखदाक्षिण्यानुरोधेनास्माकं विलम्बे जाते भैमीस्वयंवरो जातो. मा भूदिति बुद्ध्या नातिसोत्साहाः । तथा—विलासिनः शृङ्गारभङ्गीसहिताः । तथा—रथोत्तमाः श्रेष्ठरथाः । इत्यनेन विलम्बे जातेऽपि शीघ्रागमनं सूचितम् । विलासिनः, 'वौ कषलस-' इति घिनुण् । रथैरुत्तमा इति समासः । अपरे अपरे, वीप्सायां द्विरुक्तिः ॥

ततः स भैम्या ववृते वृते नृपै-
र्विनिःश्वसद्भिः सदसि स्वयंवरः ।
चिरागतैस्तर्किततद्विरागितैः
स्फुरद्भिरानन्दमहार्णवैर्नवैः ॥ २ ॥

तत इति ॥ ततः सदसि समाजे स भैम्याः स्वयंवरो ववृते । किंभूते सदसि—भैम्याः स्वस्मिन्वैराग्येण विनिश्वसद्भिर्विशेषेण मुक्तश्वासैः चिरागतैः पूर्वमायातैर्नृपैः वृते । तथा—तार्किता ऊहिता तेषु पूर्वागतेषु राजसु विरागिता । अर्थाद्भैम्याः । यैस्तैः, स्फुरद्भिः शृङ्गारभङ्ग्या प्रकाशमानैः । तथा—एते न वृताः स्वयंवरशेषं प्राप्तानस्मानियं प्रायेण वरिष्यतीति बुद्ध्या आनन्दस्य महार्णवैरगाधसमुद्रैः प्रमुदिततरैर्नवैस्तत्कालागतैर्नृपैः वृते ॥

चलत्पदस्तत्पदयत्नणेङ्गित-
स्फुटाशयामासयति स्म राजके ।
श्रमं गता यानगतावपीयमि-
त्युदीर्य धुर्यः कपटाजनीं जनः ॥ ३ ॥

चलदिति ॥ चलन्ति पदानि यस्य पुरस्ताद्व्रजन् धुरं वहति धुर्यः शिबिकादण्डवाही जनः जनीं भैमीं राजके राजसङ्गमध्ये आसयति स्म आस्थापयत् । किं कृत्वा—यानगतौ अपि शिबिकारोहणेनापि गमने सत्यपि इयं भैमी श्रमं गता निःसहा जातेति कपटाद्व्याजादुदीर्य उक्त्वा । किंभूताम्—शिबिकापटान्तरितेन तत्पदेन भैमीचरणेन यत् यत्नणं यत्नणा वा पीडनं धुर्यजनस्य तदेव यद् इङ्गितमवस्थापनसूचिका चेष्टा तेन स्फुट आशयो नवनृपदिदृक्षामात्रविषयोऽभिप्रायो यस्यास्ताम् । जनी जायतेऽस्यां गर्भ इति, 'जनिघसिभ्यां च' इतीण्प्रत्यये 'जनिवध्योः-' इति वृद्धिनिषेधे 'कृदिकारात्-' ङीष् ॥

नृपानुपक्रम्य विभूषितासना-
न्सनातनी सा सुषुवे सरस्वती ।
विहारमारभ्य सरस्वतीः सुधा-
सरःस्वतीवार्द्रतनूरनूत्थिताः ॥ ४ ॥

नृपानिति ॥ सा सनातनी नित्या सरस्वती देवता विभूषितं स्वीयसौन्दर्येणालंकृतमासनं यैस्तान्नृपानुपक्रम्य उद्दिश्य सरस्वतीः वाचः सुषुवे । उवाचेत्यर्थः । किंभूता वाचः—सुधासरःसु अमृतसमुद्रेषु विहारं जलक्रीडामारभ्य कृत्वा अतीवातितरामार्द्रतनूः । तथा—अनु पश्चादविलम्ब्यैवोत्थिताः तस्माद्विगताः । अतिमधुरा इत्यर्थः । सनातनी, अव्ययत्वाद्दुस्तुद च ॥

वृणीष्व वर्णेन सुवर्णकेतकी-
प्रसूनवर्णादतुपर्णमादृतम् ।

---

१ 'अत्र 'विलाविला' इत्यादौ नियमेनासकृद्व्यञ्जनावृत्त्या छेकानुप्रासः । अन्यत्रानियमाद्वृत्त्यनुप्रासः इत्युभयोः संसृष्टिः' इति जीवातुः ।
२ 'प्रसूनपर्णात्' इति जीवातुसंमतः पाठः ।

निजामयोध्यामपि पावनीमयं
भवन्मयो ध्यायति नावनीपतिः ॥ ५ ॥

वृणीष्वेति ॥ गौरवत्वलक्षणेन वर्णेन सुवर्णकेतकीप्रसूनस्य गौरत्वलक्षणाद्वर्णादादृतं प्रेमास्पदीकृतं तस्मादधिकं वा अतिगौरं सुकुमारशरीरमृतुपर्णनामानं नृपं त्वं वृणीष्व । अयं अवनीपतिः भवन्मयस्त्वदेकचित्तः सन् निजामात्मीयां परम्परायातां पावनीं पवित्रीकरणशीलामयोध्यां मुक्तिपुरीमपि न ध्यायति न स्मरति । परमानन्दरूपत्वान्मुक्तेः सकाशादपि तव प्राप्तिरेतस्याधिकेत्यर्थः । अन्योऽपि विलासी गुणवतीमपि निजां प्रियामचिन्तयन्नन्यामेव ध्यायतीत्युक्तिः । त्वय्यतितरामनुरक्तोऽयमेनं वृणीष्वेति भावः । वर्णात्, 'पञ्चमी विभक्ते' इति पञ्चमी । भवन्मयः, 'सर्वनाम्नो वृत्तिमात्रे–' इति पुंवद्भावः ॥

न पीयतां नाम चकोरजिह्वया
कथंचिदेतन्मुखचन्द्रचन्द्रिका ।
इमां किमाचामयसे न चक्षुषी
चिरं चकोरस्य भवन्मुखस्पृशी ॥ ६ ॥

नेति ॥ हे भैमि, चकोरजिह्वया एतस्य ऋतुपर्णस्य मुखमेव चन्द्रस्तस्य चन्द्रिका प्रसन्नतारूपा ज्योत्स्ना कथंचित्केनापि प्रकारेण न पीयतां नाम । चकोरजिह्वया सत्यचन्द्रचन्द्रिका पीयते, इयं त्वलीकमुखचन्द्रिकेति पीयतां मा वा । अत्रास्माकमौदासीन्यमित्यर्थः । परंतु चिरं भवन्मुखस्पृशी त्वदीयमुखसेवनतत्परे चकोरस्य चक्षुषी इमामेतन्मुखचन्द्रचन्द्रिकां किमिति नाचामयसे पाययसे । अपि तु पाययस्व । अलीकत्वात्तादृग्रसाभावाच्चकोरजिह्वया पानेऽकृतेऽपि तथा सुन्दरत्वाद्वर्णनायामस्मदादीनामशक्तत्वेऽपि तादृगाह्लादकत्वस्य सौन्दर्यस्य च प्रत्यक्षेण द्रष्टुं शक्यत्वादेतन्मुखचन्द्रचन्द्रिकां चक्षुषी पाययस्वेत्यर्थः । अथ च चकोरजिह्वया भवन्मुखसेवाया अकृतत्वादेतन्मुखचन्द्रचन्द्रिकापानं कर्तुमशक्यमिति युक्तम् । तदीयचक्षुर्भ्यां तु चिरकालमुत्तमस्य भवन्मुखस्य सेवनात्तयोरेतन्मुखचन्द्रचन्द्रिकापानं युक्तम् । उत्तमसेवया हि दुष्प्रापमपि वस्तु सुप्रापं भवतीत्याशयः । चिरकालमेतन्मुखकान्तिं सादरं किं न पश्यसि । अपितु पश्य । एनं वृणीष्वेति भावः । यद्वा जिह्वया अल्प एव स्वाद्ये सामर्थ्यादेतन्मुखचन्द्रचन्द्रिकायाश्चातिबहुत्वाच्चकोरजिह्वयेयं कथंचिन्न पीयतां नाम । त्वन्मुखस्पृशोश्चकोरनेत्रयोस्तु पानं युक्तम् । अल्पीयसोरपि नेत्रयोर्भूयसो विषयस्य ग्रहणे सामर्थ्यसद्भावात् । किं पुनर्विशालयोरनयोरिति भावः । एते चकोरस्यैव नेत्रे भवन्मुखं स्पृशत इति नेत्रयो रमणीयत्वं चन्द्रिकापानयोग्यत्वं विलोकनचातुर्यं च सूचितम् । अत्राचमेः प्रत्यवसानार्थत्वात् 'गतिबुद्धि–' इत्यादिना चक्षुषोः कर्मत्वम् । 'णिचश्च' इति कर्त्रभिप्राये क्रियाफले विवक्षायामात्मनेपदे प्राप्तेऽपि 'निगरणचलनार्थेभ्यश्च' इति परस्मैपदप्राप्तेः आचामयसे इति चिन्त्यम् । एवं सति चकोरस्य चक्षुषी चिरं भवन्मुखस्पृशी वर्तेते । यतस्त्वन्मुखसेवां बहुकालं कुर्वत(र्वाते) इत्यर्थः । अत एव इमामेतन्मुखचन्द्रिकां किं न आचामयसे । सामर्थ्यात् चक्षुर्भ्यामिति शेषः । इति समाधानम् । आचमनमाचामः सोस्या अस्तीत्याचामवती करोति इत्यर्थे 'तत्करोति–' इति ण्यन्तस्य लक्षणप्रतिपदोक्तपरिभाषया प्रतिपदोक्तप्रत्यवसानार्थत्वाभावात्परस्मैपदाभावः । निगरणादिसूत्रेणानुवृत्तपरस्मैपदसंज्ञया परस्मैपदस्य विधानात् 'संज्ञापूर्वको विधिरनित्यः' इति परिभाषयात्र परस्मैपदं न भवतीति वा । आचाम इति, 'न कम्यमिचमाम्' इति मित्वनिषेधाद्ध्रस्वत्वाभावः ॥

अपां विहारे तव हारविभ्रमं
करोतु नीरे पृषदुत्करस्तरन् ।
कठोरपीनोच्चकुचद्वयीतट-
त्रुट्यत्तरः सारवसारवोर्मिजः ॥ ७ ॥

अपामिति ॥ हे भैमि, आरवेण सहिताः सारवाः सरय्वा इमे सारवाः एवंभूता ऊर्मयस्तेभ्यो जातः पृषदुत्करो बिन्दुसमूहः अपां विहारे अनेन सह जलक्रीडायां सत्यां तव हारविभ्रमं त्वत्संबन्धिहारविलासं करोतु । किंभूतः—नीरे तरन्प्लवमानः । तथा–कठोरातिकठिना पीना उच्चा त्वदीया कुचद्वयी तस्यास्तटे परिसरे त्रुट्यत्तरोऽतिशयेन त्रुट्यन्विशीर्यमाणतरः । जलक्रीडावशाद्विच्छिन्नस्त्वदीयो मुक्ताहार इव शोभताम् । अथ च–पश्यतो लोकस्य भैमीहारः किमयमिति विशिष्टां भ्रान्तिं जनयतु । विगतहारे देशे हारविलास इति विरोधश्च । अथ च—पृषदुत्करः हरिणसङ्घः क्रीडाप्रदेशे क्रीडां करोतु युक्तम् । सरयूक्रीडाप्राप्त्यर्थमेनं वृणीष्वेति भावः । 'देविकायां सरय्वां च भवे दाविकसारवौ' इत्यमरः । दाण्डिनायनादिसूत्रेण साधुः ॥

अखानि सिन्धुः समपूरि गङ्गया
कुले किलास्य प्रसभं स भन्त्स्यते ।
विलङ्घ्यते चास्य यशःशतैरहो
सतां महत्संमुखधावि पौरुषम् ॥ ८ ॥

अखानीति ॥ अस्य कुले वंशे पूर्वजैः सगरपुत्रैरिन्द्रनीताश्वहरणार्थं सिन्धुः समुद्रः पातालपर्यन्तमखानि खातः । कपिलशापदग्धानां तेषामेवोद्धरणार्थं भगीरथेनानीतया गङ्गया समपूरि पूर्णः कृतः । तथा–श्रीरघुनाथेन रावणवधार्थं प्रसभं हठेन स सिन्धुः भन्त्स्यते बन्धनं नेष्यते । किलेति पुराणप्रसिद्धमेतत् । स एव इदानीमस्य यशःशतैर्विलङ्घ्यते च । सर्वे समुद्रमेव प्रतिपौरुषं किमिति कृतवन्त इत्यत आह–अहो युक्तमेतत्सतां महतां पौरुषं महतामेव संमुखं धावति प्रसरतीत्येवंशीलम् । क्षुद्रान्कृपयोपेक्षत एवेत्यर्थः । एवंविधा अस्य पूर्वजाः, श्रीरघुनाथश्च यस्मि-

१ 'निपीयताम्' इति जीवातुसुखावबोधासंमतः पाठः ।

१ 'आचामय' इति पृथक्पदम् । 'इं लक्ष्मीस्तया सहिता मे: । तस्याः संबोधने मे 'एङ्ह्रस्वात्–' इति लोपः' इति भट्टोजिदीक्षिताशयः । 'केचित्तु मा त्वम् इने चक्षुषी इनचक्षुषी श्रेष्ठचक्षुषी आचामय—इति व्याचक्षते' इति तत्त्वबोधिनी । 'श्री च लक्ष्मी चला सा मा रमा जलधिजेन्दिरा' इति त्रिकाण्डशेषानुसारेण साशब्दस्यैव 'मे' इति संबोधनम्–इति सारम् । २ 'अत्र 'भवन्मुखस्पृशोश्चकोरचक्षुषोः' इति विषये निगरणे भैमीचकोरचक्षुषोरभेदप्रतीतेः भेदेऽभेदलक्षणातिशयोक्तिरलंकारः' इति जीवातुः । ३ 'भ्रान्तिमदलंकारः–' इति जीवातुः ।

न्वंशे समुत्पत्स्यते, तस्मिन्वंशे समुत्पन्नोऽयम्। अस्य यशांसि समुद्रपारगाणीत्येनं वृणीष्वेति भावः। भन्त्स्यते बन्धेः कर्मणि लृटि भष्भावे चर्त्वे च रूपम्॥

एतद्यशःक्षीरधिपूरगाहि
पतत्यगाधे वचनं कवीनाम्।
एतद्गुणानां गणनाङ्कपातः
प्रत्यर्थिकीर्तीः खटिकाः क्षिणोति॥ ९॥

एतदिति॥ एतस्य यशस एव क्षीरधेर्यः पूरस्तं गाहते एवं शीलं एतदीययशोवर्णकं कवीनां अगाधेऽतलस्पर्शे स्थाने पतति निमज्जति। श्रोतुमसामर्थ्याद्वागगोचरोऽस्य यश इत्यर्थः। अन्योऽपि समुद्रप्रवाहावगाही अगाधे मुह्यति। तथा-एतस्य शौर्यादीनां गुणानां गणनार्थमङ्कपातोऽङ्कविन्यासः प्रत्यर्थिनां वैरिणां कीर्तीरेव खटिकाः क्षिणोति हिनस्ति। बह्वङ्कविन्यासे हि खटिकाक्षयो भवति। एतद्गुणा अप्यतिभूयस्त्वाद्गणयितुमशक्याः। एतद्गुणानां पुरस्तादरिकीर्तिर्न प्रतिभासत इत्यर्थः। एनं वृणीष्वेत्यर्थः। क्षिणोति लघूपधत्वाद्गुणप्रसक्तावपि संज्ञापूर्वकविधेरनित्यत्वाद्गुणाभावः॥

भास्वद्वंशकरीरतां दधदयं वीरः कथं कथ्यता-
मध्युष्टापि हि कोटिरस्य समरे रोगाणि सत्त्याङ्कुराः।
नीतः संयति बन्दिभिः श्रुतिपथं यन्नामवर्णावली-
मन्त्रः स्तम्भयति प्रतिक्षितिभृतां दोस्तम्भकुम्भीनसान्

भास्वदिति॥ हे भैमि, भास्वतः वंशः तस्य करीरतां तदङ्कुरत्वं दधद्दधानः सूर्यवंशोत्पन्नः वयःसंधौ वर्तमानः। अथ च मुक्तायुक्तत्वाद्भास्वान् यो वंशो वेणुस्तदङ्कुरत्वं दधत् अतितेजस्वी अयं ऋतुपर्णनामा वीरः कथं केन प्रकारेण कथ्यतां वर्ण्यताम्। अपितु वर्णयितुं न शक्यत इत्यर्थः। हि यस्मात् समरे वर्तमानस्याध्युष्टापि सार्धत्रयीति प्रसिद्धापि कोटिः सार्धत्रयकोटीनि मानुषशरीरे स्थितानि रोमाणि सत्त्वस्यान्तरवीररसोत्सेकस्याङ्कुरा इवाङ्कुराः। वीररसोत्साहेन सङ्ग्रामे रोमाञ्चयुक्तोऽयं भवतीत्यर्थः। तथा यस्य नामवर्णावलीमन्त्रः ऋतुपर्ण इति नामाक्षरपङ्क्तिरूपी मन्त्रः संयति बन्दिभिः श्रुतिपथं कर्णपथं नीतः प्रापितः सन् प्रतिक्षितिभृतां रिपूणां दोषो बाहव एव स्तम्भास्त एव क्रौर्यादैर्घ्याच्च ये कुम्भीनसाः सर्वोस्तान्स्तम्भयति। एतन्नाममात्राकर्णनाद्भीतानां शत्रूणां बाहवो युद्धाय न प्रसरन्तीत्यर्थः। सिद्धवैदिकमन्त्रश्रवणाच्च फणिनां स्तम्भो भवति। अध्युष्टेति सार्धकोटित्रयस्य संज्ञा। अङ्कुरो नित्यपुंलिङ्गः। 'कुम्भीनसो लेलिहानः' इत्यमरः॥

तादृग्दीर्घविरिञ्चिवासरविधौ जानामि यत्कर्तृतां
शङ्के यत्प्रतिबिम्बमम्बुधिपयःपूरोदरे वाडवः।
व्योमव्यापिविपक्षराजकयशस्तारा[1]ः पराभावुकः
कासामस्य न स प्रतापतपनः पारं गिरां गाहते॥११॥

तादृगिति॥ हे भैमि, अस्य राज्ञः स प्रताप एव तपनः सूर्यः कासां गिरां पारं परतीरं न गाहते। कस्यापि वर्णयितुमशक्य इत्यर्थः। स कः। अहं तादृक् दीर्घं चतुर्दशमन्वन्तरपरिमितत्वात्महापरिमाणं विरिञ्चिवासरं ब्रह्मदिनं तस्य विधौ करणे यस्य यदीयक्षात्रतेजोरूपस्य सूर्यस्य कर्तृतां निर्मातृतां जानामि। सूर्यस्य दिनकर्तृत्वाद्ब्राह्ममपि दिनं दिनत्वात्सूर्येण कर्तव्यम्। तच्च तुर्युगसहस्रपरिमाणत्वादेतद्दिननिर्मात्रा सूर्येण निर्मातुमशक्यमिति तद्विलक्षणेन चिरकालावस्थायिनातिदीप्रेणैतदीयप्रतापतपनेनैव निर्मातुं शक्यं न त्वन्येनेत्यहमुत्प्रेक्ष इत्यर्थः। तथा—अहं अम्बुधिपयःपूरे प्रवाहमध्ये वाडवो वडवानलो यस्य एतदीयप्रतापतपनस्य प्रतिबिम्बरूप इति शङ्के। जलानलयोः सहावस्थानविरोधाद्वाडवोऽग्निर्न भवति। किंभूतः सः—व्योमव्यापिन्यो विपक्षराजकस्य रिपुराजकस्याल्पत्वाद्यशांस्येव तारा नक्षत्राणि स्वप्रभावेण पराभावुकस्तिरस्कर्ता। सूर्येणापि व्योमव्यापिवैरिचन्द्रस्य चन्द्रिकारूपं यशो नक्षत्राणि च पराभूयन्ते। एतत्प्रतापसूर्यस्य पुरस्ताद्वैरियशांसि न प्रसरन्तीत्यर्थः। पराभावुकः, 'लषपत-' इत्युकञ्। तद्योगे, 'न लोका-' इति षष्ठीनिषेधात्तारा इति द्वितीया॥

द्वेष्याकीर्तिकलिन्दशैलसुतया नद्यास्य यद्दोर्द्वयी
कीर्तिश्रेणिमयी समागममगाद्गङ्गा रणप्राङ्गणे।
तत्तस्मिन्विनिमज्य बाहुजभटैरारम्भि रम्भापरी-
रम्भानन्दनिकेतनन्दनवनक्रीडादराडम्बरः॥ १२॥

द्वेष्येति॥ अस्य राज्ञः दोर्द्वयी बाहुद्वयं तया जनिता कीर्तिश्रेणिः कीर्तिपरम्परा तन्मयी तद्रूपा श्वेतत्वाद्गङ्गा द्वेष्याणां रिपूणां पलायनाज्जनिता अकीर्तिः सैव कालिन्दशैलसुता यमुना तया नद्या सह यद्यस्माद्रणप्राङ्गणे सङ्ग्रामभूमौ समागममगात्संयोगं प्राप तत्तस्मात्कारणात् तस्मिन्प्रयागसंज्ञके गङ्गायमुनासंगमे बाहुजभटैः क्षत्रियजातीयैः विशेषेण निमज्य लक्षणया देहं त्यक्त्वा रम्भापरीरम्भानन्दस्य निकेते नन्दनवने देवोद्याने क्रीडायां य आदर आसक्तिस्तस्य आडम्बरो बाहुल्यमारम्भि आरब्धम्। योपि प्रयागे निमज्जति सोपि 'सितासिते सरिते' इत्यादिश्रुत्या नन्दनवने रम्भाद्यप्सरोभिः सह क्रीडति। 'बाहुजः क्षत्रियो विराट्' इत्यमरः। आरम्भि, 'रभेरशब्लिटोः' इति नुम्। परीरम्भ इति, 'उपसर्गस्य घञि' इति दीर्घः॥

इति श्रुतिस्वादिततद्गुणस्तुतिः
सरस्वतीवाङ्मयविस्मयोत्थया।
शिरस्तिरःकम्पनयैव भीमजा
न तं मनोरन्वयमन्वमन्यत॥ १३॥

इतीति॥ भीमजा शिरसः तिरःकम्पनयैव वक्रचालनयैव तं मनोरन्वयं सूर्यपुत्रमनुवंशसमुत्पन्नं ऋतुपर्णं नान्वमन्यत नाङ्गीचकार। किंभूता—इति पूर्वोक्तप्रकारेण श्रुतिभ्यां कर्णाभ्यां स्वादिता सादरमाकर्णिता तद्गुणस्तुतिर्यया। किंभूतया (कम्पनया-) सरस्वत्या वाङ्मयेन जनितो विस्मय आश्चर्यं तस्मादुत्थयोत्पन्नया। शिरःकम्पस्योभयसूचकत्वादाश्चर्याभिनयकृतः कम्पस्तन्निराकरणार्थो जात इत्यर्थः। अस्य मनुवंशत्वात्स्वस्य सोमवंशे साभिलाषत्वात्कन्याभिलषितसौन्दर्याद्यवर्णनाद्वानानुरागः॥

---

१ 'सितासिते सरिते यत्र सङ्गते तत्राप्लुतासो दिवमुत्पतन्ति। ये वै तन्वं विसृजन्ति धीरास्ते जनासो अमृतत्वं भजन्ते॥' इति।

युवान्तरं सा वचसामधीश्वरा
स्वरामृतन्यक्कृतमत्तकोकिला ।
शशंस संसक्तकरैव तद्दिशा
निशापतिज्ञातिमुखीमिमां प्रति ॥ १४ ॥

युवेति ॥ सा वचसामधीश्वरा सरस्वती निशाकरस्य ज्ञातिसदृशं मुखं यस्यास्तां चन्द्राननामिमां प्रति युवान्तरमन्यं वरं शशंस वर्णयामास । किंभूता—स्वरामृतेन न्यक्कृतस्तिरस्कृतो मत्तो वसन्तहृष्टः कोकिलो यया । तथा—तद्दिशा यस्यां दिशि वर्णनीयो युवा तिष्ठति तद्दिशा तदीयया दिशाभिमुख्येन संसक्तकरैव संबद्धहस्ता । हस्तेन तं निर्दिश्येति यावत् । सरस्वतीवाणीं माधुर्येणैवाशृणोन्नतु राजन्यानुरागेणेति स्वरामृतपदेन सूचितम् । ईश्वरेति, 'स्थेश–'इति वरच् । अथ प्राणेश्वरीत्यादेः कथं साधुत्वम् । 'अन्येभ्योऽपि दृश्यन्ते' इतीशेर्वनिपि ङीब्रयोः सतोरित्यवेहि ॥

न पाण्ड्यभूमण्डनमेणलोचने
विलोचनेनापि नृपं पिपाससि ।
शशिप्रकाशाननमेनमीक्षितुं
तरङ्गयापाङ्गदिशा दृशोस्त्विषः ॥ १५ ॥

नेति ॥ हे एणलोचने मृगाक्षि, त्वं पाण्ड्यभूमण्डनं पाण्ड्यदेशस्य चूडामणिं मुकुटरत्नभूतं नृपं विलोचनेन पिपासस्यपि न न पश्यसि तावत् । परं पातुमिच्छस्यपि नेत्यपेरर्थः । अनुचितमेतदित्यर्थः । अधरेण तावन्न पिपाससि, परं विलोचनेनापि न पिपाससीति । द्वाभ्यां नेत्राभ्यां न पिपाससि परमेकेनापि न पिपाससीति वा । तस्मात्त्वं शशिवत्प्रकाशं प्रसन्नमाननं यस्य तं एनं नृपमीक्षितुं दृशोस्त्विषो नेत्ररश्मीनपाङ्गदिशा नेत्रप्रान्तदेशेन तरङ्गय । अतिसुन्दरमेनं कटाक्षैर्विलोकयेति भावः ॥

भुवि भ्रमित्वानवलम्बमम्बरे
विहर्तुमभ्यासपरम्परापरा ।
अहो महावंशममुं समाश्रिता
सकौतुकं नृत्यति कीर्तिनर्तकी ॥ १६ ॥

भुवीति ॥ हे भैमि, महावंशं महाकुलीनममुं समाश्रिता । एतदीयेति यावत् । एवंविधा कीर्तिरूपा नर्तकी सकौतुकं यथा तथा धनाभिलाषराहित्येन नृत्यति । अहो आश्चर्यम् । (आश्चर्यं) लोकगतं कौतुकं नर्तकीगतमिति न पौनरुक्त्यम् । किंभूता—पूर्वं भ्रमित्वा । सकलं भूमण्डलं व्याप्येत्यर्थः । पश्चादनवलम्बं यथा तथा अम्बरे गगने विहर्तुं चरणायाभ्यासपरम्परायां परा आसक्ता । अभ्यासपरम्परायां वा परा उत्कृष्टा । एतदीया कीर्तिर्भूलोकं पूर्वमभिव्याप्य लोकान्तरं व्याप्नोतीत्यर्थः । सेनाद्यनवलम्बेन सदोत्साहवन्तममुमिति वा । नर्तक्यपि पूर्वं भूमौ भ्रमित्वा निराश्रयं गगने नर्तितुमभ्यासपरा सती महान्तं वेणुमाश्रित्य वेणोरुपरि सकौतुकं नृत्यति । अथ च महान्तं पृष्ठवंशमाश्रिता नर्तकीति वा । याहि झटिति भूमावपि गन्तुमपि न शक्नोति सा निरालम्बं महान्तं वेणुमाश्रित्य नृत्यतीत्यतिचित्रमित्यादि ज्ञातव्यम् । 'वंशो वेणौ कुले वर्गे पृष्ठस्यावयवेऽपि च' इति विश्वः ॥

इतो भिया भूपतिभिर्वनं वना-
दटद्भिरुच्चैरटवीत्वमीयुषी ।
निजापि सावापि चिरात्पुनः पुरी
पुनः स्वमध्यासि विलासमन्दिरम् ॥१७॥

इत इति ॥ इत अस्माद्राज्ञः सकाशाद्भिया भयेन वनाद्वनान्तरमटद्भिर्गच्छद्भिर्भूपतिभिः उच्चैरतिशयेन अटवीत्वमरण्यानीत्वमीयुषी प्राप्ता सा प्रसिद्धा निजा स्वीयापि पुरी चिराद्वनान्तरभ्रमात्पुनरध्यासि (वापि) प्राप्ता । तथा—पुर्यां स्वीयं विलासमन्दिरं रतिगृहं पुनरप्यधिष्ठितम् । वनबुद्ध्यैवेत्यर्थः । राज्यभ्रंशदशापेक्षयानेकवारं तत्रागत्य पुनरन्यत्र गत्वा पुनस्तत्रागच्छन्तीत्यर्थः । अनेन वैरिनगराण्युद्वासितानीति भावः । 'उपेयिवान्–' इत्यत्र सूत्रे उपसर्गस्यातन्त्रत्वादीयुषीत्यत्र क्वसुः ॥

आसीदासीमभूमीवलयमलयजालेपनेपथ्यकीर्तिः
सप्ताकूपारपारीसदनजनघनोद्गीतचापप्रतापः ।
वीरादस्मात्परः कः पदयुगयुगपत्पातिभूपातिभूय-
श्चूडारत्नोडुपत्नीकरपरिचरणामन्दनन्दन्नखेन्दुः ॥ १८ ॥

आसीदिति ॥ हे भैमि, अस्माद्वीरात्पर उत्कृष्टः अन्यो वा क आसीद्वा । अपि तु एवंविधोऽयमेव, न त्वन्यः कश्चिदित्यर्थः । किंभूतः—सीमां समुद्रलक्षणां आ अभिव्याप्य सीमासहितं भूवलयं तस्य मलयजालेपनेपथ्यं चन्दनाङ्गरागरूपं नेपथ्यं भूषणं तदिव कीर्तिर्यस्य । (यदीय)कीर्तिचन्दनधवलितसमुद्रमण्डितमण्डलम् । तथा—सप्तानामकूपारपाराणां समुद्रपरतीराणां समाहारः सप्ताकूपारपारी सैव सदनं निवासस्थानं यस्य सप्तसमुद्रपरतीरवासी यो जनो लोकस्तेन घनमविच्छिन्नं उद्गीत उच्चैर्गीयमानश्चापप्रतापो यस्य, चापश्च प्रतापश्च वा यस्य सः । तथा—पदयुगे चरणयुगले युगपत्समकालमेव पातिनः पतनशीला नमस्कारकारिणो भूपास्तेषां अतिभूयांस्यतिबहूनि यानि चूडारत्नानि तान्येव वर्तुलत्वादुडुपत्न्यो नक्षत्ररूपाश्चन्द्रस्त्रियस्तासां कराणां किरणानां परिचरणं सर्वतः संचरणं तेन । अथ च तासां हस्तैर्यत्परिचरणं चरणसेवा तया, कृत्वा अमन्दं नन्दन्तोऽतितरां समृद्धकान्तयो नखा एवेन्दवश्चन्द्रा यस्य । चरणपतितसकलराजशिरोमणिकिरणसंवर्धितनखकान्तिः । यशस्वी प्रतापवानत एव सर्वनृपतिवन्द्यचरण एतादृशः कोपि नास्ति तस्मादेनं वृणीष्वेति भावः । अन्योऽपि पत्नीकरकृतचरणसंवाहनेन नन्दति ॥

भङ्गाकीर्तिमपीमलीमसतमप्रत्यर्थिसेनाभट-
श्रेणीतिन्दुककाननेषु विलसत्यस्य प्रतापानलः ।

---

१ 'रूपकालंकारः' इति जीवातुः । २ 'अत्रैकस्यारिवर्गस्य क्रमादनेकास्वटवीष्वटवीभूतपुरीषु च वृत्तेन, तथा पुरीष्वपि पुरीत्वाटवीत्वयोः क्रमसंबन्धोक्त्या च, एकमनेकस्मिन्, अनेकमेकस्मिन्वा क्रमेण पर्याय इत्युक्तलक्षणं पर्यायभेदद्वयं द्रष्टव्यम्' इति जीवातुः ।

तस्मादुत्पतिताः स्फुरन्ति जगदुत्सङ्गे स्फुलिङ्गाः स्फुटं
भालोद्भूतभवाक्षिभानुहुतभुग्जम्भारिदम्भोलयः ॥ १९

भङ्गेति ॥ अस्य प्रतापानलो भङ्गेन पराजयेन जनिता अकीर्तिः सैव श्यामत्वान्मषी तया मलीमसतमा अतितरां मलिनीभूताः प्रत्यर्थिसेनाभटाः शत्रुसैनिकशूरास्तेषां श्रेणी समूहः सैव श्यामत्वात्तिन्दुककाननानि तेषु विलसति विशेषेण दीप्यते। तस्मादेतदीयात्प्रतापानलादुत्पतिता उत्थिता भालाल्ललाटादुद्भूतं भवाक्षि हरतृतीयनेत्रं, भानुः सूर्यः, हुतभुग्वह्निः, जम्भारेरिन्द्रस्य दम्भोलिर्वज्रः, एते स्फुलिङ्गाः स्फुटं अग्निकणा इव जगदुत्सङ्गे जगतां भूम्यादीनां मध्ये स्फुरन्ति शोभन्ते। तिन्दुकवनानि हि श्यामानि भवन्ति। तत्र पतितो वह्निश्चटचटाशब्दं कुर्वन्स्फुलिङ्गान्मुञ्चति। महत्स्वपि हरनेत्रादिषु स्फुलिङ्गत्वारोपेण प्रतापानलस्यातितरां माहात्म्यं सूचितम्-यस्य कणा एवंभूताः स कथंभूतो भवतीति[1] ॥

एतद्दन्तिबलैर्विलोक्य निखिलामालिङ्गितार्द्रां भुवं
सङ्ग्रामाङ्गणसीम्नि जङ्गमगिरिस्तोमभ्रमाधायिभिः।
पृथ्वीन्द्रः पृथुरेतदुग्रसमरप्रेक्षोपनम्रामर-
श्रेणीमध्यचरः पुनः क्षितिधरक्षेपाय धत्ते धियम्॥२०॥

एतदिति ॥ हे भैमि, एतस्य पाण्ड्यस्योग्रसमरस्य प्रेक्षायै उपनम्रा समागता अमरश्रेणी देवसङ्घः तन्मध्यचरो मध्ये वर्तमानः। देवत्वं प्राप्त इति यावत्। एवंभूतः पृथुर्वैन्यः पृथ्वीन्द्रः पुनः क्षितिधराणां पर्वतानां क्षेपाय प्रोत्सारणाय धियं बुद्धिं धत्ते। किं कृत्वा—सङ्ग्रामाङ्गणस्य सीम्नि मर्यादायां जङ्गमानां स्थानात्स्थानान्तरं गच्छतां गिरीणां स्तोमस्य भ्रमाधायिभिर्भ्रान्तिं कुर्वाणैश्चलदुच्चतरगिरितुल्यैरेतस्य दन्तिबलैर्निखिलां भुवमालिङ्गितार्द्रां व्याप्तप्रदेशां विलोक्य। पूर्वं पृथुना स्वधनुष्कोट्या जङ्गमपर्वतानुत्सार्य क्षेत्रादिविभागः कृतः एतद्गजान्दृष्ट्वा सङ्ग्रामदर्शनार्थमागतेन एते पर्वता इति बुद्ध्यैतदुत्सारणे पुनरपि बुद्धिः कृतेत्यर्थः। उच्चतरगजबाहुल्यं दारुणरणरसिकत्वं च सूचितम् ॥

शशंस दासीङ्गितविद्विदर्भजा-
मितो ननु स्वामिनि पश्य कौतुकम्।
यदेष सौधाग्रनटे पटाञ्चले
चलेऽपि काकस्य पदार्पणग्रहः ॥ २१ ॥

शशंसेति ॥ इङ्गितविज्ञैर्भ्यभिप्रायज्ञा काचिद्दासी विदर्भजां शशंस बभाषे। ननु हे स्वामिनि, इतः अस्यां दिशि त्वं कौतुकं पश्य। किं तत्—सौधः सुधाधवलितगृहं तस्याग्रमूर्ध्वदेशस्तत्र वर्तमाने नटे चलत्वान्नर्तकतुल्ये वायुवशाच्चलेऽपि पटाञ्चले पताकावसनाञ्चले यत् एष काकस्य पदार्पणे चरणस्थापने ग्रहस्तत्रोपवेशनार्थं पौनःपुन्येन प्रवृत्तिनिर्बन्धः। तत् कौतुकं पश्येति संबन्धः। अननुरक्तायां भैम्यां शृङ्गारचेष्टां भावयतः पाण्ड्यस्यायं यथा-पटाञ्चले उपवेशनार्थं काकस्याग्रहोऽनुचितः, तथैतस्य पाण्ड्यस्यायं भैम्यां दुरभिनिवेश इति सूचनार्थं सरस्वतीकृततद्वर्णननिवारणार्थं वेयमुक्तिः इत एतद्वर्णनकौतुकात्सकाशादिति वा ॥

१ 'उत्प्रेक्षा रूपकसंकीर्णा' इति जीवातुः। २ 'अत्र गम्योत्प्रेक्षा भ्रान्तिमदलंकारोत्थापितेति संकरः' इति जीवातुः।

ततस्तदप्रस्तुतभाषितोत्थितैः
सदस्तदश्वेति हसैः सदःसदाम्।
स्फुटाजनि म्लानिरतोऽस्य भूपतेः
सिते हि जायेत शितेः सुलक्ष्यता ॥ २२ ॥

तत इति ॥ ततस्तस्या दास्याः पूर्वोक्तमप्रस्तुतं भाषितं वचनं तस्मादुत्थितैः सदःसदां सभ्यानां हसैर्हसितैस्तत् सदः सा सभा अश्वेति श्वेतीकृतम्। तद्वचनं श्रुत्वा सभ्या हसन्ति स्मेत्यर्थः। अतः सदःश्वेतीकरणाद्धेतोरस्य भूपतेर्म्लानिः लज्जा वैवर्ण्यं स्फुटाजनि। अत्रार्थान्तरन्यासमाह—हि यस्मात् सिते शुभ्रवस्तुनि शितेः कृष्णवर्णस्य सुलक्ष्यता प्रकटता जायते। सभ्यहास्यवशात्सोऽधिकं विवर्णो जात इत्यर्थः। स स्वत एव श्यामः सभ्यहास्यवशादधिकः श्यामो जात इति वार्थः। अश्वेति, 'श्वितीङ् शौक्ल्ये इत्यस्माण्ण्यन्तात्कर्मणि लुङ्यात्मनेपदम् ॥

ततोऽनु देव्या जगदे महेन्द्रभू-
पुरंदरं सा जगदेकवन्द्यया।
तदार्जवावर्जिततर्जनीकया
जनी कयाचित्परचित्स्वरूपया ॥ २३ ॥

तत इति ॥ ततः कयाचिल्लोकोत्तरयानिरूपितरूपया देव्या वाण्या महेन्द्रभुवो महेन्द्रनामकपर्वतसंबन्धिनो देशस्य पुरंदरं स्वामिनं अनु लक्षीकृत्य सा जनी स्वयंवरा जगदे उक्ता। किंभूतया—जगतः एका देवतान्तरपरित्यागेन वन्द्या तया। यतः परा श्रेष्ठा चित् ज्ञानलक्षणं स्वरूपं यस्यास्तया। तथा तस्या भैम्या यदार्जवं ऋजुत्वं तेनावर्जिता वर्णनार्थमूर्ध्वीकृता तर्जनी यया। तस्मिन्वर्णनीये नृपे विषये वा। देव्या एव वा यदार्जवं कृपा तया। जगदे कर्मणि तङ्। 'वाचंयमपुरंदरौ च' इति निपातनात्पुरंदरः साधुः। तर्जनीक इति 'नद्यृतश्च' इति कप्। अनोर्लक्षणे कर्मप्रवचनीयत्वात्पुरंदरमिति द्वितीया ॥

स्वयंवरोद्वाहमहे वृणीष्व हे
महेन्द्रशैलस्य महेन्द्रमागतम्।
कलिङ्गजानां स्वकुचद्वयश्रिया
कलिं गजानां शृणु तत्र कुम्भयोः ॥२४॥

स्वयमिति ॥ हे भैमि, स्वयंवरेण उद्वाहस्तल्लक्षणे महे उत्साहे आगतं महेन्द्रशैलस्य महेन्द्रं स्वामिनं वृणीष्व। त्वं तत्र पर्वतोपलक्षिते देशे कलिङ्गदेशे जातानां गजानां कुम्भयोः स्वकुचद्वयश्रिया सह कलिं समानशोभाख्यद्रव्याभिलाषनिमित्तं कलहं शृणु। हस्तिकुम्भास्त्वत्कुचसाम्यमभिलषिष्यन्ति परं न प्राप्स्यन्तीति भावः। स्वयंवरोद्वाह एव मह उत्सवो यस्यास्तत्संबुद्धिरिति वा ॥

अयं किलायात इतीरिपौरवा-
ग्भयादयादस्य रिपुर्वृथा वनम्।
श्रुतास्तदुत्स्वापगिरस्तदक्षराः
पठद्भिरत्रासि शुकैर्वनेऽपि सः ॥ २५ ॥

अयमिति ॥ अयं कलिङ्गदेशाधिप आयातः किल श्रूयते इति ईरयन्तीति ईरिणः पौरास्तेषां वाक् तस्याः सकाशाद्भयं तस्माद्धेतोः अस्य रिपुः यत् वनमयात्पलाय्य गतवान् तद्वृथा । रिपुरिति जात्येकवचनम् । वैयर्थ्ये हेतुमाह–तान्येव अयं समायात इत्येवंरूपाण्यक्षराणि यासु ताः श्रुताः शुकैरेवाकर्णितास्तस्य एतदीयरिपोः उत्स्वापगिरोऽतिशयितनिद्राप्रलापवाचः एकस्याप्यक्षरस्य व्यत्यासं विना पठद्भिः शुकैर्वनेऽपि स रिपुरत्रासि भीषितः । पलाय्य वने गतानामपि रिपूणामुत्स्वप्नलपितास्ता गिरो बहुशः पठद्भिः शुकैर्वनेऽपि त्रासिता वैरिणः स्थातुं न शक्नुवन्तीत्यर्थः । अतिशूरोऽयमिति भावः ॥

इतस्त्रसद्विद्रुतभूभृदुज्झिता
प्रियाथ दृष्ट्वा वनमानवीजनैः ।
शशंस पृष्टाद्भुतमात्मदेशजं
शशित्विषः शीतलशीलतां किल ॥ २६ ॥

इत इति ॥ इतः अस्माद्राज्ञः सकाशात्त्रसन्तो भीताः अत एव विद्रुताः पलायिताः भूभृतो राजानस्तैः परित्यक्ता प्रिया स्वस्वप्राणेश्वरी वनमानवीजनैर्भिल्लीजनैर्दृष्टा । अथ पश्चादात्मदेशजं अद्भुतं पृष्टा सती भवत्या देशे किमपूर्वमिति, शशित्विषश्चन्द्रस्य शीतलशीलतां किल प्रसिद्धं हिमस्वभावत्वमेव स्वदेशजातमाश्चर्यं शशंसाकथयत् । स्वदेशे वियोगाभावाच्चन्द्रकराणां शीतलत्वं, वने च वियोगादुष्णत्वमित्यर्थः । प्रियेति जात्येकवचनम् । भर्तृत्यक्ता वियोगज्वरभराक्रान्ता सती वने चन्द्रकान्तिमुष्णामनुभवतीत्यर्थः ॥

इतोऽपि किं वीरयसे न कुर्वतो
नृपान्धनुर्बाणगुणैर्वशंवदान् ।
गुणेन शुद्धेन विधाय निर्भयं
तमेनमुर्वीवलयोर्वशी वशम् ॥ २७ ॥

इत इति ॥ हे भैमि, त्वं इतोऽपि राज्ञः सकाशात् किमिति न वीरयसे शूरा न भवसि । अपितु तस्मादपि शूरा भव । किं वीरा न भवसि अपि तु वीरा भवस्येवेति वा । किंभूतादितः नृपाञ्शत्रून् धनुश्च बाणाश्च गुणाश्च चापशरमौर्वीरूपैर्बहुभिरुपकरणैः कृत्वा वशंवदान्वश्यान्कुर्वतः । किंभूता त्वम् । उर्वीवलये उर्वशीरूपातिसुन्दरी । किं कृत्वा–तमेनं बहुभिर्धनुरादिभिरुपकरणैर्विद्विषां जैत्रं शुद्धेन केवलेन चापादिलेशसंस्पर्शरहितेन सौन्दर्यादिना गुणेन मौर्व्या च कृत्वा निर्भरमतितरामायासरहितं वा यथा तथा वशं विधाय । बहुसाधनैः पराञ्जयतोऽस्यैकेनैव साधनेन जयकरणादित्यर्थः । मौर्वीमात्रेण जयादाश्चर्यं च । अयं सर्वेभ्योऽपि वीरः अस्मादपि त्वमित्यपेरर्थः । वीरयसे, 'शूर वीर विक्रान्तौ' इति चुरादिः ॥

एतद्भीतारिनारी गिरिबिलविगलद्वासरा निःसरन्ती
स्वक्रीडाहंसमोहग्रहिलशिशुभृशप्रार्थितोन्निद्रचन्द्रा ।
आक्रन्दद्भूरि यत्तन्नयनजलमिलच्चन्द्रहंसानुबिम्ब-
प्रत्यासत्तिप्रहृष्यत्तनयविहसितैराश्वसीन्न्यश्वसीच्च २८

एतदिति ॥ एतस्माद्भीतानामरीणां नारी, एतस्माद्भीता अरिनारी वा गिरिबिले पर्वतकंदरायां विगलद्वासरातिवाहितदिवसा । तथा—रात्रौ निःसरन्ती बिलाद्बहिर्निर्गच्छन्ती । तथा—तदनन्तरं स्वः स्वकीयो मदीयः क्रीडाहंस एवायमिति मोहो भ्रान्तिस्तया ग्रहिलो मदीयमेनं हंसं देहीत्याग्रहवान् शिशुस्तेन भृशं प्रार्थितो याचित उन्निद्रश्चन्द्रो यां एवंभूता सती चन्द्रदाने सामर्थ्याभावात्तदाग्रहशान्त्यभावाद्दुःखवशाद्यद्यस्माद्भूरि बहु आक्रन्दद्रुरोद । तस्माद्धेतोः बहुतरे नयनजले मिलन्प्रतिबिम्बरूपेण संघट्टमानो यश्चन्द्ररूपो हंसस्तस्य योऽनुबिम्बः, मिलन्यश्चन्द्रहंसस्यानुबिम्बो वा, तस्य प्रत्यासत्त्या सामीप्येन मदीयः क्रीडाहंसोऽयमागत इति बुद्ध्या प्रहृष्यन्तो मोदमानस्य तनयस्य पुत्रस्य विहसितैर्हासैः कृत्वा तदाग्रहशान्तैः आश्वसीदाश्वासं प्राप । परित्यक्तस्वीयसंपत्स्मरणात्क्व तव हंसः वृथैव भ्रान्तोऽसीति न्यश्वसी(स)च्च शोकनिश्वासं चामुञ्चत् । आश्वसीत्, लङि 'रुदश्च पञ्चभ्यः' इत्यपृक्तसार्वधातुकस्येडागमः । लुङि वा 'ह्म्यन्तक्षण–' इति वृद्धिनिषेधे रूपम् । न्यश्वसी(स)त्, लङि 'अङ्गार्ग्यगालवयोः' इत्यपृक्तसार्वधातुकस्याडागमः ॥

अस्मिन्दिग्विजयोद्यते पतिरयं मे स्तादिति ध्यायिनी
कम्पं सात्त्विकभावमञ्चति रिपुक्षोणीन्द्रदारा धरा ।
अस्यैवाभिमुखं निपत्य समरे यास्यद्भिरूर्ध्वं निजः
पन्था भास्वति दृश्यते बिलमयः प्रत्यर्थिभिः पार्थिवैः ॥

अस्मिन्निति ॥ हे भैमि, अस्मिन्राज्ञि दिग्विजयोद्यते सति रिपवश्च ते क्षोणीन्द्रा राजानस्तेषां दाराः प्रिया वशवर्तिनी धरा पृथ्वी अयं राजा मे पतिः स्वामी स्ताद्भयादिति ध्यायिनी चिन्तयन्ती सती सात्त्विकेषु मध्ये कम्पलक्षणं सात्त्विकभावमञ्चति गच्छति । अन्यस्वामिसूचकं भूकम्पलक्षणं भौममुत्पातं प्राप्नोतीत्यर्थः । एवमन्याप्येवं ध्यायन्ती सती सात्त्विकं भावं प्राप्नोति । तथा—समरेऽस्यैवाभिमुखं शस्त्राघातैर्निपत्य ऊर्ध्वमूर्ध्वदेशम् । अथ च—उत्तमं स्वर्गलोकं, यास्यद्भिर्गमिष्यद्भिः प्रत्यर्थिभिः पार्थिवैः भास्वति सूर्यमण्डलमध्ये निजः स्वीयो बिलमयः पन्था दृश्यते । 'द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राट् योगयुक्तश्च रणे चाभिमुखो हतः ॥' इति वचनात् । अथ च—सूर्ये बिलरूपो ह्युत्पातश्च म्रियमाणैर्दृश्यते । अतिशूरोऽयमिति भावः ॥

विद्राणे रणचत्वरादरिगणे त्रस्ते समस्ते पुनः
कोपात्कोऽपि निवर्तते यदि भटः कीर्त्या जगत्युद्भटः ।
आगच्छन्नपि संमुखं विमुखतामेवाधिगच्छत्यसौ
द्रागेतच्छुरिकारयेण ठणिति च्छिन्नापसर्पच्छिराः ३०

विद्राण इति ॥ त्रस्ते भीते अत एव रणचत्वराद्रणाङ्गणाद्विद्राणे पलायिते समस्तेऽरिगणे मध्ये कोपि भटः शूरः कोपाद्यदि पुनः निवर्तते । यतो जगति कीर्त्या यशसा उद्भटः ख्यातः । असौ भटः अस्य संमुखमागच्छन्नपि विमुखतामेव विगतमुखत्वमधिग-

१ 'अत्र नारीशिश्वोश्चन्द्रबिम्बे तत्प्रतिबिम्बे च विसंमतसादृश्याद्धंसभ्रान्तिनिबन्धनाद्भ्रान्तिमदलङ्कारः' इति जीवातुः । २ 'अत्रात्मीयोर्ध्वगमनमार्गत्वोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या' इति जीवातुः ।

च्छति प्राप्नोति । अथ च—संमुखमागच्छन्नपि पराङ्मुखो जात इति विरोधाभासः । यतः—द्राक् शीघ्रमेतस्य छुरिकाया रयेण 'ठण्' इति यथा तथा खण्डितमपसर्पदधःपतच्छिरो यस्य सः । 'ठण्' इति लोहकण्ठास्थिसंघट्टजशब्दानुकरणम् । अतिशूरोऽयमिति भावः ॥

ततस्तदुर्वीन्द्रगुणाद्भुतादिव
स्ववक्त्रपद्मेऽङ्गुलिनालदायिनी ।
विधीयतामाननमुद्रणेति सा
जगाद वैदग्ध्यमयेङ्गितैव ताम् ॥ ३१ ॥

तत इति ॥ ततः सा भैमी तां वाणीं प्रति वचनमन्तरेणैव इति जगाद । इति किम्—आननमुद्रणा मौनं विधीयतामिति । किंभूता—तस्य उर्वीन्द्रस्य गुणाकर्णनसमुत्पन्नात् अद्भुतादाश्चर्यादिव स्ववक्त्रपद्मे अङ्गुलिरूपं नालं तस्य दायिनी । अत एव वैदग्ध्यमयं एतच्चातुर्यबहुलमिङ्गितं चेष्टितं यस्याः सा । वचननिषेधार्थं, आश्चर्याभिनयार्थं च मुखे अङ्गुलिर्दीयते । वर्णननिषेधार्थं दत्ताङ्गुलिस्तद्गुणाद्भुतादिवेति लोकैरुत्प्रेक्षितमित्यर्थः । पद्मे च नालं भवति ॥

अनन्तरं तामवदन्नृपान्तरं
तदध्वदृक्तारतरङ्गरङ्गणा ।
तृणीभवत्पुष्पशरं सरस्वती
स्वतीव्रतेजःपरिभूतभूतलम् ॥ ३२ ॥

अनन्तरमिति ॥ अनन्तरं तद्वर्णननिषेधानन्तरं सरस्वती नृपान्तरं तां भैमीं प्रत्यवदत् । किंभूता—तस्य वर्णनीयनृपान्तरस्याध्वनि तद्दिशि दृशः ताराणामतिविशालानां तरङ्गाणां दृग्व्यापाराणां रङ्गणं गतिर्यस्याः । दृग्व्यापारदर्शितवर्णनीयनृपान्तरा । किंभूतं नृपान्तरम्—तृणीभवन्दीनो भवन्पुष्पशरः कामो यस्मात् । तथा—स्वतीव्रतेजसा परिभूतं वशीकृतं भूतलं भूमण्डलं येन । 'रिङ्गणा' इति च पाठः ॥

तदेव किं न क्रियते न का क्षिति-
र्यदेष तद्दूतमुखेन काङ्क्षति ।
प्रसीद काञ्चीमयमाच्छिनत्तु ते
प्रसह्य काञ्चीपुरभूपुरंदरः ॥ ३३ ॥

तदिति ॥ नु भैमि, एष काञ्चीपुरस्य संबन्धिन्या भुवः पुरंदरस्त्वां प्रति प्रहितस्य दूतस्य मुखेन संदेशवचनेन कृत्वा यत्त्वदीयवरणादि काङ्क्षति तदेव किं न क्रियते । अपि तु तदेव क्रियताम् । एतदुक्तं कुर्वत्यास्तव का क्षतिर्हानिः । अपि तु न कापि । अस्मिन्प्रसीद । अयं नवरते लज्जया अमन्यमानाया अपि ते काञ्चीं मेखलाबन्धं प्रसह्य हठादाच्छिनत्तु शिथिलयतु । अधीरतया ग्रन्थेरुन्मोचनमसहमानस्त्रोटयतु वा । एनं वृणीष्वेति भावः ॥

मयि स्थितिर्नम्रतयैव लभ्यते
दिगेव तु स्तब्धतया विलङ्घ्यते ।
इतीव चापं दधदाशुगं क्षिप-
न्नयं नयं सम्यगुपादिशद्द्विषाम् ॥ ३४ ॥

मयीति ॥ चापं दधत्, आशुगं वैरिषु क्षिपन् अयं राजा इति पूर्वोक्तं द्विषां नयं नीतिं सम्यगुपादिशदिव । इति किम्—हे द्विषः, मयि मत्समीपे नम्रतयैव विनीततयैव स्थितिर्निवासः । अथ च—स्वराज्ये स्थितिः, लभ्यते । स्तब्धतयाऽविनीततया तु पुनर्दिगेव विलङ्घ्यतेऽतिक्रम्यते । चेन्मयि नम्रा (अ)भविष्यथ(त) तर्हि चापज्यास्थितिं प्राप्स्यथ(त) । अन्यथा बाणवद्दिगन्तं (अ)यास्यथ(त) इति वचनं विनैवोक्तवानित्यर्थः । नम्रस्तब्धशब्दयोर्वक्रावक्रविनीताविनीतार्थपरतयोत्प्रेक्षा ॥

अदःसमित्संमुखवीरयौवत-
भ्रुटद्भुजाकम्बुमृणालहारिणी ।
द्विषद्रणस्त्रैणदृगम्बुनिर्झरे
यशोमरालावलिरस्य खेलति ॥ ३५ ॥

अद इति ॥ अस्य राज्ञः यशोरूपा मरालावलिर्हंसपङ्क्तिः द्विषतां भटानां सङ्ग्रामेषां स्त्रैणं स्त्रीवृन्दं तस्य दृगम्बुनिर्झरे नेत्रबाष्पप्रवाहे खेलति । किंभूता—अदःसमिति अमुष्य रणे संमुखागता ये वीरास्तेषां यौवतं स्त्रीसमूहस्तस्य वैधव्यवशाद्भ्रुटन्तो ये भुजाकम्बवः शङ्खवलयानि त एव मृणालानि हरत्यपनयति भक्षयति वेत्येवंशीला । हंसावली हि मृणालाहारा निर्झरोदके क्रीडति । रणे संमुखागतानां शत्रूणां वधात्तस्त्रियः शङ्खवलयानि स्फोटयन्ति रुदन्ति च तेन चास्य कीर्तिर्भवति ॥

सिन्दूरद्युतिमुग्धमूर्धनि धृतस्कन्धावधिश्यामिके
व्योमान्तस्पृशि सिन्धुरेऽस्य समरारम्भोद्धुरे धावति ।
जानीमो नु यदि प्रदोषतिमिरव्यामिश्रसंध्याधिये-
वास्तं यान्ति समस्तबाहुजभुजातेजःसहस्रांशवः ॥ ३६ ॥

सिन्दूरेति ॥ नु भैमि, समरस्य आरम्भे उद्धुर उद्युक्ते अस्य सिन्धुरे गजे धावति सति समस्ता बाहुजाः क्षत्रियास्तेषां भुजातेजांस्येव सहस्रांशवः सूर्या यदि यत् अस्तं विनाशं अस्ताचलं च यान्ति गच्छन्ति । तत् प्रदोषतिमिरेण रजनीमुखसंबन्धिना तमसा व्यामिश्रा मिलिता या संध्या तस्या धिया बुद्ध्या भ्रान्त्येवेति वयं जानीमः । वाक्यार्थः कर्म । दिवारजन्योः संधौ भवः सांध्यो रागः तद्भ्रान्त्येत्यर्थः । किंभूते सिन्धुरे—सिन्दूरद्युत्या मुग्धो मनोज्ञो मूर्धा यस्य । तथा—धृता स्कन्धावधीकृत्य श्यामिका स्वाभाविकी कज्जललेपमण्डनजा वा कालता येन । तथा—उच्चतया व्योमान्तःस्पृशि गगनमध्यस्पर्शिनि । तथा—समरारम्भाद्गणतुर्यश्रवणात्कोपदुःसहे वा । यदि अस्तं यान्ति तर्हि सायंकालतिमिरसंपृक्तसंध्याधियेति वा । संध्यापि किंचित्कज्जलतुल्यतिमिरयुक्ता सिन्दूरवच्च स्वतो रक्ता वरुणदिगन्तस्पर्शिनी चेति पूर्वोक्तविशिष्टहस्तिदर्शने सति इयं सायंसंध्येति बुद्ध्यैव तेजःसूर्याणामस्तगमनं युक्तम् । एवंविधं गजं दृष्ट्वा सर्वेऽपि पलायन्त एवेत्यर्थः । 'जानीमोऽथ तदा' इति पाठे अथशब्दो यदित्यर्थे, तदा तदित्यर्थे ज्ञेयः । श्यामैव श्यामिकेति स्वार्थे कप्रत्यये 'प्रत्ययस्थात्' इतीत्वम् ॥

---

१ 'रूपकालंकारः' इति जीवातुः । २ 'उत्प्रेक्षालंकारः' इति जीवातुः ।

हित्वा दैत्यरिपोरुरः स्वभवनं शून्यत्वदोषस्फुटा-
सीदन्मर्कटकीटकृत्रिमसितच्छत्रीभवत्कौस्तुभम् ।
उज्झित्वा निजसद्म पद्ममपि तद्व्यक्तावनद्धीकृतं
लूतातन्तुभिरन्तरद्य भुजयोः श्रीरस्य विश्राम्यति ॥३७

हित्वेति ॥ श्रीः लक्ष्मीः अद्यास्य भुजयोरन्तः मध्ये विश्राम्यति शोभते । किं कृत्वा—दैत्यरिपोर्विष्णोः स्वभवनं स्वस्य गृहं उरः हित्वा । तथा—तत् निजसद्म पद्ममप्युज्झित्वा । किंभूतमुरः-लक्ष्म्या त्यक्तत्वाच्छून्यत्वलक्षणेन दोषेण स्फुटमासीदन्तः स्थिरीभवन्तो मर्कटकीटा ऊर्णनाभकीटास्तेषां करणेन निर्वृत्तं तैरचितं कृत्रिमं सितच्छत्रमिव सितच्छत्रं मण्डलाकारं श्वेतं गभाण्ड(न्तः) स्थापनस्थानं तद् भवंस्तद्रूपीभवन्कौस्तुभाख्यो मणिर्यत्र । किंभूतं पद्मम्—लूतातन्तुभिः मर्कटीसूत्रैर्मर्कटसदृशैः । कमलसूत्रैरित्यर्थः । व्यक्तं प्रकटमवनद्धीकृतं बद्धम् । बिसतन्तूनामेव लूतातन्तुत्वेनोक्तिः । परस्परमतिदूरे द्वे अपि भवने प्रति गतागताभ्यां श्रान्ता सती गृहद्वयं परित्यज्य अतिसमीपवर्तिनोरस्य भुजयोरेव भवनयोः सुखेन निषीदति । अत्रैव स्थिरा भवतीत्यर्थः । कौस्तुभस्य धवलत्वाल्लूताच्छत्रत्वेन, कमलसूत्राणां च सादृश्याल्लूतातन्तुत्वेनोत्प्रेक्षा । 'लूता स्त्री तन्तुवाये स्यात्' इत्यमरः ॥

सिन्धोर्जैत्रमयं पवित्रमसृजत्तत्कीर्तिपूर्ताद्भुतं
यत्र स्नान्ति जगन्ति सन्ति कवयः केवा न वाचंयमाः ।
यद्बिन्दुश्रियमिन्दुरञ्चति जलं चाविश्य दृश्येतरो
यस्यासौ जलदेवतास्फटिकभूर्जागर्ति यागेश्वरः ॥३८॥

सिन्धोरिति ॥ अयं सिन्धोर्जैत्रं समुद्रस्य जेतृ पवित्रमुज्ज्वलं पावनं च तत्कीर्तिपूर्ताद्भुतं यशोरूपतडागाश्चर्यमसृजन्निर्ममे । यत्र कीर्तितडागे जगन्ति स्नान्ति उज्ज्वलीभवन्ति स्नानं च कुर्वन्ति । यद्वर्णनविषये के वा कवयः स्फुन्नु (?) रतनार्थसार्था अपि वाचंयमा मौनिनो न सन्ति । अपि तु सर्वेपि मौनिन एव भवन्तीत्यर्थः । अथ च—के वयो जलपक्षिणः के वा तापसा न सन्ति । अपि तु तडागे बहवः पक्षिणस्तापसाश्च विद्यन्ते । इन्दुः यस्य कीर्तितडागस्य बिन्दुश्रियमञ्चति प्राप्नोति । यदपेक्षया चन्द्रोऽल्पीयानित्यर्थः । अथ च—महतस्तडागस्य जलबिन्दुशोभामिन्दुरञ्चति । यदीयो बिन्दुरेवेन्दुरित्यर्थः । यस्य च जलमाविश्य प्रविश्येव दृश्येतरः अस्मदादिनेत्रयोरविषयभूतः असौ जगति विद्यमानः स्फटिक एव भूः यस्य (स) कैलास एव जा(या)गेश्वरः स्फाटिकश्रीशिवलिङ्गरूपी जलदेवता जागर्ति स्फुरति । समच्छायत्वाज्जले क्षिप्तः स्फटिको न दृश्यते । इयमेव स्फटिकपरीक्षा । उज्ज्वलतरैतत्कीर्तिकल्लोलप्लावित इव कैलासो न दृश्यते । इन्दुर्जले चाविश्य जले प्रतिबिम्बितः सन् यद्बिन्दुश्रियमञ्चतीति वा । असौ इन्दुरेव यस्य जलमाविश्यादृश्यः स्फटिकनिर्मितो यागेश्वरः सन् जलदेवता जागर्ति । कीर्तिमध्यपाती चन्द्रोऽपि समच्छायत्वान्न दृश्यत इत्यर्थ इति वा । 'यागेश्वरः स्फाटिकः' इति प्रसिद्धिः । समुद्राधिक्यं तु 'सागरं पर्वणि स्पृशेत' इति वचनात्पर्वातिरिक्ते काले समुद्रस्यास्पृश्यत्वादस्य तु सर्वदा पवित्रत्वात् । समुद्रस्य भूलोकस्थस्यैव कतिपयस्यैव जनस्य स्नानार्हत्वादस्य तु लोकत्रयस्य स्नानार्हत्वात् । तस्य वर्णयितुं शक्यत्वादस्य चाशक्यत्वात् । तस्य च चन्द्रैकसर्वस्वत्वादस्य च बिन्दुरूपचन्द्रत्वात् समुद्रे च श्रीविष्णुरूपाया जलदेवतायाः सुप्तत्वादत्र च यागेश्वरस्य जाग्रत्वात् । एवंविधो यशस्वी कोऽपि नास्तीति भावः । यागेश्वर इति । असौ जलदेवता जागर्ति । असौ का—या स्फटिकभूरगेश्वरः कैलासो जागर्तीति वा । 'वाचि यमो व्रते' इति खचि 'वाचंयमपुरंदरौ च' इति साधुः ॥

अन्तःसंतोषबाष्पैः स्थगयति न दृशस्ताभिराकर्णयिष्य-
न्नङ्गे नानस्तिरोमा रचयति पुलकश्रेणिमानन्दकन्दाम् ।
न क्षोणीभङ्गभीरुः कलयति च शिरःकम्पनं तन्न विद्मः
शृण्वन्नेतस्य कीर्तीः कथमुरगपतिः प्रीतिमाविष्करोति॥

अन्तरिति ॥ यस्मात् उरगपतिः शेषः अन्तः संतोषबाष्पैरानन्दाश्रुभिः कृत्वा दृशो नेत्राणि न स्थगयत्याच्छादयति । यतः—ताभिर्दृग्भिः एतद्गुणानाकर्णयिष्यन्सन् । चक्षुःश्रवत्वादश्रुभिर्नेत्राच्छादनेन गुणानाकर्णनशङ्कया आनन्दाश्रुभिर्दृशौ नाच्छादयति । तथा—आनन्द एव कन्दो मूलं यस्यास्तां पुलकश्रेणिं रोमाञ्चपङ्क्तिमपि अङ्गे न रचयति करोति । यतः—अनस्तिरोमाविद्यमानरोमा । यथा- संतोषाच्छिरःकम्पनं न करोति । यतः—क्षोणीभङ्गभीरुः यद्यहं मूर्धानं कम्पयिष्यामि तर्हि भूमिः पतिष्यतीति भिया । तस्मात्कारणादेतस्य कीर्तीः शृण्वन् शेषोऽन्तःकरणे समुत्पन्नां प्रीतिं कथं केनान्येन प्रकारेणाविष्करोति प्रकटयति वयं तत् न विद्मः । आश्चर्यरूपकीर्तिरयमितिभावः । सहस्रमुखत्वाद्दृश इति बहुत्वम् ॥

आचूडाग्रममज्जयज्जयपटुर्यच्छल्यदण्डानयं
संरम्भे रिपुराजकुञ्जरघटाकुम्भस्थलेषु स्थिरान् ।
सा सेवास्य पृथुः प्रसीदति तया नास्मै कुतस्त्वत्कुच-
स्पर्धागर्धिषु तेषु तान्धृतवते दण्डान्प्रदण्डानपि ॥४०॥

आचूडेति ॥ संरम्भे युद्धसंभ्रमे सति जये पटुरयं राजा रिपवश्च ते राजानश्च तेषां कुञ्जरघटाकुम्भस्थलेषु दूरनिखाततया स्थिरान् शल्यस्य अग्रलोहस्य संबन्धिनो दण्डान्शरान्प्रासान्वा आचूडाग्रं पुङ्खाग्रं मर्यादीकृत्य यदमज्जयन्निचखान । सा अस्य एतत्कर्तृका त्वदीया पृथुर्महती सेवा । तया सेवया त्वं अस्मै कुतो न प्रसीदसि । यतः—किंभूताय—तव कुचस्पर्धागर्धिषु कुचसाम्याभिलाषिषु तेषु कुम्भस्थलेषु तान्पूर्वोक्तान्प्रचण्डान्दण्डान्धृतवतेऽपि कृतवतेऽपि । येन हि महती सेवा क्रियते तस्मै प्रसन्नीभूयते । अतिशूरोऽयं तस्माद्वृणीष्वेत्यर्थः ॥

स्मितश्रिया सृक्कणि लीयमानया
वितीर्णया तद्गुणशर्मणेव सा ।
उपाहसत्कीर्त्यमहत्त्वमेव तं
गिरां हि पारे निषधेन्द्रवैभवम् ॥ ४१ ॥

स्मितेति ॥ सा भैमी स्मितश्रिया तं राजानमुपाहसदुपहसि-

१ 'अत्रैकस्याः श्रियः क्रमेणानेकाधारवृत्त्युक्त्या पर्यायालङ्कारभेदः । तेनैव तद्भुजयोः श्रीरञ्जने विष्णुरःपद्माभ्यामप्यधिकं वस्तु व्यज्यते' इति जीवातुः ।

तवती । यतः-कीर्त्यं वर्णयितुं शक्यं महत्त्वं यस्य एवंभूतमेव । हि यस्मात्-निषधेन्द्रवंभवं नलसामर्थ्यं गिरां पारे वाग्गोचरः । वर्णयितुमपि न शक्यत इत्यर्थः । नलादेतस्य न्यूनत्वादुपहास इत्यर्थः । किंभूतया स्मितश्रिया-तद्गुणश्रवणेन तदीयगुणाकर्णनसमुत्पन्नेन सुखेन विनीर्णयेव दत्तयेव कृतयेव । तथा-सृक्कणि ओष्ठप्रान्ते लीयमानया संसर्गण्या । कीर्त्यमित्यसद्गुणारोपणार्थसूचकं पदम् ॥

निजाक्षिलक्ष्मीहसितेणशावका-
ममावभाणीदपरं परंतपम् ।
पुरैव तद्दिग्वलनश्रियां भुवा
भ्रुवा विनिर्दिश्य सभासभाजितम् ॥४२॥

निजेति ॥ अमां वाणीं अपरमन्यं परंतपं राजानं भ्रुवा पुरैव पूर्वमेव विनिर्दिश्य दर्शयित्वा तां भैमीमभाणीदुवाच । किंभूता-निजाक्ष्णोर्लक्ष्म्या नेत्रकान्त्या हसित एणशावको मृगशिशुर्यया । किंभूतया भ्रुवा—तस्य वर्णनीयस्य राज्ञो दिशा तत्संमुखं वलनेन दृक्पातेन कृत्वा याः श्रियस्तासां भुवा स्थानभूतया । किंभूतमेनम्-सभया सभास्थैः मनोज्ञतया सभाजितम् दृष्टं पूजितं वा रिपुतापकरत्वादन्वर्थनामानं वा ॥

कृपा नृपाणामुपरि क्वचिन्न ते
नतेन हा हा शिरसा रसादृशाम् ।
भवन्तु तावत्तव लोचनाञ्चला
निपेयनेपालनृपालपालयः ॥ ४३ ॥

कृपेति ॥ हे भैमि, ते तव नृपाणां मध्ये क्वचिदप्युपरि कस्याप्युपरि कृपा नास्ति । हा हा कष्टं कष्टम् । कमप्यवलोकयस्यपि नेति न युक्तमित्यर्थः । किंभूतानाम्—त्वत्कृतावज्ञावशाल्लज्जया नतेन शिरसा रसायां भूमौ दृग्येषाम् । रसां पश्यन्तीति वा । अन्यत्र कृपा मा भून्नाम तावत् । किंतु तव लोचनाञ्चला अपाङ्गदृगंशाः निपेयः सादरावलोकनार्हो यो नेपालानां देशानां नृपालो राजा तं पिबन्ति सादरं पश्यन्ति एवंभूता अलयो भ्रमरभूता भवन्तु । एनं तावत्कटाक्षैर्विलोकयेत्यर्थः ॥

ऋजुत्वमौनश्रुतिपारगामिता
यदीयमेतत्परमेव हिंसितुम् ।
अतीव विश्वासविधायि चेष्टितं
बहुर्महानस्य स दाम्भिकः शरः ॥ ४४ ॥

ऋजुत्वेति ॥ ऋजुत्वमवक्रता नम्रत्वप्रियवादित्वादिरूपा विनीतता च । तथा—मौनं निःशब्दत्वं वाङ्नियमश्च । श्रुतिपारगामिता आकर्णपूर्णता वेदपारगामिता च । एवंरूपं अतीवातितरां विश्वासकारि विगतश्वासकारि मनसि हितप्रत्ययकारकं च अलीकपवनाभ्यासवशाद्वा श्वासाभावकारि यदीयमेतच्चेष्टितं परं शत्रुं स्वव्यतिरिक्तं च सर्वं जनं हिंसितुमेव हन्तुमेव प्राणप्रियधनग्रहणार्थमेव च न तु लक्षव्यधनमात्रप्रयोजनं, न चार्जवादिगुणार्जनं प्रयोजनम् । सः अस्य बहुरसंख्यः महानक्षयोऽतिदीर्घश्च शरः दाम्भिकः । 'दम्भेन चरति' इति रूपकम् । अतिशूरोऽयमिति भावः । दाम्भिके यावद्वृत्तं तत्सर्वमेतस्य शरे विद्यत इत्यर्थः । दाम्भिकेन यत्क्रियते तदेतच्छरेण क्रियत इत्यर्थः । इति वा । दम्भो हिंसा माया च प्रयोजनमस्य, 'प्रयोजनम्' इति ठक् । तेन चरति वा, 'चरति' इति ठक् ॥

रिपूनवाप्यापि गतोऽवकीर्णिता-
मयं न यावज्जनरञ्जनव्रती ।
भृशं विरक्तानपि रक्तवत्तरा-
न्निकृत्य यत्तानसृजासृजद्युधि ॥ ४५ ॥

रिपूनिति ॥ यावन्तो जनास्तावतां रञ्जनं तदेव व्रतं तदस्यास्तीति एवंभूतोऽयं राजा रिपूनप्यवाप्य । रिपून्प्राप्यापि वा । अवकीर्णितां क्षतव्रतत्वं न गतः प्राप्तः । यत् यस्मात्स्वशरीरादिविषये भृशं विरक्तानननुरागिणोऽपि । अथ च—एनं दृष्ट्वा विगतरुधिरानपि तान्रिपून् युधि निकृत्य बाणैश्छित्त्वा असृजा रुधिरेण कृत्वा रक्तवत्तरान्रक्तवन्तोऽनुरागिणः । अथ च—रक्तं विद्यते येषु ते रक्तवन्तः, अतिशयेन रक्तवन्तो रक्तवत्तराः एवंभूतांस्तानसृजच्चकार । वैरिणामपि रञ्जनात्क्षतव्रतत्वं न जातमित्यर्थः । रक्तवत्तरान् रक्तवतुर्मतुप् च ॥

पतत्येतत्तेजोहुतभुजि कदाचिद्यदि तदा
पतङ्गः स्यादङ्गीकृततमपतङ्गापदुदयः ।
यशोऽमुष्येवोपार्जयितुमसमर्थेन विधिना
कथंचित्क्षीराम्भोनिधिरपि कृतस्तत्प्रतिनिधिः॥

पततीति ॥ पतङ्गः सूर्यः एतस्य तेज एव हुतभुगग्निस्तस्मिन् यदि कदाचित्कस्मिन्नपि समये पतति तदा तर्हि अङ्गीकृततमः भृशमङ्गीकृतः पतङ्गानां शलभानां देहदाहलक्षणाया आपद उदयो येन एवंभूत एव स्यात् । एतत्तेजसातितरां संतापवशात्पीडितः स्यात् । एतत्तेजोपेक्षया सूर्यो हीनः वह्न्यपेक्षया शलभतुल्य इत्यर्थः । तथा—अमुष्य यशः कथंचित्केनापि प्रकारेणोपार्जयितुमसमर्थेनेव विधिना ब्रह्मणा अतिमहान्क्षीराम्भोनिधिरपि तस्य एतदीययशसः प्रतिनिधिरनुकल्पः कृतः । कथंचित्कृत इति वा । यश एव यशःसदृशमिति वा । मुख्याभावे हि प्रतिनिधिरपि क्रियते । क्षीरादप्युज्ज्वलमस्य यश इत्यर्थः । एवंविधः प्रतापवान्यशस्वी च कोपि नास्तीति भावः । मुख्यापेक्षया प्रतिनिधेर्न्यूनत्वादेकद्वीपव्यापिनः क्षीरोदादशेषद्वीपव्यापिन्याः कीर्तेराधिक्याच्च ॥

यावत्पौलस्त्यवास्तूभवदुभयहरिल्लोमलेखोत्तरीये
सेतुप्रालेयशैलौ चरति नरपतेस्तावदेतस्य कीर्तिः ।
यावत्प्राक्प्रत्यगाशापरिवृढनगरारम्भणस्तम्भमुद्रा-
वद्री संध्यापताकारुचिरचितशिखाशोणशोभावुभौ च॥

यावदिति ॥ हे भैमि, सेतुप्रालेयशैलौ श्रीरघुनाथकृतः सेतुः

१ 'अत्र नलगुणानुरागाख्येन कारणेनैतदपरागरूपकार्यसमर्थनात्तद्व्यापारान्तरन्यासः' इति **जीवातुः** ।

१ 'अत्र शरे दाम्भिकत्वोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या' इति **जीवातुः** ।

प्रालेयशैलश्च हिमाचलः तौ यावत् यावन्तं देशमभिव्याप्य तिष्ठतः यावत्कालं तौ वर्तेते वा । एतस्य नरपतेः कीर्तिस्तावत्पर्यन्तं चरति भ्रमति । किंभूतौ शैलौ—पुलस्त्यगोत्रापत्ययो रावणकुबेरयोः अवास्तू अगृहभूमिभूते अपि वास्तू भवन्त्यौ गृहभूमित्वं प्राप्ते उभे द्वे अपि ये हरितौ दक्षिणोत्तरे दिशौ तयोः क्रमेण श्यामत्वाच्छुभ्रत्वाच्च रोमरेखा रोमावली उत्तरीयं पूर्वकायावरणवस्त्रं तद्रूपौ । समुद्रबन्धनशिलापरम्परा दक्षिणदिशो रोमस्थानीया । हिमाचलश्चोत्तरदिग्वस्त्रस्थानीयः । तथा—प्राक्च प्रत्यक्च आशे प्राचीप्रतीच्यौ दिशौ तयोः परिवृढौ स्वामिनौ इन्द्रवरुणौ तयोः ये नगरे तयोर्यदारम्भणमारम्भस्तस्मिन् । स्तम्भयोरिव सुन्दरी मुद्रा आकारो ययोस्तौ उभावद्री उदयास्ताचलौ च यावन्तं देशमभिव्याप्य तिष्ठतः । पूर्ववत् । किंभूतावद्री—प्रातः-सायंसंध्ये एव रक्तत्वात्पताकारुची ताभ्यां रचिता निर्मिता शिखायां शिखरे शोणा रक्ता शोभा ययोस्तौ । पौलस्त्य इति गोत्रापत्ये गर्गादित्वाद्यञ् । वास्तूभवदिति, 'च्वौ च' इति दीर्घः । उभौ अवयवौ ययोस्ते उभय्यौ ते च ते हरितौ चेति समासे पुंवद्भाव इति वा ।

युद्ध्वा चाभिमुखं रणस्य चरणस्यैवादसीयस्य वा
बुद्ध्वाऽन्तः स्वपरान्तरं निपततामुन्मुच्य बाणावलीः ।
छिन्नं वावनतीभवन्निजभियः खिन्नं भरेणाथ वा
राज्ञानेन हठाद्विलोठितमभूद्भूमावरीणां शिरः ॥४८॥

युद्ध्वेति ॥ अनेन राज्ञा अरीणां शिरः भूमौ हठाद्बलात्कारेण विलोठितं झटिति छेदात्स्फुरद्भ्रमणमभूत् । किंभूतानामरीणाम्—अदसीयस्यामुष्यायं अदसीयस्तस्य रणस्याभिमुखं संमुखम् । प्रारम्भमभि लक्ष्यीकृत्य वा । बाणावलीः शरपङ्क्तीरुन्मुच्य मुक्त्वा युद्ध्वा वा निपतताम् । बाणपङ्क्तिवर्षणेन युद्धं कृत्वा रणभूमौ पततामिति यावत् । अथ च—अन्तःकरणे स्वपरान्तरं स्वस्य आत्मनः परस्य चान्तरं न्यूनाधिकत्वतारतम्यं बुद्ध्वा वा अदसीयस्य चरणस्यैवाभिमुखं बाणावलीरुन्मुच्य निरायुधीभूय निपतताम् । एतच्चरणयोर्दण्डवन्नमस्कारं कुर्वताम् । किंभूतं शिरः-(रणसंमुखपक्षे) छिन्नं वा बाणैः खण्डितं सत् वा अवनतीभवत् नतग्रीवं भूमौ पतितं सत् । तथा—(चरणपक्षे)—अथवा निजभियो भरेण स्वीयभयबाहुल्येन वा खिन्नं सत् अवनतीभवत् । (द्वितीयपक्षे-) बलाद्विलोठितं वामदक्षिणभागस्पर्शकारीकृतम् । वैरिणो यदि युध्यन्ते तर्हि म्रियन्त एव । ये तु विचारका भीरवश्च, ते शस्त्राणि परित्यज्य एनमेव शरणं गच्छन्ति जीवन्तीति । एवकारेणान्यः शरण्यो न विद्यत इति सूचितम् । अन्यदपि भाराक्रान्तं नम्रं भवति । वाशब्दः प्रत्येकविकल्पे ॥

न तूणादुद्धारे न गुणघटने नाश्रुतिशिखं
समाकृष्टौ दृष्टिर्न वियति न लक्ष्ये न च भुवि ।
नृणां पश्यत्यस्य क्वचन विशिखान्किं तु पतित-
द्विषद्वक्षःश्वभ्रैरनुमितिरसून्गोचरयति ॥ ४९ ॥

नेति ॥ युद्धकौतुकदर्शिनां नृणां मनुष्याणां दृष्टिः अस्य विशिखान् क्वचन कस्मिन्नपि तूणादुद्धारे निष्कासने उपादानकाले न पश्यतीति सर्वत्र संबन्धः । तथा—कस्मिन्नपि गुणघटने मौर्व्यासंधानकाले न । आश्रुतिशिखं कर्णाग्रं मर्यादीकृत्य समाकृष्टौ कस्मिन्नपि सम्यगाकर्षणकाले न । तथा—मोचनानन्तरं वियति कस्मिन्नपि गगनदेशे न । तथा—शत्रून्निर्भिद्य ततो निर्गत्य भुवि कस्मिन्नपि भूप्रदेशे पतितान्न पश्यति । तर्हि किंतु पतितानां बाणाघातकृतमर्मवेधवशाद्गतप्राणानां भूयिष्ठानां द्विषतां वक्षसः श्वभ्रैर्दृढं प्रहृत्य बहिर्निर्गतशरकृतच्छिद्रैः कृत्वा या अनुमितिरनुमानज्ञानं असून्बाणान्गोचरयति ज्ञापयति । चेदनेन बाणा न मुक्तास्तर्ह्येतेषां वक्षसि छिद्राणि कथं भवेयुरित्याद्यनुमितिः । 'चक्षुःश्वभ्रैः' इति पाठे चक्षुष्येव विध्यतीति भावः ॥

दमस्वसुश्चित्तमवेत्य हासिका
जगाद देवीं कियदस्य वक्ष्यसि ।
भण प्रभूते जगति स्थिते गुणै-
रिहाप्यते संकटवासयातना ॥ ५० ॥

दमेति ॥ हासयतीति हासिका अतिनीचा चेटी दमस्वसुः चित्तं तद्वर्णनबाहुल्यनिरपेक्षं तस्मिन्ननुरक्तं चावेत्य ज्ञात्वा देवीं सरस्वतीं जगाद । हे देवि, अस्य कियत् एतदीयं कियच्चरितं वक्ष्यसि वर्णयिष्यसि । अपि तु बहुत्वात्प्रत्येकं वर्णयितुं न शक्यत इत्यर्थः । गुणैः सौन्दर्यादिभिः प्रभूते महति जगति स्थितेऽपि इह नृपे संकटवासरूपा संमर्दवसतिरूपा यातना संकटवासेन वा यातना तीव्रवेदना आप्यते प्राप्यत इति भण कथय । सर्वे गुणाः सर्वं जगत्परित्यज्यास्मिन्नेव संमर्देन निवसन्तीत्येकेनैवाकारेण वर्णय । पृथग्वर्णनासामर्थ्यादित्यर्थः । वाक्यार्थः कर्म । अथ च भूयसि वर्तमाने जगति मध्ये गुणैरिहैव कष्टरूपा वसतिपीडा प्राप्यते न त्वन्यत्र । एतन्निवासे गुणा उद्विजन्त एवानर्हत्वादेकोऽपि गुणोऽत्र नास्तीति भणेत्युपहासः । अस्य कियद्वक्ष्यसि कथय । अतःपरं मा स्म वादीः । तस्मान्निर्गुणमेनं गुणित्वेन कियन्तं कालं वर्णयिष्यसीति कथयेति वा । 'स्थितैः' इति पाठे गुणविशेषणम् । प्रभूतैरिति च ॥

ब्रवीति दासीह किमप्यसंगतं
ततोऽपि नीचेयमति प्रगल्भते ।
'अहो सभासाधुरितीरिणः क्रुधा
न्यषेधदेतत्क्षिपितानुगाञ्जनः ॥ ५१ ॥

ब्रवीतीति ॥ जनः प्रेक्षकः क्रुधा स्वस्वामिवर्णनविघातसमुत्पन्नेन क्रोधेन इतीरिणो भाषमाणान् एतस्य क्षितिपस्यानुगाननुचरान् न्यषेधन्निवारयामास । इति किम्—इह सभायां भैम्या दासी किमपि असंगतमयुक्तं ब्रवीति 'चलेऽपि काकस्य' इत्यादि भाषते । ततोऽपि दास्या अपि सकाशान्नीचा इयं चेटी अतिप्रगल्भते नितरां धृष्टतया भाषते । नियामकः कोऽपि नास्ति । अहो अयुक्तत्वादाश्चर्यं साधुः सभा । विरुद्धलक्षणया काक्वा अकारप्रश्लेषेण वासाधुरेतादृशी सभा न कुत्रापीति । ब्रवीति वर्तमानसामीप्ये भूते लट् । 'शशंस' इति वा पाठः समीचीनः । गल्भङ् धृष्टत्वे ॥

१ 'वेगातिशयोक्तिः' इति जीवातुः ।

अथान्यमुद्दिश्य नृपं कृपामयी
मुखेन तद्दिङ्मुखसंमुखेन सा ।
दमस्वसारं वदति स्म देवता
गिरामिलाभूवदतिस्मरश्रियम् ॥ ५२ ॥

अथेति ॥ अथ कृपामयी बहुलकृपा सा गिरां देवता मुखेन अन्यं नृपमुद्दिश्य निर्दिश्य दमस्वसारं वदति स्म । किंभूतेन—तस्योद्देश्यस्य नृपस्य दिङ्मुखं दिग्विभागस्तस्य संमुखेन । किंभूतं नृपम्—इलाभूवत्पुरूरवसमिव अतिक्रान्तस्मरा श्रीर्यस्य तम् ॥

विलोचनेन्दीवरवासवासितैः
सितैरपाङ्गाध्वगचन्द्रिकाञ्चलैः ।
त्रपामपाकृत्य निभान्निभालय
क्षितिक्षितं मालयमालयं रुचः ॥ ५३ ॥

विलोचनेति ॥ हे भैमि, त्वं अपाङ्गाध्वगाया नेत्रप्रान्तरूपमार्गगामिन्याश्चन्द्रिकाया नेत्रमध्यगनीलगोलकस्य अञ्चलैरिवाञ्चलैरतिदीर्घैर्विलोकनव्यापारैः । कटाक्षैरिति यावत् । तैः कृत्वा निभाद्व्याजात्त्वन्तरविलोकनव्याजाच्च्रपामपाकृत्य मालयं मलयाद्रिस्वामिनं मायाः संपद्रूपाया लक्ष्म्या आलयं वा क्षितिक्षितं निभालय विलोकय । किंभूतैरञ्चलैः—विलोचने एव इन्दीवरे नीलोत्पले नीलोत्पलतुल्ये नेत्रे तयोर्मध्ये वासः स्थितिस्तया वासितैर्भावितैः । नयननीलिम्ना नीलीकृतैरित्यर्थः । तथा—सितैः शुभ्रैर्नीलश्वेतकान्तिभिः । कटाक्षैर्विलोकयेत्यर्थः । अथ च—विलोचनतुल्यानां नीलोत्पलानां वासेन परिमलेन सुगन्धीकृतैः सितैस्मितैर्यगायतशीलत्वादपाङ्गतुल्यमार्गगामिन्या ज्योत्स्नाया अञ्चलैः करैरुपलक्षितम् । तथा—कान्तेः स्थानम् । तथा—मः शिव आलयो यस्य । शिवमौलिनिवासिनं चन्द्रमेवैनं राजानं त्रपामपाकृत्य पश्येत्यर्थः । 'मः शिवे मा च पद्मायाम्' इति विश्वः । निभालय, चुरादावात्मनेपदिनः पाठात्परस्मैपदं चिन्त्यम् । निभालनं निभालस्तद्वान्निभालवान् तादृशं कुर्वीति 'तत्करोति–' इति णिचि मनुब्लोपे साधनीयम् ॥

इमं परित्यज्य परं रणादरिः
स्वमेव भग्नः शरणं मुधाविशत् ।
न वेत्ति यन्नातुमितः कृतस्मयो
न दुर्गया शैलभुवापि शक्यते ॥ ५४ ॥

इममिति ॥ हे भैमि, रणाद्भग्नः पलायितः कृतस्मयः कृतगर्वोऽरिः एतस्य शत्रुः परं शत्रुभूतम् । अथ च महान्तम् । इमं परित्यज्य स्वमेव स्वीयमेव शरणं गृहं मुधा वृथा अविशत् । त्वदीयोऽहं मां रक्षेत्युक्त्वा एनमेव शरणं रक्षितारं कृतगर्वत्वादप्राप्य स्वगृहं वृथैव गत इत्यर्थः । यद्यस्मात् दुर्गया विषमया शैलस्य भूम्या । गिरिदुर्गेणेत्यर्थः । तयापि इतोऽस्मान्नृपान्नातुं न शक्यत इति न वेत्ति । गिरिदुर्गं प्रविष्टोऽपि बलात्ततोऽपकृष्य हन्यते । स्वगृहं प्रविष्टो हन्यत इति किं वाच्यम् । अतः स्वगृहप्रवेशो व्यर्थ इत्यर्थः । अथ च पर्वतपुर्ग्या दुर्गयाऽपि त्रातुं न शक्यते धृतदर्पं हन्त्येव शरणागतं रक्षत्येवायमिति भावः । 'शरणं गृहरक्षित्रोः' इत्यमरः ॥

अनेन राज्ञार्थिषु दुर्भगीकृतो
भवन्घनध्वानजरत्नमेदुरः ।
तथा विदूराद्रिरदूरतां गमी
यथा स गामी तव केलिशैलताम् ॥ ५५ ॥

अनेनेति ॥ एतद्वरणेन सः अतिप्रसिद्धो विशेषेण दूरोऽद्रिः । अथ च विदूरनामा रोहणाचलः । तथा तेन प्रकारेणादूरतां सामीप्यं गमी गन्ता । यथा येन प्रकारेण तव केलिशैलतां क्रीडापर्वतत्वं गमी गमिष्यति । किंभूतः—अतिवदान्येनानेन राज्ञार्थिषु याचकेषु विषये दुर्भगीकृत उपेक्षाविषयतामयाचनीयतां प्रापितः । अत एव व्ययाभावान्नवा घना मेघास्तेषां ध्वानः शब्दस्तस्माज्जातै रत्नैर्मेदुरः परिपुष्टो भवन् । विदूराद्रौ हि नवमेघशब्दाद्रत्नशलाका उत्पद्यन्ते ताश्च याचकैर्नीयन्ते । अस्मिंस्तु बहुप्रदे सति तत्र कस्यापि याचकस्यागमनाद्व्ययाभावाद्रत्नैः कृत्वा स्वदुपवनं यावन्मेदुरो भवति स एव रत्नमयत्वात्तव क्रीडापर्वतस्थाने भविष्यति। अतिवदान्योऽयमिति भावः । 'भवद्घनध्वान–' इति पाठे भवद्भ्य उत्पन्नेभ्यो घनध्वानेभ्य इति व्याख्येयम् । गमी गामी इति पूर्ववत् ॥

नम्रप्रत्यर्थिपृथ्वीपतिमुखकमलम्लानताभृङ्गजात-
च्छायान्तःपातचन्द्रायितचरणनखश्रेणिरेणेयनेत्रे ।
दृप्तारिप्राणवातामृतरसलहरीभूरिपानेन पीनं
भूलोकस्यैष भर्ता भुजभुजगयुगं सांयुगीनं बिभर्ति ५६

नम्रेति ॥ हे एणेयो हरिणपोतस्तन्नेत्रवन्नेत्रे यस्यास्तत्संबुद्धिः एणेयवयवभूते नेत्रे वा यस्याः भूलोकस्य भर्ता एष राजा संयुगे साधु सांयुगीनं रणरसिकं भुजद्वयरूपं भुजगयुगं सर्पद्वयं बिभर्ति । किंभूतः—नम्राः प्रत्यर्थिपृथ्वीपतयः शत्रुनृपास्तेषां मुखान्येव कमलानि तेषां लज्जया म्लानता तद्रूपा भृङ्गेभ्यो जाता छाया भ्रमरसंबन्धिनी या शोभा कृष्णता तस्या अन्तःपातेन नखमध्ये प्रतिबिम्बितेन चन्द्रायिता चन्द्रवदाचरिता चरणनखश्रेणिर्यस्य । किंभूतम्—दृप्तानां सदर्पाणामरीणां प्राणाख्या वाता एवातिप्रियत्वाद्अमृतरसस्तस्य लहरीणां तरङ्गाणां भूरि अतितरां पानेन पीनं पीवरं सगर्वनृपप्राणवियोगकरणेनोर्जस्वि । समानाकारत्वादतिक्रूरकर्मत्वाच्च भुजयोः सर्पत्वम् । सर्पाणां च पवनाशनत्वात्प्राणाख्यैः पवनैः पीनत्वं युक्तम् । दर्परहितांश्चरणपातिनो वैरिणो रक्षति, सदर्पाननम्रान्मारयत्ययमिति भावः । एणेयं एण्या अपत्यम्, 'स्त्रीभ्यो ढक्' । एण्या अवयवो इत्यर्थे 'एण्या ढक्' । सांयुगीनम्, साध्वर्थे प्रतिजनादित्वात्खञ् ॥

अध्याहारः स्मरहरशिरश्चन्द्रशेषस्य शेष-
स्याहेर्भूयःफणसमुचितः कायपट्टीनिकायः ।

१ 'तेन तुल्यं क्रियाचेद्वतिः । क्रिया चात्र सरातिक्रमः' इति जीवातुः । एतदजानानैवाद्यैस्तु स्वकल्पनयैव 'विभूताम् अतिस्मरातिक्रान्तस्मरा श्रीर्यस्यास्ताम्' इति मुद्रितम् ।

१ 'भुजभुजगयुग्मं बिभर्तीति रूपकालंकारः' इति जीवातुः ।

दुग्धाम्भोधेर्मुनिचुलकनत्रासनाशाभ्युपायः
कायव्यूहः क्व जगति न जागर्त्यदःकीर्तिपूरः५७

अध्याहार इति ॥ अमुष्य कीर्तिपूरः क्व कस्मिन्जगति लोके न जागर्ति प्रकाशते । अपितु स्वर्गपातालमर्त्यलोके स्फुरति । लोकत्रयव्यापित्वं क्रमेणाह—किंभूतः—स्मरहरशिरसि यश्चन्द्रस्य यः शेष एककला तस्या अध्याहारो लक्षणया पञ्चदशकलाभिः पूरकः । स्वर्गं गत्वा शिवशिरःस्थितश्चन्द्रो येन षोडशकलः क्रियत इत्यर्थः । अन्यत्राप्यपूर्णवाक्ये किमपि योग्यं पदान्तरमध्याहृत्य वाक्यपूरणं क्रियते । तथा शेषस्याहेः सर्पराजस्य भूयांसः सहस्रसंख्याकाः फणास्तेषां समुचितो योग्योऽतिदीर्घः काययष्टीनिकायः शरीरदण्डिकासमूहः । फणसहस्रस्य शरीरसहस्रेण भवितव्यम् । पातालं गत्वा तदीयशिष्टशरीरपूरणं क्रियते इत्यर्थः । तथा—मुनेरगस्त्यस्य चुलकनं संकुचितहस्तपानं तस्मात्यस्त्रासो भयं तस्य नाशे निरासे अभि सामस्त्येनोपायः साधनम् । दुग्धाम्भोधेः काव्यव्यूहः शरीरसङ्घः । पूर्वमेकाकित्वेन पानाद्भयमभूत, इदानीमेतद्यशोरूपानेकशरीरधारणात् । एकस्यानेकपाने सामर्थ्याभावाज्जलमात्रस्य च क्षीरतापादनादुग्धयशसोश्च सरूपत्वादुग्धे यशोभ्रमः यशसि दुग्धभ्रम इति दुग्धयशसोर्निर्णेतुमशक्यत्वात्पानाभावाद्भयाभावसाधनभूतः क्षारोदधेः कायव्यूह इत्यर्थः ॥

राज्ञामस्य शतेन किं कलयतो हेतिं शतघ्नीं कृतं
लक्षैर्लक्षभिदो दशैव जयतः पद्मानि पद्मैरलम् ।
कर्तुं सर्वपरिच्छिदः किमपि नो शक्यं परार्धेन वा
तत्संख्यापगमं विनास्ति न गतिः काचिद्रतैतद्द्विषां ५८

राज्ञामिति ॥ नाम्ना शतघ्नीं चतुःशतीलोहकण्टकसंचितां हेतिं शस्त्रं कलयतो धारयतोऽस्य राज्ञां शतेन किम् । तेन शस्त्रेण मारणात्तैरनेकैरप्यस्य किमपि कर्तुं न शक्यत इत्यर्थः । अथ च यः शतमारणसमर्थं शस्त्रं गृह्णाति तस्य शतसंख्याभिते राजभिः किमपि कर्तुं न शक्यते । तथा—राज्ञां लक्षैः पूर्यताम् । यतः—लक्षं वेध्यं भिनत्तीति लक्षभित्तस्य लक्षभिदः । यो हि कुत्रचिदप्यप्रतिहतसायकस्तस्य लक्षसंख्यैरपि किमपि कर्तुं न शक्यत इत्यर्थः । तथा—राज्ञां पद्मैः पद्मसंख्यै राजभिरपि किम् । तैरप्यस्य किमपि कर्तुं न शक्यते । यतः—दशैव पद्मानि कमलानि पद्मसंख्याकान्वैरिणश्च जयतः । यो हि कमलतुल्यनेत्रस्तस्य शत्रुतः पराभवो न । अथ च भ्रूक्षेपमात्रेण पद्मसंख्यापरिमितान्राज्ञो जयति तस्य पद्मसंख्यै राजभिः किमपि कर्तुं न शक्यते । तथा—वा समुच्चये । राज्ञां परार्धेनापि परार्धसंख्यै राजभिरस्य किमपि कर्तुं नो शक्यम् । यतः—सर्वे च ते परे शत्रवश्च तान्छिनत्ति तस्य । यो हि वैरिमात्रहनने समर्थस्तस्य परार्धसंख्याः शत्रवः किं कुर्वन्तु । तत्तस्मात् एतस्य द्विषां संख्याद्रणाद्पगमं पलायनम् । अथ च—परार्धरूपायाः संख्याया अप्यपगमं परित्यागं असंख्यत्वं विना काचिद्गतिः प्रकारो नास्ति बत खेदे । असंख्येयाश्चेद्भविष्यन्तस्तर्ह्यजीविष्यन् । असंख्येयं नास्ति तस्मात्पलायनमेव जीवनोपायः । पलायिताश्च हन्तीत्यर्थः । 'लक्षं शरव्ये संख्यायाम्' । शतघ्नीम्, 'अमनुष्यकर्तृके च' इति टक् ॥

वयस्ययाकूतविदा दमस्वसुः
स्मितं वितत्याभिदधेऽथ भारती ।
इतः परेषामपि पश्य याचतां
भवन्मुखेन स्वनिवेदनत्वराम् ॥ ५९ ॥

वयस्ययेति ॥ अथ दमस्वसुः आकूतविदाभिप्रायज्ञया वयस्यया सख्या स्मितं वितत्य हसितं कृत्वा भारती इत्यभिदधे उक्ता । इति किम्—हे भारति, त्वं भवन्मुखेन त्वन्मुखेन स्ववर्णनं याचतां प्रार्थयमानानां इतोऽस्मान्नृपात्परेषामन्येषां स्वनिवेदने स्ववर्णने एव त्वरां कालविलम्बासहनत्वं पश्य । एतद्वर्णनाद्विरमेति भावः । अन्यानपि वर्णयेत्यर्थः ॥

कृतात्र देवी वचनाधिकारिणी
त्वमुत्तरं दासि ददासि कासती ।
इनीरिणस्तन्नृपपारिपार्श्विका-
न्स्वभर्तुरेव भ्रुकुटिर्न्यवर्तयत् ॥ ६० ॥

कृतेति ॥ स्वभर्तुः स्वस्वामिन एव भ्रुकुटिः कोपवशाद्भ्रूभङ्ग इति पूर्वोक्तं ईरिणो भाषमाणान् तान्नृपपारिपार्श्विकान्निजसेवकान् न्यवर्तयन्न्यषेधयत् । भ्रूक्षेपमात्रेण तेनैव ते निवारिता इत्यर्थः । इति किम्—हे दासि, अत्र राजवर्णने वचनाधिकारिणी भाषणाधिकारिणी देवी कृता, त्वं का सती का भवन्ती केन प्रयुक्ता सती । अथ च—असती कुलटा का त्वमुत्तरं ददासि अत्र वक्तुमयोग्येति । पारिपार्श्विकान्, परिपार्श्वे वर्तन्ते पारिपार्श्विकाः 'परिमितं च' इति चकाराट्ठक् ॥

धराधिराजं निजगाद भारती
तदुन्मुखेपद्वलिताङ्गसूचितम् ।
दमस्वसारं प्रति सारवत्तरं
कुलेन शीलेन च राजमुचितम् ॥ ६१ ॥

धरेति ॥ भारती दमस्वसारं प्रति धराधिराजं नृपं निजगाद । कथयति स्मेत्यर्थः । किंभूतम्—तस्य वर्णनीयनृपस्योन्मुखं संमुखं ईषद्वलितेन किंचित्परिवर्तितेनाङ्गेन करादिना सूचितं ज्ञापितम् । तथा—सारवत्तरमतिबलिष्ठम् । तथा—कुलेन शीलेन स्वभावेनाचरणेन वा राजसु मध्ये उचितं योग्यं श्रेष्ठम् । कुलशीलाभ्यां सारवत्तरं श्रेष्ठतरं वा ॥

कुतः कृतैवं वरलोकमागतं
प्रति प्रतिज्ञाऽनवलोकनाय ते ।
अपीयमेनं मिथिलापुरंदरं
निपीय दृष्टिः शिथिलास्तु ते वरम् ॥६२॥

---

१ 'अत्र कीर्तिपूरस्य त्रैलोक्यासंबन्धेपि तत्संबन्धोक्तस्तद्व्यापातिशयोक्तिः । सा चास्य चन्द्रे शेषाध्याहारत्वादिरूपकोत्थापितेति संकरः' इति जीवातुः ।

१ 'अत्रैव द्विपद्वतिमरस्य संख्यापगमनदपगमयोरुभयोः प्राप्तस्य पूर्वत्वनिषेधस्योत्तरत्र नियमनात्परिसंख्या । तथा च सूत्रम्—'एकस्यानेकत्र नियमनं परिसंख्या' इति जीवातुः ।

कुत इति ॥ हे भैमि, ते त्वया स्वयंवरार्थमागतं वरलोकं परिणेतृवृन्दं प्रति लक्षीकृत्य एवममुना दृश्यमानप्रकारेण अनवलोकनायादर्शनाय प्रतिज्ञा कुतः कस्मात्कारणात्कृता । अपि त्वयुक्तमेवैतत् । 'वा' इति पाठे कुतो वेत्यन्वयः । अनवलोकनार्थमेवेत्यवधारणार्थो वा । न केवलमव(धा)रणायैव, किंतु—अनवलोकनायापीत्यप्यर्थो वा । किंतर्हि कर्तव्यमित्यत आह—हे भैमि, ते इयं दृष्टिः एनं मिथिलानगर्याः पुरंदरं स्वामिनं निपीयैव शिथिलास्तु । एतद्वरम् । सर्वथानवलोकनाद्विलोकनं वरमिति राजान्तरवदननुरागेणाप्येनं विलोकयेत्यर्थः । अन्ये यद्यपि नावलोकितास्तथाप्येनं विलोकय । विलोकनेनाप्येनं संभावयेत्यर्थः । पूर्वश्लोके सामान्यत उक्तत्वादन्वादेशे एनमिति समर्थनीयम् ॥

न पाहि पाहीति यदब्रवीरमुं
ममौष्ठ तेनैवमभूदिति क्रुधा ।
रणक्षितावस्य विरोधिमूर्धभि-
र्विदश्य दन्तैर्निजमोष्ठमास्यते ॥ ६३ ॥

न पाहीति ॥ अस्य विरोधिमूर्धभिर्वैरिशिरोभिः इति क्रुधा रणक्षितौ निजमोष्ठं दन्तैर्विदश्य विशेषेण दष्ट्वा आस्यते स्थीयते । इति किम्—हे ओष्ठ, त्वं अमुं नृपं प्रति पाहि पाहीति यत् नाब्रवीः तेन कारणेन ममैवं भूमौ विलुण्ठनपूर्वं मरणमभूदिति । पाहि पाहीति यो वदति तमयं रक्षति । पाहीति पदोच्चारणे प्रथमं तवैव सामर्थ्यम् । पकारस्यौष्ठ्यत्वात् । त्वया च सदर्पत्वात्तदनुच्चारणान्ममायं मारितवानिति त्वमेवापराधीत्यर्थः । शवमुष्टिन्यायेनाधरोष्ठो दष्ट एव तिष्ठति न तु मुक्त इति आस्यते इत्यनेन सूचितम् ॥

भुजेऽपसर्पत्यपि दक्षिणे गुणं
सहेषुणादाय पुरःप्रसर्पिणे ।
धनुः परीरम्भमिवास्य संमदा-
न्महाहवे दित्सति वामबाहवे ॥ ६४ ॥

भुज इति ॥ महाहवे महति रणसंमर्दे दक्षिणेऽपसव्ये । अथच—सरलेऽनुकूलेऽपि भुजे इषुणा सह गुणं मौर्वीमप्यादाय गृहीत्वा अपसर्पति कर्णपश्चादेशं गच्छति सति पुरःप्रसर्पिणे रिपुसंमुखयायिने दृढतरमुष्टयेऽस्य वामबाहवे सव्यभुजाय धनुः संमदादिव दृढतरस्वजाताद्धर्षादिव परीरम्भमालिङ्गनं दित्सति दातुमिच्छति । दित्सतीवेति वा । अस्मिन्नपि गुणिनि विश्वासपात्रे सङ्ग्रामात्स्वजनमादाय पलायिते सति सङ्ग्रामं कर्तुं संमुखाय वामाय दुष्टायापि अयमेव साधुरिति मत्वा सुवंशजेन केनचिन्मध्यस्थेनालिङ्गनं दीयते । दृढमुष्टिरतिशूरोऽयमित्यर्थः । सङ्ग्रामे कर्णान्तपर्यन्तमाकर्षणाद्धनुश्चक्रीकृत्य शरान्मुञ्चतेवास्त इति भावः । वामबाहवे, ददातियोगाच्चतुर्थी ॥

अस्योर्वीरमणस्य पार्वणविधुद्वैराज्यसङ्गं यशः
सर्वाङ्गोज्ज्वलशर्वपर्वतसितश्रीगर्वनिर्वासि यत् ।
तत्कम्बुप्रतिबिम्बितं किमु शरत्पर्जन्यराजिश्रियः
पर्यायः किमु दुग्धसिन्धुपयसां सर्वानुवादः किमु ६५

अस्येति ॥ अस्य उर्वीरमणस्य राज्ञो यत् यश एतादृशम् । कीदृशं यशः—पर्वणि भवः पार्वणः पूर्णो विधुश्चन्द्रस्तस्य द्वैराज्ये द्वयो राज्ञोः कर्म तत्र सज्जं तत्परम् । पार्वणचन्द्रसदृशमित्यर्थः । तथा—सर्वेष्वङ्गेषूज्ज्वलस्य धवलस्य शर्वपर्वतस्य हरनिवासभूतकैलासस्य सितश्रीः श्वेतकान्तिस्तद्विषये यो गर्वस्तस्य निर्वासि निराकारकम् । कैलासादपि धवलतरम् । एवंभूतं यद्यशः । तत्कम्बुप्रतिबिम्बितं समुद्रशङ्खप्रतिबिम्बः किमु । तथा—शरदि पर्जन्यराजिर्मेघपङ्क्तिस्तस्याः श्रीः धवलिमशोभा तस्याः पर्यायः किमु । शब्दस्य शब्दान्तरेणोच्चारः पर्यायः । तथा—दुग्धसिन्धोः क्षीरोदस्य पयसां दुग्धानां सर्वेण प्रकारेणानुवादः पुनरभिधानं किमु । चन्द्रादितुल्यमेतद्यश इति भावः । अन्योऽप्यधिष्ठितद्वैराज्यः प्रतिपक्षं निरस्यति ॥

निस्त्रिंशत्रुटितारिवारणघटाकुम्भास्थिकूटावट-
स्थानस्थायुकमौक्तिकोत्करकिरः कैरस्य नायं करः ।
उन्नीतश्चतुरङ्गसैन्यसमरत्वङ्नुत्तुरंगक्षुरा-
क्षुण्णासु क्षितिषु क्षिपन्निव यशःक्षोणीजबीजव्रजम् ६६

निस्त्रिंशेति ॥ अस्य नृपस्यायं दृश्यमानः करः कैः एवंभूत इव नोन्नीतस्तार्कितः । अपि तु सर्वैरप्येवमेव तर्कितः । कीदृशः करः । निस्त्रिंशेन खड्गेन कृत्वा त्रुटितायाः खण्डनं प्राप्ताया अरिवारणघटाया वैरिगजपरम्परायाः कुम्भानां गण्डस्थलानामस्थिकूटा अस्थिसमूहास्तेषामवटस्थाने गर्तलक्षणस्थाने स्थायुकः स्थितिशीलो मौक्तिकोत्करो मुक्तासङ्घस्तस्य किरः विक्षिपः । तथा—चत्वारि करिनररथतुरगलक्षणान्यङ्गानि येषामेवंभूतानि सैन्यानि येषु ते समराः सङ्ग्रामास्तेषु त्वङ्नन्तश्चित्रं गच्छन्तः तुरंगास्तेषां खुरैः चरणाग्रनखतीक्ष्णभागैः क्षुण्णासु विदलितासु कृष्टासु क्षितिषु रणक्षेत्रभूमिषु यशोलक्षणस्य क्षोणीजस्य वृक्षस्य तदुत्पादकं बीजव्रजं बीजसङ्घं क्षिपन्निव वपन्निव । यशोवृक्षस्य शुभ्रत्वात्तत्कारणेन बीजेन शुभ्रेणैव भवितव्यम् । अरिकरिकुम्भस्थमुक्ताफलानि बीजस्थाने जातानीत्यर्थः । अन्योऽपि पात्रस्थं बीजसङ्घं करेणाकृष्य हलकृष्टासु भूमिषु वपति । वैरिकरिणां हननादेतस्य बहु यशो जातमिति । तैक्ष्ण्यात्क्षुरा इव क्षुराः खुरा इति लक्षणाशब्दः । निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः इति, 'डच्प्रकरणे संख्यायास्तपुरुषस्योपसंख्यानं निस्त्रिंशाद्यर्थम्' इति डच् । स्थायुकम्, 'लषपत–' इत्युकञ् । किरतीति किरः, 'इगुपध–' इति कः ॥

अर्थिभ्रंशबहूभवत्फलभरव्याजेन कुब्जायितः
सत्यस्मिन्नतिदानभाजि कथमप्यास्तां स कल्पद्रुमः ।
आस्ते निर्व्ययरत्नसंपदुदयोदग्रः कथं याचक-
श्रेणीवर्जनदुर्यशोनिषिडितव्रीडस्तु रत्नाचलः ॥६७॥

अर्थीति ॥ स कल्पद्रुमः प्रसिद्धः केवलं कल्पितप्रदः, अस्मि-

---

१ 'अवधारणाय' इत्यत्र धकारो लेखकप्रमादपतितः । २ 'अत्र शत्रुशिरसां प्रत्यर्थिविषयक्रोधहेतुकस्योष्ठदशनस्योष्ठविषयक्रोधहेतुकत्वोत्प्रेक्षणाङ्गेतूत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या' इति **जीवातुः** ।

१ 'उत्प्रेक्षात्रयस्य संसृष्टिः' इति **जीवातुः** । २ 'उत्प्रेक्षा' इति **जीवातुः** ।

न्राजनि अतिदानमतिशयितं दानं भजति सति अकल्पितमपि ददति सति अर्थिभ्रंशाद्याचकैर्वर्जनात्पूर्वं अल्पान्यपि व्ययाभावाद्-हूभवन्ति बहूनि जायमानानि यानि फलानि तेषां भरव्याजेन भारगौरवमिषेण कुब्जायितः खर्ववदाचरितोऽतिनम्रः सन् कथम-प्यास्तां महता क्लेशेन । अथ च—लज्जागोपनप्रकारेणापि तिष्ठतु । कालं वातिवाहयतु । नम्रत्वेन लज्जागोपनं युक्तमिति भावः । तु पुनः रत्नाचलो याचकश्रेण्या वर्जनात्परित्यागाज्जातेन दुर्यशसाप-कीर्त्या निर्विडिता घनीकृता व्रीडा लज्जा यस्य एवंभूतोऽपि याच-काभावात् निर्व्ययाक्षयया रत्नसंपदा कृत्वा य उदयोन्नूयूना वृद्धिस्तेन उदग्र उच्चशिखरः । अथ च—अनम्र एव कथमास्ते । अपितु—लज्जितस्यानम्रत्वमयुक्तमेवेत्यर्थः । कल्पवृक्षस्य स्वर्गस्थि-तत्वादुष्प्रापतया फलभरव्याजेन नम्रतया वा लज्जापरिहारः संभ-वी । रोहणाद्रेस्तु एतल्लोकनिवासादुष्प्रापत्वाभावेऽपि याचकैर्वर्जना-ल्लज्जातिशयान्नम्रत्वं युक्तं, तत्तु तस्य नास्तीत्याश्चर्यम् । कल्पवृक्षमे-रुभ्यामप्ययमधिको दानशूर इति भावः । कुब्जायितः लोहितादे-राकृतिगणत्वादाचारे क्यप् ॥

सृजामि किं विघ्नमिदं नृपस्तुना-
वितीङ्गितैः पृच्छति तां सखीजने ।
स्मिताय वक्त्रं यदवक्रयद्वधू-
स्तदेव वैमुख्यमलक्षि तन्नृपे ॥ ६८ ॥

सृजामीति ॥ वधूः भैमी सखीजने इङ्गितैर्भ्रूभङ्गादिचेष्टितैः कृत्वा तां भैमीमिति पृच्छति सति स्वाभिप्रायज्ञापनार्थं स्मिताय वक्त्रं यत् अवक्रयद्वक्रं चक्रे । तत् वदनवक्रणमेव तन्नृपे तस्मिन्राज्ञि वैमुख्यं पराङ्मुखत्वमलक्षि लक्षितम् । अन्यतो विलोकनाद्वावात्रा-नादरोऽस्या इति सखिभिः लोकेन, तेन राज्ञा वा तर्कितमित्यर्थः । इति किम्—हे भैमि, अहं अयं चासौ नृपश्च इदंनृपः तस्य स्तुतौ विघ्नं सृजामि किम् । 'वैलक्ष्यम्' इति (पाठे) 'असावधानतया यस्मान्मुखमवक्रयत् । तस्मादेव नृपगतमेव वैलक्ष्यं मालिन्यं लो-कैर्लक्षितमित्यर्थः । स्मिताय स्मितं कर्तुम्, 'क्रियार्थोपपद-' इति चतुर्थी ॥

दृशास्य निर्दिश्य नरेश्वरान्तरं
मधुस्वरा वक्तुमधीश्वरा गिराम् ।
अनूपयामास विदर्भजाश्रुती
निजास्यचन्द्रस्य सुधाभिरुक्तिभिः ॥ ६९ ॥

दृशेति ॥ अथ मधुस्वरा मधुरस्वरा गिरामधीश्वरा वक्तुं वर्ण-यितुं दृशा नेत्रव्यापारेण नरेश्वरान्तरं नृपान्तरं निर्दिश्य दर्शयित्वा विदर्भजाश्रुती भैमीकर्णौ निजास्यं स्वीयं वदनमेव चन्द्रस्तस्य सुधाभिरमृतरूपाभिरुक्तिभिः कृत्वा अनूपयामास परिपूर्णे चकार । उदाचेत्यर्थः । अनुगता आपो यत्र अनूपो देशः, 'ऋक्—' आदि-ना समासान्ते 'ऊदनोर्देशे' इत्यूकारः । अनूपे जलप्लुते चकार 'तत्करोति—' इति णिच् । लक्षणया मधुरस्वराकर्णनस्मितेन चकारेत्यर्थः । 'अपूपुरन्नीमभुवः श्रुती पुनः' इति पाठे 'णौ चङ्यु-पधायाः—' इत्युपधाह्रस्वः ॥

स कामरूपाधिप एष हा त्वया
न कामरूपाधिक ईक्ष्यतेऽपि यः ।
त्वमस्य सा योग्यतमासि वल्लभा
सुदुर्लभा यत्प्रतिमल्लभा परा ॥ ७० ॥

स इति ॥ स एष कामरूपस्य देशविशेषस्य अधिपः । अथ च मदनरूपस्यापि स्वामी तद्रूपधारणादित्यर्थः । स कः—यः त्वया ईक्ष्यतेऽपि न । न अभिलप्यत इति तु किं वाच्यमित्यर्थः । हा कष्टम् अनुचितमेतत् । यतः—कामाद्रूपेणाधिकोऽतिसुन्दरः । अथ वा कामाद्रूपेणाधिको नेति काकुर्वा । यतः—अयं कामाद-धिकस्मात्तस्मादस्य सा त्वं योग्यतमा वल्लभासि नितरामुचिता प्रेयसी भवसि । सा का—परा उत्कृष्टा यस्यास्तव प्रतिमल्ला तुल्या भा कान्तिः सुतरां दुर्लभा । यस्याः सदृशी कान्तिः कस्यांचिदपि न दृष्टचरी । अस्यापि (ति) सुन्दरत्वादित्यर्थः । अथ च—परान्या स्त्री यस्यास्तुल्यकान्तिर्दुर्लभा, सातिसुन्दरी त्वमित्यर्थः । त्वमति-सुन्दरी अस्य सुतरामयोग्येत्यर्थ इति वा । व्याख्यानान्तरं क्लिष्ट-त्वादुपेक्ष्यम् । सुदुर्लभा, 'न सुदुर्भ्यां केवलाभ्याम्' इति नु-प्रतिषेधः ॥

अकर्णधाराशुगसंभृशाङ्गतां
गतैररित्रेण विनास्य वैरिभिः ।
विधाय यावत्तरणेर्भिदामहो
निमज्य तीर्णः समरे भवार्णवः ॥ ७१ ॥

अकर्णेति ॥ अस्य वैरिभिः समरे निमज्य निपत्य यावान्स-कलस्तरणिः सूर्यस्यस्य । तन्मण्डलस्येत्यर्थः । भिदां भेदं विधाय कृत्वा भवः संसार एव दुस्तरत्वादर्णवः तीर्णः । मोक्षप्राप्तेरपुनरा-वृत्तेरित्यर्थः । अहो आश्चर्यम् । शूरतरोयमित्यर्थः । किंभूतैः—अरिभ्यस्त्रायत इत्यरित्रं कवचं तेन विना । अथवा—अरेः अस्मा-त्सकाशाद्रक्षकेणान्येन शूरतरेण विना । न विद्यन्ते कर्णाः कर्णा-कारा लोहकण्टका यासां एवंविधा धारा येषामेवंभूताः । कर्णा-न्धरन्ति कर्णधाराः न कर्णधारा अकर्णधारा एवंभूता वा । ये आशुगा बाणा अदृष्टाः शरास्तैः संभृतानि प्रोतान्यङ्गान्यवयवा येषां तेषां भावस्तत्तां गतैः प्राप्तैः । प्रत्यवयवं विद्धैरित्यर्थः । यावत् सकलं । अथ च—कर्णधारो नाविकः, आशुगो वायुः ताभ्यां कृत्वा संभृतानि परिपुष्टान्यङ्गानि रज्जुस्तम्भादीनि तरणोपायभू-तानि च येषाम् । कर्णधारानुकूलवायुना वा संभृताम्यङ्गानि येषामेवंभूता ये न भवन्ति तद्भावं गतैः । अरित्रेण जलक्षेपणका-ष्ठेन विना तस्याप्यभावे यावत्तरणेः सकलाया नौकाया भेदं विधाय सकलां नौकां स्फोटयित्वा निमज्य बुद्धित्वार्णवस्तीर्णः । हे भय शिव, अहो अत्याश्चर्यम् । कर्णधाराद्यभावे नौकायाश्च भेदं बुद्धित्वा तरणं तत्रापि समुद्रस्येत्यत्याश्चर्यम् । अघटमानघटेन चा-श्चर्यमूचकं शिवनामोच्चारणं कियते । 'कर्णधारस्तु नाविकः' 'नौकादण्डः क्षेपणी स्यादरित्रम्', 'स्त्रियां नौस्तरणिस्तरिः', 'शुम-णिस्तरणिर्मित्रः' इत्यमरः ॥

यदस्य भूलोकभुजो भुजोष्मभि-
स्तपत्युरुं क्रियतेऽरिवेश्मनि-

१ 'अत्र द्रुमशैलयोर्लज्जासंबन्धेपि संबन्धोक्तिरतिशयोक्तिभेदः' इति जीवातुः ।

प्रपां न तत्रारिवधूस्तपस्विनी
ददातु नेत्रोत्पलवासिभिर्जलैः ॥ ७२ ॥

यदिति ॥ भूलोकभुजो भूपालस्यास्य भुजोष्मभिर्बाहुप्रतापैः अरिवेश्मनि अतिसंतापकारित्वात्तपनेरेव ग्रीष्मर्तुरेव यद्यस्मात्क्रियते तस्मात्तत्र ग्रीष्मर्तौ तपस्विनी दीना अरिवधूः नेत्राण्येवोत्पलानि तेषु वासिभिर्जलैरस्रभिः । अथ च—नेत्रतुल्यकमलानां यो वासः परिमलः स विद्यते येषु तैर्जलैः कृत्वा प्रपां पानीयशालां न ददातु । अपितु ददात्येव । तपस्विनी ग्रीष्मर्तौ सुगन्धिभिरुदकैः प्रपां करोति । अनेन पतिमारणाच्छोकव्याप्ता सर्वाऽप्यरिनारी हरोदैवेति भावः । 'प्रपा पानीयशालिका' इत्यमरः ॥

एतदृत्तासिघातस्रवदसृगसृहद्वंशसार्द्रेन्धनैत-
द्दोरुद्दामप्रतापज्वलदनलमिलद्धूमधूमभ्रमाय ।
एतद्दिग्जैत्रयात्रासममसमरभरं पश्यतः कस्य नासी-
देतन्नासीरवाजिव्रजखुरजरजोराजिराजिस्थलीषु ७३

एतदिति ॥ आजिस्थलीषु संग्रामभूमिषु एतन्नासीरस्य एतत्सेनामुखस्य पुरो गच्छन्तो वाजिव्रजा अश्वसंघास्तेषां खुरेभ्यश्चरणाग्रेभ्यो जाता तैरुद्धूलिता रजोराजी रेणुपङ्क्तिः एतस्य दिग्जैत्रयात्रा दिग्जयकारिण्यो या यात्रा वैरिसंमुखगतयस्तासु असममतुल्यं समरस्य भरं संमर्दं पश्यतः कस्य जनस्य । एतेन राज्ञा दत्तेभ्योऽसिघातेभ्यः स्रवत असृग्रक्तं येषाम् । एतेन दत्तोऽसिघातो येभ्यः अत एव स्रवदसृजो वा । असुहृद्वंशा अरिसङ्घाः । अथ च—तद्रूपा वेणवः । त एव सार्द्राणीन्धनानि दाह्यकाष्ठानि यस्य एवंभूत एव दोर्णोर्बाह्वोरुद्दामप्रतापस्तीक्ष्णप्रतापः स एव ज्वलन् देदीप्यमानोऽनलः तस्य मिलन्संभवन् भूमा बाहुल्यं यस्य एवंभूतो बहुतरो धूमस्तस्य भ्रमाय सारश्यादधूमेऽपि रजसि 'धूमः' इति बुद्धये नासीत् । अपि तु सर्वस्यापि । आर्द्रवेणुरूपेन्धनं दहतो वह्नेर्भूयान्धूमो भवति । सर्वेऽप्यरय एतत्प्रतापवह्निना दग्धाः । अश्वपतिश्चायमिति भावः । आर्द्र सार्द्र पर्यायः । 'मिलद्धूमभूम-' इति पाठे मिलतो धूमस्य बाहुल्यं तद्भ्रान्तये ॥

क्षीरोदन्वदपाः प्रमथ्य मथितादेशेऽमरैर्निर्मिते
स्वाक्रम्यं सृजतस्तदस्य यशसः क्षीरोदसिंहासनम् ।
केषां नाजनि वा जनेन जगतामेतत्कवित्वामृत-
स्रोतःप्रोतपिपासुकर्णकलसीभाजाभिषेकोत्सवः ॥ ७४ ॥

क्षीरेति ॥ केषां जगतां भुवनानां संबन्धिनां जनेनास्य राज्ञो यशसोऽभिषेक एवोत्सवो नाजनि नाकारि । अपि तु स्वर्गादिस्थितेन सर्वेणापि लोकेन एतदीययशसोऽभिषेकः कृतः । विशेषणेनाधिष्ठानमाह—किंभूतस्य यशसः—क्षीरोदन्वदपाः क्षीरोदन्वान्क्षीरसमुद्रस्तस्य अपो जलानि दुग्धरूपाणि प्रमथ्य मन्दराचलेन कृत्वा प्रकर्षेण विलोड्य अमरैर्देवैः मथनक्रियायोगात् मथितमिति आदेशे संज्ञायां निर्मिते कृतायाम् । अथ च—निर्जलं मन्थमथितं दधि मथितमित्युच्यते । ततश्च क्षीरस्यापि मथनक्रियायोगादस्तेभूवन्मथितरूपे आदेशे निर्मिते सति । जले स्थित्यसंभवात्क्षीरोदन्वदुदके दुग्धरूपेऽतिघने कृते सतीत्यर्थः । क्षीरोदरूपं सिंहासनं शुभ्रवस्तुमात्रापेक्षया तस्यातिशुभ्रत्वाद्यन्नद्रपीठं तत् स्वेनात्मना । अथ च—सुखेनायासरहितं यथा तथा । आक्रम्यमुपवेशनयोग्यं सृजतः कुर्वतः । क्षीरोदपदमधितिष्ठत इत्यर्थः । किंभूतेन जनेन—एतद्रचितं कवित्वम्, एतत्संबन्धि कविभिर्निर्मितं कीर्तिवर्णनरूपं वा कवित्वं तदेव स्वादुतरत्वादमृतं तस्य स्रोतसि प्रवाहे प्रोतौ स्यूतौ धृतौ सादरमाकर्णनेच्छू । अथ च—जलभरणेच्छू । कर्णावेव कलशौ महान्तौ भजतीति भाजा भजता । लोके हि कस्मिंश्चिद्राजनि केनचिन्मथिते तदीयं सिंहासनमधितिष्ठतोऽन्यस्य केनचिद्वारिपूर्णेन कलशेनाभिषेकः क्रियते । घनीरूपतयोपवेशनयोग्यतां सूचयितुं मथितादेशे कृते सतीत्युक्तम् । जलोपर्युपवेशनासंभवात् । क्षीरोदादपि विमलतरं महीयश्चैतद्यशो वैदेशिकैर्लोकत्रयसंचारि कृतमिति भावः । 'तक्रं ह्युदश्विन्मथितं पादाम्बुवर्धाम्बु निर्जलम्' इत्यमरः । क्षीरोदन्वदपाः 'उदन्वानुदधौ च' इति साधुः । 'ऋक्पूर-' इत्यप्रत्ययः । स्वाक्रम्यम्, 'पोरदुपधात्' इति यत् । अजनि कर्मणि चिण् ॥

समिति पतिनिपातार्कर्णनद्रागदीर्ण-
प्रतिनृपतिमृगाक्षीलक्षवक्षःशिलासु ।
रचितलिपिरिवोरस्ताडनव्यस्तहस्त-
प्रखरनखरटङ्कैरस्य कीर्तिप्रशस्तिः ॥ ७५ ॥

समितीति ॥ अस्य राज्ञः कीर्तिप्रशस्तिर्वर्णनपङ्क्तिः समिति सङ्ग्रामे पतीनां स्वामिनां निपातो मरणं तस्य आकर्णनेन द्राक् शीघ्रं अदीर्णानि प्रतिनृपतिमृगाक्षीणां लक्षस्य वक्षांसि तान्येव तत्क्षणमेवाविदीर्णत्वाच्छिलास्तासु शोकवशादुरस्ताडने व्यस्तयोर्दृढनिवेशितयोर्हस्तयोः प्रखरा अतितीक्ष्णा नखरा नखा एव टङ्काः पाषाणदारणलोहविकारास्तै रचितलिपिरिव रचितलेखनेव अस्तीति शेषः । अन्यस्यापि कीर्तिप्रशस्तिः शिलासु टङ्किकाभिरुत्कीर्य लिख्यते । सर्वेऽप्यरयोऽनेन हताः तन्नार्यश्च शोकवशादुरस्ताडनं कुर्वन्ति । अतिशूरत्वादस्य कीर्तिर्भवतीत्यर्थः । दृढशोकेऽप्यदीर्णत्वाच्छिलात्वम् । शोकातुरस्योरस्ताडनं जातिः । 'टङ्कः पाषाणदारणः' इत्यमरः । 'समित्याजिसमिद्युधः' इति (च) ॥

विधाय ताम्बूलपुटीं कराङ्गगां
बभाण ताम्बूलकरङ्कवाहिनी ।
दमस्वसुर्भावमवेत्य भारतीं
नयानया वक्रपरिश्रमं शमम् ॥ ७६ ॥

विधायेति ॥ ताम्बूलस्य करङ्कः सुवर्णरचितहंसाद्याकारं ताम्बूलधारणपात्रम् 'पेटी' इति लोके, तस्य वाहिनी धारिणी काचित्सखी दमस्वसुर्भावं तद्दूर्णननिषेधरूपमवेत्य ज्ञात्वा इति बभाण । किं कृत्वा—ताम्बूलपुटीं पूगीफलचूर्णखदिरपर्णानि यत्रैकत्र क्रिय-

---

१ 'अत्र रजोराजौ कविसंमतसादृश्याद्भ्रमभ्रमोत्तया भ्रान्तिमदलंकारः' इति जीवातुः ।

१ 'अत्र क्षीरोदसिंहासनाध्यासीन, एतद्यशःक्षीरोदस्याखिलाः कवय एवाभिषेक्तारः, कवित्वमेव जलम्, श्रोतृजनकर्णा एव कलशाः, तत्संभवस्याप्यपसरितः प्रसर्पणात्स्तुतिरेवाभिषेकः' इति रूपकालंकारः' इति जीवातुः । २ 'करंड इति पाठः ।

स्ते तां यां मध्यदेशे भाषया 'गुलवडा' इति व्यवहरन्ति तां देव्यै दातुं कराङ्कगां स्वीयकरतलमध्यगतां, देवीकरतलमध्यगतां वा कृत्वा । कराङ्के गृहीत्वेत्यर्थः । इति किम्—हे देवि, त्वं अनया वीटिकया एतदीयबहुवर्णनजनितं वक्त्रस्य सकलं परिश्रमं शमं नय बहुवर्णनजनितं शोषं शान्तिं प्रापयेति । एतत्स्तुतेर्विरमेत्यर्थः । अन्योपि शुष्कमुखो वीटिकया श्रमं शमयति ॥

समुन्मुखीकृत्य बभार भारती
रतीशकल्पेऽन्यनृपे निजं भुजम् ।
ततस्रसद्बालपृषद्विलोचनां
शशंस संसज्जनरञ्जनीं जनीम् ॥ ७७ ॥

समिति ॥ भारती रतीशकल्पे कामतुल्येऽन्यनृपे निजं बाहुं सम्यगुन्मुखीकृत्य बभार भैम्यै तं दर्शयितुं तदभिमुखं चकार । ततोनन्तरं त्रसद्बालपृषद्विलोचनां भीतबालहरिणनेत्रां संसज्जनानां सभ्यानां रञ्जनीमनुरागजनिकां जनीं वरार्थिनीं तां भैमीं शशंसाभाणीत् । 'रतीशतुल्ये' इति वा पाठः । रञ्जनीं मृगरमणाभावान्नलोपाभावः ॥

अयं गुणौघैरनुरज्यदुत्कलो
भवन्मुखालोकरसोत्कलोचनः ।
स्पृशन्तु रूपामृतवापि नन्वमुं
तवापि दक्षारतरङ्गभङ्गयः ॥ ७८ ॥

अयमिति ॥ हे भैमि, गुणौघैः सौन्दर्यादिगुणौघैः अनुरज्यन्तोऽनुरक्ता भवन्तः उत्कला लक्षणया तद्देशनिवासिनो लोका यत्र । अथ च गुणौघैः सौन्दर्यादिगुणौघैरनुरज्यन्त उत्कृष्टाश्चतुःषष्टिकला यत्र तैरुपलक्षितो वा अयं नृपः यस्माद्भवन्मुखालोके रसेनानुरागेणोत्कलोचनोत्कण्ठितनेत्रः । अस्तीति शेषः । तस्मात ननु हे रूपामृतवापि सौन्दर्यामृतदीर्घिके सुन्दरि, तवापि दृशोस्तारा उज्ज्वला विशालाः चञ्चला वा तरङ्गाः पुनःपुनर्व्यापाररूपाः कल्लोलास्तेषां भङ्गयः प्रकारविशेषाः अमुं स्पृशन्तु । अयं त्वां पश्यति, त्वमप्येनं कटाक्षैः पश्य योग्यत्वादिति भावः । अनुरज्यदुत्कल इत्यनेन जनानुरञ्जनासंपदाधिक्यं सूचितम् । अन्यस्यामपि जलवाप्यां चञ्चलतरङ्गभङ्गयो भवन्ति । अनुरज्यदिति श्यनो ङित्त्वान्नलोपः ॥

अनेन सर्वार्थिकृतार्थताकृता-
हृतार्थिनौ कामगवीसुरद्रुमौ ।
मिथः पयःसेचनपल्लवाशने
प्रदाय दानव्यसनं समाप्नुतः ॥ ७९ ॥

अनेनेति ॥ कामगवीसुरद्रुमौ कामधेनुकल्पवृक्षौ मिथः अन्योन्यं क्रमेण पयःसेचनपल्लवाशने दुग्धसेचनपल्लवभोजने प्रदाय प्रकर्षेण दत्त्वा दानस्य व्यसनमतिथये प्रत्यहमवश्यकरणीयतया प्रासस्याग्रहं समाप्नुतः समाप्तिं नयतः । कस्मादित्यत आह—किंभूतौ—सर्वार्थिनां सर्वयाचकानामभीष्टदानात या कृतार्थता जन्मसाफल्यं कृतार्थत्वं तां करोत्येवंभूतः कृतस्तेन । अनेनातिदानात्त्वं प्रति आहृता आनीता अर्थिनो याचका ययोस्तौ । अर्थ्यन्तराभावात्कामगव्या कल्पवृक्षस्य दुग्धसेकः कृतः, तेन च स्वपल्लवा भक्षयितुं तस्मै दत्ता इत्यर्थः । दानशूरोयमिति भावः ॥

नृपः कराभ्यामुदतोलयन्भिजे
नृपानयं यान्पततः पदद्वये ।
तदीयचूडाकुरुविन्दरश्मिभिः
स्फुटेयमेतत्करपादरञ्जना ॥ ८० ॥

नृप इति ॥ अयं नृपः निजे पदद्वये प्रणामवशात्पततो नम्रान्यान्नृपान्कराभ्यां कृपया शिरसि धृत्वा उदतोलयदुत्थापयामास । तदीया राजकीया याः चूडा मुकुटास्तासां कुरुविन्दरश्मिभिर्माणिक्यशोणशोभाभिः कृत्वा इयमेतस्य करपादयोः रञ्जना रक्तिमा स्फुटा दृश्यत इति शेषः ॥

यत्कस्यामपि भानुमान्न ककुभि स्थेमानमालम्बते
जातं यद्वनकाननैकशरणप्राप्तेन दावाग्निना ।
एषैतद्भुजतेजसा विजितयोस्तावत्तयोरौचिती
धिक्तं वाडवमम्भसि द्विपि भिया येन प्रविष्टं पुनः ॥

यदिति ॥ भानुमान् सूर्यः कस्यामपि ककुभि दिशि स्थेमानं स्थिरत्वं यत् नालम्बते अङ्गीकरोति किंतु सर्वदा परिभ्रमत्येव । दावाग्निना वनवह्निना च घनं अतिगहनं काननं तल्लक्षणं एकं केवलं शरणं रक्षितारं प्राप्तेन तदेकाश्रयेण यत जातम् । एतस्य भुजतेजसा विशेषेण जितयोस्तयोः सूर्यदावानलयोः तावच्चिरं स्थितं एषा औचिती युक्ततरता । भीतस्य व्याकुलता वनाश्रयणं च युक्तमित्यर्थः । मानी हि जितः सन् लज्जया मुखमदर्शयन्पुनर्दर्शने भयेनैकस्मिन्देशे वासं त्यक्त्वा सर्वत्र परिभ्रमति । सर्वथाम्भस्य प्रवेष्टुमशक्यं घनं वनं वा विशति । तस्यां युक्तमेव कृतमित्यर्थः । तं वाडवं वडवानलं पुनः धिक् । येन अस्माद्भिया द्विपि सहजशत्रौ अम्भसि समुद्रजले प्रविष्टं निमग्नम् । मानी पराजितोऽपि वैरिणं शरणं नैति, अयं तु गत इत्यभिमानित्वाभावाच्चिन्त्य एवेत्यर्थः । अथ च वाडवो ब्राह्मणः । ततश्च ब्राह्मणत्वाच्छत्रावपि भयेन प्रवेशो युक्तः । शत्रुणा च तस्य रक्षणं युक्तमिति सूचितम् । सूर्यादेरप्येतदीयं तेजोऽधिकमिति भावः । स्थेमा इति, स्थिरशब्दाद्भावे पृथ्वादित्वादिमनिचि 'प्रियस्थिर–' इति स्थादेशः । शरणं प्राप्तेन, 'द्वितीया श्रिता–' इति समासः ॥

अमुष्योर्वीभर्तुः प्रसृमरचमूसिन्धुरभवै-
रवैमि प्रारब्धे वमथुभिरवश्यायसमये ।
न कम्पन्तामन्तः प्रतिनृपभटा म्लायतु न त-
द्भ्रुवक्काम्भोजं भवतु न स तेषां कुदिवसः ८२

अमुष्येति ॥ अमुष्य उर्वीभर्तुः रणसंभवात् । प्रसृमरा प्रसरणशीलाश्चमूसिन्धुराः सेनागजास्तेभ्यो भवैः समुत्पन्नैर्वमथुभिः करिकराग्रजातैर्मदजलबिन्दुभिः, जलबिन्दुभिः, वा अवश्यायसमये

---

१ 'स्वाभाविकचरणादरण ... राजकिरीटमणिप्रभापयःपूररञ्जनास्वमुनोत्प्रेक्षनानार्थानुकरणविषयत्व व्यञ्जयत इत्यलंकारेण वस्तुध्वनिः' इति जीवातुः । २ 'भीत्याधानम्—' इत्यपादानत्व पञ्चमी । 'अस्य' इति मुद्रयता बाह्राना तु प्रमादः । ३ अत्र स्वाभाविकस्य सूर्यादिपर्यटनादेरतद्धेतुकत्वोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या' इति जीवातुः ।

नीहारकाले वा हिमर्तौ प्रारब्धे निर्मिते सति प्रतिनृपभटा वीरा अपि रिपुनृपा अन्तः तन्मध्ये स्वीये मनसि वा न कम्पन्ताम्। अपि तु अस्माद्भयेन युक्त एव कम्पन्तेषाम्। तथा—तेषां वध्वो रमण्यस्तासां वक्त्राम्भोजं न म्लायतु। अपितु भाविनः प्राणेशवधस्य निश्चितत्वात्तासां मुखस्य म्लानिरुचितैव। तथा—स प्रसिद्धो रणवासरस्तेषां वैरिणां तत्स्त्रीणां च कुत्सितो दिवसोऽशुभरूपो वासरो न भवतु। अपितु भवत्येव। वधनिश्चयाद्वैरिणां तत्स्त्रीणां च शोकवशादित्यहमवैमि। हिमर्तौ शरीरकम्पः कमलग्लानिर्दुर्दिनं च भवति। शूरतरोयं गजपतिरिति भावः। 'सिन्धुरभरः–' इति पाठे गजसङ्घैः कर्तृभिर्वमथुभिः कृत्वेति व्याख्येयम्। 'वमथुः करिशीकरः', 'अवश्यायस्तु नीहारः' इत्यमरः। प्रसृमर इति 'सृघस्यदः' इति क्मरच्। अवश्याय इति 'इयाय्यधा–' इति णः। तेषां 'पुमान्स्त्रिया' इत्येकशेषः॥

आत्मन्यस्य समुच्छ्रितीकृतगुणस्याहोतरामौचिती
यद्वात्रान्तरवर्जनादजनयद्भूजानिरेष द्विषाम्।
भूयोऽहं क्रियते स्म येन च हृदा स्कन्धो न यश्चानमत्-
तन्मर्माणि दलंदलं समिदलंकर्मीणबाणव्रजः॥ ८३॥

आत्मनीति॥ आत्मनि स्वीये स्वरूपे समुच्छ्रितीकृतगुणस्य मेलितसौन्दर्यादिसर्वगुणस्यास्य अहोतरामतिशयेनौचितीयम्। यत् एष भूजानिर्भूपतिः द्विषां गात्रान्तराणां हृत्स्कन्धेतराणां वर्जनादवयवान्तरं परित्यज्येत्यर्थः। येन च हृदा भूयः पुनःपुनः अतितरां अहं अहंकारः क्रियते स्म। अहंकारिणा जातमित्यर्थः। यश्च स्कन्धः नानमत् नम्रो न भूतः तस्यैव हृत्स्कन्धस्यैव मर्माण्यतिमृदूनि जीवस्थानानि खण्डं खण्डमजनयच्चकार नान्येषाम्। किंभूतः—समिति सङ्ग्रामे अलं कर्मणे अलंकर्मीणः अरिमारणसमर्थः बाणव्रजो यस्य। अपराधी हि राज्ञा दण्ड्यः। हृत्स्कन्धस्यैवापराधो नान्येषां तस्यैव दण्डं कृतवान् नान्येषामित्यतितरामस्यौचितीत्यर्थः। अयं च सगुणः सदर्पाननम्रांश्च मारयति, शरणागतांस्तु रक्षतीति भावः। 'कर्मक्षमोऽलंकर्मीणः' इत्यमरः। अलं कर्मणे, 'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या' इति समासेऽलंकर्मशब्दात् 'अपदक्षाशितंग्वलंकर्म–' इति खः॥

दूरं गौरगुणैरहंकृतिभृतां जैत्राङ्कारे चर-
त्येतद्दोर्यशसि प्रयाति कुमुदं बिभ्यन्न निद्रां निशि।
धम्मिल्ले तव मल्लिकासुमनसां माल्यं भिया लीयते
पीयूषस्रवकैतवाद्भृतदरः शीतद्युतिः स्विद्यति॥८४

दूरमिति॥ गौरगुणैर्धवलवर्णैः कृत्वा दूरं भृशं अहंकृतिभृतामहंकारवतां वस्तूनां जैत्रं च तदङ्कारि च तस्मिञ्जयकारिणि वामचरणे तृणकाष्ठादिनिर्मितशत्रुप्रतिमाधारिणि सकलधवलवस्तुषु विरुदावलीधारिणि एतद्दोर्यशसि एतस्य बाहुयशसि सकलेषु जगत्सु चरति प्रसरति सति। अथ च—स्वप्रतिमल्लगवेषणाय भुवनं परिभ्रमति सति बिभ्यत् भीतं कुमुदं निशि निद्राम्। अथ च—संकोचम् न प्रयाति। तथा—मल्लिकासुमनसां माल्यं माला अस्माद्भिया ते तव धम्मिल्ले केशपाशग्रन्थिविशेषे लीयते आत्मानं गोपायते अथ च—अदृश्यं तिष्ठति। तथा—शीतद्युतिश्चन्द्रो घृतदरः प्राप्तभयः सन् पीयूषस्रवकैतवादमृतस्रवणव्याजात्स्विद्यति स्वेदं मुञ्चति। अथ च—हिमकणान्मुञ्चति। 'एकयोद्धा अङ्कारः' इति वा। कुमदादिभ्योऽभ्यधिकं धवलमेतदीयं यश इति भावः। 'बहिर्न धारयेन्माल्यम्' इति केशान्तर्गतमाल्यधारणाद्धैम्याः सदाचारत्वं सूचितम्॥

एतद्गन्धगजस्तृषाम्भसि भृशं कण्ठान्तमज्जत्तनुः
फेनैः पाण्डुरितः स्वदिक्करिजयक्रीडायशःस्पर्धिभिः।
दन्तद्वन्द्वजलानुबिम्बनचतुर्दन्तः कराम्भोवमि-
व्याजादभ्रमुवल्लभेन विरहं निर्वापयत्यम्बुधेः॥ ८५॥

एतदिति॥ एतस्य गन्धगजः यः सप्तसु स्थानेषु स्रवति स गन्धगजः। स्वदानमलमूत्रादिगन्धेन जितान्यकरी विरोधिकरिगन्धमसहमान इति वा गन्धगजः। कराम्भोवमिव्याजाच्छुण्डादण्डाग्रेण मुखधृतगण्डूषजलवमनमिषादम्बुधेः समुद्रस्य अभ्रमुनाम्न्याः करिण्याः वल्लभस्य ऐरावणस्य विरहं पुत्रवियोगजनितं शोकं निर्वापयति शमयति। किंभूतः—भृशं नितरां तृषा पिपासया सफेनत्वात्क्षीरबुद्ध्या पुरःपुरः प्रसर्पणेन कण्ठान्तं ग्रीवां मर्यादीकृत्य मज्जन्ती जले क्रीडन्ती जलप्रवेशाददृश्यमाना तनुर्देहो यस्य एवंभूतः। तथा—स्वकीया दिक् प्राची तस्याः करी ऐरावणः, अन्ये वा तत्रत्याः करिणस्तेषां जयक्रीडा तया उपार्जितैः यशोभिः सह स्पर्धिभिः तद्वदुज्ज्वलैः फेनैः जलावगाहनोद्भूतैर्निमग्नदेहोर्ध्वदेशे पाण्डुरितो धवलितः। तथा—दन्तद्वन्द्वस्य दन्तद्वयस्य जलेऽनुबिम्बं प्रतिबिम्बस्तेन कृत्वा चत्वारो दन्ता यस्य सः। जलमध्ये विद्यमानत्वाद्धवलत्वाच्चतुर्दन्तत्वाच्च ऐरावण एवायमिति भ्रान्त्या समुद्रः सुखी भवतीत्यर्थः। आसमुद्रं दिग्विजयीत्यर्थः॥

अथैतदुर्वीपतिवर्णनाद्भुतं
न्यमीलदास्वादयितुं हृदीव सा।
मधुस्रजा नैषधनामजापिनी
स्फुटीभवद्ध्यानपुरःस्फुरन्नला॥ ८६॥

अथेति॥ अथ सा भैमी न्यमीलदक्षिपक्ष्मसंकोचं चकार। किंभूता—अतिप्रीत्या मधुस्रजा वरणमधूकमालया नैषधस्य नाम जपति तच्छीला। अत एव स्फुटीभवन्प्रत्यक्षायमाणः ध्यानेन चिन्तनातिशयेन पुरःस्फुरन्नप्रस्थिततयावभासमानो नलो यस्याः सा। तत्रोत्प्रेक्षते—एतस्योर्वीपतेर्वर्णनया समुत्पन्नमद्भुतमाश्चर्यं हृदि विद्यमानं आस्वादयितुमनुभवितुमिव। आश्चर्यस्य चेतसि वर्तमानत्वात्तदनुभवार्थं नेत्रेष्यन्तः प्रविष्टे इवेत्यर्थः। नले एवानुरक्ता सती नेत्रनिमीलनेनैव तं नृपं निराचकारेति भावः। अ-

१ 'अत्र करशीकरादौ नीहारादिरूपणाद्रूपकालंकारः' इति **जीवातुः**। २ 'समुच्चितीकृत–' इति **जीवातु-सुखावबोधासंमतः** पाठः। ३ 'नवमल्लिका–' इति पाठोपि **सुखावबोधोक्तः**।

१ 'अत्र दोर्यशःप्रभृतीनामहंकाराद्यसंबन्धेऽपि तत्संबन्धोक्तेरतिशयोक्तिभेदः' इति **जीवातुः**। २ 'सापह्नवोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या' इति **जीवातुः**।

न्योऽपि जपमालयाभीष्टदेवतामन्त्रजपं कुर्वंस्तां साक्षात्कर्तुं नेत्रे निमील्य ध्यानेन तां साक्षात्करोति ॥

प्रशंसितुं संसदुपान्तरञ्जिनं
श्रिया जयन्तं जगतीश्वरं जिनम् ।
गिरः प्रतस्तार पुरावदेव ता
दिनान्तसंध्यासमयस्य देवता ॥ ८७ ॥

प्रशंसितुमिति ॥ दिनान्तसंध्यासमयस्य देवता सरस्वती पुरावदेव पूर्ववदेव ताः अतिगम्भीरमधुरा गिरः प्रतस्तार उवाच । किं कर्तुम्—संसदः सभाया उपान्तावुभयपार्श्वौ रञ्जयत्येवंशीलं श्रिया शरीरशोभया कृत्वातिसुन्दरं जिनं बुद्धदेवं जयन्तं जगत्याः पृथिव्या ईश्वरं राजानं प्रशंसितुं वर्णयितुम् । श्रिया संसदुपान्तरञ्जिनं जयन्तं जगति शौर्यादिना इन्द्रपुत्रतुल्यं कीकटदेशप्रभुत्वाज्जिनं बौद्धं राजानमिति वा । जयन्तनामानं वा । 'जगदीश्वरम्' इति पाठे जिनविशेषणम् ॥

तथाधिकुर्या रुचिरे चिरेप्सिता
यथोत्सुकः संप्रति संप्रतीच्छति ।
अपाङ्गरङ्गस्थललास्यलम्पटाः
कटाक्षधारास्तव कीकटाधिपः ॥ ८८ ॥

तथेति ॥ हे रुचिरे सुन्दरि, त्वं तथा तेन प्रकारेण अधिकुर्या अधिकारं कुर्याः । तथा कथम्—यथा येन प्रकारेण कीकटाधिपः मगधदेशस्वामी त्वत्कटाक्षेषूत्सुकः सन् चिरेप्सिताः तव कटाक्षधाराः तिर्यगवलोकनपरम्पराः संप्रति इदानीं संप्रतीच्छति अङ्गीकरोति । किंभूता धाराः—अपाङ्गो नेत्रप्रान्तस्तल्लक्षणं रङ्गस्थलं नाट्यशाला तत्र लास्ये सविलासमन्दगतौ लम्पटाः । चिरेप्सिता त्वमिति वा । चिर इत्यकारान्तमप्यव्ययं तेन समासः । एवमेवं जातीयेऽन्यत्रापि ज्ञातव्यम् ॥

इदंयशांसि द्विषतः सुधारुचः
किमङ्कमेतद्द्विषतः किमाननम् ।
यशोभिरस्याखिललोकधाविभि-
र्विभीषिता धावति तामसी मसी ॥ ८९ ॥

इदमिति ॥ अखिलेषु लोकेषु धाविभिः प्रसरणशीलैः लोकत्रयमुज्ज्वलं कुर्वाणैरस्य यशोभिर्विशेषेण भीषिता लोकत्रयान्निवासिता सती तामसी कृष्णपक्षरात्रिः एव मसी इदंयशांसि अस्य कीर्तीर्द्विषतः असहमानस्य सुधारुचेश्चन्द्रस्य अङ्कं कलङ्कम्, अथ च—संनिधिं धावति शीघ्रं गच्छति प्रविशति किम् । किं वा एतद्द्विषतः एतच्छत्रोः आननं प्राप्नोतीति संशयः । एतद्यशोभिश्चन्द्राङ्कशत्रुमुखातिरिक्तस्य सकलस्यापि जगतः श्वेतीकरणमाश्रयतीत्यर्थः । अयमतितरां यशस्वीति भावः । अन्योऽपि भीषितः स्वगोत्रं याति, श्यामस्य च श्यामं वस्तु सगोत्रमिति । तामसी तमःसंबन्धिनी रात्रिः, मषी(सी) श्यामवस्तुमात्रगता श्यामिका च यथाक्रमं चन्द्राङ्कं शत्रुमुखं धावति किमिति वा । निरन्तरोद्द्योतकरणादेतत्कीर्त्या निष्कासितेव तामसी स्त्रीस्वभावभीरुर्भर्तुश्चन्द्रस्योत्सङ्गं गता अत एव रात्रिकालिमा चन्द्राङ्के दृश्यते । सर्वस्यापि श्वेतीकरणाच्छ्यामिकापि निर्वासितान्यत्र स्थातुमशक्ततयेव रिपुमुखं गता । अत एव विवर्णीभूतेषु वैरिमुखेषु कालिमा दृश्यते । एतद्द्विषतः, 'द्विषः शतुर्वा' इति षष्ठ्या समासः ॥

इदंनृपप्रार्थिभिरुज्झितोऽर्थिभि-
र्मणिप्ररोहेण विवृध्य रोहणः ।
कियद्दिनैरम्बरमावरिष्यते
मुधा मुनिर्विन्ध्यमरुन्ध भूधरम् ॥ ९० ॥

इदमिति ॥ अतिवदान्यस्य अस्य नृपस्य प्रार्थनशीलैरर्थिभिः याचकैः अनेनैव सकलकामानां पूरितत्वादुज्झितः परित्यक्तः । अत एव रत्नव्ययाभावात् मणिप्ररोहेण विवृध्य अङ्कुरोत्पत्त्या विशेषेण वृद्धिं प्राप्य रोहणो मेरुः कियद्भिः कतिपयैरल्पैरेव दिनैरम्बरमाकाशं आवरिष्यते आच्छादयिष्यति यतः, तस्मात् मुनिरगस्तिः विन्ध्यनामानं भूधरं मुधैवारुन्ध मदागमनपर्यन्तं त्वया न वर्धितव्यमिति नियमेन वृथैव वाग्बद्धमकरोत् । तद्वृद्ध्यभावेऽपि रोहणेनैव सूर्यगतेः प्रतिबन्धस्य करिष्यमाणत्वादगस्त्यप्रयासस्य वैयर्थ्यमेव जातमित्यर्थः । अगस्त्येन विन्ध्यरोधस्तु पुराणप्रसिद्धः । आवरिष्यते, विकल्पत्वादिटो दीर्घो न । अरुन्ध, लङ्कात्मनेपदे ॥

भूशक्रस्य यशांसि विक्रमभरेणोपार्जितानि क्रमा-
देतस्य स्तुमहे महेभरदनस्पर्धीनि कैरक्षरैः ।
लिम्पद्भिः कृतकं कृतोऽपि रजतं राज्ञां यशःपारदै-
रस्य स्वर्णगिरिः प्रतापदहनैः स्वर्णं पुनर्निर्मितः ९१

भूशक्रस्येति ॥ वयं विक्रमस्य भरेण बाहुल्येन क्रमात्परिपाट्या उपार्जितानि एतस्य भूशक्रस्य पृथ्वीन्द्रस्य यशांसि कैरक्षरैर्वर्णैः स्तुमहे वर्णयामः । यशसां भूयस्त्वाद्वर्णानां पञ्चाशत्त्वात्स्तोतुं न शक्नुमः । सामान्याकारेण कथंचिद्वर्ण्यन्त इत्यर्थः । किंभूतानि—महेभाः षष्टिहायना गजाः, ऐरावतो वा तेषां दशनैः सह स्पर्धन्ते एवंशीलानि तद्वद्गौराणि । स्वर्णगिरिर्मेरुः अन्येषां राज्ञां मेरुमेव लिम्पद्भिः यशोलक्षणैः पारदै रसैः कृतकमसत्यं रजतं रूप्यं कृतोऽपि प्रलेपनिर्मितपाण्डुद्युतितां नीतोऽपि सन् अस्य प्रतापरूपैर्दहनैः अग्निभिः पुनः स्वर्णं निर्मितः कृतः । प्रतापस्य गीतत्वात्स्वर्णरूपतां प्रापितः । पारदलेपेन सुवर्णं श्वेतीभवति, वह्नितापने चोड्डीने पारदे पुनः काञ्चनमेव भवतीत्यर्थः । एतत्प्रतापाग्रे परेषां यशांसि न प्रसरन्ति । यशस्वी प्रतापवांश्चान्यः कोपि नास्तीत्यर्थः ॥

यद्भर्तुः कुरुतेऽभिषेणनमयं शक्रो भुवः सा ध्रुवं
दैग्दाहैरिव भस्मभिर्मघवता वृष्टैर्धृतोद्धूलना ।

१, २ 'मषी' इत्यत्र मूर्धन्यान्तमेव बहुत्र दृश्यते । तथापि वर्णसाम्याद्दन्त्यान्तपाठः स्थापितः । सुखावबोधाजीवात्वोरपि दन्त्यान्तैव दृश्यते ।

१ 'अत्र रोहणाद्रेरीदृग्विन्ध्यसंबन्धेऽपि संबन्धोक्तेरतिशयोक्तिः' इति जीवातुः । २ 'अत्राप्युक्तरूपासंबन्धेऽपि संबन्धोक्तेरतिशयोक्तिः' इति जीवातुः । ३ 'दिग्दाहैः' इति मूलपुस्तकपाठः । ४ 'सृष्टैः' इति मूले जीवातुसंमतः पाठः ।

शंभोर्मा बत सांधिवेलनटनं भाजि व्रतं द्रागिति
क्षोणी नृत्यति मूर्तिरष्टवपुषोऽसृग्वृष्टिसंध्याधिया ॥

यदिति ॥ अयं भुवः शक्रो भूमीन्द्रः यस्या भूमेर्भर्तुः अभिपेणनं सेनयाभिगमनं कुरुते सा क्षोणी भूमिः इति मनसि कृत्वा लोहितत्वेनौत्पातिकी असृग्वृष्टी रुधिरवृष्टिस्तद्रूपा या सायंसंध्या तस्या धिया भ्रमबुद्ध्या द्राक् शीघ्रं नृत्यति गात्रविक्षेपं करोति। कम्पते इत्यर्थः। बत खेदे। ध्रुवमुत्प्रेक्षे। किंभूता सा भूः—दाहात् इन्धनज्वलनाद्भस्मसंभवाद्दग्दाहैरिव दिग्दाहाद्दिशामौत्पातिकनिर्हेतुकलोहितदीप्तेः प्रभवैरिव मघवता इन्द्रेण वृष्टैर्मोचितैर्भस्मभिः कृत्वा धृतं कृतमुद्वूलनमङ्गलेपो यया सा। इति किम्—शंभोः दिनरात्रिसंधिरूपायां वेलायां काले भवं सांधिवेलं सायंसंध्याकालसमुचितं नटनं नृत्तरूपं व्रतं नियमो मा भाजि भग्नो मा भूदिति स्वयं नृत्यतीत्यर्थः। यतः—अष्टमूर्तेर्जलाद्यष्टमूर्तेः शंभोरेका मूर्तिः पृथिवी। शिवो हि संध्यासमये नृत्यं करोति तन्मूर्तित्वात्तयापि नृत्तमारब्धमित्यर्थः। यमुद्दिश्य अयं प्रयाणं करोति तस्मिन्देशे दिग्दाहभस्मदृष्टिभूकम्परक्तवृष्टिलक्षणास्तत्पराजयसूचका उत्पाता भवन्ति। अयमेव विजयत इत्यर्थः। 'जलार्केन्द्वात्मखभ्वग्निवायवः शिवमूर्तयः'। 'यत्सेनयाऽभिगमनमरौ तदभिपेणनम्' इत्यमरः। यङ्भर्तुः, भर्तृशब्दस्य पदात्यर्थत्वाद्याजकादित्वात्समासः। सेनयाभिगमनमभिपेणनम्, 'सत्यापपाश–' इति णिचि ल्युट्। 'उपसर्गात्सुनोति–'इति षत्वम्। दैग्दाहैरित्यत्र 'तस्येदम्' इत्यण्। संधिवेलायां भवं सांधिवेलम्, 'संधिवेला–' इत्यण्। इन्द्रः शिवस्य भस्माहरणेऽधिकारी। अत एव दिशां दाहं कृत्वा भस्मार्पितवानिति केचित् ॥

प्रागेतद्वपुरामुखेन्दु सृजतः स्रष्टुः समस्तस्त्विषां
कोशः शोषमगादगाधजगतीशिल्पेऽप्यनल्पायितः।
निःशेषद्युतिमण्डलव्ययवशादीषल्लुभैरेष वा
शेषः केशमयः किमन्धतमसस्तोमैस्ततो निर्मितः९३

प्रागिति ॥ प्राक् सर्गादौ अगाधे जगतीशिल्पेऽप्यमर्यादत्रैलोक्यनिर्माणविषयेऽपि यस्त्विषां समस्तः सकलः कोशो भाण्डागारसंचयः नाल्पायितोऽल्पवन्नाचरितः, किं तु तावानेवाक्षयः स्थितः। आमुखेन्दु मुखचन्द्रमभिव्याप्य एतस्य वपुः सृजतः स्रष्टुर्ब्रह्मणः संबन्धी स त्विषां समस्तः कोषः शोषं समाप्तिमगात्प्राप क्षयितः। यतः—चरणप्रभृतिमुखपर्यन्तावयवनिर्माणार्थमेव पूर्णो, न तु केशनिर्माणार्थं ततस्तस्मात्कान्तिक्षयाद्धेतोः केशमयः केशप्रचुरः केशरूपोऽस्य एष शेषो भागः निःशेषं द्युतिमण्डलं समस्तः तेजोराशिः तस्य व्ययवशान्नाशवशात् 'भावावस्तमः' इति न्यायात्। ईषल्लुभैः सुप्रापैः सुलभैरन्धतमसस्तोमैर्गाढान्धकारसङ्घैः कृत्वा किं वा निर्मित इत्युत्प्रेक्षा। सुन्दरतरोऽयं केशाश्चातिनीला घनाभेति भावः। ईषल्लुभैः, अकृच्छ्रार्थे खल्। 'उपसर्गादेव खल्घञोः, नान्यत्र' इति नियमान्नुमभावः। अन्धतमसम् 'अवसमन्धेभ्यस्तमसः' इत्यच् ॥

१ 'अत्रोत्प्रेक्षालंकारेण लोकातिशयतेजो व्यज्यते' इति **जीवातुः**।

तत्तद्दिग्जैत्रयात्रोद्धुरतुरगखुराग्रोद्धुतैरन्धकारं
निर्वाणारिप्रतापानलजमिव सृजत्येषराजारजोभिः।
भूगोलच्छायमायामयगणितविदुन्नेयकायोऽभियाभू-
देतत्कीर्तिप्रतानैर्विधुभिरिव युधे राहुराहूयमानः९४

तदिति ॥ एष राजा तासां तासां प्राच्यादीनां सर्वासां दिशां जैत्रा जयकारिण्यो यात्रास्तासूद्धुरा उत्साहवन्तोऽतिबलिनस्तुरगास्तेषां खुराग्रैरुद्धतै रजोभिः कृत्वा अन्धकारं सृजति। कथंभूतमिव—निर्वाणः शान्तोऽरिप्रतापानलस्तस्मादनन्तरं जातमिव। अन्धकारं सूर्यप्रकाशस्याच्छादितत्वात्तमः सृजति। अनले शान्ते भावरूपोऽन्धकारो भवति। एतस्य दिग्जययात्रायां प्रारब्धायां सर्वेषामपि वैरिणां प्रतापः शान्तो भवतीति भावः। तुरंगबाहुल्यं च। तथा—एतस्य कीर्तिप्रतानैर्यशोविस्तारैरेव विधुभिर्बहुभिश्चन्द्रैः युद्धे युद्धार्थमाहूयमानः स्पर्धापूर्वमाकारित एव राहुः भियेव भयेनेव भूगोलस्य भूमण्डलस्य छायायां मायामयेन मायारूपेण व्याजेन गणितविद्भिर्ज्योतिर्विदैर्गणितशास्त्रप्रामाण्येनोन्नेयस्तर्क्यः कायः शरीरं यस्य एवंभूतोऽभूत्। एतत्कीर्तिसमूहचन्द्रान्दृष्ट्वा एकस्य चन्द्रस्य जेतुं शक्यत्वादेषां तु बहूनां जेतुमशक्यत्वाद्राहुणा स्वं गोपायितुं भूगोलच्छायरूपं मायामयं शरीरं धृतमित्यर्थः। ज्योतिःशास्त्रे च भूगोलच्छायैव राहुत्वेनोक्ता। अन्योपि शत्रोर्भीतः स्वं गोपायितुं रूपान्तरं धारयति। एतादृशो यशस्वी कोपि नास्तीति भावः। निर्वाण इति, 'निर्वाणोवाते' इति निपातः। 'च्छायमाया–' इति 'विभाषा सेना–' इति पैण्ढत्वम् ॥

आस्ते दामोदरीयामियमुदरदरीं यावलम्ब्य त्रिलोकी
संमातुं शक्नुवन्ति प्रथिमभरवशादत्र नैतद्यशांसि।
तामेनां पूरयित्वा निरगुरिव मधुध्वंसिनः पाण्डुपद्म-
च्छद्मापन्नानितानिद्विपदशनमनाभीनि नाभीपथेन

आस्ते इति ॥ येयं त्रिलोकी, लोकत्रयी दामोदरीयामुदरदरीं श्रीविष्णोर्जठरकंदरामवलम्ब्याश्रित्य आस्ते। अत्रास्यां दामोदरोदरस्थितायां त्रिलोक्यां प्रथिमभरवशान्महत्त्वबाहुल्यादतिसंमर्दात् संमातुं सुखेन स्थातुं न शक्नुवन्त्यसमर्थानि सन्ति, तान्यतिप्रसिद्धानि द्विपदशनैः सनाभीनि सदृशान्यतिगौराणि एतस्य यशांसि तामेतां विष्णूदरदरीस्थितां तत्सहितां त्रिलोकीं पूरयित्वावशिष्टानि तामुदरदरीं तस्यां त्रिलोकीं च परिपूर्य अवशिष्टा वा पाण्डुपद्मच्छद्मापन्नानि नाभिसमुत्पन्नधवलकमलव्याजमापन्नानि तदाकाराणि सन्ति मधुध्वंसिनो विष्णोर्नाभीरूपेण पथा मार्गेण निरगुरिव निर्जग्मुरिव। संकटवासयातनाभिया बहिर्निर्गतानीव। श्रीविष्णोर्नाभौ धवलं कमलमन्यथोत्प्रेक्षितम्। पाण्डुरं पद्मं न किंत्वेतद्यशांस्येव। करिदन्तधवलकमलतुल्यान्यतिभूयांसि चास्य यशांसीति भावः। दामोदरीयाम्, 'वृद्धाच्छः'। पृथ्वादित्वादप्रथिमा। नाभीपथेन ऋगादिना समासौन्तः ॥

१ 'ज्योतिःशास्त्रप्रमाणक यद्राहोर्भूच्छायात्मकत्वम्। तदेतत्कीर्तिचन्द्रभिया' इत्युत्प्रेक्षा। तया च राहुर्भीषकत्वेन कीर्तिचन्द्राणा प्रसिद्धचन्द्रातिरेको व्यज्यते' इति **जीवातुः**। २ 'शक्तिमन्ति' इति **जीवातुसुखावबोधा**संमतपाठः। ३ 'अत्र पद्मच्छद्मना निरगुरिवेति सापह्नवोत्प्रेक्षा। सा च त्रिलोकीयशसोराधाराधेययोरानुरूप्यविलक्षणालंकारोत्थापितेति संकरः' इति **जीवातुः**।

अस्यासिर्भुजगः स्वकोशसुषिराकृष्टः स्फुरत्कृष्णिमा
कम्पोन्मीलदराललीलवलनस्तेषां भिये भूभुजाम् ।
सङ्ग्रामेषु निजाङ्गुलीमयमहासिद्धौषधीवीरुधः
पर्वास्ये विनिवेश्य जाङ्गुलिकता यैर्नाम नालम्बिता ॥

अस्येति ॥ अस्य असिरेव भुजगस्तेषां भूभुजां राज्ञां भिये भवतीति शेषः । किंभूतः—स्वकोश एव चर्ममयं पिधानं तदेव सुषिरं वल्मीकविवरं तस्मादाकृष्टो बहिः कृतः सद्यो धृतश्च । तथा स्फुरन्प्रकाशमानः उत्तमलोहजातिविशेषत्वात्कृष्णिमा श्यामत्वं यस्य । सर्पोपि सद्योधृतत्वात्स्फुरत्कालिमा । तथा—कम्पेन तलहस्तान्दोलनेन कृत्वा उन्मीलन्त्यः प्रकटीभूता अराला वक्रा लीला येषु तादृशानि वलनानि गतिविशेषा यस्य । सर्पोऽपि वक्रगतिर्भवति । तेषां केषाम्—यैः सङ्ग्रामेषु निजाङ्गुलीमय्याः स्वीयाङ्गुलीरूपाया महासिद्धौषध्या वीरुधो वल्ल्याः स्पर्शमात्रेण विषघ्नयाः पर्वग्रन्थिमङ्गुष्ठाग्रपर्वग्रन्थिद्वयं चास्ये मुखे विनिवेश्य जाङ्गुलिकता विषवैद्यता गारुडिकता नालम्बिता नाङ्गीकृता । नाम प्रसिद्धौ । सर्पोपि येन स्वमुखे सिद्धौषधीपर्व न निक्षिप्यते तमेव यथा मारयति, तथा एतदीयः खड्गोऽपि ये शस्त्राणि न त्यजन्ति दैन्याच्च मुखे अङ्गुलीपर्व न धारयन्ति तानेव हन्ति नान्यान्भीताञ्शरणागतांश्च । 'विषवैद्यो जाङ्गुलिकः' इत्यमरः ॥

यः पृष्ठं युधि दर्शयत्यरिभटश्रेणीषु यो वक्रता-
मस्मिन्नेव बिभर्ति यश्च किरति क्रूरध्वनिं निष्ठुरः ।
दोषं तस्य तथाविधस्य भजतश्चापस्य गृह्णन्गुणं
विख्यातः स्फुटमेक एष नृपतिः सीमा गुणग्राहिणाम्

य इति ॥ अरिभटश्रेणीषु शूरतरवैरिसङ्घेषु विषये यः पृष्ठं दर्शयति पराङ्मुखः पलायते । अथ च—यं प्रत्याकृष्यते तस्य स्वभावात्पृष्ठं दर्शयति । यः अस्मिन्स्वस्वामिन्येव नृपे वक्रतामनृजुत्वं स्वाश्रय एव कृतघ्नत्वं बिभर्ति । अथ च—अन्यस्यैतादृग्बलाभावादस्मिन्नेव वक्रतां बिभर्ति । नान्येन नम्रीकर्तुं शक्यत इत्यर्थः । तथा—यो निष्ठुरो निर्दयो दाक्षिण्यरहितः सन् क्रूरध्वनिमनेन सहाप्रियभाषणं किरति । अथ च—परिणतदृढवंशजन्मा क्रूरं वैरिणां भयावहं शब्दं क्रेंकारं क्षिपति । दोषं दूषणम् । अथ च—बाहुं भजतस्तथाविधस्य तस्य चापस्य तथाविधस्यान्यस्य वा कस्यचिद्गुणं श्रुतशौर्यादिकं गृह्णन्वर्णयन् । अथ च—मौर्वीमाकर्षन् एष एको नृपतिः स्फुटं निश्चितं गुणग्राहिणां परदोषख्यापननिवृत्तानां दोषेपि गुणारोपणं कुर्वतां सज्जनानाम् । अथ च—मौर्वीग्राहिणां धनुर्धराणां सीमा पर्यन्तावधिः स्फुटं विख्यातः प्रसिद्धः । एवंविधो धनुर्धरः सज्जनश्च कोपि नास्तीत्यर्थः । धनुःपृष्ठदर्शनेनैतस्य पलायनाभावः सूचितः ॥

अस्यारिप्रकरः शरश्च नृपतेः संख्ये पतन्तावुभौ
सीत्कारं च न संमुखौ रचयतः कम्पं च न प्राप्नुतः ।
तद्युक्तं न पुनर्निवृत्तिरुभयोर्जागर्ति यन्मुक्तयो-
रेकस्तत्र भिनत्ति मित्रमपरश्चामित्रमित्यद्भुतम् ॥९८॥

अस्येति ॥ अस्य नृपतेः उभौ संख्ये सङ्ग्रामे क्रमेण संमुखौ एतत्संमुखं वैरिसंमुखं च पतन्तौ सन्तौ सीत्कारं दुःखाभिव्यञ्जकं दन्तमध्यनिर्गतं पक्षवातजनितं च ध्वनिविशेषं यन्न रचयतः कुरुतः । यच्च मरणभीतिजनितं दुर्निर्गतत्वजनितं च कम्पं न प्राप्नुतः । उभौ कौ—अरिप्रकरो वैरिसङ्घः, शरश्च एतौ द्वौ । तथा—मुक्तयोः प्राप्तमोक्षधनुश्च्युतयोः यत् पुनर्निवृत्तिः जन्म प्रत्यागमनं च न जागर्ति भवति तत्सर्वं युक्तं उचितमेव । द्वयोरपि तुल्यधर्मत्वात् । तर्हि विलक्षणं किमित्याशङ्कायामाह—तत्र तयोर्द्वयोर्मध्ये एको वैरिसङ्घः मित्रं सुहृदम् । अथ च—सूर्यं भिनत्ति । अपरश्च शरोऽमित्रं सूर्यव्यतिरिक्तम् । अथ च—वैरिणं भिनत्ति द्विधाकरोतीत्यद्भुतमाश्चर्यम् । तुल्यकर्मणोरतुल्यकर्मारम्भकत्वस्य विरुद्धत्वादित्यर्थः । चावन्योन्यसमुच्चये । दुःखभयराहित्येन रणे संमुखः पतितः शत्रुसङ्घः 'द्वाविमौ पुरुषौ लोके' इति वचनात्सूर्यमण्डलं भित्त्वा मुक्तिं प्राप्तः । अदृढमुष्टितया मुक्तो बाणः कम्पसीत्कारौ रचयति । तदकरणाच्च दृढमुष्टितास्य सूचिता । दृढमुष्टित्वेन मुक्तो वैरिमध्ये न पुनरायाति । वैरिणं हन्तीत्यर्थः । शूरतरोऽयं शत्रुमात्रं हतवानिति भावः । बाणपक्षे—सम्यक् मुखं पुङ्खमग्रं वा यस्येति ॥

धूलीभिर्दिवमन्धयन्बधिरयन्नाशाः खुराणां रवै-
र्वातं संयति खञ्जयञ्जवजवैः स्तोतॄन्गुणैर्मूकयन् ।
धर्माराधनसंनियुक्तजगता राज्ञामुनाधिष्ठितः
सान्द्रोत्फालमिषाद्विगायति पदा स्प्रष्टुं तुरंगोऽपि गां ॥

धूलीभिरिति ॥ धर्माराधने सम्यक् नियुक्तं प्रेरितं जगत् येन एवंभूतेनामुना राज्ञाधिष्ठित आरूढस्तुरंगोऽपि पशुरपि धूलीभिः खुरजरजोभिर्दिवं स्वर्गलोकमन्धयन्नन्धं कुर्वन् । चक्षुःप्रविष्टाद्रजस एव निमीलितनयनं कुर्वन्नित्यर्थः । तथा—खुराणां रवैः समुच्छलनशब्दैः कृत्वा आशा दिक्प्रान्तनिवासिनो जनान्बधिरयन्बधिरतया शब्दान्तरग्रहणाशक्तान्कुर्वन् । तथा—संयति सङ्ग्रामे जवस्य वातवेगस्य जवैर्वायोः सकाशादतिवेगतया वातं खञ्जयन्पङ्गुं कुर्वन् । तथा—गुणैर्हेतुभिः स्तोतॄनश्वजयरूपलक्षणादिवर्णनकारिणो जनान्मूकयन् गुणाधिकत्वेन सामस्त्येन स्तोतुमसमर्थान्मूकानिव कुर्वन् । एवंभूतः सन् अनन्तरं सान्द्राणां निरन्तराणामुत्फालानां चतुर्भिश्चरणैरुत्पतनानां मिषात्पदा एकेनापि चरणेन गां भुवम् । अथ च—धेनुं स्प्रष्टुं तस्याः स्पर्शनं कर्तुं विगायति विशेषेण जुगुप्सते । धार्मिको राजा निषिद्धमाचरतः स्वाधीनान्पापिनो दण्डयति । अहं तु तदधिष्ठितः

१ 'रूपकालंकारो व्यज्यत एव' इति जीवातुः । २ इतः परम् 'दोषशब्दो नपुंसकोपि 'दोषणी' इति भाष्यप्रयोगात् । 'भुजबाहू प्रवेष्टो दोः' इति साहचर्यात्पुंस्यपि । स्त्रियामपि 'दोर्दोषा च भुजा बाहुः पाणिर्हस्तः करस्तथा' इति धनञ्जयः' इत्यधिकमेकस्मिन्पुस्तके 'अत्र गुणग्राहिसीमात्वस्य पूर्ववाक्यार्थहेतुकत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमलंकारः' इति जीवातुः ।

१ 'अत्र 'अमित्रं भिनत्ति' इत्युक्तम् 'मित्रं न भिनत्ति' इति च प्रतीयते । ईदृशेऽभिमुखपतिते तस्य विरोधादद्भुतम् । मित्रमण्डलभेदनस्य वीरपुरुषायत्तत्वेनात्र 'शत्रून्भिनत्ति' इत्यविरोधाद्विरोधाभासोलंकारः' इति जीवातुः । २ 'जवजयैः' इति जीवातुसुखावबोधासंमतपाठः ।

पदा गोः स्पर्शलक्षणं पापं कुर्वन्दण्ड्यः स्यामिति बुद्ध्या पदा न स्पृशतीवेत्यर्थः। धार्मिको जवनाश्वश्चायमेवेत्यर्थः। अन्धयन्नित्यादौ 'तत्करोति–' इति णिजन्ताच्छता ॥

एतेनोत्कृत्तकण्ठप्रतिसुभटनटारब्धनाट्याद्भुतानां
कष्टं द्रष्टैव नाभूद्भुवि समरसमालोकिलोकास्पदेपि।
अश्वैरस्वैरवेगैः कृतखुरखुरलीमङ्क्षुविक्षुद्यमान-
क्ष्मापृष्ठोत्तिष्ठदन्धंकरणरणधुरारेणुधारान्धकारात् १००

एतेनेति ॥ समरसमालोकिनो ये लोकास्तेषामास्पदे स्थानभूतायामपि भुवि सङ्ग्रामभूमौ समरसमालोकिलोकानां देवानामास्पदे गगनेऽपि वा एतेन राज्ञा उत्कृत्तकण्ठाश्छिन्नग्रीवाः कबन्धरूपाः प्रतिसुभटा रिपुवीरास्त एव नटा नर्तकास्तैरारब्धानां नाट्याद्भुतानां नृत्ताश्चर्याणां द्रष्टा नाभूदेव। कष्टमतिदुःखमेतत्। तत्र हेतुः—अस्वैरवेगैः शीघ्रजवैरश्वैः कृता खुरैः कृत्वा खुरली अभ्यासभूमिः पुनः पुनः न्यासो वा तया मङ्क्षु मनोज्ञं शीघ्रं वा विशेषेण क्षुद्यमानं चूर्णीभवद्क्ष्मापृष्ठं भूतलं तस्मादुत्तिष्ठदुत्पतन् अनन्धमन्धंकरण एवंभूतो रणधुरारेणू रणप्रारम्भ एव समुत्पन्नो रेणुस्तस्य धाराः प्रवाहास्तज्जनितादन्धकारात्। रणविलोकनार्थमागतैरपि मानवैर्देवैरप्यश्वखुरोत्थितरजःपूरितनेत्रैः कबन्धवृत्तं नालोकीत्यर्थः। 'मन्दस्वच्छन्दयोः स्वैरम्'। एतत्कृत्तोत्तमाङ्ग–' इति पाठः साधीयान्। द्रष्टा तृच्। रणधुरा, ऋगादिना अः। धुरा भर इति वा ॥

उन्मीलल्लीलनीलोत्पलदलदलनामोदमेदस्विपूर-
क्रोडक्रीडद्विजालीगरुदुदितमरुत्स्फालवाचालवीचिः।
एतेनाखानि शाखानिवहनवहरित्पर्णपूर्णद्रुमाली-
व्यालीढोपान्तशान्तव्यथपथिकदृशां दत्तरागस्तडागः॥

उन्मीलदिति ॥ एतेन राज्ञा एतादृशस्तडागोऽखानि निष्पादितः। किंभूतः—उन्मीलन्ती विकसन्ती लीला विलासो येषां तानि नीलोत्पलानि तेषां दलानि पत्राणि तेषां दलनं विकसनं तदुद्भवेन आमोदेन परिमलेन मेदस्वी पुष्टो बहुलपरिमलः पूरः प्रवाहस्तस्य क्रोड उत्सङ्गे क्रीडन्ती द्विजालिर्हंसादिपङ्क्तिस्तस्या गरुद्भ्यः पक्षेभ्य उदित उत्पन्नो मरुद्वायुस्तस्य स्फालः सवेगगमनं संघट्टो वा तेन वाचालाः शब्दायमाना वीचयस्तरङ्गा यस्य। तथा–शाखानिवहेन नवहरित्पर्णैर्नूतनश्यामपर्णैश्च पूर्णा द्रुमाल्यो वृक्षपङ्क्तयस्ताभिर्व्यालीढो व्याप्त उपान्तस्तीरप्रदेशस्तेन शान्ता व्यथा ग्रीष्मोष्मपीडा यासां तासां पथिकदृशां,–ग्रीष्मोष्मपीडा येषां पथिकानां वा दृशस्तासां, दत्तो रागः संतोषो येन। तडागस्यातिरमणीयत्वं सुखजनकत्वमस्य च धार्मिकत्वं सूचितम् ॥

वृद्धो वार्धिरसौ तरङ्गवलिभं बिभ्रद्वपुः पाण्डुरं
हंसालीपलितेन यष्टिकलितस्तावद्वयोबंहिमा।
बिभ्रच्चन्द्रिकया च कं विकचया योग्यस्फुरत्संगतं
स्थाने स्नानविधायिधार्मिकशिरोनत्यापि नित्यादृतः॥

वृद्ध इति ॥ असौ अनेन निर्मितस्तडागः वृद्धो महान्वार्धिः समुद्रः। समुद्रापेक्षयापि महानित्यर्थः। अथ च-असौ (वार्द्) वारि धीयतेऽस्मिन्वार्धिः वारिस्थानं तडाग एव वृद्धोतिप्रवयाः। किंभूतः—तरङ्गैः कृत्वा वलिभं वलियुक्तं। तरङ्गा एव वार्धकसंकुचत्स्थूलशरीरावयवविशेषस्थाने जाता यस्येत्यर्थः। तादृशतरङ्गरूपाभिर्वलिभिर्भातीति वा। हंसालीपलितेन हंसपङ्क्तिरूपेण जराशौक्ल्येन पाण्डुरं धवलं प्रवाहरूपं वपुर्बिभ्रत्। तथा—यष्ट्या मध्यनिक्षिप्तकीर्तिस्तम्भरूपया कलितो ज्ञातपरिमाणः। अलंकृत इत्यर्थः। अथ च—स्वलच्छरीरधारणार्थं दण्डेन युक्तः। धृतशरीर इत्यर्थः। तथा—तावतामतिबहूनां नानाजातीयानां वयसां पक्षिणां बंहिमा बाहुल्यं यत्र। अथच—तावतः शतसमीपवर्तिनो वयसो वार्धकस्य बंहिमा यस्य। तथा—विकचयातिप्रकाशमानया चन्द्रिकया योग्यं समुचितं स्फुरत्प्रकाशमानं संगतं मैत्रं यस्य। ज्योत्स्नावन्निर्मलम्। अथच—समुद्रत्वादेतज्जलं ज्योत्स्नामध्यामुचितं कं जलं बिभ्रत्। अथच—विगतकेशया चन्द्रिकया खालित्येन 'चांदी' इति कान्यकुब्जभाषायाम्। तया उचितं स्फुरन्मैत्रं कं शिरो बिभ्रत्। यद्वा—केशरहितेन खालित्येनोपलक्षितम्। तथा—वार्धकोचितं प्रकटं सम्यग्गतं कम्पनं यस्य शिरसः तत्। तथा—स्नानविधायिभिर्धार्मिकैः शिरोनत्यापि यत् नित्यमादृतः तत् स्थाने उचितम्। धार्मिकैश्च स्नानादौ तीर्थं नमस्क्रियते। वृद्धोऽपि समुद्रस्य पर्वण्येव स्पर्शयोग्यत्वादेतस्य सर्वदेत्याधिक्यं समुद्रात्। वलिभमिति मत्वर्थे 'तुन्दिवलि–' इति भः। द्वितीयव्याख्याने पचाद्यच्। बहुलस्य भावः, पृथ्वादित्वादिमनिचि 'प्रियस्थिर–' इति बंहिरादेशः धार्मिकः, 'धर्मं चरति' इति ठक् ॥

तस्मिन्नेतेन यूना सह विहर पयःकेलिवेलासु बाले
नालेनास्तु त्वदक्षिप्रतिफलनभिदा तत्र नीलोत्पलानाम्
तत्पाथोदेवतानां विशतु तव तनुच्छायमेवाधिकारे
तत्फुल्लाम्भोजराज्ये भवतु च भवदीयाननस्याभिषेकः॥

तस्मिन्निति ॥ हे बाले, तस्मिन् तडागे त्वं एतेन यूना सह विहर क्रीड। तथा—तत्र तडागे पयःकेलिवेलासु जलक्रीडावसरेषु ग्रीष्मर्तौ वा तत्रैव नालस्य दृश्यत्वात्। प्रतिग्रीष्माभिप्रायं बहुवचनम्। नीलोत्पलानां तव अक्षिप्रतिफलनान्नेत्रप्रतिबिम्बात्सकाशाद्भिदा भेदः नालेन कमलदण्डेनास्तु। अतिसादृश्यात् इदं स्वन्नेत्रं वा नीलोत्पलम्, इदं वा इति संदेहे 'सनालं यत्तन्नीलोत्पलम्, अनालं च स्वन्नेत्रमिति नालमेव निर्णायकं भवतीत्यर्थः। तथा–तस्य पाथो जलं तस्य देवतानामधिकारे व्यापारे आधिपत्ये वा तव तनुच्छायं तव शरीरप्रतिबिम्बमेव विशतु। तज्जलदेवतास्थाने त्वच्छरीरप्रतिबिम्बमेव भवत्वित्यर्थः। तथा—तस्य फुल्लानां विकसितानामम्भोजानां राज्ये खण्डे। अथ च—आधिपत्ये। भवदीयाननस्य त्वदीयमुखकमलस्य च जलक्रीडावशादभिषेकः। अथ च—पट्टाभिषेकः भवतु। नीलोत्पलजलदेवताफुल्लकमलापेक्षया भैमीनेत्रशरीराननमधिकमिति सूचितम्। तनुच्छायम्, 'विभाषा सेना–' इति षण्ढत्वम् ॥

एतत्कीर्तिविवर्तधौतनिखिलत्रैलोक्यनिर्वासितै-
र्विश्रान्तिः कलिता कथासु जगतां श्यामैः समग्रैरपि

---

१ 'रूपकालंकारः' इति जीवातुः।

जज्ञे कीर्तिमयादहो भयभरैरस्मादकीर्तिः पुनः
सा यन्नास्य कथापथेऽपि मलिनच्छाया बबन्ध स्थितिम्

एतदिति ॥ जगतां स्थावरजङ्गमात्मकानां भुवनानां संबन्धिभिः समग्रैरपि श्यामैः कृष्णैः कज्जलादिपदार्थैर्गुणैर्वा कथासु वार्तासु एव विश्रान्तिः कलिता आश्रयोऽङ्गीकृतः । किंभूतैः — श्यामैः—एतस्य कीर्तेर्यशसः विवर्तेन परिणामेन विशेषेण वर्तनं विवर्तः स्थितिर्वा तेन धौताद्धवलीकृतान्निखिलात् त्रैलोक्यात्कंदरादिसहितात् निर्वासितैर्निष्कासितैः कीर्त्या लोकत्रयस्य श्वेतीकरणात्तत्तच्छ्यामगुणानां सांप्रतमदर्शनात् 'पूर्वं श्यामानि वस्तून्यभूवन्' इति वार्तामात्रशेषाणि श्यामानि जातानि सर्वथा न सन्तीत्यर्थः । तथा—कीर्तिमयात्कीर्तिप्रचुरादस्माद्राज्ञः अकीर्तेः पुनः भयभरैर्भीतिबाहुल्यैर्जज्ञे जातम् । अहो आश्चर्यम् । कीर्तेरकीर्तेश्च विरोधात्कीर्तिरूपादस्मादकीर्तेर्भयं युक्तमित्यर्थः । एतत्कुतः—यद्यस्मात् मलिनच्छायाऽतिकृष्णा सा अपकीर्तिः अस्य कथापथेऽपि स्थितिमाश्रयं न बबन्ध नाकरोत् । एतत्कथाप्रारम्भेऽकीर्तिलेशस्याप्यभावात्कीर्तिरेव वर्ण्यत इत्यर्थः । यश्च यस्माद्बिभेति स तदीयकथाप्रारम्भ एव मलिनो भूत्वान्यत्रैव गच्छति । अविद्यमानमपि शशविषाणादि वचनादिगोचरो भवति, अकीर्तिस्तु वचनगोचरोऽपि नाभूदित्याश्चर्यम् । अचेतनाया अप्यकीर्तेर्भयोत्पादनादपि चित्रम् । 'जरताम्' इति पाठे वृद्धानां कथास्विति व्याख्येयम् । जज्ञे, भावे लकारः ॥

अथावदद्भीमसुतेङ्गितात्सखी
जनैरकीर्तिर्यदि वास्य नेष्यते ।
मयापि सा तत्खलु नेष्यते परं
सभाश्रवःपूरतमालवल्लिताम् ॥ १०५ ॥

अथेति ॥ अथ सखी भीमसुताया इङ्गितादननुरागसूचकात् भ्रूवेल्लनादिचेष्टितात्सरस्वतीमित्यवदत् । इति किम् —हे वाणि, जनैः अस्याकीर्तिर्यदि नेष्यते वा नाभिलष्यत एव तत्तर्हि मयापि सा अस्य अकीर्तिः खलु निश्चितं नेष्यते नाभिलष्यते । यद्यपि तुल्यं तथापि परं कश्चिद्विशेषोऽस्ति सभायाः सभालोकस्य श्रवःपूरतमालवल्लितां कर्णाभरणतमालवल्लित्वं नेष्यते प्रापयिष्यते । जनानामसंमतां शशविषाणादिवदसतीमप्यस्याकीर्तिमेव सर्वां सभां श्रावयिष्यामीत्यर्थः । वाण्यास्तद्वर्णननिवारणं चकारेति भावः । अकीर्तेर्नीलत्वात्तमालवल्लित्वम् । इष्यते, इषेः कर्मणि । नेष्यते णीञः प्रधानकर्मणि लृट् ॥

अकीर्तिमेव वर्णयति—

अस्य क्षोणिपतेः परार्धपरया लक्षीकृताः संख्यया
प्रज्ञाचक्षुरवेक्ष्यमाणतिमिरप्रख्याः किलाकीर्तयः ।
गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरा-
न्मूकानां प्रकरेण कूर्मरमणीदुग्धोदधे रोधसि ॥१०६॥

अस्येति ॥ हे वाणि, मूकानां प्रकरेणास्य क्षोणिपतेरकीर्तयः किल प्रसिद्धं निश्चितं वा कूर्मरमणी कच्छपिका तस्या दुग्धादुत्पन्नस्योदधे रोधसि तीरे गीयन्ते । किंभूताः-परार्धाद्गणितावधेः सकाशात्परयाधिकया संख्यया लक्षीकृता गणिता परार्धादप्यधिकाः तथा—प्रज्ञाचक्षुर्भिः जात्यन्धैरवेक्ष्यमाणं दृश्यमानं तिमिरं तत्प्रख्यास्तत्तुल्या अतिश्यामाः । किंभूतेन प्रकरेण-अष्टमं स्वरं निषादादिसप्तस्वरातिरिक्तं कलयताङ्गीकुर्वता । तथा—वन्ध्योदराज्जातेन । एवमस्याकीर्तयः सन्तीत्येतदकीर्तीः सभा श्राविता । परार्धाधिका संख्या, अन्धस्य दर्शनशक्तिः, तिमिरस्य चाक्षुषरूपत्वं, स्वरस्याष्टमत्वं, वन्ध्योदराज्जन्म, कच्छपिकादुग्धं, एतानि सर्वथा यथा न सन्ति । तथैतद्विशेषणयुक्ता अस्याकीर्तयोऽपि न सन्तीति विपर्यवसानवृत्त्या वर्णनैव कृता । उपहासार्थं त्वसंगतोक्तिः । आ सामस्त्येन कीर्तय आकीर्तयः पूर्वोक्तविशेषणविशिष्टा अस्य समस्ताः कीर्तयो गीयन्ते किल । पर्यवसानवृत्त्या अस्य कीर्तयो न सन्त्येवेति निन्दैव कृतेति वा । कच्छपी च दर्शनेनैवापत्यानि पालयति न दुग्धेनेति प्रसिद्धिः । प्रज्ञाचक्षुषो योगिनो ज्योतिर्विलोकननिष्ठास्तिमिरं न पश्यन्तीति वा । तिमिरवत्प्रख्यायन्ते । मूलविभुजादित्वात्कः ॥

तदक्षरैः सस्मितविस्मिताननां
निपीय तामीक्षणभङ्गिभिः सभाम् ।
इहास्य हास्यं किमभून्नवेति तं
विदर्भजा भूपमपि न्यभालयत् ॥ १०७ ॥

तदक्षरैरिति ॥ विदर्भजा इहास्यां सभायां एतदीयवचनविषये वा अस्य वर्णितस्य नृपस्य हास्यं किमभूत्किं वा नाभूदिति कारणात्सभावत्तमपि भूपं न्यभालयदौदासीन्येन संमुखदृष्ट्या ददर्श नत्वनुरागादित्यर्थः । किं कृत्वा । अनुरागाभावेऽपि हासरसकृताभिरीक्षणभङ्गिभिरवलोकनप्रकारविशेषैस्तां सभां निपीय सादरमवलोक्य । किंभूतां सभाम् -विध्युपक्रमैर्निषेधे पर्यवसितैः पूर्वोक्तैरक्षरैः कृत्वा सस्मितानि सविस्मितानि साश्चर्याणि वा आननानि यस्यास्ताम् । इह नृपे आस्यहास्यं जातं न वेति वा । स्मितसहितानां विगतस्मितत्वं विरुद्धम् । विरोधाभासः ॥

नलान्यवीक्षां विदधे दमस्वसुः
कनीनिकागः खलु नीलिमालयः ।
चकार सेवां शुचिरक्ततोचितां
मिलन्नपाङ्गः सविधे तु नैषधे ॥ १०८ ॥

नलेति ॥ पतिव्रताया भैम्या नलान्यावलोकनमनुचितमित्याशङ्कां परिहरन्नुत्तरसर्गे वर्णयिष्यमाणस्य नलस्य प्रस्तावनां करोति—दमस्वसुः कनीनिका नेत्रतारा नलादन्यस्य नृपस्य वीक्षामवलोकनरूपं आगः अपराधं विदधे चक्रे । किंभूता—खलु यस्मात् नीलिम्नः कालिम्न आलयः स्थानम् । मलिनो हि निषिद्धमाचरति । अपाङ्गस्तु कटाक्षः पुनः सविधे द्वितीयपङ्क्तौ त्रिचतुरेभ्योऽनन्तरमुपविष्टे नैषधे सत्यनले मिलन्संबद्धः सन् शुचिरक्ततोचितां धवलरक्तत्वयोग्यां सेवां चकार । धवलरक्तत्वलक्षणसामुद्रकलक्षणयुक्तोऽपाङ्गस्तु नल एव संलग्नोऽभूदित्यर्थः । अथ च—शुचेः पापभीरोरनुक्तस्य च भावेन स्वामिभक्त्योचितामिति वा । स्वामिभक्तो हि स्वामिनमेव सेवते नत्वन्यमित्यर्थः । कटाक्षेणान्याव-

१ 'इह निन्दया स्तुतिप्रतीतेर्व्याजस्तुतिभेदोऽलंकारः' इति जीवातुः ।

लोकने दोषः ऋजुदृष्टया स्वन्यविलोकने दोषो नेति न पातिव्रत्यक्षतिः क्वापि । नलमेव कटाक्षैर्विलोकयति स्मेति भावः । इन्द्रादिषु चतुर्ष्वलीकनलेषु सत्स्वपि सत्यनलत्वेऽज्ञातेऽपि तत्रैव सत्यनल एवानुरागबाहुल्याददृष्टवशात्कटाक्षनिरीक्षणं युक्तम् ॥

इदानीं श्लोकचतुष्टयेन परस्परानुरागं वर्णयति—

दृशा नलस्य श्रुतिचुम्बिनेषुणा
करेऽपि चक्रच्छलनम्रकार्मुकः ।
स्मरः पराङ्गैरनुकल्प्य धन्वितां
जनीमनङ्गः स्वयमार्दयत्ततः ॥ १०९ ॥

दृशेति ॥ ततो भैमीकटाक्षविलोकनानन्तरं स्वयमनङ्गोऽङ्गरहितः । अत एव नलस्य दृशा नेत्रव्यापारेणैव श्रुतिचुम्बिनापाङ्गसंचारिणा कटाक्षरूपेण कर्णपूर्णेनेषुणा कृत्वा स्मरः परस्य नलस्यैव दृगादिभिरङ्गैरवयवैः धन्वितां धनुर्धरत्वमनुकल्प्य जनीं भैमीमार्दयदपीडयत् । किंभूतः स्मरः—करे नलस्यैव हस्ते रेखामयराज्यलक्षणरूपचक्रच्छलेन नम्रं चक्राकारं कार्मुकं यस्य सः । नलेक्षिता सती कामातुरा जातेति भावः । मुख्याङ्गाभावे चानुकल्पोऽप्यङ्गीक्रियते । आर्दयत्, 'अर्द हिंसायाम्' ण्यन्तालङ् । 'आर्दिदत्' इति पाठे लुङ् ॥

उत्कण्टका विलसदुज्वलपत्ररा़जि-
रामोदभागनपरागतराऽतिगौरी ।
रुद्रक्रुधस्तदरिकामधिया नले सा
वासार्थितामधृत काञ्चनकेतकी वा ११०

उत्कण्टकेति ॥ सा भैमी रुद्रक्रुधः रुद्रकृतशापपरित्यागसमुद्भवात्कोपाद्धेतोः तस्य रुद्रस्यारिः कामः तस्य बुद्ध्या अयं काम एवेति बुद्ध्या नले विषये वासस्य स्वयंवरेण स्थितेरर्थितामभिलाषुकत्वमधृत दधार । नले साभिलाषा जातेति भावः । स्वशब्दमाश्रयणं च युक्तम् । केव—काञ्चनकेतकीव । किंभूता सा केतकी च—उत्कण्टका उद्गतरोमाञ्चा ऊर्ध्वीभूतसूचीतुल्यशूकाग्रा च । तथा—विलसन्ती शोभमाना नीलपीतादिभिर्वर्णैरुज्वला प्रकाशमाना, उज्ज्वलेन शृङ्गारेण वा प्रकाशमानो विलोककानां शृङ्गारो यया एवंभूता वा, कस्तूर्यादिरचिता कपोलवक्षोजादौ पत्ररा़जिः पत्रवल्ली पत्रपङ्क्तिर्यस्याः । शोभमानोज्ज्वलवर्णपङ्क्तिश्च यस्याः । तथा—आमोदं विलेपनजं सुरभिगन्धं हर्षं वा, स्वाभाविकं परिमलं च भजतीति भाक् । तथा—अपगतोऽनुरागो यस्याः एवंभूता न भवति अतितरामनपरागतरा । नयेऽतितरामनुरागिणी । न विद्यते परागः पुष्परजो यस्याम् । एवंविधा न भवति । नितरामनपरागा अनपरागतरा । अतितरां परागसहिता । तथा—अतितरां गौरी गौरवर्णा उभयथापि । गौरीं पार्वतीमतिक्रान्ता वा भैमी । सुवर्णकेतकी यथा रुद्रकोपस्य वसत्यभिलाषुकत्वं दधार तस्य स्थानं बभूवेत्यर्थः । तथा भैम्यपि नलविषये नलवैरिकाम-बुद्ध्या नलशत्रुः काम एव नलसंबन्धित्वेन मां पीडयतीति धिया रुद्रकोपस्यात्मनि यो वासस्तदर्थितां दधार रुद्रकोपस्य स्थानं जाता। नितरां सकोपा जातेत्यर्थः । कामसाम्यं नलस्योक्तम् । नलेन कटाक्षवीक्षणे कृते साऽतितरां कामपीडिता जातेति भाव इति वा । गौरीमतिक्रान्तेति तत्पुरुषे 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वप्राप्तेरतिगौरिरिति स्यात् । तथापि 'कृदिकारादक्तिनः' इति न्यायेन ह्रस्वान्तादपि पक्षे ङीपि अतिगौरीति संगच्छते ॥

तन्नालीकनले चलेतरमनाः साम्यान्मनागप्यभू-
दप्यग्रे चतुरः स्थितान्न चतुरा पातुं दृशा नैषधान् ।
आनन्दाम्बुनिधौ निमज्ज्य नितरां दूरं गता तत्तलालंकारीभवनाज्जनाय ददती पातालकन्याभ्रमम् १११

तदिति ॥ न अलीको नालीकः स चासौ नलश्च नालीकनलः सत्यनलः तस्मिन्नदृष्टवशघटितदुर्घटदर्शने सत्यनले चलेतरत् निश्चलं मनो यस्याः सा तत्रैवानुरक्ता सती सा भैमी अग्रे स्थितानपि चतुरश्चतुःसंख्याकानलीकान्नैषधान्नलान् साम्यात्सत्यनलसाम्येन दृशा नयनव्यापारेण पातुं कटाक्षैर्विलोकयितुं मनागल्पमपि चतुरा कुशला नाभूत् । किंभूता—आनन्दाम्बुनिधावानन्दरूपे समुद्रे निमज्ज्य बुडित्वा । नलावलोकनाक्षिश्चला भूत्वेति यावत् । नितरां दूरं गता हर्षस्य परमकाष्ठां प्राप्ता तलं गता च । तथा—तस्य आनन्दसमुद्रस्य तलं तस्यालंकारीभवनाज्जनाय पातालकन्याभ्रमं अतिसौन्दर्यादानन्दवशाच्च निर्निमेषतया समुद्रे निमज्ज्य तलगमनेन च किमियं नागकन्येति भ्रमं बुद्धिं ददती जनयन्ती । 'अलंकारीभवते' इति पाठे तस्य तलस्य भूतलस्योपवेशनेन अलंकारभूतायेन्द्रादिलोकाय नललक्षणाय जनाय वा । पातालतलस्यालंकारीभवते वासुक्यादिनागलोकाय वा । पुरःस्थितान्नलाकारानपीन्द्रादीनन्यराजवत् ऋजुदृष्ट्यैव विलोकयति स्म । अदृष्टवशाच्च व्यवहितमपि सत्यनलं कटाक्षैर्विलोकयति स्मेति भावः । 'तन्नल–' इति पाठे तेषामलीकनलानां स्वीयेन रूपेणालंकारभूताय जनाय । सत्यनलायेत्यर्थः ॥

सर्वस्वं चेतसस्तां नृपतिरपि दृशे प्रीतिदायं प्रदाय
प्राप्तदृष्टिमिष्टातिथिममरदुरापामपाङ्गोत्तरङ्गाम् ।
आनन्दान्ध्येन वन्ध्यानकृत तदपराकूतपातान्स रत्याः
पत्या पीयूषधारावलनविरचितेनाशुगेनाशु लीढः ११२

सर्वस्वमिति ॥ स नृपतिः नलोऽपि चेतसः सर्वस्वं प्राणवल्लभां तां भैमीं दृशे स्वनेत्राय प्रीतिदायं संतोषजनितं दानं प्रदाय प्रकर्षेण दत्त्वा कटाक्षेण तां सादरं दृष्ट्वा अमरदुरापामिन्द्रादिभिर्दुर्लभां लोकोत्तरस्वरूपाम् । अथ च—तेषां कटाक्षेणानवलोकनात्तैर्दुरापाम् । अपाङ्गे नेत्रप्रान्ते उत्तरङ्गां चलत्कल्लोलामतिचञ्चलां कटाक्षरूपां तद्दृष्टिं भैमीदृष्टिमेव इष्टातिथिं प्रियमभ्यागतं प्राप्तलेभे । भैम्या पूर्वं कटाक्षैर्विलोकितः, अनन्तरं तेन सावलोकिता, अनन्तरं पुनरपि तया विलोकित इत्यर्थः । अनन्तरं च रत्याः पत्या कामेन पीयूषधारारूपमतिनिर्वापकत्वादमृतरूपं यद्वलनं भैमीकृतं वलितग्रीवमवलोकनं तेन कृत्वा विरचितेनाशुगेन भैमीकटाक्षरूपेण बाणेन आशु शीघ्रं लीढो विद्धः स नलः तस्या भैमीदृष्टेरपरेऽन्ये तृतीयादयो ये आकूतपाता अनेकभावाभिव्यञ्जका व्यापारविशेषास्तान् आनन्दान्ध्येन हर्षाश्रुपरिपूर्णनेत्रतया यदान्ध्यमदर्शनं तेन वन्ध्यान्निष्फलानकृत । भैमीद्वितीयकटाक्षवीक्षणेनैव अतितृप्तः कामविवशः सन् तस्याः तृतीयादिकटाक्षनिरीक्षणानि न

१ 'सर्वतोऽक्तिन्नर्थात्' इति तृचितम् ।

ददर्शेति भावः । अन्योऽपि तुष्टः कस्मैचित्सर्वस्वं ददाति प्रियं चातिथिं प्राप्यानन्दबाष्पाम्बुपूर्णो भवति ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तस्य द्वादश एष मातृचरणाम्भोजालिमौलेर्महा-
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः १२

श्रीहर्षमिति ॥ माता वागीश्वरी जननी च तस्याश्चरणौ एवाम्भोजे तयोरलिरूपो भ्रमररूपो मौलिर्यस्य । यद्वा—मातृचरणसंबन्धिनी पूजार्थं चरणयोरुपढौकिता अम्भोजालिः कमलमाला तद्युक्तो मौलिर्यस्य । वागीश्वर्या जनन्या वा प्रसादरूपेण धृतनिर्माल्यकमलस्येत्यर्थः । द्वादशानां पूरणः सर्गः व्यगलत्समाप्तः ॥

इति श्रीबेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे द्वादशः सर्गः ॥

त्रयोदशः सर्गः ।

इदानीमिन्द्रादिपञ्चनलीसंज्ञं त्रयोदशं सर्गमारभते—

कल्पद्रुमान्परिमला इव भृङ्गमाला-
मात्माश्रयामखिलनन्दनशाखिवृन्दात् ।
तां राजकादपगमय्य विमानधुर्या
निन्युर्नलाकृतिधरानथ पञ्चवीरान् ॥ १ ॥

कल्पद्रुमेति ॥ अथ विमानधुर्याः शिबिकावाहिनः तां भैमीं राजकाद्राजसमूहादपगमय्य निवर्त्य नलाकृतिधरान्नलवेषधारिणः पञ्च वीरान्नलसहितानिन्द्रादीन्निन्युः प्रापयामासुः । शिबिकावाहिनां तेषु पञ्चसु नलोऽस्ति न वेत्यपरिज्ञानान्नलस्यापि नलरूपधारकत्वं घटते । यस्य यद्रूपं तद्धारित्वं तस्यापि युक्तमेवेति कव्यपेक्षयापि युज्यते । वीरपदेन शौर्यं नायकगुणः । के कस्मात्कां कानिव-परिमला मनोहरगन्धा अखिलाः समस्ता नन्दनशाखिनो देवोद्यानतरवः तेषां वृन्दादात्माश्रयां परिमलाश्रितां भृङ्गमालां भ्रमरपङ्क्तिं परावर्त्य अतिशयात्कल्पद्रुमानिव । कल्पद्रुमा नन्दनस्थितवृक्षापेक्षयाधिकाः, तथान्यराजापेक्षया तेऽपीत्यर्थः । सर्वाभिलाषपूरकत्वसाम्यान्मन्दारादिष्वपि चतुर्षु कल्पद्रुमशब्दप्रयोगः । भैम्यप्यात्माश्रया विमाने स्थितत्वात् । नयतिर्द्विकर्मा ॥

साक्षात्कृताखिलजगज्जनताचरित्रा
तत्राधिनाथमधिकृत्य दिवस्तथा सा ।
ऊचे यथा स च शचीपतिरभ्यधायि
प्राकाशि तस्य न च नैषधकायमाया ॥२॥

साक्षादिति ॥ सा देवी तत्र तेषु मध्ये प्राधान्यान्निवेशनक्रमाच्च दिवोऽधिनाथमिन्द्रमधिकृत्योद्दिश्य तथा तेन प्रकारेणोचे अचकथत् । यथा येन प्रकारेण स शचीपतिरिन्द्रश्चाभ्यधायि उक्तो भवति । तस्य नैषधकायस्य माया छद्म न च प्राकाशि प्रकटितं भवति । किंभूता—साक्षात्कृतं अखिलजगतां जनताचरित्रं जनसमूहवृत्तान्तो यया सा । यथा इन्द्रादीनां प्राकट्यं न, विष्णोराज्ञया वर्णनं च, मौनित्वे प्रतिभाक्षयो न, तथावोचदिति भावः । साक्षादिति विशेषणेन नलरूपं कृत्वागतानामिन्द्रादीनां ज्ञानौचित्यं सूच्यते ॥

ब्रूमः किमस्य वरवर्णिनि वीरसेनो-
द्भूतिं द्विषद्बलविजित्वरपौरुषस्य ।
सेनाचरीभवदिभाननदानवारि-
वासेन यस्य जनितासुरभीरणश्रीः ॥ ३ ॥

ब्रूम इति ॥ हे वरवर्णिनि उत्तमे भैमि, वयं अमुष्येन्द्रस्य वीरयुक्तायाः वीराणां वा सेनायाः सैन्यस्योद्भूतिमुत्कृष्टैश्वर्यं सामर्थ्यं बाहुल्यं वा किं ब्रूमो वर्णयामः । वर्णनाशक्यत्वाद्वागगोचर इत्यर्थः । किंभूतस्य—द्विषन् अमित्रो यो बलनामा दैत्यः तस्य विजित्वरं जयनशीलं पौरुषं पराक्रमो यस्य । यस्य रणश्रीः सेनाचरीभवन्तौ सैनिकौ भवन्तौ याविभाननदानवारी गणेशनारायणौ तयोर्वासेनाधिष्ठानेन कृत्वा जनिता कृता असुरभीर्दैत्यभयं यया । असुरेभ्यो देवानां या भीः तस्या ईरणं क्षेपणं तेन या श्रीः सा यस्य जनितेति वा । वागगोचरमस्य चरितमित्यर्थः ॥

नलपक्षे तु—अस्य वीरसेनाख्यनृपादुत्पत्तिं किं कथयामः । अपि तु न । अकथनेऽपि लोकत्रये प्रसिद्धत्वात्स्वगुणैरेवास्य ख्यातत्वाद्वा । यो हि स्वयं न प्रसिद्धः, तस्य पित्रादिप्रसिद्ध्या वर्णनं क्रियते । अयं तु न तथेति भावः । किंभूतस्य—द्विषतां बलस्य सैन्यस्य, आङ्गिकस्य सत्त्वस्य वा, जित्वरं पौरुषं पराक्रमो यस्य । यस्य रणश्रीः सेनाचरीभवन्तः सैनिका इभास्तेषामाननदानवारि मुखदानोदकं तस्य वासेन गन्धेन सुरभिर्जनिता । रलयोः सावर्ण्यात् सेनायामचलीभवतां पर्वतायमानानामिभानामिति वा । मत्तगजबाहुल्यमनेन सूच्यते । एवमिन्द्रनलयोरभेदबुद्धिर्यथा तस्या भवति, तथा देव्योक्तम् । रणशब्दो लक्षणया रणभूमौ वर्तते । इतः श्लोकादारभ्य 'अत्याजि-' (१३।२८) इति यावत्प्रथममिन्द्रादिवर्णनं पश्चान्नलवर्णनम् । 'अत्याजि-' इत्यादौ नलवर्णनं प्राथम्येन, दिक्पालवर्णनं पश्चादिति ज्ञेयम् । 'श्लोकादिह प्रथमतः-' (१३।३२) इति श्लोकेन नलस्य प्राधान्येन निर्देशात् । 'हरिणा' (१३।३२ श्लोके) इत्यादितृतीयया दिक्पालानामप्राधान्येन निर्देशात् । 'यौवनोष्मवती शीते शीतस्पर्शा च यातपे । भर्तृभक्ता च या नारी सोच्यते वरवर्णिनी' इति वृद्धाः । 'उत्तमा वरवर्णिनी' इत्यमरः । वरो वर्णो यस्या इत्यतिशायने 'धर्मशीलवर्णान्ताच्च' इतीनिः ॥

शुभ्रांशुहारगणहारिपयोधराङ्क-
चुम्बीन्द्रचापखचितद्युमणिप्रभाभिः ।
अन्वास्यते समिति चामरवाहिनीभि-
र्यात्रासु चैष बहुलाभरणार्चिताभिः ॥ ४ ॥

१ 'आत्माश्रयात्' इति लिखितपाठः ।

शुभ्रेति ॥ एष इन्द्रः समिति च यात्रासु विलासगतिषु च दण्डयात्रासु वा अमरवाहिनीभिः सुरसेनाभिरन्वास्यतेऽनुगम्यते । किंविधाभिः—शुभ्रांशुश्चन्द्रः, हरसंबन्धिनो हारा एकादश रुद्रास्तेषां गणः समूहः हरसंबन्धिनो वा ये गणा नन्दिप्रभृतयः, तान्सर्वानपि हरन्ति आत्मनासह नयन्ति । तत्सहिता इति यावत । एवंविधाः पयोधरा मेघाः । हरस्यापत्यं हारिः स्कन्दो, गणपतिः, मेघाश्चेति वा । तेषामङ्कचुम्बी स्वामित्वान्मध्यवर्ती (यः) इन्द्रः । शुभ्रांशुहारगणान्हरति आत्मना सह नयति एवंशीलः, पयोधराङ्कचुम्बी च एवंविधो वा य इन्द्रस्तस्य चापं तेन खचिता संबद्धा द्युमणिप्रभा सूर्यशोभा यासु ताभिः । शुभ्रांश्वादिभिः शक्रधनुर्व्याप्तेन सूर्येण च भान्ति ताभिर्वा । तथा—बहुः प्रचुरो लाभो धनादिप्राप्तिर्येषु तेषु रणेष्वर्चिताभिः पूजिताभिः । दैत्यजयाद्बहुला आभा दीप्तिर्यासां ताश्च ता रणार्चिताश्चेति वा । मेघानामपि कामरूपत्वात्सैनिकत्वं युज्यते । चन्द्रादिभिः विशिष्टेन्द्रचापेन च खे आकाशे चिता वृद्धिं प्रापिता सूर्यशोभा यास्विति वा । तैः कृत्वा वृद्धिं प्राप्ता वा चन्द्रादयस्तेजस्विनः तत्तेजःसंबन्धेन सूर्यतेजः प्रचुरं यत्र जातमित्यर्थः ॥

नलपक्षे—एष नलः सभायां दण्डयात्रासु च चामरधारिणीभिरन्वास्यते सेव्यते । किंभूताभिः । शुभ्राः सिताः अंशवो यस्य तेन हारगणेन मुक्ताहारसमूहेन कृत्वा हारी सुन्दरः पयोधराङ्कः स्तनमध्यः तच्चुम्बिनी तत्संबद्धा इन्द्रचापसंबद्धसूर्यप्रभेव प्रभा यासां ताभिः । चोप्यर्थः । यात्रास्वपीति योजना । हारमध्यमणीनामनेकवर्णत्वादिन्द्रचापसंबद्धसूर्यप्रभासाम्यम् । तथा—अतएव बहुलानि प्रचुराणि आभरणानि तैरर्चिताभिरलंकृताभिः । प्राधान्याद्धाराणां ग्रहणं, आभरणग्रहणं तद्व्यतिरिक्तालंकाराणां, अतो न पौनरुक्त्यम् । एतेन यथा सभायां निर्भय आस्ते तथा संग्रामयात्रास्वपीति व्यज्यते । 'शुभ्र उद्दीप्तशुक्लयोः', 'द्युमणिस्तरणिर्मित्रः', 'समिद्युधः' इत्यमरः । हरशब्दात् 'तस्येदम्' इत्यण् । हारि, तारुच्छील्ये णिनिः । अपत्ये वा 'अत इञ्' । यद्वा—शुभ्रांशुहारगणेन हारिणः पयोधराः स्तना मेघास्तेषामङ्कः पार्श्वप्रदेशस्तच्चुम्बी इन्द्रचापो नखपदविशेषः तेन संबद्धा दिव्यरत्नप्रभा यासां ताभिः । इन्द्रचापवदाकाशव्याप्ता दिव्यमणिप्रभा यासां ताभिरिति वा । चित्रमणिप्रभासंवलिताः शक्रधनुःसदृशा भवन्तीति बहुलैराभरणैर्भूषिताभिरित्यर्थः । 'खच दीप्तिसंवरणयोः' ॥

क्षोणीभृतामतुलकर्कशविग्रहाणा-
मुद्दामदर्पहरिकुञ्जरकोटिभाजाम् ।
पक्षच्छिदामयमुदग्रबलो विधाय
मग्नं विपज्जलनिधौ जगदुज्जहार ॥ ५ ॥

क्षोणीति ॥ अयं क्षोणीभृतां पर्वतानां पक्षच्छिदां विधाय कृत्वा विपज्जलनिधावापत्समुद्रे मग्नं जगदुज्जहार उच्चकर्षेत्यर्थः । पर्वतपक्षच्छेदनाद्विपद्रहितं कृतवानिति भावः । किंभूतानाम्—अतुला अत्युच्चाः कर्कशाश्च विग्रहा देहा येषाम् । तथा—उद्दामदर्पाणामत्युद्भटानां हरिकुञ्जराणां सिंहहस्तिनां कोटिं भजताम् । एकस्मिन्प्रदेशेऽनेकसिंहानां अन्यस्मिंश्चात्युद्भटानेककुञ्जराणामित्यर्थः । किंभूतोऽयम्—बलादित्यादुदग्र उदग्रबलः । यद्वा—उदग्रं पौरुषं यस्य सः ॥

नलपक्षे—अतुलानत्युच्चान्सलक्षणांश्च कर्कान्श्वेताश्वान् इयन्ति मारयन्ति एवंविधा विग्रहाः शरीराणि वैरं वा येषाम् । तथा—उद्दामदर्पा हरयोऽश्वा गजाश्च तेषां कोटिं भजताम् । वैरिनृपाणां पक्षच्छिदां सहायच्छेदं कुक्षिच्छेदं वा कृत्वा उदग्रं बलं पौरुषं सैन्यं वा यस्य अयं नलो वैरिकृतापत्समुद्रे मग्नं जगदुज्जहार वैरिणो हत्वा विपद्रहितमकरोदित्यर्थः ॥

भूमीभृतः समिति जिष्णुमपव्ययायं
जानीहि न त्वमघवन्तममुं कथंचित् ।
गुप्तं घटप्रतिभटस्तनि बाहुनेत्रं
नालोकसेऽतिशयमद्भुतमेतदीयम् ॥ ६ ॥

भूमीभृत इति ॥ हे घटस्य प्रतिभटौ स्पर्धिनौ स्तनौ यस्याः तत्संबुद्धिः भैमि, त्वं समिति संग्रामे भूमीभृतः पर्वतान् जिष्णुं जेतारम् । तथा—न विद्यते पवेर्वज्रस्यापायो नाशो यस्य तममुं अमघवन्तमनिन्द्रं न तु नैव जानीहि । अपि तु इन्द्र एवायम् । इन्द्रस्य सहस्रनेत्रत्वान्नायं तथेत्यत आह—त्वं एतदीयं शयं पाणिमतिक्रान्तं प्रसृतादपि दीर्घमत एवाद्भुतमाश्चर्यकारि कथंचिद्दुसं नलरूपधारणाच्छादितं बहुनेत्रस्य भावो बाहुनेत्रं न आलोकसे न पश्यसि । गुप्तत्वात, न त्वविद्यमानत्वादित्यर्थः । शयादतिक्रान्तम् । हस्ततलयोर्नेत्राणि न सन्तीत्यर्थः इति वा । बहुनेत्रसमूहं वा । बहुनेत्रसंबन्धिनमेतदीयमद्भुतमतिशयमुत्कर्षं वा आश्चर्यमिति वा ॥

नलपक्षे-त्वं अमुं अघवन्तं सपापं न जानीहि पुण्यश्लोकत्वात् । रणे राज्ञो जेतारम् । तथा—अपगतो विशिष्टोऽपायो यस्मात्तं अपगतो व्यपायः पलायनं यस्य । अपलायमानमित्यर्थः । एतदीयमतिशयमपरिमितहस्तपरिमाणमाश्चर्यरूपं प्रावरणवशाद्बाहौ हस्ते स्थितं नेत्रं चीनाशुकं गुप्तं यथा तथा द्रव्यान्तरविलोकनव्याजेन न आलोकसे । अपि तु आलोकयेत्यर्थः । बाहू च नेत्रे च बाहुनेत्रं शयमतिक्रान्तम् । बाहू हस्तपरिमाणाधिकपरिमाणौ, नेत्रे च प्रसृतादप्यधिके इत्यर्थः । तद्गुप्तं यथा तथा नालोकसे । अपि त्वालोकयेति वा । अतिशयं बाहुनेत्रम् । बाहू अतिशयितौ वदान्यौ शयौ ययोस्तावतिशयौ । नेत्रे च शयमतिक्रान्ते । अतिशयौ च अतिशये चेति नपुंसकैकशेषेण वा व्याख्येयम् । एतदीयं गुप्तमनेन पालितम् । बहवश्च ते नेतारश्च बहूनां वा नेतारस्तेषां समूहम् । अतिशयितः शयो हस्तो यस्य । लक्षणया वदान्यमुत्कृष्टमालोकय । शूरा वदान्या अप्यनेन पोषिता इत्यस्योत्कृष्टत्वं व्यज्यते । 'कुलिशं भिदुरं पविः' इत्यमरः । 'नेत्रं मधिगुणे वस्त्रे' इति । जिष्णु 'ग्लाजिस्थश्च ग्स्नुः' इति ताच्छील्ये ग्स्नुः । तद्योगे भूमीभृत इति, 'न लोका-' इति षष्ठीनिषेधाद्द्वितीया । बहुनेत्रशब्दाद्भावसमूहसंबन्धेष्वण् । पक्षे प्राण्यङ्गत्वादेकवद्भावः ॥

लेखा नितम्बिनि बलादिसमृद्धराज्य-
प्राज्योपभोगपिशुना दधते सरागम् ।

१ 'इति पद्यं क्वचित्पुस्तके दृष्टम् । तस्यायमर्थः । २ इतः परं 'पक्षमहितैः पर्वतैः पक्षीकरणात्' इति मुद्रितपुस्तकेऽधिकः पाठः ।

एतस्य पाणिचरणं तदनेन पत्या
सार्धं शचीव हरिणा मुदमुद्वहस्व ॥ ७ ॥

लेखा इति ॥ हे नितम्बिनि अतिपृथुनिबिडनितम्बे भैमि बलवृत्रनमुचिप्रभृतीनां समृद्धं संपूर्णं राजभावस्तस्य प्राज्यो बहुरूपभोगस्तस्य पिशुनास्तदसहमाना लेखा देवा एतस्येन्द्रस्य पाणी च चरणौ च पाणिचरणं सरागं सानुरागं यथा तथा दधते धारयन्ति । हस्तदानात्पाणिम् नमस्कारार्थं च चरणावित्यर्थः । तत्तस्मात् अनेन हरिणा इन्द्रेण पत्या सार्धं शचीव मुदमुद्वहस्व धारयस्व ॥

नलपक्षे—सरागमरुणं एतस्य पाणिचरणं कर्तृ सैन्यस्वाम्यमात्यादिभिः षड्विधेन वा बलेन समृद्धस्य राज्यस्य प्राज्य उपभोगस्तस्य सूचिकाः सामुद्रिकोक्तलक्षणभूताः चक्रध्वजादिलेखाः कर्मभूताः दधते धारयन्ति । 'दध धारणे' एकवचनान्तमस्मिन्पक्षे रूपम् । तस्मादनेन पत्या नलेन सह हर्षं धारयस्व । केन केव—हरिणा इन्द्रेण शची इव । 'लेखा अदितिनन्दनाः' पिशुनौ खलसूचकौ' इत्यमरः । नितम्बशब्दादतिशयार्थादिनिः । पाणिचरणम्, प्राण्यङ्गत्वादेकवद्भावे षण्ढत्वम् ॥

आकर्ण्य तुल्यमखिलां सुदती लगन्ती-
मास्वण्डलेऽपि च नलेऽपि च वाचमेताम् ।
रूपं समानमुभयत्र विगाहमाना
श्रोत्रान्न निर्णयमवापदमौ न नेत्रात् ॥८॥

आकर्ण्येति ॥ असौ सुदती भैमी एतां पूर्वोक्तामखिलां वाचमास्वण्डलेऽपि च नलेऽपि च तुल्यं लगन्तीं समानसंबन्धामाकर्ण्य उभयत्र इन्द्रे नले च समानं रूपमैक्यरूपं च विगाहमाना जानती विशेषावलोकनादपि विशेषमनुपलभमाना यथाक्रमं श्रोत्राच्छ्रवणेन्द्रियात् नेत्राच्चक्षुरिन्द्रियाच्च निर्णयं नावापन्न प्राप । अनयेन्द्रः स्तुतः किं वा नलः, तयोः सरूपत्वादयमिन्द्रो नलो वेति नाज्ञासीदित्यर्थः । अपि चेति निपातसमुदायौ परस्परसमुदायवाचकौ । अवापत् लृदित्त्वादङ् ॥

शक्रः किमेष निषधाधिपतिः स वेति
दोलायमानमनसं परिभाव्य भैमीम् ।
निर्दिश्य तत्र पवनस्य सखायमस्यां
भूयोऽसृजद्भगवती वचसः स्रजं सा ॥ ९ ॥

शक्र इति ॥ सा भगवती सरस्वती भूयः पुनरपि वचसः स्रजं वाङ्मालामसृजत् । किं कृत्वा—तत्र तेषु मध्येऽस्यां भैमीसमीपे पवनस्य सखायमग्निं निर्दिश्योद्दिश्य । पुनः किं कृत्वा—भैमीमिति दोलायमानं मनो यस्यास्तां परिभाव्य संचिन्त्य । इति किम्—एष किं शक्रः, स वृत्यरष्टः निषधाधिपतिः नलो वेति । दोला इवाचरति 'कर्तुः क्यङ् सलोपश्च' इति क्यङि शानचि दोलायमानमिति । अस्यां सामीपिक आधारः ॥

एष प्रतापनिधिरुद्गतिमान्सदाऽयं
किं नाम नार्जितमनेन धनंजयेन ।
हेम प्रभूतमधिगच्छ शुचेरमुष्मा-
दास्येव कस्यचन भास्वररूपसंपत् ॥ १० ॥

एष इति ॥ हे भैमि, एष प्रतापस्य निधिः प्रकृष्टोष्णस्पर्शस्थानम् । तथा—अयं सदा उद्गतिमानूर्ध्वगमनयुक्तः । ऊर्ध्वज्वलनोऽयमित्यर्थः । धनंजयेन वह्निनानेन किं नाम का संज्ञा नार्जितं न प्राप्ता । 'अग्निर्वैश्वानरो वह्निः—' इत्यादिकं नाम निर्वचनयोगात् प्राप्तमित्यर्थः । सर्वेषां नाम्नां निर्वचनमस्त्येव । नाम संभावनायाम् । अग्निनाऽनेन किं नाम वस्तु न प्राप्तम् । तैजसानां परमाणूनां सर्वत्राविरलत्वेन विद्यमानत्वादिति वा । अनेन धनंजयशब्देन कृत्वा सार्थकं नाम किं न अर्जितमिति वा । धनंजयत्वादेव शुचेरग्नित्वादमुष्मादग्नेः प्रभूतं हेम स्वर्णमधिगच्छ प्रामुहि 'धनमिच्छेद्धुताशनात्' इत्युक्तेः । 'अग्नेः प्रजातं परि यद्धिरण्यम्' इति श्रुतेरस्मात्सुवर्णमुत्पन्नम् । अस्येवाग्नेरिव कस्यचन कस्यापि भास्वरा देदीप्यमाना रूपसंपन्नास्ति । तेजोमात्रविवक्षया । तेजोव्यतिरिक्तस्य कस्यचन शुक्लं भास्वरं रूपं न दृष्टमित्यर्थः ॥

नलपक्षे—एष नलः क्षात्रतेजःस्थानम् । तथा—सदा उदयवान् । तथा अनेन जयेन कृत्वा किं नाम धनं नार्जितम् । वैरिणो विजित्य धनमर्जितम् । सदा अयः शुभावहो विधिर्यस्मादिति वा । शुचेः स्वधर्मोपार्जितद्रव्यादमुष्मात्प्रचुरं सुवर्णं प्रामुहि । शुचेः शृङ्गाररूपादिति वा । अस्य नलस्येव भास्वरा कायकान्तिसमृद्धिः कस्यापि अन्यस्य नास्ति । भा दीप्तिः, स्वरः कण्ठशब्दः, रूपं सौन्दर्यं तेषां संपद् अस्येव कस्यापि नास्तीति वा । तेजस्वी मधुरस्वरः सुन्दरश्रेण्युक्तम् । 'वीतिहोत्रो धनंजयः' 'शुचिरप्यत्तम्' इत्यमरः । धनंजयः 'संज्ञायां भृतृवृजि–' इति खच् । 'अरुर्द्विष–' इति मुम् । भास्वरः 'श्वेशभास–' इति वरच् ॥

अत्यर्थहेतिपटुताकवलीभवत्त-
त्पार्थिवाधिकरणप्रभवाऽस्य भूतिः ।
अप्यङ्गरागजननाय महेश्वरस्य
संजायते रुचिरकर्णि तपस्विनोऽपि ॥११॥

अत्यर्थेति ॥ हे रुचिरकर्णि शोभनश्रवणेन्द्रिये भैमि, अस्याग्नेः अत्यर्थातिशयिता हेतिपटुता ज्वालापाटवं तस्य कवलीभवन्ति ग्रासीभवन्ति तानि तानि पार्थिवानि पृथिवीकार्याणि तृणकाष्ठकरीषादीनि तान्येवाधिकरणं भस्मन एवाधारः ततः प्रभव उत्पत्तिर्यस्या एवंविधा भूतिर्भस्म तपस्विनोऽपि पाशुपतादिव्रतनिष्ठस्य महेश्वरस्य शिवस्याङ्गरागजननायोद्वलनेनाङ्गानां विशिष्टवर्णोत्पत्तये संजायते संपद्यते । एतत्संबन्धि भस्मापीश्वरस्य तपस्विनोऽप्युपकृत्य प्रभवति । अन्यस्य भवतीति किं वक्तव्यमिति स्तुतिः । रुचिरकर्णीति श्लेषोक्त्यानुरीक्षिषये सावधाना भव इति व्यज्यते । एतद्भरणे भस्मैव केवलम्, नान्यदिति विचार्य वृणीष्वेति व्यज्यते ॥

नलपक्षे—अङ्ग रुचिरकर्णि, अस्य नलस्य भूतिः संपत् महेश्वरस्य महाधनिकस्यापि त्यक्तसर्वस्वस्य मुनेरपि च अभिलाषसमुद्भूतये संपद्यते : समेरक संपद्भूयादिति धनिको मुमुक्षुश्चाप्यस्य भूतये स्पृहयतीत्यर्थः । धनिकस्य तपस्विनोऽपि ईर्ष्याजननाय संपद्यत इति वा । किंभूता संपत्–अतिशयेनास्त्रपटुतया

मोक्षोपसंहारादिमत्प्रयोगसामर्थ्येन प्रासीभवन्तस्ते ते च पृथ्वीश्वराश्च तेषामधिको रणस्तस्मादुत्पन्ना । स प्रभव उत्पादको यस्या इति वा । क्षत्रतेजसोपार्जितेत्यर्थः । 'रागोऽनुरक्ते मात्सर्ये' । हेतिर्ज्वाला आयुधं च । पार्थिवेति, 'ईश्वरः' इत्यधिकारे 'सर्वभूमि-' इत्यण् । पक्षे संबन्धेण् । रुचिरकर्णीति 'नासिकोदर-' इति ङीप् ॥

एतन्मुखा विबुधसंसदसावशेषा
माध्यस्थ्यमस्य यमतोऽपि महेन्द्रतोऽपि ।
एनं महस्विनमुपेहि सदारुणोच्चै-
र्येनामुना पितृमुखि ध्रियते करश्रीः ॥१२॥

एतदिति ॥ हे पितृमुखि, अशेषा सर्वा असौ विबुधसंसदेवसभा एष मुखं यस्याः सा । 'अग्निमुखा वै देवाः' इति श्रुतेः । अस्याग्नेर्यमतोऽपि महेन्द्रतोऽपि माध्यस्थ्यमासनापेक्षया दिगपेक्षया च मध्ये विद्यमानत्वमस्ति । त्वं महस्विनं तेजोयुक्तं महस्सु तेजस्सु विषये इनं स्वामिनं वा एनमुपेहि । येन सदारुणा काष्ठसहितेनामुना करश्रीः किरणशोभा उच्चैरूर्ध्वा रक्ता च ध्रियते । पितृमुखीति संबुद्ध्या धन्यत्वं व्यज्यते । 'धन्या पितृमुखी कन्या धन्यो मातृमुखः सुतः' इति सामुद्रिकोक्तेः ॥

नलपक्षे—असौ जगति प्रसिद्धा पुरो दृश्यमाना च निखिला विद्वत्सभा एतन्मुखा एतत्प्रधाना । यथा सर्वेष्वङ्गेषु मुखं प्रधानं तथा विद्वत्सभायामसौ । 'के विबुधाः' इति पृष्टे प्रथममसौ गण्यत इत्यर्थः । पुण्यश्लोकत्वादेष मुखे यस्यास्तादृशी इति वा । अस्य यमतः समवर्तिनोऽपि इन्द्रादप्यधिकं माध्यस्थ्यं पक्षपातरहितत्वम् । शत्रुमित्रयोस्तुल्यो दण्ड इत्यर्थः । तसेः सार्वविभक्तिकत्वात् । लोकपालांशत्वादिन्द्रयमयोरेतन्मध्यवर्तित्वमिति केचित् । तेजस्विनमेनं प्राप्नुहि । येनानेन सदा सर्वदा हस्तशोभा अतिशयेनारुणा रक्ता धार्यते । स्विनं शोभनं पतिमेनं मह पूजय । तथा—एनमुपेहि एतत्समीपं गच्छेति वा । महस्विनमुत्सववन्तं वा । विश्वप्रकाशे सकारान्तस्य महःशब्दस्य पाठात् । 'मुखं मुख्ये च वक्त्रे स्यात्' इत्यजयपालः । पिता मुखं यस्या इति समासः । मुखेनैव मुखस्य सादृश्यात्पितृमुखमिव मुखं यस्या इत्यत्र पर्यवस्यति ॥

नैवाल्पमेधसि पटो रुचिमत्त्वमस्य
मध्येसमिन्निवसतो रिपवस्तृणानि ।
उत्थानवानिह पराभवितुं तरस्वी
शक्यः पुनर्भवति केन विरोधिनायम् ॥१३

नैवेति ॥ एधसि काष्ठे पटोर्जाज्वल्यमानस्याग्नेः रुचिमत्त्वं दीप्तियुक्तत्वमल्पं नैव । किंतु बह्वित्यर्थः । जाज्वल्यमानस्यास्य इन्धने दीप्तिमत्त्वमल्पं नैव । तत्संबन्धादधिकं दीप्तिमानयं भवतीत्यर्थ इति वा । तथा-मध्येसमित् समिधां काष्ठानां मध्ये निवसतो विद्यमानस्यास्य तृणानि शत्रवः । रिपुनाशो यथा[1] वेगेन क्रियते, तथा समृद्धेनानेन क्षणमात्रेण तृणानि दह्यन्त इत्यर्थः । प्रादेशमात्राणां पलाशशम्यादिकाष्ठानां मध्ये इति वा । इह लोके समिन्मध्ये वोत्थानवानूर्ध्वज्वलनवान् तरस्वी वेगवानयं विरोधिना केनोदकेन पुनः पराभवितुं शक्यो भवति । तेनैव शान्तिर्नान्येनेत्यर्थः । जय्यो भवति । अपि तु न वेगेनोत्थितस्यास्य वारिणापि शान्तिः कर्तुमशक्येत्यर्थ इति वा ॥

नलपक्षे-पटोः ग्रहणधारणादिसमर्थस्यास्य अल्पमेधसि मन्दप्रज्ञे रुचिमत्त्वं प्रीतियुक्तत्वं नैव । अयोग्यत्वात्तस्येत्यर्थः । तथा-समिन्मध्ये सङ्ग्राममध्ये निवसतोऽस्य वैरिणस्तृणानि । अकिंचित्करा इत्यर्थः । इह रणे भूलोके वा तरस्वी उत्थानवान्वेगवान्बलवान्वा अयं केन पुना रिपुणा जेतुं शक्यः । अपि तु न केनापि । कस्याप्यजय्योऽयमित्यर्थः । उत्थानमुदयः । एतत्सदृक्षोप्युदयी बलवांश्च नास्तीत्यर्थः । भवतीति संबोधनं वा । 'तरो बले च वेगे च', 'इध्ममेधः समित्' इत्यमरः । अल्पमेधसि 'नित्यमसिच्' इत्यत्र नित्यग्रहणादन्यस्मादपि भवतीति वृत्तिकारोक्तेः प्रयोगानुसारेणासिच् । मध्येसमित्, 'पारेमध्ये षष्ठया वा' इत्यव्ययीभावे निपातनादेत्वम् । 'क्षयः' इति वैकल्पिकत्वादजभावः । पराभवितुं 'शकधृष-' इत्यक्रियार्थत्वेपि शक्तियोगे तुमुन् ॥

साधारणीं गिरमुपर्बुधनैषधाभ्यां-
मेतां निपीय न विशेषमवाप्नवत्या ।
ऊचे नलोऽयमिति तं प्रति चित्तमेकं
ब्रूते स्म चान्यदनलोयमितीदमीयम् ॥१४

साधारणीमिति ॥ उपर्बुधनैषधाभ्यामग्निनलाभ्यां साधारणीं समामेतां गिरं निपीयाकर्ण्य इदमीयमनयोः संबन्धिनं विशेषं तारतम्यं नावाप्नवत्या ज्ञातवत्या भैम्याः पुरोवर्तिनं तं प्रति एकं चित्तं मनः अयं नल इत्यूचे । अन्यदपरं चित्तं अयमनल इति ब्रूते स्म नलव्यतिरिक्तो वह्निरित्यकथयत् । युगपदालोचनस्मृतिप्रसङ्गान्मनसः प्रतिशरीरमेकत्वस्य साधितत्वादेकस्मिन्नपि मनसि क्रियाभेदादवस्थान्तरप्राप्तेर्भेद इवोपचर्यते । (यद्वा—) एकमेव तं पुरोवर्तिनं अनल इति प्रत्यूचे । अकारप्रश्लेषेणानलोऽयमितिब्रवीति स्म मनः । तथा—अयमन्यान्वैरिणो द्यति अवखण्डयतीत्यन्यदः स चासौ नलश्च अन्यदनल इति ब्रूते स्म । अत्र व्याख्याने प्रथमभङ्गोऽपि न भवति । एकस्य द्वैरूप्याद्विरोधाभासश्च । 'शोचिष्केश उपर्बुधः' इत्यमरः । उपसि बुध्यते इति उपर्बुधः । 'इगुपध-' इति कः । 'अहरादीनाम्-' इति रेफः । 'तुल्यार्थैः-' इति तृतीया । 'अन्यद-' इति पक्षे कः । समानं धारणमस्य साधारणम् । अनेकं प्रत्यविशिष्टबन्धम् । पृषोदरादिः । ततः स्त्रियां 'पादार्घाभ्यां च' इत्यत्र 'आग्नीध्रसाधारणादश्च' इति वक्तव्यादञि ङीप् । वाप्रकरणाच्च साधारणभूमिरित्याद्यपि घटते । इदमीयम्, त्यदादित्वात् 'वृद्धाच्छः' ॥

एतादृशीमथ विलोक्य सरस्वती तां
संदेहचित्रभयचित्रितचित्तवृत्तिम् ।
देवस्य मृनुमरविन्दविकासिरश्मे-
रुद्दिश्य दिक्पतिमुदीरयितुं प्रचक्रे ॥ १५ ॥

१ 'महस्सु इनम्' इति पक्षे सकारद्वयश्रवणार्थं पक्षान्तरेऽपि द्वित्वं कर्तव्यम् । यद्वा—'न व्यञ्जनपरस्यानेकस्यैकस्य वा हलः श्रवणं प्रति विशेषोऽस्ति' इति 'दीङो युट्-' इति सूत्रे भाष्योक्त्या द्वित्वमन्तराऽपि न दोष इति बोध्यम् ।

एतादृशीमिति ॥ अथ सरस्वती अरविन्दविकासिनः कमल-विलासकरा रश्मयः किरणा यस्य देवस्य रवेर्दिक्पतिं दक्षिणदिशः पतिं सूनुं अन्येषां पुत्राणां दिक्पतित्वाभावाद्यममुद्दिश्य उदीरयितुं वक्तुं प्रचक्रे आरेभे । किं कृत्वा—एतादृशीमुक्तसंशयास्पदीभूताम् । तथा—नलनिश्चयाभावात्संदेहः, तुल्यरूपदर्शनाद्देव्युक्तिर्वा चिन्त्याद्वा चित्रम्, नलनिश्चयाभावान्नलप्राप्तिविघ्नाभासः तैः संशयाश्रयत्रासैः चित्रिता नानाविधा कृता चित्तवृत्तिर्यस्याः सा एवंविधां तां भैमीं विलोक्य । 'चित्तभित्तिम्' इति पाठे चित्तमेव भित्तिर्यस्याः । भित्तौ हि चित्रं युक्तमित्यर्थः । एवेव दृश्यत इति 'त्यदादिषु दृशः–' इति कञि 'आ सर्वनाम्नः' इत्यात्वे 'टिड्ढा–' इति ङीपि एतादृशी ॥

दण्डं बिभर्त्ययमहो जगतस्ततः स्या-
त्कम्पाकुलस्य सकलस्य न पङ्कपातः ।
स्वर्वैद्ययोरपि मदव्ययदायिनीभि-
रेतस्य रुग्भिरमरः किमु कश्चिदस्ति ॥१६॥

दण्डमिति ॥ अहो संबोधने, अयं यमो दण्डं स्वायुधं बिभर्ति । ततस्तस्माद्धेतोः पुराणादिदर्शनेन कम्पाकुलस्य पापभीरोः सकलस्य जगतो भुवनस्य पङ्कात्पापात्पातो मुद्गनं न स्याद्भवेत् । पङ्के महारौरवादौ नरके वा । एतद्भयात्पापं कोपि न करोतीत्यर्थः । अहो आश्चर्यम् । अन्यो यष्टिं धारयति अन्यस्य च कम्पमानस्य कर्दमपातो न भवतीत्यसंगतेः । तथा—चिकित्सासमर्थयोः स्वर्वैद्ययोर्दस्रयोरपि मदव्ययदायिनीभिः गर्वक्षयं कुर्वाणाभिः एतस्य रुग्भिः प्राणिकर्मविपाकदर्शनेनानेन प्रेरिताभिः पीडाभिः न म्रियत इत्यमरः कश्चित्किमस्ति । अपितु न कोप्यस्ति । कर्मजरोगाणां ताभ्यामप्यचिकित्स्यत्वादित्यर्थः । स्वर्वैद्ययोरिति नाम रुजापनयनसामर्थ्यसंभावनासूचनार्थम् ॥

नलपक्षे—अयं नलो दण्डं शासनं यतो बिभर्ति तस्मात्कम्पाकुलस्य सकलस्यापि लोकस्य एनःपातो न भवेत्पूर्ववदेतस्माद्भयात् । अयं दण्डं चतुरङ्गसैन्यं बिभर्ति ततः शत्रुभयात्कम्पाकुलस्य लोकस्य दुःखपातो न भवेत् । सैन्येनैव वैरिणां निहतत्वाल्लोकस्य दुःखनाश इति वा । सौन्दर्येण प्रसिद्धयोर्नासत्ययोरपि गर्वक्षयकारिणीभिरेतस्य रुग्भिः कायकान्तिभिरुपलक्षितो देवोऽपि कश्चिदस्ति किमु । अपितु नास्ति । देवेषु मध्ये दस्रावेव सुन्दरतमौ तावप्यनेन जितौ यतः । ये स्वेतरसमीपस्था रमणीयाः, त एतदुपधारणादेव, न तु स्वभावेनेत्यर्थः । 'पङ्कोऽस्त्री शादकर्दमौ', 'अस्त्री पङ्कं पुमान्पाप्मा', 'स्त्री रुमुजा', 'स्युः प्रभारुग्' इति चामरः । दायिनीभिरिति ताच्छील्ये णिनिः ॥

मित्रप्रियोपजननं प्रति हेतुरस्य
संज्ञा श्रुतासुहृदयं न जनस्य कस्य ।
छायेदृगस्य च न कुत्रचिदध्यगायि
तप्तं यमेन नियमेन तपोऽमुनैव ॥ १७ ॥

मित्रेति ॥ अस्य यमस्योपजननमुत्पत्तिं प्रति संज्ञानाम्नी मित्रप्रिया सूर्यपत्नी हेतुर्निमित्तं श्रुता आकर्णिता । छायानाम्नी तु कुत्रचित् कुत्रापि पुराणादौ ईदृगस्योत्पत्तिं प्रति हेतुः नाध्यगामि (यि) नाश्रावि । किंतु शनैश्चरस्यैवेत्यर्थः । 'यमो यमी श्राद्धदेवः संज्ञायाम्ननयास्त्रयः' इति पुराणम् । अयं यमः कस्य जनस्यासुहृत्प्राणहर्ता न । अपितु सर्वस्यापि प्राणहर्ता । अमुना यमेनैव नियमेन नक्तोपवासादिव्रतेन तपः तप्तं धर्मः कृतः । अत एवास्य पुत्रत्वं धर्मराजत्वं चेत्यर्थः ॥

नलपक्षे—अस्य नलस्य संज्ञा नाम श्रुता सती मित्रप्रियस्य सुहृदिष्टस्योपजननं प्रत्युत्पादनं प्रति हेतुः । अस्य संज्ञा सुहृदिष्टजननं प्रति हेतुः श्रुता ख्यातेति वा । पुण्यश्लोकत्वात् । अयं कस्य जनस्य सुहृन्मित्रं न । अपि तु सम्यक्परिपालनादुपकारित्वाद्वा सर्वस्यापि सुहृदेव । ईदृक्प्रत्यक्षदृश्या अस्य छाया कायकान्तिः कुत्रापि नरसुरोरगेषु नाध्यगामि (यि) न दृष्टा । सुन्दरतरोऽयमित्यर्थः । छाया रीतिः लोकपरिपालनमित्यर्थः इति वा । अस्येव जगत्पालनं कोपि न करोतीत्यर्थः । अमुना नलेनैव यमेन ब्रह्मचर्यादिना, नियमेन नक्तादिव्रतेन च तपः तप्तम् । स्वर्थमिति शेषः । 'छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः' । 'तपश्चान्द्रायणादौ स्याद्धर्मे' इति विश्वः । अध्यगामि (यी)ति इङो गाङादेशे कर्मणि चिण् । यमेनेति पक्षे हेतौ तृतीया ॥

किंच प्रभावनमिताखिलराजतेजा
देवः पिताम्बरमणी रमणीयमूर्तिः ।
उत्क्रान्तिदा कमनु न प्रतिभाति शक्तिः
कृष्णत्वमस्य च परेषुगदाभियोक्तुः ॥१८॥

किंचेति ॥ केवलं संज्ञास्य जननीत्येव न । किंच अन्यच्च प्रभया दीप्त्यावनमितं निरस्कृतमखिलं राजश्चन्द्रस्य तेजो येन सः, तथा रमणीयमूर्तिरम्बरमणिः सूर्यो देवः अस्य पिता । अस्य यमस्योत्क्रान्तिनामिका । अथ च मरणदा शक्तिरायुधविशेषः कमनुलक्षीकृत्य न प्रतिभाति समर्था न भवति । अपितु सर्वमनु समर्थैव । परेष्वन्येषु जनेषु गदान्रोगान्नियोक्तुः प्रेरयितुः अस्य कृष्णत्वं श्यामत्वं च । परपीडाजननेनापयश इत्यर्थः । अस्य कृष्णत्वं लोहवत्कठिनान्तःकरणत्वमित्यर्थ इति वा ॥

नलपक्षे—प्रभावेण पराक्रमेण नमितसकलभूपप्रतापः, अम्बरमणिः सूर्यः, इः कामः तद्वद्रमणीयमूर्तिः, देवो राजा वीरसेनोऽस्य पिता । देवो विजिगीषुरिति वा । अम्बरमणीभिर्वस्त्रैः कृत्वा रमणीयमूर्तिरिति वा । मणीशब्द ईबन्तोऽपि । अम्बेति संबोधनम् । रमणीनां स्त्रीणां रमणयोग्या मूर्तिर्यस्येति वा । अस्य शक्तिरायुधविशेषः कं वैरिणमनूत्क्रान्तिदा मरणप्रदा न प्रतिभाति । अस्य शक्तिः सामर्थ्यं कं यममनूत्क्रान्तिदा मरणप्रदा न प्रतिभाति । अपितु संभाव्यत एव । यमादन्येषां भयं, तस्माच्चयमाश्रयम् । शूरत्वातिशयो द्योत्यत इति वा । तथा शत्रुषु गदां शस्त्रविशेषं प्रयोक्तुरस्य कृष्णत्वं देवकीनन्दनत्वम् । गदायुद्धप्रावीण्याच्छ्रीकृष्णसमानत्वमित्यर्थः । परा उत्कृष्टा इषुसंबन्धिनो गदा रोगाः दुःसहबाणजनिताः पीडा इति यावत् । तानर्थाद्वैरिषु प्रयोक्तुरस्य कृष्णत्वमर्जुनत्वम् । बाणयुद्धप्रवीणार्जुनतुल्योऽयमित्यर्थ इति वा । 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः', 'को ब्र-

१ अध्यगामीति पठित्वाऽधिगन्तेति व्याख्यातं जीवातौ ।

ह्यात्मानिलार्केषु शमने सर्वनाम्नि च', 'शक्तिर्बले प्रभावादौ शक्तिः प्रहरणान्तरे' इत्यादि विश्वः ॥

एकः प्रभावमयमेति परेतराजौ
तज्जीवितेशधियमत्र निधत्स्व मुग्धे ।
भूतेषु यस्य खलु भूरियमस्य वश्य-
भावं समाश्रयति दस्रसहोदरस्य ॥ १९ ॥

एक इति ॥ अयं एकः परेताः प्रेतास्तेषां राजौ पङ्क्तौ विषये प्रभावं सामर्थ्यं एति तत्तस्मात् अत्रास्मिञ्जीवितेशधियमन्तकबुद्धिं कुरु । हे मुग्धे, उभयोर्भेदमजानाने संज्ञागर्भजातत्वाद्दस्रसहोदरस्याश्विभ्रातुः यस्य यमस्य भूतेषु भूरि प्रचुरं भूतं वश्यभावमधीनत्वं समाश्रयति प्राप्नोति । प्राणिषु मध्ये प्रचुरं भूतं यस्य यमस्य वशि वशवर्ति सत् अभावं विनाशमेवाश्रयतीति वा । मुमुक्षवः कतिपये, तदपेक्षया भूतानां प्राचुर्यम् । खलु निश्चये । सर्वप्राणिनाश एतदधीन इति निश्चयेनायमन्तक इति किं न जानासीत्यर्थः ॥

नलपक्षे—पराश्च इतरे आत्मीयाश्च तेषामाजिः । पराञ्श्रेष्ठांस्तेजस्विनोऽपि इतरयन्ति क्षोदीयसः कुर्वन्ति ये तेषामाजिरिति वा । परा उत्कृष्टा या इतरेषां वैरिणामाजिरिति वा । तस्यां अयं नल एक एव प्रभावमेति । तथा—भूतेषु पृथिव्यप्तेजोवाय्वाकाशेषु मध्ये इयमित्यभिनयेन सकला भूः सौन्दर्येण दस्रसहोदरस्याश्वितुल्यस्य यस्यास्य वश्यत्वमाश्रयति । तत्तस्मान्मुग्धे सुन्दरि, अस्मिन्प्राणेशबुद्धिं निधेहि । तथा—समा सश्रीका त्वं यस्य एतद्वरणं प्रयत्नं कुरु । एवंविधः शूरः प्रभुशक्तियुक्तः सुन्दरश्च कोपि नास्तीत्येनमेव वृणीष्वेति भावः । इतरशब्दात्पक्षे 'तत्करोति-' इति णिचि पचाद्यचि णिलोपः ॥

गुम्फो गिरां शमननैपधयोः समानः
शङ्कामनेकनलदर्शनजातशङ्के ।
चित्ते विदर्भवसुधाधिपतेः सुताया
यन्निर्ममे खलु तदेष पिपेष पिष्टम् ॥२०॥

गुम्फ इति ॥ शमननैषधयोर्यमनलयोर्विषये समानस्तुल्यः पूर्वोक्तो गिरां गुम्फो देव्या वाणीसंदर्भः विदर्भवसुधाधिपतेः सुतायाः भैम्याश्चित्ते यच्छङ्कां संशयं निर्ममे तत्खलु निश्चितं एष पिष्टं पिपेष । चूर्णमेव चूर्णितवानिति दृष्टान्त इत्यर्थः । चूर्णचूर्णनं यथा वृथा तथेदमपीत्यर्थः । किंभूते—चित्ते—अनेकेषां नलानां दर्शने-न जातशङ्के उन्मूलसंशये । 'गुम्फः स्याद्गुम्फने' इति विश्वः ॥

तत्रापि तत्रभवती भृशसंशयालो-
रालोक्य सा विधिनिषेधनिवृत्तिमस्याः ।
पाथःपतिं प्रति धृताभिमुखाङ्गुलीक-
पाणिः क्रमोचितमुपाक्रमताभिधातुम् ॥ २१

तत्रेति ॥ तत्रभवती पूज्या सा भगवती सरस्वती क्रमोचितं क्रमप्राप्तं, परिपाटीयोग्यं यथा तथा वा, अभिधातुं वक्तुमुपाक्रमत । किं कृत्वा—तत्र यमेऽपि भृशमत्यर्थं संशयालोः संदिहानायाः अस्या भैम्या विधिनिषेधाभ्यां सकाशान्निवृत्तिं प्रवृत्तिनिवृत्त्योरभावमालोक्य । किंभूता—पाथसां पयसां पतिं प्रभुं वरुणं प्रति धृतोऽवस्थापितोऽभिमुखाङ्गुलीकः संमुखकरशाखः पाणिर्यया । तत्रभवच्छब्दः पूज्यार्थः । अङ्गुलीक इति 'नगृतश्च' इति कप् । उपाक्रमत, 'प्रोपाभ्याम्-' इति तङ् । अभिधातुं क्रमियोगे 'शकधृष-' इति तुमुन् ॥

या सर्वतोमुखतया व्यवतिष्ठमाना
यादोरणैर्जयति नैकविदारकाया ।
एतस्य भूरितरवारिनिधिश्चमूः सा
यस्याः प्रतीतिविषयः परतो न रोधः ॥२२॥

येति ॥ एतस्य वरुणस्य भूरितरा वारिनिधयः समुद्रा यस्यां सा चमूर्जयति सर्वोत्कर्षेण वर्तते । सा का—यस्याः परतो रोधः परं तीरं प्रतीतिविषयो दृग्गोचरो न । सेनायां समुद्राणामपि मिलितत्वात्परं पारं न दृश्यत इत्यर्थः । सा का—या सर्वतोमुखस्य जलस्य भावेन व्यवतिष्ठमाना व्यवस्थिता । जलमयीत्यर्थः । या यादोरणैर्जलजन्तुशब्दैस्तत्सङ्ग्रामैर्वा उपलक्षिता । तथा—या नैकविदारका अनेककूपका । नैकान्विदारयति नैकविदारः कस्य उदकस्य आय आगमनं यस्यां सा । स्ववेगेन सर्वनाशकरमुदकं यस्यामस्तीत्यर्थ इति वा । या नैकविदारं कं यस्यामेवंभूता वा । यस्याः परतो वैरिणोऽन्यस्माद्वा रोध आवरणं न ज्ञानगोचरः । निम्नाभिमुखस्य पयसः कस्यापि निवारयितुमशक्यत्वादिति वा । यस्याः परतः परप्रदेशात्प्रति संमुखमितिर्गमनं तस्य विषयो गोचरो नरो मनुष्य अधोऽधस्तादेव । प्रवाहवेगेनाध एव गच्छतीति भाव इति वा ॥

नलपक्षे—एतस्य भूरीणां तरवारीणामेकधारयवनखड्गानां निधिः स्थानं सा चमूर्विजयते । या सर्वस्मादपि लोकात्सर्वसेनाभ्यो वा मुखतया श्रेष्ठतया व्यवतिष्ठते । मुखशब्दो लक्षणया श्रेष्ठवाचकः । सर्वतः सर्वदिक्षु मुखं यस्यास्तद्भावेन व्यवतिष्ठत इति वा । अनेकानेकदिग्व्यापित्वात्सेनायाः प्राचुर्यं सूच्यते । यादोरणैर्बाहुयुद्धैर्भुजास्फालनशब्दैर्वोपलक्षिता दोरणैर्जयतीति वा । या अदोरणैरमुष्य सङ्ग्रामैः सिंहनादैर्वा जयति । सेनाजयेनास्य व्यपदेशो न । किंतु स्वयमेवासौ युद्धं कुरुते । तेनोभयथा नलवर्णने तात्पर्यम् । तथा—नैके विदारका योद्धारो यस्यां सा दोरणैः कृत्वा नैकविदारकः कायो यस्याः सेति वा । यस्याः परस्माच्छत्रोः सकाशाद्रोध आवरणं न ज्ञानगोचरः । केनापि रोद्धुं न शक्यत इत्यर्थः, परस्मात्प्रतीतिविषयः संमुखमागच्छन्नरो मनुष्यः अधो हीन एवेति वा । 'पुष्करं सर्वतोमुखम्', 'कूपकास्तु विदारकाः', 'कायो देहः' । 'कूलं रोधश्च इत्यमरः । व्यवतिष्ठमानेति, 'समवप्रविभ्यः स्थः' इति तङ् । अत्र ग्रन्थभूयस्त्वभयाद्व्याकरणं न लिख्यते ॥

नासीरसीमनि घनध्वनिरस्य भूया-
न्कुम्भीरवान्समकरः सहदानवारिः ।

१ 'अत्र साशङ्कशङ्कोत्पादे पिष्टपेषणवाक्यार्थयोरेकत्रासंभवेन सादृश्याक्षेपादसंभवद्वस्तुसंबन्धो वाक्यार्थवृत्तिनिदर्शनालंकारः' इति जीवातुः ।

उत्पद्मकाननसखः सुखमातनोति
रत्नैरलंकरणभावमितैर्नदीनः ॥ २३ ॥

नासीरेति ॥ नदीनामिनः स्वामी समुद्रो नासीरसीमनि जलमयसेनामुखविभागे स्थितः सन् करणभावं साधकतमत्वमितैर्गतै रत्नैर्मुक्तादिभिः अलमतिशयेनास्य वरुणस्य सुखमातनोत्युत्पादयति । सुखजनने रत्नानि करणभूतानि । स्वामिनेऽस्मै रत्नानि दत्त्वा प्रीतिमुत्पादयतीत्यर्थः । करणे देहे भावं सत्त्वमितैः प्राप्तैः । स्वदेहोत्पन्नैरित्यर्थ इति वा । अलंकरणभूतत्वाद्वरुणदेहस्थितैरिति वा । एवंविधै रत्नैरुपलक्षितो वा । अलंकरणभावमलंकरणत्वं गतैरत एव तैः सुखमातनोतीति वा । किंभूतो नदीनः—घनध्वनिर्निबिडशब्दः । तथा—भूयान्प्रचुरतरः दीर्घपरिमाणत्वात्, सप्तसंख्यत्वाद्वा । तथा—कुम्भीरा नक्रास्तद्वान् । (तथा-)मकरा मत्स्यविशेषास्तद्युक्तः । तथा—सहस्रदानवारिः पुण्डरीकाक्षयुक्तः । (तथा-) उच्छब्द उद्गमार्थः । उद्गतानि विकसितानि पद्मानि येषु तानि काननानि तेषां सखा । तद्युक्त इत्यर्थः । उत्कृष्टा पद्मा लक्ष्मीर्येषामेवंविधैः काननैर्युक्त इति वा । उत्कृष्टा पद्मा लक्ष्मीः स्वकन्या यस्मिन्स चासौ वनसत्त्वश्चेति वा । श्रीविष्णोस्तत्र विद्यमानत्वाल्लक्ष्मीयुक्तत्वम् । नासीरसीमपदेन तीरं लक्ष्यते तत्र निबिडध्वनिरिति वा । जलस्य तीरे प्रतिघातात् ॥

नलपक्षे—भूयान्बहुतरः कुम्भी गजो नासीरमुखे सेनामुखविभागे सुखमनायासेन रवान्शब्दान्विस्तारयति । किंभूतः कुम्भी—घनवद्घनिर्यस्य । तथा—समः आनुपूर्व्या वृत्तः सलक्ष्मीको वा करः शुण्डादण्डो यस्य । तथा—दानवारिणा मदजलेन सहितः । तथा—उद्गतानि पद्मकानि कुम्भस्थले पद्मबिन्दुजालकानि यस्मिन्नेवंविधं यदाननं मुखं तद्युक्तः । तथा—अलंकारत्वं प्राप्तै रत्नैः दीनो न । किंतु संभृतः । 'सेनामुखं तु नासीरम्', 'नक्रस्तु कुम्भीरः', 'पद्मकं बिन्दुजालकम्' इत्यमरः ॥

सस्यन्दनैः प्रवहणैः प्रतिकूलपातं
का वाहिनी न तनुते पुनरस्य नाम ।
तस्या विलासवति कर्कशताश्रिता या
ब्रूमः कथं बहुतयासिकता वयं ताः ॥२४॥

सेति ॥ हे विलासवति भैमि, नाम शिरश्चालने । अस्य वरुणस्य का नाम वाहिनी नदी सस्यन्दनैः सवेगैर्नीरोदकसहितैर्वा प्रवहणैः प्रवाहैः कृत्वा कूलं तीरं प्रत्यनुपातं गमनं न तनुते । अपितु सर्वापि तनोति । वयं तस्यास्ताः सिकता वालुका बहुतया प्रचुरत्वेन कथं केन प्रकारेण ब्रूमः कथयामः । अतिबहुत्वेनेयत्तया वक्तुं न शक्यत इत्यर्थः । ताः काः—याः कर्कशतां काठिन्यं श्रिताः । कर्को जलजन्तुविशेषः तच्छतैराश्रिता इति वा ॥

नलपक्षे—अस्य नलस्य का नाम वाहिनी सेना सस्यन्दनैः सरथैः प्रकृष्टैर्वाहनैरश्वादिभिः कृत्वा प्रतिकूला वैरिणस्तान्प्रति पातं गमनं न करोति । अपितु चतुर्विधापि सेना करोत्येव । प्रतिकूलानां वैरिणां पातं हननमिति वा । का सेना अस्य नाम ख्यातिं प्रतिकूलान्शत्रून्पातयित्वा शत्रुमात्रं हत्वा न तनुते । सेनास्य ख्यातिं करोतीत्यर्थ इति वा । सवेगैः क्रीडारथैः कृत्वा वैरिणां प्रतिगमनं करोतीति वा । अनेन सेनाया निर्भयत्वं रणेऽपि क्रीडारथारोहणात् । कर्काः श्वेताश्वास्तेषां शतैराश्रितायास्तस्या बहुतया बाहुल्येन ताः भूयस्त्वेन प्रसिद्धा वालुका वयं किं ब्रूमः । ताभ्योऽपि सेना प्रचुरतरेत्यर्थः । तस्याः सकाशात्ता वालुका बहुतया किं ब्रूमः । वालुकाः कथमपि संख्यातुं शक्यन्ते, सा तु न कथंचिदित्यर्थ इति वा । असिः प्रहरणमेषां ते आसिकास्तेषां भाव आसिकता । याः श्वेताश्वशताधिरूढास्ता आसिकताः । असिप्रहरणाम्पुरुषानिति यावत् । ताम्बहुतया किं वर्णयामः । अतिबहुत्वेन वक्तुं न शक्यन्त इत्यर्थः । बहून् तयन्ते गच्छन्ति ता रक्षन्ति वा ये ते बहुतयाः ते च ते आसिकाश्च तेषां भावानिति वा । 'कर्णीरथः प्रवहणम्', 'सांयात्रिकः पोतवणिक्' इत्यमरः । 'पोतः प्रवहणं स्मृतम्' इति हलायुधः । प्रवहणैः, 'कृत्यचः' इति णत्वम् । प्रतिकूलपातम्, पक्षे द्रव्यवीप्सायां 'विशिपति-' इत्यादिना णमुल् । 'तृतीयाप्रभृतीनि-' इति पाक्षिकः समासः । असिः प्रहरणमेषाम्, 'प्रहरणम्' इति ठक् । असिभिर्जयन्तीत्यासिकाः, 'तेन दीव्यति-' इति वा ठक् ॥

शोणं पद्मप्रणयिनं गुणमस्य पश्य
किंचास्य सेवनपरैव सरस्वती सा ।
एनं भजस्व सुभगे भुवनाधिनाथं
किं वा भजन्ति तमिमं कमलाशया न २५

शोणमिति ॥ हे सुभगे सौभाग्यवति भैमि, त्वं एनं भुवनस्य जलस्याधिनाथमधिपतिं वरुणं भजस्व वृणीष्व । जलपतित्वमेवाह । त्वं गुणमप्रधानं सेवकं शोणं नाम नदम् अस्य पद्मप्रणयिनं चरणानुरागिणं पश्य । किंचेत्यधिकोक्तौ । शोणोऽस्य चरणप्रणयी इति किं वक्तव्यम् । सा प्रसिद्धा सरस्वती नदी अस्य सेवनपरैव चरणसंवाहनादिपरैव । पूर्वोक्तापरिशेषे वाशब्दः । के कमलस्य जलस्य आशया आधाराः समुद्रादिपल्वलान्ताः पद्माकरा वा तमिमं न भजन्ति सेवन्ते । अपि तु (सर्वेऽपि क्षीरोदादयः) । क्षीरोदादयः सर्वेऽप्य(पि य)स्यानुचराः, तस्य शोणाद्यनुचरत्वे का कथा । तस्मात्सलिलपतिरयमित्यर्थः । कमलाशया जलाभिलाषेण के वा लोका इमं न सेवन्ते स्तुवन्तीत्यर्थो वा । शोणादीनां तत्तदभिमानिन्यो देवता लक्ष्यन्ते, अतस्तेषां सेवकत्वं युज्यते ॥

नलपक्षे—त्वं जगत्पतिमेनं नलं पतित्वेन स्वीकुरु । स्वीकारयोग्यत्वमेव द्रढयति—त्वं शोणं रक्तं गुणमस्य पद्मप्रणयिनं पश्य । किंच अन्यच्च—सा सरस्वती वाग्देवता सकलशास्त्राध्ययनाध्यापनरूपा अस्य राज्ञो नलस्य सेवनपरैव चित्तमध्यस्थितैव । तमिमं कमलायाः संपद आशयाभिलाषेण के वा लोका न सेवन्ते । अपितु—धनप्राप्त्यभिलाषेण सर्वेपि सेवन्त इत्यर्थः । वा अप्यर्थे । कमलाशया लक्ष्मीनिधयो धनिका अपि लोकास्तमिमं न भजन्ति, अपि तु भजन्त्येवेति वा । अत्र प्रथमद्वितीयतृतीयविशेषणैः क्रमेण सौन्दर्यकलाकौशलौदार्याणि द्योत्यन्ते । 'शोणो हिरण्यवाहः स्यात्', 'शोणः कोकनदच्छविः', 'जीवनं भुवनं वनम्', 'विष्टपं भुवनं जगत्', 'सलिलं कमलं जलम्', 'कमला श्रीः' इत्यमरः । आशयाः 'अधिकरणे शेतेः' इत्यच् ॥

शङ्कालतातति मनेकनलावलम्बां
वाणी नवर्धयतु तावदभेदिकेयम् ।

भीमोद्भवां प्रति नले च जलेश्वरे च
तुल्यं तथापि यदवर्धयदत्र चित्रम् ॥२६॥

शङ्केति ॥ इयं पूर्वोक्ता वाणी भीमोद्भवां प्रति लक्षीकृत्य। भैम्या इति यावत्। अनेकनलावलम्ब्यां नानानैषधविषयां शङ्कालतातंतिं संशयवल्लीपरम्परां न वर्धयतु तावन्न पूरयतु तावत्। अपितु पूरयत्येव। नवा ऋद्धिर्यस्याः सा नवर्धिः। नवर्धिकरोतु नवर्धयतु। भैमीं प्रति संदेहपरम्परां नूतनसमृद्धिमतिबद्धां करोत्वित्यर्थ इति वा। तावच्छब्दोऽनुमतौ, अवधारणे वा। यतः—अभेदिका विशेषप्रतिपादनमकुर्वती। समानधर्मदर्शनाद्धि संशय उपचीयते, विशिष्टधर्मदर्शनात्तु व्यावर्तत इत्यर्थः। यद्यप्यत्र विषये चित्रं नास्ति। तथापि नले जलेश्वरे च तुल्यमेककालं यत् संशयवल्लीपरम्परामवर्धयत्पूरयति स्म। अत्र विषये चित्रमाश्चर्यम्। नहि विषयस्यैव संदिहानत्वमुपपद्यते। यतो लोके दूरस्थिते पुरुषे पुरुषत्वं स्थाणुत्वं वाऽनुपलभ्य, ऊर्ध्वत्वमात्रं स्थाणुसाधर्म्यमुपलभ्य तटस्थः स्थाणुर्वा पुरुषो वेति संदिग्धे। ननु पुरुष एवात्मानमूर्ध्वमवलोक्य अहं वा स्थाणुर्वेति। तस्मान्नलजलेश्वरविषयो भैम्याः संशयो युक्तः। विषयभूतयोरेव तु संशये महदाश्चर्यमिति भावः। विरोधपरिहारस्तु—तुल्यकालं यथाक्रमं नले शं सुखम्, जलेश्वरे कालतातंतिं कालिमातिशयं पूरयति स्म। तथाहि—यदि देवी एनं नल एवायमित्यकथयिष्यत्तदा मय्यनुरक्ता भैमी मामकभ्रमेणैनमेवावरीष्यत् तत्तु देव्या न कृतं वरुणश्लेषेण वर्णितत्वादिति नले सुखं जनितम्। यदि वाणी मां नल एवायमित्यकथयिष्यत्तदा नलबुद्ध्या भैमी मामेवावरीष्यत् तत्तु तया न कृतं मच्छ्लेषेणैव वर्णितत्वादिति विषादाद्वरुणे कालिमातिशयो जनितः। कालनातिरप्यनेकनलावलम्बिनी चतुर्णामप्यवरणात्। अथ च—मत्संदेहाद्वरुणं भजेत्, नलसंदेहान्मां भजेदिति क्रमेण नलवरुणयोः संशयपरम्परां पूरयति स्म। अनेकनलावलम्बां भैम्याः संशयवल्लीपरम्परां न वर्धयतु न छिनत्तु। 'वर्धक् पूर्तिच्छिदोः'। यतो—विशेषमप्रतिपादयन्ती। या हि छेदासमर्था छुरिकादिः साऽनेकतृणविशेषावलम्बनां लतातंतिं न छिनत्ति इति नाश्चर्यम्। तथापि भैमीं प्रति नले च जलेश्वरे च संशयवल्लीपरम्परामेककालमेव यदच्छिनत्तच्चित्रम्। या हि न छिनत्ति सा छिनत्तीति चित्रमिति भावः। मत्संदेहादेनं भैमी भजेदिति नलभ्रान्तिः। नलसंदेहान्मां भजेदिति वरुणभ्रान्तिः वरुणवाचिशब्दसद्भावाच्छ्लेषवक्रोक्त्यादिज्ञानचतुरा भैमी वरुणं न वरिष्यतीति निश्चयेन नलभ्रमनाशः नलेऽनुरक्ता भैमी मत्प्रतिपादकशब्दसद्भावान्मां न वरिष्यतीति निश्चयेन वरुणभ्रमनाश इति वा। विशेषमप्रतिपादयन्ती वाणी सरस्वती वा। देव्या नामग्राहमहं वर्णितः, अतो मां वरिष्यति न वेति वरुणस्य संदेहो गतः। इदानीमवशिष्टोऽहमेव मय्येवानुरक्तेति मां वरिष्यति न वेति नलसंदेहो गत इति भाव इति वा। इत्यादि व्याख्याविशेषो विचार्याङ्गीकरणीयः ॥

बालां विलोक्य विबुधैरपि मायिभिस्तै-
रच्छद्मितामियमलीकनलीकृतस्वैः।
आह स्म तां भगवती निषधाधिनाथं
निर्दिश्य राजपरिषत्परिवेषभाजम् ॥२७॥

बालामिति ॥ इयं भगवती सरस्वती निषधाधिराजमुद्दिश्य तां बालां भैमीमाह स्मोवाच। किं कृत्वा—तां भैमीं अलीकनलीकृतस्वैरसत्यनैषधीकृतात्मभिर्मायिभिश्छलपरैरपि तैर्विबुधैर्देवैरच्छद्मितामप्रतारितां विलोक्य। किंभूतं नलम्। राज्ञां परिषत्सभा तस्याः परि समीपे वेषं शृङ्गारं भजति (तम्)। 'परिशेष—' इति पाठे परिशेष उपान्तः। बालामपि, विबुधैरपीत्यपिरुभयत्र संबध्यते। बाला हि प्रतार्यते, इयं बालापि न प्रतारिता तेष्वेकस्याप्यवरणात्। ये च विबुधा ज्ञातारस्ते मायिनः खलाः। कथं मायिभिरपि बालापि न प्रतारितेत्याश्चर्यम्। राजपरिषदः परिवेषरूपणान्नलस्य चन्द्रत्वं ध्वनितम्। परिषत्, 'सदिरप्रतेः' इति पत्वम् ॥

अत्याजिलब्धविजयप्रसरस्त्वया किं
विज्ञायते रुचिपदं न महीमहेन्द्रः।
प्रत्यर्थिदानवशताहितचेष्टयासौ
जीमूतवाहनधियं न करोति कस्य ॥२८॥

अत्याजीति ॥ त्वया मह्या महेन्द्रो नलः किं न ज्ञायते, अपि तु विशेषेण इन्द्रादिभ्यो भेदेन सत्यत्वेन जानीहीत्यर्थः। किंभूतः। अतिशयेन आजौ सङ्ग्रामे, अतिशयिते वा आजौ लब्धः प्राप्तो विजयस्यारिपराभवनस्य प्रसरो बाहुल्यं येन। तथा—रुचेरनुरागस्य कान्तेर्वा पदं स्थानम्। तथा—असौ अर्थिनमर्थिनं प्रतीति प्रत्यर्थि या दानवशता दानपरता (तया), दानेष्वर्थिनं प्रत्येव वा वशतया जितेन्द्रियतया वा आहिता कृता या चेष्टा याचकानुकूलव्यापारः तेन परदारदर्शनादिनिवृत्तव्यापारेण च जीमूतवाहनस्य अर्थिहेतोः प्राणानपि तृणवद्ददतो राजविशेषस्य धियं बुद्धिं दानातिशयेनाधिपरतन्त्रतया च जितेन्द्रियतया च किमयं जीमूतवाहन इति धियं कस्य न करोति। दानशूरत्वादित्रयमस्य सूचितम्। प्रत्यर्थिनो वैरिणो घ्नन्ति प्रत्यर्थिदा अनाः प्राणा येषां ते अतिशूराः ते वशा अधीना यस्य तस्य भावस्तत्ता तया कृत्वा कृता या चेष्टा तया शत्रुवशीकरणव्यापारेणेन्द्रबुद्धिं कस्य न करोति। अपिनु सर्वस्यापि करोति इन्द्रो यथा शत्रून्वशीकरोति तथायमपीति वा ॥

इन्द्रपक्षे—अयं महेन्द्रः त्वया किं न विज्ञायते। अपितु—इन्द्रत्वेन निश्चेयः। किंभूतः—अतिशयित आजिः सङ्ग्रामो यस्य। तथा—लब्धो विजयेनार्जुनेन कृत्वा प्रसरो वंशविस्तारो येन ततः कर्मधारयः। 'प्रसवः' इति पाठे नलपक्षे—जयलाभः। इन्द्रपक्षे—लब्धो विजयोऽर्जुनो, विजयत इति बिजयो जयन्तो वा, प्रसवः पुत्रो येन। तथा—रुचिपदं तेजःस्थानम्। तथा—मही उत्सववान्। तथा—अयं प्रत्यर्थिनां दानवानां शतेष्वहिता प्रतिकूला चेष्टा, अहितस्य शत्रोर्वा चेष्टा शत्रुत्वकृतः तन्नाशकरो व्यापारस्तेन इन्द्रबुद्धिं कस्य न करोति। अथवा—अयं महेन्द्रस्त्वया किमित्यत्याजि केन हेतुना त्यक्तः। अयं न विज्ञायते विज्ञइवाचरति विज्ञायते एवंभूतो न भवति। अपितु विद्वानेवेत्यर्थः। तथा—रुचिपदं कान्तिस्थानं न, तथा—मही नेति नञ्द्वयवृत्त्या काक्वा व्याख्येयम्। एवंगुणविशिष्टस्य परित्यागे किंचिदपि कारणं न पश्याम इति भावः। महेन्द्रस्त्वया विज्ञाय किमित्यत्याजि उचितमेव कृतमित्यर्थः। किम् प्रश्ने संभावनायां वा। त्यागे कारणमाह—लब्धो विना पक्षिणा गरुडेनामृताहरणसमये जयस्य

प्रसरो विस्तारो यस्य । गरुडेन पराजित इत्यर्थः । तथा—अरुचिपदमननुरागस्थानम् । तथा—न मही उत्सवरहितः सदा दैत्यभयात् । अरुचिस्थानं महेन्द्रः त्वया किं न विज्ञायते अपि तु ज्ञात एव । यतः—अत्याजि त्यक्त इति वा । अस्मिन्पक्षे न मही-त्यत्र नञ आवृत्तिः । अनिशयितरणे लब्धो विना जयप्रसरो यस्येति वा । 'विजयस्तु जये पार्थे' इत्यमरः । विज्ञायते 'उपमानादाचारे', 'कर्तुः क्यङ्' ॥

येनामुना बहुविगाढसुरेश्वराध्व-
राज्याभिषेकविकसन्महसा बभूवे ।
आवर्जनं तमनु ते ननु साधु नाम-
ग्राहं मयानलमुदीरितमेवमत्र ॥ २९ ॥

येनेति ॥ येनामुना नलेन बहुतिशयेन विगाढः सेवितः सुरेश्वराध्वा मार्गः त्रिलोकीप्रतिपालनलक्षणो येन । तथा—राज्ये योऽभिषेको मङ्गलस्नानं तेन कृत्वा विकसन्महो यस्य । एवंविधेन बभूवे जातम् । पूर्वेण कर्मधारयः । बहुवारं सेवितो देवेन्द्रेण मार्गो लोकपालनप्रकारो यस्येति वा । पश्चात्कर्मधारयः । इन्द्रेण लोकपरिपालनमस्माच्छिक्षितमित्यर्थः । ननु भैमि' अत्र पञ्चसु मध्ये स्वयंवरे वा नामग्राहं नाम गृहीत्वा एवममुना पूर्वोक्तेन प्रकारेण मयोदीरितमुक्तं तं नलमनुलक्षीकृत्य ते तव आवर्जनं पतित्वेनाङ्गीकरणं साधु शुभम् । सत्यनलमेनं सर्वथा वृणीष्वेति भावः ॥

वह्निपक्षे ॥ येनानेन वह्निनाऽनेकवारमनुभूतो यः सुरेश्वराध्वरेषु देवेन्द्रयज्ञेष्वाज्याभिषेको घृतप्लवस्नेन कृत्वा विकस्वरतेजसा जातम् । बहु वारंवारं विगाढ आवर्तितः 'इन्द्र आयाहि' इत्यादिना आहूतः सुरेश्वरो यत्र तादृशेषु यागेष्वाज्याभिषेकस्नेन कृत्वा विकस्वरतेजसा जातमिति वा । ननु भैमि, अत्र पञ्चसु मध्ये नाम गृहीत्वा एवं पूर्वोक्तप्रकारेण मयोक्तं तं अनलमग्निं प्रति ते वर्जनं साधु । अपि तु न साधु । आ इति खेदे । आवर्जनं पतित्वेनाङ्गीकरणं साध्विति वा । नु भैमि, तमनु ते वर्जनं न साध्विति वा । पूर्वार्धेन सर्वदा परान्नभोजनेनैव परिपुष्टोऽयमिति त्यागः सूचितः । तथा—ननु भैमि, मया नाम गृहीत्वा कथितमनलं नलान्यं अथ च—वह्निमनु ते वर्जनं साधु भद्रम् । आ हर्षे । नु भैमि, तमनु ते आवर्जनं सामस्त्येन वर्जनं न साधु, अपितु साध्वेवेति वा । आ आवर्जनं सामस्त्येनाङ्गीकरणं तव न साधु, किंतु वर्जनमेव साध्विति वा । नामग्राहम्, 'द्वितीयायाम्' इत्यनुवृत्तौ 'नाड्यादिशिग्रहोः' इति णमुल ॥

यच्चण्डिमारणविधिव्यसनं च तत्त्वं
बुद्ध्वाशयाश्रितममुष्य च दक्षिणत्वम् ।
सैषा नले सहजरागभरादमुष्मि-
न्नात्मानमर्पयितुमर्हसि धर्मराजे ॥ ३० ॥

यदिति ॥ चोऽवधारणे । यस्य चण्डिमा क्रूरत्वं रणविधौ सङ्ग्रामविधाने । व्यसनमेव वैरिणां विगतासुकरणमेवेत्यर्थः । सर्वानपि वैरिणो मारयत्येवेति भावः । रणविधौ व्यसनमिव व्यसनम् । यच्चण्डिमा क्रौर्यम्, यच्च रणकर्मणि व्यसनमिति वा । सा एषा त्वं अमुष्याशयमभिप्रायमाश्रितं मनसि स्थितं दक्षिणत्वं सरलत्वं च तत् सर्वं बुद्ध्वा ज्ञात्वा, (शयं) पाणिं आश्रितं दानशूरत्वं वा ज्ञात्वा धर्मसहिते राजनि धर्मेण राजमाने वा अमुष्मिन्नले सहजरागभरादकृत्रिमानुरागबाहुल्यादात्मानमर्पयितुं योजयितुमर्हसि न । अपि तु योग्या भवस्येवेति वा । सर्वथाऽयं वरणीय एव त्वयेति भावः । एतेन शूरत्वदातृत्वधार्मिकत्वान्यस्योक्तानि ॥

यमपक्षे ॥ हे चण्डि कोपने, यत् च अमुष्य यमस्य मारणविधिव्यसनं प्राणिप्राणहरणशीलत्वं आशया दिशा च दक्षिणत्वमाश्रितं तत्त्वं निरुपाधिरूपं ज्ञात्वा सैषा त्वं अनले नलान्यस्मिन् नलसदृशे चास्मिन्धर्मराजे यमे अकृत्रिमप्रेमरसबाहुल्यात्संयोजयितुमर्हसि । सर्वप्राणा एतदधीनाः, दक्षिणदिक्पतिश्चायं तस्मादादरणीय इति भावः । चण्डि नलान्यनामधेयश्रवणमात्रात्कोपने । सर्वदा सर्वप्राणिप्राणहरणमेव व्यसनं दोषं अमुष्य दिशा दक्षिणत्वं छलेन सरलत्वमुदारत्वं चाश्रितं न त्वनेनेत्यर्थः । तत् सर्वं तात्त्विकं बुद्ध्वा सैषा त्वं नलादन्यस्मिन अस्मिन्नात्मानं योजयितुं योग्या न भवसि । अमुष्य (यत्), मारणविधिव्यसनं तत् तत्त्वं सत्यं, दक्षिणत्वं तु दिगाश्रितं दक्षिणदिक्पतित्वात । दक्षिण इति देशनिमित्तास्य समाख्या, तदेतद्बुद्ध्वा सैषा त्वं आत्मानमर्पयितुं न अर्हसीति वा योजना । एवंविधो न वरणीय इति भावः । अन्यच्च कारणम् —अस्वाभाविकरागभरात् अस्वाभाविकानुरागबाहुल्यादित्यर्थः । यत्रानुरागो नास्ति, स न वरणीय इति भावः ॥

किं ते तथा मतिरमुष्य यथाशयः स्या-
त्स्वस्पाणिपीडनविनिर्मितयेऽनपाशः ।
कान्मानवानवति नो भुवनं चरिष्णु-
न्नासावमुत्र नरता भवतीति युक्तम् ॥३१॥

किमिति ॥ अमुष्य नलस्य आशयोऽभिप्रायः तव पाणिपीडनस्य पाणिग्रहणस्य विनिर्मितये निष्पत्तये अनपाशः अपगता आशा यस्मात्पाशः एवंविधो न भवत्यनपाशः तत्परो यथा स्यात्तथा किं ते मतिर्बुद्धिः । किंशब्दः संभावनायाम् । यथायं त्वद्वरणायाभिलाषसहितान्तःकरणो भवेत्तथा त्वं प्रायेण करिष्यसीति गम्यते इत्यर्थः । असौ नलो भुवनं जगत् चरिष्णुन्संचरणशीलान्कान्मानवान्मनुष्यान् नोऽवति रक्षति अपितु सर्वानप्ययमेव रक्षति । मानवानभिमानी नलः कान्न रक्षतीति वा । तस्मादमुत्र नले भवती रता नेति न युक्तम् । किंवास्मिन्नरता भवेत्यर्थः । असौ नापुरुषश्रेष्ठः अतो नरता पुरुषश्रेष्ठत्वममुत्र भवतीति युक्तं न त्वेतदित्यर्थ इति वा । असौ ना, अमुत्र भवती रता नेति युक्तं, अपि तु नेति वा । असौ ना पुरुषश्रेष्ठः, अतोऽमुत्र भवती रक्तानुरक्तेति किं न युक्तं अपि तु युक्तमेवेति वा । भवतीति संबुद्धिर्वा ॥

वरुणपक्षे—अमुष्य वरुणस्य शयः पाणिर्येन प्रकारेण स्वस्पाणिग्रहणनिष्पत्तयेऽनपाशः न विद्यते पाशो यस्मिन्नेवंविधः पाशरहितो यथा भवेत्तथा ते बुद्धिः किम् । किं प्रश्ने । पाशं त्यक्त्वा स्वस्पाणिग्रहणं करिष्यतीत्यर्थः । स्वस्पाणिग्रहणनिष्पत्तयेऽस्य शयः करः स्यात् पाशो न । स्वस्पाणिग्रहणं शयेन करिष्यति पाशं त्यक्ष्यतीति भयं मा यासीरित्यर्थ इति वा । असौ भुवनमुदकं तत्संचरणशी-

लान्मनुष्यान्काञ्चोऽवति । अपितु जलप्रविष्टान् डुडनादिप्रमादाद्-रुण एव रक्षति । उदकसंचरणशीलान्मनुष्यान्काञ्चो अवति । अपितु रक्षतीति वा । नोऽस्माकं भुवनं पृथ्वीलोकः तत्र संचरणशीलान्मनुष्यान् कादुदकाद्धेतुभूताद्रक्षति । सर्वेषां डुदकं जीवनमिति वा । अमुत्र भवती न रता नानुरक्तेति न युक्तम् । अमुत्र नरता मनुष्यत्वं न भवतीति युक्तम् । देवोऽयमित्यर्थ इति वा । अमुत्र नरसा नलत्वं न भवतीति युक्तमिति वा । असौ ना न पुरुषो न भवति, अतोऽमुत्र भवती रतेति युक्तं अपि तु नेति वा । अमुत्र भवती न रता नानुरक्तेति न युक्तं अपि तु युक्तमेवेति वा ॥

श्लोकादिह प्रथमतो हरिणा द्वितीया-
द्धूमध्वजेन शमनेन समं तृतीयात् ।
तुर्याच्च तस्य वरुणेन समानभावं
सा जानती पुनरवादि तया विमुग्धा ॥३२॥

श्लोकादिति ॥ इह चतुर्षु 'अत्याजि—'इत्यादिश्लोकेषु मध्ये 'अत्याजि—' (१३।२८) इति प्रथमतः श्लोकाद्धरिणा इन्द्रेण समं सह, 'येनामुना—' (१३।२९) इति द्वितीयाच्छ्लोकाद्धूमध्वजेनाग्निना सह, 'यच्चण्डिमा—' (१३।३०) इति तृतीयाच्छ्लोकाच्छमनेन यमेन सह, 'किं ते—' (१३।३१) इति तुरीयाच्छ्लोकाद्वरुणेन सह, तस्य नलस्य समानभावं तुल्यरूपत्वं जानती अत एव विमुग्धा विशेषेण भ्रान्ता भैमी तया देव्या वक्ष्यमाणं पुनरवादि ॥

त्वं याऽर्थिनी किल नले न शुभाय तस्याः
क स्यान्निजार्पणममुष्य चतुष्टये ते ।
इन्द्रानलार्यमतनूजपयःपतीनां
प्राप्यैकरूप्यमिह संसदि दीप्यमाने ॥३३॥

त्वमिति ॥ या त्वं किल नले विषयेऽर्थिनी साभिलाषा तस्यास्ते तव अमुत्र नले निजार्पणं स्वसमर्पणं शुभाय कल्याणाय तुष्टये च संतोषाय च क न स्यात्कुतो न भवेत्, अपितु स्यादेव । किंविधेऽमुत्र— इन्द्रश्चानलश्चार्यमतनूजो यमश्च पयःपतिर्वरुणश्चैतेषामैकरूप्यं सारूप्यं दिक्पालांशत्वात्सरूपत्वं प्राप्य इहास्यां संसदि सभायां दीप्यमाने । तस्मादयं वरणीय इत्यर्थः । अथवा—या त्वं नले न साभिलाषा, तस्यास्तवामुत्र नले निजार्पणं शुभाय कुतः स्यात्, अपि तु न कुतोऽपि । किमित्यत आह—इन्द्राग्नियमवरुणानां चतुष्टये ऐकरूप्यं नलसारूप्यं प्राप्य इह सभायां ज्वलति सति । एतान्प्रसज्यानकृत्वा यन्नलवरणं तच्छुभाय न भवेदेव, शापं दास्यन्तीत्यर्थ इति वा । या त्वं नले विषयेऽर्थिनी एवं वर्ण्यमानमप्येमं नलं न वृणोषि । यतः—तस्यास्ते नलसारूप्यं प्राप्य इह सभायां प्रकाशमाने इन्द्रादीनां चतुष्टये मध्ये क कस्मिन् इन्द्रेऽग्नौ यमे वरुणे वा निजार्पणं शुभाय स्यात्कथय । मया बहुशः प्रोच्यमानाऽपि यन्नलं न वृणुषे तर्हीषु सुन्दरतमेषु चतुर्षु मध्ये कं वृणुष इति कथय इत्यर्थ इति वा । अनेनात्रेन्द्रादयो वर्तन्ते न वेति संदेहो निरस्तः । परं तु के ते कश्च नल इति विशेषो नोक्तः । अत्रेन्द्रादीनां चतुर्णां त्यागोऽपि प्रतीयते । या त्वं नलेऽर्थिनी, तस्याः ते नलस्वरूपतां प्राप्य इह सभायां दीप्यमान इन्द्रादिचतुष्टये निजार्पणं शुभाय क स्यात् । अपितु न कुतोऽपि । या अन्यत्रानुरक्ता, तस्या अन्यत्र निजार्पणे शुभं कथं भवेत् । अन्यच्च नलरूपधारणादेते प्रकाशन्ते न त्वेषां सहजं सौन्दर्यमस्ति । अतोऽप्येते न वरणीया इति भावः ॥

देवः पतिर्विदुषि नैषधराजगत्या
निर्णीयते न किमु न ध्रियते भवत्या ।
नायं नलः खलु तवातिमहानलाभो
यद्येनमुज्झसि वरः कतरः परस्ते ॥ ३४ ॥

देव इति ॥ हे विदुषि श्लेषोक्तिचातुरीपरिज्ञानचतुरे भैमि, एष पुरोवर्ती देवः स्वर्गे क्रीडाकारी अमरश्च धराजगत्या भूलोकस्य पतिः पालयिता न किंतु अर्थात्स्वर्लोकस्य पतिरिन्द्रस्त्वया किमु किमिति न निर्णीयते इन्द्रत्वेन किमिति न निश्चीयते । अपितु निश्चेय इत्यर्थः । किमिति वा न ध्रियते अपि तु वरणीयश्चेत्यर्थः । मया न निश्चित इति कुतोऽवसितं भवत्येति शङ्कायां सत्यामाह—यतो न ध्रियते इति हेतूपन्यासः सरस्वत्या कृतः । अयमिन्द्र इति चेत्तव निश्चयः स्यात्तर्हि मनुष्यापेक्षयाधिकत्वादयं वृत एव स्यात्तत्तु न कृतम् । अत इन्द्रत्वेन त्वयाऽयं न निश्चित इत्यर्थ इति वा । धराणां पर्वतानामजनं आदः क्षेपणं तत्र गतिरुपायभूतो वज्रस्तेन कृत्वायं ना पुरुषः सामर्थ्यवान्वज्रायुधो देव इन्द्रः पतिर्भर्ता भर्तृत्वेन किं न निश्चीयते, निश्चितश्चेत्किं न ध्रियत इति वा । धराजगत्या वज्रस्य पतिः एष देवः त्वया न निश्चीयत इति न, अपितु निश्चित एव ज्ञात एव किमु न ध्रियत इति वा । उशब्दः संबोधने । धरान्पर्वतानजति क्षिपतीति धराज इन्द्रः स एव गतिः शरणं यस्याः प्राच्या दिशः पतिर्देव इन्द्रो न निर्णीयते इति न, परं किं न ध्रियत इति वा । इन्द्रश्चञ्चल इव कथं दृश्यत इत्यत आह—अयं खलु निश्चयेन नलो न भवति, तव नलवदाभातीति नलाभः । अत्र हेतुमाह—यतः अतिशयितं महस्तेजो यस्य मनुष्यापेक्षया बहुतेजा इत्यर्थः । अत एव वरणीयः । अथ वा—अयं नलस्तृणविशेषः तत्तुल्योऽसारभूतो न भवति । किं त्वतिबलः, अतोऽपि वरणीय इत्यर्थः । अस्य वरणे निश्चितं अतिशयिता ये महा नन्दनवनक्रीडादय उत्सवाः, अनं आनः प्राणनं च, तेषां लाभः प्राप्तिस्तव भविष्यतीति शेषः । इन्द्रवरणे नन्दनवनक्रीडाः सुधापानेनामरत्वं च त्वया प्राप्स्यते इत्यर्थः । अतिमहतश्चिरकालस्य प्राणनस्य लाभो भविष्यतीति वा । एवंगुणविशिष्टमेनं अस्य विष्णोर्वा इनं ज्येष्ठभ्रातृत्वेन स्वामिनमिन्द्रं चेत्यजसि तर्हि परोऽन्यः को वरः, अपि तु न कोऽपि । मद्वचनविश्वासादेनमेव वृणीष्वेति भावः । अथ च—यद्येनं त्यजसि, तर्हि तव कतरोऽभीष्टो भवेत् न कोऽपि । किंतु परः शत्रुरेव भवेदित्यर्थः । अथ च—यद्येनं त्यजसि, तर्हि तव परोऽन्यः एतदनन्तरः केन वायुना तरति प्लवते, केन जलेन तीर्यते शान्तिं प्राप्यते वा यः स कतरोऽग्निः वरो भवितेत्यर्थः ॥ * ॥ अत्रेन्द्रत्यागोऽपि सूचितः । तथाहि—एष भूलोकस्य रक्षको देवो राजा नलो नेति निर्णीय निश्चित्य तेन नलत्वाभावलक्षणेनैव कारणेन न ध्रियते किम्विति प्रभः । युक्तमेवैतत्कृतमिति शेषः । धराज इन्द्र एव गतिर्जीवनोपायो यस्याः शच्याः पतिः देवो न निश्चीयत इति न, अपि तु निश्चित एव । न ध्रियते किम्विति वा । संशयलेशस्यापि निरा-

सार्थं देवी पुनस्त्वमाह—अयं त्वत्संबन्धी त्वच्चित्तानुरञ्जकोऽतिमहा(न्) नितरां तेजस्वी नलो न भवत्येव । यत् त्वया निश्चितं तत्तथ्यमेवेत्यर्थः । किं तु नलवदाभासत इत्येव । नलाकारधारणादेवास्याभा, न तु सहजेत्यर्थः । यद्वा—यतोऽयं नलाख्यतृणविशेषवद्विःसारो भाति तस्माद्धितरां तेजस्वी नलो न भवतीत्यर्थः । यदि चैनं त्यजसि तर्हि ते श्रेष्ठाः के सुखे तरतीति कतरः सुखसमुद्ररूपो नलो वरो भवितेत्यर्थः । यद्वा—नैषधराजो नल एव गतिर्जीवनोपायो यस्या एवंविधया त्वया देव इन्द्रो न निश्चीयते किम् । अपि तु निश्चित एव । यतः—पतिर्न म्रियते । नलानुरागिणी त्वम्, इन्द्रोऽयमिति ज्ञात्वैव पतित्वेन नाङ्गीकरोषीत्यर्थः । यस्मात्—दैत्यैरतिक्रान्तं महो यस्य तस्मादसारभूतः । यदि चैनं त्यजसि तर्हि तव लाभो न । अपि तु लाभ एवेति वा ॥

वह्निपक्षे—धरतीति धरो वाहनं स चासावजश्च मेषः, धर इव पर्वततुल्यो वा यो मेषस्तेन कृत्वा या गतिः, धरायां भूमौ अजेन कृत्वा या गतिस्तयोपलक्षितः, पाकादिकरणद्वारा त्रैलोक्यरक्षणात्पतिः, देवो द्युतिमानमरश्च वह्निः न निश्चीयत इति न । अपि तु निश्चीयत एव । परं एवंगुणविशिष्टो ज्ञात्वापि न म्रियते । अपितु अग्नित्वेन निश्चित्य वरणीय एवेत्यर्थः । धरो वाहनमजो यस्य स धराजो वह्निः स एव गतिः शरणं यस्या आग्नेय्या दिशः पतिर्देवोऽग्निः किं न निर्णीयते । । निर्णीतश्चेत्किमु न म्रियत इति वा । अग्निश्चेन्नलत्वेन किमिति भणीत्याह—अयं निश्चितं नलो न, किं तु ततोऽप्यतितेजस्वी तव नलवदाभातीति वा । अयं त्वत्संबन्धी नलो न भवति, किंत्वनल एवेत्यर्थ इति वा । एवंगुणविशिष्टमेनं यदि त्यजसि, तर्हि अग्नेः परः अन्यः श्रेष्ठश्च ते को भर्ता भविता । अपित्वेतत्सदृशोऽतितेजस्वी कोऽपि नास्तीत्यर्थः । अथ च—तव कोऽभीष्टः । अपितु न कोऽपि । किं तु परः शत्रुरेवेत्यर्थः ॥ * ॥ अत्रापि त्यागः सूचितः । तथाहि—एष नो मनुष्यो न किंतु धराजगत्या आग्नेय्या दिशः पतिः देवो वह्निरिति भवत्या निर्णीयते किम् । यतो न म्रियते । त्वया सत्यमेव निश्चितमित्याह—अयं त्वच्चित्तानुरञ्जकोऽतितेजस्वी नलो न, किंतु तदाकारधारणाल्लाभः । सहजेयं कान्तिर्न भवतीत्यर्थः । नले तृणविषये आभा यस्य । यस्य तेजस्वित्वं तृणं प्रत्येव न तु दैत्यान्प्रतीत्यर्थ इति वा। नैषधराजो गतिर्यस्यास्तया भवत्या एष दीप्यमानोऽग्निः किमु न निर्णीयते । अपितु निर्णीयत एव । यतो न म्रियते । अयं तव पतिर्नलो न भवति किंतु दैत्यैराक्रान्ततेजास्तृणविशेषनलतुल्य इति वा ॥

यमपक्षे—एष धरान्पर्वतान्भूम्नाम्नां खुरैर्वा अजति क्षिपति धराजो महिषस्तस्य गत्या तेन वा या गतिस्तयोपलक्षितः धर्मरूपत्वात्पतिः पालयिता देवः क्रीडापरोऽमरश्च यमो न निर्णीयत इति न । अपितु निश्चित एव परं किमु न म्रियते । एष देवः धराजेन महिषेण कृत्वा अर्थाद्यमस्य गतिर्यस्यामेवंभूताया दक्षिणदिशः पतिर्न । अपितु भवत्येवेति किमु न निर्णीयते किं वा न म्रियते, अपितु यमत्वेन निर्णेयो वरणीयश्चेत्यर्थ इति वा । अतितेजस्व्ययं निश्चितं नलो गहनो न । अपितु धर्मरूपत्वाद्गहन एव । 'नल गहने' इत्यस्य पचाद्यचि रूपम् । यदि चैनं त्यजसि तर्हि तव लाभो न किंतु हानिरेव । यतः—तव एतदन्यः श्रेष्ठश्च कतरो वरः अपितु नास्त्येवेत्यर्थः । अयं नलो न किंतु तवातिमहतामनानां प्राणानां लाभो यस्मात्सोऽतिमहानलाभः । सर्वेषां प्राणा एतदधीना अतस्त्वया त्वच्चित्तानुरञ्जकोऽतितेजस्वी नलो न भवत्येव । यत् त्वया निश्चितं तत्तथ्यमेवेत्यर्थः । किं तु नलवदाभासत इत्येव । नलाकारधारणादेवास्याभा, न तु सहजेत्यर्थः । यद्वा—यतोऽयं नलाख्यतृणविशेषवद्विःसारो भाति तस्माद्धितरां तेजस्वी नलो न भवतीत्यर्थः । यदि चैनं त्यजसि तर्हि ते श्रेष्ठाः के सुखे तरतीति कतरः सुखसमुद्ररूपो नलो वरो भवितेत्यर्थः । यद्वा—नैषधराजो नल एव गतिर्जीवनोपायो यस्या एवंविधया त्वया देव इन्द्रो न निश्चीयते किम् । अपि तु निश्चित एव । यतः—पतिर्न म्रियते । नलानुरागिणी त्वम्, इन्द्रोऽयमिति ज्ञात्वैव पतित्वेन नाङ्गीकरोषीत्यर्थः । यस्मात्—दैत्यैरतिक्रान्तं महो यस्य तस्मादसारभूतः । यदि चैनं त्यजसि तर्हि तव लाभो न । अपि तु लाभ एवेति वा ॥

वरुणपक्षे—एष धराजगत्या भूलोकस्य पतिर्न । किंत्वर्थात्पातालस्य अतएव देवः कान्तिमानमरश्च वरुणः किं न निश्चीयते किं वा न म्रियते । अयं नलो न किंतु अतिमहती नलवत्कान्तिर्यस्य सोऽतिमहाः तव नलाभो भातीति शेषः । यदि चैनमुज्झसि, तर्ह्येतदन्यः श्रेष्ठश्च तव को वरो भर्ताऽपितु एतत्सदृशोऽन्यो नास्तीत्यर्थः । धरायां जायन्ते धराजानि स्थावरजङ्गमानि भूतानि तेषां गतिर्जीवनोपायो जलं तस्य पतिः न । अपितु अपांपतिर्वरुणो देवः किं न निर्णीयते किं वा न म्रियते । अपितु निर्णेयो वरणीयश्चेत्यर्थः । अतिमहस्य अतिपूज्यस्यानलस्याग्नेरभा कान्त्यभावो यस्माद्धेतोर्वरुणो हि जलरूपत्वादग्निविरोधीत्यर्थ इति वा । यदेवं त्यजसि, तदा तव वरः श्रेष्ठः कः परः शत्रुः । अपितु अयमेव शत्रुरित्यर्थ इति वा । धरतीति धरो धर्ता जगतः पोषकः स चासावजश्च तस्य धराजस्य श्रीविष्णोर्गतिः प्रथममयनमाधारो जलं तस्य पतिर्न । अपितु तत्पतिर्वरुणः किं न निर्णीयते । उदकम् 'आपो नाराः' इत्यादिना श्रीविष्णोराश्रयः । अथ च—यदि त्वमेनम् अः श्रीविष्णुः इनः स्वामी यस्य तं श्रीविष्णुभक्तं त्यजसि, तर्हि तव लाभो न, किंतु हानिरेव । तस्मात्तव कतरो वरुण एव परः श्रेष्ठो वर इति वा ॥ * ॥ अत्रापि त्यागः सूचितः । तथाहि एष धराजगत्याः पूर्वोक्तप्रकारेण उदकस्य प्रतीच्या दिशो वा पतिर्वरुणो देवो न । अपितु स एवेति निर्णीयते किमु । अपितु निश्चित एव । यतो न म्रियते । नायं नल इत्यादि तुल्यम् । यद्येनं त्यजसि तर्हि तवापि(ति)महतामनानां प्राणानां लाभः जीवितासीत्यर्थः । यस्मात्ते सुखसमुद्ररूपः श्रेष्ठो नलो वरो भविता । नलप्राप्तावेव तव प्राणनं, नान्यथेति भाव इत्यादिन्यायेन सुधिया योजनीया । ग्रन्थविस्तरभयान्न लिखिता ॥

नलपक्षे—अयं नैषधराजस्य निषधदेशसंबन्धिनो राज्ञः, निषधदेशोद्भवानां लोकानां यो राजा तस्य वा, गत्या ज्ञानेन कृत्वा पतिः स्वामी देवः क्रीडादियुक्तः, राजा वा, ना मनुष्यो नलः किं न निश्चीयते किं वा न म्रियते । अपितु निषधाधिपो मर्त्य एवायं पञ्चमो नल एवायमिति निश्चेतव्यो वरणीयश्चेत्यर्थः । खलु यस्मात् तवातिमहानलाभो विष्णुलाभः । 'नाविष्णुः पृथिवीपतिः' इति नलस्य विष्णुत्वादित्यर्थः । यदि चोत्कृष्टवराकाङ्क्षया एनं त्य-

जसि तर्हि को वरोऽस्मात्परोऽधिकः । अपितु नास्तीति नलमेव वृणीष्वेति भावः । नलस्यावरणेऽभर्तृकैव स्थास्यसीत्यर्थः । एष धराजगत्या भूलोकस्य पतिः स्वामी ना मनुष्यो नलो देवो राजा न, अपि तु नल एवेति किं न निश्चीयते किं वा न ध्रियते । अपि तु निश्चेयो वरणीयश्च । यस्मान्नलवरणे तवातिमहतो जीवनस्य लाभः । नलप्राप्तावेव तव जीवनं भविष्यतीत्यर्थः । यदि च अयं शुभावहदैवरूपमेनं त्यजसि तर्हि तव कः श्रेष्ठो वरः । अपि त्वन्यो नास्तीत्यर्थ इति वा । नैषधराज एव गतिर्यस्यास्तया भवत्या मनुष्योऽयं नलो राजा पतिः किं न निश्चीयते किं वा न ध्रियते । अपितूभयमपि कर्तव्यम् । यद्येनमुज्झसि तर्हि तव निश्चितमति महानलाभो महदभाग्यम् । यस्मादेतादृशोऽन्यः कतरो वरः । अपितु नास्त्येवेत्यर्थ इति वा । एष देवो न इन्द्रादिरमरो न, किंतु भूलोकस्य पतिर्मनुष्यो नल इति किं न निश्चीयते, किं वा न ध्रियते । यदि चायं देवरूपमेनं त्यजसि तर्हि तव लाभो न, किंतु हानिरेव । धरायां जायन्ते धराजा मनुष्यास्तेषां गत्या प्रकारेण सनिमेषनेत्रत्वादिलिङ्गेन एष देवो नेति किमु न निर्णीयते । तथा—पतिरिति किमिति न ध्रियते । निश्चितं ना मनुष्यो नलोऽयम् । यदि चैनं त्यजसि तर्हि तव परोऽन्यो वरः श्रेष्ठः कतरो लाभः । अपितु एतद्वरणात्परः श्रेष्ठो लाभो नास्तीत्यर्थः । एष धरायां भूलोकेऽतिसौन्दर्यादजः काम इति बुद्ध्या प्राणेशो मनुष्यो नलो नतु देवः कश्चिदिति किं न निर्णीयते किं वा न ध्रियते । निकटस्थानामेषां चतुर्णामेतदाकारधारणात्कृत्रिमं सौन्दर्यं, अस्य तु सहजमिति दर्शनमात्रेण तारतम्यं ज्ञात्वा एष नलो निश्चेयो वरणीयश्चेत्यर्थः । खलु यस्मात्तदाकारधारणेनातिमानामति(स)लक्ष्मीकाणामिन्द्रादीनां हाने परित्यागे लाभः । तव कपटसौन्दर्यास्ते न वरणीया इत्यर्थः । इत्यादिव्याख्या यथाबुद्धि ज्ञातव्या । 'नलः पोटगले राशि पितृदेवे कपीश्वरे' इत्यादि विश्वः ॥

इन्द्राग्निदक्षिणदिगीश्वरपाशिभिस्तां
वाचं नले तरलिताथ समां प्रमाय ।
सा सिन्धुवेणिरिव वाडववीतिहोत्रं
लावण्यभूः कमपि भीमसुताप तापम् ॥३५॥

इन्द्रेति ॥ अथ लावण्यभूः परमसौन्दर्योत्पत्तिस्थानं सा भीमसुता नले विषये तां पूर्वोक्तां 'देवः पतिः–' [१३।१४] इत्यादिवाचमिन्द्राग्निदक्षिणदिगीश्वरपाशिभिः समां सह तुल्यां श्लेषेण तेषामपि वर्णयित्रीं प्रमाय निश्चित्य तरलिता संदेहवशान्नलनिश्चयाभावाद्दोलायमानमनाः सती कमप्यनिर्वाच्यमतिदुःसहं तापमाप । का कमिव—सिन्धुवेणिर्गङ्गासागरसंगमो वाडववीतिहोत्रमिव वडवानलमिव यथा प्राप्नोति । नलनिश्चयाभावाद्वडवानलमिव दुःसहं संतापं प्रापेति भावः । नले तरलिता सोत्कण्ठेति वा ॥

सासुं प्रयच्छति न पक्षचतुष्टये तां
तल्लाभशंसिनि न पञ्चमकोटिमात्रे ।
श्रद्धां दधे निषधराड्विमतौ मतानां
मद्वैततत्त्व इव सत्यतरेऽपि लोकः ॥३६॥

सासुमिति ॥ सा भैमी निषधराजो नलस्य संबन्धिन्यां विविधायां मतौ बुद्धौ सत्याम् । नलविषये संदेहे सतीतियावत् । पञ्चमी चासौ कोटिश्च पञ्चमकोटावेव पञ्चमकोटिमात्रे पञ्चमभागरूपे । पञ्चमस्थानस्थित इति यावत् । एवंभूते पक्षानां मध्ये सत्यतरे अतितरां सत्येऽपि नले विषये श्रद्धामास्तिक्यं न दधे । सत्यनलेऽपि नलोऽयमेवेति तस्या बुद्धिर्नोदभूदित्यर्थः । क्व सति—तल्लाभशंसिनि भैमीप्राप्त्यभिलाषिणि पक्षचतुष्टये पक्षाणां समीपवर्तिनां सहायानां सदृशानामिन्द्रादीनां चतुष्टये तां श्रद्धां सत्यनलविषयं निश्चयमासुं प्रासुं न प्रयच्छति सति । भैमीप्राप्त्यभिलाषेणातिसुन्दररूपधारणात्कृत्रिमरत्नादिष्विव मायानलेषु बहुरूपातिशयदर्शनान्नलनिश्चयं प्रतिषेधति सति । कः कस्मिन्निव—मतानां सांख्यादिपक्षदर्शनानां मध्ये 'एकमेवाद्वितीयं ब्रह्म, नेह नानास्ति किंचन' इत्यादिश्रुतिभिः सत्यतरे परमार्थतो विद्यमानेऽप्यद्वैतरूपे तत्त्वे स्वरूपे ब्रह्मैक्यबोधे वा विषये लोकोऽविद्यावान्युक्तायुक्तविचारशून्यो जनो यथा श्रद्धां न धत्ते । क्व सति—पक्षचतुष्टये अनेकात्मवादिसांख्यादिदर्शनचतुष्के तामद्वैतश्रद्धां प्रासुं न ददति सति । नानात्मत्वसाधकयुक्तिसहस्रैरैकात्म्यनिषेधके सतीति यावत् । तस्य तत्पदवाच्यस्य लाभः तच्छंसिनीत्यद्वैततत्त्वस्य विशेषणम् ॥ ❀ ॥ सांख्या हि प्रतिशरीरं पुरुषबहुत्वमङ्गीकुर्वन्ति नैयायिकाश्च 'नानात्मानो व्यवस्थिताः' इति वचनादात्मनां नानात्वमङ्गीकुर्वन्ति । आर्हताश्च देहप्रमाणात्मस्वीकारमङ्गीकुर्वन्ति । बौद्धाश्च स्वसिद्धान्तसिद्धानेकयुक्तिभिरनेकात्मनामेव चित्ततति(बाहुल्यमङ्गीकुर्वन्ति ॥ * ॥ सत्, असत्, सदसत्, सदसद्विलक्षणमिति पक्षचतुष्टयम् ॥ * ॥ सद्वादिनः सांख्याः । असद्वादिनो बौद्धाः । सदसद्वादिनो नैयायिकाः । प्रपञ्चानित्यत्ववादिनो वेदान्तिनः । न सत् बाधानुपपत्तेः । नहि सद्व्रजतं गगनादिकं वा बाध्यते । नचासत् प्रतिभासानुपपत्तेः । नह्यत्यन्तासच्छशशृङ्गं कदाचिदप्यवभासते । नच सदसदात्मकमुभयरूपं परस्परविरोधात् । नह्यसत्सद्वाऽसद्भवितुमर्हति । उभयरूपमपि न भवतीत्यपि वक्तुमयुक्तमित्यादयपि ज्ञातव्यम् ॥ ❀ ॥ सांख्या हि प्रतिशरीरं भिन्नाञ्शुद्धज्ञानस्वभावान्बहूनात्मन इच्छन्ति । नैयायिका अपि प्रतिशरीरं भिन्नान्सर्वव्यापकाञ्ज्ञानादिनवविशेषगुणवत आत्मन इच्छन्ति । आर्हतास्तु प्रतिशरीरं भिन्नान्देहपरिमाणान्संकोचविकासशीलान्बहूनात्मनोऽङ्गीकुर्वन्ति । बौद्धाश्च प्रतिदेहं भिन्नान्क्षणिकज्ञानसंततिरूपान्बहूनेवात्मन इच्छन्ति ॥ ❀ ॥ भैमीप्राह्यभिलाषिणि सत्यतरे नले नलसंबन्धिन्यां विमतौ सत्यामपि सा श्रद्धां न दधे । अपितु दधावेव । अनेकनलदर्शने सत्ये पञ्चमकोटिस्थले सत्ये नले । 'अविज्ञातेऽपि बन्धौ हि बलात्प्रह्लादते मनः' इति न्यायेनायमेव प्रायेण सत्यनलो भविष्यतीति तस्या मनसि बुद्धिरुदभूदित्यर्थः । मतानां विमतावपि सत्यतरेऽद्वैततत्त्वे लोक इव । लोकः परीक्षको जनो यथा श्रद्धां धत्ते तथेति संबन्धः । 'प्रासुम्' इति पाठे निषधराट् नल इन्द्रादिचतुष्टये भैमीप्रतारणार्थं स्वीयस्वरूपधारणात्तां स्वसौ प्रासुं न यच्छति सति तल्लाभशंसिनि भैमीप्राह्यभिलाषिणि पञ्चमकोटिस्थे अर्थादात्मनि श्रद्धां निश्चयं न दधे । अर्थाद्भैमीं प्रासुम् । एतस्मिंश्चतुष्टये प्रतिबन्धके सति इयं मया कथंकारं प्राप्यते । अपि तु नेति तस्य बुद्धिरुदभूदित्यर्थः । मतानां विमतौ सत्यां सदसदादिपक्षचतुष्टये तां सम्यक्प्रतीतिं निषेधति सति अभेदसिद्धिशंसिनि पञ्चमकोटिमात्रे चतुष्कोटिविनिर्मुक्ते सत्यतरेऽप्यद्वैततत्त्वे यथा लोकः श्रद्धां न धत्त इति

व्याख्येयम् । लोकः कौतुकदर्शी सभास्थो जन इयमेनं वरिष्यतीति निश्चयमयं पञ्चमः सत्यनल इति वा निश्चयं न दधे । पञ्चमकोटिमात्रे, 'पुंवत्कर्मधारय–' इति पुंवत् ॥

उक्तिविशेषेण पुनरपि संदेहजनितं संतापं वर्णयति—

कारिष्यते परिभवः कलिना नलस्य
तां द्वापरस्तु सुतनूमदुनोत्पुरस्तात् ।
भैमीनलोपयमनं पिशुनौ सहेते
न द्वापरः किल कलिश्च युगे जगत्याम् ॥३७

कारिष्यत इति ॥ कलिना चतुर्थयुगेन नलस्य परिभवः कारिष्यते करिष्यते । द्वापरस्तु अयं वा नलः, अयं वा नल इति संदेहः पुनः । अथ च शब्दच्छलेन तृतीयं युगं पुनः तां सुतनूं सुन्दरीं पुरस्तात्कलेः पूर्वमेवादुनोदपीडयत् । कलिर्वरणानन्तरं नलपराभवं करिष्यति, द्वापरस्तु भैम्यै नलं वरीतुमेव नादादित्यर्थः । तयोर्विरोधित्वे कारणमाह—किल यस्मात्कारणाद्वापरः कलिश्च द्वावपि युगे जगत्यां भूलोके भैमीनलयोरुपयमनं विवाहं न सहेते । जातं तयोर्विवाहं कलिर्यथा न सोढा, तथा भाविनं द्वापरोऽपि न सेहे । यतः—पिशुनौ खलौ । निश्चिते नले विवाहो भवत्येव, संदेहस्तु प्रतिबन्धकः । तस्मात्कलिद्वापरस्यापि विरोधित्वात्तेन सा पीडितेत्यर्थः । द्वापरे कलौ च भैमीनलयोरभावात्तयोर्विवाहं न सहेतां तावित्यर्थः : नलनिश्चयाभावात्सातिनमां संतापमापेति भावः । शब्दश्लेषबलेनेयमुक्तिः । कारिष्यते, 'स्यसिच्सीयुट्तासिषु—' इतीटक्षिण्वद्भावात् 'अचोञ्णिति' इति वृद्धिः । परिभवः, 'परौ भुवोऽवज्ञाने' इति घञो विकल्पितत्वात् 'ऋदोरप्' ॥

उत्कण्ठयन्पृथगिमां युगपन्नलेषु
प्रत्येकमेषु परिमोहयमाणबाणः ।
जानीमहे निजशिलीमुखशीलिसंख्या-
साफल्यमाप स तदा यदि पञ्चबाणः[1]॥३८॥

उत्कण्ठयन्निति ॥ परिमोहयमाणा मोहजनका बाणा यस्यैवंभूतः, अत एव इमां भैमीं प्रत्येकम्, एष्विन्द्रादिनलपदेषु युगपदेकस्मिन्नेव काले पृथक् पार्थक्येनोत्कण्ठयन्सोत्कण्ठां कुर्वन्, अयं वा नल इति बुद्ध्यैवैकस्मिन्विषये तुल्यकालं पृथक्प्रकारेणोत्कण्ठयन् । पृथक्प्रयत्नसाध्यामस्यादृशीमुत्कण्ठामस्या जनयन्निति यावत् । एवंभूतः स पञ्चबाणो निजाः स्वीयाः शिलीमुखा बाणाः तादृशीलयत्यभ्यस्यति । स्वीयबाणाश्रितेति यावत् । एवंभूता पञ्चसंख्या तस्याः साफल्यं सप्रयोजनत्वं यद्यपि, तर्हि तदा तस्मिन्नेवावसरे, नत्वन्यदेति वयं जानीमह उत्प्रेक्षामहे । एकस्मिन्नलेऽनुरागस्य पर्यायेणैकेनैव बाणेन जनने शेषाणां चतुर्णां वैयर्थ्यमेव स्यात् । किमयं नलः, किमयं नल इति नलत्वेनोपलक्षितेषु पञ्चस्वपि प्रत्येकं पञ्चभिरेव बाणैः पृथक्प्रयत्नेन युगपदनुरागजनने पञ्चानामपि बाणानां साफल्यं तदैव जातमित्यर्थः । पृथगित्यस्योत्कण्ठाविशेषणत्वात्, प्रत्येकमित्यस्येन्द्रादिविशेषणत्वात्संबन्धभेदाच्चार्थपौनरुक्त्यम् । नलेषु युगपदिमां पृथगुत्कण्ठयन्, तथा प्रत्येकमेषु नलेष्वेव युगपत्परिमोहयमाणा अर्थाद्भैम्यां विषयेऽनुरागजनका बाणा यस्य स मदनः यदि निजबाणसंख्यासाफल्यमाप तर्हि तदैव नान्यदा । पञ्चस्वपि तस्या युगपत्पृथगनुरागजननात्, तस्यामपि पञ्चानामपि तेषां प्रत्येकं युगपदनुरागजननाच्च स्वीयबाणसंख्यायाः साफल्यमापेत्यर्थ इति वा । नलेषु तां पृथक्सोत्कण्ठां कुर्वन् । तथा—एषु नलेष्वेव प्रत्येकमुत्कण्ठां जनयन् अर्थाद्भैमीं प्रति । यतः—परिमोहयमाणबाण इत्युभयत्रापि हेतुगर्भं विशेषणम् । सा भैमी पञ्चस्वपि नलबुद्ध्यैव सानुरागाभूदिति भावः । तेऽपि तस्यामित्यपि च भावः । पञ्चस्वनुरागात्पातिव्रत्यभङ्गप्रसङ्ग इति न । पञ्चस्वपि परपुरुषतापरिहारेण नलबुद्ध्यैवानुरागात्परिहारः । उत्कण्ठयन्—इयमुत्कण्ठते, कामश्चैनामुत्कण्ठयति, हेतुमण्णिच् शता । पक्षान्तरे तु—उत्कण्ठां कुर्वन्निति 'तत्करोति–' इति णिच् ॥

देवानियं निषधराजरुचस्त्यजन्ती
रूपादरज्यत नले न विदर्भसुभ्रूः ।
जन्मान्तराधिगतकर्मविपाकजन्मै-
वोन्मीलति क्वचन कस्यचनानुरागः ॥३९॥

देवानिति ॥ इयं विदर्भसुभ्रूः भैमी नले रूपासौन्दर्याज्ञानुरज्यत नानुरक्ता । नलेऽनुरक्ता, परं रूपाद्धेतोर्नेत्यर्थः । यतो—निषधराजरुचो नलतुल्यकान्तीन्देवानिन्द्रादीन्त्यजन्ती । यदि नले रूपाद्धेतोररक्ष्यत, तर्हि तुल्यरूपानिन्द्रादीन्नात्यक्ष्यत, ते तावत्यकामत्साक्षान्नलानुरागे रूपं हेतुर्न भवतीत्यर्थः । तर्हि कथमनुरक्तेत्याशङ्क्याह—जन्मान्तरेऽधिगतं पूर्वकृतं कर्म तस्य यो विपाकः फलजननोन्मुखता तज्जन्मा तदुत्पन्न एव कस्यचन कस्यापि प्राणिनोऽनुरागः क्वचन कस्मिंश्चित्प्राणिन्युन्मीलत्युपपद्यते । पूर्वकृतकर्मवशादेव कोऽपि कस्मिंश्चित्प्रीतिं बिभर्ति । तथा च पूर्वजन्मकृतसुकृतविशेषादेवानपेक्षितान्यकारणविशेषो नलेऽनुरागस्तस्याः समभूदित्यर्थः । नलनिश्चयाभावेऽपि रूपसाम्ये सत्यपि नल एवानुरक्ततया नलाद्विशिष्टरूपोऽप्यन्यस्तदीयानुरागविषयो नाभूत, किंतु नल एवेत्यर्थान्तरन्यासतात्पर्यम् । अनुरागजनने उभयोरपि पूर्वकर्मविपाको हेतुर्ज्ञेयः । अरज्यत, इयम्विकरणाद्रज्यतेर्निरवोत्कर्षाभिप्रायक्रियाफलविवक्षायां तङ् ॥

क्व प्राप्यते स पतगः परिपृच्छ्यते यः
प्रत्येमि तस्य हि पुरैव नलं गिरेति ।
सस्मार सस्मरमतिः प्रति नैषधीयं
तत्रामरालयमरालमरालकेशी ॥ ४० ॥

क्वेति ॥ सस्मरा कामतरलाऽधीरा मतिर्यस्याः सा मरालकेशी कुटिलकेशी भैमी तत्र सभायां संदेहावसरे वेति मनसि विचार्य नैषधीयं नलसंबन्धिनं नलतुल्यकारिणममरालयं मरालं स्वर्गनिवासिनं देवाश्रयं वा हंसं प्रत्युद्दिश्य इति सस्मार । इति किम्—स पतगो हंसः क्व कस्मिन्स्थाने प्राप्यते । स कः—यो हंसः मया परितः सामस्त्येन एषु मध्ये सत्यं नलं मह्यं कथयेति विश्वास्यतया पृच्छ्यते । स एव किमिति प्रष्टव्य इति चेदाह—हि यस्मा-

१ 'पुष्पचापः' इति सुखावबोधासंमतपाठः ।

१ 'स्मरितेरत्वात्' इति सूचितम् ।

तस्य हंसस्य गिरा पुरेव संघटनाकाल इव नलं प्रत्येमि निश्चिनोमि। अदृष्टमज्ञातमपि च नलं तूत्यावसरे यथा हंसवचनेनाहं ज्ञातवती, तथाधुनापि नलनिश्चयाभावे परमाप्तस्य तस्य वचनान्नलं निश्चिनोमीति। मदनपरवशत्वेनाधीरत्वान्नलस्य निश्चयार्थमाप्ततमं हंसं सस्मारेत्यर्थः। प्राप्यत इत्यादि 'वर्तमानसामीप्ये' इति लट्। नियधसंबन्धि नैषधीयं नलवरणलक्षणं कार्यमुद्दिश्य हंसं सस्मारेति वा योजना। 'किल नैषधीयम्' इति पाठे नलं किल निश्चितं प्रत्येमीति योजना। 'प्रियदूतभूतम्' इति पाठो वा॥

एकैकमैक्षत मुहुर्महतादरेण
भेदं विवेद न च पञ्चसु कंचिदेषा।
शङ्काशतं वितरता हरता पुनस्त-
दुन्मादिनेव मनसेयमिदं तदाह[1] ॥ ४१ ॥

एकैकमिति॥ एषा भैमी महता आदरेण प्रयत्नेन मुहुरेकैकमिन्द्रादीनैक्षतालोकत। विशेषजिज्ञासया पुनः पुनः साभिप्रायं ददर्शेत्यर्थः। अथ च—महता दरेण भयेन पतिव्रतेयं पञ्चापि सादरं कथं पश्यतीत्यविदितसादरावलोकनकारणेभ्यो जनेभ्योऽपवादभयेनेत्यर्थः। परं पञ्चसु मध्ये कंचिदल्पीयांसमपि भेदं विशेषं नच नैव विवेद। अनन्तरं च वक्ष्यमाणप्रकारेण शङ्काशतं वितरता तन्वता, वितीर्य च पुनः तच्छङ्काशतं हरता वक्ष्यमाणप्रकारानेकयुक्तिभिर्नाशयता, मनसेयं भैमी इदं वक्ष्यमाणं बभाषे। चेतस्येवावि(व व्य)चारयदित्यर्थः। उत्प्रेक्षते—उन्मादिना इव उन्मादवानपि भूयसा आदरेण भयेन वा प्रत्येकमीक्षते, तारतम्यं न जानातीति शङ्काशतं च करोति, पुनस्त्यजति, ददाति च पुनरादत्ते च, इत्येवमव्यवस्थितचित्तो भवति। तथेयमप्यव्यवस्थितचित्ताभूदिति भावः। वेद स्मेति पाठे भूते 'लट् स्मे' इति लट्॥

तमेव विचारमाह—

अस्ति द्विचन्द्रमतिरस्ति जनस्य तत्र
भ्रान्तौ दृगन्तचिपिटीकरणादिरादिः।
स्वच्छोपसर्पणमपि प्रतिमाभिमाने
भेदभ्रमे पुनरमीषु न मे निमित्तम् ॥४२॥

अस्तीति॥ जनस्य द्विचन्द्रमतिः द्वौ चन्द्राविति बुद्धिः प्रसिद्धास्ति। परं तत्र भ्रान्तौ प्रमाणप्रमितैकत्वे एकस्मिन्नेव चन्द्रे विषये योऽनेकत्वप्रत्ययस्तस्मिन्विषये दृगन्तयोर्नेत्रप्रान्तयोर्यच्चिपिटीकरणं अचिपिटयोश्चिपिटयोः करणमङ्गुल्यग्रेण निपीडनं तदादिर्यस्य काचकामलादिदोषस्य स दृगन्तचिपिटीकरणादिदोष आदिः प्रथमो हेतुरस्ति। चन्द्रद्वयभ्रान्तौ चिपिटादिर्हेतुर्युक्तः। तथा—प्रतिमाया आदर्शादौ दृश्यमानस्य मुखादिप्रतिबिम्बस्याभिमानेऽपि प्रतिबिम्बस्फुरणरूपे भ्रान्तिज्ञानेऽपि स्वच्छस्यादर्शादेरुप समीपे यत्सर्पणं प्रापणं दर्पणसंनिधानं तन्निमित्तमस्तीति शेषः। दर्पणादिस्वच्छवस्तुसंनिधानादलीकमपि प्रतिबिम्बं भासत इत्यर्थः। मे मम पुनरमीषु दृश्यमानेषु भेदभ्रमे एकस्मिन्नले विषये यः पञ्चत्वसंख्याविशिष्टो बोधस्तस्मिन्विषये निमित्तं कारणं नास्ति। द्विचन्द्रभ्रान्तौ कारणमस्तीति भ्रान्तिर्युक्ता, एको नलः पञ्चधावभासत इति मदीया भ्रान्तिः कारणाभावान्न युक्ता। तस्मादन्य एवैते केचन भविष्यन्तीति स्वयमेव संशयं चकार परिजहार चेति भावः। 'अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोः' इति निघण्टुः॥

पक्षान्तरमाह—

किं वा तनोति मयि नैषध एव काय-
व्यूहं विधाय परिहासमसौ विलासी।
विज्ञानवैभवभृतः किमु तस्य विद्या
सा विद्यते न तुरगाशयवेदितेव ॥ ४३ ॥

किं वेति॥ वा पक्षान्तरे। असौ प्रत्यक्षदृश्यो नैषध एव कायव्यूहं शरीरसमूहं विधाय निर्माय मयि परिहासं प्रतारणक्रीडां तनोति किम्। यतो—विलासी। एकोऽप्यसौ नल एव मयि क्रीडावशात्कायव्यूहं तनोति, नत्वन्ये केचन सन्तीत्यर्थः। 'किं नो तनोति' इति पाठे काकुः। कायव्यूहरचनेऽस्य शक्तिः कथमित्यत आह—विशिष्टस्य ज्ञानस्य, विशिष्टं ज्ञानं यैरेवंविधा ये कलाग्रन्थास्तेषां वा वैभवं बाहुल्यं तद्बिभ्रतस्तस्य नलस्य तुरगाशयवेदितेवाश्वहृदयज्ञातृतेव सा कायव्यूहविधानरूपा विद्या किमु न विद्यते। अपि तु सापि विद्यत एवेति संभावना। 'विज्ञानवैभवभुवः' इति पाठे भुवः स्थानभूतस्येत्यर्थः। परिहासः, 'उपसर्गस्य घञि-' इति सूत्रे बहुलग्रहणाद्दीर्घाभावः॥

एको नलः किमयमन्यतमः किमैलः
कामोऽपरः किमु किमु द्वयमाश्विनेयौ।
किं रूपधेयभरसीमतया समेषु
तेष्वेव नेह नलमोहमहं वहे वा ॥ ४४ ॥

एक इति॥ वा पक्षान्तरे। इह एषु पञ्चसु मध्ये अयमेको नलः किम्, अन्यतमो द्वितीय ऐलः पुरूरवाः किम्, अपरस्तृतीयः कामः किम्, शिष्टं द्वयमाश्विनेयावश्विनीकुमारौ किमु, एवमुक्तेषु तेषु पञ्चस्वेवाहं नलमोहं किं न वहे। अपितु तेष्वेव नलबुद्धिं धारयामि, न तु कायव्यूहरचनादेक एव नलः पञ्चधा जात इत्यर्थः। यतः—रूपधेयभरस्य सौन्दर्यबाहुल्यस्य सीमतया परमकाष्ठात्वेन समेषु सदृशेषु। सादृश्याद्धि मोहो युक्तः। अन्यतमः, 'स्वार्थे तमप्'। सीमशब्दो नान्तः स्त्रीलिङ्गः॥

पूर्वं मया विरहनिःसहयापि दृष्टः
सोऽयं प्रियस्तत इतो निषधाधिराजः।
भूयः किमागतवती मम सा दशेयं
पश्यामि यद्विलसितेन नलानलीकान् ४५

पूर्वमिति॥ विरहनिःसहया वियोगविह्वलया मया सोऽयं निषधाधिराजः प्रियः प्राणेश इतस्ततः सर्वासु दिक्षु पूर्वमपि स्वयंवरसमयात्प्रागपि दृष्टः। य इदानीं दृश्यते स मोहवशात्सर्वत्र पूर्वमपि दृष्ट इत्यर्थः। प्रकृते किमित्यत आह—मम इयं भूयः पुनरपि सैव विरहोद्भ्रान्ततारूपा दशा आगतवती किम्। यद्विलसि-

१ 'पुराह' इति सुखावबोधासंमतः पाठः।

तेन यस्याः सामर्थ्येनालीकाञ्जसत्याञ्जलान्पश्यामि । अपिः पूर्वमित्यनेन, भूय इत्यनेन वा योजनीयः ॥

मुग्धा दधामि कथमित्थमथापशङ्कां
संक्रन्दनादिकपटः स्फुटमीदृशोऽयम् ।
देव्यानयैव रचिता हि तथा तथैषां
गाथा यथा दिगधिपानपि ताः स्पृशन्ति४६

मुग्धेति ॥ अथ पक्षान्तरे । अथवा मुग्धा मोहवशा सत्यहमित्थं 'अस्ति द्विचन्द्र–' (१३।४२) इत्याद्यनेकरूपामपशङ्कां दुःशङ्कां कथं दधामि । अपि त्वेतदयुक्तमित्यर्थः । यतः—स्फुटं निश्चितमयमीदृशो नलबाहुल्यज्ञानरूपः संक्रन्दनादीनामिन्द्रादीनां चतुर्णां कपटः । तेषां मायैवेत्यर्थः । हि यस्मादनया देव्यैव सरस्वत्यैव एषां पुरोवस्थितानां संबन्धिन्यो गाथाः 'भूमः–' इत्यादिवर्णनश्लोकास्तथा तेन तेन प्रकारेण रचिताः । यथा येन येन प्रकारेण ता गाथा दिगधिपानिन्द्रादीनपि स्पृशन्ति श्लिष्टशक्त्या अभिधावृत्त्या वदन्ति, न केवलं नलमित्यपेरर्थः । तस्मादिन्द्रादिभिरेव मत्प्रतारणार्थं मायया नलरूपं धृतमित्येव बुद्धिर्युक्ता, न तु पूर्वसंशयरूपेत्यर्थः । तथाशब्दस्य द्विरुपादानाद्यथाशब्दोऽपि द्विर्ज्ञातव्यः । 'कपटोऽस्त्री—' इत्यमरः ॥

एतन्मदीयमतिवञ्चकपञ्चकस्थे
नाथे कथं नु मनुजस्य चकास्तु चिह्नम् ।
लक्ष्माणि तानि किममी न वहन्ति हन्त
बर्हिर्मुखा धुतरजस्तनुतामुखानि ॥ ४७ ॥

एतदिति ॥ एतस्मिन्मदीयाया बुद्धेर्वञ्चके भ्रामके पञ्चके इन्द्रादिसमूहे तन्मध्ये स्थिते नाथे मम प्राणेशे मनुजस्य मनुष्यस्य चिह्नं स्वेदनिमेषरजःस्पर्शम्लानकुसुमत्वादिलिङ्गं कथं नु कथमिव चकास्तु प्रकाशताम् । अपित्विन्द्रादिमायया नलस्थस्यापि चिह्नस्याच्छादितत्वात्तन्न प्रकाशत इति युक्तमित्यर्थः । नलस्य स्वयमवञ्चकत्वेपि 'छत्रिणो गच्छन्ति' इति न्यायाच्चतुर्णामेव वञ्चकत्वेऽपि तत्सिद्धिः । परिहासवशाद्वा नलस्यापि वञ्चकत्वं युक्तम् । एतद्राजमुद्दश्यमानं स्वेदादिचिह्नमिति भिन्नपदं वा । हन्त खेदे । अमी बर्हिर्मुखा देवाः धुतं त्यक्तं रजो रेणुस्पर्शो यया एवंभूता तनुर्येषां तेषां भावो धुतरजस्तनुता रेणुस्पर्शरहिततनुता मुखं आदिर्येषां तानि स्वेदराहित्याम्लानपुष्पत्वनिर्निमेषत्वादीनि देवत्वव्यञ्जकानि तानि प्रसिद्धानि चिह्नानि किमिति न निवहन्ति धारयन्ति । मयि कृपया तावद्वोढुं युक्तानि परंतु नोद्वहन्ते । कष्टमित्यर्थः । बर्हिर्मुखपदं कृपाराहित्यसूचकम् । नलचिह्नानामस्फुटत्वेपि यदि देवचिह्नानि स्फुटान्यभविष्यन्तर्हि पारिशेष्यान्नलनिश्चयोऽप्यभविष्यत्, तान्यपि त्वस्फुटानीत्युभयथापि मया नलो निश्चेतुं न शक्यत इति भावः ॥

याचे नलं किममरानथवा तदर्थं
नित्यार्चनादपि ममाफलिनैरलं तैः ।
कंदर्पशोषणशिलीमुखपातपीत-
कारुण्यनीरनिधिगह्वरघोरचित्तैः ॥ ४८ ॥

याच इति ॥ अहं मह्यं यूयं नलं प्रयच्छतेत्यमराञ्जलं याचे किम् । अथ वा पूर्वापरितोषे । तदर्थं नलप्राप्त्यर्थं तेषां नित्यार्चनादपि ममाफलिनैः प्रार्थितमददद्भिस्तैर्देवैरलं पूर्वताम् । एतावन्ति दिनानि नित्यपूजनादपि ये नलं न प्रायच्छंस्तेऽधुना प्रार्थनमात्रेण कथं दास्यन्तीति वृथैव तत्प्रार्थनमित्यर्थः । किंविधैस्तैः—कंदर्पस्य शोषणाख्यः शिलीमुखो बाणस्तेन पातात्पतनात्पीतः शोषितः कारुण्यनीरनिधिः कृपासमुद्रो येषां तानि अत एव गह्वराणि गभीरबिलरूपाणि घोराणि कठिनानि चित्तानि येषामेवंभूतैः । यस्मात्कृतेऽपि पूजने कामायत्ततया निष्फलत्वादफलिनैरित्यर्थः । याचिर्द्विकर्मा । 'नदत्तफलैः' इति वा पाठः । फलशब्दादस्त्यर्थे 'फलबर्हाभ्यामिनन्' । ततो नञ्समासः ॥

देवानुपालभते—

ईशा दिशां नलभुवं प्रतिपद्य लेखा
वर्णश्रियं गुणवतामपि वः कथं वा ।
मूर्खान्धकूपपतनादिव पुस्तकाना-
मस्तं गतं बत परोपकृतिव्रतत्वम् ॥ ४९ ॥

ईशा इति ॥ हे दिशामीशा दिक्पाला लेखा देवाः, नलो भूः स्थानं यस्यास्तां नलप्रभवां वा वर्णश्रियं रूपशोभां प्रतिपद्य प्राप्य गुणवतां सौन्दर्यादिगुणयुक्तानामपि वो युष्माकं परोपकृतिरुपकार एव व्रतं तद्विद्यते येषां ते व्रतिनस्तेषां भावस्तत्वं कथं वा कुतो वा हेतोरस्तं गतं नष्टम् । स्वयमुपकारकत्वाभावेऽपि स्वाभिलषितायामपि मयि भवदर्थं तूत्पत्कारिणो नलस्याप्याकारे धृते सौन्दर्यादिगुणागमनात्परोपकारित्वमप्यागतं तन्मद्विषये कथं विनष्टमित्यर्थः । नलाकारधारणादेतावती मत्प्रतारणा किमिति क्रियत इति भावः । केषामिव—मूर्खा अश्रुतशास्त्राः पुरुषा एवाज्ञानवशादन्धाः त एव कृपा अतिगभीरा मूर्खरूपाः कूपास्तेषु पतनात्तदधीनत्वात्तृणविशेषलेखनीभूतनलप्रभवां रेखावर्णश्रियं लिप्यक्षरशोभां प्राप्य शुद्धत्वादिगुणयुक्तानां दोरकयुक्तानां च पुस्तकानां यथा वाचकपाठकानुपकारित्वमस्तं गच्छति । मूर्खस्य मूर्खत्वादेवोपकाराभावादन्येषां चासमर्पणादित्यर्थः । कूपपतितानामपि पुस्तकानामनुपकारित्वमेव । 'प्रतिपद्य स्थितानाम्' इति समानकर्तृकत्वम् ॥

यस्येश्वरेण यदलेखि ललाटपट्टे
तत्स्यादयोग्यमपि योग्यमपास्य तस्य ।
का वासनास्तु विभृयामिह यां हृदाहं
नार्कीतपंजलजमेति हिमैस्तु दाहम् ॥५०॥

यस्येति ॥ ईश्वरेण यस्य प्राणिनो ललाटपट्टे यद्योग्यमनुचितमप्यलेखि लिखितं तदयोग्यमपि तस्य योग्यमुचितमर्थमपास्य प्रतिक्षिप्य स्याद्भवेत् । योग्यमर्थं परित्यज्य तत्परिहारेण स्वयमेवायोग्यमपि भवेदिति यावत् । अतो योग्यतया कार्यकारणाभावे सति इह नलानेकत्वसंदेहेन निश्चयार्थं यां वासनां युक्तिमहं हृदा विभृयां धारयेयं सा का वासना युक्तिरस्तु भवतु । अपि तु एवंविधा युक्तिर्नास्ति । चिरेणान्यथाकर्तुं विचारितेऽपि ललाटपट्टलिखितादन्यथा न भवतीत्यर्थः । योग्यमप्यपास्यायो-

ग्यमेव भवतीत्यत्र दृष्टान्तमाह—यतः जलजमम्भोजं अर्कातपरुष्णैरपि सूर्यकिरणैर्दाहं न एति, हिमैस्तु पुनर्दाहं गच्छति । उष्णस्पर्शो दाहकः, शीतस्पर्शस्तु दाहशमक इति लोके दृष्टं, तदिदं विपरीतं जातं विरुद्धकार्योत्पत्तेर्विषमम् । नलस्य मम वा ललाटे यदीश्वरेणायोग्यमेव लिखितं, तर्हि परस्परयोग्यं परस्परं विहाय तस्य मम चायोग्यमेव भविष्यतीति कं प्रकारं चित्ते धारयिष्यामि । अपि तु न कमपीति देवानां न कोप्यपराध इति भावः ॥

तर्हि कल्पद्रुमो याच्यतामित्यत आह—

इत्थं यथेह मदभाग्यमनेन मन्ये
कल्पद्रुमोऽपि स मया खलु याच्यमानः ।
संकोचसंज्वरदलाङ्गुलिपल्लवाग्र-
पाणीभवन्भवति मां प्रति बद्धमुष्टिः ॥५१॥

इत्थमिति ॥ इह नलैकत्वेऽपि समये वा इत्थमनेन नलानेकत्वभवनप्रकारेण यथा यादृक् ममाभाग्यं नलानिश्चयाद्यथा दैवाभावो दृश्यते अनेन हेतुना प्रकारेण वा सोऽतिवदान्यः कल्पद्रुमोऽपि खलु निश्चितं मया नलं याच्यमानः सन् मां प्रति बद्धमुष्टिरतिकार्पण्यसंकुचत्करो भवतीत्यहं मन्ये । किंभूतः—संकोच एव संज्वरः संतापो येषामेवंविधानि दलानि किसलयान्येवाङ्गुलयो येषामेवंभूताः पल्लवा एवाग्रपाणयो हस्ताग्राणि यस्य एवंभूतोनेवंभूत एवंभूतो भवन् । अन्यस्यापि बद्धमुष्टेरङ्गुलयः संकुचिता भवन्ति । कल्पवृक्षः कल्पितदानशीलोऽपि मदभाग्यवशान्मां प्रत्यदातैव भवेदिति भावः । अदातृत्वनिश्चयात् 'भवति' इति वर्तमानवत्प्रत्ययः ॥

देव्याः करे वरणमाल्यमथार्पये वा
यो वैरसेनिरिह तत्र निवेशयेति ।
सैषा मया मखभुजां द्विपती कृता स्या-
त्स्वस्मै तृणाय तु विहन्मि न बन्धुरत्नम् ॥५२॥

देव्या इति ॥ अथवा इह स्वयंवरे एतेषु पञ्चसु मध्ये वा यो वैरसेनिः सत्यनलः तं त्वं तावज्जानासि अतस्तत्र एतां मालां निवेशय निक्षिपेत्युक्त्वा देव्याः सरस्वत्याः करे वरणमाल्यं वरणमधूकमालामर्पये दद्यामीति संभावना । स्वयमेवैतदूपयति—एवं क्रियमाणे सा एषा देवी मया मखभुजां देवानामिन्द्रादीनां द्विपती वैरिणी कृता स्यात् । तन्मायाप्रकटनादित्यर्थः । भवतु नाम सा तद्वैरिणी स्वकार्यसिद्धिस्तु साध्येत्यत आह—तु पुनः तृणतुल्यायातिनिःसाराय स्वस्मै स्वरूपाय अकिंचित्करात्मकार्यसिद्धये बन्धुरत्नं सुहृन्मध्येऽतिश्रेष्ठां देवीं न विहन्मि । मम यत्किंचिद्भवतु, परं तु देवद्वेषरूपं मिथ्याविघातं न करोमीत्यर्थः । अन्योऽपि सुज्ञस्तृणार्थं रत्नं न विनाशयति । द्विषति, 'द्विषोऽमित्रे' इति शतरि उगिदचां नदीप् । मखभुजां, 'द्विषः शतुर्वा' इति षष्ठी ॥

यः स्यादमीषु परमार्थनलः स माला-
मङ्गीकरोतु वरणाय ममेति चैनाम् ।
तं प्रापयामि यदि तत्तु विसृज्य लज्जां
कुर्वे कथं जगति शृण्वति ही विडम्बः ॥५३॥

य इति ॥ अमीषु पञ्चसु भवत्सु मध्ये यः परमार्थनलः सत्यनलः स्यात् स मम वरणाय मालामङ्गीकरोत्वित्येवं प्रकारेण इत्युक्त्वा चेति वा । यदि एनां च मालां तत्र तेषु मध्ये तं सत्यनलं प्रापयामि, तत्पुनर्लज्जां विसृज्य कथं कुर्वे । अपित्वेवं कर्तुमयुक्तम् । यतः—जगति सर्वस्मिन्सभाजने शृण्वति सति ही कष्टं विडम्बः । लज्जात्यागादतिपरिहासो भविष्यतीति शेषः । सर्वेषां समक्षमेवं लज्जात्यागात्सर्वेऽप्युपहसिष्यन्तीत्यर्थः । ही इति खेदे । हिर्यस्मादर्थे, ह्रीः खेदे इति वा । इति चेति समुदायः प्रकारे । यदि चेति वा ॥

इतरनलतुलाभागेष शेषः[1] सुधाभिः
स्नपयति मम चेतो नैषधः कस्य हेतोः ।
प्रथमचरमयोर्वा शब्दयोर्वर्णसख्ये
विलसति चरमेऽनुप्रासभासां विलासः ५४

इतरेति ॥ इतरैश्चतुर्भिर्नलैस्तुलां साम्यं भजत इति भाग्, एष शेषः पञ्चसु मध्ये अन्यः पञ्चमो नैषधः मम चेतः कस्य हेतोः केन कारणेन सुधाभिरमृतैः स्नपयति आप्लुतमिव करोति । रूपसाम्ये सत्यप्येष एव मम मनसे यतो रोचते, तस्मादयमेव सत्यनलो भविष्यतीत्याशयः । सत्यनलत्वज्ञापकं निरुपाधिकपरमप्रेमसंवादं दृष्टान्तेन प्रथयति—प्रथमेति । वाथवा युक्तमेतत् । प्रथमचरमयोरादिमान्त्ययोः शब्दयोर्वर्णैरक्षरैः सख्ये मैत्र्यां सत्यामपि चरमे पाश्चात्ये शब्देऽनुप्रासभासां छेकानुप्रासवृत्त्यनुप्रासलाटानुप्रासान्त्यशब्दालंकारकान्तीनां विलास उल्लासश्चमत्कारो विलसति विशेषेण शोभते । वर्णसाम्ये सत्यपि प्रथमस्यानायासगतत्वात्, द्वितीयस्य तु सदृशस्य पश्चाद्दूरिप्रयत्नसाध्यत्वाच्चरमे यद्यनुप्रासत्वं स्फुरति, तथापि द्वितीयसाहित्ये प्रथमेऽपि यथाऽनुप्रासत्वमस्ति तथा सुन्दरान्तरविच्छेदेन पश्चादवलोक्यमानतयैव पञ्चमश्चेतसे रोचते, नत्वत्र सत्यत्वं प्रयोजकम् । अतः सर्वेऽपि तुल्या एवेति भावः । अत्रायमेव श्लोको दृष्टान्तः । अत्रत्ययोरेव प्रथमचरमशब्दयोर्वर्णसाम्ये सत्यपि चरमे चरमशब्द एवानुप्रासातिशयः न प्रथमशब्दे प्रथम इत्युक्ते नानुप्रासः । प्रथमचरमयोरित्युक्ते तु चरम एवानुप्रासातिशयो दृश्यते न तथा प्रथम इत्यर्थ इति वा । यद्वा—आद्यपादचतुर्थपादयोर्वर्णसाम्ये सत्यपि चरमे चतुर्थपादेऽनुप्रासभासां विलासो विलसति । उभयोरनुप्रासत्वे सत्यपि चतुर्थेऽनुप्रासभासां विलास इत्युक्तेस्तत्रैवानुप्रासत्वम्, न तु प्रथमे । 'स्नपयति' इति मित्वपक्षे ह्रस्वः । कस्य हेतोः, 'षष्ठी हेतुप्रयोगे' इति षष्ठी ॥

इति मनसि विकल्पानुद्यतः संत्यजन्ती
क्वचिदपि दमयन्ती निर्णयं नाससाद ।
मुखमथ परितापास्कन्दितानन्दमस्या
मिहिरविरचितावस्कन्दमिन्दुं निनिन्द ५५

इतीति ॥ इत्युक्तप्रकारेण मनसि उद्यत उत्पद्यमानान्विकल्पाननेकशङ्कावलम्बनबोधान्दोषोद्भावनेन संत्यजन्ती दमयन्ती क्वचिदपि निर्णयं निश्चयं नाससाद । पञ्चसु मध्ये कस्मिन्नपि पुंसि नल-

१ 'तुलायामेष' इति सुखावबोधासंमतः पाठः ।

निश्चयं न प्रापेति वा । अथ पश्चान्नलनिश्चयाभावात्परितापेनास्कन्दितोऽभिभूत आनन्दो यस्य । परितापेन कृत्वा आस्कन्दितोऽप्राप्त आनन्दो येनैवंभूतं वास्या मुखं कर्तृ । मिहिरेण सूर्येण रचितोऽवस्कन्दः पराभवो यस्यैवंविधमिन्दुं निनिन्द । निष्प्रभचन्द्रसदृशमभूदित्यर्थः । आस्कन्दनमास्कन्दः पराभवः । परितापेन य आस्कन्दः स संजातो यस्य एवंविध आनन्दो यस्येति कारकादिस्वाद्रूपसिद्धिः ॥

श्रीहर्ष कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
स्वादूत्पादभृति त्रयोदशतयादेश्यस्तदीये महा-
काव्येऽयं व्यरमन्नलस्य चरिते सर्गो रसाम्भोनिधिः ॥

श्रीहर्षमिति ॥ अर्थं पूर्ववत् । स्वादूत्पादभृति सहृदयहृदयाह्लाददायित्वात्स्वादुरसोत्पत्तिधारकेऽत्यन्तमधुरनवार्थसहिते त्रयोदशतया आदेश्योऽभिधेयः सर्गो व्यरमत् । समाप्त इत्यर्थः । व्यरमत्, 'व्याङ्परिभ्यो रमः' इति परस्मैपदम् ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे त्रयोदशः सर्गः ॥

चतुर्दशः सर्गः ।

अथाधिगन्तुं निषधेश्वरं सा
प्रसादनामाद्रियतामराणाम् ।
यतः सुराणां सुरभिर्नृणां तु
सा वेधसासृज्यत कामधेनुः ॥ १ ॥

अथेति ॥ अथ विकल्पदूषणानन्तरं सा भैमी निषधेश्वरं नलमधिगन्तुं निश्चेतुं प्राप्तुं च षोडशोपचारैरमराणां प्रसादनां परितोषणमाद्रियत आदरेण चकार । यतो वेधसा सुराणां कामधेनुरभिलाषप्रसूः सुरभिर्गौरसृज्यत सृष्टा, नृणां तु पुनः कामप्रसूः सा देवप्रसादना सृष्टा । तस्मान्नलनिश्चयार्थं प्राप्त्यर्थं च देवपरितोषणं चकारेति युक्तमित्यर्थः ॥

अथाधिगन्तुं निषधेशमेषां प्रसादनं दानवशात्रवाणाम् ।
अचेष्टतासौ महतीष्टसिद्धिराराधनादेव हि देवतानाम् ॥ १ ॥

अथेति । क्षेपकः ॥ अचेष्टत अकृत । शत्रव एव शात्रवाः । प्रज्ञादित्वात्स्वार्थेऽण् ॥

पूर्वोक्तार्थसमर्थनार्थमर्थान्तरन्यासमाह—

प्रदक्षिणप्रक्रमणालवाल-
विलेपधूपाचरणाम्बुसेकैः ।
इष्टं च मृष्टं च फलं सुवाना
देवा हि कल्पद्रुमकाननं नः ॥ २ ॥

प्रदक्षिणेति ॥ हि यस्मात् देवा नोऽस्माकं मनुष्याणां कल्पद्रुमकाननं बहवः कल्पवृक्षा एवेति कयेरुक्तिः । किंभूता देवाः—प्रदक्षिणं प्रक्रमणं वलयाकारं परिभ्रमणं तदेवालवालं वृक्षमूले जलधारणार्थं वलयाकारः सेतुः स च विलेपश्चन्दनादिलेपश्च धूपो दशाङ्गादिस्तेषामाचरणानि करणानि तान्येवाम्बुसेकाः (तैः) प्रदक्षिणाद्याचरणं चोदकल्पनानि च तैर्वा । कृत्वा इष्टमभिलषितं च मृष्टं च स्वभावसुन्दरं सुस्वादु च फलं मनोरथरूपमन्नादिकं च सुवाना उत्पादयन्तः । वृक्षा अप्यालवालवृक्षायुर्वेदोक्ततरुदोषनाशक(नि) विडङ्गादिलेपदोहदधूपाम्बुसेकैरिष्टं मृष्टं च फलं सुवते । 'आवरण—' इति पाठे अङ्गप्रत्यङ्गदेवतापूजा कण्ठकावृतिश्चेति व्याख्येयम् ॥

पूजाप्रारम्भार्थं प्रथमं नमस्कारमाह—

श्रद्धामयीभूय सुपर्वणस्ता-
न्ननाम नामग्रहणाग्रकं सा ।
सुरेषु हि श्रद्दधतां नमस्या
सर्वार्थसिद्ध्यङ्गमिथः समस्या ॥ ३ ॥

श्रद्धेति ॥ सा श्रद्धामयीभूय आस्तिक्यप्रचुरा भूत्वा ताम्रलवेषधारिणः सुपर्वणो देवान्नामग्रहणाग्रकमिन्द्राय नम इत्यादिनामग्रहणपूर्वकं ननाम ववन्दे । हि यस्मात्सुरेषु श्रद्दधतां श्रद्धावतां नमस्या नमस्कार एव सर्वार्थसिद्धेः यान्यङ्गानि साधकानि तेषां मिथः समस्या परस्परपूरणहेतुः श्रद्धापूर्वं देवनमस्कार एव कारणसामग्रीसंपादकः, तस्माद्देवं नमस्कृतवतीत्यर्थः । समस्यापि पदानां परिपूरणं करोति । श्रद्धामयी, प्रकृतवचने मयट् । अग्रकम्, 'शेषाद्विभाषा' इति कः(प) । नमःकरणं नमस्या, 'नमोवरिवः—' इति क्यच् ॥

देवपूजाङ्गध्यानं प्रथममाह—

यत्तान्निजे सा हृदि भावनाया
बलेन साक्षादकृताखिलस्थान् ।
अभूदभीष्टप्रतिभूः स तस्या
वरं हि दृष्टा ददते परं ते ॥ ४ ॥

यदिति ॥ सा अखिलस्थान्सर्वगतान्तानिन्द्रादीन्भावनाया ध्यानस्य बलेन सामर्थ्येन निजे हृदि यत्साक्षादकृत प्रत्यक्षीचकार । सर्वगतानपि ध्यानबलेनैकत्रानीय ददर्शेत्यर्थः । स साक्षात्कार एव तस्या भैम्या अभीष्टस्य नलप्राप्तिलक्षणस्य प्रतिभूर्दाननिश्चयकर्ता अभूत । हि यस्माद्दृष्टास्ते देवाः परं श्रेष्ठं वरमभीष्टं परिणेतारं च ददते प्रयच्छन्ति । नहि देवदर्शनं निष्फलं भवतीत्यर्थः ॥

इदानीं देवपूजामाह—

सभाजनं तत्र समर्ज तेषां
सभाजने पश्यति विस्मिते सा ।

---

१ 'अत्रामरप्रसादनायाः कामधेनुत्वेन रूपणाद्रूपकालंकारः' इति **जीवातुः** । २ 'पूर्वोक्त एवार्थो भङ्ग्यन्तरेण निबद्धः । अत एव पाठान्तरम् । केषुचिदादर्शेषु त्वयं श्लोको नास्त्येव' इति **सुखावबोधा** । अत एव **जीवातौ** न व्याख्यायि ।

१ 'अत्र प्रदक्षिणप्रक्रमणालवालविलेपधूपाचरणाम्बुसेकैः, देवा, कल्पद्रुमरूपाश्च समस्तवस्तुनिरूपकम्' इति **जीवातुः** । २ 'निश्चय—' इति **जीवातुः** । ३ 'सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः' इति **जीवातुः** ।

आमुद्यते यत्सुमनोभिरेवं
फलस्य सिद्धौ सुमनोभिरेव ॥ ५ ॥

सभाजनमिति ॥ सा तत्र स्वयंवरस्थाने अकस्मादेव देवपूजारम्भादत्यादरेण च पूजनाद्विस्मिते साश्चर्ये सभाजने सभालोके पश्यति सति, तमनादृत्य वा । तेषां देवानां सभाजनं प्रीत्याराधनं ससर्ज चक्रे । यद्यस्मात्फलस्याभीष्टस्य सिद्धौ दाने सुमनोभिः शोभनचित्तैरेवंभूतैरेव सद्भिः सुमनोभिर्देवैरेवमत्यादरपूजनेन कृत्वा आमुद्यते हृष्टैर्भूयते । तस्मादेवमपूजयदित्यर्थः । एवमेव एवं सत्येवेत्येवकारयोजना वा । पुष्पैरपि फलसिद्ध्यर्थमामुद्यते विकस्वरीभूयते । सभाजने, 'यस्य च भावेन' इति, 'षष्ठी चानादरे' इति वा सप्तमी ॥

वैशद्यहृद्यैर्ग्रदिमाभिरामै-
रामोदिभिस्तानथ जातिजातैः ।
आनर्च गीत्यन्वितपद्यपद्यैः सा
स्तवप्रसूनस्तवकैर्नवीनैः ॥ ६ ॥

वैशद्येति ॥ अथ सा नवीनैर्नवैः स्तवैः स्तुतिश्लोकरूपैः प्रसूनस्तवकैः पुष्पगुच्छैः स्तुतिश्लोकैः पुष्पगुच्छैश्च वा तानिन्द्रादीनानर्च । किंविधैः–वैशद्येन स्पष्टतया प्रसादगुणेन हृद्यैः सहृदयप्रियैः । अथ च—शुभ्रत्वेन मनोज्ञैः । तथा—ग्रदिम्ना निष्ठुरटवर्गादिवर्णरहितश्रुतिमधुरवर्णरचनजनितेन माधुर्येण । अथ च—सौकुमार्येण अभिरामैः । अत एव—आमोदिभिर्हृद्यजनकैः । अथ च—सौगन्ध्यसहितैः । तथा—जातेः पाङ्क्तिशत्यक्षरजनितचरणान्तायाः, अनुष्टुबादिजातेर्वा जातैः निष्पन्नैः । अथ च—मालतीसंभवैः । तथा—विशेषरूपया गीत्या अन्विता युक्ताः पद्यपदाः पद्यचरणाः श्लोका यत्र । अथ च—गुञ्जन्मधुकरैः । वैशद्यं शब्दार्थालंकारापशब्दभावदोषराहित्यं तेन मनोज्ञैर्वा । 'जातिश्छन्दसि सामान्ये मालत्यां गोत्रजन्मनोः' । 'गीतिश्छन्दसि गाने च' इति विश्वः । हृद्येति, 'हृदयस्य प्रिय' इति यत् । 'हृदयस्य हृल्लेखयदण्लासेषु' इति हृत् । अभिरम्यते यैस्तैरभिरामैः 'अकर्तरि च कारके–' इति चकारादसंज्ञायामपि करणे घञ् । जात्यादिलक्षणं छन्दोग्रन्थेभ्यो ज्ञातव्यम् । 'न वा कैः' इति पाठे कैः वा स्तवस्तवकैः न आनर्च, अपि तु नानाप्रकारैः स्तवप्रसूनस्तवकैरपुपूजदित्यर्थः ॥

पूजानन्तरं पुनरपि ध्यानमाह—

हृत्पद्मसद्मन्यधिवास्य बुद्ध्या
दध्यावथैतानियमेकताना ।
सुपर्वणां हि स्फुटभावना या
सा पूर्वरूपं फलभावनायाः ॥ ७ ॥

हृदिति ॥ अथ पूजानन्तरमियमेकताना[1]ऽनन्यवृत्तिस्तत्परा सती हृदेव पद्मं तदेव सद्मनि गृहे एतानिन्द्रादीन्बुद्ध्याधिवास्याधिष्ठाप्य दध्यौ । सर्वगतानामपि देवानां हृदये बुद्ध्या समारोपितं रूपं ध्यानेन साक्षादकृतेति यावत् । हि यस्मात्सुपर्वणां देवानां या स्फुटा भावना ध्यानबलेन प्रत्यक्षता सा फलभावनायाः कार्यसिद्धेः पूर्वरूपं प्रथमं स्वरूपम् । कारणस्य कार्यापेक्षया नियतप्राग्भावित्वादेवानां प्रत्यक्षतायाः कार्यमात्रं प्रति कारणत्वात्कारणसामग्रीरूपां देवप्रत्यक्षतां ध्यानेनाकृतेत्यर्थः । पूजायाः पूर्वमनन्तरं च ध्यानस्येष्टत्वात् 'यत्तान्'[2] (१४।४) इत्यस्यास्य (१४।७ च श्लोकस्य न पौनरुक्त्यम् । 'उपान्वध्याङ्वसः' इत्यत्राण्यन्तस्य वसेर्ग्रहणात् 'स्वहस्तदत्ते मुनिमासने–' इतिवण्ण्यन्तस्य वसेः प्रकृत्यन्तरत्वात् हृत्पद्ममद्मनीत्याधारस्य न कर्मत्वम् ॥

भक्त्या तयैव प्रससाद तस्या-
स्तुष्टं स्वयं देवचतुष्टयं ततः ।
स्वेनानलस्य स्फुटतां यियासोः
फूत्कृत्यपेक्षा कियती खलु स्यात् ॥ ८ ॥

भक्त्येति ॥ तस्याः पातिव्रत्यादिगुणैरादावेव भक्तिनिरपेक्षं स्वयमात्मनैव तुष्टं तदिन्द्रादिदेवचतुष्टयं तस्यास्तयैवाल्पीयस्यापि भक्त्या पुनः प्रससाद प्रसन्नमभूत् । अल्पीयस्या भक्त्या प्रसन्नतायां दृष्टान्तमाह—खलु यस्मात्स्वेनात्मनैव स्फुटतां प्राकट्यं यियासोर्यातुमिच्छतो लब्धबहुसंधुक्षणतया आसन्नप्रज्वलनस्यानलस्य वह्नेः कियती संधुक्षणार्थं फूत्कृतेर्मुखपवनस्यापेक्षा स्याद्भवेत् । अपित्वल्पैव । तादृशोऽग्निर्द्वित्रैरेव फूत्कारैः संधुक्षितो दीप्यतेतरामित्यर्थः । तस्मात्स्वतःप्रसन्नस्याल्पयापि भक्त्या पुनः प्रसन्नत्वं युक्तमित्यर्थः । 'तस्याश्चरित्रादथ ते पवित्रात्प्रागेव दृष्टा झटिति प्रसेदुः' इत्यपि पाठः स्पष्टार्थः ॥

प्रसादफलमाह—

प्रसादमासाद्य सुरैः कृतं सा
ससार सारस्वतसूक्तिसृष्टेः ।
देवा हि नान्यद्वितरन्ति किंतु
प्रसद्य ते साधुधियं ददन्ते ॥ ९ ॥

प्रसादमिति ॥ सा भैमी सुरैः कृतं प्रसादमासाद्य सरस्वत्या इमाः सारस्वत्यस्ताश्च ताः सूक्तयश्च शोभनोक्तयः श्लेषवाक्यानि तासां सृष्टेर्निर्माणस्य । रचनामित्यर्थः । ससार । श्लेषार्थं संदेहं परित्यज्य गाथाक्रमेणेन्द्रादींश्चतुरोपि ज्ञात्वा अयं पञ्चमो नल इत्यजानादित्यर्थः । देवीवचनस्मरणरूपः को नाम प्रसाद इत्यत

---

१ 'अत्रोभयेषामपि सुमनसामुभयोरप्यामोदयोश्च फलयोरभेदाध्यवसायेनायमर्थान्तरन्यासः' इति **जीवातुः** । २ 'अत्र स्तवानां प्रसूनस्तवकानां चोभयेषामप्यर्चनसाधनत्वेन प्रकृतानां धर्मतोऽल्पे(तौल्ये)नौपम्यस्य गम्यमानत्वात्केवलप्रकृतविषया तुल्ययोगिता' इति **जीवातुः** ।

१ 'सुखावबोधायां तु यत्तान्–' (१४।४) इति श्लोकोत्तरमेतमपि व्याख्याय 'पूर्वोक्तार्थ एवायोऽत्र निबद्धः । अत एव पाठान्तरम्' इत्युपसंहृतम् । अत एव **जीवातौ** न व्याख्यायि । २ 'ये तु स्थूलबुद्धयः 'तत्र सामान्यग्रहणम्' इति मत्वा 'हृत्पद्मसद्म' इति कर्मपदं पृथक्कृत्य 'न्यधिवास्य' इति योजयन्ति । तदज्ञानविलसितमित्युपेक्ष्यम्' इति **सुखावबोधा** । ३ 'अत्र वाक्यद्वये भक्तिफूत्कृत्योः कार्यानपेक्षितलक्षणसमानधर्मस्यैव कारणो यच्छब्दाभ्यां बिम्बप्रतिबिम्बतयोक्तेर्दृष्टान्तालंकारः' इति **जीवातुः** ।

आह—हि यस्मादेवा अन्यत्किंचिन्न वितरन्ति ददति किंतु देवाः प्रसद्य प्रसन्ना भूत्वा साध्वीं कार्यसाधिकां धियं बुद्धिमेव ददन्ते। तदुक्तं भारते—'न देवा दण्डमादाय रक्षन्ति पशुपालवत्। यं तु रक्षितुमिच्छन्ति सुबुद्ध्या योजयन्ति तम्॥' इति। तस्मादयमेव प्रसादो युक्त इत्यर्थः। सृष्टेः, 'अभीगर्थ-' इति कर्मणि षष्ठी। ददन्ते, 'दद दाने' इत्यस्य रूपम्॥

स्मरणमेव विशदयति—

शेषं नलं प्रत्यमरेण गाथा
या या समार्था खलु येन येन।
तां तां तदन्येन सहालगन्तीं
तदा विशेषं प्रतिसंदधे सा॥ १०॥

शेषमिति॥ शेषं पञ्चमं सत्यनलं प्रति लक्ष्यीकृत्य 'ब्रूमः किम्-' (१३ स. ३ श्लो.) इत्यादिः 'आकर्ण्य-' (१३।८) इति यावत्, 'एष' (१३।१०) इत्यादिः 'साधारणीम्-' (१३।१४) इति यावत्, 'दण्डम्-', (१३।१६) इत्यादिः 'गुम्फः-' (१३।२०) इति यावत्, 'या सर्वतः-' (१३।२२) इत्यादिः 'शङ्का-' (१३।२६) इति यावत्, या या गाथा प्रसादात्पूर्वं येन येनेन्द्रादिदेवेन सह समार्था तुल्यार्था ['सरस्वत्योक्ता' इति शेषः] सा भैमी तां तां 'ब्रूमः-' (१३।३) इत्यादिगाथां तदा प्रसादानन्तरं तदन्येन तस्मात्तस्मादिन्द्रादिरूपान्मुख्यादर्थादन्येन श्लेषशक्त्या प्रतिभासमानेन नलरूपेणार्थेन सह खलु निश्चितमलगन्तीममंबद्धार्थां विशेषं प्रति स्वस्वाकारधारणाद्विघ्नमिन्द्रादिदेवं प्रति संदधे योजयामास। इयमेतस्य गाथा इयमेतस्य गाथेति संबन्धं चकारेत्यर्थः। 'ब्रूम—' (स. १३ श्लो. ३) इत्यादौ 'बालां विलोक्य—' (१३।२७) इति यावन्नलस्य सर्वत्रानुस्यूतत्वादिन्द्रादीनां तु चतसृषु चतसृष्वेव स्वस्वगाथास्वनुस्यूतत्वात्तां तामिन्द्रादिगाथां तदन्येन वह्न्यादिना सह अलगन्तीं विशेषमजानात्। या इन्द्रेण नलेन च समानार्था तामिन्द्रविषयामेव सस्मार। एवमितरदेवत्रितयेऽपि प्रत्येकं गाथामेकविषयामेव सस्मार। एवं चतसृष्वपि गाथासु नलस्यानुवृत्तेरिन्द्रादीनां च व्यावृत्तेरावापोद्वापाभ्यां एते देवाः, अयमेव नलः, इत्यज्ञासीदित्याशय इति वा। प्रतिश्लोकं गाथात्वेपि चतुर्भिश्चतुर्भिः श्लोकैरेकैकस्यप्रतिपादनादेकगाथात्वसमारोपात्प्रत्येकपर्यवसानाद्बहुवचनम्। यद्वा—पञ्चमं नलं प्रति या या 'अत्याजि' (१३।२८) 'येनामुना' (१३।२९) 'यच्चण्डिमा' (१३।३०) 'किं ते तथा—' (१३।३१) इत्यादिका गाथा येन येन इन्द्रादिना सह संबद्धार्था तदन्येन वह्न्यादिना सहालगन्तीं तां गाथामेव विशेषं भेदं जानाति स्म। एकैकस्या गाथाया एकैकदेवपर्यवसानाच्चतसृणामपि गाथानां नले पर्यवसानात्परिशेषप्रमाणात् अयं पञ्चम एव नल इति विशेषमज्ञासीदित्यर्थः। अस्मिन्पक्षे—अमुमेवार्थमुक्तिविशेषेण प्रकटयितुमाह—एकैकेतीत्युत्तरश्लोकस्यावतारिका कर्तव्या॥

एकैकवृत्तेः प्रतिलोकपालं
पतिव्रतात्वं जगृहुर्दिशां याः।
वेद स्म गाथा मिलितास्तदासा-
वाशा इवैकस्य नलस्य वश्याः॥ ११॥

एकैकेति॥ या गाथा एकैकवृत्तेरेकैकस्मिन्नेकस्मिन्निन्द्रे, अग्नौ, यमे, वरुणे च वर्तमानत्वात्प्रतिलोकपालमेकैकदिक्पालं प्रति दिशामैन्द्र्यादीनां पतिव्रतात्वं जगृहुरङ्गीचक्रुः। प्राच्यादीनामिन्द्रादिप्रतिनियतदेववृत्तितया यत्पातिव्रत्यं तत्पातिव्रत्यं, तेनैवाकारेण या 'अत्याजि-' (१३ सर्गे २८ श्लोक) इत्यादिगाथा अङ्गीचक्रुरित्यर्थः। ता गाथा मिलिताश्चतस्रोऽपि तदा प्रसादानन्तरमसावेकस्य केवलस्य नलस्य वश्या नलैकप्रवणा नलैकाभिधायिनीरेव वेद स्म अज्ञासीत्। का इव—आशा इव। मिलिता दिशो यथा नलस्य वश्याः ऐन्द्र्यादीनां दिशामिन्द्राद्येकैकप्रवणत्वेपि सर्वासां दिशां चक्रवर्तिनलैकवश्यत्वं यथा, तथा गाथानामपीत्यर्थः। आशा अर्थिनां मनोरथाः वदान्यतया नलस्य यथा वश्या इति वा। 'दासाः' इति वा पाठः। भ्रान्तिदशायामुभयार्थत्वम्। प्रसादानन्तरं तु नलैकार्थत्वं वेद स्मेति भावः। दिशां पातिव्रत्यं गाथाभिर्गृहीतमित्यर्थः॥

या पाशिनेवाशनिपाणिनेव
गाथा यमेनेव समाग्निनेव।
तामेव मेने मिलितां नलस्य
सैषा विशेषाय तदा नलस्य॥ १२॥

येति॥ 'किं ते-' (१३।३१) इत्यादिर्या गाथा पाशिनेव वरुणेनेव समा तुल्यार्था नत्वन्येनेन्द्रादिना, या च 'अत्याजि-' (१३।२८) इत्यादिर्गाथा अशनिपाणिना इन्द्रेणेव समा नत्वन्येन देवेन या च 'यच्चण्डिमा-'(१३।२९) इत्यादिर्गाथा यमेनेव समा नत्वन्येन, या च 'येनामुना-' (१३।३०) इत्यादिरग्निनेव तुल्या नत्वन्येन, नलस्य संबन्धिनीं मिलितां समुदितां चतुष्टयरूपां तां गाथामेव तदा देवप्रसादानन्तरं सैषा भैमी नलस्य विशेषायेन्द्रादिभ्यो भेदज्ञानाय मेने। इन्द्रादीनामेकैकस्यामेव गाथायां वर्तमानत्वात्, नलस्य तु सर्वत्रानुगतत्वात् 'अत्याजि-' इत्यादिगाथाचतुष्टयप्रतिपाद्यो यः, स एव नल इति तामेव गाथां मिलितां नलस्य भेदज्ञापिकामज्ञासीदिति भावः। या नलस्य गाथेति वा संबन्धः। या पाशिनेवेन्द्रेणेव, यमेनेवाग्निनेव समा गाथा नलस्य संबन्धिनी मिलितां तामेवानलस्य नलव्यतिरिक्तस्य इन्द्रादेर्भेदाय मेने। मिलितया तया कृत्वा नले निश्चिते सति गान्तरीयकत्वात्तदितरे देवा अपि तयैव निश्चिता इति भाव इति वा। मिलितां तामेव गाथां नलस्य विशेषाय तथा नलेतरस्येन्द्रादेर्भेदाय मेने इति वा व्याख्येयम्। या पाशिनेवेत्यादेरेवकारान्परस्परसमुच्चयार्थानभ्युपगम्य या नलसंबन्धिनी गाथा पाशिनापि, इन्द्रेणापि यमेनापि, अग्निनापि, तुल्यार्थाभूत् तां 'देवः पतिः-' (१३।३४) इत्यादिं मिलितां पञ्चार्थां गाथां देवप्रसादादनन्तरं नलस्यैव विशेषाय मेने। देवैः प्रभुभिः स्वीयस्वीयाकारेषु धृतेषु पूर्वं पञ्चार्थत्वेन प्रतिभातामपीदानीमेकस्य नलस्यैव प्रतिपादिकामज्ञासीदिति भाव इति। 'देवः पतिः-'(१३।३४)तृतीयमेव गाथा विषय इति ज्ञेयम्। अवधारणार्थैवप्येका(व)कारश्चियमेव गाथा विषय इति व्या-

ख्येयम् । अयं श्लोकः 'शेषं नलम्' 'एकैकवृत्तेः' (१४।११) इति द्वाभ्यां श्लोकाभ्यां समानार्थः । अनलस्येति प्रत्येकपर्यवसायित्वादेकवचनम् ॥

निश्चित्य शेषं तमसौ नरेशं
प्रमोदमेदस्वितरान्तराभूत् ।
देव्या गिरां भावितभङ्गिराख्य-
चित्तेन चिन्तार्णवयादसेयम् ॥ १३ ॥

निश्चित्येति ॥ असौ भैमी शेषमवशिष्टं तं पञ्चमं पूर्वोक्तप्रकारेण नरेशं नलं निश्चित्य प्रमोदेन प्रकृष्टहर्षेण मेदस्वितरमत्यन्तपरिपुष्टं सोल्लासमान्तरं मानसं यस्या एवंभूताभूत् । नले निश्चिते सति नितरां हृष्टाभूदित्यर्थः । रलयोः सावर्ण्यान्नलश्चासावीशश्च तमिति वा । अनन्तरं च देव्याः सरस्वत्याः गिरां वचनानां भाविता पर्यालोचिता भङ्गिः प्रकारो यया विज्ञाताशया । गिरां देव्याः सरस्वत्या वा विज्ञातवचोरचनाविशेषा सती नलनिश्चयात्पूर्वं चिन्तार्णवयादसा चिन्तासमुद्रजलजन्तुरूपेण नलनिश्चये सत्यपि तत्प्राप्त्युपायचिन्तासमुद्रजलचरेण वा चित्तेन मनसा इदं वक्ष्यमाणप्रकारमाख्यदूचे । मनस्येवैवमचिन्तयदिति भावः । 'चिन्ताार्णव–' इति पाठे विचित्रदेवीवचनानुस्मरणजनिताश्चर्यसमुद्रजलचरेणातिसाश्चर्येणेत्यर्थः ॥

किमाख्यदित्याह—

सा भङ्गिरस्याः खलु वाचि कापि
यद्भारती मूर्तिमतीयमेव ।
श्लिष्टं निगद्यादत वासवादी-
न्विशिष्य मे नैषधमप्यवादीत् ॥ १४ ॥

सेति ॥ खलु निश्चितं सा प्रसिद्धा मूर्तिमती भारती सरस्वती देवी इयमेव 'इयं मूर्तिमती सा भारत्येव' इति भारतीत्वं विधेयम् । यद्यस्मादस्या वाचि कापि लोकोत्तरा भङ्गिः रचनास्ति तस्मादित्यर्थः । यस्मादियमेव मूर्तिमती भारती तस्मादस्या वचने निश्चितं सा कापि भङ्गिरस्तीति वा । तामेव भङ्गीमाह—यत् श्लिष्टमुभयसंबद्धं वचो निगद्यास्पष्टमुक्त्वा वासवादीनादत गौरवेणावर्णयत् । विशिष्य विशेषं कृत्वा । तेभ्यो विशिष्य वा । यत् 'अत्याजि–' (१३।२८)इत्यादिश्लोकचतुष्टयेन मे मम मह्यं वा नैषधमप्यवादीत् । सर्वलोकपालांशस्य नलस्यैव वर्णनं युक्तमिति भावः॥

जग्रन्थ सेयं मदनुग्रहेण
वचःस्रजः स्पष्टयितुं चतस्रः ।
द्वे ते नलं लक्षयितुं क्षमेते
ममैव मोहोयमहो महीयान् ॥ १५ ॥

जग्रन्थेति ॥ सेयं वाणी मयि मम वाऽनुग्रहेण कृपया स्पष्टयितुं नलं स्पष्टं ज्ञापयितुं याः चतस्रः 'अत्याजि–' (१३।१८) इत्यादीर्घवचःस्रजः वचनमाला जग्रन्थ ससर्ज, तासु मध्ये ते द्वे वचःस्रजौ 'नामग्राहं मया नलमुदीरितम्' (१३।२९) 'नमे सहजरागभरात्' (१३।३०) इत्येवंरूपे, 'महीमहेन्द्रः' (१३।२८) 'नलमुदीरितम्' (१३।२९) इत्येवंरूपे वा नलं लक्षयितुं ज्ञापयितुं क्षमेते समर्थे भवतः । अहो आश्चर्ये—मम एवायमेतावन्तं कालं महीयान्मोह अबोधः । 'नले स्पष्टं कथितेऽप्येतावन्तं कालं मम निश्चयो नाभूदित्याश्चर्यमित्यर्थः । पूर्वोक्ता एव चतस्रो वचःस्रजः स्पष्टयितुं तदर्थं स्पष्टीकर्तुं ये द्वे ते वचःस्रजौ 'त्वं यार्थिनी' (१३।३३) 'देवः पतिः' (१३।३४) इत्येवंरूपे सेयं देवी जग्रन्थ, ते द्वे वचःस्रजौ नलं लक्षयितुं क्षमे समर्थे । 'त्वं यार्थिनी' (१३।३३) इत्यनेन प्रथमव्याख्याने स्फुटं नलस्यैव प्रतिपादनाद्व्याख्यानान्तरे च देवान्परितोष्य संत्यज्य वा (न) ल एव स्वीकरणीय इति यावदर्थं नलस्यैव प्रतिपादनात् 'देवः पतिः–' (१३।३४) इत्यनेनापि लोकपालांशत्वान्नलस्यैव पञ्चरूपत्वसंभवादिन्द्रादेश्चासंभवान्नलादन्यस्तव कतरो वरः, अपितु 'अन्यो नास्ति' इत्यपि नलस्यैव प्रतिपादनादित्यर्थ इति वा । अत्र पूर्वस्तच्छब्दो विशेष्यवचःस्रक्परामर्शार्थः । उत्तरस्तु तत्परामर्शकोपि विधेयसंस्पर्शी । यत्तदोश्च नित्यसंबन्धाद्यच्छब्दः संबध्यते । 'श्रन्थिग्रन्थिदम्भिस्वञ्जां चेति वक्तव्यम्' इति नित्यमपितो लिटः किरवविधानात् 'जग्रन्थ' इति रूपम् । संयोगाद्यरस्य लिटो वा किरवमिति केचित्' इति अपितो लिटः किरवविधानाद्वा नलोपाभावः समर्थनीयः । युक्तयन्तरेण वा समाधातव्यम् ॥

श्लिष्यन्ति वाचो यदमूरमुष्याः
कवित्वशक्तेः खलु ते विलासाः ।
भूपाललीलाः किल लोकपालाः
समाविशन्ति व्यतिभेदिनोऽपि ॥ १६ ॥

श्लिष्यन्तीति ॥ अमुष्या देव्याः अमूः पूर्वोक्ता वाचः यदनेकार्थतया श्लिष्यन्ति श्लेषं भजन्ते खलु निश्चितं कवित्वशक्तेः काव्यनिर्माणसहप्रतिभायाः विलासा विजृम्भणानि । कवित्वशक्तिं विना श्लेषवचोरचना निर्मातुमशक्येत्यर्थः । किल यस्माद्व्यतिभेदिनोऽपि परस्परापेक्षया नलापेक्षया वा विशेषेण सहस्रनेत्रत्वादिनाऽतितरां भिन्ना अप्यमी लोकपाला भूपालस्य नलस्य लीला विलासान्समाविशन्त्यनुभवन्ति नलाकारं बिभ्रति । अथ च नलवर्णकेषु श्लोकेषु मूर्तीभूय प्रतिष्ठा एव दृश्यन्त इत्यर्थः । अतः श्लेषवशान्मम भ्रमोऽभूदिति भावः । 'श्लेषवशान्नललीलाः सन्तो लोकपाला गाथाः समाविशन्तीति वा । अन्योन्यं भिन्ना अपि लोकपाला नललीलाः सन्तोंऽशेन नृपत्वं प्राप्ताः सन्तः किल एकीभवन्ति । अतो नलस्यैव लोकपालांशतया तत्र प्रयुक्तानि देवीवचांसि श्लेषं वदन्तीति कवित्वशक्तिविलासा एव ॥

त्यागं महेन्द्रादिचतुष्टयस्य
किमभ्यनन्दत्क्रममूचितस्य ।
किं प्रेरयामास नले च तन्मां
सा सूक्तिरस्या मम कः प्रमोहः ॥ १७ ॥

त्यागमिति ॥ इयं देवी 'अत्याजि' (१३।२८) येन'(१३।३९)

---

१ 'केषुचिदादर्शेषु 'शेषं नलम्' एकैकवृत्तेः' (१४।११) इति गाथाद्वयेन गतार्थत्वादियं गाथा नास्त्येव' इति **सुखावबोधा** । अत एव **जीवातौ** न व्याख्याता ।

इत्यादिना श्लोकचतुष्टयेन 'त्वं यार्थिनी' (१३।३३) 'देवः पतिः–' (१३।३४) इत्यादिगाथाद्वयेनापि क्रमेण सूचितस्य प्रस्तावितस्येन्द्रादिनलचतुष्टयस्य पूर्वव्याख्यानप्रकारेण परित्यागं किं कथमभ्यनन्दत् । युक्तमेतदिति स्तौति स्मेत्यर्थः । नले मां पूर्वव्याख्यानप्रकारेण प्रेरयामास च किं, कथं प्रेरयामास । एकेनैव वाक्येन द्वयमपि कथं चकार । आश्चर्यमेतदित्यर्थः । किंशब्दावत्राश्चर्ये । नले च । नल एवेति चकारोऽवधारणार्थो वा । तत्तस्मात्कारणादस्या देव्याः का सूक्तिः शोभनवचननिर्माणचातुरी । अपि तु लोकोत्तरा । मम प्रकृष्टो मोहश्च कः अपि तु सोऽपि लोकोत्तरः । अस्या इयमुक्तिः क, मम मोहश्च केत्यर्थः । एवं देव्या इन्द्रादिचतुष्टयस्य स्पष्टं परित्यागेऽभ्यनुज्ञाते नलस्य च वरणेऽभ्यनुज्ञाते ममैवं मोहो न युक्त इत्यर्थः । पूर्वं मोहोऽभूदिदानीं तु निवृत्त इत्याशयः । इन्द्रादित्यागं किमर्थमभ्यनन्दत्, नले च मां किमर्थं प्रेरयामास, उभयमपि तावच्चकार तदेतन्मदनुग्रहार्थमेवेति भाव इति वा । त्यागम्, 'चजोः–' इति कुत्वम् ॥

एवं विचारानन्तरं किमभूत्तत्राह—

परस्य दारान्खलु मन्यमानै-
रस्पृश्यमानाममरैर्धरित्रीम् ।
भक्त्यैव भर्तुश्चरणौ दधानां
नलस्य तत्कालमपश्यदेषा ॥ १८ ॥

परस्येति ॥ एषा भैमी तत्कालं देवप्रसादसमये एवंभूतां धरित्रीं पृथ्वीमपश्यत् । किंभूताम्—परस्य नलस्य दारान्पत्नीं मन्यमानैरिव परनारीबुद्ध्यैव अमरैरिन्द्रादिभिरस्पृश्यमानाम् । खलुरिवार्थे । तथा—भूपतित्वाद्भर्तुर्नलस्य भक्त्यैव सेवाबुद्ध्यैव चरणौ दधानां धारयन्तीम् । अन्यापि भक्त्या भर्तुश्चरणौ धारयति । देवत्वात्सहजो भूम्यस्पर्शो मनुष्यत्वात्सहजो भूमिस्पर्शोऽन्यथोत्प्रेक्षितः । देवमनुष्यचिह्ने दर्शिते । 'दारानिव' इति वा पाठः ॥

सुरेषु नापश्यदवेक्षताक्षणो-
र्निमेषमुर्वीभृति संमुखी सा ।
इह त्वमागत्य नले मिलेति
संज्ञानदानादिव भाषमाणम् ॥ १९ ॥

सुरेष्विति ॥ सा भैमी संमुखी सती बुद्धिपूर्वं विलोकयन्ती सती सुरेषु अक्षणोर्निमेषं नेत्रपक्ष्मसंकोचं नापश्यत्, उर्वीभृति नले त्ववैक्षत । देवानामनिमेषत्वान्मनुष्याणां च सनिमेषत्वादित्यर्थः । तत्रोत्प्रेक्षते—किंभूतं निमेषम्—संज्ञानदानादाकारणसूचकाक्षिपक्ष्मचेष्टाकरणादिति भाषमाणमिव । इति किम्—हे भैमि, त्वं आगत्य इह मया चिह्निते नले मिल संयुक्ता भवेति ॥

नाबुद्ध बाला विबुधेषु तेषु
क्षोदं क्षितेरैक्षत नैषधे तु ।
पत्ये सृजन्त्याः परिरम्भमुर्व्याः
संभूतसंभेदमसंशयं सा ॥ २० ॥

नेति ॥ सा तेषु विबुधेषु देवेषु क्षितेः क्षोदं भूरेणुं लग्नं नाबुद्ध न ददर्श, नैषधे त्वैक्षत ददर्श । देवानां रजःसंबन्धाभावान्नराणां तत्संबन्धादित्यर्थः । तत्रासंशयमुत्प्रेक्षते—(किंभूतम्–) पत्ये नलाय परिरम्भमालिङ्गनं सृजन्त्या ददत्या उर्व्याः सकाशात्संभूतसंभेदमिव संजातसंबन्धमिव । आलिङ्गनवशाद्रेणुर्नले लग्न इवेत्यर्थः । पत्ये 'क्रियया यमभिप्रैति–' इति संप्रदानत्वम् ॥

स्वेदः स्वदेहस्य वियोगतापं
निर्वापयिष्यन्निव संसिसृक्षोः ।
हीराङ्कुरश्चारुणि हेमनीव
नले तयालोकि न दैवतेषु ॥ २१ ॥

स्वेद इति ॥ तया नले स्वेद आलोकि, न दैवतेषु देवेषु । किं करिष्यन्निव—संसिसृक्षोः भैम्यालिङ्गनं कर्तुमिच्छोः स्वदेहस्य नलशरीरस्य वियोगतापं भैमीवियोगजनितं ज्वरं निर्वापयिष्यन् (इव) शमयिष्यन् (इव) । भैम्यालिङ्गनोत्सुकनलदेहस्य तापनाशकरत्वादित्यर्थः । उदकं हि तापं शमयति । नलालिङ्गनोत्सुकस्य भैमीदेहस्य वा । देवेषु स्वेदस्याभावात्, नरेषु च तत्सद्भावात् सारिवकस्वेदयुक्तो नलो मया प्राप्त एवेति भैम्या विरहज्वरशान्तिः । उत्प्रेक्षते -चारुण्यायुक्तमे हेमनि सुवर्णे खचितो हीराङ्कुर इव । अतिगौरदेहरोमकूपस्थस्वेदजलकणश्रेणयश्चारो हेमस्थवज्राङ्कुरत्वेनोत्प्रेक्षिताः । देवता एव दैवतानि । प्रज्ञादित्वात्स्वार्थे णः (ऽण) । 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्ते' इति पण्डत्वम् ॥

सुरेषु मालाममलामपश्य-
न्नले तु बाला मलिनीभवन्तीम् ।
इमां किमाप्याद्य नलोऽद्य मूर्द्धां
श्रद्धास्यते मामिति चिन्तयेव ॥ २२ ॥

सुरेष्विति ॥ सा बाला सुरेषु मालाममलां निर्मलामम्लानां चापश्यत्, नले तु मलिनीभवन्तीं पूर्वमम्लानां कालक्षेपेणोष्मणा च म्लानां मलिनां च जायमानामपश्यत् । सुराणामम्लानकुसुमत्वादित्यर्थः । उत्प्रेक्षते—इति चिन्तयेव मलिनीभवन्तीम् । इति किम्—नलोऽद्य स्वयंवरदिनेऽतिमूर्द्धां मत्सकाशादत्यतिमूर्द्धानीमिमां भैमीमासाद्य प्राप्य मां मालां श्रद्धास्यते किमादरेणाङ्गीकरिष्यति किम् । अपि तु नेति ॥

श्रियं भजन्तां कियदस्य देवा-
श्छाया नलस्यास्ति तथापि नैषाम् ।
इतीरयन्तीव तया निरैक्षि
सा नैषधे न त्रिदशेषु तेषु ॥ २३ ॥

श्रियमिति ॥ देवा अस्य नलस्य श्रियं कियद्भजन्तामाश्रयन्तु, अपि तु न किंचिदपि । यस्मादेषां देवानां नलस्य संबन्धिनी तादृशी अतिप्रसिद्धा छायापि कान्तिलेशोऽपि नास्ति । येषां यदीयकान्तिलेशोऽपि नास्ति ते तदीयां शोभां कथमाश्रयन्तामपि तु न कथंचिदित्यर्थः । अथ च—येषां नलसंबन्धिनी आदर्शादिस्थिता छाया प्रतिबिम्बमपि नास्ति । प्रतिबिम्बतुल्यास्ते न भवन्तीति यावत् । यदीयप्रतिबिम्बेनापि न साम्यं ते तदीयबिम्बश्रियं कथं लभन्तामित्यर्थः । अथ च—अस्य श्रियं किंचिद्भजन्तां

नटवच्चलरूपधारणात्किंचिच्छोभन्ताम् । तथापि स्वाभाविकी नलस्य कान्तिरेषां नास्ति । अथ च—अस्य संपदं बहु भजन्तां तथापि नलस्य कान्तिरेषां नास्ति । संपदा तुल्यत्वेऽपि कान्त्या तुल्यत्वं नास्तीत्यर्थः । अथ च—अस्य श्रियं कियद्बहु भजन्ताम् । तथापि भूमौ तमःप्रकृतिश्छाया देहव्यवहितरविप्रभोपलक्षितः श्यामाकारो नलस्यास्ति एषां तेजोरूपत्वेन नास्ति । तेजोराहित्येन च नराणां विद्यत इत्यर्थः । तया भैम्या इति पूर्वोक्तप्रकारेण ईरयन्तीव कथयन्तीव, यत्राहं वर्ते स एव नल इति प्रकाशयन्तीव सा छाया नैषधे निरैक्षि दृष्टा तेषु त्रिदशेषु न । छायापि स्वाभावभावाभ्यां देवत्वनरत्वव्यञ्जिका जातेत्यर्थः । कियदिति क्रियाविशेषणम् ॥

चिह्नैरमीभिर्नलसंविदस्याः
संवादमाप प्रथमोपजाता ।
सा लक्षणव्यक्तिभिरेव देव-
प्रसादमासादितमप्यबोधि ॥ २४ ॥

चिह्नैरिति ॥ अस्या भैम्याः प्रथमोपजाता तूत्पकालोत्पन्ना, 'इतरनलतुलाभाक्-' (१३।५४) इति पूर्वसर्गोक्ततर्कोत्पन्ना वा, देवीश्लोकानुसंधानोत्पन्ना वा, अयमन्य एव नल इति संविद्बुद्धिरमीभिः पूर्वोक्तैर्भूस्पर्शादिभिश्चिह्नैः संवादं स एवायं नल इत्यनुव्यवसायरूपमाप । पूर्वं मम 'नलोयम्' इति प्रत्ययो युक्त एव जात इति एतैश्चिह्नैर्निश्चितवतीत्यर्थः । अनन्तरं च सा भैमी देवत्वनरत्वज्ञापकानां लक्षणानां निमेषत्वभूस्पर्शादिचिह्नानां व्यक्तिभिः प्रकटैरेवासादितं प्राप्तं देवप्रसादमप्यबोधि । एतावत्पर्यन्तं भूस्पर्शादिचिह्नानि न दृष्टानि, इदानीं तु दृश्यन्ते, तस्मान्मम पूजया देवाः प्रसन्ना इत्यप्यजानादित्यर्थः ॥

नले निधातुं वरणस्रजं तां
स्मरः स्म रामां त्वरयत्यथैनाम् ।
अपत्रपा तां निपिपेध तेन
द्वयानुरोधं तुलितं दधौ सा ॥ २५ ॥

नल इति ॥ अथ स्मरस्तां वरणस्रजं वरणमधूकमालां नले निधातुं निक्षेप्तुं एनां रामां भैमीं त्वरयति स्म शीघ्रं प्रेरयामास । अपत्रपा अन्यतो लज्जा च तां भैमीं निपिपेध निवारयामास । सर्वस्मिञ्जने पश्यति सति कथमहमेनं वृण इति लज्जावशात्तस्या बुद्धिरुदभूदित्यर्थः । तेन कारणेन सा भैमी द्वयानुरोधं स्मरलज्जयोराज्ञां प्रवृत्तिनिवृत्तिसंदेहं तुलितं समानमेव दधौ । भावसंधिवशादुत्कण्ठापत्रपाभ्यां मालानिक्षेपानिक्षेपदोलायिताभूदित्यर्थः । अन्योऽपि तुल्याभ्यां द्वाभ्यां विरुद्धकार्यद्वयार्थं प्रेषितो द्वयोरनुरोधादौदासीन्यमेवावलम्बते । तामिति पुनरुपादानं वाक्यान्तरत्वात्समर्थनीयम् । निपिपेध, 'स्थादिष्वभ्यासेन-' इति पत्वम्[3] ॥

१ 'अत्र श्रियमिव श्रियम्, छायेव छाया' इति सादृश्याक्षेपान्निदर्शने । ताभ्यामप्राप्ताभ्याम् 'ईरयन्तीव' इत्युत्प्रेक्षायाः संकरः' इति **जीवातुः** । २ 'एतेनास्या मध्यमानायिकात्वमुक्तम् । 'तुल्यलज्जास्मरा मध्या' इति लक्षणात्' इति **जीवातुः** ।

स्रजा समालिङ्गयितुं प्रियं सा
रसादधत्तैव बहुप्रयत्नम् ।
स्तम्भत्रपाभ्यामभवत्तदीये
स्पन्दस्तु मन्दोपि न पाणिपद्मे ॥ २६ ॥

स्रजेति ॥ सा भैमी रसात्प्रीत्या स्रजा मधूकमालया प्रियं नलं समालिङ्गयितुं बहुप्रयत्नं भूयांसमुद्योगमधत्तैव, चकारैव । तु पुनस्तदीये पाणिपद्मे स्तम्भत्रपाभ्यां हेतुभ्यां मन्दोऽत्यल्पोऽपि स्पन्दश्चलनं नाभवत् ॥

तस्या हृदि व्रीडमनोभवाभ्यां
दोलाविलासं समवाप्यमाने ।
स्थितं धृतैणाङ्ककुलातपत्रे
शृङ्गारमालिङ्गदधीश्वरश्रीः ॥ २७ ॥

तस्या इति ॥ अधीश्वरी समर्था भूयसी अधीश्वरस्य कस्यचिद्राज्ञो वा श्रीर्लक्ष्मीस्तस्या भैम्या हृदि स्थितं वर्तमानं शृङ्गारं शृङ्गाररसमालिङ्गत् । किंभूते हृदि—व्रीडमनोभवाभ्यां दोलाविलासमान्दोलजनितां क्रीडां समवाप्यमाने प्राप्यमाणे । कोटिद्वयसंबन्धात्प्रवृत्तिनिवृत्तिसंदेहं प्राप्त इत्यर्थः । तथा एणाङ्कश्चन्द्रमस्य कुलं कुलोत्पन्नो नल इत्यर्थः । स एवातपत्रं, धृतमेणाङ्ककुलातपत्रं येन तस्मिन् । शृङ्गाररस एव सम्राट् भैमीहृदयमेव सिंहासनं नल एव छत्रं लज्जाकामौ दोलाया उभयपार्श्वत आन्दोलनार्थं स्थितौ चामरधारिणौ वा । तस्या भावसंधिसंवलितः शृङ्गारो राजवदुज्जृम्भत इति भावः । दोलान्दोलने च भोगस्त्रियः प्रियमालिङ्गन्ति । अधीश्वरस्य नलस्य श्रीरिति वा । अत्र पक्षे ह्रिकामाभ्यां दोलायमानां भैमीं दृष्ट्वा म्लानो नलः पूर्वं विप्रलम्भशृङ्गारं प्राप्तः ततः सापि तं तादृशं दृष्ट्वा तदीयशोभाङ्गीकारात्स्वयमपि तादृशी बभूवेति भावः । आन्दोलिकाछत्रचामरैरयं प्रभुरिति विज्ञायत इत्यर्थः । 'श्रितम्' इति पाठे हृदीति विषयसप्तमी ॥

करः स्रजा सज्जतरस्तदीयः
प्रियोन्मुखः सन्विरराम भूयः ।
प्रियाननस्यार्धपथं ययौ च
प्रत्याययौ चातिचलः कटाक्षः ॥ २८ ॥

करः इति ॥ स्रजा सज्जतरो नितरां सज्जः कण्ठे निक्षेप्तुमुद्यैः-कृतमालः तदीयः करः प्रियोन्मुखो नलसंमुखं गन्तुं सोद्योगः सन्भूयः पुनः लज्जावशाद्विरराम निवृत्तः । तदीयोऽतिचलः कटाक्षश्च प्रियाननस्यार्धपथं ययौ च प्रत्याययौ च । दिदृक्षावशादर्धमार्गं गतोऽपि लज्जावशान्मध्यमार्गं नलकटाक्षसंबन्धाच्च पुनः प्रत्यावृत्त इति भावः । अन्योऽप्यतिबलो गतागते करोति ॥

तस्याः प्रियं चित्तमुपेतमेव
प्रभूबभूवाक्षि नतु प्रयातुम् ।

१ 'श्रितम्' इति **जीवातुसुखावबोधास्थः** पाठः । २ 'तदाननस्य' इति **जीवातु**संमतः पाठः । ३ 'मुदेतम्' इति **जीवातु**संमतः पाठः ।

सत्यः कृतः स्पष्टमभूत्तदानीं
तयाक्षिणि लज्जेति जनप्रवादः ॥ २९ ॥

तस्या इति ॥ तस्याश्चित्तं प्रियमुपेतमेव प्राप्तमेव । अक्षि तु पुनः नलं प्रयातुं प्राप्तुं न प्रभूबभूव समर्थं नाभूत् । स्पष्टमुत्प्रेक्षते—अक्षिणि नेत्रे लज्जेति जनप्रवादो लोकाभाणकः तया तदानीं नलवरणसमये सत्यः कृतोऽभूत् । अन्यथा लज्जायाश्चित्तधर्मत्वे चित्तस्य नलप्राप्तिरयुक्ता, नेत्रस्य च नलप्राप्तिर्युक्तेत्यर्थः । प्रीत्या चित्तं नल एव वर्तते परं लज्जावशात्कटाक्षेण विलोकयितुं नाशकदिति भावः । प्रभूबभूव, च्वौ दीर्घः ॥

कथं कथंचिन्निषधेश्वरस्य
कृत्वास्यपद्मं दरवीक्षितश्रि ।
वाग्देवताया वदनेन्दुबिम्बं
त्रपावती साकृत सामिदृष्टम् ॥ ३० ॥

कथमिति ॥ त्रपावती सा भैमी निषधेश्वरस्यास्यपद्मं मुखकमलं कथंचिन्महता कष्टेन लज्जाविगमसाहसेन दरवीक्षितश्रि ईषदिलोकितशोभं कृत्वा वाग्देवताया वदनेन्दुबिम्बं लज्जया सामिदृष्टमर्धदृष्टमकृत । किंचिद्दृष्ट्वा पुनर्व्यावृत्तत्वादर्धदृष्टमकलशोभं चकारेत्यर्थः । 'त्रपावती' इत्युभयत्र हेतुः । एतां मालां नलकण्ठे स्थापयेत्याशयेन देवीमुखमर्धवीक्षितं चकारेति भावः ॥

[1]अजानतीवेदमवोचदेना-
माकूतमस्यास्तदवेत्य देवी ।
भावस्त्रपोर्मिप्रतिसीरया ते
[2]ने दीयते लक्षयितुं ममापि ॥ ३१ ॥

अजानतीति ॥ देवी अस्या भैम्याः तत्पूर्वश्लोकसूचितमाकूतमाशयमवेत्य ज्ञात्वा अप्यजानतीव एनां भैमीं प्रति इदमवोचत् । इदं किम्—हे भैमि, त्रपोर्मिप्रतिसीरया लज्जाकल्लोलरूपया जवनिकया ते तव भाव आशयो ममापि (लक्षयितुं) सरस्वत्या अथ च विश्वास्यसखीभूताया अपि (लक्षयितुं) ज्ञातुं न दीयते । त्वल्लज्जावशादतिमूढं यत्सूचयसि तन्मयापि न ज्ञायते । ततः किंचिल्लज्जां त्यक्त्वा स्पष्टं कथयेति परिहासमुद्ध्या तामेव स्वाशयं वादयितुमवोचदित्यर्थः । अन्यदपि जवनिकाच्छादितं न ज्ञायते । 'वितीर्यते लक्षयितुं न मेऽपि' इति पाठे मे मह्यम् । 'प्रतिसीरा जवनिका' इत्यमरः ॥

देव्याः श्रुतौ नेति नलार्धनाम्नि
गृहीत एव त्रपया निपीता ।
अथाङ्गुलीरङ्गुलिभिर्मृशन्ती
दूरं शिरः सा नमयांचकार ॥ ३२ ॥

देव्या इति ॥ देव्याः श्रुतौ कर्णे 'न' इति नलस्यार्धे नाम्नि गृहीत एव भैम्या उच्चारित एव त्रपया निपीता व्याप्ता सा भैमी 'ल' इति द्वितीयमक्षरमुच्चारयितुमशक्ता सती अथानन्तरं स्वस्या [1]अङ्गुलीर्देव्या वाङ्गुलीः स्वीयाङ्गुलीभिरेव मृशन्ती स्पृशन्ती निबिडं पीडयन्ती शिरो दूरमत्यर्थं नमयांचकार । अभिलाषप्रतिबन्धे दुःखितस्याङ्गुलिमेलनं स्वभावोक्तिः ॥

करे विधृत्येश्वरया गिरां सा
पान्था पथीन्द्रस्य कृता विहस्य ।
वामेति नामैव बभाज सार्धं
पुरन्ध्रिसाधारणसंविभागम् ॥ ३३ ॥

कर इति ॥ गिरामीश्वरया वाग्देव्या विहस्याज्ञाननाटनाद्धास्यं कृत्वा तां करे विधृत्य इन्द्रस्य पथि पान्था पथिका (कृता) इन्द्रं प्रति वरणार्थं नीता सा भैमी पुरन्ध्रीणामन्यस्त्रीणां साधारणः समानः संविभागोंऽशो यस्य । पुरंध्रिषु वा । एवं(भूतं) सर्वस्त्रीवाचकं 'वामा' इत्येव नाम वक्त्रार्थत्वात्सार्धं बभाज भेजे । इन्द्रं प्रति देव्या नीयमाना वक्त्रीभूदिति भावः । सार्धमेवेति वा । [2]पान्थेति पूर्ववत् । 'पाथा' इति पाठे 'पथे गत्याम्' इति धातोऽर्बलादित्वाण्णे पथि गन्त्री कृतेत्यर्थः । पुरन्ध्रीति पूर्ववत् ॥

तमेवार्थमुक्तिविशेषेण पुनराह—

विहस्य हस्तेऽथ विकृष्य देवी
नेतुं प्रयाताभि महेन्द्रमेताम् ।
भ्रमादियं दत्तमिवाहिदेहे
ततश्चमत्कृत्य करं चकर्ष ॥ ३४ ॥

विहस्येति ॥ वाग्यानन्तरं देवी विहस्य किंचिद्धसित्वा एतां भैमीं स्वहस्तेन विकृष्य महेन्द्रमभि लक्षीकृत्य नेतुं प्रयाता प्रस्थिता इन्द्रं प्रापयितुं निर्गता । तत इन्द्रादिगमनोद्योगानन्तरमियं भैमी चमत्कृत्य किमियमिन्द्रवरणे मां प्रवर्तयतीति बुद्ध्या भीत्वा करं स्वहस्तं चकर्ष आचकर्ष । किंभूतमिव करम्—भ्रमाद्भ्रुभ्रान्तेरहिदेहे सर्पशरीरे दत्तमिव स्थापितमिवेत्युत्प्रेक्षा । सर्पदेहे भ्रमाद्दत्तं हस्तं यथा कश्चिदाकर्षति तथेयमुपमा वा । ततो देवीकरादिति वा ॥

भैमीं निरीक्ष्याभिमुखीं मघोनः
स्वाराज्यलक्ष्मीरभृताभ्यसूयाम् ।
दृष्ट्वा ततस्तत्परिहारिणीं तां
व्रीडं विडौजःप्रवणाभ्यपादि ॥ ३५ ॥

भैमीमिति ॥ स्वाराज्यलक्ष्मीर्विडौजःप्रवणा इन्द्रेऽत्यन्तमनुरक्ता स्वर्गाधिपत्यश्रीर्भैमीं मघोन इन्द्रस्याभिमुखीं निरीक्ष्य सपत्नीबुद्ध्या भैम्यामभ्यसूयामसहनत्वमभृत दधार । ततोऽनन्तरं तां तत्परिहारिणीमिन्द्रत्यागिनीं दृष्ट्वा इन्द्रेऽनुरक्ता सती व्रीडं लज्जामभ्यपादि प्राप । इयमिन्द्रं नाभिलषति वृथैव मयेर्ष्या कृतेति

---

१ 'न जानतीवेद' इति **जीवातु**संमतः पाठः । २ 'वितीर्यते लक्षयितुं न मेपि' इति **जीवातुसुखावबोधामुख्य**पाठः ।

१ 'नामैव' इति पाठे स्वस्य व्यवच्छेदसम्बन्धात् 'सार्धमिव' इत्युत्प्रेक्षयामः—इति **सुखावबोधा** । २ 'पन्थोऽण् नित्यम्' (५।१।७६) इत्यण्प्रत्यये पथः पन्थादेशे न दीप—इति **मल्लिनाथस्तु** स्वरूपव्याख्यैयैव पराकृतः । ३ पूर्वोक्तार्थत्वादेवायं श्लोको **जीवातौ** न व्याख्यातः ।

ललज्जेत्यर्थः । इयं भैमी स्त्रीरत्नभूता सती निर्गुणतयेनं परिहरति तस्याहं प्रिया जातेति लज्जितेत्यर्थः । अभ्यपादि, कर्तरि चिण् ॥

त्वत्तः श्रुतं नेति नले मयातः
परं वदस्वेत्युदिताथ देव्या ।
ह्रीमन्मथद्वैरथरङ्गभूमी
भैमी दृशा भाषितनैषधाभूत् ॥ ३६ ॥

त्वत्त इति ॥ अथ देव्या इत्युदिता परिहासवशादुक्ता भैमी दृशा दृष्ट्यैव भाषितनैषधाभूत् । इति किम्—हे भैमि, मया त्वत्तो नलविषये इति 'न' श्रुतं निषेधार्थो नकारः श्रुतः । अतः कारणात्परं नलादन्यदभीष्टं वदस्व कथय । अथ च—नलविषये 'नलः' इति पदे 'न' इति नलनाम्नोऽर्धं श्रुतम् । अतो नकारात्परमनन्तरमक्षरं कथयेति । किंभूता—ह्रीमन्मथयोर्लज्जाकामयोर्द्वैरथस्य द्वाभ्यां (रथाभ्यां) प्रवृत्तस्य युद्धस्य रङ्गभूमी नृत्तस्थानं समबलहीकामवशीकृता । अस्मिन्नले मालां मया-क्षेपयेति दृष्ट्यैव नलं निर्दिष्टवती न स्वन्यं, न च साक्षालकारमुच्चारयति स्मेत्यर्थः । उदिता, अथ पश्चादिति वा । वदस्व, 'भाषन-' इति भाषने उत्साहे वा तङ् । द्वैरथं द्विरथसंबन्धीति संबन्धेऽण् ॥

हसत्सु भैमीं दिविषत्सु पाणौ
पाणिं प्रणीयाप्सरसां रसात्सा ।
आलिङ्ग्य नीत्वाकृत पान्थदुर्गां
भूपालदिक्पालकुलाध्वमध्यम् ॥ ३७ ॥

हसत्स्विति ॥ सा देवी भैमीमालिङ्ग्याङ्कपालिकया धृत्वा भूपालस्य नलस्य दिक्पालकुलस्य च इन्द्रादिचतुष्टयस्य पुरःसरोऽध्वा मार्गस्तन्मध्यं नीत्वा प्रापय्य पान्थदुर्गां पथिकसिन्दूरादिपूजितशिलामयकल्पितमार्गदेवतामकृत चकार । इन्द्रादिपञ्चकमध्ये नीत्वा मुमोचेत्यर्थः । लज्जाभरनिश्चलत्वादतिसौन्दर्याच्च देवतात्वम् । केषु सत्सु—रसादुभयाशयपरिज्ञानात्तस्याश्च देव्याशयापरिज्ञानात्प्रीतेर्वाऽप्सरसामुर्वशीप्रभृतीनां पाणौ पाणिं प्रणीय निर्माय तालिकादानपूर्वं दिविषत्स्विन्द्रादिषु हसत्सु सत्सु । उत्सवादौ मञ्चके दुर्गामारोप्य राजवीथिषु भ्राम्यते, तथैनामपि चलदुर्गां चकारेत्यर्थ इति वा । दिविषत्सु, 'सत्सूद्विष-' इति क्विप्, 'हृदयुभ्यां च' इति सप्तम्या अलुक्, 'हलदन्तात्-' इति वा, सुपामादित्वात्सत्वम् । पान्थानां दुर्गा, पान्था चासौ दुर्गा चेति वा ॥

आदेशितामप्यवलोक्य मन्दं
मन्दं नलस्यैव दिशा चलन्तीम् ।
भूयः सुरानर्धपथादथासौ
तानेव तां नेतुमना नुनोद ॥ ३८ ॥

आदेशितामिति ॥ अथासौ देवी भूयः पुनरर्धपथात्सकाशान्नलं विहाय तानेव सुरानिन्द्रादीन्नेतुमनाः प्रापयितुकामा सती तां भैमीं नुनोद । इतश्चलेति प्रेरयति स्मेत्यर्थः । किं कृत्वा—इन्द्रादिसंमुखमागच्छेत्यादेशितामादिष्टामपि तथा मन्दं मन्दं नलस्यैव दिशा नलसंमुखमेव चलन्तीं गच्छन्तीं विलोक्य । आदेशः संजातोऽस्याः । 'अदेशिताम्' इति पाठे नलं प्रति गच्छेत्यप्रेरितामपीत्यर्थः ॥

मुखाब्जमावर्तनलोलनालं
कृत्वालिहुंहुंरवलक्ष्यलक्ष्यम् ।
भीमोज्झवा तां नुनुदेऽङ्कपालीं
देव्या नवोढेव दृढां विवोढुः ॥ ३९ ॥

मुखेति ॥ भीमोज्झवा देव्यास्तामङ्कपालीं नुनुदेऽमुञ्चत् । केव—विवोढुः परिणेतुर्दृढां प्रथमसुरतारम्भनिर्भरामङ्कपालीं नवोढा नववधूरिव । अङ्कपालीमोचनमात्रेण साम्यं विवक्षितं नतु लिङ्गम् । किंकृत्वा—परिहासवशान्नलसंमुखगमननिषेधिकानामालीनां सखीनां निवारणव्यञ्जको 'हुंहुं' इति रवः शब्दस्तद्रूपैर्लक्ष्यैश्चिह्नैर्लक्ष्यं ज्ञेयं, तेषां वा लक्ष्यं विषयभूतम् । यद्वा—अर्थान्नलवरणनिषेधिकास्वालिषु कोपवशान्मैम्या एव हुंहुंकारास्तद्रूपैश्चिह्नैर्लक्ष्यम् । अथ च—अलीनां भ्रमराणामिव ये हुंहुंरवाः । यद्वा—पद्मिनीत्वाद्भ्रमराणां हुंहुंरवैर्लक्ष्यम् । आवर्तने परावर्तने लोलं चञ्चलं कण्ठदण्ड एव नालं यस्य एवंभूतं मुखाब्जं कृत्वा । नवोढापि आलिङ्गनादि कुर्वित्युपदिशतीनां तासु वा हुंहुंरवचिह्नलक्ष्यं मुखाब्जमावर्तयति । अब्जमपि लोलनालं भ्रमरहुंहुंरवलक्ष्यं च भवति । 'रवलक्ष' इति पाठे लक्षसंख्येत्यर्थः ॥

देवी कथंचित्खलु तामदेव-
द्रीचीं भवन्तीं स्मितसिक्तसृक्का ।
आह स्म मां प्रत्यपि ते पुनः का
शङ्का शशाङ्कादधिकास्यबिम्बे ॥ ४० ॥

देवीति ॥ देवी तां भैमीमित्याह स्म । किंभूताम्—कथंचिन्महताङ्कपालीमोचनादिप्रकारेण कष्टेन खलु निश्चितम् । अदेवद्रीचीं भवन्तीं न देवानञ्चति देवान्प्रति गच्छति एवंविधां भवन्तीं ताम् । किंभूता—स्मितेन ईषद्धासेन सिक्तसृक्का सिक्तौष्ठप्रान्ता स्वाभिप्रायापरिज्ञानात्किंचित्कृतहासा । इति किम्—हे शशाङ्कादधिकं सुन्दरमाह्लादकमास्यबिम्बं यस्या एवंभूते मैमि, सखीप्रायां मामपि प्रति इयं प्रतार्य इन्द्रादिवरणार्थं मां नयतीति ते तव पुनः का शङ्का । अपि त्वेवं शङ्का न कार्या मा भैषीरिति । देवानञ्चति देवद्रीची, 'विष्वग्देवयोः—' इति टेरञ्यादेशे उगिदचान्ङीपि 'अचः' इत्यकारलोपे 'चौ' इति पूर्वस्याणो दीर्घः । पञ्चात्रञ्समासः । 'अदेवद्रीचीभवन्तीम्' इति पाठः सभ्यः । अदेवद्रीचीं देवद्रीचीं भवन्तीं च्विप्रत्ययः । ततो नञ्समासः । शशाङ्कात् 'यस्मादधिकम्' इति ज्ञापकात्पञ्चमी ॥

चेन्न प्रतारयसि तर्हि पुनःपुनरिन्द्रादिसंमुखं मां किमिति नयसीत्याशङ्क्यायामाह—

एषामकृत्वा चरणप्रणाम-
मेषामनुज्ञामनवाप्य सम्यक् ।

---

१ 'लक्ष्म' इति पाठः सुखावबोधायाम् । २ 'मुमुचे' इति सुखावबोधा । ३ 'मनिशम्य' इत्यपि पाठः ।

सुपर्ववैरे तव वैरसेनिं
वरीतुमीहा कथमौचितीयम् ॥ ४१ ॥

एषामिति ॥ एषामिन्द्रादीनां चरणयोः प्रणाममकृत्वा, तथा—एषां सम्यक् व्यथा भवति तथानुज्ञां नलवरणानुमतिमप्राप्य निजचिह्नप्रकटमात्रानुमितप्रसादेन लब्धप्रायामपि साक्षाच्छिरःकम्पादिसूचितामनुज्ञामलब्ध्वा सुपर्ववैरे स्वावज्ञानादिन्द्रादिभिः सह विरोधे सति येयं तव वैरसेनिं नलं वरीतुमीहा चेष्टाभिलाषो वा सा कथमिवौचिती । अपि तु न कथंचित् । स्वावज्ञानाद्विरुद्धाः सन्तः शापं दास्यन्तीति तान्प्रति नीयसे न तु वरणार्थमिति भावः । इयमौचिती वा । 'कतमौचिती' इत्यपि पाठः॥

इतीरिते विश्वसितां पुनस्ता-
मादाय पाणौ दिविषत्सु देवी ।
कृत्वा प्रणम्रां वदति स्म सा तान्
भक्तेयमर्हत्यधुनानुकम्पाम् ॥ ४२ ॥

इतीति ॥ सा देवी इति पूर्वोक्तमीरिते सति विश्वसितां तां भैमीं पाणौ पुनरादाय धृत्वा दिविषत्सु देवेषु विषये नमस्कारवशात्प्रकर्षेण नम्रां कृत्वा तान्देवानिति वदति स्म । इति किम्—भवद्भक्तेयं भैम्यधुना नलवरणानुमतिरूपामनुकम्पां कृपामर्हतीति ॥

एतद्वरणार्थमागतानामस्माकं नलवरणानुमतिर्दीयतामिति कथमुच्यत इत्याशङ्कां परिहरति—

युष्मान्वृणीते न बहून्सतीयं
शेषावमानाच्च भवत्सु नैकम् ।
तद्वः समेतान्नृपमेनमंशा-
न्वरीतुमन्विष्यति लोकपालाः ॥ ४३ ॥

युष्मानिति ॥ हे लोकपालाः, इयं भैमी यस्मात्सती पतिव्रतैकभर्तृकैव तस्माद्बहून्युष्मान्न वृणीते पतित्वेन नाङ्गीकरोति । भवत्सु मध्ये शेषावमानाच्च एकं न वृणीते । तत्तस्मात्सर्वैकवरणपक्षयोर्दोषदर्शनाद्धेतोरेकत्र नलस्वरूपे समेतान्मिलितानंशानंशभूतान्वो युष्मानेव एनं नृपं 'अष्टानां लोकपालानां वपुर्धारयते नृपः' इति वचनाद्युष्मद्रूपमेवैनं नलं नृपं वरीतुमन्विष्यति विचारयति । नले वृते पूर्वोक्तोभयदोषाभावान्नलमेव वरीतुं वाञ्छतीत्यर्थः । वो युष्माकं समेतानंशानेनं नृपमिति वा ॥

परदारत्वादपीयं भवद्भिर्नाभिलषणीयेत्याह—

भैम्या स्रजःसञ्जनया पथि प्रा-
क्स्वयंवरं संजनयांबभूव ।
संभोगमालिङ्गनयास्य वेधाः
शेषं तु कं हन्तुमियद्यतध्वे ॥ ४४ ॥

भैम्या इति ॥ हे लोकपालाः, वेधाः मातृसेवानन्तरं स्वमन्दिरागमनवेलायां पथि स्रजो मालायाः सञ्जनया सङ्गेन षष्ठे सर्गे 'प्रसूप्रसादाधिगता-' (४९) इत्यादिकथितप्रकारेण भ्रान्तिदृष्टनलेषु मध्येऽस्य दूत्यगतस्य सत्यनलस्य कण्ठे निक्षेपणया कृत्वा भैम्याः स्वयंवरं प्राक्पूर्वमेव संजनयांबभूवाकृत । तथा तत्रैव सर्गे 'तथ्यं मिथस्तौ-' (५३) इत्याद्युक्तप्रकारेणास्य नलस्यालिङ्गनयालिङ्गनेन भैम्याः संभोगं बाह्यरतमपि व्यधत्त । अस्य संभोगमिति वा । अस्य स्वयंवरस्य संभोगं फलमालिङ्गनेन चकार । तस्मात्कं तु पुनः शेषं संभोगं हन्तुं विनाशयितुमियन्नलाकारधारणादिप्रकारेण यतध्वे प्रयत्नं कुरुथ । अपि तु न कोप्यवशिष्टोंशः । तस्माद्वृथा प्रयासो न कार्यः । किं त्वाज्ञैव दातव्येत्यर्थः । बाह्यरतस्यैवाभ्यर्हितत्वात्तत्राप्यालिङ्गनस्याभ्यर्हिततरत्वात्तस्य च संवृत्तत्वात्कं पुनः शेषं संभोगं हन्तुमियद्यतध्व इति वा । 'किम्' इति पाठे 'शेषा तु लोकस्थितिः' इति कामशास्त्रोक्तन्यायेन शेषं लोकस्थितिरूपं संभोगं पुनर्हन्तुमियत्किं यतध्व इति व्याख्येयम् । 'सञ्जनालिङ्गना-' इत्यत्र ण्यन्तत्वाद्युच् ॥

इदानीं युक्त्यन्तरेण देवान्सान्त्वयति—

वर्णाश्रमाचारपथात्प्रजाभिः
स्वाभिः सहैवास्खलते नलाय ।
प्रसेदुषो वेदृशवृत्तभङ्ग्या
दित्सैव कीर्तेर्भुवमानयद्वः ॥ ४५ ॥

वर्णेति ॥ वा पूर्वापरितोषे । पूर्वमसंभावितमेवोक्तं मया । किंतु नलाय कीर्तेर्दित्सैव वो युष्मान्भुवमानयत् । भैमीस्वयंवरदर्शनव्याजेन नलाय कीर्तिं दातुमेवात्रागमनं युष्माकं नतु भैमीवरणार्थमित्यर्थः । यतः—किंभूताय—स्वाभिः प्रजाभिः सह वर्णानां ब्राह्मणादीनामाश्रमाणां ब्रह्मचर्यादीनां स्मृत्युक्तादाचारपथात्सकाशादस्खलतेऽच्युताय । किंभूतान् वः—ईदृशवृत्तभङ्ग्या प्रसेदुषः स्वाचाराचरणादेव निष्कपटदूत्यकरणाद्वा प्रसन्नान् । भैम्या इन्द्रादीन्विहाय सौन्दर्यादिना गुणेन नल एव वृत इति कीर्तिः ॥

इति श्रुतेऽस्या वचसैव हास्या-
त्कृत्वा सलास्याधरमास्यबिम्बम् ।
भ्रूविभ्रमाकूतकृताभ्यनुज्ञे-
ष्वेतेषु तां साथ नलाय निन्ये ॥ ४६ ॥

इतीति ॥ इति पूर्वोक्ते देवीवचने श्रुते सत्यस्या देव्या वचसैव जाताद्धास्यात्स्मिताद्धेतोरास्यबिम्बं मुखचन्द्रं सलास्याधरं चञ्चलौष्ठं कृत्वा एतेषु देवेषु भ्रूविभ्रमरूपेणाकूतनाशयज्ञापकेनेङ्गितेन कृताऽभ्यनुज्ञा नलवरणानुमतिर्यैस्तेषु सत्सु । अथानन्तरं सा देवी तां नलाय नलं प्रापयितुं नलार्थं वा निन्ये । पुनर्नलसंमुखीं चकारेत्यर्थः ॥

मन्दाक्षनिस्पन्दतनोर्मनोभू-
दुष्प्रेरमप्यानयति स्म तस्याः ।
मधूकमालामधुरं करं सा
कण्ठोपकण्ठं वसुधासुधांशोः ॥ ४७ ॥

---

१ 'समेतं नृपमशमेनम्' इति जीवातुसंमतः पाठः ।

१ 'दित्सैव' इति पाठे उत्प्रेक्षा—इति सुखावबोधा । २ 'वचने च' इति पाठो जीवातुसंमतः ।

मन्दाक्षेति ॥ सा देवी मधूकमालया मधुरं सुन्दरं तस्याः करं वसुधासुधांशोः भूचन्द्रस्य नलस्य कण्ठोपकण्ठं कण्ठसमीपमानयति स्म प्रापयति स्म । किंभूतायाः—मन्दाक्षेण लज्जया निस्पन्दा निश्चला तनुर्यस्याः । सस्तम्भाया इत्यर्थः । किंभूतं करम्—मनोभुवा नलविषयकामेन दुष्प्रेरमपि कामेनापि प्रेरयितुमशक्यम् । 'निष्पन्द—' इति पाठे पूर्ववत्पत्वम् । 'दुःप्रेरमपि प्रेरयति स्म' इति विरोधाभासः ॥

अथाभिलिख्येव समर्प्यमाणां
राजिं निजस्वीकरणाक्षराणाम् ।
दूर्वाङ्कुराढ्यां नलकण्ठनाले
वधूर्मधूकस्रजमुत्ससर्ज ॥ ४८ ॥

अथेति ॥ अथ करस्य नलकण्ठसमीपनयनानन्तरं वधूर्भैमी दूर्वाङ्कुराढ्यां मधूकस्रजं नलकण्ठनाल उत्ससर्ज निक्षिप्तवती । उत्प्रेक्षते—अभिलिख्य समर्प्यमाणां दीयमानां निजेनात्मना स्वीकरणं तत्संबन्धिनामक्षराणाम् 'मया त्वं निश्चितं वृतोऽसि' इत्येवंरूपाणां वर्णानां राजिमिव । निश्चयज्ञापनार्थं हि पत्रं दीयते तदित्यर्थः । मालासज्जनानन्तरं वाङ्नीकारे निश्चयो जातः । दूर्वाङ्कुराणां श्यामत्वादक्षरसाम्यम् । मधूकानि लिखिताक्षरसंधिस्थानीयानि । कण्ठस्य नालत्वान्मुखस्य कमलत्वम् ॥

तां दूर्वया श्यामलयातिवेलं
शृङ्गारभासंनिभया सुशोभाम् ।
मालां प्रसूनायुधपाशभासं
कण्ठेन भूभृद्भिभरांबभूव ॥ ४९ ॥

तामिति ॥ भूभृन्नलः तां मालां कण्ठेन बिभरांबभूव दधौ । किंभूताम्—श्यामलया अतएव शृङ्गाररसस्य भया कान्त्या संनिभया तुल्यया दूर्वयातिवेलमतितरां सुशोभां शोभनदीप्तिम् । तथा—प्रसूनायुधस्य कामस्य पाशभासं पाशसदृशीम् । मालानिक्षेपानन्तरमेव कामपरवशत्वान्मालायाः कामपाशत्वम् । 'श्यामो भवति शृङ्गारः' इति भरतवचनाच्छृङ्गारस्य श्यामत्वम् । भूभृत्पर्वतोऽपि । बिभरांबभूव 'भीह्री–' इत्यामि 'कृञ्चा–' इति भुवोऽनुप्रयोगः ॥

दूर्वाग्रजाग्रत्पुलकावलिं तां
नलाङ्गसङ्गाद्दृशमुल्लसन्तीम् ।
मानेन मन्ये नमितानना सा
सासूयमालोकत पुष्पमालाम् ॥ ५० ॥

दूर्वेति ॥ मानेन ईर्ष्याजनितकोपेन नमितानना सा भैमी सासूयं गुणवत्यामपि तस्यां दोषारोपसहितं यथा तथा । सेर्ष्यमितियावत् । पुष्पमालामालोकतेत्यहं मन्ये शङ्के । किंभूताम्—दूर्वाग्राण्येव दूर्वाङ्कुरा इव वा जाग्रती स्फुरन्ती पुलकावलिर्यस्यास्ताम् । तथा—नलाङ्गसङ्गाद्दृशमुल्लसन्तीं शोभमानां सहर्षां च । लज्जानम्रमुखी सत्येव मालासहितं नलं चक्षुः—(नलवक्षः) कटाक्षैर्विलोकितवती । अन्यापि नायिका एवंविधां सपत्नीं मानेन नम्रमुखी सती सेर्ष्यमालोकते । 'स्त्रीणामीर्ष्याकृतः कोपो मानोऽन्यासङ्गिनि प्रिये[1]' ॥

कापि प्रमोदास्फुटनिर्जिहान-
वर्णेव या मङ्गलगीतिरासाम् ।
सैवाननेभ्यः पुरसुन्दरीणा-
मुच्चैरुलूलुध्वनिरुच्चचार ॥ ५१ ॥

कापीति ॥ प्रमोदाद्धर्षवशात्कण्ठस्य सगद्गदत्वादस्फुटा अप्रकटा निर्जिहाना निर्गच्छन्तो वर्णा अक्षराणि यस्यामेवंविधैव या विलोकयितुमागतानां पुरसुन्दरीणामाननेभ्यः कापि लोकोत्तरा मङ्गलरूपा धवलादिगीतिरासीत् । सैवोच्चैरुलूलुध्वनिरुच्चचार उदलसत् । विवाहाद्युत्सवे स्त्रीणां धवलादिमङ्गलगीतिविशेषा गौडदेशे 'उलूलुः' इत्युच्यते । सोप्यव्यक्तवर्ण उच्चार्यते । स्वदेशरीतिः कविनोक्ता ॥

सा निर्मले तस्य मधूकमाला
हृदि स्थिता च प्रतिबिम्बिता च ।
कियत्यमग्ना कियती च मग्ना
पुष्पेषुबाणालिरिव व्यलोकि ॥ ५२ ॥

सेति ॥ तस्य नलस्य निर्मले हृदि स्थिता चान्तः प्रतिबिम्बिता च सा मधूकमाला कियती किंचिदमग्ना अबुडिता, कियती च मग्ना बुडिता पुष्पेषुः कामस्तस्य बाणालिः शरपङ्क्तिरिव व्यलोकि वीक्षिता । लोकेरिति शेषः । मधूकप्रतिबिम्बानां किंचिदन्तःप्रविष्टपुष्परूपबाणांशसाम्यम्, उपरिस्थितानां चामग्नबाणांशसाम्यम् । मालास्पर्शान्नलोपि कामपरवशो जात इत्यर्थः ॥

रोमाणि सर्वाण्यपि बालभावा-
दुरश्रियं वीक्षितुमुत्सुकानि ।
तस्यास्तदा कण्टकिताङ्गयष्टे-
रुद्ग्रीविकादानमिवान्वभूवन् ॥ ५३ ॥

रोमाणीति ॥ तदा तस्मिन्समये कण्टकिता संजातरोमाञ्चा अङ्गयष्टिः शरीरं यस्यास्तस्या भैम्याः वयोरभेदाद्बालभावात्केशत्वात् । अथ च शिशुत्वात् । वरस्य नलस्य श्रियं शोभां वीक्षितुमुत्सुकानीव सर्वाण्यपि रोमाणि उत् उच्चैः ग्रीवा यस्यां क्रियायां सा उद्ग्रीविका क्रिया तस्या आदानमङ्गीकरणमन्वभूवन्निव । सात्त्विको रोमाञ्चः स्तम्भश्च तस्या जात इत्यर्थः । बालाश्च वरश्रियं वीक्षितुमुत्कण्ठिताः खर्वत्वादुद्ग्रीवा भवन्ति । कण्टकस्तारकादिः । उद्ग्रीविका, बहुव्रीहौ कप् ॥

रोमाङ्कुरैर्दन्तुरिताखिलाङ्गी
रम्याधरा सा सुतरां विरेजे ।

---

१ 'पुलकाङ्कितम्' इत्यपि पाठः ।

१ 'अत्र दूर्वाग्रेत्यादिप्रस्तुतमालाविशेषणसाम्येनाप्रस्तुतसपत्नीप्रतीतेः समासोक्तिः । तदुपजीवनेन लज्जाहेतुकनलाननालोकने मानकृतासूयाहेतुकत्वोत्प्रेक्षणादनयोरङ्गाङ्गिभावेन संकरः' इति **जीवातुः** ।

शरव्यदण्डैः श्रितमण्डनश्रीः
स्मारी शरोपासनवेदिकेव ॥ ५४ ॥

रोमेति ॥ रोमाङ्कुरैर्दन्तुरितमुन्नतानतीकृतमखिलाङ्गं यस्याः सा रोमाञ्चयुक्ता । तथा रम्याधरा बिम्बोष्ठी सा भैमी स्मारी कामसंबन्धिनी शरोपासनवेदिकेव बाणाभ्यासशालेव सुतरां विरेजे । किंभूता वेदिका—शरव्यदण्डैर्वेध्यभूतैर्दण्डैः श्रिता मण्डनश्रीरलंकारशोभा यया सा । रोमाङ्कुराः शरव्यदण्डस्थानीयाः । भैम्यपि श्रितमण्डनश्रीः । रोमाञ्चितां तां दृष्ट्वा सर्वेपि कामपरवशा जाता इति भावः । 'शराभ्यास उपासनम्' इत्यमरः । दन्तुरं कृतं दन्तुरितम् ॥

चेष्टा व्यनेशन्निखिलास्तदास्याः
स्मरेषुवातैरिव ता विधूताः ।
अभ्यर्थ्य नीताः कलिना मुहूर्तं
लाभाय तस्या बहु चेष्टितुं वा ॥ ५५ ॥

चेष्टा इति ॥ तदा तस्मिन्कालेऽस्या निखिलाश्चेष्टा व्यनेशन्विनष्टाः । उत्प्रेक्षते—स्मरेषुवातैः कामबाणपुङ्खवायुभिर्विधूता इव भ्रमणवशान्नीता इव । वाशब्द उत्प्रेक्षान्तरसमुच्चये इवार्थे वा । तस्या लाभाय भैम्याः प्राप्तये बहुभिः प्रकारैश्चेष्टितुमभ्यर्थ्य भैमीमेव याचित्वा मुहूर्तं घटिकाद्वयं क्षणमात्रं वा कलिना युगेन नीता इव । भैम्याः कामुकेन कलिना स्वस्याल्पविलासितया भैमीमलभमानेन बहुविलाससंपत्तये भैमीविलासा एव याचितकमण्डनार्थं नीता इवेति भावः । याचितमपि क्षणमात्रमेव नीयते । सात्त्विकस्तम्भेन कटाक्षादिव्यापाररहिता सा जातेति भावः । 'व्यनेशन्' इत्यत्र पुषादित्वादङि 'नशिमन्योरलिट्येत्वं वक्तव्यम्' । इत्येत्वम् । भाष्यकारस्य कैयटस्य पदमञ्जरीकारस्यापि मते छन्दस्येवैत्वं नशिमन्योः, न भाषायाम् । 'अनेशन्मस्येपवः-' इत्युदाहरणात् 'नशेरप्येत्वं छन्दस्येव' इत्यवसीयते । वृत्तिकृता तु नशिमन्योर्भाषाविषयत्वमङ्गीकृत्य, अमिपचोश्छन्दोविषयत्वमङ्गीकृत्यैत्वं समर्थितम् ॥

इदानीं नलस्य सात्त्विकभावान्वर्णयति—

तत्न्यस्तमाल्यस्पृशि यन्नलस्य
स्वेदं करे पञ्चशरश्चकार ।
भविष्यदुद्वाहमहोत्सवस्य
हस्तोदकं तज्जनयांबभूव ॥ ५६ ॥

तदिति ॥ पञ्चशरः कामस्तया भैम्या निक्षिप्तं माल्यं मालामनुरागवशात्पुनः पुनः स्पृशतीति स्पृक् तस्मिन्नलस्य करे यत्सात्त्विकं स्वेदं घर्मजलं चकार, तत्, भविष्यत उद्वाहरूपस्य महोत्सवस्य संबन्धि नियतपरस्वत्वापादनहेतुभूतं हस्तोदकं कन्यादानजलमेव जनयांबभूव । नलस्यापि सात्त्विकः स्वेदः प्रवृत्त इति भावः । स्वेदजलं न भवति किंतु हस्तोदकमिति ॥

तूलेन तस्यास्तुलना मृदोस्त-
त्कम्प्राऽस्तु सा मन्मथबाणवातैः ।
चित्रीयितं तत्तु नलो यदुच्चै-
रभूत्स भूभृत्पृथुवेपथुस्तैः ॥ ५७ ॥

तूलेनेति ॥ मृदोरतिसुकुमार्यास्तस्या भैम्यास्तूलेन कार्पासेन मृदुतया यस्मात्तुलना साम्यमस्तीति शेषः । तत्तस्मात्सा मन्मथबाणवातैः कामशरपुङ्खवायुभिः कम्प्रा सकम्पा अस्तु भवतु । कार्पासो हि लघुत्वाद्वातेन सकम्पो भवति, सा च तत्तुल्या, अतस्तस्याः कामबाणवातैः सकम्पत्वं युक्तमेवेत्यर्थः । तत्तु पुनश्चित्रीयितमाश्चर्यं कृतं यदुच्चैर्भूभृन्महाराजो धीरोपि स नलस्तैः कामबाणवातैः कृत्वा पृथुर्महान्वेपथुः कम्पो यस्यैवंविधोऽभूत् । ततः कामबाणैश्चित्रं कृतम् । आश्चर्यं कृतमित्यर्थः । तूलस्य तूलतुल्यस्य वा वातैः कम्पो युक्तः । अत्युन्नतस्य पर्वतस्य तु वातैः कम्पोऽतितरामाश्चर्यकारीत्यर्थः । उभावपि तुल्यानुरागौ सात्त्विककम्पयुक्तौ जाताविति भावः । चित्रीयितम् 'नमोवरिवश्चित्रङः क्यच्' इति क्यजन्तात् क्तः । 'क्यचि च' इतीत्वमकारस्य ॥

दृशोरपि न्यस्तमिवास्त राज्ञां
रागादृगम्बुप्रतिबिम्बिमाल्यम् ।
नृपस्य तत्पीतवतोरिवाक्ष्णोः
प्रालम्बमालम्बनयुक्तमन्तः ॥ ५८ ॥

दृशोरिति ॥ दृशोरम्बुनि क्रोधजनितेऽश्रुणि प्रतिबिम्बोऽस्यास्तीति एवंशीलं माल्यं सा मधूकमाला रागात्नलविषयात्क्रोधात् । अथच तज्जनितान्नेत्रलौहित्यात् । हेतोः सभागतां राज्ञां दृशोरपि न्यस्तमिव येन केनचिन्निक्षिप्तमिवास्त अतिष्ठत । नेत्रलौहित्यदर्शनादेवं ज्ञातमार्त्यादिति यावत् । यथा कश्चित्क्रुद्धः सन्कस्यचिन्नेत्रे बलात्कुन्त्यादिशल्यं निक्षिपति, तदीयनेत्रस्य च लौहित्यं भवति, अश्रु च निर्गच्छति । तथा क्रोधात्दर्शनमात्रेण तन्माल्यमेव तेषां द्वयोरपि नेत्रयोर्निक्षिप्तं शल्यमिवाभवत् । अत एव तयोर्लौहित्यमश्रु च जातमित्यर्थः । अर्थादयुक्तमेतत् । न केवलमन्तःकरणे शल्यं निक्षिप्तं, किंतु दृशोरपीत्यपिशब्दार्थः । अथ च—रागात्नलप्राप्त्या भैम्या माल्यं यथा नलकण्ठे न्यस्तं तथा रागात्क्रोधान्नलस्पर्धिनां संमुखं पश्यतां राज्ञां नेत्रयोरपि शल्यमिव क्षिप्तमभूत् । यतो दृगम्बुप्रतिबिम्बितनलसहमानाः सर्वेपि राजानो माल्यदर्शनमात्रेण क्रोधेर्ष्यावशाः संकुचितनेत्राः पराङ्मुखाः सन्तस्तां न पश्यन्ति स्मेति भावः । नृपस्य नलस्याक्ष्णोरन्तर्मध्यः कर्तृभूतः प्रालम्बं प्रलम्बमानं हर्षविस्फारित्वमालम्बनताङ्गीचकार । एतदुक्तम् । हर्षवशाद्धि नेत्रयोर्विस्फारित्वं भवति । 'प्रालम्बम्' इति पाठे प्रालम्बनं प्रालम्बः स एवार्थः । उत्प्रेक्षते—किंभूतयोरक्ष्णोः—तत्पीतवतोरिव माल्यं सादरं विलोकमानयोरिव । हर्ष-

१ 'विनेशुः' इत्यपि पाठो जीवातौ । २ अत एव 'चेष्टा व्यनेशन्निखिलास्तदास्याः' इति श्रीहर्षस्य तु प्रमादः, इति भाष्यप्रदीपोद्योते नागेशेनोक्तम् । ३ 'नशिमन्योरमिपचोश्छन्दस्येत्वमलिट्यपि' इत्यानुपूर्वीं त्यक्त्वा 'नशिमन्योरलिट्येत्वं छन्दस्यमिपचोरपि' इत्यानुपूर्व्या रचयतो वार्तिककृतः 'नशिमन्योरलिट्येत्वम् छन्दसि', 'अमिपचोरपि' इति विभागेनाव्याख्याय 'नशिमन्योरलिट्येत्वम्' 'छन्दस्यमिपचोरपि' इति विभागेन व्याचक्षाणस्य भाष्यकृतोऽपीदमेव संमतमिति प्रतिभाति । ४ 'नलस्य कण्ठे' इति पाठो जीवातुव्याख्यातः ।

जनितं विस्फारत्वं विलोकनजत्वेनोत्प्रेक्षितम्। यद्वा—नलनेत्रमध्यस्तन्माल्यमेव प्रालम्ब्यमृजुलम्बिनं हारविशेषमङ्गीचकार। सादरविलोकनाच्चेत्रयोरन्तःप्रतिबिम्बितायां मालायां ऋजुलम्बित्वं नेत्रयोर्विस्फारत्वमन्तरेण न घटत इति तदेवाक्षिपति—नलस्तु तां मालां विलोकयन्हर्षवशाद्विस्फारितनेत्रो जात इति भावः। तन्माल्यं रागाद्दृशोर्न्यस्तमिवास्त नेत्रमध्ये निक्षिप्तं यच्छल्यादि तदिवाभूत्। युक्तमेतत्। क्रोधाद्धि दृष्टमात्रं वस्तु शल्यमिव भवति। नेत्रयोश्च लौहित्यमश्रु च भवतीति युक्तमित्यर्थः। तन्माल्यं पीतवतोरिव नलनेत्रयोरन्तः रागात्प्रीतेर्हृष्टत्वं प्राप। एतदपि युक्तम्। प्रीतेर्हि हर्षो भवतीत्यपि युक्तमेवेत्यर्थ इति वा। 'प्रालम्ब्यम्' गुणवचनादित्वात्ष्यञ्। 'प्रालम्बम्' इति पाठे 'प्रालम्बो हारभेदे स्यात्' इति विश्वः। 'राज्ञा' इति पाठे आनन्दाश्रुणि प्रतिबिम्बितं माल्यं राज्ञा नलेनानुरागाद्दृशोरपि न्यस्तमिवास्त। न केवलं हृदि, किंतु नेत्रयोरपि धृतमित्यर्थः। अत एव तन्माल्यं पिबतोर्नलनेत्रयोर्मध्यः प्रलम्बत्वमालम्बतेति युक्तम्। दीर्घाया मालाया अन्तर्धारणार्थं नेत्रमध्योपि दीर्घो जात इति भावः॥

स्तम्भस्तथालम्भितमां नलेन
भैमीकरस्पर्शमुदः प्रसादः।
कंदर्पलक्ष्यीकरणार्पितस्य
स्तम्भस्य दम्भं स चिरं यथापत्॥ ५९॥

स्तम्भ इति॥ मालानिक्षेपसमयजातो भैमीकरस्य स्पर्शस्तेन जाता मुद्धर्षस्तस्य प्रसादरूपः स्तम्भः सात्त्विकभावो नलेन तथाऽलम्भितमामतितरां प्राप्तः। तथा स नलः कंदर्पस्य लक्षीकरणार्थं शरव्यार्थमर्पितस्यारोपितस्य स्तम्भस्य दम्भं व्याजं वेध्यकाष्ठसादृश्यं चिरमापत्। कामवेध्यस्तम्भवद्भैमीकरस्पर्शजातसात्त्विकस्तम्भवशान्नितरां निर्व्यापारो जात इति भावः। नितरां कामपीडा सूचिता॥

इदानीमिन्द्रादिभिः स्वरूपं धृतमित्याह—

उत्सृज्य साम्राज्यमिवाथ भिक्षां
तारुण्यमुल्लङ्घ्य जरामिवारात्।
तं चारुमाकारमुपेक्ष्य यान्तं
निजां तनूमाददिरे दिगीशाः॥ ६०॥

उत्सृज्येति॥ अथ नलवरणानन्तरमिन्द्रादयो दिगिन्द्रा दिक्पाला यान्तं गच्छन्तं चारुं सुन्दरं तमलीकनलाकारमुपेक्ष्योन्मुच्य निजां सहस्रनेत्रत्वादिलक्षणां स्वीयां तनूमाराच्चलसमीप एवाददिरेऽङ्गीचक्रुः। कः कामिव—कश्चिद्राजा साम्राज्यमुत्सृज्य क्षीणपुण्यतया चक्रवर्तिपदं त्यक्त्वा भिक्षामिव। तथा—कालवशाद्गच्छत्तारुण्यमुल्लङ्घ्यातिक्रम्य कश्चिज्जरामिव। उपमाद्वयेनेन्द्राद्याकाराणां नलाकारादतिहीनत्वं सूचितम्। साम्राज्यादिपरित्यागेन भिक्षाद्यङ्गीकारे यावद्दुःखं भवति तावन्नलाकारपरित्यागेन स्वाकाराङ्गीकारे तेषां जातमिति भावः। तत्र निजत्वमेव हेतुः। अन्योपि विद्वानसमीचीनमपि स्वीयमङ्गीकरोति, ननु समीचीनमपि परकीयम्। 'यातुम्' इति पाठे स्वर्गमिति शेषः। आददिरे, 'आङो दोऽनास्य—' इति तङ्॥

यथाक्रमं तेषामाकारस्वीकारमाह—

मायानलत्वं त्यजतो निलीनैः
पूर्वैरहंपूर्विकया मघोनः।
भीमोद्भवासात्त्विकभावशोभा
दिदृक्षयेवाविरभावि नेत्रैः॥ ६१॥

मायेति॥ मायानलत्वमलीकनलत्वं त्यजतो मघोनो निलीनैः पूर्वं निजशक्त्या गोपितैः पूर्वैर्नेत्रैर्नलाङ्गसङ्गजनिता भीमोद्भवायाः सात्त्विकभावशोभा रोमाञ्चादिलक्ष्मीस्तस्या दिदृक्षयेव दर्शनेच्छयेव अहं पूर्वमहं पूर्वमिति यथा भवति तथा। यद्वा—अहं पूर्वमहं पूर्वमिति यस्यां क्रियायां सर्वे ब्रुवते साहंपूर्विका स्पर्धौत्सुक्याभ्यामाविरभावि वेगेन प्रकटीभूतम्। इन्द्रेण स्वनेत्रसहस्रं प्रकटितमिति भावः। अन्योपि दर्शनोत्सुकोऽहंपूर्विकया प्रकटो भवति। 'अहं पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियाम्' इत्यमरः। अहंपूर्विकया, स्वार्थे कः। मत्वर्थीयष्ठन्वा॥

गोत्रानुकूलत्वभवे विवाहे
तत्प्रातिकूल्यादिव गोत्रशत्रुः।
पुरश्चकार प्रवरं वरं य-
मायन्सखायं ददृशे तया सः॥ ६२॥

गोत्रेति॥ तया स इन्द्रसखः प्रवरो ददृशे दृष्टः। स कः—गोत्रशत्रुरिन्द्रो यं वरं श्रेष्ठं प्रवरमेतन्नामानं सखायं पुरश्चकार पूजितवान्। अथ च अग्रेसरमकरोत्। किं कुर्वन्—वसिष्ठकश्यपाद्यो[1]र्वंशादिपुरुषयोरनुकूलत्वेनासमानत्वेन विवाह्यत्वेन वा भवे जायमाने। अथच—गोत्रयोर्जन्मकालीननाम्नोरानुकूल्येन तृतीयैकादशचतुर्थदशमादिज्योतिःशास्त्रोक्तसद्राशिकूटसंभवेन जायमाने। विवाहे विषये। विवाहार्थमिति यावत्। आयन्स्वर्गात्स्वयंवरार्थमायन्भुवमागच्छन्। एतावन्तं कालमदृष्टोऽभूदिदानीं प्रकटो जात इत्यर्थः। सखायमिन्द्रमायन्प्राप्नुवन्स प्रवरस्तया दृष्ट इति वा। प्रवरशब्दच्छलेन प्रवरपुरस्कार उत्प्रेक्षते—तस्य गोत्रानुकूलत्वविशिष्टस्य विवाहस्य प्रातिकूल्याद्विरुद्धत्वादिव। यतोऽयं गोत्रशत्रुरिति च्छलम्। नलभैमीगोत्रयोरनुकूलत्वेन जायमाने विवाहे स्वयमिन्द्रस्तत्प्रातिकूल्यं कृतवान्। ततश्च विशिष्टस्यापि प्रातिकूल्ये गोत्र योरपि प्रातिकूल्यं जातम्। देवत्वाद्गोत्ररहित्याच्च (स्व) गोत्रभैमीगोत्रयोरप्यनुकूलत्वाभावात्प्रातिकूल्यम्। ततश्च गोत्रयोः प्रातिकूल्येपि श्रेष्ठप्रवराङ्गीकरणेनापि यथाकथंचिद्विवाहो घटिष्यत इति बुद्ध्या प्रवरमार्षेयं पुरश्चकारेत्यर्थः। यद्वा—गोत्रानुकूलत्वभवे विवाहे तस्य प्रातिकूल्याद्धेतोः प्रवरं पुरश्चकार। समानप्रवरत्वेनापि विवाहनिषेधादित्यर्थः। नाम्नोराद्यक्षरयो राशिकूटसूचकयोर्गणनायां षडष्टकाद्यसद्राशिकूटादिव गोत्रशत्रुरित्यादि ज्योतिःशास्त्रादूह्यम्। प्रवरमिन्द्रमिश्रम्॥

१ 'प्रभाव' इति पाठो जीवातौ।

स्वकामसंमोहमहान्धकार-
निर्वापमिच्छन्निव दीपिकाभिः ।
उद्गत्वरीभिश्छुरितं वितेने
निजं वपुर्वायुसखः शिखाभिः ॥ ६३ ॥

स्वकामेति ॥ वायुसखोऽग्निः निजवपुरुद्गत्वरीभिरुदित्वरीभिः शिखाभिर्ज्वालाभिः छुरितं वितेने व्याप्तं चकार । भैम्यभिलाषं परित्यज्य पुनरपि ज्वालाव्याप्तं शरीरमङ्गीचकारेत्यर्थः । किं कुर्वन्निव—दीपिकाभिर्वन्याग्निज्वलितशिखाभिः स्वस्य कामेन संमोहोऽविवेकरूपस्तल्लक्षणो महान्धकारस्तस्य निर्वापं शान्तिमिच्छन्निव । उद्गत्वरीभिः, 'गत्वरश्च' इति करबन्तात् 'टिड्ढा—' इति ङीप् ॥

पत्यौ वृते भीमजया न वह्ना-
वह्ना स्वमह्नाय निजुह्वुवे यः ।
जनादपत्रप्य स ह्रा सहाय-
स्तस्य प्रकाशोऽभवदप्रकाशः ॥ ६४ ॥

पत्याविति ॥ यः प्रकाशः पूर्वं वह्नेरलीकनलस्वाङ्गीकारसमये स्वमात्मानमह्नाय शीघ्रं निजुह्वुवे गोपितवान्स तस्य वह्नेः सहायः सखा प्रकाशो दीप्तिः सद्योऽह्ना दिवसेन हेतुनाऽप्रकाशोऽप्रकटोऽभवत्। प्रकटीभूतोऽपि सूर्यरश्म्याच्छादितत्वादप्रकटो जात इत्यर्थः । ह्रा कष्टम् । पत्यौ स्वस्वामिनि वह्नौ भीमजया न वृते सति जनालोकादपत्रप्य लज्जित्वैव प्रकटो नाभूदिति लुप्तोत्प्रेक्षा । अन्योपि स्वस्वामिनोपकर्षे लज्जया निलीयते । ज्वालास्वङ्गीकृतास्वपि रात्रिवत्प्रकाशाभावाद्वह्निर्निष्प्रभ एवाभूदिति भावः ॥

सदण्डमालक्तकनेत्रचण्डं
तमःकिरं कायमधत्त कालः ।
तत्कालमन्तःकरणं नृपाणा-
मध्यासितुं कोप इवोपनम्रः ॥ ६५ ॥

सदण्डमिति ॥ कालो यमः सदण्डं लोहयष्ट्या सह वर्तमानमलक्तकेन रक्तं वस्त्रमालक्तकं तद्वदारक्ते नेत्रे ताभ्यां चण्डमतिभयंकरम्, तथा—तमःकिरमन्धकारमुद्गिरन्तं । कालत्वात् । यद्वा स्वीयश्यामत्वातिशयेन तमसो विक्षेपकम् । एवंविधं कायं देहमधत्त प्रकटितवानित्यर्थः । उत्प्रेक्षते—तत्कालं तस्मिन्नलवरणानन्तरसमये नृपाणामन्तःकरणमध्यासितुमधिष्ठातुमुपनम्र आपन्नीभूतः कालः श्यामः कोप इव । मूर्तः कोप एव राज्ञां प्रकटो जात इति भावः । कुपितोप्येवंविधो भवति । आलक्तके, 'तेन रक्तं रागात्' इत्यण् । तमःकिरम्, 'इगुपध—' इति कः । अन्तःकरणम्, 'अधिशीङ्—' इति कर्मत्वम् ॥

दृग्गोचरोऽभूदथ चित्रगुप्तः
कायस्थ उच्चैर्गुण एतदीयः ।
ऊर्ध्वं तु पत्रस्य मषीद एको
मषेर्ददन्योपरि पत्रमन्यः ॥ ६६ ॥

दृगिति ॥ एतदीयो यमसंबन्धी उच्चैर्मितरामुन्नतो वा गुणः सेवकः उच्चैर्गुणा यस्यैवंविधो वा । कायस्थो राजसेवको गणकजातिविशेषश्चित्रगुप्तनामा लेखको दृग्गोचरः प्रकटोऽभूत् । अथच—काये देहे तिष्ठति कायस्थ एतदीयो नितरां प्रसिद्धः चित्रेणाश्चर्यभूतेन नलाकारेण गुप्तः छादित एवंभूतो गुणः श्यामवर्णः प्रकटोऽभूत् । एवं शब्दश्लेषसामान्येन सूचितयोर्द्वयोर्विशेषमाह—तत्र एको गणकस्तालपत्रस्योर्ध्वं चोपरि मषीं द्रव्यान्तरेण द्रवीभूतं कज्जलं ददाति एवंभूतः । प्राणिनां शुभाशुभकर्मगणनार्थं मष्या विलिखन्नित्यर्थः । अन्यः कृष्णगुणस्तु मषेरुपरि पत्रं ददन् मषेः सकाशादहं काल इति पत्रालम्बनं कुर्वन्प्रकटोऽभूदित्यन्वयः । अतिश्याम इत्यर्थः । चौ परस्परसमुच्चये स्वर्थे वा ॥

तस्यां मनोबन्धविमोचनस्य
कृतस्य तत्कालमिव प्रचेताः ।
पाशं दधानः करबद्धवामं
विभुर्वभावाप्यमवाप्य देहम् ॥ ६७ ॥

तस्यामिति ॥ तस्मिन्काले नलवरणानन्तरं विभुः स्वामी प्रचेता वरुण आप्यं पार्थिवतेजसवायवयवोपष्टब्धप्रचुरतरजलावयवनिर्मितमुपभोगयोग्यमम्मयं देहमवाप्य बभौ । किंभूतः—तस्यां भैमीविषये कृतस्य मनोबन्धविमोचनस्यान्तःकरणबन्धोन्मोचनस्य [पूर्वं भैमीविषये ले (पा)शेन बद्धा निश्चलीकृत्य यच्चित्तं मनः, तत्तया नले वृते सति प्रकृतचेतस्त्वापुनस्त्वक्षणमेवोन्मोचितम्] (तत्) तदीयमोचनस्यैव (तत्) संबन्धिनमिव करे बद्धवामं कृतवसतिं पाशं स्वायुधं दधानः । अन्यस्यापि तत्कालमेव कृतयस्यादिबन्धनविमोचनस्य हस्ते पाशो बन्धनरज्जर्भवति । आप्यं पूर्ववत् ॥

सहद्वितीयः स्त्रियमभ्युपेया-
देवं स दुर्बुध्य नयोपदेशम् ।
अन्यां सभार्यः कथमृच्छतीति
जलाधिपोऽभूदसहाय एव ॥ ६८ ॥

सहेति ॥ स जलाधिपो वरुणः । अथ च—जडस्वामी मूर्खतमः। इति विचार्यासहाय एवाभूत । इति किम्—सहद्वितीयः ससहायः स्त्रियमभ्युपेयात्, किं पुनरन्यामित्येवंरूपं नयोपदेशं नीतिमार्गं दुर्बुध्य दुष्टमिदमिति विचार्य 'माता स्वसा दुहित्रा वा न विविक्तासनो भवेत् । बलवानिन्द्रियग्रामो विदुषामपि कर्षति ॥' तथा—'कामिनी कामयेदेव निर्जनेन पितरं सुतम् । सद्वितीयोऽभ्युपेयात्तामतः परिणतामपि ॥' इत्यादिवाक्यरूपं स्त्रीपुरुषयोरेकान्ते मदनसंभवादेकेन स्त्रियं प्रति न गन्तव्यम्, किंतु ससहायेनैवेति प्रतिपादनपरं नीत्युपदेशं द्वितीयया सहधर्मिण्या वर्तमानः स्त्रियमुपेयादित्युपदेशपरं बुद्ध्वा । सभार्योऽन्यां कथमृच्छति प्राप्नोति, अपितु न कथंचित् । नह्यन्यस्यामनुरक्तमन्यानुसरति, न चान्ययानुसृतमन्या वृणोतीति नयस्य पूर्वमर्थं त्यक्त्वा द्वितीयमङ्गीकृत्यासहाय एवागत इत्यर्थः । अन्योपि जडो नयोपदेशं विप-

१ 'महान्धकारं निर्वापयिष्यन्निव' इत्यपि पाठः ।

१ 'अत्र 'मषेरुपरि पत्रम्' इति प्रतीतेरामीकरणादिरोधाभासोऽलंकारः' इति जीवातुः ।

रीतमेव बुध्यते । 'द्वितीया सहधर्मिणी' इत्यमरः । सहद्वितीयः विकल्पत्वात्सत्वाभावः ॥

इदानीं देव्यापि स्वाकारो धृत इत्याह—

देव्यापि दिव्यानु तनुः प्रकाशी-
कृता मुदश्चक्रभृतः सृजन्ती ।
अनिह्नुतैस्तामवधार्य चिह्नै-
स्तद्वाचि बाला शिथिलाद्भुताभूत् ॥ ६९ ॥

देव्येति ॥ अग्निवन्द्रादीनां स्वाकारधारणानन्तरं देव्या अपि सरस्वत्या अपि चक्रभृतः श्रीविष्णोः मुदो हर्षान्सृजन्ती प्रेयसितरा दिव्या तनुः सुन्दरा मूर्तिः प्रकाशीकृता । देव्यापि स्वाकारो धृत इत्यर्थः । अनन्तरं च बाला भैमी अनिह्नुतैः प्रकटितैर्वीणाहंसादिभिश्चिह्नैस्तां सरस्वतीमवधार्य ज्ञात्वा तद्वाचि श्लेषवक्रोक्त्यादिरूपायां तस्या वाण्यां विषये शिथिलाद्भुता परित्यक्ताश्चर्याभूत् । पूर्वं तु मानुषीयमीदृशं कथं वदतीति साश्चर्याऽभूत् । संप्रति सरस्वतीं दृष्ट्वा अस्या एवमुक्तौ किमाश्चर्यमपि तु न किंचिदिति त्यक्ताश्चर्या जातेत्यर्थः ॥

विलोकके नायकमेलकेऽस्मि-
न्रूपान्यताकौतुकदर्शिभिस्तैः ।
बाधा बतेन्द्रादिभिरिन्द्रजाल-
विद्याविदां वृत्तिवधाय्यधायि ॥ ७० ॥

विलोकक इति ॥ अस्मिन्नानादेशेभ्यः समागते नायकमेलके राजसङ्घे विलोकके विलोकयति सति रूपान्यतया नलाकारं परित्यज्य सहस्रनेत्राद्याकारधारणेन कौतुकं दर्शयितुं शीलमेषामेवंभूतैर्देवीसहितैरिन्द्रादिभिर्निजेले जलदर्शनादिरूपामिन्द्रजालविद्यां ये विदन्ति जानन्ति तेषां वृत्तिवधाजीवनोपायस्य स्वयमङ्गीकरणेन नाशाद्बाधा व्यधायि पीडा विहिता । बताश्चर्यं कष्टं वा । स्वयंवरमध्य इन्द्रजालं प्रकटयतामैन्द्रजालिकानां विलोककेऽस्मिन् राजसङ्घे तैर्वृत्तिवधात्तेषां बाधा व्यधायि । ऐन्द्रजालिकान्परित्यज्येन्द्रादीनामेव विलोकनादित्यर्थ इति तत्त्वार्थो वा । रूपान्तरं धारयमाणानिन्द्रादीन्दृष्ट्वा सर्वेपि साश्चर्या जाता इति भावः । तैः, सा च ते च 'पुमान्स्त्रिया' इत्येकशेषः ॥

विलोक्यतावाप्तदुरापकामौ
परस्परप्रेमरसाभिरामौ ।
अथ प्रभुः प्रीतमना बभाषे
जाम्बूनदोर्वीधरसार्वभौमः ॥ ७१ ॥

विलोक्येति ॥ अथ जाम्बूनदस्य सुवर्णस्योर्वीधरः पर्वतो मेरुस्तस्य सार्वभौमश्चक्रवर्ती अत एव प्रभुः समर्थ इन्द्रः प्रीतमनाः सन् तौ भैमीनलावेतादृशौ विलोक्य बभाषे ॥ किंभूतौ—आप्तोन्योन्यप्राप्तिरूपो दुरापोऽन्येन प्राप्तुमशक्यः कामोऽभिलाषो याभ्याम् । अत एव—परस्परप्रेमरसेनाभिरामौ स्तम्भस्वेदादिसात्त्विकभावयुक्तौ । 'प्रभुः, जाम्बूनदोर्वीधर-' इत्यादिना वरदानसामर्थ्यं सूचितम् । 'प्रीतमनाः' इत्यनेन च स्वेच्छयैव वरं दातुमारब्धवान्नतु याचितः सन्निति प्रतारणाभावं सूचयति । सार्वभौमः । 'तस्येश्वरः' इत्यण् । अनुशतिकादित्वादुभयपदवृद्धिः ॥

किमाह स्म, इत्यत आह—

वैदर्भि दत्तस्तव तावदेष
वरो दुरापः पृथिवीश एव ।
दूत्यं तु यत्त्वं कृतवानमायं
नल प्रसादस्त्वयि तन्ममायम् ॥ ७२ ॥

वैदर्भीति ॥ हे वैदर्भि, मया तावत्प्रथममेष पृथिवीश एव नल एव त्वत्संबन्धी वरः । अथ च देवप्रसादः । अर्थात्तुभ्यं दत्तः । किंभूतः—भूयोभिरपि तपोभिर्दुरापः । दत्तस्तावद्दत्त एवेति वा । इति भैमीमुक्त्वा नलमाह—हे नल, त्वं तु भैमीविषयेऽस्मत्संबन्धि दूत्यं यद्यस्मादमायं व्याजरहितं मनःशुद्ध्या कृतवान्, तत्तस्मात्त्वयि विषये ममायं वक्ष्यमाणः प्रसादः । वरदानमित्यर्थः ॥

प्रत्यक्षलक्ष्यामवलम्ब्य मूर्तिं
हुतानि यज्ञेषु तवोपभोक्ष्ये ।
संशेरतेऽस्माभिरवीक्ष्य भुक्तं
मखं हि मन्त्राधिकदेवभावे ॥ ७३ ॥

प्रत्यक्षेति ॥ हे नल, अहं प्रत्यक्षेण लक्ष्यां नेत्रदृश्यां मूर्तिं तनुमवलम्ब्य धृत्वा तव यज्ञेषु हवींषि पुरोडाशादीन्युपभोक्ष्ये । ईदृशेन वरेण मम को लाभ इत्यत आह—हि यस्माद्विद्वांसो यजमानादयश्च मखं यज्ञमस्माभिः साक्षाद्भुक्तमवीक्ष्य मन्त्रादधिकोऽतिरिक्तो देवस्तस्य सद्भावे विषये संशेरते । मीमांसका मन्त्रातिरिक्ता कर्मसमवायिनी देवता नास्त्येवेति वेदान्तिभिः सह विप्रतिपद्यन्ते । तस्मात्तद्विप्रतिपत्तिनिरासद्वारा तुभ्यं कीर्तिं दातुं त्वदीययज्ञेषु हुतं प्रत्यक्षेणैव शरीरेण भोक्ष्य इति भावः । अग्नौ प्रक्षिप्तस्य हविषो भस्मसाद्भावमात्रस्य दर्शनान्मन्त्रप्रकाश्येन्द्रादीनां चादर्शनात्किमयं यज्ञः सत्योऽसत्यो वेति संदेहे प्रत्यक्षशरीरेण मखभोजने स्वयं संदेहो गमिष्यति । कस्मिन् सति—मन्त्रादधिके देवेषु भावे विश्वासे सति । 'मन्त्रमयी देवता' इत्येतत्पक्षापेक्षया प्रत्यक्षायां देवतायामधिकस्य मनोविश्वासस्य युक्तत्वादित्यर्थः । संशयनिवृत्तिरेव महांस्तव लाभो भविष्यतीति भावः । उपभोक्ष्ये, 'भुजोऽनवने' इति तङ् । अस्माभिरिति बहुवचनं देवतान्तराभिप्रायम् ॥

भवानपि त्वद्दयितापि शेषे
सायुज्यमासादयतं शिवाभ्याम् ।
प्रेत्यास्मि कीदृग्भवितेति चिन्ता
संतापमन्तस्तनुते हि जन्तोः ॥ ७४ ॥

भवानिति ॥ हे नल, भवानपि त्वद्दयिता भैम्यपि युवां शेषे भूलोकभोगनिमित्तस्य कर्मणः शेषेऽस्तमये सति शिवाभ्यामीश्वरपार्वतीभ्यां सायुज्यं सह ऐक्यमासादयतं प्राप्नुतम् । भवान्शिवेन, भैमी च शिवया सहैक्यं गच्छत्वित्यर्थः । स्वकर्मप्राप्तमिदं स्वयमेव भविष्यति किं वरदानेनेत्यत आह—हि यस्मात्प्रेत्य मरणं प्राप्याहं कीदृक्प्रेतो देवो मनुष्यो वा, स्वर्गस्थो नारकी वा भवि-

ष्यामीत्यादिचिन्ता जन्तोः प्राणिनोऽन्तःकरणे संतापं महान्तमाधिं जनयति । वरदाने चिन्तानिवृत्तेर्मनस्तापनाशः फलमित्यर्थः । शिवाभ्याम् 'पुमान्स्त्रिया' इत्येकशेषः । 'अस्मि' इत्यहमर्थेऽव्ययं वा ॥

तवोपवाराणसि नामचिह्नं
वासाय पारेसि पुरं पुरास्ति ।
निर्वातुमिच्छोरपि तत्र भैमी-
संभोगसंकोचभियाधिकाशि ॥ ७५ ॥

तवेति ॥ हे नल, निर्वातुमिच्छोरपि मुमुक्षोरपि तव वासाय वसत्यर्थमुपवाराणसि काशीसमीपे पारेसि अस्मिन्नद्याः परतीरे नामचिह्नं त्वन्नामाङ्कितं तत्प्रसिद्धं पुरं नलपुरमिति यावत् । पुरास्ति भविष्यति । इदानीमन्यत्र निवासेऽप्यतः परं तत्पुरं राजधानी भविष्यति । मुमुक्षोरपि ते पुरं काशीमधिकृत्य न कृतमित्यर्थः । किमिति न कृतमित्यत आह-भैम्या सह संभोगः सुरतादिसुखं तस्य संकोचोऽल्पत्वं तस्मान्निया भयेन अधिकाशि पञ्चक्रोशपरिमितायां काश्यां मुक्तिपुर्यां ब्रह्मचर्यादिनियमे भोगसंकोचभिया तत्पुरं न कृतम्, किंतु तत्समीप इति भावः । उपवाराणसि, सामीप्येऽव्ययीभावः । पारेसि, 'पारेमध्ये षष्ठ्या वा' इत्येदन्तत्वं च तत एव निपातनात् । पुरास्ति, 'यावत्पुरा–' इति लट् । अधिकाशि, सप्तम्यर्थेऽव्ययीभावः॥

धूमावलिश्मश्रु ततः सुपर्वा
मुखं मखास्वादविदां तमूचे ।
कामं मदीक्षामयकामधेनोः
पयायतामभ्युदयस्त्वदीयः ॥ ७६ ॥

धूमेति ॥ ततो धूमावलिरेव श्मश्रु यत्रैवंविधं मखास्वादविदां यज्ञरसाभिज्ञानां देवानां मुखं सुपर्वा देवोऽग्निरिति तं नलमूचे । इति किम्—हे नल, त्वदीयोऽभ्युदयस्त्वत्समृद्धिः कामं नितरां ममेक्षामयी विलोकनमयी विलोकनरूपा कामधेनुस्तस्याः पयायतां दुग्धमिवाचरतु तद्वदपरिमितो भवत्विति ॥ मद्विलोकनमात्रेण तव समृद्धिरनन्तास्त्विति तस्मै वरं दत्तवानित्यर्थः । अन्यत्रापि मुखस्य भाषणं श्मश्रु च युक्तम् । कामधेनोः पयो युक्तम् । धूमावलिरूपेण श्मश्रुणा ततो व्याप्त इति वा । पयायताम् । आचारे, 'कर्तुः क्यङ् सलोपश्च' इति क्यङ्सलोपौ ॥

वरान्तरमाह—

या दाहपाकौपयिकी तनुर्मे
भूयास्त्वदिच्छावशवार्तिनी सा ।
तया पराभूततनोरनङ्गा-
त्तस्याः प्रभुः सन्नधिकस्त्वमेधि ॥ ७७ ॥

येति ॥ हे नल, स्फोटादिजनितो दाहः, तण्डुलादेः पाकः, तयोरौपयिकी कारणभूता मे या तनुर्मूर्तिः सा तवेच्छाया वशे वर्तत इत्येवंशीला भूयात् । निरग्निकेऽपि देशे यत्र त्वमभिलषिष्यसि तत्र दाहपाकयोग्या मम मूर्तिः प्रकटा भवत्वित्यर्थः । अतएव वशवर्तित्वात्तस्या मदीयमूर्तेः प्रभुः स्वामी सन्त्वं शिवनेत्रज्वालारूपया तया मदीयमूर्त्या पराभूततनोर्दग्धशरीरादनङ्गादधिक एधि भव । पूर्वमेव सुन्दरत्वेन कामादधिकः, इदानीं तु मत्तस्वास्वद्वशवर्तित्वात्त्वद्दासीभूतया कामे पराभूते प्रकारान्तरेणाप्यधिकतरो भवेति भावः ॥

वरान्तरमाह—

अस्तु त्वया साधितमन्नमीन-
रसादि पीयूषरसातिशायि ।
यद्भूप विप्रस्तव सूपकार-
क्रियासु कौतूहलशालि शीलम् ॥ ७८ ॥

अस्त्विति ॥ हे नल, त्वया साधितं राद्धमन्नं तण्डुलादि, मीना मत्स्याः, रसाः प्रपानकादयो दुग्धादयो वा तदादयो मुख्या यस्य एवंभूतमन्यदपि पाकयोग्यं भक्ष्यं पीयूषरसमप्यमृतास्वादमप्यतिशेतेऽतिक्रामति तच्छीलमेवंभूतमस्तु भवतात् । यद्यस्माद्धे भूप, तव सूपकारक्रियासु पाचकनिष्पादितान्नरन्धनकृतिषु कौतुकेन शालते तच्छीलमेवंविधं शीलं स्वभावं विप्रो जानीमः । तस्मात्तुभ्यमीदृशो वरो दत्त इत्यर्थः । 'चित्तम्' इत्यपि पाठः । विप्रः 'अस्मदो द्वयोश्च' इति बहुवचनम् ॥

वैवस्वतोऽपि स्वत एव देव-
स्तुष्टस्तमाचष्ट धराधिराजम् ।
वरप्रदानाय तवावदानै-
श्चिरं मदीया रसनोद्धुरेयम् ॥ ७९ ॥

वैवस्वतोऽपीति ॥ वैवस्वतः सूर्यपुत्रो यमोऽपि देवः स्वत एव स्वयमेव तुष्टः सन् धराधिराजं नलमित्याचष्टाबोचत् । इति किम्—हे नल, तवावदानैर्दृत्यादिकर्मभिर्यागीयपशोरङ्गभावैर्वा निमित्तैरियं मदीया रसना जिह्वा वरप्रदानाय तुभ्यं वरं दातुं चिरमुद्धुरोत्सुका कदा वरं दास्यामीति सोत्कण्ठा विद्यत इति । अहं वरं ददामीत्यर्थः ॥

सर्वाणि शस्त्राणि तवाङ्गचक्रै-
राविर्भवन्तु त्वयि शत्रुजैत्रे ।
अवाप्यमस्मादधिकं न किंचि-
ज्जागर्ति वीरव्रतदीक्षितानाम् ॥ ८० ॥

सर्वाणीति ॥ हे नल, सर्वाणि मन्त्रप्रयोज्यमन्त्राक्षादिसहितान्यभ्याससाध्यानि कुन्तखड्गादीनि शस्त्राण्यङ्गानां मोक्षोपसंहारादीनां मन्त्रदेवतादीनां चक्रैः समूहैः स्वव्याप्तिभेदवन्तु प्रकटीभवन्तु मन्त्रशस्त्रादीनि त्वमेव जानीहीति भावः । यतः—सर्वजैत्रे शत्रूणां जेतरि । किमित्येवं वरदानमित्याशङ्क्याह—संग्रामादपलायनलक्षणे वीराणां व्रते दीक्षितानां गृहीतनियमानां शूराणामस्मात्सर्वशस्त्रज्ञानादधिकमुत्कृष्टं किंचिदवाप्यं प्राप्यं न जागर्ति न

१ कीदृग्भविता अस्मि इति वा । 'धातुसंबन्धे प्रत्ययाः' इति भविता इति भविष्यत्कालप्रत्ययः 'अस्मि इति वर्तमानकालप्रत्ययेनाभिसंबध्यमानः साधुर्भवति'—इति सुखावबोधा ।

२ 'नराधिराजम्' इत्यपि पाठः ।

स्फुरति नास्ति । किंत्वेतदेव तेषां परमं प्राप्यम् । तस्मादयं वरो युक्त एवेत्यर्थः । दीक्षितानाम्, 'कृत्यानां कर्तरि वा' इति षष्ठी ॥

कृच्छ्रं गतस्यापि दशाविपाकं
धर्मान्न चेतः स्खलतु त्वदीयम् ।
अमुश्चतः पुण्यमनन्यभक्तेः
स्वहस्तवास्तव्य इव त्रिवर्गः ॥ ८१ ॥

कृच्छ्रमिति ॥ हे नल, कृच्छ्रमतिकष्टं दशाविपाकमवस्थापरिवर्तं गतस्यापि प्राप्तस्यापदि पतितस्यापि तव चेतो धर्मान्न स्खलतु । किंभूतं चेतः—त्वदीयं त्वदायत्तम् । आपदि सर्वैरप्यधर्म एव क्रियते, तव तु चित्तमापद्यपि धर्मपरमेव भूयादिति वरो मया दीयत इत्यर्थः । एतस्य वरस्य दाने हेतुमाह—यस्मात्पुण्यममुञ्चतोऽनन्यभक्तेः पापानासक्तस्य केवलधर्मैकसेविनः पुरुषस्य धर्मार्थकामलक्षणस्त्रिवर्गः स्वहस्ते वसति एवंभूत इव भवति । अत्यक्ते धर्मे तदायत्तावर्थकामावपि प्राप्येते । कृच्छ्रमित्यादिना भविष्यत्कलिप्रभावः सूचितः । 'स्खलतात्तवेदम्' इति पाठः । अन्यस्य भक्तिर्भजनं तद्भावोऽनन्यभक्तिर्धर्मातिरिक्तभजनाभावाद्धेतोरिति वा वसतीति वास्तव्यः 'वसेस्तव्यत्कर्तरि णिच्च' इति तव्यत् । वर्गः सङ्घः । 'त्रिवर्गो धर्मकामार्थैः' इत्यमरः[1] ॥

स्मिताञ्चितां वाचमवोचदेनं
प्रसन्नचेता नृपतिं प्रचेताः ।
प्रदाय भैमीमधुना वरौ तु
ददामि तद्यौतककौतुकेन ॥ ८२ ॥

स्मितेति ॥ प्रसन्नचेताः संतुष्टः प्रचेता वरुण एनं नृपतिं प्रति स्मिताञ्चितां हासविशदां वाचमवोचत्—हे नल, अहं भैमीं प्रदायाधुना तस्या भैम्या यौतकं युतकयोर्वधूवरयोः संबन्धि पारिबर्हं वस्त्राभरणादि तस्य कौतुकेन तु पुनः द्वौ वरौ ददामि । 'कन्यां प्रदाय यत्किंचिद्दरायात्र प्रदीयते । वेदिकायां स्थितायैव तद्यौतकमिति स्मृतम् ॥' इति । युतं युग्मं युतमेव युतकं युतकसंबन्धि देयं यौतकम् । दायजा इति कान्यकुब्जभाषायाम् ॥

यत्राभिलापस्तव तत्र देशे
नन्वस्तु धन्वन्यपि तूर्णमर्णः ।
आपो वहन्तीह हि लोकयात्रां
यथा न भूतानि तथापराणि ॥ ८३ ॥

यत्रेति ॥ ननु हे नल, यत्र धन्वनि निर्जले मरावपि देशे तव जलाभिलाषः, तत्र देशे त्वदिच्छामात्रेण तूर्णं शीघ्रमर्णो जलमस्तु भवतु । जलस्यैव वरदाने हेतुमाह—हि यस्मादिह लोके पञ्चसु भूतेषु वा मध्ये आपो जलानि यथा लोकयात्रां लोकजीवनहेतुत्वं वहन्ति प्रापुवन्ति, तथापराणि भूतेजोवाय्वाकाशलक्षणानि भूतानि लोकजीवनहेतवो न भवन्ति । 'पानीयं प्राणिनां प्राणा विश्वमेतच्च तन्मयम्' इति । उदकस्येच्छानुसारित्वं परमः पुरुषार्थ इत्यर्थः । 'यात्रा तु जीवनोपाये' इति विश्वः ॥

प्रसारितापः शुचिभानुनास्तु
मरुः समुद्रत्वमपि प्रपद्य ।
भवन्मनस्कारलवोद्गमेन
क्रमेलकानां निलयः पुरेव ॥ ८४ ॥

प्रसारीति ॥ हे नल, मरुर्निर्जलो देशो भवतो मनस्कारोऽभिलाषस्तस्य लवो लेशस्तस्योद्गमेनोदयेन बहूदकात्समुद्रत्वं प्रपद्य प्राप्यापि पुरेव निर्जलत्वदशायां यथासीत् तथैवास्तु किंभूतः—(पूर्वम्)शुचिभानुना ग्रीष्मसंबन्धिना सूर्येण प्रसारी विस्तृतस्तापः संतापो यस्य । (इदानीमपि) समुद्रत्वाच्छुभ्रकिरणेन चन्द्रेण प्रसारिता विस्तारिता आपो यस्य । शुचेर्वडवाग्नेः किरणेन ज्वालया विस्तारितः (री तापः) संतापो यस्येति वा चन्द्रोदये समुद्रवृद्धिः, समुद्रे वडवाग्निर्युक्तः । तथा—(पूर्वम्) क्रमेलकानामुष्ट्राणां निलयः स्थानभूतः । बाहुल्येन तेषां तदुद्भवत्वात् । (इदानीम्) भवन्मनस्कारोऽभिलाषस्तस्य लवो लेशस्तदुद्गमे सति नक्राणां यादोविशेषाणां ये मेलकाः सङ्घास्तेषां निलयः । क्रमेलकानां निलयो मरुर्भवन्मनस्कारलवोद्गमे सति समुद्रत्वं प्रपद्यापि पुरेव शुचिभानुना प्रसारितापो नास्तु, अपितु भवत्वेवेति वा । प्रसारिता आपो यस्येति, 'ऋक्पूर्-' इत्यप्रत्ययः । मनस ऐकाग्र्यकरणं मनस्कारः । चित्तस्यैकाग्र्येण चिन्तनमिच्छाविशेषः । 'चित्ताभोगो मनस्कारः' इत्यमरः । 'अतः कृकमि-' इति सत्वम् ॥

वरान्तरमाह—

अम्लानिरामोदभरश्च दिव्यः
पुष्पेषु भूयाद्भवदङ्गसङ्गात् ।
दृष्टं प्रसूनोपमया मयान्य-
न्न धर्मशर्मोभयकर्मठं यत् ॥ ८५ ॥

अम्लानिरिति ॥ हे नल, भवदङ्गसङ्गाद्धेतोः पुष्पेष्वम्लानिरसंकुचद्वर्णावयवत्वम्, आमोदभरश्च दिव्यः स्वर्गीयः परिमलातिशयश्च भूयात् । यत्तस्मात्प्रसूनोपमया पुष्पसादृश्येन पुष्पसदृशमित्यर्थः । धर्मस्य पुण्यस्य शर्मणः सुखस्य चोभयस्य पुण्यसुखलक्षणस्य द्वयस्य कर्मठं करणे समर्थमन्यत्पुत्रादिकं वस्तु मया न दृष्टम् । किंतु पुष्पमेव । देवादिपूजनेन धर्मं, शिरसि धारणेन परिमलेन वा सुखं च करोति । कर्मणि घटते, 'कर्मणि घटोऽठच्' ॥

वाग्देवतापि स्मितपूर्वमुर्वी-
सुपर्वराजं रभसाद्बभाषे ।
त्वत्प्रेयसीसंमदमाचरन्त्या
मत्तिं न किंचिद्ग्रहणोचितं ते ॥ ८६ ॥

वागिति ॥ वाग्देवता सरस्वत्यपि स्मितपूर्वम् । प्रसन्नत्वात्किंचित्स्मितं कृत्वेत्यर्थः । उर्व्याः सुपर्वराजं भूमीन्द्रं रभसाद्बभाषे इतीति किम्—) 'हे नल, तव प्रेयसी भैमी तस्यास्त्वत्प्राप्तिजनितं संमदं हर्षमाचरन्त्याः कुर्वत्या मन्मत्तः सकाशात्किंचित्ते

---

१ 'सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः-' इति जीवातुः ।
२ 'अत्र त्रिवर्गसिद्धिलक्षणकार्येण धर्मात्यागरूपकारणसमर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासः-' इति जीवातुः ।

तव ग्रहणोचितं ग्रहीतुं योग्यं किं न । अपितु मत्सकाशादपि किंचिद्गृहीतुमुचितमेव । स्वस्त्रियामिश्रभूतया मया यद्दीयते तदप्यङ्गीकुर्विति । 'रभसो हर्षवेगयोः' इति विश्वः । संमदम् 'प्रमदसंमदौ हर्षे' इति साधुः ॥

गर्वपरिहारपूर्वं स्ववरस्य ग्रहणयोग्यत्वमेव समर्थयते—

अर्थो विनैवार्थनयोपसीद-
न्नाल्पोऽपि धीरैरवधीरणीयः ।
मान्येन मन्ये विधिना वितीर्णः
स प्रीतिदायो बहु मन्तुमर्हः ॥ ८७ ॥

अर्थ इति ॥ त्वया मत्समीपमागन्तव्यमिति या अर्थना तया विनैव उपसीदन्समीपमागच्छन्स्वयमेव वा भवन्नल्पोऽप्यर्थः । अर्थ्यतेऽर्थः फलं स धीरैर्मनीषिभिर्नावधीरणीयो नावज्ञेयः किंत्वङ्गीकरणीय एव । यस्मान्मान्येन मानमर्हता पूज्येन विधिना ब्रह्मणा दैवेन वा वितीर्णो दत्तो याच्ञामन्तरेण लब्धत्वात्स प्रीतिदायः प्रीत्या दानमल्पोऽपि बहु मन्तुं गौरवेणाङ्गीकर्तुमर्ह उचित इत्यहं मन्ये । तस्मात्त्वयापि मया योऽल्पोऽप्यर्थो दीयते स ग्रहीतव्य एवेति भावः ॥ धीरैरल्पोऽप्यर्थो नावज्ञायते किं पुनर्महानित्यपेरर्थः । महतोपि वरस्याल्पत्वोक्तेर्गर्वपरिहारः । प्रीत्या दायः 'कर्तृकरणे कृता–' इति समासः । दीयते दायः कर्मणि घञ् ॥

तमेव वरमाह—

अवामावामार्धं सकलमुभयाकारघटना-
द्द्विधाभूतं रूपं भगवदभिधेयं भवति यत् ।
तदन्तर्मन्त्रं मे स्मरहरमयं सेन्दुममलं
निराकारं शश्वज्जप नरपते सिध्यतु सते ८८

अवामेति ॥ शश्वज्जपो यस्य तत्संबोधनम् तादृश भो नरपते नल, मे मन्त्रं गोप्यं मदीयरहस्यभूतं सेन्दुमिन्दोर्मा चन्द्रकान्तिस्तत्सहितम् । ईशभागे—चन्द्रकान्त्या युतं चन्द्रकलोपेतम् । पार्वतीभागे—भूषणीभूतार्धचन्द्रयुतम् । उक्तरीत्या निश्चित आकारः स्वरूपं यस्य । यद्वा—ईहामात्रेण साकारम्, विचारे क्रियमाणे अविद्यमानाकारम् । तथा—स्मरमयं कामतत्त्वरूपम्, हरमयं शिवतत्त्वरूपं क्रमेण भुक्तिमुक्तिदायि एवंभूतं तद्रूपमन्तःकरणे सते साधवे । अर्थात्तुभ्यम् । यद्वा—हे नरप, (स) ते साधवे ते तुभ्यम् । अलमत्यर्थं सिध्यतु । समाधिदशायां साक्षात्प्रत्यक्षीत्यर्थः । मे तद्रूपमिति वा । मे मम प्रसादादिति शेष इति वा । स्त्रीणां कामप्रधानत्वात्स्मरपदेन स्त्रीभागो लक्ष्यते । तथा च पूर्वोक्तगुणविशिष्टं स्मरहरमयं शक्तिशिवरूपं तन्मे रूपं तवान्तः सिध्यत्विति वा । पूर्वोक्तं हरमयं मे स्वरूपमलमन्तः स्मर चिन्तय तद्रूपं सते ते सिध्यत्विति वा । तद्रूपमलमन्तः स्मर, तथा शश्वज्जप स्तुहि, तच्च सिध्यत्विति वा । शश्वज्जपनं जपो यस्य तादृश हे नल, सेन्दुममलं कर्पूरगौरं हरमयं शुभावहविभिभूतं तन्मे विशिष्टं रूपं स्मर, रपते भाषमाणाय स्तुवते सते साधवे तुभ्यं सिध्यतु वा । रपते ते स हरः सिध्यतु साक्षात्कर्मसाधको भवत्विति वा स्तुवते ते तद्रूपं हरो वा सते शोभमानायाभीष्टाय सिध्यतु । यद्वा—स्मरहरं शिवं शिवरूपं शश्वज्जप सदा स्तुहि, सोऽयं स्मरहरस्ते सिध्यतु साक्षाद्भवत्विति वा । अन्तर्मध्ये मन्त्राः शैवाः शाक्ताश्च यस्य तादृशमिति वा । तर्हि—यद्रूपं शब्दरूपत्वाद्भगवती च भगवांश्च भगवन्तौ पार्वतीपरमेश्वरावभिधेयं यस्य । यद्वा—भगवच्छब्दवाच्यमर्धनारीश्वरम् । भवति (इत्यर्थः) । कथम्—यतः द्विधा स्त्रीपुंसरूपौ द्वौ भागौ रूपं भूतम् । प्राप्तमिति वा । एतत्कुत इत्यत आह—यतोऽर्धे दक्षिणभागे अं वामा न स्त्री । किंतु पुरुष इत्यर्थः । अर्धे वामभागे वामा स्त्री चेति सामर्थ्यादर्धशब्दावृत्त्या योज्यम् । एवं द्विधाभूतमित्यर्थः । अवामं दक्षिणम्, आ सामस्त्येन वाममावाममदक्षिणं च अवामावामे च तेऽर्धे च समौ भागौ भूतं प्राप्तं सद्द्विधा भवतीति वा । परमुभयोराकारयोः स्वरूपयोर्घटनान्मेलनात्सकलं संपूर्णैकरूपमित्यर्थः । यद्रूपमर्धे वामभागेऽवामा अप्रतिकूला प्रसादावदातकान्तमुखी वामा स्त्री भवति । पार्वती रूपं भवतीत्यर्थः । तद्धरमयं रूपमित्युक्तेः सामर्थ्यादक्षिणार्धे महेशः पुरुषरूपं भवति । एतेन शक्त्युद्रेकः सूच्यते । कीदृशं हरं, स्मरहरं वा—सेन्दुम् । तथा—अमलम् । सेन्दुत्वेपि कलङ्करहितम् । यतः—सकलं कलामात्रचन्द्रयुतम्—कलामात्रं निष्कलङ्कं भवतीत्यर्थ इति वा । कलाभिरणिमाद्यैश्वर्यैः, चतुःषष्टिकलाभिश्चोपेतमिति वा । यद्रूपमर्धे अश्चासौ वामा चावामा शक्त्यात्मको विष्णुः । अर्धे मा वा लक्ष्मीश्च । वा चार्थे । यद्वा—अवतीत्यवा रक्षिका मा लक्ष्मीः । लक्ष्मीनारायणात्मकं भवति । तद्वामनेत्रस्येन्दुरूपतया सेन्दुमम् । ध्याने चन्द्रकलोपेतत्वात्सेन्दुमम् । लक्ष्मीभागे च भूषणीभूतार्धचन्द्रयोगात्सेन्दुमम् । शिवार्द्धमिश्रत्वाद्धरमयं लक्ष्मीनारायणात्मकं तन्मे रूपं स्मर जप स्तुहि । यद्रूपमरूपा विष्णुरूपधारिणी वामा शक्तिर्वामार्धे सव्यभागे भवति । तद्धरमयं सामर्थ्यादक्षिणभागे शिवरूपमेवंभूतं हरिहरात्मकं मे रूपं स्मर । अन्यत्पूर्ववदिति वा । अर्धे पूर्वभागे अवा ओकारेण तथा—अमा अनुस्वारेण, मा पवर्गपञ्चमव्यञ्जनेन वा । प्रणवेनेत्यर्थः । तथा—उत्तरभागे अवा ओकारेण, तथा—अमा अनुस्वारेण व्यञ्जनमकारेण वा प्रणवेनोपलक्षितम् । प्रणवद्वयसंपुटितमित्यर्थः । हरमयं हर इति नामरूपं मे मन्त्रं मया जप्यमानं रहस्यं स्मर चिन्तय जप । शिष्टं पूर्ववत् । हरस्य पक्षे तु—तन्मे रूपं मन्त्रमन्तर्मनसि स्मर शश्वज्जप च । स च ते सिध्यतु । कीदृशं मन्त्रम्—हरमयं हकाररेफरूपम् । तथा—निराकारं अश्च अश्च औ तयोः आकारः स्वरूपम्, स्वरूपे च आकारौ, निर्गतावाकारौ यस्मात्तन्निराकारम् । हकाररेफयोरुच्चारणार्थं यदकारद्वयं तद्रहितं 'ह्' इति व्यञ्जनमात्रहकाररेफमयमित्यर्थः । तथा—सेन्दुं इं च इन्दुश्च ताभ्यां सह वर्तमानम् । ईकारेण, अर्धचन्द्रेण च युक्तम् । तथा—सकलं कला अनुस्वारस्तत्सहितम् । ईकाररूपमित्यर्थः । सकलं चन्द्रकलोपेतम् । सेन्दुं ईकारबिन्दुयुतमिति वा । अमलं शाक्तादिदोषरहितम् । तत्किम्—यद्रूपमर्धे पूर्ववद्दक्षिणवामभागयोः अवा मा, अवा मा च, उपलक्षितं प्रणवद्वयसंपुटितम् ।

---

१ निपातार्थकोऽयमकारः । अत एवान्ययकाण्डे हेमकोषः—'अ स्वल्पार्थेऽप्यभावेपि' इति, मेदिन्यां—'अशब्दः स्यादभावेपि स्वल्पार्थप्रतिषेधयोः । अनुकम्पायां च तथा वासुदेवे त्वनव्ययः ॥' इति स्पष्टमुपलभ्यते ।

तथा—यत्पूर्वमुभयोर्हकाररेफयोर्घटनात्संबन्धाद्विधाभूतं पृथग्भूतमसंयुक्तं (अव्यवहितं) सद्भगवान्हरोऽभिधेयो वाच्यो यस्य तादृग्भवति। प्रत्येकमकारयोगात् हर इति शिवनाम यद्भवति। यद्वा—पूर्वं 'हर' इति द्विधाभूतम्, अनन्तरमकारद्वयव्यतिरेकेण व्यञ्जनरूपतया संयोगात्सकलम्। एकीभूतमित्यर्थः। तथा—भगवती भुवनेश्वरी अभिधेया यस्य तादृशमिति वा। 'शिवाग्न्यो वह्निसंयुक्तो ब्रह्मद्वितयमन्तरा। तुरीयस्वरशीतांशुरेखातारासमन्वितः॥ एष चिन्तामणिर्नाम मन्त्रः सर्वार्थसाधकः। जगन्मातुः सरस्वत्या रहस्यं परमं मतम्॥' इत्यागमाभणवद्वयसंपुटितभुवनेश्वरीरूपं चिन्तामण्याख्यं मे सरस्वत्याः स्वरूपं मन्त्रं स्मर जप। स च मन्त्रस्ते सिध्यतु। शैवादिचिन्तामणिमन्त्रसंभवान्मम इति विशेषणम्। हश्च रश्च मश्च ईश्च तादृशं हकाररेफमकारेकारसमाहाररूपम्, यद्यपीकारः पश्चान्निर्दिष्टस्तथापि मकारात्पूर्वमेव ज्ञातव्यः। तस्य पश्चान्निर्देशो मन्त्रगोपनार्थः। तथा—सेन्दुं सचन्द्रं निराकारं निर्गताकारचतुष्टयस्वरूपं तादृशं मे मन्त्रं स्मर। इतरत्पूर्ववदिति वा। अत्र पक्षे आकाररहितो मन्त्रः सकलं कश्च लश्च कलौ ताभ्यां सहितम्। अत्रापि निराकारं सेन्दुमिति संबध्यते। उभयाकारघटनादित्यादि पूर्ववत्। तथा च 'ह्लीम्' इति कामराजबीजं सिध्यति अस्मिन्श्लोके टीकान्तरकृतो बहूनां शैववैष्णवादिमन्त्राणामुद्धारो विज्ञेयः। अत्र ग्रन्थविस्तरभिया कष्टकल्पनया च नोक्तः॥

मन्त्रफलमाह—

सर्वाङ्गीणरसामृतस्तिमितया वाचा स वाचस्पतिः
स स्वर्गीयमृगीदृशामपि वशीकाराय मारायते।
यस्मै यः स्पृहयत्यनेन स तदेवाप्नोति किं भूयसा
येनायं हृदये स्थितः सुकृतिना मन्मन्त्रचिन्तामणिः

सर्वेति॥ अयं पूर्वश्लोकोपदिष्टो मन्मन्त्रश्चासौ चिन्तामणिश्च। चिन्तामणिसंज्ञको मन्मन्त्र इत्यर्थः। सर्वकामदत्वान्मन्मन्त्र एव चिन्तामणिः। चिन्तामणितुल्यो मन्मन्त्र इत्यर्थः। स पुरश्चरणादिना क्षीणपापेन सुकृतिना येन साधकेन जपादिना हृदये चित्ते कृतः, स साधकः सर्वाङ्गानि व्याप्नुवन्ति सर्वाङ्गीणानि तैः शृङ्गारादिरसैरेवातिस्वादुत्वादमृतैः स्तिमितया आर्द्रया काव्यादिरूपया वाचा वाचस्पतिर्वागीशो भवति। तथा—स साधकः स्वर्गीयमृगीदृशां दिव्यानां मृगाक्षीणां रम्भादीनामपि वशीकाराय मारायते कंदर्पायते। तं दृष्ट्वा उर्वशीप्रभृतयो देवाङ्गनाः कामपरवशा। भवन्तीत्यर्थः किं च—यः पुरुषः कृतपुरश्चरणोपि यस्मै फलाय स्पृहयति फलमभिलष्यति, सोऽनेन सकृत्पठितमात्रेण मन्त्रेण हेतुना तत्प्राप्नोत्येव। किं भूयसा कथनेन मन्त्रविशेषेण वा। नात्र संदेहः। तस्मात्त्वयाऽयमेव मन्त्रो हृदये धार्य इति भावः। 'सर्वाङ्गीण' इत्यत्र 'तत्सर्वादेः–' इति स्वः। वाचस्पतिः 'षष्ठ्याः पतिपुत्र–' इत्यादिना सत्वम्। 'स्वर्गीय' इति नामधेयत्वात् 'वृद्धाच्छः'। मारायते 'कर्तुः क्यङ्' इति क्यङ्। यस्मै 'स्पृहेरीप्सितः' इति संप्रदानत्वम्। भूयसा 'बहोर्लोपो भू च बहोः'॥

पुष्पैरभ्यर्च्य गन्धादिभिरपि
सुभगैश्चारुहंसेन मां चे-
न्निर्यान्तीं मन्त्रमूर्तिं जपति
मयि मतिं न्यस्य मय्येव भक्तः।
तत्प्राप्ते वत्सरान्ते शिरसि
करमसौ यस्य कस्यापि धत्ते
सोऽपि श्लोकानकाण्डे रचयति
रुचिरान्कौतुकं दृश्यमस्याः॥ ९०॥

पुष्पैरिति॥ यः साधकश्चारुणा हंसेन निर्यान्तीं गच्छन्तीमुह्यमानाम्। हंसवाहनामित्यर्थः। मन्त्रमूर्तिं यन्त्रमध्यस्थितमन्त्रवर्णरूपेण परिणमदाकारां मन्त्रस्थान्तरशरीरां वा मां देवीं सुभगैरतिमनोहरैः सुकुमारैः सुगन्धिभिश्च पुष्पैः गन्धधूपादिभिः षोडशोपचारैरप्यभ्यर्च्य, तथा—मयि मतिं न्यस्य विषयान्तरादाकृष्य ध्यानबलेन स्थिरीकृत्य देवतान्तरपरिहारेण मय्येव भक्तः सर्वात्मकतया मामेव सेवमानः सन् चेद्यदि जपति, तर्ह्यसौ जापको वत्सरान्ते वत्सरावसाने प्राप्ते जाते सति यस्य कस्यापि स्त्रीबालमूकादेरपि शिरसि करं धत्ते स्थापयति सोपि स्त्रीबालादिरप्यकाण्डेऽसमयेऽकस्माद्वा रुचिरान्रसभावगुणालंकारयुतानदोषाञ्श्लोकान्रचयति। यस्तु सिद्धमन्त्रः, स विविधाञ्श्लोकान्रचयति किं वाच्यमित्यपेरर्थः। एतस्याः कौतुकं दृश्यम्। अनुभवेनायमस्माभिरस्कारो द्रष्टव्य इत्यर्थः। एवं संपूज्य हंसवाहनादिध्यानपूर्वमेकाग्रेण मनसा चेज्जपति, तर्हि वत्सरमात्रेण सिद्धमन्त्रः सन्नेवंविधं सामर्थ्यं लभत इति भावः॥

गुणानामास्थानीं नृपतिलकनारीतिविदितां
रसस्फीतामन्तस्तव च तव वृत्ते च कवितुः।
भवित्री वैदर्भीमधिकमधिकण्ठं रचयितुं
परीरम्भक्रीडाचरणशरणामन्वहमहम्॥ ९१॥

गुणानामिति॥ हे नृपतिलक राजश्रेष्ठ नल, अहं वैदर्भीं भैमीम्। अथ च—वैदर्भीसंज्ञां रीतिमरुपपदसमासमसमासां वा रचनाविशेषं क्रमेण तव च नलस्य तव च वृत्ते त्वत्संबन्धिनि चरित्रे विषये कवितुः काव्यकरणोद्युक्तस्य श्रीहर्षादेश्चाधिकण्ठम् कण्ठेऽन्वहं सदा परीरम्भस्यालिङ्गनस्य चुम्बनादिविलासस्य यदाचरणं करणं, तदेव शरणं जीवनोपायो यस्या एवं भूताम्। परीरम्भक्रीडया वा हेतुभूतया त्वच्चरणशरणमालिङ्गनप्रार्थनार्थं त्वच्चरणयोः पतन्तीम्। अथच—परीरम्भस्य श्लेषालंकारस्य क्रीडाया वक्रोक्तिविलासस्य आ सामस्त्येन यच्चरणं ज्ञानं तदेव शरणं यस्यामेवंविधाम्। अधिकं यथा तथा नितरां रचयितुं कर्तुं भवित्री भविष्यामि। किंभूताम्—गुणानां सौन्दर्यपातिव्रत्यादीनाम्। अथच—श्लेषप्रसादादीनाम्। आस्थानीं सभारूपामवस्थितिभूताम्। तथा—नारी इति स्त्री इति विदितां नारी चेत्, तर्हि भैम्येव नान्येति प्रसिद्धाम्। अथच—रीतिषु पाञ्चाल्यादिषु विदिता, तथा न इत्यरीतिविदिता तथाविधापि न इति नारीतिविदिता तादृशीम्। पाञ्चाल्यादिषु रीतिषु मध्येऽतिप्रसिद्धामिति यावत्। तथा—तवान्तः हृदये रसेन स्त्रीवसौभाग्येन नलत्वेनानुरागेण

स्वस्मिन्नलानुरागेण वा स्फीतामतिपुष्टाम् । अथवा—अन्तः श्लोकमध्ये रसैः शृङ्गारादिभिः परिपुष्टाम् । एवंभूतां भैमीं त्वत्कण्ठालिङ्गनपरां त्वच्चरणशरणां त्वदेकवश्यां प्रत्यहमहं करिष्यामि । त्वच्चरितवर्णयितुश्च कण्ठे एवंभूतां वैदर्भीं रीतिमधिकं च रचयिष्यामि । वैदर्भीमेव रमणीयां रीतिमवलम्ब्य त्वच्चरितवर्णको यथा भवति तथाहं करिष्यामीति भावः । एतदपि वरदानम् । 'नर्' इति संबुद्ध्यन्तं पृथक्कृत्य राजश्रेष्ठ नः पुरुष इति संबोध्य पातिव्रत्यादिरीत्या विदितां पाञ्चाल्यादिरीतिषु च विदितामिति वा । 'श्लेषः प्रसादः समता माधुर्यं सुकुमारता । अर्थव्यक्तिरुदारत्वमोजः-कान्तिसमाधयः ॥ इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः ।' इत्यालंकारिकाः । 'आस्थानी क्लीबमास्थानम्' इत्यमरः । 'आतिष्ठन्त्यस्याम्–' अधिकरणे ल्युट् । टित्वान्ङीप् । 'ना रीति'–इत्यत्र पक्षे 'दूलोपे–' इति दीर्घः । कवितुः 'कवृ वर्णने' 'कवृङ् स्तुतौ' इत्यस्य वा । अधिकण्ठं सप्तम्यर्थेऽव्ययीभावः ॥

वरान्तरमाह—

भवद्वृत्तस्तोतुर्मदुपहितकण्ठस्य कवितु-
र्मुखात्पुण्यैः श्लोकैस्त्वयि घनमुदेयं जनमुदे ।
ततः पुण्यश्लोक' क्षितिभुवनलोकस्य भविता
भवानाख्यातः सन्कलिकलुपहारी हरिरिव ९२

भवदिति ॥ मदुपहितकण्ठस्य मयाधिष्ठित(स्य) कण्ठस्य भवतो वृत्तस्य चरित्रस्य स्तोतुः कवितुः कवेः मुखात्सकाशात्त्वयि विषये पुण्यैश्चारुभिरमलैश्च श्लोकैः पद्यैर्यशोभिश्च घनं निबिडं यथा तथा जनानां मुदे हर्षाय उदेयमुदेतव्यम् ॥ ततोऽनन्तरं तस्माद्वा हेतोर्भवान् क्षितिभुवनलोकस्य भूविष्टपजनस्य कलियुगसंबन्धिकलुषहारी पातकहरणशीलः सन् हरिः श्रीविष्णुरिव पुण्यश्लोकः पुण्यश्लोक इति ख्यातो भविता भविष्यति । यद्वा—पुण्यश्लोकः सन् क्षितिभुवनलोकस्य कलिकलुषहारी हरिरिव भविता । पुण्यौ चारू निर्मलौ श्लोकौ पद्ययशसी यस्येति विग्रहः । 'पुण्यश्लोको नलो राजा' इति पुण्यश्लोकत्वम् । 'कर्कोटकस्य नागस्य–' इत्यादिना कलिनाशकत्वमुक्तम् । 'पद्ये यशसि च श्लोकः' इत्यमरः । उदेयम्' 'अचो यत्' इति यत् ॥

देवी च ते च जगदुर्जगदुत्तमाङ्ग-
रत्नाय ते कथय कं वितराम कामम् ।
किंचित्त्वया नहि पतिव्रतया दुरापं
भस्मास्तु यस्तव बत व्रतलोपमिच्छुः ॥९३॥

देवीति ॥ देवी च ते चन्द्रादयो भैमीं जगदुरिति ऊचुः । इति किम्—हे भैमि, वयं जगत्त्रैलोक्यस्योत्तमाङ्गं शिरस्तस्य रत्नाय भूषणमणिभूतायै अतिसुन्दर्यै ते तुभ्यं कं कामं वितराम ददाम । अपितु किमप्यस्मदानयोग्यं नास्तीत्यर्थः । हि यस्मात्त्वया पतिव्रतया किंचिदपि वस्तु दुरापं न, किंतु पातिव्रत्यात्सर्वमपि त्वया सुप्रापमेव, तथापि यस्तव पातिव्रत्यलोपं पातिव्रत्यभङ्गमिच्छुरभिलष्यति त्वया सह रन्तुमिच्छेत्स भस्मैवास्तु । बत कष्टम् । अनुचितकर्मा स इत्यर्थः । कामम्, 'अकर्तरि च कारके' इति कर्मणि घञ् । त्वया स्वलर्थयोगे षष्ठीनिषेधात्तृतीया । 'तृतलोपम्' 'न लोका–' इति षष्ठीनिषेधाद्द्वितीया ॥

वरान्तरमाह—

कूटकायमपहाय नो वपु-
र्बिभ्रतस्त्वमसि वीक्ष्य विस्मिता ।
आप्तुमाकृतिमतो मनीषितां
विद्यया हृदि तवाप्युदीयताम् ॥ ९४ ॥

कूटेति ॥ हे भैमि, त्वं नोऽस्मान्वीक्ष्य यतो विस्मितासि, अतो मनीषितामाकृतिमाकारं स्वेच्छाशरीरं प्राप्तुं तवापि हृदि मनसि विद्यया नानादेहस्वीकारहेतुभूतया मन्त्रादिशक्त्या उदीयतामुत्पद्यताम् । अस्माकं हृदि यथोदितं तथा तवापीत्यपिशब्दार्थः । अपिशब्दाश्रयस्यापीति केचित् । किंभूताः—कूटकायं स्वेच्छामात्रेण कृतं मायानलशरीरमपहाय त्यक्त्वा पुनर्दिव्यं निजं वपुर्बिभ्रतो धारयतः । अन्योऽपि प्रभुर्यद्वस्तुदर्शनात्सेवकादिः साश्चर्यो भवति तद्वस्तु तस्मै प्रयच्छति । उदीयतामिति भावे लः ॥

इत्थं वितीर्य वरमम्बरमाश्रयत्सु
तेषु क्षणादुदलसद्विपुलः प्रणादः ।
उत्तिष्ठतां परिजनालपनैर्नृपाणां
स्वर्वासिवृन्दहतदुन्दुभिनादसान्द्रः ॥ ९५॥

इत्थमिति ॥ इत्थं पूर्वोक्तप्रकारेण नलाय भैम्यै च वरं वितीर्य दत्त्वा देवीसहितेषु तेष्विन्द्रादिष्वम्बरं स्वर्गं प्रति गन्तुमुद्यतेषु प्रारब्धगगनगमनोद्योगेषु सत्सु क्षणात्क्षणमात्रेणोत्तिष्ठतां स्वं स्वशिबिरं प्रति गन्तुमुत्थितानां नृपाणां परिजनालपनैः सेवकसंभाषणैर्जयजीवादिशब्दैः । राज्ञामेव वाऽश्वाद्यानयनार्थं परिजनान्प्रति भाषणैः कृत्वा विपुलो दशदिग्व्यापी प्रणाद उदलसत् । उदित इत्यर्थः।कीदृशः–भैमीनलविवाहोत्सवदर्शनात्,आगच्छज्जायकनायक(कावलोकन)हर्षाद्वा, स्वर्वासिवृन्दैर्देवसङ्घैर्हतानां दुन्दुभीनां नादैः सान्द्रो निबिडीभूतः। देवेषु निर्गतेषु राजानोऽप्युत्थिताः, तेषां तत्सेवकानां च महान्कलकलश्च संजातः देवैश्च दिव्यवाद्यान्याहतानीत्यर्थः । वरम्, जात्यभिप्रायेणैकवचनम् । सा च ते च तेषु, 'पुमानस्त्रिया' इत्येकशेषः । उत्तिष्ठतामूर्ध्वकर्मत्वात्तङ् न ॥

न दोषं विद्वेषादपि निरवकाशं गुणमये
वरेण प्राप्तास्त्रे न समरसमारम्भसदृशम् ।
जगुः पुण्यश्लोकं प्रतिनृपतयः किंतु विदधुः
स्वनिश्वासैर्भैमीहृदयमुदयद्भिर्भरदयम् ॥ ९६ ॥

नेति ॥ प्रतिकूला नृपतयः पुण्यश्लोके विद्वेषाद्भैमीप्राप्तिजनितविशिष्टमत्सरादपि हेतोरसुन्दरदुःशीलत्वादिकं दोषं न जगुर्न जगदुः । यतो—नले निरवकाशमसन्तम् । यतः—गुणमये सौन्दर्यशीलादिगुणबहुले पुण्यश्लोके च । वैरिणापि सति दोषः प्रकाश्यते न त्वसन् । सुहृदा तु सत्यपि दोषो गोप्यते । तथा च—विद्वेषे सत्यपि गुणमयत्वाद्दोषबलेनसंभावनाया अप्यभावाद्दोषं नोचुरित्यर्थः । तथा—वरात्रैमीहरणार्थं समरसमारम्भः, तस्य सदृशं

तथोग्यमधिक्षेपपरुषभाषणादिकमपि नोचुः । यतः—यमवरेण प्राप्ताश्चे लब्धादिव्याग्नेयाद्यस्त्रे स्वतःशूरे वरेण च नितरां दुर्धर्षे । तस्मादसामर्थ्यात्किंचिन्नोचुरित्यर्थः । किंतु—गत्यन्तररहिताः सन्तो निजासामर्थ्यकृपास्पदत्वसूचकैः स्वनिश्वासैः कवोष्णैर्निजमुखनासिकानिश्वसितैः कृत्वा भैमीहृदयं उदयन्ती निर्भरा बहुला दया यस्यैवंभूतमतिसकृपं विदधुश्चक्रुः । अतिदीनांस्तान्दृष्ट्वा भैमी नितरां सकृपाऽभूदिति भावः । भैम्या हृदयभूतं प्राणभूतं नलं स्वनिश्वासैः सकृपं चक्रुरिति वा ॥

भूभृद्भिर्लम्भिताऽसौ करुणरमनदीमूर्तिमद्देवतात्वं
तातेनाभ्यर्थ्ययोग्याःसपदिनिजसखीर्दापयामासतेभ्यः
वैदर्भ्यास्तेऽप्यलाभात्कृतगमनमनःप्राणवाञ्छां विजह्रुः
सख्यः संशिक्ष्य विद्याः सततधृतवयस्यानुकाराभि-
राभिः ॥ ९७ ॥

भूभृद्भिरिति ॥ भूभृद्भी राजभिः शोकस्थायिभावस्य करुणाख्यस्य रसस्य । अथ च—जलस्य । नदी तस्या मूर्तिमत्या देवताया भावं लम्भिता प्रापिता जलदेवतास्थाने स्थापिता तन्निश्वासैः करुणरसार्द्रीकृतचित्ता सती असौ भैमी सपदि ममाग्याप्राप्तेः एते नितरां दुःखिताः । तस्मादतिसुन्दरीमत्सखीरितेभ्यो देहीत्यभ्यर्थ्यालियोजनेन । अर्थात्तातमेव । अभ्यर्थ्य संप्रार्थ्य निजसखीः स्वसहचरीर्योग्या रूपकुलशीलादिना तेषां भार्यात्वे समुचितास्तेन पित्रा तेभ्यो राजभ्यो दापयामास । तेभ्यः सखीदाने भीमं प्रावर्तयदित्यर्थः । ते राजानोऽपि वैदर्भ्या अलाभात्कृतं गमने देहत्यागविषये मनो यैस्तेषां प्राणानां वाञ्छामाभिः सखीभिर्विजह्रुः । भैमीसखीलाभात्प्रारब्धगमनान्प्राणान्पुनः न्यवर्तयन्नित्यर्थः । यतः—किंभूताभिः—भैम्याः सकाशादिन्द्रादिदेवेभ्यो वरप्राप्तां यादृच्छिकशरीरनिर्माणादिरूपां विद्यां संशिक्ष्य सम्यगभ्यस्य सततं प्रत्यहं धृतो वयस्याया भैम्या अनुकारो याभिः । तुल्यशरीरकलाकौशलाभिरित्यर्थः । ततश्च भैमीप्राप्तिबुद्ध्यैव स्वप्राणान्रक्षितवन्त इति भावः । लम्भिर्द्विकर्मा । सख्याः' 'आख्यातोपयोगे' इत्यपादानत्वम् ॥

अहह सह मघोना श्रीप्रतिष्ठासमाने
निलयमभि नलेऽथ स्वं प्रतिष्ठासमाने ।
अपतदमरभर्तुर्मूर्तिबद्धेव कीर्ति-
र्गलदलिमधुबाष्पा पुष्पवृष्टिर्नभस्तः ॥ ९८ ॥

अहहेति ॥ अथ राजभ्यः सखीदानानन्तरं मघोना इन्द्रेण सह श्रीः संपत्प्रतिष्ठा माहात्म्यं ताभ्यां समाने स्वं निजं निलयं स्थानमभिलक्षीकृत्य प्रतिष्ठासमाने जिगमिषति नले नभस्तो गगनात्पारिजातादिदेववृक्षाणां पुष्पवृष्टिरपतत् । अहहेति हर्षे । भैम्या नले वृते हृष्टैर्देवैर्नलस्योपरि पुष्पवृष्टिः कृतेत्यर्थः । उत्प्रेक्षते—बद्धा धृता मूर्तिर्यया सा मूर्तिबद्धा । यद्वा—मूर्त्या बद्धा युता साकारा । गलन्तः पतन्तोऽलयो भ्रमरा यत्र एवंविधं मधु एव बाष्पा (यस्याः) अभःपतनजनितदुःखमुक्तसनिश्वासजलाश्रुबिन्दवो यस्याः । एवंभूता । अमरभर्तुरिन्द्रस्य कीर्तिरिव । पुष्पाणां शुभ्रत्वात्कीर्तित्वम् । भैम्या चावृतत्वादिन्द्रस्य कीर्तिर्गलितेति युक्तम् । स्वर्गोदधःपाते दुःखादश्रु च युक्तम् । स्त्रीणां चाश्रु सकज्जलं भवति । मकरन्दो बाष्पस्थाने, तदनुगता भ्रमराः कज्जलस्थाने । समानशब्दस्य समासान्तर्गतत्वात्साक्षात्तुल्यार्थयोगाभावात् 'मघोना' इति तृतीयार्थमनुप्रासार्थं च साक्षात्सहशब्दप्रयोगः । प्रतिष्ठासमाने इति, 'समवप्र—' इति तङो विधानात् 'पूर्ववत्सनः' इति तङ् ॥

स्वस्यामरैर्नृपतिमंशममुं त्यजद्भि-
रंशच्छिदाकदनमेव तदाध्यगामि ।
उत्का स्म पश्यति निवृत्य निवृत्य यान्ती
वाग्देवतापि निजविभ्रमधाम भैमीम् ॥ ९९ ॥

स्वस्येति ॥ तदा स्वर्गगमनसमये अमुं नृपतिं नलं त्यजद्भिरमरैरंशस्य स्वावयवस्य छिदा कर्तनं तया यत्कदनं दुःखं तदेवाध्यगामि प्रापि । यतः—स्वस्य इन्द्रादेरंशम् । लोकपालांशत्वाद्राज्ञः । स्वहस्तादिकर्तने यादृग्दुःखं भवति, तादृशमेव तेषां नलपरित्यागे जातमिति भावः । यान्ती स्वर्गं प्रति गच्छन्ती वाग्देवताऽपि भैमीं निवृत्य निवृत्य पुनः पुनः व्याघुट्य वलितग्रीवं यथा तथा पश्यति स्म । किंभूताम्—निजविभ्रमाणां स्वीयवचनचातुर्यादिविलासानां धाम स्थानभूताम् । किंभूता—उत्का कियत्यहवासमात्रानुभूतगुणगणप्रेमभरतया सोत्कण्ठा । परित्यक्तुमशक्तेत्यर्थः । अन्योऽप्यन्यत्र गच्छन्निजं विलासगृहमुत्कः सन्निवृत्य पश्यति । पुरुषाणां पुरुषेषु, स्त्रीणां च स्त्रीषु सौहार्दमिति नलपरित्यागे तेषाम्, भैमीपरित्यागे च देव्याः सोत्कण्ठता युक्ता । निजं सारस्वतं विलासगृहं यान्ती इति वा । छिदा इति 'पिच्चिदादिभ्योऽङ्' ॥

सानन्दं तनुजाविवाहनमहे भीमः स भूमीपति-
र्वैदर्भीनिषधेश्वरौ नृपजनानिष्टोक्तिनिर्मृष्टये ।
स्वानि स्वानि धराधिपाश्च शिबिराण्युद्दिश्ययान्तः क्रमा-
देको द्वौ बहवश्चकारसृजतः स्मातेनिरे मङ्गलम् १००

सानन्दमिति ॥ स भीम एको भूमीपती राजा तनुजाया भैम्या विवाहनं पाणिग्रहणं तल्लक्षणे महे महोत्सवे विषये माङ्गलिकतूर्यवादनादिकं मङ्गलं सानन्दं सहर्षं यथातथा चकार । वैदर्भीनिषधेश्वरौ च द्वौ क्षणमात्रं तत्र स्थितावेवासूयका नृपजना राजसंघाः । नृपाणां वा ये जनाः सेवकास्तेषामनिष्टोक्तयः कर्णकठोराणि यानि मृषादोषारोपणवचनानि तासां नितरां मृष्टये परिमार्जनायाशुभवचनानाकर्णनाय नृत्तगीतवाद्यबहुलं प्रेक्षणीयकादिदर्शनश्रवणादिरूपं मङ्गलं सृजतः स्म चक्राते । 'अमङ्गलं नाकर्णनीयम्' इति वैदर्भीनिषधेश्वरौ गीतवाद्याद्याकर्णनव्याजेनामङ्गलपरिहारं चक्रतुः बहवः सर्वे धराधिपाश्च राजानोऽपि स्वानि स्वानि शिबिराणि सेनानिवेशानुद्दिश्य लक्षीकृत्य यान्तो गच्छन्तः सन्तः प्राप्तभैमीसदृशदयिताः पटहनिस्वनादिरूपं मङ्गलमातेनिरे चक्रुः । वाद्यानि वादयामासुरित्यर्थः । एतच्च सर्वं क्रमात् । पूर्वं भीमश्चकार, अनन्तरं भैमीनलौ चक्राते, ततो राजानश्चक्रुरिति क्रमः । किंच—एकः, द्वौ, बहवः, इति क्रमः । तथा—चकार, सृजतः स्म आतेनिरे इति च क्रमः । सानन्दमिति सर्वत्र वा संबन्धनीयम् । श्रेष्ठजामातृलाभाद्भीमस्य हर्षः परस्पर

लाभाद्भैमीनलयोः सुन्दरभैमीसखीलाभाद्राज्ञामिति ज्ञेयम् । विवाहनं ण्यन्तान्नपुंसके भावे 'ल्युट् च' इति ल्युट् ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
यातस्तस्य चतुर्दशः शरदिजज्योत्स्नाच्छसूक्तेर्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः १४

श्रीहर्षमिति ॥ शरदिजा शरत्कालीना ज्योत्स्ना चन्द्रिका तद्वदच्छा निर्मला निर्दोषा प्रसन्ना आह्लादजनिका च शोभना उक्तिर्यस्य तस्य श्रीहर्षस्य कवेः कृतौ महाकाव्ये चतुर्दशानां पूरणः सर्गः समाप्तः । चतुर्दशानां पूरणः इत्यर्थे 'तस्य पूरणे डट्' इति डट् । 'शरदिजा' इति 'सप्तम्यां जनेर्डः' इति डप्रत्यये 'प्रावृट्शरत्कालदिवां जे' इति सप्तम्या अलुक् ॥

इति श्रीबेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मज-
नारायणकृते नैषधीयप्रकाशे चतुर्दशः सर्गः ॥

पञ्चदशः सर्गः ।

अथोपकार्या निषधावनीपति-
र्निजामयासीद्वरणस्रजाञ्चितः ।
वसूनि वर्षन्सुबहूनि बन्दिनां
विशिष्य भैमीगुणकीर्तनाकृताम् ॥ १ ॥

अथेति ॥ अथ भैम्या स्वयंवरे वरणस्रजा मधूकमालयाञ्चितः पूजितः स निषधावनीपतिः नलोऽपि (एवं देवान्प्रसाद्य भैम्या नले वृते ताभ्यां वरान्दत्त्वा देवेषु प्रारब्धस्वर्गगमनेषु सत्सु, अनन्तरं) भीमेन स्वनिवासार्थं रचितां निजां स्वीयां नलेनैव वा कारितां पटमयद्रव्यादिरूपां उपकार्यामयासीत् ययौ । किं कुर्वन् —अन्येषां बन्दिनां सुबहूनि वसूनि वर्षन् । भैमीगुणानां कीर्तनम् आ सामस्त्येन कुर्वन्तीति कृतः तेषां तु बन्दिनां, विशिष्य विशेषं कृत्वा वर्षन्नन्यापेक्षया तेभ्योऽधिकं प्रयच्छन् । बन्दिनां, संबन्धसामान्ये षष्ठी ॥

धनदानस्य सुबहुत्वमेव विवृणोति—

तथा पथि त्यागमयं वितीर्णवा-
न्यथातिभाराधिगमेन मागधैः ।
तृणीकृतं रत्ननिकायमुच्चकै-
श्चिकाय लोकश्चिरमुञ्छमुत्सुकः ॥ २ ॥

तथेति ॥ अयं नलः पथि त्यागं कीर्त्यर्थं साधारण्येन दीयमानं धनं तथा तेन प्रकारेण वितीर्णवान् यथा येन प्रकारेण मागधैर्बन्दिजातिविशेषैरतिभाराधिगमेनातिशयगुरुत्वप्राप्त्या बहुतरलब्धधनस्य वोढुमशक्तेः परिपूर्णत्वाच्च निरपेक्षत्वात्तृणीकृतं तृणवत्त्यक्तं रत्ननिकायं रत्नसमूहमुच्चकैः नितरामुत्सुकोऽहमहमिकया ग्रहीतुं प्रवृत्तो लोकः उञ्छं भूपतितमणुकणगणं चिरं बहुकालं चिकाय उच्चित्य आददे । रत्ननिकायमेव उञ्छमिति रूपकम् । उच्चकैर्बहुमूल्यं रत्ननिकायमिति वा । अनेनास्य दानशूरत्वमुक्तम् । उञ्छो धान्यस्य कणश आदानम् । रत्नादाने त्वौपचारिकः प्रयोगः । त्यज्यते त्यागः । येन (?) कर्मणि घञ् । 'वितेनिवान्' इति पाठे त्यागमिति भावे घञ् । दानं चकारेत्यर्थः । निकायमिति 'निवासचिति–' इति घञ्, आदेश्च कः । चिकायेति 'विभाषा चेः' इति कुत्वम् ॥

त्रपास्य न स्यात्सदसि स्त्रियान्वया-
त्कुतोऽतिरूपः सुखभाजनं जनः ।
अमूदृशी तत्कविबन्दिवर्णनै-
रवाक्कृता राजकरञ्जिलोकवाक् ॥ ३ ॥

त्रपेति ॥ असाविव दृश्यत इति अमूदृशी एतत्सदृशी अन्यापि भैम्यवृतानि राजकानि नृपसङ्घास्तानि रञ्जयतीत्येवंशीलास्तदनुजीविनो लोकास्तेषां मृषावाक् दोषारोपणरूपा तस्य नलस्य तयोर्वा भैमीनलयोः कवयः प्रबन्धकर्तारः, बन्दिनश्च प्राकृतादिभाषावर्णनचतुराः, तेषां वर्णनैः कर्तृभिरवाक्कृता तिरस्कृता । तेषां प्रचुरतारस्वरवर्णनतिरोहितत्वात्सा वाक् ताभ्यां नाकर्णितैवेत्यर्थः । वाक् अवाक् कृता अशब्दरूपा कृता ध्वनिमात्रं श्रुतम्, नत्वर्थव्यञ्जकः शब्दः श्रुत इति वा । असौ का—सदसि नानादेशमिलितजनसमाजे तत्समक्षं स्त्रिया अन्वयात्संबन्धादस्य नलस्य लज्जा न स्यात् । अपितु लज्जया भवितुं युक्तम् । नच तया जातम् इति निर्लज्जोयमित्येका वाक् । तथा—अतिरूपः सुन्दरो जनः श्रीरामचन्द्रजानकीवत्कुतः सुखभाजनं सुखस्थानम् । अपितु—रूपवाञ्जनो दुःख्येवेति दृष्टत्वात्सुरूपयोरनयोरपि दुःखं भवितैवेत्यन्या । वाक् अवाक् कृतेति विरोधाभासः । सदसि स्त्रिया अन्वयाद्धेतोर्लज्जास्य न स्यादेवेत्ययं निर्लज्जः । अतिसुरूपश्च भवादृशो जनो भैमीप्राप्तिजनितसुखभाजनं कुतः, अपि तु न । रूपवान्हि रम्यां प्रियां न लभते अतो रूपवन्तो भवन्तोऽपि रम्यां प्रियां नालभन्त इति स्वं स्वं प्रभुं प्रति सेवकवचनमिति वा । अतिरूपो भैमीलक्षणो जनः कुतः सुखभाजनम् । अपितु न । एवंभूतानां राज्ञामप्राप्तेरिति वा । अमूदृशी, अदसशब्दे उपपदे 'त्यदादिषु दृशः–' इति कञि दृग्दृशवतुषु 'आ सर्वनाम्नः' इत्यात्वे 'अदसोऽसेर्दादुदोमः' इत्यूत्वे मत्वे च 'टिड्ढाणञ्' इति ङीप् । अवाक् कृता इति पदद्वयम् ॥

राजकीयैर्निन्दायां कृतायामपि तयोर्निर्दोषत्वमाह—

अदोषतामेव सतां विवृण्वते
द्विषां मृषादोषकणाधिरोपणाः ।
न जातु सत्ये सति दूषणे भवे-
दलीकमाधातुमवद्यमुद्यमः ॥ ४ ॥

१ 'गुणवर्णनाकृताम्' इति क्वाचित्कः पाठः'—इति सुखावबोधा । २ 'अथ' इत्युत्तरम् 'एव देवान्' इत्यारभ्य 'अनन्तरम्' इत्यन्तः पाठः उचितः । अर्थभूतत्वात् । ३ 'उञ्छक' इति पाठे 'उञ्छति उञ्छिनोति उञ्छकः' इति सुखावबोधा ।

१ 'अपाकृता' इति जीवातुसमतः पाठः ।

अदोषतामिति ॥ द्विषां मृषा अविद्यमानस्य दोषकणस्य दोषलेशस्य अधिरोपणा आरोपाः सतामदोषत्वमेव विवृणुते प्राकट्येन कथयन्ति । कथम्—यतः सत्येन दूषणे सति विद्यमाने अलीकमसत्यमवद्यं आधातुमारोपयितुं खलानां जातु कदाचिदपि उद्यमः प्रयत्नारम्भो न भवेत् । सति दोषे विद्यमानत्वादेव नारोपः । अयं तावदारोप्यते, ततश्चासति दोषे तदारोपणं निर्दोषतामेव व्यनक्तीत्युभयथापि परदोषोद्घाटनमनुचितमित्यर्थः । सर्वथा तौ निर्दोषावेव इति भावः । सत्ये दूषणे सति खलानामलीकं दोषमाधातुमुद्यमः कदाचिन्न भवेत् । अपितु सत्यदोषाभावे अलीकमपि दोषं वदन्ति । ततश्च निर्दोषत्वमेवागतमित्यर्थ इति वा । अथ च—सत्ये परब्रह्मस्वरूपे श्रीरघुनाथे विषये असत्यसाधौ दूषणाख्ये राक्षसे अवद्यमलीकं दुष्टमप्रियं कर्तुमुद्यमः किं कदाचिन्न भवेत् । अपितु—श्रीरामचन्द्रे विषयेऽपि दूषणाख्येन राक्षसेनाप्रियं कर्तुमुद्यमः कृत एव । तथापि यथा स निर्दोषः, तथा तैर्निन्दायां कृतायामपि निर्दोषावेव तावित्यर्थः । यद्वा—वह्नौ सीतायाः पातिव्रत्यपरीक्षणादपरीक्ष्य-परिग्रहादिदोषेऽसत्यपि परब्रह्मस्वरूपे श्रीरघुनाथे कदाचित्तमेकं दोषमाधातुं प्रयत्नः किं न स्यात् । अपि तु लोकः प्रयतत एव । तथापि यथा तत्त्वतः स निर्दोष एव तथा तावपीति भावः । वैरिभिः सत्यमप्युक्तमलीकं भवति मृषोद्यं तु किमुतेति सूचितम् । द्विषां कर्तरि षष्ठी ॥

विदर्भराजोऽपि समं तनूजया
प्रविश्य हृष्यन्नवरोधमात्मनः ।
शशंस देवीमनुजातसंशयां
प्रतीच्छ जामातरमुत्सुके नलम् ॥ ५ ॥

विदर्भेति ॥ विदर्भराजोऽपि उत्तमजामातृप्राप्त्या हृष्यन्सन् तनूजया समं सह आत्मनोऽवरोधमन्तःपुरं प्रविश्य भैमी नलं वरिष्यति, अन्यं वेति अनुजातः पुनः पुनर्जातः संशयो यस्यास्तां देवीं भैमीमातरं शशंस इत्यवोचत् । इति किम्—हे उत्सुके, जामातरि नले उत्कण्ठिते त्वं नलं जामातरं भैमीपतिं प्रतीच्छ जानीहि ॥

नामग्रहणमात्रेण सूचितस्य नलस्य गुणगणं वर्णयति—

तनुत्विषा यस्य तृणं स मन्मथः
कुलश्रिया यः पवितास्मदन्वयम् ।
जगत्त्रयीनायकमेलके वरं
सुतां परं वेद विवेक्तुमीदृशम् ॥ ६ ॥

तन्विति ॥ यस्य तनुत्विषा कायकान्त्या हेतुना स सौन्दर्येण प्रसिद्धो मन्मथः तृणमिवाकिंचित्करः । तथा—यः कुलश्रिया वंशपरिशुद्ध्या कृत्वा कौलीन्यात्प्रसिद्धतराणामस्माकमप्यन्वयं पवित्रा पावनं कर्ता । अस्मत्तोऽपि महाकुलीन इत्यर्थः । जगत्त्रय्या नायकमेलके वरसमूहमध्ये ईदृशमीदृग्गुणं नायकरत्नं वरं परिणेतारं विवेक्तुं निर्णेतुं परं केवलं तव सुता वेद जानाति, नान्योऽस्मदादिः । न विद्यते परः श्रेष्ठो यस्मादिति वरविशेषणं वा । पविता लुट् ॥

सृजन्तु पाणिग्रहमङ्गलोचिता
मृगीदृशः स्त्रीसमयस्पृशः क्रियाः ।
श्रुतिस्मृतीनां तु वयं विदध्महे
विधीनिति स्माह च निर्ययौ च सः ॥ ७ ॥

सृजन्त्विति ॥ स भीम इत्याह स्म च, निर्ययौ चान्तःपुराद्बिरगाच्च । चकारो विवाहत्वरां द्योतयति । इति किम्—हे मृगीदृशो हरिणेक्षणाः सुवासिन्यो भवत्यः पाणिग्रहो विवाहस्तद्रूपे मङ्गल उचिताः । तथा—स्त्रीणां समय आचारः तं स्पृशन्ति ता योषिदाचारप्राप्ता दुर्गादिकुलदेवतापूजातैलयवारम्भादिक्रियाः सृजन्तु कुर्वन्तु । वयं तु पुनः श्रुतिस्मृतीनां विधीन् शूर्पेण जुहोतीत्यादीन्, मधुपर्कादिकांश्च, वैदिकान्, स्मार्तांश्च विधीन्विदध्महे कुर्महे इति । एवमादिश्य तदानीमेव निर्गत इत्यर्थः । पाणिग्रहमङ्गलोचितयोषिदाचारज्ञा वृद्धाः । सुवासिनीविशेषणं वा । समयस्पृशः 'स्पृशोनुदके-' इति किन् । वयं 'अस्मदो द्वयोश्च' इति बहुवचनम् ॥

निरीय भूपेन निरीक्षितानना
शशंस मौहूर्तिकसंसदंशकम् ।
गुणैररीणैरुदयास्तनिस्तुषं
तदा स दातुं तनयां प्रचक्रमे ॥ ८ ॥

निरीयेति ॥ भूपेन भीमेन निरीय अन्तःपुराद्बिर्गत्य निरीक्षितानना मौहूर्तिकानां ज्यौतिषिकाणां संसत्सभा अंशकं वैवाहिकं लग्नं शशंस । स च भीमस्तदा तस्मिन्नंशके तनयां नलाय दातुं प्रचक्रमे मुहूर्तविलम्बानुरोधेन प्राक्कालिकान्श्रौतान्स्मार्तान् विधीनचीकरदित्यर्थः । किंभूतमंशकम्—अरीणैः संपूर्णैः जामित्रगुणैरुपलक्षितम् । तथा—शुक्रगुर्वाद्युदयास्तमयप्रयुक्तदोषैर्निस्तुषं रहितम् । ग्रहाणां गुणदोषादिकं ज्योतिःशास्त्रादवगन्तव्यम् । निरीय, 'ईङ् गतौ' । मौहूर्तिकाः 'मुहूर्तं वेद' इत्यर्थे 'क्रतूक्थादि-' इत्युक्थादित्वाट्ठक् । अंशमेव अंशकम् स्वार्थे कन् । अरीणैः स्वादित्वात् 'ओदितश्च' इति निष्ठानत्वम् । निर्गतं तुषात् । तुषो दोषलेशः ॥

अथावदद्दूतमुखः स नैषधं
कुलं च बाला च ममानुकम्प्यताम् ।
स पल्लवत्वद्य मनोरथाङ्कुर-
श्चिरेण नस्त्वच्चरणोदकैरिति ॥ ९ ॥

अथेति ॥ अथ लग्नांशके संनिहिते दूत एव मुखं यस्य स भीमः नैषधमित्यवदत् । इति किम्—भवता मम कुलं च बाला च कृपया अनुकम्प्यतामङ्गीक्रियताम् । बालायामनुगृहीतायां सर्वोऽपि मम वंशोऽनुगृहीतः स्यादित्यर्थः । तथा—चिरेण चिरंतनो नोऽस्माकं सर्वेषां स प्रसिद्धः त्वत्संबन्धविषयो मनोरथरूपोऽङ्कुरोऽद्यास्मिन्दिने त्वच्चरणोदकैस्त्वदीयचरणक्षालनोदकैः पल्ल-

१ 'तनुश्रिया' इति जीवातुसंमतः पाठः ।

वतु पल्लव इवाचरतु । पल्लवितो भवस्वित्यर्थः । पल्लवसहितो भवत्वेकं वा पदम् । कंचन संदेशहरं प्रेष्य तं सविनयमाकारयति स्मेति भावः । अन्यत्रापि चिरसंचितोऽङ्कुरो जलैः पल्लवितो भवति । स पल्लवतु आचारे क्विप् ॥

तथोत्थितं भीमवचःप्रतिध्वनिं
निपीय दूतस्य स वक्त्रगह्वरात् ।
व्रजामि वन्दे चरणौ गुरोरिति
ब्रुवन्प्रदाय प्रजिघाय तं बहु ॥ १० ॥

तथेति ॥ स नलो दूतस्य वक्त्रादेव गह्वरात्कंदरात्तथा पूर्वोक्तप्रकारेण यथा भीमेनोक्तं तथैवोदितं भीमवचसः प्रतिध्वनिं प्रतिशब्दं निपीय सादरमाकर्ण्येति ब्रुवंस्तस्मै दूताय बहु प्रचुरं वस्त्रालंकारादि प्रदाय तं प्रजिघाय प्राहिणोत् । इति किम्—हे दूत, अहं व्रजामि इदानीमेव गच्छामि गत्वा च गुरोः श्वशुरस्य चरणौ वन्दे नमस्करोमीति । प्रतिशब्दस्वरूपेण राजादेशानुवादस्य न्यूनाधिकशङ्का परिहृता । व्रजामि वन्दे च 'वर्तमानसामीप्ये–' इति भविष्यति लट् ॥

निपीतदूतालपितस्ततो नलं
विदर्भभर्तागमयांबभूव सः ।
निशावसाने श्रुतताम्रचूडवा-
ग्यथा रथाङ्गस्तपनं धृतादरः ॥ ११ ॥

निपीतेति ॥ ततो दूतप्रत्यागमनानन्तरं निपीतं सादरं श्रुतं दूतालपितं दूतवचनं येन स विदर्भभर्ता भीमो धृतादरः सादरः सन् नलमागमयांबभूव प्रतीक्षितवान् । पुनरपि दूतैरानाययति स्मेति वा । यथा निशावसाने ब्राह्मे मुहूर्ते श्रुता प्राभातिकी ताम्रचूडस्य कुक्कुटस्य वाक् येन स रथाङ्गश्चक्रवाको धृतादरः सन् तपनं सूर्यं प्रतीक्षते कदा वा उदेष्यतीति । 'कुक्कुवाकुस्ताम्रचूडः' इत्यमरः ॥

क्वचित्तदालेपनदानपण्डिता
कमप्यहंकारमगात्पुरस्कृता ।
अलम्भि तुङ्गासनसंनिवेशना-
दपूपनिर्माणविदग्धयादरः ॥ १२ ॥

क्वचिदिति ॥ तदा नलागमनसमये क्वचित्स्थाने लेपनदाने सुधालेपचित्रादिकर्मणि पण्डिता कुशला काचिद्रमणी पुरस्कृता तन्निर्माणार्थमेव संभाविता सती स्वप्रार्थनावशात्कमप्यहंकारमभिमानमगात्प्राप । अनिर्वचनीयं गौरवं धृत्वा सुधालेपादि चकारेत्यर्थः । चतुष्कनिर्माणार्थं हरिद्राचूर्णमिश्रितं तण्डुलपिष्टं तस्य दाने आलेपकरणे कुशला । क्वचिद्विजने रमणीये वा प्रदेशे तस्या भैम्या (आलेपनदाने) अङ्गोद्वर्तने कुशलेति वा । तयोर्भैमीनलयोर्वा । तथा—क्वचित्प्रदेशेऽपूपनिर्माणे मण्डकरचनायां विदग्धया चतुरया कयाचित्तुङ्गासन उच्चचतुरङ्गाद्यासने संनिवेशनादुपवेशनाद्धेतोरादरो गौरवमलम्भि प्राप्तम् । उच्चासनसंनिवेशवाददरो वह्नितापभयाभावः प्राप्त इति वा । जातावेकवचनम् । काश्चिच्चित्रादिकर्म काश्चिच्चापूपादिनिर्माणं चक्रुरिति भावः ॥

मुखानि मुक्तामणितोरणोद्गतै-
र्मरीचिभिः पान्थविलासमाश्रितैः ।
पुरस्य तस्याखिलवेश्मनामपि
प्रमोदहासच्छुरितानि रेजिरे ॥ १३ ॥

मुखानीति ॥ तस्य पुरस्य, तथा तत्संबन्धिनामखिलवेश्मनामपि मुखानि द्वारोपान्तरूपाण्याननानि मुक्तायुक्तानां मणीनां रत्नानाम्, मुक्तानां च मणीनां च वा, तोरणास्तेभ्य उद्गतैर्निर्गतैरत एव पान्थविलासमुत्थाय दूरं प्रसर्पणशीलानां पान्थानां विलासमाश्रितैर्मरीचिभिः किरणैः कृत्वा वरागमनसमये प्रमोदहासेन हर्षजहास्येन छुरितानि मिश्रितानीव रेजिरे । सर्वाण्यपि पुरद्वाराणि गृहद्वाराणि च मुक्तामणितोरणैरलंकृतानि । सर्वं च पुरं सानन्दमभूदिति भावः । हास्यं मुखे भवति । तस्य पुरस्य संबन्धिनां वेश्मनामिति व्याख्याने न केवलं पुरलोकानां मुखानि प्रमोदहासच्छुरितानि, किंतु गृहाणामपीत्यपेरर्थः । 'तोरणास्तदा–' इति पाठे तोरणात्पान्थविलाससमाश्रितैरुत्थाय दूरं प्रसर्पणशीलैरिति व्याख्येयम् ॥

पथामनीयन्त तथाधिवासना-
न्मधुव्रतानामपि दत्तविभ्रमाः ।
वितानतामातपनिर्भयास्तदा
पटच्छिदाकालिकपुष्पजाः स्रजः ॥ १४ ॥

पथामिति ॥ पटच्छिदाभिर्वस्त्रच्छेदैर्निर्मितान्याकालिकान्यसमयजानि यस्मिन्काले यानि न भवन्ति तादृशानि पुष्पाणि तेभ्यो जातास्तन्निर्मिताः स्रजो मालास्तदा वरागमनसमये पथां पुरमार्गाणां वितानतामुल्लोचतामनीयन्त प्रापिताः । किंभूताः ।—यथा मालत्यादिपुष्पाणां वासः, तथाऽधिवासनात्सुगन्धिद्रव्यैः परिमलारोपणान्मधुव्रतानामपि दत्तो विशिष्टो भ्रमो याभिः । सर्वदा मधुन्येव ये निवसन्ति तेषामपि अकृत्रिमाण्येवैतानि पुष्पाणीति (तेषामपि) दत्तभ्रान्तयः किमुतान्येषामिति मधुव्रतपदेन सूचितम् । तथा—वस्त्रमयत्वादातपनिर्भया ऊष्मजम्लानिरहिताः । 'अस्त्री वितानमुल्लोचः' इत्यमरः । 'छिदा' आकालिकेति च पूर्ववत् ॥

विभूषणैः कञ्चुकिता बभूः प्रजा
विचित्रचित्रैः स्नपितत्विषो गृहाः ।
बभूव तस्मिन्मणिकुट्टिमैः पुरे
वपुः स्वमुर्व्याः परिवर्तितोपमम् ॥ १५ ॥

विभूषणैरिति ॥ तस्मिन्पुरे प्रजाः पौरा जानपदाश्च विभूषणैरलंकारैः कञ्चुकिता नानारत्नकान्तिच्छादितसर्वावयवाः सन्तो बभुः शुशुभिरे । तथा—वर्णमात्रकल्पितेषु निर्जीवेष्वपि रूपकेषु जीवभ्रमापादनादिचमत्कारकरणाद्विचित्रचित्रैराश्चर्यकारिभिः कुड्यलिखितनानावर्णरूपकैः स्नपितत्विषः उज्ज्वलीकृतदीप्तयो गृहा बभुः । एवं जंगमस्थावररूपान्यतया तथा मणिकुट्टिमैश्च मणिबद्धभूमिभिः कृत्वा उर्व्याः स्वं सहजं मृन्मयं वपुः केनापि ब्रह्मादिना परिवर्तिता

उपमा यस्य तद्रूपान्तरं प्रापितमिव बभूव । पातालस्य रम्यतरत्वात्पातालमुपरिजातमिवेत्यर्थ इत्युत्प्रेक्षा । परिवर्तिता विनिमयिता उपमा उपमानं स्वर्गादि येन । उपमानत्वेन प्रसिद्धस्य स्वर्गस्योपमेयत्वं कृतम् । स्वयं च तस्योपमानं जातमित्यर्थ इति वा । 'स्वरुर्ध्याः' इति पाठे स्वर्गात्सकाशात्परिवर्तितोपममिव बभूवेत्यर्थः । मणिकुट्टिमैरुपलक्षिते पुरे वा । सर्वमपि तदा सालंकारं जातमिति भावः । कञ्चुकस्तारकादिः ॥

तदा निसस्वानतमां घनं घनं
ननाद तस्मिन्नितरां ततं ततम् ।
अवापुरुच्चैः सुषिराणि राणिता-
ममानमानद्धमियत्तयाध्वनीत् ॥ १६ ॥

तदेति ॥ तदा नलागमनसमये तस्मिन्पुरे घनं कांस्यतालादिवाद्यं घनं निबिडं यथा तथा निसस्वान शब्दं चकार । तथा—ततं वीणादिवाद्यं ततं विस्तृतं यथा तथा नितरां ननाद शब्दं चकार । तथा—सुषिराणि सच्छिद्राणि वंशादिवाद्यानि उच्चैर्नितरां राणितां शब्द(कृ)वं अवापुः । तथा—आनद्धं मुरजादिवाद्यमियत्तया इदंपरिमाणत्वेनामानमपरिच्छेद्यं यथा तथाऽध्वनीत् । घनं दृढावयवं बहुसंख्यं वेति घनविशेषणं वा । तथा—ततं स्वरूपेण विस्तृतं बहुसंख्याकं वेति ततविशेषणं वा । तथा—इयत्तया अमानं बहुसंख्यमित्यानद्धविशेषणं वा । चतुर्विधमपि वाद्यं तत्र वादितमित्यर्थः । 'ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकं तु सुषिरं कांस्यतालादिकं घनम्' इत्यमरः । राणिताम्—अवश्यं रणन्तीति 'आवश्यकाधमर्ण्ययोर्णिनिः' इति णिनौ राणीनि तेषां भावस्तत्ता ताम् । अध्वनीत् 'अतो हलादेः—' इति वृद्धिविकल्पः ॥

विपञ्चिराच्छादि न वेणुभिर्न ते
प्रणीतगीतैर्न च तेऽपि झर्झरैः ।
न ते हुडुक्केन न सोऽपि ढक्कया
न मर्दलैः सापि न तेऽपि ढक्कया ॥ १७ ॥

विपञ्चिरिति ॥ वेणुभिर्वंशध्वनिभिर्विपञ्चिर्वीणाध्वनिर्न आच्छादि । ते च वेणुध्वनयः प्रणीतं प्रारब्धं गीतं यैर्द्रुतमध्यादिमूर्छनापूर्वमुच्चैर्गायद्भिर्गायकैर्गायकगीतैर्न आच्छादिपतेति सर्वत्र विपरिणामेन व्याख्येयम् । झर्झरैर्झर्झराख्यैः कांस्यमयैर्वाद्यविशेषैर्ध्वनिभिः कृत्वा तेऽपि गायकध्वनयोपि नच नैवाच्छादिपत । हुडुक्केन लघीयसा कांस्यमयवाद्यविशेषेण ते झर्झरध्वनयो नाच्छादिताः । ढक्कया वादित्रविशेषेण सोपि हुडुकध्वनिर्नाच्छादि । मर्दलैर्मृदङ्गध्वनिभिः सा ढक्कापि नाच्छादि । ढक्कया तेपि मर्दला अपि नाच्छादिताः । अनपेक्षितगौरवलाघवं वाद्यमात्रं तत्र मिलितं । समधृतितालमाना अपि विपञ्च्यादिध्वनयो वादककौशलात्प्रव्यक्तं भेदेनोपलब्धा इति भावः । विपञ्चयते स्वरोऽस्यां विपञ्चिः, औणादिक इन्प्रत्ययः ॥

विचित्रवादित्रनिनादमूर्छितः
सुदूरचारी जनतामुखारवः ।
ममौ न कर्णेषु दिगन्तदन्तिनां
पयोधिपूरप्रतिनादमेदुरः ॥ १८ ॥

विचित्रेति ॥ विचित्राणि नानाविधानि वादित्राणि तेषां निनादैर्मूर्छितो वर्धितः । तथा—सुतरां दूरचारी दूरसंचरणशीलो जनता जनसङ्घस्तस्य मुखारवो मुखशब्दः पयोधिपूरे समुद्रप्रवाहे प्रतिनादेन प्रतिशब्देन । पयोधिपूरस्य तटे प्रतिशब्दस्तेन वा । मेदुरः परिपुष्टः सन् दिगन्तदन्तिनां दिक्प्रान्तवर्तिदिक्पालहस्तिनां कर्णेषु न ममौ । तत्कर्णानपि परिपूर्य बहिर्गत इत्यर्थः । नानाजातीयमिश्रणादेकीभूतो जनशब्दो दिगन्तपर्यन्तं समुल्लासेति भावः । 'स दूर—' इति पाठे सः । अतिमहानित्यर्थः ॥

उदस्य कुम्भीरथ शातकुम्भजा-
श्चतुष्कचारुत्विषि वेदिकोदरे ।
यथाकुलाचारमथावनीन्द्रजां
पुरन्ध्रिवर्गः स्नपयांबभूव ॥ १९ ॥

उदस्येति ॥ अथ सर्ववाद्यवादनानन्तरं पुरन्ध्रिवर्गः स्त्रीसमयज्ञकुलवृद्धसुवासिनीसमूहश्चतुष्कसंज्ञेन नानावर्णककल्पितस्वस्तिकसर्वतोभद्रादिमण्डनेन चार्वी रमणीया त्विट् कान्तिर्यस्य एवंभूते कूर्मपृष्ठचतुरस्रहस्तमात्रोच्छ्रितत्वादिसुकल्पिते वेदिकाया उदरे मध्ये शातकुम्भजाः सुवर्णघटिताः कुम्भीरुदस्य उत्क्षिप्य यथाकुलाचारं स्त्रीणां भैम्याश्च कुलाचारानतिक्रमेणाथ मङ्गलं मङ्गलगीतपूर्वं यथा तथा तामवनीन्द्रजां भैमीं स्नपयांबभूव । 'मङ्गलानन्तरारम्भप्रश्नकारुत्सवेष्वथो अथ' इति अमरात् एकोथशब्द आनन्तर्ये, द्वितीयस्तु मङ्गल इति ज्ञेयम् । 'यथाविधान नरनाथनन्दनीम्' इति च पाठः । स्नपयांबभूव, मित्वादुपधाह्रस्वः ॥

विजित्य दास्यादिव वारिहारिता-
मवापितास्तत्कुचयोर्द्वयेन ताः ।
शिखामवाक्षुः सहकारशाखिन-
स्त्रपाभरम्लानिमिवानतैर्मुखैः ॥ २० ॥

विजित्येति ॥ ताः कुम्भ्यस्तस्या भैम्याः कुचयोर्द्वयेन गौर(व)त्वकाठिन्यादिगुणातिशयेन विजित्य दास्यादिव वारिहारितां जलवाहित्वमवापिताः प्रापिताः । प्रापिता इव वा सत्य आनतैर्मुखैः सहकारशाखिन आम्रवृक्षस्य । शिखां त्रपाभरेण जनितां म्लानिं वैवर्ण्यकालिमानमिवावाक्षुर्वहन्ति स्म । पराजितोपि हीभरेण नम्रमुखो वारिहारितां प्रापितः सन् म्लानिं धत्ते । कलशीमुखे माङ्गलिकाश्चूतपल्लवा निक्षिप्यन्त इत्याचारः । अवाक्षुः । 'वह प्रापणे' लुङि ॥

असौ मुहुर्जातजलाभिषेचना
क्रमादुकूलेन सितांशुनोज्ज्वला ।

---

१ अत्र 'दास्यादिव' इति हेतूत्प्रेक्षा । 'म्लानिमिव' इति गुणस्वरूपोत्प्रेक्षा । तयोरङ्गाङ्गिभावेन सजातीयसंकरः—इति जीवातुः ।

द्वयस्य वर्षाशरदां तदातनीं
सनाभितां साधु बबन्ध संध्यया ॥ २१ ॥

असाविति ॥ मुहुर्जातं जलाभिषेचनं यस्या असौ भैमी कुमारिसतांशुना सिततन्तुना दुकूलेन क्षौमाम्बरेणोज्ज्वलिता भूषिता सती वर्षाश्च शरदश्च तासां द्वयस्य संध्यया संधिना तदातनीं तदाभवां तात्कालिकीं सनाभितां तुल्यतां साधु सम्यक् बबन्ध दधौ । वर्षाश्च कृतजलाभिषेकाः, शरच्च शी(सि)तांशुना चन्द्रेणोज्ज्वला, द्वयोः संधिरुभयगुणोपेतः । वस्त्रपरिधानात्पूर्वं प्रावृदसदृशी, अनन्तरं शरत्सदृशी जातेत्यर्थः ॥

पुरा[1] प्रभिन्नाम्बुददुर्दिनीकृतां
निनिन्द चन्द्रद्युतिसुन्दरीं दिवम् ।
शिरोरुहौघेण घनेन वर्षता
क्वचिदुकूलेन सितांशुनोज्ज्वला ॥ २२ ॥

क्वचित् पुरा—इति श्लोकः । सा दिवं निनिन्द । तत्तुल्या जातेत्यर्थः । किंभूताम्—पुरा वर्षासु प्रभिन्नैरतिघनैः । क्षरद्भिर्वा । अम्बुदैर्दुर्दिनीकृतां जलप्लाविताम् । अनन्तरं शरदारम्भे चन्द्रद्युतिसुन्दरीम् । किंभूता—क्वचिद्वर्षता शिरोरुहौघेण केशपाशरूपेण घनेन मेघेनोपलक्षिता । तथा—दुकूलेनैव सितांशुना चन्द्रेणोज्वला । जलाभिषेकस्थानेऽम्बुदक्षरणम् । चन्द्रचन्द्रिकास्थाने दुकूलम् ॥

विरेजिरे तच्चिकुरोत्कराः किराः
क्षणं गलन्निर्मलवारिविप्रुषाम् ।
तमः सुहृच्चामरनिर्जयार्जिताः
सिता वमन्तः खलु कीर्तिमुक्तिकाः ॥२३॥

विरेजिर इति ॥ तस्याश्चिकुरोत्कराः केशसङ्घा विरेजिरे । किंभूताः—गलतां निर्मलानां वारिविप्रुषामुदबिन्दूनां क्षणं किरन्ति किरा विक्षेपकाः । उदबिन्दून्मुञ्चन्त इत्यर्थः । किंभूता इव—तमसः सुहृन्दि सदृशान्यतिश्यामानि चामराणि तेषां निर्जयेनार्जिताः स्वीकृत्य संगृहीताः सिताः शुभ्राः कीर्तिरूपा मुक्तिका वमन्तः खलु । इवार्थे खलुशब्दः । कृष्णचामरादप्यतिसुन्दरत्वात्केशपाश इति भावः । विप्रुषाम्, कर्मणि षष्ठी ॥

अदीयसा स्नानजलस्य वाससा
प्रमार्जनेनाधिकमुज्ज्वलीकृताः ।
अदभ्रमभ्राजत साश्मशाणना-
त्प्रकाशरोचिःप्रतिमेव हेमजा ॥ २४ ॥

अदीयसेति ॥ सा भैमी अदभ्रमधिकमभ्राजताशोभत । किंभूता सा—स्नानजलस्य प्रमार्जनेन प्रोञ्छनकारिणा अदीयसा कोमलतरेण वाससा कर्तृणा । स्नानजलस्य प्रमार्जनेन करणेन वा । पूर्वापेक्षयाऽधिकं यथा तथा उज्ज्वलीकृता । केव—अश्मशाणनात् शिलोत्तेजनादेतोः प्रकाशं पूर्वापेक्षयाऽतिदीप्रं रोचिर्दीप्तिर्यस्याः सा हेमजा सौवर्णी देवादीनां प्रतिमेव । शिलाघर्षणात् 'ओपिता' इति सुवर्णकारपरिभाषा । प्रमार्जनेन, प्रथमपक्षे नन्द्यादित्वात्कर्तरि ल्युः । द्वितीयपक्षे भावे ल्युट् । 'शाण तेजने' भौवादिकस्तस्माद्ल्युट् ॥

तदा तदङ्गस्य बिभर्ति विभ्रमं
विलेपनामोदमुचः स्फुरद्रुचः ।
दरस्फुरत्काञ्चनकेतकीदला-
त्सुवर्णमभ्यस्यति सौरभं यदि ॥ २५ ॥

तदेति ॥ सुवर्णं दरमीषत्स्फुटद्विकसत्काञ्चनकेतकीदलं तच्चासौरभं सौगन्ध्यं यदि अभ्यस्यति शिक्षते, तदा तर्हि तदङ्गस्य भैमीशरीरस्य विभ्रमं विलासं विशिष्टां भ्रान्तिं वा बिभर्ति । किंभूतस्य—विलेपनस्य यक्षकर्दमादेरङ्गरागेणामोदं मुञ्चति तस्य । तथा—स्फुरन्ती रुग् दीप्तिर्यस्य । स्वाभाविकगौरकान्तिनः । अभ्यङ्गानन्तरमङ्गरागः कृत इति भावः । 'यदि तर्हि' इति संबन्धात् 'अभ्यस्यति बिभर्ति' इति लिङर्थे लट् । क्रियानिष्पत्तिस्तु न विवक्षणीया ॥

अवापितायाः शुचिवेदिकान्तरं
कलासु तस्याः सकलासु पण्डिताः ।
क्षणेन सख्यश्चिरशिक्षणैः स्फुटं
प्रतिप्रतीकं प्रतिकर्म निर्ममुः ॥ २६ ॥

अवापितायाः इति ॥ सकलासु गीतालंकरणादिषु कलासु विद्यासु पण्डिताः कुशलाः सख्यः शुचि गोमयाद्यनुलिप्तं सर्वतोभद्रादिभूषितं वेदिकाया अन्तरं मध्यं भद्रासनस्थानमवापितायाः प्रापितायास्तस्या भैम्याः प्रतिप्रतीकं प्रत्यवयवं चिरशिक्षणाद्दुष्कालाभ्यासात्स्फुटं निरतिशयमतएव क्षणेन प्रतिकर्मालंकरणं निर्ममुश्चक्रुः ॥

विनापि भूषामवधिः श्रियामियं
व्यभूषि विज्ञाभिरदर्शि चाधिका ।
न भूषयैषाधिचकास्ति किं तु सा-
नयेति कस्यास्तु विचारचातुरी ॥ २७ ॥

विनेति ॥ भूषां मण्डनं विनापि श्रियां कान्तीनामवधिः परमसीमा इयं भैमी विज्ञाभिरलंकारचतुराभिः सखीभिर्व्यभूषि विशेषेणामण्डि । अधिका अनलंकृताङ्गकान्तितोऽधिककान्तिरदर्शि च । परमिति विचारचातुरी एकतरनिश्चयरूपे विचारे प्रावीण्यं कस्य अस्तु, न कस्यापि । इति किम्—एषा भूषया पूर्वापेक्षयाऽधिकं न चकास्ति । किंतु सा भूषाऽनया भैम्या कृत्वाऽधिकं शोभते । भैम्या भूषणानां च परस्परसंपर्काच्छोभातिशयो दृश्यते । तत्र भूषणैर्भैम्याः शोभातिशयो न जातः, किं तु भैम्या भूषणा-

---

१ सुखावबोधायाम्—अस्य स्थाने 'पुरा प्रभिन्नाम्बुद—' इत्यर्धं व्याख्यातम् ॥ इदं तु श्लोकान्तरे 'शिरोरुहौघेण—' इति पूर्वार्धोत्तरमुत्तरार्धतया व्याख्यातम् । २ 'असौ' इति जीवातौ व्याख्यातम् ।

नामिति विवेकः कस्यापि नाभूदित्यर्थः । पूर्वापेक्षयाधिकं वा शोभते स्मेति भावः । भूषां विनापि श्रियामवधिरियं विज्ञाभिर्विशेषेण बहुना प्रयासेनाभूषि । पूर्वापेक्षया इयमधिका किमिति तारतम्यज्ञानार्थं पुनः पुनः विलोकिता च परमियं भूषया नाधिचकास्ति, किं तु सानयेति तात्त्विकविचारचातुरी कस्यास्तु पुनः सख्या जाता इत्यर्थादपितु न कस्याश्चित् । प्रयासेनालंकृत्य पुनः पुनः विलोक्यापि विज्ञाभिरपि अनया मण्डनं मण्डितम्, मण्डनैर्वा इयं मण्डितेति तारतम्यं न ज्ञातमेव । परं भूषणानां वैयर्थ्यम्, साधारणत्वं वा, अधिकशोभाकारित्वं वेति किमपि न निश्चितम् । किं तु भ्रान्ता एव जाता इत्यर्थ इति वा । तस्या निरतिशया कान्तिर्जातेति भावः । पूर्वोक्ता विचारचातुरी कस्यास्तु कस्याश्चिदेव विदुष्याः न तु सर्वस्या इति वा । अलंकृतं तद्वपुषैव मण्डनमिति विचारचातुरी कस्यचिन्महालक्षणस्य महाप्राज्ञस्य, कस्य ब्रह्मणो वास्तु । मया श्रीहर्षेण ब्रह्मणा वैषा निर्णेतुं शक्यते नान्येनेत्यर्थ इति वा । कस्य पुनर्न जाता, अपि तु सर्वस्यापीति वा ॥

तिलकप्रसाधनं वर्णयति—

विधाय बन्धूकपयोजपूजने
कृतां विधोर्गन्धफलीबलिश्रियम् ।
निनिन्द लब्धाधरलोचनार्चनं
मनःशिलाचित्रकमेत्य तन्मुखम् ॥ २८ ॥

विधायेति ॥ लब्धं प्राप्तमधराभ्यां लोचनाभ्यां चार्चनं पूजनं येन । ओष्ठनेत्रेण रमणीयमिति यावत् । एवंविधं तन्मुखं भैमीमुखं कर्तृ माङ्गलिकं मनःशिलाख्यगैरिधातुविशेषनिर्मितं चित्रकं तिलकमेत्य प्राप्य बन्धूकेन पयोजाभ्यां नीलोत्पलाभ्यां च पूजने पूजाद्वयं कृत्वाऽनन्तरं कृतां विधोश्चन्द्रसंबन्धिनीं गन्धफल्या चम्पककलिकया बलिः पूजा तज्जनितां श्रियं कान्तिं निनिन्द । यदि कोपि बन्धूकोत्पलैश्चन्द्रस्य पूजां कृत्वा चम्पककलिकां चन्द्रस्य शिरसि न्यस्यति, तदा तां चन्द्रलक्ष्मीं न्यक्करोतीत्यभूतोपमेत्यर्थः । बन्धूकस्याधरस्य, नीलोत्पलयोर्लोचनयोः, चम्पककलिकाया मनःशिलातिलकस्य, चन्द्रस्य वदनस्य चोपमोपमेयभावः । 'चम्पको हेमपुष्पकः । एतस्य कलिका गन्धफली' इत्यमरः ॥

श्लोकत्रयेण केशप्रसाधनं वर्णयति—

महीमघोना मदनान्धतातमी-
तमःपटारम्भणतन्तुसंततिः ।
अबन्धि तन्मूर्धजपाशमञ्जरी
कयापि धूपग्रहधूमकोमला ॥ २९ ॥

महीति ॥ कयापि केशप्रसाधनचतुरया सख्या तस्या भैम्याः मूर्धजपाशः केशपाशस्तद्रूपा सौगन्ध्याद्दैर्घ्याच्च मञ्जरी प्रथमोद्भिन्नकलिकाङ्कुरदण्डोऽबन्धि संयता । किंभूता मञ्जरी—महीमघोनां भूमीन्द्राणां मदनेन कामविकारेणान्धता विवेकशून्यता सैव तमी तामसी रात्रिस्तस्यास्तमोरूपस्य पटस्य आवरकत्वादविवेकरूपस्य आरम्भणे निर्माणे विषये तन्तुसंततिः सूत्रपरम्परा तानकरूपा । तथा—धूपग्रहस्य धूपग्रहणसाधनस्य सच्छिद्रस्य धातुमयस्य करण्डकादेः संबन्धिना दह्यमानकर्पूरागरुचन्दनादिपरिमलबहुलेन धूमेन कोमला ईषच्छुष्का तद्वदतिसुन्दरी नितरां श्यामा । राजानो रात्रौ नीलं पट्टवस्त्रादिकं परिधाय विचरन्तीति वा । नलपरायाः अपि तस्याः केशपाशं दृष्ट्वा राज्ञां विवेकशून्यता भवतीति भावः ॥

पुनःपुनः काचन कुर्वती कच-
च्छटाधिया धूपजधूमसंयमम् ।
सखी स्मितैस्तार्कितताद्भिजभ्रमा
बबन्ध तन्मूर्धजचामरं चिरात् ॥ ३० ॥

पुनःपुनरिति ॥ काचन सखी तस्या भैम्याः मूर्धजः केशपाशस्तल्लक्षणं सूक्ष्मघनप्रलम्बकृष्णत्वसाम्याच्चामरं चिराद्बहुना कालेन बबन्ध । चिरकाले हेतुमाह—किंभूता—कचच्छटाधिया भैमीकेशपाशभ्रान्त्या सादृश्याद्धूपजस्य धूमस्य मुहुः संयमं बन्धनं कुर्वती । तथा—तद्भ्रान्तिदर्शिनीनां सखीनां स्मितैरन्योन्यमुखविलोकनपूर्वविलसदीषद्धास्यैः कृत्वा तार्कितः स केशपाशभ्रमेण धूपजधूमसंयमनरूपो निजः स्वीयो भ्रमो यया ॥

बलस्य कृष्टेव हलेन भाति या
कलिन्दकन्या घनभङ्गभङ्गुरा ।
तदार्पितैस्तां करुणस्य कुड्मलै-
र्जहास तस्याः कुटिला कचच्छटा ॥ ३१ ॥

बलस्येति ॥ कुटिलातिवक्रा तस्या या कचच्छटा कुन्तलश्रेणिर्बलस्य बलभद्रस्य हलेन आकृष्टा सती घनैर्निबिडैर्भङ्गैस्तरङ्गैर्भङ्गुरा उच्चावचा कलिन्दस्य पर्वतस्य कन्या यमुनैव भाति । सा कचच्छटा तां यमुनां तदा तस्मिन्समयेऽर्पितैः शिरसि न्यस्तैः करुणाख्यवृक्षस्य कुड्मलैः कलिकाभिर्जहास । यमुना पराकर्षणकृतेन महीयसा भङ्गेन पराभवेन भग्ना पुष्परहिता च । इयं तु स्वभावकुटिला पुनरपि कुसुमैरञ्चिता चेति हासो युक्त इत्यर्थः । श्यामाऽतिवक्रा पुष्पालंकृता च तस्याः कुन्तलश्रेणिर्नितरां शोभते स्मेति भावः । पूर्वं तु तत्तुल्याभूत्, इदानीं स्वधिका जातेति भावः । जहासेवेति वा । यमुनाकर्षणं हरिवंशादौ ज्ञेयम् ॥

ललाटप्रसाधनं वर्णयति—

धृतैतया हाटकपट्टिकालिके
बभूव केशाम्बुदविद्युदेव सा ।
मुखेन्दुसंबन्धवशात्सुधाजुषः
स्थिरत्वमूहे नियतं तदायुषः ॥ ३२ ॥

धृतेति ॥ एतयालिके ललाटे या हाटकस्य सुवर्णस्य पट्टिका धृता सा केशाम्बुदानां कुन्तलरूपजलदानां । तेषु वा । विद्युदेव बभूव । क्षणप्रभायास्तस्याः कथं स्थिरत्वमित्यत आह—मुखेन्दोः संबन्धवशाद्धेतोः सुधाजुषोऽमृतं सेवमानस्य तदायुषो विद्युदवस्थानस्य स्थिरत्वं नियतं निश्चितमहमूहे तर्कयामि । अमृतपानादमरत्वं तस्या जातमित्यर्थः । सुवर्णपट्टिकया ललाटमलंकृतमिति भावः । 'यदायुषः' इति वा पाठः । ऊहे 'ऊह वितर्के' ॥

कुन्तलान्वर्णयति—

ललाटिकासीमनि चूर्णकुन्तला
बभुः स्फुटं भीमनरेन्द्रजन्मनः ।

मनःशीलाचित्रकदीपसंभवा
भ्रमीभृतः कज्जलधूमवल्लयः ॥ ३३ ॥

ललाटिकेति ॥ ललाटे रचिताया रेखाकारायाः ललाटिकायाः पद्मपाइयाया अलंकारविशेषस्य सीमनि पर्यन्तप्रदेशे भीमनरेन्द्रजन्मनो भैम्याश्च भृंगकुन्तला वक्रकुण्डलीभूताः केशाः कज्जलरूपस्य धूमस्य वलयः श्रेण्यः स्फुटमिव बभुः । किंभूता वलयः—मनःशिलायाश्चित्रकं तिलकस्तद्रूपो दीपस्तस्मात् संभवो यासां ताः । तथा—भ्रमीः संकुच्य वक्रीभावान्बिभ्रति ता बिभ्रत्यो धारयन्त्यः । मलस्य मनःशिलातिलकेनैव कामोद्दीपनात्तस्य दीपत्वम् । दीपधूमसंभवा कज्जलश्रेणिः किल भ्रमियुक्ता भवति । 'पद्मपाइया ललाटिका' इति हलायुधः । 'कर्णललाटात्कनलंकारे' इति कन् ॥

श्लोकचतुष्टयेन कज्जलालंकारं वर्णयति—

अपाङ्गमालिङ्ग्य तदीयमुच्चकै-
रदीपि रेखा जनिताञ्जनेन या ।
अपाति सूत्रं तदिव द्वितीयया
वयःश्रिया वर्धयितुं विलोचने ॥ ३४ ॥

अपाङ्गमिति ॥ अञ्जनेन जनिता या रेखा सा तदीयमपाङ्गमालिङ्ग्य स्पृष्ट्वा उच्चकैर्नितरामदीपि शुशुभे । द्वितीयया तारुण्यवयःश्रिया कर्त्र्या विलोचने भैमीनेत्रे वर्धयितुं शैशवापेक्षया विशाले कर्तुं तद्रेखादीपनं सूत्रमिव अपाति । प्राच्यो हि सुन्दर्यो विलोचने नेत्रप्रान्तनिर्गतया कर्णोपान्तस्पर्शिन्याञ्जनरेखया भूषयन्ति । शिल्पिनश्च किमपि लेखितुं वर्धयितुं वा लिख्यमानस्य वर्ध्यमानस्य वाकारवक्रिमपरिहाराय मषीखटिकाद्युपदिग्धस्य सूत्राभिघातेन रेखापातनं कुर्वन्ति । यद्यपि नेत्रयोर्वृद्धिर्नास्ति तथापि शैशवापेक्षया तारुण्येन कटाक्षविक्षेपादिविलासवशाद्दैर्घ्यप्रतीतेर्दैर्घ्यकरणार्थं सूत्रपातो युक्तः । नेत्रे कज्जलाङ्किते इति भावः ॥

अनङ्गलीलाभिरपाङ्गधाविनः
कनीनिकानीलमणेः पुनः पुनः ।
तमिस्रवंशप्रभवेन रश्मिना
स्वपद्धतिः सा किमरञ्जि नाञ्जनैः ॥ ३५ ॥

अनङ्गेति ॥ अनङ्गलीलाभिः कटाक्षविक्षेपरूपैः कामविलासैः कृत्वा पुनः पुनरपाङ्गधाविनो नेत्रोपान्तस्पर्शिनः कनीनिकानीलमणेर्नेत्रतारकारूपस्येन्द्रनीलरत्नस्य तमिस्रवंशप्रभवेनायःश्यामास्वयजेन (?) अतिकृष्णेन रश्मिना सकज्जलरेखारूपा सा स्वपद्धतिर्निजगमनसरणिः किमरञ्जि अञ्जनैर्न । सदा तन्मार्गगमनेन स्वसंबन्धात्तारकानीलमणिकिरणैरेव नेत्रप्रान्तो नीलीकृतो, न कज्जलैरित्युत्प्रेक्षा । कामोल्लसितनिरतिशयकटाक्षश्रीतुल्याञ्जनशोभालंकारतां जगामेति भावः ॥

असेविषातां सुषमां विदर्भजा-
दृशाववाप्याञ्जनरेखयाऽन्वयम् ।
भुजद्वयज्याकिणपद्धतिस्पृशोः
स्मरेण बाणीकृतयोः पयोजयोः ॥ ३६ ॥

असेविषातामिति ॥ विदर्भजादृशावञ्जनरेखयाऽन्वयं संबन्धमवाप्य स्मरेण बाणीकृतयोर्बाणत्वं प्रापितयोर्नीलोत्पलयोः सुषमां परमां शोभामसेविषातामलभेताम् । किंभूतयोः—सज्या-पसव्यबाणाकर्षणाद्भुजद्वयेऽधिकरणे ज्याकिणपद्धतिर्ज्याभिघातवैवर्ण्यरूपकिणमार्गस्तां स्पृशत इति स्पृशौ तयोः । बलमुद्दिश्याकर्णबाणाकर्षणात्कर्णान्तविश्रान्तयोर्नेत्रनीलोत्पलबाणयोर्भुजकिणसंबन्धसंभावना युक्ता । अञ्जनरेखे किणतुल्ये, नेत्रे च स्मरवृद्धिकरत्वात्स्मरनीलोत्पलबाणतुल्ये इति भावः ॥

तदक्षितत्कालतुलागसा नखं
निखाय कृष्णस्य मृगस्य चक्षुषी ।
विधिर्यदुद्धर्तुमियेष तत्तयो-
रदूरवर्तिक्षतता स्म शंसति ॥ ३७ ॥

तदक्षीति ॥ विधिर्ब्रह्मा तदक्षणोर्मृगनेत्राधिकयोर्भैमीनेत्रयोस्तत्काले तस्मिन्पाणिग्रहोचिताञ्जनप्रसाधनसमये तुला साम्यकरणं तदर्पणाऽगसाऽपराधेन हेतुना नखं निखाय कृष्णस्य मृगस्य कृष्णसारहरिणस्य चक्षुषी उद्धर्तुमुन्मूलयितुं यदीयेष, तयोः कृष्णसारनेत्रयोरदूरवर्ति समीपवर्ति यत्क्षतं तस्य भावस्तत्ता सा तन्नखनिखननकर्म शंसति स्म । 'क्षतमाख्यत स्फुटम्' इति पाठे स्फुटं प्रकटम्, उत्प्रेक्षायां वा । अदूरवर्ति क्षतं ययोस्ते अदूरवर्तिक्षते तयोर्भाव इति वा । मृगनेत्रसमीपे नखनिखननाकारं क्षतं भवति ॥

श्लोकद्वयेनावतंसनीलोत्पले वर्णयति—

विलोचनाभ्यामतिमात्रपीडिते
वतंसनीलाम्बुरुहद्वयीं खलु ।
तयोः प्रतिद्वन्द्विधियाधिरोपयां-
बभूवतुर्भीमसुताश्रुती ततः ॥ ३८ ॥

विलोचनाभ्यामिति ॥ खलु यतो भीमसुतायाः श्रुती कर्णौ विलोचनाभ्यामाकर्णपूर्णत्वादतिमात्रमतितरां पीडिते पराक्रान्ते, ततस्तस्मादात्मपराभवकारिणोस्तयोर्नेत्रयोः प्रतिद्वन्द्विनी तुल्यबले इमे नीलोत्पले इति धिया बुद्ध्येव स्वशिरसि वतंसरूपनीलाम्बुरुहद्वयीमधिरोपयांबभूवतुः आरोपितवन्तौ । दधतुरित्यर्थः । लुप्तोत्प्रेक्षा खलु वोत्प्रेक्षायाम् । अन्योऽप्यधिकेन पराभूतस्तत्समानं तद्विरोधिनं संनिधापयति । नीलोत्पलकरणीयं नेत्राभ्यामेव कृतम्, ननु नीलोत्पलाभ्यामधिकं किंचित्कृतम् । नीलोत्पले कर्णभूषणीकृते इति च भावः ॥

धृतं वतंसोत्पलयुग्ममेतया
व्यराजदस्यां पतिते दृशाविव ।
मनोभुवान्ध्यं गमितस्य पश्यतः
स्थिते लगित्वा रमिकस्य कस्यचित् ॥ ३९ ॥

धृतमिति ॥ एतया कर्णयोरुपरि धृतं वतंसोत्पलयुग्मं भैमीमेतत्कर्णौ वा पश्यतः कस्यचिद्रमिकस्य विलासिनो दृशाविव व्यराजत् । किंभूतस्य—मनोभुवा कामेनाविवेकित्वमेवाऽन्ध्यमुद्गतनेत्रत्वं ग-

मितस्य प्रापितस्य । किंभूते दृशौ—अस्यां भैम्यां पतिते निषण्णे । ततो रसिकत्वादेवापरावृत्य लगित्वा संबध्य स्थिते स्थिरतरे इत्युत्प्रेक्षा । कश्चिद्विलासी भैम्याः कर्णौ प्रथममेव दृष्टवान् । ततस्तस्य नेत्रे कर्णयोरेव लग्ने स्थिते, नोत्पलद्वयमित्यर्थः । नेत्रगमनादेवास्यान्यम् । अन्यदपि पतितं वस्तु कुत्रापि लगित्वा तिष्ठति ॥

रत्नावतंसं वर्णयति—

विदर्भपुत्रीश्रवणावतंसिका-
मणीमहःकिंशुककार्मुकोदरे ।
उदीतनेत्रोत्पलबाणसंभृति-
र्नलं परं लक्ष्यमवैक्षत स्मरः ॥ ४० ॥

विदर्भेति ॥ स्मरः नलं परं केवलं श्रेष्ठं वा लक्ष्यमवैक्षत । आगच्छन्तं प्रतीक्षितवानित्यर्थः । किंभूतः—विदर्भपुत्रीश्रवणयोरुपर्यवतंसिकाया मण्यो भूषणभूता माणिक्यादिरत्नखचितसुवर्णकम्बिकास्तत्संबन्धीनि माणिक्यादिरत्नानि तासां महस्तेजस्तदेव किंशुककार्मुकं पलाशकुसुमधनुस्तस्योदरे विषय उदीता समुत्पन्ना नेत्रयोरवतंसोत्पलयोश्च तद्रूपाणां चतुर्णां बाणानां संभृतिः सामग्री । नेत्ररूपाभ्यां वा नीलोत्पलाभ्यां बाणसामग्री यस्य एवंविधः । चापे समारोपितबाण इत्यर्थः । स्वलंकृतकर्णकज्जलाञ्चितनेत्रसौन्दर्यविलोकनमात्रेण नलः कामपरो भविष्यतीति भावः । अवतंसिकापदेन श्रवणलब्धावप्यतिसंनिधिसूचनार्थं श्रवणपदप्रयोगः । युक्तलक्ष्यस्य स्मरणात्स्मरः ॥

श्लोकद्वयेन कुण्डलप्रसाधनमाह—

अनाचरत्तथ्यमृषाविचारणां
तदाननं कर्णलतायुगेन किम् ।
बबन्ध जित्वा मणिकुण्डले विधू
द्विचन्द्रबुद्ध्या कथितावसूयकौ ॥ ४१ ॥

अनाचरदिति ॥ सादृश्यात्स्फुरितया द्विचन्द्रबुद्ध्या द्वौ चन्द्राविति भ्रान्तिज्ञानेन एतौ द्वौ चन्द्रौ तवोत्कर्षं न सहेते इति भैम्यास्तदाननस्य वा पुरस्तादसूयकौ स्पर्धाकारिणौ कथितौ प्रतिपादितौ । मणिकुण्डले रत्नखचिते सुवर्णताटङ्के एव विधू द्वौ चन्द्रौ जित्वा तदाननं कर्तृ कर्णलतायुगेन कृत्वा बबन्ध किम् । ननु द्विचन्द्रबुद्धेरेव स्वरूपेणासत्यत्वात्स्त्रीत्वाच्च तदुक्तेऽर्थे कथं तस्य प्रवृत्तिरित्याशङ्क्याह—किंभूतम्—तथ्यमृषाविचारणामनया कथितं सत्यम्, असत्यं वेति विमर्शनम् अनाचरदकुर्वाणम् । शोभासंपन्मदेन मत्तत्वादित्यर्थः । किं किमिति बबन्ध, अपित्वनुचितमेतत्कृतम् । यतः सत्यासत्यविचारणाभावादिति भाव इति वा । अन्योपि दुर्मदः सत्यासत्यविचारमकुर्वन्कस्यचिदसूयकस्य वचनादनपराधिनमपि कंचित्पाशादिना बध्नाति । चन्द्राकारे मणिताटङ्के तया धृत इति भावः ॥

अवादि भैमी परिधाप्य कुण्डले
वयस्ययाभ्यामभितः समन्वयः ।
त्वदाननेन्दोः प्रियकामजन्मनि
श्रयत्ययं दौरुधरीं धुरं ध्रुवम् ॥ ४२ ॥

अवादीति ॥ कयाचिद्वयस्यया सख्या कुण्डले परिधाप्य कर्णयोर्निक्षिप्य भैमी अवादि इत्युक्ता । इति किम्—भैमी त्वदाननेन्दोराभ्यां कुण्डलाभ्यामभित उभयपार्श्वयोरयं समन्वयः समीचीनः संबन्धः प्रियस्य नलस्य कामो रत्यभिलाषस्तस्य जन्मन्युत्पत्तौ विषये दौरुधरीं पूर्वापरराशिस्थगुरुशुक्रयोर्मध्यराशिस्थचन्द्रस्य दुरुधराख्यस्य महायोगस्य संबन्धिनीं धुरं भारं ध्रुवं निश्चितमाश्रयतीति । ध्रुवमुत्प्रेक्षायां वा । दुरुधराख्ये महायोगे जातः पुत्रादिर्यथा वृद्धिं प्राप्नोति, तथा कुण्डलालंकृतमुखचन्द्रदर्शनमात्रेण नलस्य रमणाभिलाषो वृद्धिं प्राप्स्यतीति भावः । 'गुरुभार्गवयोर्योगश्चन्द्रेणैव यदा भवेत् । तदा दुरुधरायोगः—' इति ज्योतिःशास्त्रादवगन्तव्यम् ॥

अधरप्रसाधनमाह—

निवेशितं यावकरागदीप्तये
लगत्तदीयाधरसीम्नि सिक्थकम् ।
रराज तत्रैव निवस्तुमुत्सुकं
मधूनि निर्धूय सुधासधर्मणि ॥ ४३ ॥

निवेशितमिति ॥ तदीयोऽधरोष्ठस्य सीमनि ऊर्ध्वदेशे यावकस्यालक्तकस्य रागो लोहितिमा तस्य दीप्तये प्रकाशनाय निवेशितं न्यस्तं यच्चानेन लगत्संलग्नं सिक्थकं मधूच्छिष्टं स्वस्य जनकानि मधूनि हीनरसतया परित्यज्य माधुर्यातिशयात्सुधाया अमृतस्य सधर्मणि तुल्यायां तत्रैवाधरसीम्नि निवस्तुं नित्यं स्थातुमुत्सुकमुत्कण्ठितमिव रराज । सुधया सिक्थकस्य कदाचिदप्यसंबन्धात्तदधरलतां परित्यक्तुमशक्तमिव तत्रैव स्थितमित्यर्थः । प्रसाधिका अलक्तकस्य स्थित्यर्थमधरे सिक्थकं निवेशयन्ति । अधरस्य मधुनोऽधिकत्वं सूचितम् । अन्यदपि हीनमाश्रयं परित्यज्योत्तममाश्रयति । लुप्तोत्प्रेक्षा । सधर्मा 'धर्मादनिच् केवलात्' इत्यनिच् 'समानस्य छन्दसि–' इत्यत्र योगविभागात्समानस्य सादेशः । सुधावत्समानो धर्मो यस्याः सा सधर्मा तस्याम्, 'मनः' इति न ङीप् ॥

कण्ठप्रसाधनमाह—

स्वरेण वीणेत्यविशेषणं पुरा
स्फुरत्तदीया खलु कण्ठकन्दली ।
अवाप्य तन्त्रीरथ सप्त मुक्तिका-
सरानराजत्परिवादिनी स्फुटम् ॥ ४४ ॥

स्वरेणेति ॥ तदीया कण्ठ एव कन्दली अतिसौकुमार्यादिगुणत्वादृढोद्गतप्रथमाङ्कुरदण्डोतिमधुरेण स्वरेण पुरा पूर्वमविशेषणं विशेषणरहितं यथातथा सामान्येन वीणेत्येव खलु निश्चितमस्फुरदभासत, ननु रुद्रवीणादिबहुवीणाभेदेषु विशिष्टतया इयमिदं संज्ञेत्यर्थः । अथालंकारसमये सप्त मुक्तिकासरान्सूत्रप्रोतमौक्तिकहारानेव तर्जनीमध्यमध्यमाभिघातोत्पद्यमानध्वनिव्यञ्जितषड्जमादि-

---

१ 'महश्चापपलाशकिंशुके' इति 'महश्चापपलाशकिंशुकः' इति वा पाठः सुखावबोधायाम् ।

रागाः षट्सूत्रादिरचितसप्ततन्त्रीरवाप्य 'विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवादिनी' इत्यमरवचनात्स्फुटं प्रकटं परिवादिनी इति विशिष्टसंज्ञा सती अराजदशोभत । स्फुटमुत्प्रेक्षायां वा । वीणाभ्योऽपि मधुरस्वरा कण्ठकन्दली सप्तसरमुक्ताहारालंकृता चेति भावः ॥

भुजप्रसाधनमाह—

उपास्यमानाविव शिक्षितुं ततो
मृदुत्वमप्रौढमृणालनालया ।
विरेजतुर्माङ्गलिकेन संगतौ
भुजौ सुदत्या वलयेन कम्बुनः ॥ ४५ ॥

उपेति ॥ मङ्गलं प्रयोजनमस्य मङ्गलार्थं रचितेन कम्बुनः शङ्खस्य वलयेन कङ्कणेन संगतौ युक्तौ सुदत्या भैम्या भुजौ रराजतुः शुशुभाते । उत्प्रेक्षते—अप्रौढा बाला मृणालनाला तया विसदण्डेन ततो भुजाभ्यां सकाशान्मृदुत्वं शिक्षितुमुपास्यमानाविव सेव्यमानाविव । मृणालादपि कोमलतरौ भुजावित्यर्थः । गौडदेशे विवाहकाले शङ्खवलयधारणमाचारः । बालेन चाभ्यासः सुकर इत्यप्रौढपदम् । 'नाला नालमथास्त्रियाम्' इत्यपि क्वचित्पाठान्महाकविप्रयोगाच्चालशब्दोऽप्यावन्तः । ततः, 'आख्यातोपयोगे' इत्यपादानत्वम् । माङ्गलिकेन, 'प्रयोजनम्' इति ठक् । रराजतुः, 'फणां च सप्तानाम्' इत्येत्वाभ्यासलोपौ वैकल्पिकत्वान्न भवतः । क्वचित्तु 'विरेजतुः' इत्यपि पाठोऽस्ति ॥

श्लोकद्वयेन पदप्रसाधनमाह—

पदद्वयेस्या नवयावरञ्जना
जनैस्तदानीमुदनीयतार्पिता ।
चिराय पद्मौ परिरभ्य जाग्रती
निशीव विश्लिष्य नवा रविद्युतिः ॥ ४६ ॥

पदेति ॥ तदानीं तस्मिन् प्रसाधनसमये अस्याः पदद्वयेऽर्पिता रचिता नवा आर्द्रा यावरञ्जना अलक्तकरञ्जना जनैर्नवोदयसमये जाताऽतिरक्ता रविद्युतिरिवोदनीयतातर्क्यत । किंभूता रविद्युतिः—निशि रात्रौ सूर्यस्यास्तमयवशात्पद्माभ्यां सह विश्लिष्य दिने पुनः पद्मौ चिराय परिरभ्य जाग्रती तिष्ठन्ती । रविद्युतिर्यथा पद्मेषु श्रियमधिकां करोति तथा यावकरञ्जना तत्पदयोरिति भैमीचरणौ पद्मतुल्याविति भावः । चिराय विश्लिष्येति वा चिरवियुक्तावन्योन्यं प्राप्य गाढमालिङ्ग्य तिष्ठत इत्युक्तिः ॥

कृतापराधः सुतनोरनन्तरं
विचिन्त्य कान्तेन समं समागमम् ।
स्फुटं सिषेवे कुसुमेषुपावकः
स रागचिह्नश्चरणौ न यावकः ॥ ४७ ॥

कृतेति ॥ पूर्वं विरहावस्थायां बहुसंतापकारित्वात्सुतनोर्भैम्याः कृतोऽपराधो येन स कुसुमेषुः काम एव पावकोऽग्निरनन्तरमधुना कान्तेन नलेन समं सह भैम्या समागमं विचिन्त्य स्फुटं निश्चितं चरणौ सिषेवे । अपराधमार्जनायेत्यर्थः । कामस्याग्नित्वे हेतुमाह—यतः सोऽग्नी रागचिह्नौ रागो लोहितिमैव चिह्नं यस्य । रक्तिम्ना वह्निरयमिति ज्ञायते । अथवाऽनुराग एव चिह्नं यस्य । अनुराग एव हि काममनुमापयति । तस्मात्कामाग्निरेवायं, नत्वयं यावकोऽलक्तकः । स यावको नेति वा । अन्योऽपि प्रोषितभर्तृकायाः कस्याश्चित्कृतापराधः संस्तत्प्रियागमनं विचिन्त्यापराधमार्जनाय तत्पादयोः पतति । सालक्तकतत्पददर्शनादेव नलस्य कामोद्रेको भवितेति भावः ॥

सहजशोभामाहात्म्यं वर्णयति—

स्वयं तदङ्गेषु गतेषु चारुतां
परस्परेणैव विभूषितेषु च ।
किमूचिरेऽलंकरणानि तानि त-
द्वृथैव तेषां करणं बभूव यत् ॥ ४८ ॥

स्वयमिति ॥ स्वयं भूषणं विनैव परस्परानपेक्षं च तस्या भैम्या अङ्गेषु मुखाद्यवयवेषु प्रत्येकं स्वीयस्वीयसौष्ठववशात्तरुणिमारोहवशाच्च चारुतां गतेषु प्राप्तेषु सत्सु परस्परेणैवान्योन्येनैव च विशेषेण भूषितेषु प्रत्येकं सौन्दर्ये सत्यप्यन्योन्यसाहचर्यवशात्करानुगुणौ भुजौ भुजानुगुणौ करावित्येकस्याङ्गस्यापरेण तस्य च तेनैव सर्वाङ्गयोग्याङ्गसामग्रीसंघट्टनात्सुन्दरतरेषु सत्सु तानि मनःशिलादितिलकादीन्यलंकरणानि किमूचिरे, अपि तु—स्वकरणप्रयोजनं न किंचिदूचुः । यत्तस्मात्तेषामलंकरणानां तत्पूर्वोक्तप्रकारं करणं निर्माणं वृथैव बभूव । दुःखवशान्न किंचिदूचुः, किमप्यधिकं न चकुरित्यर्थः । आश्रितत्वादनिराकार्यत्वेन स्थितान्येवेति भावः । यत्तेषां करणं तद्वृथैवाभूत । अत एव करणमलमित्यन्वयेन नाम साम्वयं जातमिति भावः । अलं वृथा करणं येषामिति बहुव्रीहिणापि सान्वयं जातमित्यर्थः । पूर्वमलंशब्दस्य भूषणार्थत्वम्, पश्चाद्प्रयोजकत्वाभिधित्सार्थमिति चेत्यर्थः । 'किमूहिरे' इति पाठे किमर्थं धृतानि न जाने इति शेष इति वा ॥

भूषणकान्युत्कर्षं वर्णयति—

क्रमाधिकामुत्तरमुत्तरं श्रियं
पुपोष यां भूषणचुम्बनैरियम् ।
'पुरः पुरस्तस्थुषि रामणीयके
तया बबाधेऽवधिबुद्धिधोरणिः ॥ ४९ ॥

क्रमेति ॥ इयं दमयन्ती भूषणचुम्बनैर्भूषणसंबन्धैः कृत्वा उत्तरमुत्तरं यथा स्यात्तथा अग्रेऽग्रे क्रमेण पूर्वभूषणापेक्षया उत्तरोत्तरभूषणेनाधिकामतिशयितां यां श्रियं पुपोष तयालंकारशोभया रामणीयके सौन्दर्ये पुरःपुरस्तस्थुषि स्थिरतरे सति अवधिबुद्धेरियत्तावुद्धेर्धोरणिः परम्परा बबाधे बाधिता । इतोऽन्यद्रामणीयकं नास्तीति यदि बुद्धिर्भवेत्, तदावधिर्भवेत् । पूर्वपूर्वरामणीयकेयत्ताबाधेन रामणीयकान्तरे पुरः पुरः स्फुरत्यवधिर्बाधित इत्यर्थः । तस्या भूषणशोभा निरवधिरभूदिति भावः । धोरणिरिति देश्यशब्दः ॥

मणीसनाथां मुकुरस्य मण्डले
बभौ निजास्यप्रतिबिम्बदर्शिनी ।

विधोरदूरं स्वमुखं विधाय सा
निरूपयन्तीव विशेषमेतयोः ॥ ५० ॥

मणीति ॥ मणीसनाभौ मौक्तिकादिरत्नतुल्येऽतिस्वच्छे मुकुरस्य मण्डले दर्पणतले पुनर्निजास्यस्य स्वमुखस्य दर्पणसंक्रान्तप्रतिबिम्बं पश्यतीत्येवंशीला दर्शिनी सा भैमी स्वमुखं विधोर्दर्पणरूपस्य, प्रतिबिम्बरूपस्य वा, चन्द्रस्यादूरं निकटवर्ति विधाय कृत्वा एतयोर्मुखचन्द्रयोर्विशेषं तारतम्यं निरूपयन्तीव विचारयन्तीव बभौ । संनिधौ हि विशेषः स्फुरति । बिम्बापेक्षया प्रतिबिम्बस्य न्यूनत्वात्तस्यैव चन्द्रत्वमिति विशेषो निरूपित इति भावः । भूषणानन्तरमादर्शविलोकनमिति जातिः । प्रतिबिम्बदर्शिनी, 'बहुलमाभीक्ष्ण्ये' इति णिनिः ॥

जितस्तदास्येन कलानिधिर्दधे
द्विचन्द्रधीसाक्षिकमायकायताम् ।
तथापि जिग्ये युगपत्सखीयुग-
प्रदर्शितादर्शबहूभविष्णुना ॥ ५१ ॥

जित इति ॥ तस्या आस्येन जितः कलानिधिश्चन्द्रो नेत्रविपटीकरणादिनिमित्ताद्वस्तुस्थितादर्शनिमित्ताद्वा द्वौ चन्द्राविति धीर्यस्य पुरुषस्य स एव साक्षी साक्षाद्द्रष्टा यस्याः सा माया यस्यैवंभूतः कायो यस्य चन्द्रस्य तस्य भावस्तत्ता तां दधे बभार । एकत्वाद्दृङ् भैमीमुखेन जित इति मायामयानेककायत्वं चन्द्रेण धृतमित्यर्थः । अत्र पूर्वोक्तप्रकारद्वयेन साक्षिणौ द्वौ चन्द्राविति बुद्धिरेव प्रमाणम् । कलानिधिपदेनानेकशिल्पजत्वान्मायिककायव्यूहनिर्माणकलामपि वेत्तीति सूचितम् । द्वाभ्यामेकजयस्य सुकरत्वात्करस्थितादर्शच्छलेनानेककायत्वं यद्यप्यङ्गीकृतम्, तथापि युगपत्समकालं सखीयुगेन प्रकर्षेण दर्शिताभ्यामादर्शाभ्यां कृत्वा तयोर्वा अबहुना एकेनापि बहुभविष्णुना बहुभवनशीलेन सता तन्मुखेन चन्द्रो जिग्ये जित एव । हस्तस्थदर्पणसहितसखीदर्पणद्वयप्रतिफलितमुखप्रतिबिम्बैः सह बिम्बभूतस्य मुखस्यानेकत्वान्मुखतुल्यदर्पणद्वयेन सह बिम्बभूतस्य मुखस्य स्वसदृशैरादर्शैः स्वप्रतिबिम्बैश्च सह वाऽनेकत्वात्पञ्चपैर्द्वयोर्विजयस्य सुकरत्वादित्यर्थः । पूर्वं शोभया जितोपि संख्याधिक्येन मुखं जेतुमारब्धवान्, तथापि मुखस्याधिकतरसंख्यत्वान्न शशाकेति भावः । 'बहूभविष्णुना' इति श्लिष्टः ॥

किमालियुग्मार्पितदर्पणद्वये
तदास्यमेकं बहु चान्यदम्बुजम् ।
हिमेषु निर्वाप्य निशासमाधिभि-
स्तदीयसालोक्यमितं व्यलोकयत ॥ ५२ ॥

किमिति ॥ आलियुग्मेनार्पिते दर्शिते दर्पणद्वये बहुषु बिम्बप्रतिबिम्बेषु मध्ये एकमेकसंख्यायोग्यम् । अथ च मुख्यम् । तदास्यं भैमीमुखम्, अन्यच्च हिमेषु शिशिरर्तुषु । अथ च काम्येषु केदारादिहिमेषु निर्वाप्य निर्वाणं(पं) विनाशम् । अथ च मोक्षम् । कृत्वा प्राप्येति यावत् । निशासमाधिभी रात्रिसंबन्धिभिः संकोचैः । अथच परमात्मदर्शनोपायैः । कृत्वा तदीयं भैमीमुखसंबन्धि सालोक्यं सादृश्यम् । अथ च सालोक्यलक्षणां मुक्तिम् । इतं प्राप्तं बहु अनेकमम्बुजं किं लोकैर्व्यलोक्यत । किमुत्प्रेक्षायाम् । भैमीमुखप्रतिबिम्बाग्निहीनत्वात्पद्मैः केदारादिहिमचूर्णनादितपस्तप्त्वा तन्मुखप्रतिबिम्बस्य समीपे स्थितानि किमित्यर्थः । पद्मेभ्यो मुखमधिकमिति भावः । अम्बुजमिति जात्येकवचनम् । निर्वपणं निर्वापस्तत्करोतीति ण्यन्तात्लुयपि निर्वाप्येति । हिमेष्वात्मानं विनाश्येत्यर्थः । सालोक्यं, 'समानस्य–' इति योगविभागात्सः ॥

पलाशदामेतिमिलच्छिलीमुखै-
र्वृता विभूषामणिरश्मिकार्मुकैः ।
अलक्षि लक्षैर्धनुषामसौ तदा
रतीशसर्वस्वतयाऽभिरक्षिता ॥ ५३ ॥

पलाशेति ॥ असौ भैमी पलाशानां किंशुकानां दाम माला इयमिति भ्रान्त्या मिलन्त आगच्छन्तः शिलीमुखा भ्रमरा यत्रैवंभूतैः । अथ च किंशुकानां धनुराकारत्वान्मिलद्गुणैः । विभूषामणीनां विशिष्टालंकारसंबन्धिमाणिक्यादिरत्नानां रश्मिरूपैः कार्मुकैरिन्द्रधनुर्भिर्वृता वेष्टिता सती तदा भूषणानन्तरकाले रतीशस्य कामस्य सर्वस्वतया परमधनत्वेन हेतुना धनुषां लक्षैर्लक्षसंख्यैर्धनुर्भिरभि सामस्त्येन रक्षितेव लोकैरलक्षि तर्किता । कुन्ताः प्रविशन्तीतिवत् धनुषां धनुर्धराणामित्यर्थः । कान्तिसाम्यान्मिश्रतया नलसर्वस्वं भैमीं कामो रक्षतीत्यर्थः ॥

विशेषतीर्थैरिव जह्नुनन्दिनी[1]
गुणैरिवाजानिकरागभूमिता ।
जगाम भाग्यैरिव नीतिरुज्वलै-
र्विभूषणैस्तत्सुषमा महार्घताम् ॥ ५४ ॥

विशेषेति ॥ तस्या भैम्याः सुषमा स्वाभाविकी परमा शोभा विभूषणैर्विशिष्टैर्भूषणैः कृत्वा महार्घतामतिश्रेष्ठ्यं जगाम । का कैरिव—जह्नुनन्दिनी स्वत एव श्रेष्ठाऽपि गङ्गा विशेषतीर्थैः प्रयागादिभिरिव । तथा—आजानिकरागभूमिता (जननं जनः न जनोऽजनः अजनेन निर्वृत्तः स्वभावेन संभूतः आजानिकः 'तेन निर्वृत्तम्' इति ठक् । जनेर्जन्मन आ आजनि, आजनि भवोऽध्यात्मादित्वाट्टञ् । इकादेशः । अनुशतिकादित्वादुभयपदवृद्धिः ।) आजानिकः सहजो रागः, तस्य भूमिः स्थानं पुत्रादिः, तस्य भावस्तत्ता सहजा स्नेहपात्रता गुणैः शीललावण्यादिभिरिव । तथा—नीतिः उज्वलैर्नीतिसाधितफलप्रतिबन्धनाशनात्प्रकाशैर्भाग्यैः पूर्वकृतशुभकर्मभिरिव भागीरथी सर्वत्र श्रेष्ठैव, परं प्रयागादौ माहात्म्यातिशयः । यत्रानुरागस्तत्र श्रैष्ठ्यम्, परं शीलादिनाऽनुरागस्य निरतिशयत्वम् । तथा—नीतिमार्गानुसरणं श्रेष्ठमेव, परं तूज्वलैर्भाग्यैरनुगृहीतं श्रेष्ठतरं भवतीत्यर्थः । मण्डनैस्तस्या निरतिशया शोभाऽभूदिति भावः । उज्वलैरित्युपमानोपमेयैः संबन्धनीयम् । अशुभकर्मणोपि भाग्यस्याभिधायकत्वात्तद्व्युदस्यर्थं भाग्यविशेषणमेव वा । उपमानत्रयेण क्रमेण पावित्र्यं, गुणवत्त्वं, भाग्यवत्त्वं च सूचितम् । विशिष्यन्ते विशेषाः पचाद्यच् (?) ॥

---

१ 'नन्दना नन्द्यादित्वाल्लघुप्रत्यये टाप्'—इति जीवातुः ।

नलात्स्ववैश्वस्त्यमनाप्तुमानता
नृपस्त्रियो भीममहोत्सवागताः ।
तदङ्गिलाक्षामदधन्त मङ्गलं
शिरःसु सिन्दूरमिव प्रियायुषे ॥ ५५ ॥

नलादिति ॥ नलात्सकाशात्स्वस्यात्मनो वैश्वस्त्यं वैधव्यमनाप्तुमप्राप्तुमानता भैमीचरणप्रणामप्रवणा भीमस्य कन्यास्वयंवररूपे महोत्सवे आकारिताः सत्य आगता नृपप्रिया अन्यराजमहिष्यः प्रियायुषे स्वप्राणेशचिरंजीवनाय मङ्गलरूपं सिन्दूरमिव स्वशिरःसु तस्या भैम्या अङ्घ्योश्चरणयोर्लाक्षामलक्तकमादधन्त अधारयन् । पत्युरायुर्वृद्धये अन्याः स्त्रियस्ता एव वा यथा शिरःसु सिन्दूरं धारयन्ति, तथा प्रणामप्रसक्तया भैम्या एतदीयाः प्राणेशा रक्षणीया इति प्रार्थितो नलः स्वप्राणेशान्रक्षिष्यतीति बुद्ध्या स्वभर्तृचिरजीवनाय भैमीचरणयोः प्रणामं कृतवत्य इति भावः । प्रणामादेव आर्द्रा लाक्षा लग्ना । 'विश्वस्ताविधवे समे' इत्यमरः । ब्राह्मणादित्वाद्वैश्वस्त्यम् । अदधन्त 'दध धारणे' लङि । 'हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलं तथा । कर्पासकं च ताम्बूलं माङ्गल्याभरणं शुभम् । केशसंस्कारकबरीकरकर्णविभूषणम् । भर्तुरायुष्यमिच्छन्ती तृतीयेन पतिव्रता' इति स्कान्दवचनम् ॥

अमोघभावेन सनाभितां गताः
प्रमन्नगीर्वाणवराक्षरस्रजाम् ।
ततः प्रणम्राधिजगाम सा ह्रिया
गुरुर्गुरुब्रह्मपतिव्रताशिषः ॥ ५६ ॥

अमोघेति ॥ ततो मण्डनानन्तरं प्रणम्रा कृतगुर्वादिचरणप्रणामा सती ह्रिया गुरुः । अधिकलज्जेत्यर्थः । सा भैमी गुर्वोः पूज्यतमयोः पित्रोः ब्रह्मणां ब्राह्मणानां, वाङ्मनःकायकर्मभिः पतिमभिचरन्तीनां पतिव्रतानां वृद्धशोभनसुवासिनीनां च अविधवा सुभगा अ(न)ष्टपुत्रा भवेति आशिषोऽधिजगामालभत । किंभूता आशिषः—अमोघभावेन सफलत्वेन प्रसन्नानां गीर्वाणानां देवानां पूर्वोक्ता वराक्षरसंबन्धिन्योऽक्षरस्रजो वर्णमालास्तासां सनाभितां बन्धुत्वं गताः प्राप्ताः सत्यत्वेन तत्तुल्याः ॥

तथैव तत्कालमथानुजीविभिः
प्रसाधनाभ्यञ्जनशिल्पपारगैः ।
निजस्य पाणिग्रहणक्षणोचिता
कृता नलस्यापि विभोर्विभूषणा ॥ ५७ ॥

तथैवेति ॥ तथैव भैम्या वेदिकोदरे यथा मङ्गलस्नानादि कृतम्, तेनैव प्रकारेण च तत्कालं तस्मिन्नेव काले अथ मङ्गलस्नानानन्तरं प्रसाधनाभ्यञ्जनं भूषणकरणं तत्संबन्धि शिल्पं विज्ञानकौशलं तस्य पारगैः (अ)शेषविशेषज्ञैः शृङ्गारिभिरनुजीविभिः सेवकैर्निजस्य स्वस्य विभोः स्वस्वामिनो नलस्यापि पाणिग्रहणक्षणोचिता विवाहकालयोग्या विवाहरूपोत्सवयोग्या वा विभूषणा कृता रचिता । निजस्येति स्वयं प्रवृत्तिः सूचिता । विभोरित्यविलम्बः सूचितः । भूषयतिश्रुरादिः तस्माद्युच् ॥

श्लोकद्वयेन केशप्रसाधनमाह—

नृपस्य तत्राधिकृताः पुनः पुन-
र्विचार्य तान्बन्धमवापिपन्कचान् ।
कलापलीलोपनिधिर्गरुत्यजः
स यैरपालापि कलापिसंपदः ॥ ५८ ॥

नृपस्येति ॥ तत्र केशप्रसाधने अधिकृता नापितादयः पुनः पुनर्विचार्य धूपजधूमसंशोषणपुरःसरं कङ्कतिकादिना प्रसाधनं कृत्वा । अथ च धूपजधूमस्यापि विद्यमानत्वात्पुनःपुनस्तद्भ्रान्तिवशात् एते केशा एव, न धूम इति चिराच्निश्चित्य । कानि पुष्पाणि कुत्र स्थाप्यानीति योग्यायोग्यभावं विचार्य वा नृपस्य तान्कचान्बन्धभिल्लादिरचनाविशेषग्रन्थिरूपं बन्धमवापिपन्प्रापयामासुः । तान्कचान्—यैः कचैः शरदि गरुतः पक्षान्त्यजति गरुत्यक् तस्य कलापिसङ्घस्य संबन्धी कलापलीलोपनिधिः कलापलीलाया उपनिधिः साम्यमपालापि आच्छादितः । तदपेक्षयाऽधिकैर्जातमित्यर्थः । कलापलीलारूपो य उपनिधिः कविसमयसिद्धः प्रतिनिधिः स यैराच्छादि । जित इवेत्यर्थ इति वा । नलकेशैर्विलासस्य गृहीतत्वान्निर्विलासतया निरर्थकं बर्हभारं त्यजतीति सूचनाद् गरुत्यज इति पदं साभिप्रायम् । यैः केशैः पक्षत्यागिन्या मयूरसंहतेः कलापशोभानिक्षेप अपालापि गृहीत्वा नास्तीत्यपलापितः यः परस्य निक्षेपं गृहीत्वा न दत्ते पर प्रतारयति स राज्ञोऽधिकृतैः पुरुषैः पश्चाद्दृष्ट्वा शिक्षणीयो भवति । मयूराः शरदि पक्षान्मुञ्चन्ति । 'पुमानुपनिधिर्न्यासः' इत्यमरः । अवापिपन् आप्नोतेर्ण्यन्तालुङि द्वितीयस्यैकाचो ह्रस्वम् । गत्यर्थत्वादणौ कर्तुर्णौ कर्मत्वम् । 'अलम्भयन्' इति च पाठः ॥[1]

पतत्रिणां द्राघिमशालिना धनु-
र्गुणेन संयोगजुषां मनोभुवः ।
कचेन तस्यार्जितमार्जनश्रिया
समेत्य सौभाग्यमलम्भि कुङ्कलैः ॥ ५९ ॥

पतत्रिणामिति ॥ अर्जिता लब्धा मार्जनश्रीरभ्यङ्गजनिता स्निग्धशोभा येन । तथा—द्राघिम्नातिदीर्घत्वेन शालते एवंशीलेन । तस्य अलस्य कचेन केशपाशेन सह समेत्य संबन्धं प्राप्य कुङ्कलैर्मल्लिकादिकोरकैः कर्तृभिः द्राघिमशालिना तथार्जितमार्जनश्रिया पुनःपुनरङ्गुल्यादिना धूपणालब्धमार्जनसंबन्धिस्निग्धशोभेन भ्रमरमालारूपेण धनुर्गुणेन संयोगजुषां सहितानां मनोभुवः कामस्य पतत्रिणां बाणानां सौभाग्यं सादृश्यमलम्भि । केशपाशस्य भ्रमरमालारूपेण कामधनुर्गुणेन साम्यम् , कोरकाणां च पुष्परूपैर्बाणैः, नलस्य च कामेनेत्यर्थः । अतिविशालनीलतरकलिकालंकृतनलकेशपाशदर्शनमात्रेण भैमी कामवशा भवितेति भावः । कचेन जात्येकवचनम् ॥

मूर्धप्रसाधनमाह—

अनर्घरत्नौघमयेन मण्डितो
रराज राजा मुकुटेन मूर्धनि ।

[1] 'अवापयन्' इति पाठः सुखावबोधाय्यः ।

वनीपकानां स हि कल्पभूरुह-
स्ततो विमुञ्चन्निव मञ्जुमञ्जरीम् ॥ ६० ॥

अनर्घ्येति ॥ अनर्घ्यरत्नौघमयेनामूल्यदिव्यमाणिक्यादिरत्नघटितेन मुकुटेन मूर्ध्नि मण्डितो राजा स नलो हि यस्माद्वनीपकानां याचकानामतिधनदानात्कल्पभूरुहः कल्पवृक्षः, ततो हेतोर्मञ्जुमञ्जरीं कल्पवृक्षत्वोचितां रम्यां रत्नाङ्कुरपरम्परां विमुञ्चन्मुद्गिरन्निव रराज। वृक्षो हि बालपल्लवपुष्पफलयुक्तां मञ्जरीमुद्गिरति। कल्पवृक्षस्य च मञ्जरी रत्नफलत्वाद्रत्नमयी। मञ्जरीस्थाने मुकुटः, तत्किरणा वा। मञ्जर्याकारा मुकुटमणिकिरणा ऊर्ध्वं निर्गच्छन्तीत्यर्थः। अर्घमर्हतीत्यर्थे दण्डादित्वाद्यत्। 'मञ्जरीः' इति च पाठः ॥

भालप्रसाधनमाह—

नलस्य भाले मणिवीरपट्टिका-
निभेन लग्नः परिधिर्विधोर्बभौ।
तदा शशाङ्काधिकरूपतां गते
तदानने मातुमशक्नुवन्निव ॥ ६१ ॥

नलस्येति ॥ रत्नखचितायाः वीरसंबन्धिन्याः वीरपुरुषधार्यायाः वीरपट्टिकानाम्न्याः चाल्यातायाः सुवर्णपट्टिकायाः श्रवणयुगपश्चाद्भागमात्रव्यापिन्याः निभेन व्याजेन नलस्य भाले ललाटे लग्नः सन् विधोश्चन्द्रस्य परिधिः परिवेषो बभौ। मुखचन्द्रेऽपि चेत्परिवेषः, संपूर्णमण्डलः किमिति न दृश्यत इत्यत आह—किं कुर्वन्निव। तदा प्रियासंगमकाले भूषणकाले च हर्षवशाद्भूषणवशाच्च शशाङ्काधिरूपतां चन्द्रापेक्षयाधिकसौन्दर्यम्। अथच—अधिकपरिमाणत्वं गते प्राप्ते तदानने मातुं तुल्यप्रमाणतां च प्राप्तुमशक्नुवन्निव। अल्पपरिमाणस्य यदलंकरणं तदधिकपरिमाणस्यैकदेश एव तिष्ठति नतु सर्वं मण्डयितुं शक्नोति। तस्मान्मुखैकदेशो भाल एव परिधिः स्थित इति युक्तमिति भावः। मणिकिरणानां मण्डलाकारत्वेन पट्टिकायाः परिवेषाकारत्वं युक्तम्। 'अशक्तिमुद्वहन्' इति च पाठः ॥

श्लोकत्रयेण तिलकं वर्णयति—

बभूव भैम्याः खलु मानसौकसं
जिघांसतो धैर्यभरं मनोभुवः।
उपभ्रु तद्वर्तुलचित्ररूपिणी
धनुःसमीपे गुलिकेव संभृता ॥ ६२ ॥

बभूवेति ॥ मनोभुवो धनुःसमीपे संभूता सञ्जीकृता उपभ्रु भ्रुवोः समीपे तस्य नलस्य वर्तुलं चित्रं तिलकस्तद्रूपिणी गुलिकेव मृण्मयो गोलक इव बभूव। किंभूतस्य—भैम्या मानसौकसं। मनसि धैर्यभरं धैर्यबाहुल्यं अथच धैर्यभरमेव। मानससरोनिवासिनं हंसम्। पक्षित्वान्न विद्यते धैर्यभरो यस्यैवंविधं वा। हंसं जिघांसतो हन्तुमिच्छतः। भ्रुवो कामधनुष्त्वम्, तिलकस्य च गुलिकात्वम्। भ्रूसमीपस्थितवर्तुलतिलकदर्शनमात्रेण भैमी कामवशा भविष्यतीति भावः। अन्योपि हंसं हन्तुमिच्छन्क्षत्रियो धनुषि गुलिकां संधत्ते। 'राज्ञश्च तिलको वृत्तो वर्तुलो नृपवैद्ययोः' इति वचनात्। मानसौकस्त्वोत्प्रेक्षायां खलु। 'चित्रं स्यादद्भुतालेख्यतिलकेषु' इति विश्वः। चित्रं च तद्रूपं चेति कर्मधारयादिनिर्वा। 'चित्ररूपता' इति पाठः। तिलकस्वरूपेत्यर्थः ॥

अचुम्बि या चन्दनबिन्दुमण्डली
नलीयवक्त्रेण सरोजतर्जिना।
श्रियं श्रिता काचन तारकासखी
कृता शशाङ्कस्य तयाङ्कवर्तिनी ॥ ६३ ॥

अचुम्बीति ॥ वृत्तत्वादिना गुणेन सरोजतर्जिना कमलजैत्रेण तदधिकेन। अथ च कमलतर्जनवशादेव चन्द्ररूपेण नलीयेन वक्त्रेण या चन्दनबिन्दुमण्डली मण्डलाकारश्चन्दनतिलकोऽचुम्बि धृता। तया चन्दनबिन्दुमण्डल्या चन्दनस्यैव सखीं श्रियं श्रिता सलक्ष्मीका काचन रोहिण्यादिमध्ये तारका शशाङ्कस्याङ्कवर्तिनी मध्यवर्तिनी कृता। तया चन्द्रमध्यवर्तिनी काचन सश्रीका स्वस्य सखी सहचरी कृता। सा तत्तुल्या जातेत्यर्थ इति वा। का च कापि तारका असखी न कृता, किंतु या काचन चन्द्राङ्कवर्तिनी भवेत्, सा सर्वापि सख्येव कृतेति वा। सरोजतर्जिनश्चन्द्रस्य मध्यवर्तिनी रोहिण्यादिर्यदि भवेत्, तर्हि चन्दनवृत्ततिलकयुक्तः सरोजतर्जी नलमुखचन्द्रस्तत्तुल्यो भवेत्, नत्वेवमित्यर्थः। तदा तन्मुखं पद्मचन्द्राभ्यामधिकतमं जातमिति भावः। 'कांचन' इति पाठेऽतिशयितश्रियं श्रिता ॥

न यावदग्निभ्रममेत्युदूढतां
नलस्य भैमीति हरेर्दुराशया।
स बिन्दुरिन्दुः प्रहितः किमस्य सा
न वेति भाले पठितुं लिपीमिव ॥ ६४ ॥

नेति ॥ हरेरिन्द्रस्य इति एवंरूपया दुराशयानुपद्यमानासंभावितचिन्तया 'अस्य नलस्य भाले ललाटे सा भैमी किमस्ति न वा' इति संदेहरूपां ब्राह्मीं लिपीमक्षरपङ्क्तिं संदेहनिरासाय स्पष्टं पठितुं वाचयितुं स चन्दनतिलकबिन्दुरेव इन्दुश्चन्द्रः प्रहितः प्रेषित इवेत्युत्प्रेक्षा। इति किम्—भैमी यावदग्निभ्रममग्निप्रदक्षिणीकरणपर्यन्तं नलस्योदूढतां परिणीततां भार्यात्वं न एति गच्छतीति। यद्यपि स्वयंवरो जातः, तथापि यावत्सप्तपदी नास्ति तावद्भैमी नलस्य भार्या न भवतीति दुराशया स बिन्दुश्चन्द्र एव प्रहितः किम्। 'पतित्वं सप्तमे पदे' इति स्मृतिप्रामाण्याद्यावदग्निभ्रमणं नास्ति तावद्भैमी नलसत्तां नैति। ब्रह्मलिपेर्निश्चयं चन्द्रद्वारा बुद्ध्वा तत्प्राप्त्यर्थं वयं प्रयतामह इति दुराशया लिपिवाचनार्थं प्रेषितश्चन्द्रो ललाटे स्थितः। चन्द्र इव तिलको रेज इति भावः। 'यावदग्निभ्रमम्' अव्ययीभावः। लिपी, 'कृदिकारात्-' इतीकारः ॥

कर्णभूषणं वर्णयति—

कपोलपालीजनिजानुबिम्बयोः
समागमात्कुण्डलमण्डलद्वयी।
नलस्य तत्कालमवाप चित्तभू-
रथस्फुरच्चक्रचतुष्कचारुताम् ॥ ६५ ॥

कपोलेति ॥ तत्कालं तस्मिन्मण्डनसमये नलस्य कुण्डलमण्ड-

लद्वयी कर्णभूषणीभूतमण्डलाकारकुण्डलद्वयी कपोलपाल्यां प्रशस्तातिस्वच्छनलकपोलयुगे जातौ निजौ स्वीयावनुबिम्बौ तयोः समागमात्संबन्धाद्धेतोश्चित्तभूरथे कामरथे स्फुरल्लसच्चक्रचतुष्कं तस्य चारुतां सौन्दर्यमवाप । रथश्चतुश्चक्रो भवति । पाली फलकम् । चतुष्कं परिमाणोपाधिके सङ्घार्थे 'संख्यायाः संज्ञासङ्घ–' इति कन् । तत्र प्राणिसङ्घे यद्यपि प्रत्ययः, तथाप्यत्रौपचारिकः प्रयोगः ॥

श्रितास्य कण्ठं गुरुविप्रवन्दना-
द्विनम्रमौलेश्चिबुकाग्रचुम्बिनी ।
अवाप मुक्तावलिरास्यचन्द्रमः-
स्रवत्सुधातुन्दिलबिन्दुवृन्दताम् ॥ ६६ ॥

श्रितेति ॥ अस्य कण्ठे श्रिता मुक्तावलिर्मौक्तिकहारलता आस्यमेव चन्द्रमास्तस्मात्स्रवन्ती सुधा तस्यास्तुन्दिलं स्थूलं बिन्दुवृन्दं तस्य भावस्तत्ता तामवाप । किंभूतस्य—गुरूणां पित्रादीनां विप्राणां च वन्दनया विनम्रो मौलिर्यस्य । अत एव । किंभूता हारलता—चुबुकाग्रचुम्बिनी हन्वग्रस्पर्शिनी । मुक्तानां स्थूलत्वं वर्तुलत्वं च सूचितम् । पूर्णचन्द्रदर्शनवन्नलदर्शनाद्गुर्वादीनां प्रीतिर्जातेति भावः ॥

श्लोकत्रयेण भुजभूषण वर्णयति—

यतोऽजनि श्रीर्बलवान्बलं द्विष-
न्बभूव यस्याजिषु वारणेन सः ।
अपूपुरत्तान्कमलार्थिनो घना-
न्समुद्रभावं स बभार तद्भुजः ॥ ६७ ॥

यत इति ॥ स तद्भुजो नलभुजो मुद्राभिरङ्गुलीयकैः सहितः समुद्रस्तस्य भावम् । अथ च दण्ड्यदण्डनादिराजधर्मपरिपालनान्मुद्रा नियमस्तत्साहित्यम् । बभार भेजे । ऊर्मिका दधारेति भावः । स कः—यतो यस्माद्भुजाद्धेतोः श्रीः शोभा राज्यलक्ष्मीर्वा । अजन्युत्पन्ना । तथा—आजिषु यस्य भुजस्य वारणेन यत्कर्तृकेण शत्रुविमर्दनेन कृत्वा बलं शत्रुसैन्यं द्विषन्पराभावुकः सन् स नलो बलवानुत्साहयुक्तः शक्तियुक्तो वा बभूव । यत्कृतनिवारणेन बलवान्सन् शत्रुसैन्यं पराभावुकोऽभूदिति वा । वाशब्दश्चार्थे । ततश्च—आजिषु बलं द्विषन्स नलो यस्य च यत्कर्तृकेण रणेन सङ्ग्रामेण बलवानभूदिति वा । शत्रुसैन्यं द्विषन्स प्रसिद्धोऽतिबलोऽपि शत्रुः सङ्ग्रामेषु यस्य कर्मभूतस्य वारणे निराकरणे बलवान्न बभूवेति वा । आजिषु बलं द्विषन्स प्रसिद्धः शत्रुर्यस्य सङ्ग्रामे विषये बलवान्नाभूदिति वा । वारणानामिनः स्वामी वारणेनश्चासौ स चातिप्रसिद्ध ऐरावतः स वारणेनसो यस्य नलभुजस्य बलं द्विषन्यद्बलेन सह स्पर्धमानः सङ्ग्रामेषु बलवानभूत् । हीनबलोऽप्युत्तमैतद्भुजबलस्पर्धया बलवत्त्वप्रतिष्ठां लेभे । 'वरं विरोधोऽपि समं महात्मभिः' इति न्यायादिति भावः । सङ्ग्रामेषु बलं दैत्यं पराभावुकः स इन्द्रोऽपि यस्याजिषु येन भुजेन सह सङ्ग्रामे बलवान्नाभूत् । इन्द्रादप्ययं बलीति भाव इति वा । वबयोरभेदाद्वलनं बलः पलायनं तद्वान् । सङ्ग्रामे यत्कृतेन निवारणेन स बलारातिरपि बलवान्पलायनपरोऽभूत्, न तु स्थातुं शक्त इति वा । यः करस्तानतिप्रसिद्धान्घनान्बहून्कमलां लक्ष्मीमर्थयन्त एवशीलान्याचकानपूपुरत्पूर्णीचकार । अतिवदान्य इत्यर्थः । बहून्सुन्दरवधूकाङ्क्षिणो वरान्यः पपार । बहवो ब्राह्मणा येन विवाहिता इत्यर्थ इति वा । अथ च—सागरत्वं भेजे । यस्मात्सागराल्लक्ष्मीर्जाता । यदुत्पन्नेन वारणेनैरावताख्येन स बलारातिराजिषु बलवानभूत् । यश्च वृष्ट्यर्थं जलाभिलाषिणो मेघान्पूरयति । रामनामाद्यङ्किता मुद्रोक्ता । 'यदुद्गता', 'पपार यस्तान्' इति वा पाठः । 'सलिलं कमलं जलम्' इत्यमरः । 'कमला श्रीवरश्रियोः' इति विश्वः । वलनं वलः । घञर्थे कविधानात्कः । अपूपुरदिति पूरयतेर्लुङि 'णौ चङि–' इति ह्रस्वे 'दीर्घो लघोः' इत्यभ्यासस्य दीर्घः । पपार, पधातोः पूरणार्थाल्लिट् । इत्वं (उत्वं) बाधित्वा परत्वाद्वृद्धिः ॥

कृतार्थयन्नर्थिजनाननारतं
बभूव तस्यामरभूरुहः करः ।
तदीयमूले निहितं द्वितीयव-
द्ध्रुवं दधे कङ्कणमालवालताम् ॥ ६८ ॥

कृतेति ॥ तस्य करोऽमरभूरुहः कल्पवृक्षो यतो बभूव । किं कुर्वन्—अर्थिजनान्याचकलोकान्बहुधनदानादनारतं सदा कृतार्थयन्प्राप्तप्रयोजनान्कुर्वन् । तस्मान्मणिबन्धरूपे तदीयकरमूले निहितं स्थापितं द्वितीयवद्द्वितीयेन वैवाहिकेन सूत्रमयेन माङ्गलिकेन कङ्कणेन युक्तं सौवर्णं कङ्कणमालवालतां दधे । तदीयकरकल्पतरोः कङ्कणमालवालस्थाने जातमित्यर्थः । वृक्षमूले आलवालद्वयं भवति । मिलितमुद्रिकाद्वयवद्द्वयोर्मिलितयोर्घटनाद्द्वितीयवदिति वा । ध्रुवमुत्प्रेक्षायाम् । 'विनिवेशितं तदा' इति पाठः साधुः ॥

रराज दोर्मण्डनमण्डलीजुषोः
स वज्रमाणिक्यसितारुणत्विषोः ।
मिषेण वर्षन्दशदिङ्मुखोन्मुखौ
यशःप्रतापाववनीजयार्जितौ ॥ ६९ ॥

रराजेति ॥ स नलो रराज । किं कुर्वन्निव—दोर्मण्डनं बाहुभूषणं तस्य मण्डली श्रेणी तां जुषेते इति जुषौ तयोरङ्गदादिवर्तुलबाहुभूषणाश्रययोर्वज्रमाणिक्यानां क्रमेण सितारुणत्विषोः श्वेतरक्तदीप्त्योर्मिषेण ऊर्ध्वाधोदिक्सहितप्राच्यादिदशदिङ्मुखानामुन्मुखौ तत्र प्रसरन्ताववनीजयेनार्जितौ क्रमेण यशःप्रतापौ वर्षन्प्रसारयन्निव । हीरकमाणिक्यानां मण्डनाश्रितत्वात्तद्दीप्त्योरपि मण्डनाश्रितत्वं युक्तम् । यशःप्रतापौ सितरक्तशोभाविति कविसंकेतः । इवाध्याहारः ॥

घने समस्तापघनावलम्बिनां
विभूषणानां मणिमण्डले नलः ।
स्वरूपरेखामवलोक्य निष्फली-
चकार सेवाचणदर्पणार्पणम् ॥ ७० ॥

---

१ अत्र 'त्विषोर्मिषेण इति छलादिपदैरसत्यत्वप्रतिरूपोऽपह्नवालङ्कारभेदः तस्य यथासंख्यद्वयभेदेन संकरः । 'वर्षन्निव' इत्युत्प्रेक्षावगम्यते । सा च सापह्नवेति संकरः' इति जीवातुः ।

घन इति ॥ नलः समस्ता येऽपघना हस्तमस्तकाद्यङ्गानि तानवलम्बन्त एवंशीलानि तत्र स्थितानि तेषां विभूषणानां घने सान्द्रे मणिमण्डले रत्नसङ्घे स्वरूपस्य स्वाकारस्य रेखां परमां शोभां स्वलावण्यपरमां मर्यादां वावलोक्य सेवया वित्ताः प्रसिद्धाः सेवाचतुरा नापितादयस्तेषां दर्पणार्पणां प्रतिबिम्बदर्शनार्थं मुकुरार्पणां निष्फलीचकार । आदर्शकृत्यस्य रत्नैरेव कृतत्वादिति भावः । मङ्गलमादर्श इति बुद्ध्या तैर्दर्पण आनीतः । तेन च विलोकित इति तेषां सेवाचातुर्यम् । सेवाचणेति 'तेन वित्तः–' इति चणप् ॥

व्यलोकि लोकेन न केवलं चल-
न्मुदा तदीयाभरणार्पणाद्युतिः ।
अदर्शि विस्तारितरत्नलोचनैः
परस्परेणेव[2] विभूषणैरपि ॥ ७१ ॥

व्यलोकीति ॥ चलन्ती व्याघुट्योत्पाद्यमाना मुद्यस्य तेन निरन्तरहर्षेण लोकेन तदीयानां नलीयानामाभरणानामर्पणाद्युतिः संस्थानविशेषे स्थापनजनिता शोभा केवलं न व्यलोकि किंतु विस्फारितानि प्रसारितकिरणानि रत्नान्येव लोचनानि येषामेवंविधैः । विस्फारितैः रत्नलोचनैः कृत्वा वा । अचेतनैर्विभूषणैरपि परस्परेणान्योन्यस्य द्युतिरदर्शीव विलोकितेव । अन्योन्यशोभाविलोकनार्थमचेतनैरपि तैर्नेत्राणि प्रसारितानीत्यर्थः । आभरणशोभा सर्वैर्विलोकिता । मण्डनमात्रं च खचितरत्नमित्यर्थः[3] ॥

ततोऽनु वार्ष्णेयनियन्तृकं रथं
युधि क्षितारिक्षितिभृज्जयद्रथः ।
नृपः पृथामूनुरिवाधिरूढवा-
न्सजन्ययात्रामुदितः किरीटवान् ॥ ७२ ॥

तत इति ॥ ततो भूषणधारणादनु पश्चात्स नलो नृपो वार्ष्णेयनामा नियन्ता सारथिर्यस्य । अथच—कृष्णः सारथिर्यस्य । तं रथं किरीटवान्सहजकिरीटयोगात्किरीटिनामा पृथासूनुरर्जुन इवारूढवान् । किंभूतो नलोऽर्जुनश्च—युधि क्षिता भङ्गं प्रापिता अरिक्षितिभृतां वैरिनृपाणां जयन्तो जयदातारोऽपि रथा येन । क्षितवैरिनृपश्चासौ जयद्रथो यस्येति वा । क्षिता वैरिनृपाणां जयन्तो रथा लक्षणया अर्शआदित्वाद्वा महारथानिरथार्धरथप्रमुखा योधा येनेति वा । अर्जुनपक्षे—युद्धे हतोऽभिमन्युवधादरिः शत्रुभूतः क्षितिभृद्राजा जयद्रथो येन । क्षितोऽरीणां कौरवाणां संबन्धी राजा जयद्रथो येनेति वा । तथा—जनीं वधूमर्हति जन्यो वरस्तत्संबन्धिन्यां यात्रायां मुदितो हृष्टः । जन्या वरपक्षीयास्तैः सह यात्रया वा हृष्टः । अथच—युद्धसंबन्धिन्यां विजययात्रायां हृष्टः । तथा—मुकुटेन मण्डितः । वरयात्रार्थं निर्गत इत्यर्थः । वार्ष्णेयः, वृष्णेरपत्यम्, 'इतश्चानिञः' इति ढक् । नियन्तृकम्, 'नप्तृतश्च' इति कप् ॥

इदानीं वरसंदर्शनार्थं पुरनारीसंभ्रममाह—

विदर्भनाम्नस्त्रिदिवस्य वीक्षितुं
रसोदयादप्सरसस्तमुज्वलम् ।
गृहाद्गृहादेत्य धृतप्रसाधना
व्यराजयन्राजपथानथाधिकम् ॥ ७३ ॥

विदर्भेति ॥ अथ रथारोहणानन्तरं विदर्भेति नाम्नस्त्रिदिवस्य कुण्डिनरूपस्य स्वर्गस्याप्सरसः सुन्दरनार्य एव स्वर्वेश्या उज्ज्वलं प्रकाशमानं मूर्तं शृङ्गाररूपं वा तं नलं रसोदयाद्दर्शना(द)नुरागाभिवृद्धिहेतोर्वीक्षितुं विशेषेण द्रष्टुं धृतप्रसाधना धृतालंकाराः सत्यो गृहाद्गेहादेत्यागत्य निसर्गरम्यान्राजपथानधिकं नितरां व्यराजयन् । तद्योगात्तेऽप्यधिकं शुशुभिर इत्यर्थः । तासामतिसौन्दर्यमुक्तम् । सर्वा अपि तद्दर्शनार्थमागता इति भावः ॥

अजानती कापि विलोकनोत्सुका
समीरधूतार्धमपि स्तनांशुकम् ।
कुचेन तस्मै चलतेऽकरोत्पुरः
पुराङ्गना मङ्गलकुम्भसंभृतिम् ॥ ७४ ॥

अजानतीति ॥ नलस्य विलोकनोत्सुका अत एव समीरणेन धूतार्धं कम्पितार्धमपि स्तनांशुकं चोलकाख्यं कुचावरणवस्त्रमजानत्यनावृण्वती कापि पुराङ्गना चलते वरयात्रोन्मुखाय तस्मै नलाय पुरोऽग्रभागे कुचेन कृत्वा मङ्गलकुम्भस्य शुभसूचकशकुनरूपपूर्णकुम्भस्य संभृतिं संभारमुपदामकरोत् । समीरधूत इत्यनेनाचेतनस्याप्यनुरागोत्पादना, कुचस्यातिसौन्दर्यमिति च व्यज्यते । वरस्य च पुरः पूर्णकलशदर्शनं शुभाय भवति । तस्मै 'क्रियया यमभिप्रैति स संप्रदानम्' इति संप्रदानत्वम् ॥

सखीं नलं दर्शयमानयाङ्कतो
जवादुदस्तस्य करस्य कङ्कणे ।
विपज्य हारैस्त्रुटितैरतर्कितैः
कृतं कयापि क्षणलाजमोक्षणम् ॥ ७५ ॥

सखीमिति ॥ सोऽयं नलः समागच्छतीत्येवं करेण सखीं नलं दर्शयमानया दर्शयन्त्या कयापि प्रदर्शनार्थमेवाङ्कत उत्सङ्गात्सकाशाज्जवाद्वेगादुदस्तस्योत्क्षिप्तस्य करस्य सुवर्णहीरकधारातीक्ष्णाग्रभागे कङ्कणाख्ये भूषणे विपज्य वेगाभिघातवशाल्लगित्वा त्रुटितैश्छिन्नैर्हारैर्नलविलोकनरसादतर्कितैरज्ञातविच्छेदाधःपतनैर्हारैस्तदीयमुक्ताफलैः कृत्वा क्षणं क्षणमात्रम् । क्षण उत्सवस्तत्संबन्धि वा । लाजमोक्षणं कृतम् । अन्यरमणीनिरन्तरक्रियमाणलाजमोक्षणमध्ये मौक्तिकमोक्षणमपि क्षणं तद्भ्रमकार्यभूदित्यर्थः । दर्शयमानया, 'णिचश्च' इति कर्त्रभिप्राये क्रियाफले शानचि 'हृक्रोरन्यतरस्याम्' इत्यत्र 'अभिवादिदृशोरात्मनेपदे च' इति वक्तव्याद्धिकर्मकत्वात्सखीमिति कर्मत्वम् । 'सखीः' इति च पाठः ॥

लसन्नखादर्शमुखाम्बुजस्मित-
प्रसूनवाणीमधुपाणिपल्लवम् ।

---

१ 'अत्र समाप्त्यलंकारः' इति **जीवातुः** । २ 'परस्परेणेव' इति पाठे लुप्तोत्प्रेक्षा इति **सुखावबोधा** । ३ 'अर्थापत्तिरलंकारः । सा 'रत्नलोचन' इति रूपकोत्थेति संकरः । तेन 'विभूषणानि रत्नलोचनैरन्योन्य पश्यन्तीवादृश्यन्त' इत्युत्प्रेक्षा व्यज्यते' इति **जीवातुः** । ४ टीकापुस्तकेषु 'क्षताः' इत्येव पाठः । तथापि प्राचीनमूलपुस्तकस्थ 'क्षिता' इति पाठानुरोधादित्थं कृतम् ।

यियासतस्तस्य नृपस्य जज्ञिरे
प्रशस्तवस्तूनि तदेव यौवतम् ॥ ७६ ॥

लसदिति ॥ तद्युवतीनां समूहो यौवतमेव यियासतो वरयात्रोन्मुखस्य तस्य नृपस्य प्रशस्तवस्तूनि शुभसूचकमङ्गलद्रव्याणि जज्ञिरे । किंभूतम्—नखा एवादर्शाः, मुखान्येवाम्बुजानि, स्मितान्येव प्रसूनानि पुष्पाणि, वाण्य एव मधूनि, पाणय एव पल्लवानि, इतरेतरयोगः समाहारो वा । लसन्तः स्फुरत्कान्तयो नखादर्शादयो यस्य तत् । एवंविधपुरनारीदर्शनाद्भैमीपाणिग्रहो नितरां मम शुभायैव भवितेति तस्य बुद्धिरभूदिति भावः । अतिसौन्दर्यं तासां सूचितम् । 'दध्याज्यादर्शादिदर्शनं शुभावहम्' इति वसन्तराजग्रन्थे ज्ञातव्यम् । आरोप्यमाणस्य प्राधान्याज्जज्ञिरे इति बहुवचनम् ॥

करस्थताम्बूलजिघत्सुरेकिका
विलोकनैकाग्रविलोचनोत्पला ।
मुखे निचिक्षेप मुखद्विराजता
रुषेव लीलाकमलं विलासिनी ॥ ७७ ॥

करेति ॥ एकिका कापि विलासिनी पुरनारी करस्थं ताम्बूलं जिघत्सुर्भक्षयितुमिच्छुः सती करस्थं लीलाकमलं मुखे निचिक्षेप । यतो नलविलोकने विषये एकाग्रे तत्परे विलोचनोत्पले यस्याः सा । ताम्बूलभ्रान्त्या कमलं मुखे निक्षिप्तमित्यर्थः । कयेव—मुखलक्षणे राजनि विद्यमाने कमलस्य द्वितीया राजता तया जाता या रुट् क्रोधस्तयेव । उत्तमेन मन्मुखेन सहैतत्स्पर्धत इति क्रोधादिव मुखे कमलं निक्षिप्तमित्यर्थः । नलसौन्दर्यातिशयदर्शनेन विमनस्कतोक्ता । जिघत्सुः, 'लुङ्सनोर्घस्लृ' इत्यदेर्घस्लादेशे, 'घस्लृ अदने' इत्येतस्माद्वा सन्नन्तादुः । 'न लोका-' इति षष्ठीनिषेधात्ताम्बूलं जिघत्सुरिति (द्वितीयायाम्) 'द्वितीया' इति योगविभागात्समासः ॥

कयापि वीक्षाविमनस्कलोचने
समाज एवोपपतेः समीयुषः ।
घनं सविघ्नं परिरम्भसाहसै-
स्तदा तदालोकनमन्वभूयत ॥ ७८ ॥

कयेति ॥ कयापि स्वैरिण्या वीक्षया नलदर्शनेन विमनस्के त्यक्तविषयान्तरे लोचने यस्यास्मिन्समाजे जनसङ्घ एव समीयुषः समागतस्योपपतेर्जारस्य परिरम्भ आलिङ्गनविषये साहसैर्निर्विचारनिर्भयप्रवर्तनैः कृत्वा तदा नलविलोकनसमये तदालोकनं नलदर्शनं घनं नितरां सविघ्नं यथा तथान्वभूयतानुभूतम् । जारकर्तृकैर्जारकर्मकैर्वा आलिङ्गनैर्व्यवधानात्तया नलः सम्यङ्नादर्शीत्यर्थः । तदा तदा कदाचित्कदाचित् (प्रकृतत्वान्नलस्य) आलोकनं कृतम्, न तु निरन्तरमिति वा । देवयात्रावरयात्रादिको जारादीनां कामशास्त्रे समय उक्तः ॥

दिदृक्षुरन्या विनिमेषवीक्षणां
नृणामयोग्यां दधती तनुश्रियम् ।
पदाग्रमात्रेण यदस्पृशन्महीं
न तावता केवलमप्सरोऽभूत् ॥ ७९ ॥

दिदृक्षुरिति ॥ नलं दिदृक्षुः, अत एव दर्शनानुरागवशेन विगतपक्ष्मसंकोचे वीक्षणे विशिष्टे नेत्रे यस्याः सा । तथा—नृणां भूलोकवासिनामयोग्यां दिव्यां तनुश्रियं दधती अन्या काचिन्नारी इत्थं प्राप्तदेवाङ्गनासाम्यापि दर्शनौत्सुक्यात्पदाग्रमात्रेणैव यद्यस्मान्महीमस्पृशत्तावता केवलं तावन्मात्रेणैव नाप्सरोऽभवत् । अप्सरसोप्यनिमेषनेत्रा मनुष्यानर्हा देवैकभोग्यां कायकान्तिं बिभ्राणाः केवलं पदैकदेशेनापि भूमिं न स्पृशन्ति । इयं तु निर्निमेषदर्शनोत्सुकतयाङ्गुष्ठादिमात्रेण स्पृशती तेनैव धर्मेण तत्तुल्या नाभूत् । अन्यत्सर्वं सादृश्यमेवेत्यर्थः । अप्सरोभवदिति च्विः । अप्सरःशब्दस्य बहुत्वेपि अन्या इत्यपेक्षयाभवदित्येकवचनमपि युक्तम् । 'आपः सुमनसो वर्षा अप्सरः सिकतासमाः । एताः स्त्रियां बहुत्वे स्युरेकत्वेऽप्युत्तरं त्रयम् ॥' इति वचनादेकवचनान्ताप्सरःशब्दाच्च्विः । बहुजनपृष्ठवर्तिनो भित्त्यादिव्यवहिता वा पादाङ्गुष्ठमात्रेण भुवं स्पृशन्तः प्रोन्नमिताङ्गाः पश्यन्तीति दिदृक्षूणां स्वभावः ॥

विभूषणस्रंसनशंसनार्पितैः
करप्रहारैरपि धूननैरपि ।
अमान्तमन्तः प्रसभं पुरापरा
सखीषु संमापयतीव संमदम् ॥ ८० ॥

विभूषणेति ॥ अपरान्तःकरणे शरीरमध्येऽमान्तं संमदं शरीरमानादधिकमानं बहिरवस्थितं नलदर्शनजं प्रमोदं विभूषणानां स्रंसनस्य शंसने तव मण्डनं गलितम्, तव मण्डनं गलितमिति प्रत्येकं कथने विषयेऽर्पितैर्दत्तैः करप्रहारैरपि धूननैरपि तच्छरीरकम्पनैश्च कृत्वा प्रसभं बलात्कारेण स्वसखीषु पुरा संमापयतीव प्राविशदिव । विचित्तत्वेन शब्दमशृण्वन्, करेण ताड्यते, पतितविस्मृतभूषणादिसंवेदनाय कम्प्यते चेति, तथा—अन्यदपि कुसूलादावमाद्गोधूमादि बहिरेवसंस्थितं सद्बलात्कारेण करताडनैः करकृतैर्धूननैश्चान्तर्भाव्यत इति च लौकिकी रीतिः । नलदर्शनानुरागादतिविमनस्कास्ता जाता इति भावः । पुरा संमापयतीति 'पुरि लुङ् चास्मे' इति लट् ॥

विभूषणभ्रंशः शब्देन किमिति न ज्ञापित इत्यत आह—

वतंसनीलाम्बुरुहेण किं दृशा
विलोकमाने विमनीबभूवतुः ।
अपि श्रुती दर्शनसक्तचेतसां
न तेन ते शुश्रुवतुर्मृगीदृशाम् ॥ ८१ ॥

वतंसेति ॥ नलदर्शने सक्तं चेतो यासां मृगीदृशां श्रुती कर्णावपि वतंसनीलाम्बुरुहेण कर्णभूषणनीलोत्पलेनैव दृशा नेत्रेण नलं विलोकमाने सत्यौ यस्माद्विमनीबभूवतुर्व्याकुले जाते तेन ते श्रुती किं भूषणसंस्रंसनं न शुश्रुवतुः । चक्षुषी किल श्रवणानर्हत्वा-

१ 'अत्र 'महीमस्पृशत्' इत्युपमेयस्योपमानादीपदल्पत्वकथनेन भेदप्रधानसादृश्योक्तिव्यतिरेकालङ्कारभेदः' इति जीवातुः ।

न्नाशृणुताम्, कर्णौ तु श्रोतुं योग्यावेवेत्यपेरर्थः । ताः सुदृश्यो यथा नलविलोकने विमनस्का जातास्तथा कर्णावपि विमनस्कौ जाताविति वापेरर्थः । विमनीबभूवतुः, 'अरुर्मनश्चक्षुः–' इति च्विः सलोपश्च ॥

काश्चिन्निर्माय चक्षुःप्रसृतिचुलुकितं तास्वशङ्कन्त कान्ता
मौग्ध्यादाचूडमोघैर्निचुलितमिव तं भूषणानां मणीनाम्
साहस्रीभिर्निमेषाकृतमतिभिरयं दृग्भिरालिङ्गितः किं
ज्योतिष्टोमादियज्ञश्रुतिफलजगतीसार्वभौमभ्रमेण ८२

काश्चिदिति ॥ पश्यन्तीषु तासु मध्ये कान्ताः सुन्दर्यः काश्चित्पुरनार्यो भूषणानां ये मणयस्तेषां भूषणभूतानां वा मणीनां रत्नानामोघैः समूहैराचूडं शिखामभिव्याप्य निचुलितमाच्छादितमिव तत्र बुडितमिव तं नलं चक्षूरूपाभ्यां प्रसृतिभ्यामर्धसंकुचितकरकुड्मलाभ्यां चुलुकितं पीतं निर्माय कृत्वा प्रसृतिप्रमाणाभ्यामतिविशालाभ्यां चक्षुर्भ्यां सादरदृष्टं कृत्वा इति मौग्ध्यादनैपुण्यादशङ्कन्त तर्कयामासुः । इति मौग्ध्यं किम्—निमेषे पक्ष्मसंकोचेऽकृतमतिभिरनिमिषाभिः साहस्रीभिः सहस्रसंख्याभिर्दृग्भिर्दृष्टिभिर्ज्योतिष्टोमराजसूयादियज्ञानां वेदाच्छ्रुतं यत्फलं साध्यं तद्रूपा या जगती भुवनं स्वर्गस्तस्याः सार्वभौमश्चक्रवर्तीन्द्रस्तस्य भ्रमेणायं नल आलिङ्गितः स्पृष्टः किम् । अचेतनैरपि रत्ननेत्रसहस्रैर्वैभववशादिन्द्रोऽयमिति भ्रान्त्येन्द्रस्य सहस्रनेत्रत्वादनेनास्माभिः संबन्धुं युक्तमिति बुद्ध्वा समालिङ्गिताः किमित्युत्प्रेक्षा । एतदेव मौर्ख्यम् । सौन्दर्यं रत्नबाहुल्यं चोक्तम् । सहस्रशब्दः पक्षेऽपरिमितसंख्यावाची । सहस्रं परिमाणमासां ताः साहस्र्यः, 'तदस्य परिमाणम्' इत्यर्थे 'शतमानविंशतिकसहस्रवसनादण्' इत्यण् ॥

भवन्सुद्युम्नः स्त्री नरपतिरभूद्यस्य जननी
तमुर्वश्याः प्राणानपि विजयमानस्तनुरुचा ।
हरारब्धक्रोधेन्धनमदनसिंहासनमसा-
वलंकर्मीणश्रीरुदभवदलंकर्तुमधुना ॥ ८३ ॥

भवन्निति ॥ सूर्यनप्ता मनोः पुत्रः सुद्युम्नाख्यो नरपती राजा पार्वतीवनप्रवेशनिमित्तेन शिवशासनेन हेतुना इलाख्यः स्त्री भवन्स्त्रीत्वं प्राप्तः सन् बुधाद्गर्भधारणेन यस्य जनन्यभूत् । उर्वश्याः प्राणान्रूपातिशयात्स्वर्वेश्यायाः प्राणभूतं प्राणवत्प्रियमतिसुन्दरं तं पुरूरवसमपि तनुरुचा कायकान्त्या विजयमानः पराभावुकोऽसौ नलोऽधुनेदानीं हरेणारब्धः कृतः क्रोधस्तस्येन्धनं दाह्यो मदनस्तस्य सिंहासनं दग्धत्वात्कामेन शून्यमलंकर्तुं योग्यतया भूषयितुमलंकर्मीणा कर्मक्षमातिसमर्था स्वाभाविकी भूषणजनिता च श्रीः शोभा यस्यासौ एवंभूत उदभवज्जात इति 'पौरस्त्रिय आलेपुः' (९३) इत्यन्तिमश्लोकेन संबन्धः । जीर्णः कामो दग्धः । पुरूरवास्त्वनेनैव जितः । तस्माच्छून्यं कामसिंहासनं भूषयितुमयं काम एवोत्पन्नः । अतिसुन्दरोयमिति भावः । कृतयुगादौ त्विलो नाम राजा मृगयासङ्गाद्धरनिवारितमुमावनमेकाकी प्रविष्टः स्त्री बभूव । तामेकाकिनीं सुन्दरीं दृष्ट्वा चन्द्रपुत्रो बुधः कामातुरः सन्स्वाश्रमं नीत्वा तस्यां पुरूरवोनामानं पुत्रमजीजनदिति भविष्योत्तरादिपुराणकथा । विजयमानः, 'विपराभ्यां जेः' इत्यात्मनेपदे शानच् । 'कर्मक्षमोऽलंकर्मीणः' इत्यमरः ॥

अर्थी सर्वसुपर्वणां पतिरसावेतस्य यूनः कृते
पर्यत्याजि विदर्भराजसुतया युक्तं विशेषज्ञया ।
अस्मिन्नाम तया वृते सुमनसः सन्तोपि यन्निर्जरा
जाता दुर्मनसो न सोढुमुचिता तेषां तु सा नौचिती ॥

अर्थीति ॥ विशेषज्ञया गुणानामधिकतरत्वं विदुष्या विदर्भराजसुतया अर्थी मां वृणीष्वेत्यर्थयमानः सानुरागोप्यसौ सर्वसुपर्वणां सर्वदेवानां पतिरिन्द्रोऽप्येतस्य प्रत्यक्षलक्ष्यातिसौन्दर्यस्य यूनः पूर्णतारुण्यस्य नलस्य कृते निमित्तं पर्यत्याजि सानुरागत्वे प्रभुत्वेऽपि सौन्दर्यादिगुणानां न्यूनत्वाद्यत्परित्यक्तस्तद्युक्तमुचितमेव कृतमित्यर्थः । नाम प्राकाश्ये । तु पुनः निर्जरा इन्द्रादयश्चत्वारोऽपि देवाः शिष्टा नाम प्रसिद्धाः सुमनसः शोभनान्तःकरणा अपि । सुमनसः प्रसिद्धाः सन्तोऽपि वा । सुमनस इति संज्ञया ख्याताः सन्तोऽपि । तया भैम्यास्मिन्नले वृते सति यद्दुर्मनसः सविषादमनसो जाताः सा तेषामनौचित्यनुचितकारिता सोढुं क्षन्तुं नोचिता युक्ता । नहि साधुभिः कार्यवशादपि स्वधर्मः परित्यज्यते, एतैस्तु परित्यक्तः, तद्वयं न सहामह इत्यर्थः । कृतेऽव्ययम् ॥

अस्योत्कण्ठितकण्ठलोठिवरणस्रक्साक्षिभिर्दिग्भटैः
स्वं वक्षः स्वयमस्फुटन्नकिमदः शस्त्रादपि स्फोटितम् ।
व्यावृत्त्योपनतेन हा शतमखेनाद्य प्रसाद्या कथं
भैम्यां व्यर्थमनोरथेन च शची साचीकृतास्याम्बुजा ॥

अस्येति ॥ अस्य नलस्य चिरकालं वरणमालाश्लेषार्थमुत्कण्ठिते कण्ठे लोठिन्याश्चलन्त्या हृदयावलम्बिन्या वरणस्रजः साक्षिभिः प्रत्यक्षदर्शिभिर्दिग्भटैश्चतुर्भिरिन्द्रादिभिर्दिक्पालैस्त्रपाभावात्स्वयमस्फुटदविदीर्यमाणमपि स्वं वक्षोऽमुष्य नलस्य शस्त्रादपि हेतोः किमिति न स्फोटितं विदारितम् । नलेन सार्धं भैम्यर्थं युद्धमपि कृत्वा किमिति न मृतम् । शूराणां रणे मरणमपि यशसे भवति, न लज्जापरित्याग इति भावः । छुरिकादिप्रक्षेपेण स्वयमेव वा किमिति न स्फोटितमिति वा । अग्न्यादयस्तावत्तिष्ठन्तु हा सोपहासं कष्टम् । अद्य भैम्यां विषये व्यर्थमनोरथेन सता व्यावृत्य परावृत्य उपनतेन शचीसमीपे प्रणामवशान्नम्रेण शतमखेन शतयज्ञकरणलब्धस्वर्गाधिपत्येन देवेन्द्रेणापि शची चेन्द्राण्यपि कथं प्रसाद्यानुनेतुं शक्या । यतः—कोपवशादज्ञानवशाद्वा साचीकृतं वक्रीकृतमास्यमेवाम्बुजं यया—संमुखानवलोकनात्प्रसादनार्थमनेन कृतमपि प्रणामाञ्जल्यादिकं न द्रक्ष्यति, ततः कथं प्रसाद्या । भैमी न लब्धा, शची च रुष्टा, अयशोऽपि जातमितीन्द्रस्य महत्कष्टं जातमिति भावः । दिक्षु भटैः शूरैर्नृपैः स्वं वक्षः किमिति न स्फोटितम् । नृपा मनुष्यास्तिष्ठन्तु, देवेन्द्रस्यापीदृशी दशा जातेति वा । 'उपगतेन' इति पाठे शचीसमीपे गतेन ॥

मा जानीत विदर्भजामविदुषीं कीर्तिं मुदः श्रेयसीं
सेयं भद्रमचीकरन्मघवता न स्वं द्वितीयां शचीम् ।

कः शच्या रचयांचकार चरिते काव्यं स नः कथ्यता-
मेतस्यास्तु करिष्यते रसधुनीपात्रे चरित्रे न कैः ॥ ८६ ॥

मा जानीतेति ॥ भोः सख्यः, यूयं विदर्भजां मुदो हर्षात्स-काशात्कीर्तिं श्रेयसीं श्रेष्ठतरामविदुषीमजानतीं मा जानीत । किंतु हर्षापेक्षया कीर्तिः प्रशस्यतरेति भैमी वेत्त्येवेति जानीत । यद्यस्मा-त्सेयं भैमी मघवता प्रयोज्येन स्वमात्मानं द्वितीयां शचीं भद्रं साधु नाचीकरत् न कारयामास । इन्द्रे वृते तत्पत्नीत्वाच्छची-शब्दवाच्यत्वं भवेन्न त्वसौ वृतस्तस्माद्द्वितीया शची नाभवदिति युक्तमेवानया कृतमित्यर्थः । इन्द्रे वृते कीर्तिर्भविष्यतीत्याशङ्क्य नेत्याह—शच्याश्चरिते कः कविः सर्गबन्धादिरूपेण वर्णनात्मकं काव्यं प्रबन्धं रचयांचकार स शचीवर्णनकारी नोस्माकमग्रे । अ-स्मभ्यं वा । कथ्यतां यद्यस्ति, अपितु—अनिरूपणान्नास्त्येव । एत-स्यास्तु भैम्याः पुना रसानां शृङ्गारादीनामेव रसानां जलानां धुनी नदी तस्याः पात्रे स्थानभूते । अथच—रसनदीप्रवाहरूपे गुणशी-लादिचरित्रे विषये कैः पराशरव्यासशुकादिभिः काव्यं न करिष्यते, अपितु तैरपि भारतादौ तद्वर्णनकाव्यं करिष्यते, किं पुनः श्रीहर्षा-दिकविभिरित्यर्थः । इन्द्रवरणेन यद्यपि स्वर्गसुखप्राप्तिस्तथापि तत्पत्नी-त्वाच्छचीत्वेऽपि तस्याः कुत्रचित् केनाप्यवर्णितत्वात् । इन्द्रापेक्ष-याधिककीर्तेर्नलस्य वरणे पुण्यश्लोकत्वात्सर्वैरपि वर्णनीयत्वात्तत्प्र-सङ्गात्स्वस्यापि वर्णनीयत्वान्महती कीर्तिर्भविष्यति । सा च स्वर्ग-मुदः सकाशाच्छ्रेयसी । इति विचार्य इन्द्रपरित्यागद्वारा स्वर्गसु-खमपि परित्यज्य भैम्या नलो वृत इति युक्तकारित्वादेतादृशी कापि विदुषी नास्तीति भावः । 'दिवः' इति पाठे स्वर्गसुखादि-त्यर्थः । करिष्यते ऋदन्तत्वादिट् ॥

वैदर्भीबहुजन्मनिर्मिततपःशिल्पेन देहश्रिया
नेत्राभ्यां स्वदते युवायमवनीवासः प्रसूनायुधः ।
गीर्वाणालयसार्वभौमसुकृतप्राग्भारदुष्प्रापया
योगं भीमजयानुभूय भजतामद्वैतमद्य त्विषाम् ॥८७॥

वैदर्भीति ॥ हे सख्यः, अवन्यां वासः स्थितिर्यस्य सः प्रसू-नायुध इव कामरूपोऽयं नलनामा युवा तरुणो देहश्रिया काय-कान्त्या कृत्वा पश्यन्तीनामस्माकं नेत्राभ्यां स्वदते रोचते । किंभू-तया—वैदर्भ्या बहुजन्मभिरनेकजन्मसु या निर्मितस्य कृच्छ्रचा-न्द्रायणादिजन्यस्य तपसः सुकृतस्य शिल्पेन फलभूतया । अति-सुन्दरममुं प्रीत्यास्मन्नेत्रे पश्यत इत्यर्थः । विशिष्टया देहश्रियोपल-क्षितो वा । अशरीरोपि भैमीपुण्यबाहुल्यवशात्सशरीरः काम इवेति भाव इति वा । सोयं नलः (अद्य) भीमजया सह योगं दा-म्पत्यसंबन्धमनुभूय त्विषां कान्तिभराणामन्यत्रात्यन्तासत्त्वेनाद्वैतं सामस्त्यं भजतामाश्रयतु । उभयोरेकत्र मेलनादयमेव कान्तीनामा-श्रयः कान्तिस्वरूपो वा भवतु नान्य इत्यर्थः । किंभूतया—गीर्वा-णालये स्वर्लोके सार्वभौम इन्द्रस्तस्य सुकृतप्राग्भारः पुण्यराशिस्ते-नापि दुष्प्रापयालभ्यया । शतमखीजन्येन पुण्येन स्वर्गचक्रवर्तित्वं येन लब्धं तेनापि दुष्प्रापत्वाद्भैम्याः सौभाग्यातिशयो नलस्य चेन्द्रा-पेक्षया सौभाग्यातिशयः पुण्यातिशयश्च 'गीर्वाणालय–' इत्यादिना सूचितः । अन्योऽप्यष्टाङ्गयोगमनुभूय बहुपुण्यदुष्प्रापयापि भीमा-द्धराज्जातया ईश्वरप्रसादलब्धया विद्ययाद्वैतं परमात्मस्वरूपं भ-जति । नेत्राभ्याम् 'रुच्यर्थानाम्–' इति संप्रदानत्वम् । प्राग्भार-दुष्प्रापयेति 'तृतीया' इति योगविभागात्समासः ॥

स्त्रीपुंसव्यतिषञ्जनं जनयतः पत्युः प्रजानामभू-
दभ्यासः परिपाकिमः किमनयोर्दाम्पत्यसंपत्तये ।
आसंसारपुरन्ध्रिपूरुषमिथःप्रेमार्पणक्रीडया-
प्येतज्जम्पतिगाढरागरचना प्राकर्षि चेतोभुवः ॥८८॥

स्त्रीपुंसेति ॥ स्त्रीपुंसयोः सर्वयोर्व्यतिषञ्जनं विशेषेणातितरां संमेलनं जनयतः कुर्वतः प्रजानां पत्युर्ब्रह्मणः पुनः पुनः संयोजन-शिक्षणलक्षणोऽभ्यासोऽनयोर्नलभैम्योर्दाम्पत्यसंपत्तये जायापति-भावस्योत्कर्षाय परिपाकिमः परिपाकेन निर्वृत्तः स्वारस्येन परिण-तपाकोऽभूत्किम् । सर्वस्त्रीपुंसयोजनाभ्यासोऽत्युत्तमानुरूपैतदुभ-यसंघट्टने फलितः किमित्यर्थः । तथा—चेतोभुवः कामस्यापि आसंसारं संसारं मर्यादीकृत्य सर्गादिमारभ्य प्रलयपर्यन्तं पुरन्ध्रि-पूरुषयोः स्त्रीपुंसयोर्मिथः प्रेमान्योन्यमनुरागस्तस्यार्पणमासञ्जनं तदेव सदा मनोविनोदनरूपा क्रीडा लीला तयापि एतज्जम्पत्योर-नयोर्नलभैमीरूपयोर्दम्पत्योर्गाढस्येन्द्रेणाप्यनपनेयस्य मिथोऽनुरा-गस्य रचनाज्जननाद्धेतोः प्राकर्षि प्रकृष्टकाष्ठापन्नया जातम् । अनु-रागजननक्रीडायाः प्रकर्षोऽत्रैव विश्रान्तः । उत्तरत्राप्येवमनुराग-स्याभावादित्यर्थः । एतादृशौ सरूपौ चान्यौ स्त्रीपुंसौ कालत्रये न स्त इति भावः । व्यतिषञ्जनम्, 'उपसर्गात्सुनोति–' इति ष-त्वम् । परिपाकिमः, 'भावप्रत्ययान्तादिमप्' इति वक्तव्यादिमप् । जम्पती, जायाया जम्भावः ॥

ताभिर्दृश्यत एष यान्पथि महाज्यैष्ठीमहे मन्महे
यद्दृग्भिः पुरुषोत्तमः परिचितः प्राग्मञ्चमञ्चन्कृतः ।
सा स्त्रीराट् पतयालुभिः शितिसितैः स्यादस्य दृक्चामरैः
सस्ने माघमघातिघातियमुनागङ्गौघयोगे यया ॥ ८९ ॥

ताभिरिति ॥ महत्या अतिप्रसिद्धाया ज्येष्ठानक्षत्रयुक्ताया ज्येष्ठपूर्णिमायाः संबन्धिनि मह उत्सवे । महत्यतिप्रसिद्धे वा ज्यै-ष्ठीमहे । यद्दृग्भिर्यासां नेत्रैः प्राग्जन्मान्तरे । अथच—अन्यापेक्षया प्रथमम् मञ्चं पर्यङ्कमञ्चन्प्राप्तो मञ्चस्थो मार्गे गच्छन् श्रीपुरुषो-त्तमः परिचितो बहुवारं दृष्टः कृतस्ताभिरेव स्त्रीभिः पथि वरया-त्रायां यान्रथस्थ आगच्छन्नेष नलो दृश्यते । एतादृक्पुण्यं याभि-रस्मादृशीभिरर्जितं ताभिरेवायं द्रष्टुं शक्यो नत्वन्याभिरित्यर्थः । अथच—याभिः पुरुषोत्तमो दृष्टस्ताभिरेव तत्तुल्योऽयमपीति ज्ञातुं शक्यते, नत्वन्याभिरित्यर्थः । ताभिरेव साभिलाषं कटाक्षै-र्दृश्यते, याभिरेवं सुकृतं कृतम् । अन्याभिस्तु कौतुकेनापि वीक्षितुं न शक्यः, किं पुनः सानुरागं कटाक्षैरिति । 'ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा । पूर्णिमा ज्येष्ठमासस्य महाज्यैष्ठीति कीर्तिता' इति । पुरुषोत्तमतुल्योऽयमिति मन्महे । जानीमह इति भावः । वाक्यार्थः कर्म । उत्कलदेशे ज्येष्ठ-पूर्णिमायामिन्द्रनीलगिरिनिवासिनः श्रीपुरुषोत्तमस्य महोत्सवः क्रियते । तत्र श्रीकृष्णबलभद्रप्रमुखप्रतिमाधिष्ठिता विरचित-सप्तभूमिका मञ्चाः पृथक् निर्गच्छन्ति । तस्य दर्शनं भूयसे श्रेयसे भवतीति पौराणिकाः । यदाहुः—'दोलारूढं तु गोविन्दं

मञ्चस्थं मधुसूदनम् । रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते ॥' इति । तथा—यया स्त्रिया अघातिघातिनि पातकविनाशिनि यमुनागङ्गौघयोर्योगे संगमे प्रयागाख्ये माघं सस्ने मकरस्थे रवौ माघे मास्यविच्छेदेन स्नानं कृतं, सास्य नलस्य पतयालुभिरतिचञ्चलैः शितिसितैः कृष्णधवलैर्दक्चामरैर्नेत्रेरेव चामरैर्नेत्रव्यापाररूपैश्चामरैः स्त्रीराट् स्त्रीराजेव स्याद्भवेदिति मन्महे । राजा हि कृष्णधवलैश्चामरैर्वीज्यते । प्रयागे माघस्नानजन्यसुकृतात्स्त्री राजत्वं प्राप्नोति तत्र स्नानेन । 'सितासिते तु यैः स्नातं माघमासे युधिष्ठिर । न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥' इति वचनात् । स्त्रीषु श्रेष्ठा सैव भवेदित्यर्थः । अयं च कटाक्षैर्यां पश्यति सा तु सर्वाभ्योऽप्यधिका । साच भैम्येव नान्या । भैम्या च प्रयागे सकलमाघस्नानफलं लब्धम् । भैमीसदृशी कापि कुत्रापि नास्तीति भावः । ज्यैष्ठीति, ज्येष्ठानक्षत्रयुक्ता पौर्णमासीति 'नक्षत्रेण युक्तः कालः' इत्यणि वृद्धिः । तद्युक्तमासाभिधायित्वेऽपि 'सास्मिन्पौर्णमासी–' इत्यादिना ज्यैष्ठ इत्येव भवति । 'ज्येष्ठी' इति पाठे वृद्ध्यभावश्चिन्त्यः । संज्ञापूर्वकस्य विधेरनित्यत्वाद्वृद्ध्यभावः कथंचित्समर्थनीयः । 'स्त्रीराट्' इति संबन्धषष्ठ्या निर्धारणसप्तम्या वा समासः । पृथग्वा पदम्—राजेव सा स्त्रीत्यर्थः । 'कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्' इति देशश्चाकर्मकाणां कर्मसंज्ञो भवतीति वक्तव्यम्' इति वचनान्माघस्य कालवाचित्वात्कर्मत्वे धातोः कर्मणि विहितेन तङा तस्याभिहितत्वान्माघः सस्ने इति प्राप्ते माघमिति द्वितीया चिन्त्या । अत्रार्थे हरदत्तमिश्रैः—'गतिबुद्धि–' इत्यादिसूत्रे 'अकर्मकाणामिति कालभावाध्वदेशव्यतिरिक्तकर्मरहितानाम्' इत्यर्थो ग्राह्यः- इति सिद्धान्तितम् । एवं 'लः कर्मणि च–' इत्यादावपि यत्राकर्मकग्रहणं तत्र सर्वत्र द्रष्टव्यम् । तेनात्र माघस्य कर्मत्वे 'सस्ने' इति लिट सिद्धो भवति । यद्वा—मा अघं यस्यां क्रियायां यथातथा स्नाताया मम सर्वपापक्षयपूर्वकसर्वमनोरथसिद्धिर्भवत्विति संकल्प्येत्यर्थः । 'कलुषं वृजिनंनोघम्' इत्यमरः । यमुनागङ्गेति पूर्वनिपातानियमः । पूर्ववत्परिहरणीयः ॥

वैदर्भीविपुलानुरागकलनात्सौभाग्यमत्राखिल-
क्षोणीचक्रशतक्रतौ निजगदे तद्वृत्तवृत्तक्रमैः ।
किंचास्माकनरेन्द्रभूसुभगतासंभूतये लग्नकं
देवेन्द्रावरणप्रमादितशचीविश्राणिताशीर्वचः ॥ ९० ॥

वैदर्भीति ॥ हे सख्यः, तस्य नलसंबन्धीनि वृत्तान्यधीतानि यानि वृत्तानि पद्यानि तेषां क्रमैर्नलविषये कविभिः कृतैरस्मदादिभिश्च पठितैः काव्यैः । तस्या भैम्या वृत्तैरतीतैः सकलद्वीपाधिराजेन्द्रदेवेन्द्रादिदिक्पालपरित्यागरूपस्य चरित्रस्य क्रमैः परिपाटीभिर्वा । कृत्वा वैदर्भ्या भैम्या विपुलस्य नलविषयानुरागस्य कलनाज्ज्ञानादखिलक्षोणीचक्रे शतक्रताविन्द्रेऽस्मिन्नले स्त्रीसंबन्धिसकलवरप्रेमास्पदत्वादिलक्षणं सौभाग्यं निजगदे स्पष्टं कथितम् । निश्चितमस्माभिरिति यावत् । अतिसुन्दरीयमिन्द्रादीन्परित्यज्य यस्मादेनमवृत, तस्मादयमेव सुभगतमो नान्य इति सर्वैर्निश्चितमित्यर्थः । भैमीकृतान्नलविषयविपुलानुरागस्याङ्गीकरणाद्धेतोस्तस्या एव वृत्तस्य भूतस्य चक्षुःप्रीत्यादिकामदशास्फुटविरहव्यथानुरूपस्य वृत्तस्य चरित्रस्य क्रमैः । तेऽतिप्रसिद्धा ये वृत्तक्रमास्तैर्वा निगदितम् । भैम्या अप्येतद्विषयमहानुरागजनितपूर्वोक्तविरहव्यथाभिरेव अयं सकलसौभाग्यनिधानमिति सर्वेषां पुरस्तात्कथितमिति भाव इति मुख्योऽर्थः । वैदर्भ्या विपुलानुरागेण नलस्य बन्ध(वर्ण)नादिति वा । किं चान्यच्च—अस्माकमयमास्माकः स चासौ नरेन्द्रश्च भीमन्मस्माद्भवतीति भूः भैमी तस्याः सुभगता सौभाग्यं तस्याः संभूतय उत्पत्तये महासमृद्ध्यर्थं वा । इन्द्रस्यावरणेन त्यागेन सापत्न्याभावेन प्रसादितया संतोषितया शच्या विश्राणितं दत्तं 'सुभगा पुत्रवत्यविधवा भव' इत्यादिकमाशीर्वचो लग्नकं प्रतिभूरभूत् । शचीदत्ताशीःसहस्रबलाद्भैम्यपि सुभगेति निश्चितमित्यर्थः । 'आशीःश्रुतिः' इति पाठे आशिषां श्रवणम् । अथवा—आशिष एव सत्यत्वाच्छ्रुतिर्वेद इत्यर्थः । अयं तु पाठः साधीयान् । अनयोरन्योन्यमनुरागोचितं सौभाग्यमपि भविष्यतीत्यनुमानम् । वृत्तम्, 'णेरध्यगने वृत्तम्' इति साधुः । 'आस्माक' इति संबन्धेऽणि 'तस्मिन्नणि च–' इत्यस्माकादेशः । लग्नकशब्दो नपुंसकेपि । तस्या भैम्या वृत्तानां जातानां वृत्तानां हंसप्रेषणादिचरितानां क्रमाः परिपाट्यस्तैर्निजगद इति वा ॥

आसुत्राममपासनान्मखभुजां भैम्येव राजव्रजे
तादर्थ्यागमनानुरोधपरया युक्तार्जि लज्जामृजा ।
आत्मानं त्रिदशप्रसादफलतां पत्ये विधायानया
ह्रीरोपापयशःकथानवसरः सृष्टः सुराणामपि ॥ ९१ ॥

आसुत्राममिति ॥ भैम्या एव आसुत्राममिन्द्रमभिव्याप्य मखभुजां देवानामपासनात्त्यागाद्धेतो राजव्रजे विषये लज्जाया मृजा परिमार्जनं युक्ता आजि कृता । यत्कृतं तद्युक्तमित्यर्थः । यतः—तस्य इदं तदर्थं तस्य भावस्तादर्थ्यं तेन भैमीनिमित्तेन राज्ञामागमनं तन्निमित्तोऽनुरोधो दाक्षिण्यं तत्र परया । यो हि यदर्थमागच्छति स तस्य दाक्षिण्यं कुर्वंल्लज्जां मार्ष्टीत्युचितमेवेत्यर्थः । मदर्थमागतानामेषां मत्प्राप्तिर्नाभूत्, लज्जा च जातेत्ययुक्तमेतदिति राजसु सकृत्पत्वेनेन्द्रादीनपि भैमी नावृणोत् । ततश्च यत्रेन्द्रादयोऽपि त्यक्तास्तत्र मानुषाणामस्माकं का कथेति तेषां लज्जामार्जनं भैम्यैव युक्तं कृतमिति भावः । स नलोऽर्थः प्रयोजनं यस्य तस्य भावस्तादर्थ्यं तेन नलप्रयोजनत्वेन नलवरणार्थं यदागमनं तत्र यः पक्षपातस्तन्निष्ठया नलानुरक्तया । अत एवेन्द्रादीनां त्याग इति वा । तर्हीन्द्रादीनां लज्जा रोषोऽकीर्तिश्च कृतेति देवद्रोहादशुभाशङ्कां परिहरति—अनया भैम्या पत्ये नलायात्मानं त्रिदशप्रसादस्य देवप्रसादस्य फलतां वररूपत्वं विधाय सुराणामिन्द्रादीनामपि ह्रीरोपापयशसां कथायाः कथामात्रस्याप्यनवसरोऽवकाशाभावः सृष्टः कृतः । अस्मान्नावृणोदिति सजातीयान्प्रति स्वस्मियश्च प्रति लज्जा । अस्माकं पश्यतां नलमवृणोदिति रोषः । नलं स्वीकृत्य देवानपमानितवतीत्यपयशः । देवैः प्रसन्नीभूय वरत्वेन नलाय भैमी दत्ता । एतदर्थमेव भूम्यामागताः, न भैम्यभिलाषेणेति लोकप्रतीतेः । भैम्या देवानामपि लज्जादिमार्जनं कृतमिति सर्वानुरागादनयोः शुभपरम्परैव भविता नत्वशुभशङ्कालेशोपीति भावः । 'पत्ये नयन्त्या' इति पाठः समीचीनः । आत्मानं त्रिदशप्रसादफलतां नयन्त्या प्रापयन्त्येत्यर्थः ।

---

१ 'अखिलम्' इति पाठे सौभाग्यविशेषणत्वेन योज्यमिति सुखावबोधा । २ 'आशीस्तुतिः' इति पाठः सुखावबोधाश्चः ।

ञासुत्रामम्, अत्राभिविधावव्ययीभावे 'अतश्च' इति टच्। मृजा, भिदादित्वादङ् ॥

इत्यालेपुरनुप्रतीकनिलयालंकारसारश्रिया-
हंकुर्वत्त्वनुरामणीयकममूरालोक्य पौरप्रियाः ।
सानन्दाः कुरुविन्दसुन्दरकरस्यानन्दनं स्यन्दनं
तस्याध्यास्य यतः शतक्रतुहरिक्रीडाद्रिमिन्दोरिव ॥

इतीति ॥ अमूः पौराणां प्रिया इति पूर्वोक्तप्रकारेण यथास्फूर्ति यथाभिप्रायमन्योन्यमालेपुः संवादं चक्रुः । किंभूताः—कुरुविन्दवत्पद्मरागवत्सुन्दरौ रक्तौ करौ यस्या आनन्दनं वेगवत्त्वादिगुणयोगादानन्दकारिणं स्यन्दनं रथमध्यास्य यतो गच्छतस्तस्य नलस्यानुप्रतीकं प्रत्यवयवं निलयः स्थानं येषां तेषामलंकाराणां सारश्रिया श्रेष्ठशोभया कृत्वा करसौन्दर्यादहमधिकमिति हस्तसौन्दर्यं वदन्ति, हस्तसौन्दर्यादहमधिकमिति करसौन्दर्यमित्येवं प्रत्येकमहंकुर्वद्हंकारं कुर्वत्तनुरामणीयकं शरीरसौन्दर्यमालोक्य सानन्दा हर्षपराः । कस्येव—पद्मरागवद्रक्तकिरणस्य नन्दनवनमभिव्याप्य मर्यादीकृत्य वा स्थितं नन्दनवनसमीपे स्थितं शतक्रतोर्हरिदिक् प्राचीदिक् तस्याः क्रीडाद्रिमुदयाचलमधिष्ठाय गच्छत उदित्वरस्येन्दोरिव तत्कायकान्तिं विलोक्य यथा सानन्दा भवन्ति तथेत्यर्थः । चन्द्रोदये स्त्रीणां हर्षः। स्यन्दनम्, 'अधिशीङ्-' इत्याधारस्य कर्मत्वम्। यतः, इणः शतरि रूपम् ॥

श्रीहर्ष कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
यातः पञ्चदशः कृशेतररसस्वादाविहायं महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्वलः[1]

श्रीहर्षमिति ॥ कृशेतरेणातिभूयसा रसेन स्वादावमृतरूपे नलीयचरिते पञ्चाधिकानां दशानां पूरणः पञ्चदशः । 'स्वादौ' इति भाषितपुंस्कम् ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे पञ्चदशः सर्गः ॥

षोडशः सर्गः ।

वृतः प्रतस्थे स रथैरथो रथी
गृहान्विदर्भाधिपतेर्धराधिपः ।
पुरोधसं गौतममात्मवित्तमं
द्विधा पुरस्कृत्य गृहीतमङ्गलः ॥ १ ॥

वृत इति ॥ अथो रथारोहणानन्तरं रथैः 'कुन्ताः प्रविशन्ति' इतिवद्रथिभिः वृतः । तथा—रथी प्रशस्तरथोपेतः स धराधिपो नलो विदर्भाधिपतेर्गृहान् प्रति प्रतस्थे ययौ । किंभूतः—आत्मवित्तमं ज्ञानिमध्ये श्रेष्ठं गौतमं गोतमगोत्रमेतन्नामानं वा पुरोधसं द्विधा द्वाभ्यां प्रकाराभ्यां पुरस्कृत्याग्रे कृत्वा संपूज्य च विवाहकार्यभारं तस्मिन्नारोप्य वा गृहीतानि स्वीकृतानि दध्यक्षतपूर्णकलशादीनि मङ्गलानि येन । रथैः सह वर्तमानैः पुरुषैर्वा । प्रतस्थे, 'समवप्रविभ्यः स्थः' इति तङ् ॥

विभूषणांशुप्रतिबिम्बितैः स्फुटं
भृशावदातैः स्वनिवासिभिर्गुणैः ।
मृगेक्षणानां समुपासि चामरै-
र्विधूयमानैः स विधुप्रभैः प्रभुः ॥ २ ॥

विभूषणेति ॥ मृगेक्षणानां चामरधारिणीनां विधुप्रभैश्चन्द्रधवलैः । तथा—विधूयमानैश्चाल्यमानैश्चामरैः स प्रभुर्नलः समुपासि वीज्यते स्म । स्फुटमुत्प्रेक्षते—विभूषणानां रत्नखचितनिजमण्डनानामंशुषु किरणेषु प्रतिबिम्बितैः । तथा—भृशावदातैरत्युज्ज्वलैः स्वस्मिन्निवसन्त्येवंशीलैः श्रुतशीलसौन्दर्यादिभिर्गुणैरिव । प्रत्यक्षीभूतैर्नलगुणैरिव चामरैरुपासीत्यर्थः । चामराण्यपि विभूषणरश्मिप्रतिबिम्बितानि । स्फुटं निश्चितम् । ईदृशैश्चामरैरेव गुणैरिति वा ॥

परार्ध्यवेषाभरणैः पुरःसरैः
समं जिहाने निषधावनीभुजि ।
दधे सुनासीरपदाभिधेयतां
स रूढिमात्राद्यदि वृत्रशात्रवः ॥ ३ ॥

परार्ध्येति ॥ निषधावनीभुजि नले परार्ध्यानि श्रेष्ठानि वेषाभरणानि रूपालंकारा येषां तैः पुरःसरैः समं सह जिहाने चलति सति स वृत्रशात्रव इन्द्रः सुनासीर इति पदस्याभिधेयतां वाच्यत्वं यदि दधार तर्हि रूढिमात्राद्दधार, ननु शोभनं नासीरं सेनामुखं यस्येति यौगिकतया, मुख्यवृत्त्या मुख्यया वृत्त्या नल एव दृश्यते, नन्विन्द्रे त्रिविधाः शब्दाः—केवलयौगिकाः, केवलरौढिकाः, योगरूढाश्च । तत्र—पाचकादयो यौगिकाः, नलपायिकादयो रौढिकाः, आतपत्रादयो योगरूढाः । तदेवमेतादृशाग्रेसराभावादिन्द्रस्य सुनासीरपदवाच्यत्वं यद्यस्ति तर्हि रूढ्यैव । व्युत्पत्त्या तु नल एवोचितमित्यर्थः । इन्द्रादप्यधिको नलः, तत्पुरःसराश्चेन्द्रपुरःसरेभ्योऽप्यधिका इति भावः । पराय भवानि 'अर्धाच्यत्' 'परावराधमोत्तमपूर्वाच्च' इति यत् । शत्रुरेव शात्रवः । प्रज्ञादित्वात्स्वार्थेण् । 'वृद्धश्रवाः सुनासीरः' इत्यमरः ॥

नलस्य नासीरसृजां महीभुजां
किरीटरत्नैः पुनरुक्तदीपया ।
अदीपि रात्रौ वरयात्रया तया
चमूरजोमिश्रतमिस्रसंपदा ॥ ४ ॥

नलस्येति ॥ तया वरस्य भैमीवरस्य नलस्य यात्रया । वरा वा यात्रा तया । रात्रावदीपि शुशुभे । किंभूतया—नलस्य नासीरसृजां सेनायामग्रेसरीभूतानां महीभुजां राज्ञां किरीटरत्नैः स्वेनैवान्धकारनिराकरणात्पुनरुक्ता व्यर्थीकृता दीपा यस्यां तया । तथा—च-

---

१ 'पौरस्त्रियः' इति पाठो जीवातुसंमतः । २ 'काव्ये तस्य हि वैरमेनिचरिते' इति जीवातुसंमतः पाठः ।

१ 'स्वभूषणांशु' इति पाठो जीवातुसुखावबोधासंमतः ।

मूरजोभिर्मिश्रा बहूकृता तमिस्रसंपत्तिमिरसंघो यया । महान्धकारेऽपि रत्नदीपप्रकाशभूयिष्टप्रकाशत्वाद्दीपीत्यर्थः । महान्धकार एव हि दीपाः शोभन्त इत्यर्थः । राज्ञां सेनामुखाग्रवर्तित्वेन नलस्य चक्रवर्तित्वं सूचितम् । अदीपि, भावे लुः ॥

विदर्भराजः क्षितिपाननुक्षणं
शुभक्षणासन्नतरत्वमत्वरः ।
दिदेश दूतान्पथि यान्यथोत्तरं
चमूममुष्योपचिकाय तच्चयः ॥ ५ ॥

विदर्भेति ॥ विदर्भराजो यान्क्षितिपानेव दूताननुक्षणं वारंवारं नलाकारणार्थं दिदेश प्राहिणोत्, तेषां च यः पूर्वमेकः प्रेषितः तदनन्तरमन्यः तदनन्तरं चान्यः, एवमुत्तरोत्तरमनतिक्रम्य पथ्यमुष्य नलस्य चमूमुपचिकाय भूयसीमकृत । किंभूतः—शुभस्य क्षणस्य लग्नसमयस्यासन्नतरत्वेन नैकट्येन सत्वरो वेगवान् भूयांसो नृपा दूताः प्रेषिता इत्यनेनादरातिशयः सूचितः ॥

हरिद्विपद्वीपिभिरांशुकैर्नभो-
नभस्वदाध्मापनपीनितैरभूत् ।
तरस्वदश्वध्वजिनीध्वजैर्वनं
विचित्रचीनाम्बरवल्लिवेल्लितम् ॥ ६ ॥

हरीति ॥ तरस्वतां वेगवतामश्वानां ध्वजिनी सेना । तरस्वन्तोऽश्वा यस्यां सा वा । तस्या ध्वजभूतैरांशुकैर्वस्त्रनिर्मितैः । तथा—नभस्वता वायुना कृतं यदाध्मापनं परिपूरणं तेन पीनितैः पुष्टीकृतैः सजीवसिंहादितुल्यैर्हरिभिः सिंहैः, द्विपैर्हस्तिभिः, द्वीपिभिर्व्याघ्रैः कृत्वा तत्सेनायामुपरितनं नभ आकाशं वनं विपिनतुल्यमभूदजनि । किंभूतं वनम्—विचित्राणि नानावर्णानि चीनदेशोत्पन्नानि सूक्ष्माणि ध्वजसंबन्धीनि चाम्बराणि वस्त्राणि तान्येव वल्लयो लतास्ताभिर्वेल्लितं वेष्टितम् । वनेऽपि सिंहादयो वृक्षा लताश्च सन्ति । ध्वजपदेन वृक्षा अपि लक्ष्यन्ते । तरस्वन्तोऽश्वा यस्य नलस्य । तरस्वदश्वा वा या । ध्वजिनी प्रकृतत्वात्तस्यैव । सा ध्वजिनी नभसि नभस्वदाध्मापनपीनितैरांशुकैर्ध्वजैः पताकाभिः कृत्वा वनमभूत् । किंभूता ध्वजिनी—हरिभिरश्वैः, द्विपैर्हस्तिभिः, द्वीपिभिर्द्वीपान्तरवासिभिः सेनाचरीभूतै राजभिरुपलक्षिता । वनमपि सिंहादिभिरुपलक्षितम् । विचित्रेति पूर्ववदिति वा । वनपक्षे—चीनो मृगविशेषः । ऊर्ध्वविस्तृतत्वादम्बरगामिन्यो वल्लयः ॥

भुवाह्वयन्तीं निजतोरणस्रजा
गजालिकर्णानिलखेलया ततः ।
ददर्श दूतीमिव भीमजन्मनः
स तत्प्रतीहारमहीं महीपतिः ॥ ७ ॥

भुवेति ॥ ततः प्रस्थानानन्तरं स महीपतिर्नलस्तस्य भीमस्य प्रतीहारमहीं द्वारभूमिं भीमजन्मनो भैम्या दूतीमिव ददर्श । किंभूताम्—द्वारे निबद्धा गजास्तेषामालिः पङ्क्तिस्तस्याः कर्णानिलेन कृत्वा खेलति चलतीति खेला तया निजया स्वीयया पुष्पाम्रदलरचितया तोरणस्रजा तल्लक्षणया भ्रुवानुरागातिशयोत्सुकतया आह्वयन्तीं शीघ्रमागच्छेति भ्रूसंज्ञयाकारयन्तीम् । दूत्यपि वलन्त्या भुवाह्वयति । राजगृहद्वारदर्शनेनातिसत्वरोऽभूदिति भावः । 'स्त्री द्वाद्वारं प्रतीहारः' (खेलया-) पचाद्यच् । प्रतीहारः, 'उपसर्गस्य घञि-' इति दीर्घः ॥

श्लथैर्दलैः स्तम्भयुगस्य रम्भयो-
श्चकास्ति चण्डातकमण्डिता स्म सा ।
प्रियासखीवास्य मनःस्थितिस्फुरत्-
सुखागतप्रश्निततूर्यनिःस्वना ॥ ८ ॥

श्लथैरिति ॥ सा द्वारभूमिः रम्भयोः कदल्योर्द्वारमण्डनार्थं शकुनार्थं च रोपितस्तम्भयुगस्य च्छेदवशाद्वायुवशाद्वा श्लथैर्दलैः पत्रैः कृत्वा नीललम्बमानचण्डातकसंज्ञकेन वस्त्रेण मण्डिता भूषितास्य नलस्य प्रियाया भैम्याः सखीव चकास्ति स्म । किंभूता सा—अनुरागवशान्मनस्यन्तःकरणे या नलस्य स्थितिस्तया स्फुरन्त्सदा चित्तनिवासेनोल्लसन्त्यः सुखागतस्य सुखेनागतस्यागमनस्य संबन्धी प्रश्नः सुखेनागत इत्येवंरूपः स कृतः प्रश्नितः सुखागतप्रश्नतां प्रापितस्तूर्यनिःस्वनो यया । चिरप्रोषिते हि नायके समागच्छति सति प्रेयस्यां त्रपया तूष्णीं स्थितायां चण्डातकमण्डिता तत्सखी सुखागतप्रश्नं करोतीति स्थितिः । अत्र दलानि चण्डातकस्थाने, तूर्यनिःस्वनाश्च सुखागतप्रश्नस्थाने, कदलीस्तम्भावूरुस्थानीयौ । 'अर्धोरुकं वरस्त्रीणां स्याच्चण्डातकमंशुकम्' इत्यमरः । नृत्तोपयुक्तं पुरः पश्चाच्च प्रलम्बिवर्तुलभागद्वयं कदलीसदृशं वस्त्रं नर्तकीभिरन्तः परिधीयमानं चण्डातकम् । प्रश्नितेति, 'तत्करोति-' इति ण्यन्तान्निष्ठा, न तारकादिः ॥

विनेतृभर्तृद्वयभीतिदान्तयोः
परस्परस्मादनवाप्तवैशसः ।
अजायत द्वारि नरेन्द्रसेनयोः
समागमः स्फारमुखारवोद्गमः ॥ ९ ॥

विनेत्रिति ॥ नरेन्द्रौ भीमनलौ तयोः सेने तयोः समागमो राजगृहद्वारि एवंभूतोऽजायत जातः । किंभूतयोः—विनेतृ शासकं नलभीमलक्षणं भर्तृद्वयं तस्माद्भीतिस्तया दान्तयोः शान्तयोः । ताभ्यां नियमितत्वादकृतकलहादिसंबन्धयोः । अत एव परस्परस्मादन्योन्यस्मादनवाप्तमलब्धं वैशसं मरणं येन । सैन्यद्वयमेलने हि कलहो भवति, परं सौहार्दान्नियमितत्वात्तयोर्नाभूदित्यर्थः । तथा—स्फारोऽतिमहान्मुखारवस्यास्फुटवर्णविशेषस्य मुखध्वनेरुद्गम उदयो यत्र ॥

निर्दिश्य बन्धूनित इत्युदीरितं
दमेन गत्वार्धपथे कृतार्हणम् ।
विनीतमा द्वारत एव पद्भतां
गतं तमैक्षिष्ट मुदा विदर्भराट् ॥ १० ॥

---

१ 'लग्नातिक्रमभीरो राज्ञस्त्वरातिशयोक्तिः'—इति जीवातुः । २ 'वल्लिवेष्टितम् इति कात्यिकः पाठः—' इति सुखावबोधा ।

निर्दिश्येति ॥ विदर्भराट् भीमो मुदा उचितो जामातेति हर्षेण तमैक्षिष्ट नलमद्राक्षीत् । किंभूतम्—भीमेनैवं संमुखं गत्वा बन्धून्सुहृदो भ्रातॄन्वा स्वमातापितृसंबन्धिनो निर्दिश्याज्ञाप्य प्रस्थाप्य इतोऽनेन पथा आगम्यतामित्यादिप्रकारैरुदीरितमुक्तम् । बन्धुमुखेन ज्ञापितमार्गम् । तथा—दमाख्येन भैमीभ्रात्रार्घपथे कृतार्हणा अर्घ्यादिपूजा यस्मै तम् । तथा—अनुद्धतवेषत्वाद्विनीतम् । अत एव—द्वारत आ द्वारसीमामेवावधीकृत्य रथादुत्तीर्य पद्भ्यां पादचारित्वं गतं प्राप्तम् । दमेनैव बन्धून्पुरः प्रस्थाप्य इत इत्युदीरितमिति वा । आ द्वारतः । पदद्वयम् । पद्र इति, 'पादस्य पदाज्यातिगोपहतेषु' इति पादस्य पद् ॥

अथायमुत्थाय विसार्य दोर्युगं
मुदा प्रतीयेष तमात्मजन्मनः ।
सुरस्रवन्त्या इव पात्रमागतं
भृताभितोवीचिगतिः सरित्पतिः ॥ ११ ॥

अथेति ॥ अथ नलदर्शनानन्तरमयं भीम उत्थाय प्रत्युत्थानं कृत्वा आत्मजन्मनो भैम्याः पात्रं योग्यमागतं तं नलं दोर्युगं विसार्य प्रसार्य मुदा प्रतीयेषाऽऽलिलिङ्ग । कः कमिव—सरित्पतिः सुरस्रवन्त्या भागीरथ्या आगतं पात्रं प्रवाहमिव । नौकादिकं वा । किंभूतः—भृते धृतेऽभितः पार्श्वद्वये वीचिगतौ तरङ्गपरम्परे येन । 'वीचितति:' इत्यपि पाठः ॥

यथावदस्मै पुरुषोत्तमाय तां
स साधुलक्ष्मीं बहुवाहिनीश्वरः ।
शिवामथ स्वस्य शिवाय नन्दनां
ददे पतिः सर्वविदे महीभृताम् ॥ १२ ॥

यथावदिति ॥ अथालिङ्गनानन्तरं महीभृतां राज्ञां पतिर्बहुवाहिन्या ईश्वरः स्वामी स भीमः सर्वविदे सर्वविद्याविज्ञाय शिवाय शुभश्रवणकीर्तनाय अत एव पुरुषोत्तमाय पुरुषश्रेष्ठायास्मै नलाय साधुलक्ष्मीं समीचीनकायकान्तिम्, अत एव शिवां शुभरूपां तां भैमीं स्वस्य नन्दनां कन्यां यथावद्वेदोक्तविधिना ददे । 'मधुपर्कारपूर्वं(र्कपूर्वं) कन्यादानम्' इत्याचारः । मधुपर्कादिविधिपूर्वं ददे दातुमारब्धवानिति वा । अथ च—बहुनदीश्वरः समुद्रः पुरुषोत्तमाय तां स्वकन्यां लक्ष्मीं यथावद्ददे तस्मात्साधु । तथा—पर्वतराजो हिमालयः सर्वज्ञाय श्रीमहादेवाय स्वपुत्रीं पार्वतीं ददे तदपि साधु । यद्वा—मेनकादिपर्वतानां पालयिता समुद्रः शिवस्वरूपाय विष्णवे शुभरूपां लक्ष्मीं ददे तस्मात्साधु । अथच—बहुनदीयुक्तो हिमालयः पुरुषोत्तमरूपाय श्रीहराय श्रीपार्वतीं ददे । पार्वतीरूपां लक्ष्मीम्, लक्ष्मीरूपां पार्वतीमिति वा । नलाय पुरुषोत्तमायेव शिवायेव भैमीं लक्ष्मीमिव शिवामिव भीमः समुद्र इव हिमवानिवेत्युपमालंकारो व्यज्यते । साधुलक्ष्मीमित्यत्र समासान्तविधेरनित्यत्वात्कबभावः ॥

१ 'अर्थान्तरं प्रति विशेषणविशेष्ययोरपि श्लिष्टत्वादभिधायाः प्रकृतार्थोपक्षीणत्वात्, वाच्यार्थानुपपत्त्यभावलक्षणाच्च ध्वनेरेवौपम्यपर्यवसायी' इति जीवातुः ।

इदानीं विवाहविधिमाह—

असिस्वदद्यन्मधुपर्कमर्पितं
स तद्व्यधात्तर्कमुदर्कदर्शिने ।
यदेष पास्यन्मधु भीमजाधरं
मिषेण पुण्याहविधिं तदाकृत ॥ १३ ॥

असिस्वददिति ॥ स नलः अर्पितं भीमेन दत्तं सहमिश्रितकांस्यपात्रस्थदधिमधुघृतरूपं मधुपर्कं यदसिस्वददास्वादितवान्तदुदर्कदर्शिने विवाहोत्तरफलपरिपाकभूताधरचुम्बनादिविचारिणे लोकायेति तर्कमूहं व्यधात्तर्कयति । इति किम्—यद्यस्मादेष नलो भीमजाधररूपं मधु पास्यन्पास्यति तस्मात्तदा मधुपर्कदानावसरे मधुपर्कास्वादनमिषेण पुण्याहविधिं शुभनक्षत्रादियुक्तपुण्यदिनकृत्यं मङ्गलपूर्वमुपक्रममकृत । अन्योपि शुभकार्यं करिष्यन्शुभविवाहदिनादौ तदीयमारम्भं करोति तथा—अनेनापि भैम्यधरपाने मुहूर्तश्चक्र इति जनेन तर्कितमित्यर्थः । अधरस्यातिस्वादुत्वमुक्तम् । 'असिस्वदत' इति चौरादिकात्स्वदेश्चङ् । ये तमपि पोपदेशं मन्यन्ते तैः परत्वाभावश्चिन्त्यः । 'असिष्वदत्' इति पाठाभावाद्(णिज)र्थस्य दुर्योजत्वाच्च चौरादिक एव । पास्यन्, 'लृटः सद्वा' इति शता । पुण्यं च तदहश्च, 'राजाहः–' इति टचि 'पुण्यमुदिनाभ्यामह्नः क्लीबतेष्टा' पुण्याहं तत्र विधिरिति विग्रहः ॥

वरस्य पाणिः परघातकौतुकी
वधूकरः पङ्कजकान्तितस्करः ।
सुराज्ञि तौ तत्र विदर्भमण्डले
ततो निबद्धौ किमु कर्कशैः कुशैः ॥ १४ ॥

वरस्येति ॥ वरस्य पाणिः परघातकौतुकी शत्रुमारणकुतूहली वधूकरः पङ्कजकान्तितस्करः कमलश्रीचोरो यस्मात्तस्मात्कारणात्किमु सुराज्ञि भीमेन राजन्वति तत्र तस्मिन्विदर्भमण्डले विदर्भराष्ट्रे तौ वरवधूकरौ कर्कशैः कुशैर्निष्ठुरैर्दर्भैर्बद्धौ । उभयहस्तयोः कुशबन्धनपूर्वं पाणिग्रहणमभूत् । तत्र कुशबन्धने कारणोत्प्रेक्षा क्रियते । एको हिंस्रः,' अपरश्चौर इति सापराधत्वात्किमु बद्धावित्यर्थः । अन्यत्रापि सौराज्ये अन्यघातकतस्करौ कठिनदोरकैर्बध्येते । पाणिग्रहणं जातमिति भावः । कुशैः पाणिबन्धनं देशाचारः । यथाक्रमं करयोः शौर्यं मार्दवं च सूचितम् । सुराज्ञि, 'राजाहः–' इत्यस्य नियतनृपविषयत्वात्, अत्र बहुव्रीहिविषयत्वाट्टच्प्राप्त्यभावः ॥

विदर्भजायाः करवारिजेन य-
न्नलस्य पाणेरुपरि स्थितं किल ।
विशङ्क्य मूत्रं पुरुषायितस्य त-
द्भविष्यतोऽस्मायि तदा तदालिभिः ॥१५॥

विदर्भेति ॥ विदर्भजायाः करवारिजेन यत्तदा पाणिग्रहणसमये नलस्य पाणेरुपरि स्थितम्, तदुपरिस्थानं किल निश्चितं विपरी-

१ 'उदर्कदर्शिनामागामिफलज्ञानाम्' इति जीवातुः । 'फलस्य दर्शने ज्ञाने' इति सुखावबोधा । २ 'सापह्नवोत्प्रेक्षा' इति जीवातुः ।

तरते भविष्यतः पुरुषायितस्य पुरुषवदाचरितस्य । विपरीतरतस्येति यावत् । सूत्रं सूचनाकारि विशङ्क्य विशेषेण संभाव्य कौतुकविलोकनार्थं निकटस्थिताभिस्तदालिभिर्भैमीसखीभिरस्मायि ईषद्धसितम् । विपरीतरते हि स्त्रीपाणिरुपरि भवति । विवाहे वधूकरो वरकरस्योपरि भवति । 'सूत्रं तु सूचनाग्रन्थे' इति विश्वः ॥

इदानीमित आरभ्य 'न तेन वाहेषु-' (१६।३४) इति यावद्विवाहोचितं यौतकं प्रतिपादयति—

सखा यदस्मै किल भीमसंज्ञया
स यक्षसख्याधिगतं ददौ भवः ।
ददौ तदेष श्वशुरः सुरोचितं
नलाय चिन्तामणिदाम कामदम् ॥ १६ ॥

सखेति ॥ भीमसंज्ञया 'भीम' इति नाममात्रेण सखा स्वस्यापि भीमनामत्वात् किलोत्प्रेक्षायाम् । भवो महेश्वरोऽस्मै भीमाय यक्षेण कुबेरेण सह यत्सख्यं मैत्री तेनाधिगतं प्राप्तं यच्चिन्तामणीनां दाम मालां ददौ, एष श्वशुरो भीमस्तत्कामदं सकलाभिलषितदायि सुराणामुचितं देवधार्यं चिन्तामणिदाम नलाय ददे । उत्प्रेक्षायामेव तात्पर्यम् । 'सुतोचितम्' इति पाठे भैम्युचितम् ॥

तदेव वर्णयति—

बहोर्दुरापस्य वराय वस्तुन-
श्चितस्य दातुं प्रतिबिम्बकैतवात् ।
बभौतरामन्तरवस्थितं दध-
द्यदर्थमभ्यर्थितदेयमर्थिने ॥ १७ ॥

बहोरिति ॥ यच्चिन्तामणिदाम बभौतराम् । किंभूतम्—बहोरपरिमितस्य, तथा—दुरापस्य दुर्लभस्य दिव्यस्य वराय जामात्रे दातुं चितस्य पुरः पुञ्जीकृतस्य रत्नहेमवसनहस्त्यश्वादेर्वस्तुनः पदार्थसमूहस्य स्वस्मिन्प्रतिबिम्बस्य कैतवाद्व्याजादन्तरवस्थितं स्वस्य मध्ये स्थितमर्थिने याचकायाभ्यर्थितं सत्तदानीमेव दातुमर्हमर्थं वस्तुजातं दधद्धारयदिव । 'तद्दाविति' पूर्वेणान्वयः । 'यदा यद्यो याचिष्यते तदेव तद्वस्तु तस्मै दातव्यमिति बुद्ध्या स्वनाम सार्थकीकर्तुं वस्तुजातमन्तः स्थापितमिवेत्यर्थः । बहोरिति भाषितपुंस्कम् ॥

असिं भवान्याः क्षतकासरासुरं
वराय भीमः स्म ददाति भासुरम् ।
ददे हि तस्मै धवनामधारिणे
स शंभुसंभोगनिमग्नयानया ॥ १८ ॥

असिमिति ॥ भीमः क्षतो हतः कासराख्यो महिषाख्योऽसुरो येन तं भासुरं देदीप्यमानं भवान्या दुर्गाया असिं खड्गं वराय ददाति स्म । तस्याः खड्गस्तेन कथं प्राप्त इत्यत आह—हि यस्मात्स्फुटं वा शंभुना सह संभोगस्तत्र निमग्नया सुरतरसासक्तयानया दुर्गया आत्मवैरिदलनानन्तरं स्वस्य प्रयोजनाभावात्सुरतासक्तत्वे खड्गधारणस्य रसभङ्गजनकत्वाच्च धवनामधारिणे 'भीम' इति शिवनामधारकाय शंभुसेवकाय तस्मै भीमाय ददे । शंभौ सम्यगविच्छेदेन निरन्तरं भोगाय निमग्नया दक्षिणार्धेन प्रविष्टया वा । तत्रवस्तया प्रसाद्य दत्तः । 'लुलायो महिषो वाहद्विषत्कासरसैरिभाः' इत्यमरः । भासुरम् 'भञ्जभास-' इति घुरच् ॥

अधारि यः प्राञ्महिषासुरद्विषा
कृपाणमस्मै तमदत्त कूकुदः ।
अहायि तस्या हि धवार्धमज्जिना
स दक्षिणार्धेन पराङ्गदारणः ॥ १९ ॥

अधारीति ॥ महिषासुरद्विषा दुर्गया प्राग्यः खड्गोधारि । कूकुदः कन्यादाता भीमस्तं कृपाणं खड्गं सत्कारपूर्वं सालंकारमस्मा अदत्त । कथं तेन लब्ध इत्याशङ्क्याह—हि यस्मादर्धनारीश्वरत्वाद्धवस्य भर्तुः शिवस्यार्धमज्जिनार्धप्रविष्टेन तस्याः पार्वत्या दक्षिणार्धेन शरीरदक्षिणभागेन पराङ्गदारणो वैरिभङ्गदारणः स खड्गोऽहायि त्यक्तः । सखड्गेन धववामार्धं विशता मदीयदक्षिणार्धेन तद्विदारिष्यत इति भिया त्यक्तः । 'अदायि' इति पाठेऽनर्थो न । तस्या दक्षिणार्धेन तस्मै यस्माददायीत्यर्थः । अयं पाठः साधीयान् । 'सत्कृत्यालंकृतां कन्यां यो ददाति स कूकुदः' इत्यमरः ॥

उवाह यः सान्द्रतराङ्गकाननः
स्वशौर्यसूर्योदयपर्वतव्रतम् ।
सनिर्झरः शाणनधौतधारया[2]
समूढसंध्यः क्षतशत्रुजासृजा ॥ २० ॥

उवाहेति ॥ यः खड्गः स्वस्य भीमस्य खड्गस्यैव वा शौर्यं प्रतापरूपो यः सूर्यस्तस्योदयस्तत्संबन्धी पर्वत उदयाचलस्तस्य व्रतं नियमं सदासूर्योदयकारित्वलक्षणमुवाहाधृत । किंभूतः—सान्द्रतराण्यल्पानि सूक्ष्माण्यङ्गान्यङ्गकानि मुद्गपक्षीवल्लीरूपाणि तेषामननं जीवनं यत्र । तदाधार इति यावत् । सान्द्रतराणां पूर्वोक्तानामेवाङ्गानां काननं समूहो यत्र । उदयाचलपक्षे—सान्द्रतराण्यङ्गेषूर्ध्वाधोभागेषु काननानि वनानि यस्य तथा—शाणनेन लोहकारचक्रघर्षणेन धौतयोज्ज्वलीकरणे(न) दत्तपाणीकया धारया कृत्वा सनिर्झरः सप्रवाहः । धारैव निर्झरीभूतेत्यर्थः । उदयाचलोऽपि सनिर्झरो भवति । तथा—क्षतेभ्यः खण्डितेभ्यः शत्रुभ्यो जातेनासृजा रक्तेन कृत्वा सम्यक् रूढा प्राप्ता संध्या येन । प्रातःसंध्यास्थाने रक्तमेव येन धृतमित्यर्थः । सम्यग्धृता संध्या त्सरुफलकसंधिर्येन । अतिदृढसंधिरित्यर्थ इति वा । यद्वा—क्षतशत्रुजासृजा समूढः प्राप्तः संधिर्यस्य । त्सरुफलकसंधिपर्यन्तं शत्रुशरीरे निमग्न इत्यर्थः । उदयाचलोऽप्यूढप्रातःसंध्यः । उदयाचलतुल्योऽभूदित्यर्थः । तमदत्त इति पूर्वेण संबन्धः । 'अङ्गक-' इति पक्षे 'अल्पे' इति [3]कन् ॥

यमेन जिह्वा प्रहितेव या निजा
तमात्मजां याचितुमर्थिना भृशम् ।

---

१ 'परार्ध' इति क्वाचित्के पाठे 'परार्धसंख्यानाम्' इति, 'परस्य धवस्य यदर्धं शरीरवामलक्षणम्' इति वा—इति **सुखावबोधा** । २ 'शाणनिधौतधारया' इति पाठः । 'शाणन-'इति पाठश्चिन्त्यः—' इति **सुखावबोधा** । ३ 'रूपकालंकारः-' इति **जीवातुः** ।

स तां ददेऽस्मै परिवारशोभिनीं
करग्रहार्हामसिपुत्रिकामपि ॥ २१ ॥

यमेनेति ॥ स भीतस्तामसिपुत्रिकां छुरिकामप्यस्मै ददे । न केवलं खड्गमित्यपेरर्थः । न केवलं पुत्रीमपि तु छुरिकामपि । तां काम्—भृशमर्थिना भैम्यामनुरागिणा यमेन तं भीमं भैमीं मह्यं देहीत्यात्मजां याचितुं दूतीप्रेषणावसरे निजा स्वीया प्रहिता प्रेषिता जिह्वेव । नियतं प्राणहारित्वाद्यमजिह्वातुल्यातितीक्ष्णा । शौर्येण तुष्टो यमो यां भीमाय दत्तवान् । किंभूताम्—परिवारशालिनीं चर्मकोशेन शोभमानाम् । अथच-सखीलक्षणपरिजनशोभिनीम् । करग्रहार्हां हस्तग्रहणयोग्याम् । साधुमुष्टिदेशाम् । पूर्वं यद्यपि भैमी दत्ता, तथापि परिवारसाहित्येनेदानीं दत्तेत्यर्थः । छुरिकां सखीश्च यौतकत्वेन ददाविति भावः । 'छुरिका चासिपुत्रिका' इत्यमरः । याचिर्द्विकर्मा ॥

यदङ्गभूमी बभतुः स्वयोषिता-
मुरोजपत्रावलिनेत्रकज्जले ।
रणस्थलस्थण्डिलशायिताव्रतै-
र्गृहीतदीक्षैरिव दक्षिणीकृते ॥ २२ ॥

यदिति ॥ यस्याः शत्रुया अङ्गभूमी पट्टिकाया ऊर्ध्वाधोदेशौ स्वयोषितां स्वस्वस्त्रीणामुरोजपत्रावलिः कस्तूरिकालिखितस्तनपत्रवल्ली नेत्रकज्जलं च एते इव बभतुः शुशुभाते । किंभूते—रणस्थले या स्थण्डिलशायिता । व्रतवशाद्यो वेदिकायां शेते स स्थण्डिलशायी तद्भाव एव व्रतं तत्र विषये गृहीता दीक्षा यैः स्वीकृतनियमविशेषेण भूपतितैः शत्रुभिर्दक्षिणीकृते व्रताङ्गदक्षिणात्वेन शत्रुयै दत्ते । दीक्षोपदेशिने हि स्त्रीणामलंकारादि दक्षिणात्वेन दीयते । छुरिकयैव स्वकृतमारणद्वारा शत्रूणां रणस्थलस्थण्डिलशायितादिव्रतमुपदिष्टम्, तस्मात्तस्यै ते दक्षिणात्वेन दत्ते। पत्रवल्लीकज्जले इव । लोहमुद्गरश्यामवर्णौ स्तनपत्रवल्लीनेत्रकज्जलत्वेनोत्प्रेक्षितौ । इयं छुरिका निश्चितपरविदारणा । वैरिनार्यश्च वैधव्यात्त्यक्तकज्जलपत्रावल्य इत्यर्थः । स्थण्डिल एव व्रतवशाच्छेत इति । 'सुप्यजातौ णिनिस्ताच्छील्ये' इत्यनुवृत्तौ 'व्रते' इति णिनिः ॥

पुरैव तस्मिन्समदेशि तत्सुता-
भिकेन यः सौहृदनाटिनाग्निना ।
नलाय विश्राणयति स्म तं रथं
नृपः सुलङ्घ्याद्रिसमुद्रकापथम् ॥ २३ ॥

पुरेति ॥ तस्य भीमस्य सुतायामभिकेनानुरागिणा । तथा—'भैमी दातव्येति बुद्ध्यायं न प्रेषितः किंतु शत्रुभराक्रान्तभूभारनिराकरणद्वारा त्वमस्माकं सुहृदिति प्रेषितः' इति सौहार्दं स्नेहं नाटयति एवंशीलेनाग्निना पुरैव दूतीप्रेरणावसर एव यो रथस्तस्मिन्भीमे समदेशि प्रेषितो दत्तः । नृपो नलाय तं रथं विश्राणयति स्म । किंभूतम्—सुलङ्घ्या अनायासेनातिक्रमणीया अद्रयोत्युच्चपर्वताः समुद्राः, कापथा विषमा निम्नगर्तरूपा मार्गाश्च यस्य । सर्वत्र संचरणसमर्थम् । 'कदध्वा कापथः समौ' इत्यमरः । कापथ इति 'का पथ्यक्षयोः' इति कादेशः । 'क्रक्-' आदिना समासान्तः ॥

तमेव वर्णयति—

प्रसूतवत्ता नलकूबरान्वय-
प्रकाशितास्यापि महारथस्य यत् ।
कुबेरदृष्टान्तबलेन पुष्पक-
प्रकृष्टतैतस्य ततोऽनुमीयते ॥ २४ ॥

प्रसूतेति ॥ अस्यापि भीमेन नलाय दत्तस्यापि महतो जवादिगुणयुक्तस्य रथस्य प्रकृष्टा सूतवत्ता सूतो विद्यते यस्य स सूतवान् तद्भावः सूतवत्ता सारथिमत्ता प्रकृष्टश्चासौ सूतश्च तद्वत्ता वा । यद्यस्मान्नलस्य कुबेरेण युगंधरेण सह योऽन्वयः संबन्धः । नलेन सह वा यः कूबरस्यान्वयः । तेन प्रकाशिता प्रकटीकृता शोभिता च । ततस्तस्माद्धेतोरेतस्य महारथस्य पुष्पकवत्कामगामिधनदविमानवत्प्रकृष्टतोत्कृष्टगुणयुक्तता । पुष्पकात्सकाशाद्वा जवादिगुणैरधिकता । कुबेरस्य दृष्टान्त उदाहरणं तस्य बलेन सामर्थ्येनानुमीयतेऽनुमानजन्यज्ञानस्य विषयीक्रियते । न केवलं कुबेरस्य महारथस्य, किंत्वस्यापीति समुच्चयेन व्याप्तिप्रदर्शनपुरःसरमुपनयनिगमने सूचयत्यपिशब्दः । कुबेरस्यापि महारथस्यायुतसंख्ययोधस(ह)युध्वनः(त्व) पुष्पकविमानेन कृत्वा प्रकृष्टता प्रकृष्टवस्तुमता प्रकृष्टेन कृष्टता । तेनोह्यमानता वा भवति एवं कुबेरदृष्टान्तबलेनाग्र एतस्य पुष्पकप्रकृष्टता भविष्यतीत्यनुमीयते । यतोऽस्यापि कुबेरस्य नलकूबराख्येनान्वयेन संतानेन पुत्रेण प्रकाशिता प्रकटिता शोभिता प्रसूतवत्ता जनयितृता इति साधर्म्यदृष्टान्तः श्लेषबलेन । अनुमानं त्वेवम्—विमतो महारथः पुष्पकप्रकृष्टो भवितुमर्हति नलकूबरान्वयप्रकाशितप्रसूतवत्त्वात् । यो यो नलकूबरान्वप्रकाशितप्रसूतवत्तावान्स स पुष्पकप्रकृष्टः यथा कुबेर इत्यनुमानवशादेतत्सर्वमुच्यत इति यथाकथंचिच्छ्लोको व्याख्येयः । प्रकृष्टः सूतः पुत्र इति वा । पुष्पकस्य नलः सारथिर्नास्ति (इति) तेन तुल्यता नास्ति । किंतु तत्पतिना कुबेरेणेति । अस्य तु नलः सारथिरित्ययं रथो रमणीय इति भावः । 'कूबरस्तु युगंधरः' इत्यमरः ॥

महेन्द्रमुच्चैःश्रवसा प्रतार्य य-
न्निजेन पत्याऽकृत सिन्धुरन्वितम् ।
स तद्ददेऽस्मै हयरत्नमर्पितं
पुराऽनुबन्धुं वरुणेन बन्धुताम् ॥ २५ ॥

महेन्द्रमिति ॥ सिन्धुः समुद्रः नाम्ना उच्चैःश्रवसा । अथ च—उन्नतकर्णेन सलक्षणेन । अथच—दीर्घकर्णेन दुर्लक्षणेन । अश्वेन

१ 'शस्त्रीपुत्रिकयोः प्रकृतत्वात्केवलप्रकृतश्लेषः-' इति जीवातुः । २ 'अस्येत्थं साधनप्रक्रिया—सुहृदयस्य भावः । युवादित्वादण्, ततो 'हृदयस्य हृल्लेखयदण्लासेषु' इति हृदादेशः । तथाच हृदुत्तरपदात्प्रत्ययाविधानेन 'हृद्भगसिन्ध्वन्ते' इत्युभयपदवृद्धिर्न । अत एव 'सौहृददौर्हृदशब्दावणि हृद्भावात्' इति वामनः । ३ 'सुलघा-' इति पाठोपि सुखावबोधायाम् ।

१ 'अत्रानुमानालंकारः । .....हेतुत्वेन तर्कानुमानेन वैलक्षण्यम् रूपकं च । प्रसूतवत्तादिप्रकाशितैः तत्प्रकाशितेति श्लिष्टरूपकं द्रष्टव्यम्-' इति जीवातुः ।

महेन्द्रं प्रतार्य यद्धयरत्नं निजेन पत्या स्वस्वामिना वरुणेनान्वितं युक्तमकृत। वरुणायादत्तेत्यर्थः। स भीमस्तदश्वरत्नमस्मै नलाय ददे। अनेन कथं लब्धमित्यत आह—किंभूतम्—वरुणेन बन्धुतामलीकमैत्रीमनुबन्धुं वर्धयितुं पुरा दूतीप्रेषणावसरेऽर्पितं भीमाय दत्तम्। उच्चैःश्रवसोप्यधिकमश्वं तस्मै ददाविति भावः॥

जवादवारीकृतदूरदृक्पथ-
स्तथाक्षियुग्माय ददे मुदं न यः।
ददद्दिदृक्षादरदासतां यथा
तयैव तत्पांसुलकण्ठनालताम्॥ २६॥

जवादिति॥ योऽश्वो लोकानामक्षियुग्माय नेत्रद्वयाय दिदृक्षायाः स्वीयरूपदर्शनेच्छाया आदरस्तस्य दासतां वशत्वं ददद्ददानः पारवश्यं कुर्वञ्जवाद्धेतोरवारीकृतोऽर्वाक्तीरीकृतो दूरो बहुयोजनो दृक्पथो नेत्रपथो येन। दूरं गतत्वान्नेत्रयोरविषय इति यावत्। एवंविधः सन् यथा नेत्रयुगाय मुदं प्रीतिं न ददे। दर्शनाभावात्प्रीतिं नोत्पादितवानित्यर्थः। तथा पुनरागमनसमयेऽपि तयैव दिदृक्षादरदासतया तस्य नेत्रयुगस्य पांसुलं रेणुयुक्तं कण्ठनालं तस्य भावस्तत्ता तां लक्षणया उत्कण्ठितत्वं ददत् मुदं न ददे। तमश्वं दद इति पूर्वेण संबन्धः। यथातथाशब्दौ व्यत्यस्तौ योज्यौ। रूपादिविलोकनकौतुकिभिः यावदश्वो द्रष्टुमारब्धः, तावद्वेगवशाद्दूरं गतत्वान्न दृष्टः। इदानीं यद्यपि न दृष्टः, तथापि व्याघुट्यागमनेऽवश्यं द्रक्ष्याम इति बुद्ध्या व्यापारान्तरत्यागपुरःसरं तद्रूपादिविशेषदर्शनादरान्नेत्रे प्रसार्य तत्रैव यावत्स्थिताः, तावत्पुनरागमनसमयेऽपि खुरपुटक्षुण्णक्षोणीरेणुसंबन्धान्न दृष्टः, तथापि दर्शनाभावादुत्कण्ठाया अपरिपूर्णत्वान्नेत्रयुगस्य हर्षो नाभूदित्यर्थः। जवादप्रतिषिद्धो दूरो दृक्पथो येन अतिदूरं नेत्राभ्यामनुगतमार्ग इति यावत्। एवंभूतो योऽक्षियुगाय दर्शनहर्षे तथा नादत्त यथा दिदृक्षादरदासतां ददानः सन् तयैव तस्य नेत्रयुगस्य। द्रष्टुर्वा। शुष्ककण्ठत्वं ददे। निरन्तरदर्शनाभावात्तादृशी प्रीतिर्न जाता, किंतु—पूर्वोक्तप्रकारेण नेत्रयोर्द्रष्टुर्वा भूरेणुसंबन्धाच्छुष्ककण्ठत्वमेव जातमित्यर्थः। द्रष्टव्यदर्शनाद्धि दृङ्मार्गस्य प्रतिषेधो भवति। अत्र तु वेगातिशयाद्दर्शनाभावादप्रतिषेधस्तस्येति वा। अथच—जलरहितः कृतो दूरो दृष्टिगोचरो यो मार्गः स पिपासोर्नेत्रयुगाय हर्षं न ददाति। किंतु जलावलोकने पारवश्यम्। तथापि पिपासोः शुष्ककण्ठत्वं चेत्युक्तिरिति वा। 'दाशताम्' इति पाठे दिदृक्षादरस्य दानपात्रत्वं ददावित्यर्थः। 'दासृ दाने' 'दाशगोघ्नौ संप्रदाने' इति निपातनाद्दाश्यतेऽस्मै दाशो दानपात्रम्। पारावारे परार्वाची तीरे' इत्यमरः। पक्षे—नास्ति वारि यस्मिन्नसाववारिः। पक्षे—वारणं वारः ण्यन्ताद्घञ् स नास्त्यस्यासाववारः। अवारशब्दाद्, अवारिशब्दाच्च च्विः[2]॥

दिवस्पतेरादरदर्शिनादरा-
दढौकि यस्तं प्रति विश्वकर्मणा।
तमेकमाणिक्यमयं महोन्नतं
पतद्ग्रहं ग्राहितवान्नलेन सः॥ २७॥

दिवस्पतेरिति॥ दिवस्पतेरिन्द्रस्य भैम्यनुरागवशाद्भीम आदरदर्शिना विश्वकर्मणा यस्तं भीमं प्रत्युद्दिश्याऽदरादढौकि उपदारूपेण प्रेषितः स भीमस्तमेकं महापरिमाणं माणिक्यं तन्मयं तद्रूपं तन्निर्मितं वा महोन्नतमत्युच्चं पतद्ग्रहं पतद्गण्डूषजलताम्बूलोद्गारादि गृह्णातीति तं नलेन प्रयोज्येन ग्राहितवानङ्गीकारितवान्। नलाय ददे इत्यर्थः। प्रभोर्यस्मिन्नादरः, तं तदनुजीविनः स्वस्वशिल्पेन सेवन्त इति लोकरीतिः। 'पतद्ग्राहः पतद्ग्रहः' इत्यमरः। दिवस्पतेः 'तत्पुरुषे कृति' इति बाहुलकात्षष्ठ्या अलुकि कस्कादित्वाद्विसर्जनीयस्य सः। 'षष्ठ्याः पतिपुत्र–' इति छन्दोविषयत्वात्। ढौकेर्गत्यर्थत्वात्सकर्मकत्वात्कर्मणि चिण्। गृह्णातीति पचाद्यचि पततो ग्रह इति समासः॥

नलेन ताम्बूलविलासिनोज्झितै-
र्मुखस्य यः पूगकणैर्भृतो न वा।
इति व्यवेचि स्वमयूखमण्डला-
दुदञ्चदुच्चारुणचारुणश्चिरात्॥ २८॥

नलेनेति॥ उदञ्चदुच्चारुणचारुण उदित्वरोन्नतगरुडाग्रजवत्, उदित्वरोन्नतसूर्यवद्वा सुन्दरादतिरक्तात्। ऊर्ध्वं प्रसरत्किरणोऽतिशयितो यः स्वीयो (रक्त)रूपगुणस्तेन चारोर्वा रक्ततरात्स्वमयूखस्य मण्डलात्संघाद्धेतोस्ताम्बूलविलासिना ताम्बूलरसमात्रग्राहिणा पूगनागवल्लीदलखण्डत्यागिना नलेन गृहीतरसत्वादुज्झितैस्त्यक्तैर्माणिक्यशकलसदृशैर्मुखोद्गाररूपैः पूगकणैः क्रमुकाल्पशकलैरयं भृतः पूरितो न वा पूरित इति यः पतद्ग्रहश्चिराद्भूयसा कालेन सूक्ष्मेक्षिकया क्रमेण मुक्तसंशयैर्लोकैर्व्यवेचि निश्चितः। तं ग्राहितवानिति पूर्वेण संबन्धः। समीपं गत्वा सूक्ष्मेक्षिकया अयमिदानीं पूगकणैर्भृत इति निश्चितः, कदाचिच्च इदानीं न भृत इत्यपि निश्चित इत्यर्थः। भृताभृतत्वसंदेहे रक्तमयूखमण्डलं हेतुः। माणिक्यमयत्वादतिरिक्त इत्यर्थः। इदानीं ताम्बूलस्यानवसराद्भाविन्यपि भूतवदुपचारः। यद्वा—तस्यैवातिरक्तत्वाज्जनस्योद्गारत्यागभ्रमः। अमी पूगकणाः किं वा किरणसमूह इति संदेहश्चिरान्निर्णीत इति वा[1]॥

मयेन भीमं भगवन्तमर्चता
नृपेपि पूजा प्रभुनाम्नि या कृता।
अदत्त भीमोपि स नैषधाय तां
हरिन्मणेर्भोजनभाजनं महत्॥ २९॥

मयेनेति॥ भगवन्तं षड्गुणैश्वर्यसंपन्नं भीमं शिवमर्घ्यादिभिरुपचारैरर्चता पूजयता शैवेन मयनाम्नाऽसुरेण प्रभुनाम्नि शिवनामधारके नृपेऽपि भीमेऽपि पूजा कृताऽकारि, स भीमोऽपि तां पूजां पूजारूपं हरिन्मणेर्गरुडमणिसंबन्धि विषापहारसमर्थमतिविस्तृतं भोजनार्थं भाजनं नैषधायादत्त। मयेन तस्मै दत्तम्, सोपि नलायादत्तेत्यपिशब्दः समुच्चयार्थः। अर्चतिर्भौवादिकः॥

१ 'तृषैव' इति प्राचीनलिखितपुस्तकपाठः। २ 'अपारीकरणाद्यसंबन्धेऽपि तत्संबन्धोक्तेरतिशयोक्तिभेदः' इति जीवातुः।

१ 'निश्चयान्तः संदेहालंकारः' इति जीवातुः।

छदे सदैव च्छविमस्य बिभ्रतां
न केकिनां सर्पविषं विसर्पति ।
न नीलकण्ठत्वमधास्यदत्र चेत्
स कालकूटं भगवानभोक्ष्यत ॥ ३० ॥

छदे इति ॥ अस्य भोजनपात्रस्य छविं नीलां द्युतिं सदैव छदे पिच्छे बिभ्रतां केकिनां मयूराणां सर्पविषं न प्रसर्पति । तच्छरीरं नाक्रामतीत्यर्थः । स भगवान्छिवोऽत्र पात्र एतदाधारत्वेन कालकूटं चेदभोक्ष्यत तर्हि नीलकण्ठत्वं नाधास्यत् । अत्र पात्रे विषभक्षणे कृते सति तज्जीर्णतया नीलकण्ठत्वं न स्यादित्यर्थः । क्रियातिपत्तौ लृङ् । 'भुजोऽनवने' इति तङ् ॥

विराध्य दुर्वाससमस्खलद्दिवः
स्रजं त्यजन्नस्य किमिन्द्रसिन्धुरः ।
अदत्त तस्मै स मदच्छलात्मदा
यमभ्रमातङ्गतयैव वर्षुकम् ॥ ३१ ॥

विराध्येति ॥ स भीमस्तस्मै नलाय मदच्छलाद्दानजलव्याजात्सदा वर्षुकं वर्षणशीलं यं हस्तिनमदत्त । स दुर्वाससं विराध्य रोषयित्वा तच्छापादिन्द्रसिन्धुर ऐरावतो दिवः सकाशादस्खलत्पतितः किम् । भुवमागत ऐरावणः किमित्यर्थः । विराधे हेतुः—अस्य दुर्वाससः स्रजं मालां त्यजन्भुवि क्षिपन् । अत्र पौराणिकी कथा—कदाचिदैरावतमारुह्य गच्छत इन्द्राय दुर्वाससा प्रसादेन मन्दारपुष्पमाला दत्ता, सा चेन्द्रेण करीन्द्रकुम्भे स्थापिता, स तां शुण्डादण्डेनाधश्चिक्षेप, ततः कुपितेन मुनिना त्वमपि मालावदधः पतेति शप्तः । तन्मूलेयमुत्प्रेक्षा । वर्षुकत्वेन पुनरुत्प्रेक्षते—अभ्रमातङ्गतया ऐरावतत्वेनेव । ऐरावतो हि सदा मदजलं वर्षति अयमपि तावत्स्वर्गाद्भ्रष्टः स एव इति सदा दानजलं मुञ्चतीत्यर्थः । अभ्रवन्मातङ्गस्तत्तया वा । श्यामत्वात्स्वजलघननुल्य इत्यर्थः । अस्य भीमस्य संबन्धित्वेन अस्खलत् किमिति वा । वर्षुकम् 'लषपत-' इत्युकञ् ॥

मदान्मदग्रे भवताथवा भिया
परं दिगन्तादपि यात जीवत ।
इति स्म यो दिक्करिणः स्वकर्णयो-
र्विनैव वर्णस्रजमागतैर्गतैः ॥ ३२ ॥

मदादिति ॥ यो गजः स्वकर्णयोरागतैर्गतैरागमनैर्गमनैश्च कृत्वा वर्णस्रजं वर्णमालां विनैव दिक्करिणो दिग्गजान्प्रति इत्याह स्मेव । इति किम्—भो दिग्गजाः, भवतां बलाभिमानश्चेदस्ति तर्हि मदाद्युद्धं कर्तुं यूयं मदग्रे भवत मम पुरस्तात्तिष्ठत । अथवा चेन्मदो नास्ति, तर्हि भिया दिगन्तमथा यूयं दिगन्तादपि परं दूरं यात गच्छत, पलायिताश्च सन्तस्तत्रैव सुखेन जीवत स्वप्राणान्रक्षतेति । इयं लुप्तोत्प्रेक्षा ॥

बभार बीजं निजकीर्तये रदौ
द्विषामकीर्त्यै खलु दानविप्रुषः ।
श्रवःश्रमैः कुम्भकुचां शिरःश्रियं
मुदे मदस्वेदवतीमुपास्त यः ॥ ३३ ॥

बभारेति ॥ यो गजो निजकीर्तये रदौ दन्तौ बीजं कारणं बभार । द्विषामकीर्त्यै दानविप्रुषो दानोदबिन्दूनेव कारणं बभार । स्वोत्प्रेक्षायाम् । दन्ताभ्यां परविदारणात्स्वयशःसमुत्पत्तेस्तयोः कीर्तिकारित्वम् । अथ च—कीर्तिलक्षणस्य कार्यस्य शुभत्वात्कारणेनापि तादृशेनैव भवितुं युक्तमिति कीर्तिबीजभूतकन्दाविव । मदजलगन्धाघ्राणमात्रेण परगजानां भङ्गादानबिन्दूनां तदकीर्तिकारणत्वम् । कार्यस्य श्यामत्वात्कारणेनापि तादृशेनैव भवितुं युक्तमिति श्यामदानबिन्दव एवाकीर्तेर्बीजमिवेत्युत्प्रेक्षा । तथा—मुहुर्मुहुर्गतागतैः श्रवःश्रमैः कर्णप्रयासैरेव व्यजनचालनैः कृत्वा कुम्भाविव कुचौ यस्यास्तां मदस्वेदवतीं दानरूपघर्मोदकयुक्तां शिरःश्रियं घर्मजलापहरणद्वारा तस्या एव मुदे हर्षायोपास्त सिषेवे । एवंभूतं शिरो दधानः प्रीतिमुत्पादयदित्यर्थः । कामकेलिखिन्नां कुम्भकुचां कामिनीं स्वेदमपनयन्कामी तालवृन्तचालनेन वीजयतीति मदस्य स्वेदरूपेण शिरःश्रियः स्त्रीत्वरूपणम् । अथ-त्तेति, 'मुदा' इत्यपि पाठः ॥

न तेन वाहेषु विवाहदक्षिणी-
कृतेषु संख्यानुभवेऽभवत्क्षमः ।
न शातकुम्भेषु न मत्तकुम्भिषु
प्रयत्नवान्कोपि न रत्नराशिषु ॥ ३४ ॥

नेति ॥ तेन भीमेन नलाय विवाहे दक्षिणीकृतेषु कन्यादानदक्षिणात्वेन दत्तेषु वाहेषु रथादिषु तुरगेषु वा संख्यानुभवे संख्याज्ञाने प्रयत्नवानपि कोऽपि कश्चिदपि क्षम इयन्तो वाहा दत्ता इत्येवं संख्यापरिच्छेदे समर्थो नाभवत् । तथा—शातकुम्भेष्वनेकभूषणभूतघटिताघटितकाञ्चनेषु न । तथा—मत्तकुम्भिषु गलन्मदमातङ्गेषु च न । तथा—रत्नराशिषु न । क्षमोऽभवदिति सर्वत्र, विवाहदक्षिणीकृतेष्विति च । बहुतरं यौतकं दत्तमिति भावः ॥

करग्रहे वाम्यमधत्त यत्तयोः
प्रसाद्य भैम्यानु च दक्षिणीकृतः ।
कृतः पुरस्कृत्य ततो नलेन स
प्रदक्षिणस्तत्क्षणमाशुशुक्षणिः ॥ ३५ ॥

करेति ॥ य आशुशुक्षणिरग्निस्तयोः करग्रहे विवाहे विषये वाम्यं वक्रत्वमधत्त भेजे । भैम्यभिलाषाञ्जलाकारधारणादिद्वारा पूर्वं विरुद्धोऽभूत, अनु पश्चाञ्जलवरणावसरे भैम्या स्तुतिध्यानादिना प्रसाद्य संतोष्य दक्षिणीकृत आनुकूल्यं नीतः सोऽग्निस्ततः पाणिग्रहणानन्तरं नलेन पुरस्कृत्योल्लेखनादिसंस्कारपूर्वमग्रे प्रतिष्ठाप्य तत्क्षणं तस्मिन्विवाहसमये प्रदक्षिणः प्रकर्षेणापसव्यः कृतो दक्षिणभागेन वलयाकारेण वेष्टितः । अथ च—यः पूर्वं यौतकदानकाले वामभागेऽभूत, पश्चाद्भैम्या फूत्कारादिना प्रबोध्यानुकूलः कृतः । अथ च—दक्षिणभागे कृतः सोऽर्चनादिभिः संपूज्य नलेन सुतरामनुकूलः कृतः । अथ च—प्रदक्षिणे प्रकर्षेण दक्षिणभागे कृतः । अन्योपि यो महान्पूर्वं विरोध्यते स विवाहादौ प्रयत्ना-

१ 'उत्प्रेक्षात्रयमंसृष्टिः' इति जीवानुः । २ 'विवाहादिषु संख्यासंबन्धेऽप्यसंबन्धोक्तिरतिशयोक्तिभेदः' इति जीवानुः ।

नुकूलः क्रियत इत्युक्तिः । अत्र क्वचित्क्वचिद्विधिक्रमभङ्गो देशाचाराच्छाखाभेदात्कुलाचारविशेषाद्वा बोद्धव्यः । न पुनः श्रीहर्षकवेरज्ञानलेशोऽपि । अत एव पूर्वं यथाविधीति प्रायुङ्क्त । आशोष्टुमिच्छति, 'आङि शुषेः सनश्छन्दसि' इत्यनिः । शिष्टप्रयुक्तत्वाद्भाषायामपि साधुत्वं ज्ञेयम् ॥

स्थिरा त्वमश्मेव भवेति मन्त्रवा-
गनेशदाशास्य किमाशु तां ह्रिया ।
शिला चलेत्प्रेरणया नृणामपि
स्थितेस्तु नाचालि विडौजसापि सा ॥३६॥

स्थिरेति ॥ हे भैमि, 'इममश्मानमारोह' इत्युच्चार्य 'त्वमश्मेव स्थिरा भव' इति नलेनोच्चारिता मन्त्ररूपा वाक्तां भैमीमाशास्य शिलावन्निश्चला भवेति तस्यै आशिषं दत्त्वा आश्वनेशन्नाश । वर्णा उच्चारिताः प्रध्वस्ता भवन्ति । तत्रोत्प्रेक्षते—ह्रिया किम् । किमिति तस्या लज्जेत्यत आह—शिला अल्पतेजसां नृणामपि प्रेरणया करचरणव्यापारमात्रेण चलेत्स्वस्थानादन्यत्र गच्छेत् । सा तु भैमी पुनरतिप्रभाविणा विडौजसेन्द्रेणापि स्थितेर्मनोव्यापारमात्रस्वीकृतनलपतित्वरूपाया मर्यादायाः सकाशान्नाचालि पतिव्रतासीमां न त्याजितेति । स्थिरतरत्वेनाधिकाया भैम्या अहं हीनेति स्वदोषं विचिन्त्य लज्जयैव नष्टेत्यर्थः । वैधमश्मारोहणं तेन कारितमिति भावः । 'नश अदर्शने' अस्माल्लुङि पुषादित्वादङि 'नशिमन्योरलिक्ष्येत्वम्' (वार्ति०) इत्येत्वे रूपम् ॥

प्रियांशुकग्रन्थिनिबद्धवाससं
तदा पुरोधा विदधे विदर्भजाम् ।
जगाद विच्छिद्य पटं प्रयास्यतो
नलादविश्वासमिवेप विश्ववित् ॥ ३७ ॥

प्रियेति ॥ तदा वह्निसंनिधिकाले पुरोधा गौतमो विदर्भजां भैमीं प्रियस्य नलस्यांशुकेन सह ग्रन्थिना निबद्धं वासो यस्यास्तामेवंविधां विदधे चकार । उत्प्रेक्षते—पटं विच्छिद्य कर्तित्वाऽरण्ये भैमीं विहाय प्रयास्यतो गमिष्यतो नलात्सकाशादेष पुरोधा अविश्वासं विश्वासाभावं जगादेव । वस्त्रं छित्त्वा त्वां हित्वायं गमिष्यतीत्येतस्य विश्वासो न कार्य इत्यस्य वस्त्रेण सह स्ववस्त्रस्य ग्रन्थिं दत्त्वैवानेन सह विचरणीयमित्युवाचेवेत्यर्थः । कथमेतज्ज्ञातमत आह—यतो विश्वं सर्वं वेत्तीति । कालज्ञयज्ञ इत्यर्थः । तस्माद्भविष्यदपि तेन ज्ञातमित्यर्थः । कलिना पराभूतो नलो द्यूतहारितसर्वस्वः स्वीयैस्त्यक्तो द्वापरेण कलिना पक्षिरूपेण तद्धारणार्थं क्षिप्तस्य वस्त्रस्यापहाराद्वस्त्रान्तराभावाद्भैमीवस्त्रार्धधारी सन्निद्राणायास्तस्या वस्त्रार्धं विच्छिद्य तां महारण्ये तत्याजेति महाभारते कथा । वैधमुभयवस्त्रग्रन्थिबन्धनं तेन कृतमिति भावः । 'विदधत्' इति पाठे कुर्वन्सन्निति योजना ॥

ध्रुवावलोकाय तदुन्मुखभ्रुवा
निर्दिश्य पत्याभिदधे विदर्भजा ।
किमस्य न स्यादणिमाक्षिसाक्षिक-
स्तथापि तथ्यो महिमागमोदितः ॥ ३८ ॥

ध्रुवेति ॥ तस्य ध्रुवस्य दर्शनार्थमुन्मुखी भ्रूर्यस्य तेन पत्या नलेन विदर्भजा निर्दिश्याज्ञाप्य ध्रुवस्यावलोकनार्थमभिदधे उक्ता । तदुन्मुख्या भ्रुवा कृत्वा संज्ञाप्येति वा । ननु स्थूलस्य ध्रुवस्य स्वयंदर्शनयोग्यत्वात्सा स्वयमेव तं पश्येत्, तेन किमिति दर्शनं कारितमित्याह—अस्य ध्रुवस्याणिमा सूक्ष्मप्रमाणत्वमक्षिसाक्षिको नेत्रगोचरः किं न स्यात्, अपि तु स्यादेव यद्यपि, तथापि स्वयंदर्शनयोग्यत्वेप्यागमोदितो महिमा वेदोक्तं गौरवं सत्यः । अस्त्विति शेषः । श्रुत्युक्तं हि प्रमाणमित्यर्थः । श्रुतिर्हि ततो वधूं 'ध्रुवमुदीक्षस्व' इति ध्रुवे दर्शिते 'ध्रुवं पश्यामि प्रजां विन्देय' इति सा ब्रूयात् । तस्मात्स्वयं द्रष्टुं शक्यत्वेपि नल एवादर्शयदिति युक्तमित्यर्थः । वैधं ध्रुवदर्शनं कारितमिति भावः । एतत्सर्वं कविवचः । अथ च—यद्यप्यणुत्वं स्वयं प्रत्यक्षदृश्यं तथापि ज्योतिःशास्त्रोक्तं ध्रुवमण्डलस्य महापरिमाणत्वं सत्यमेव ॥

ध्रुवेन सादर्शि वधूररुन्धतीं
सतीमिमां पश्य गतामिवाणुताम् ।
कृतस्य पूर्वं हृदि भूपतेः कृते
तृणीकृतस्वर्गपतेर्जनादिति[1] ॥ ३९ ॥

ध्रुवेनेति ॥ सा वधूर्ध्रुवेन नलेनाणुतामतिसूक्ष्मत्वं गतामिमां सतीं पतिव्रतामरुन्धतीं त्वं पश्येत्युक्त्वादर्शि दर्शिता । तत्राणुत्वे उत्प्रेक्षते—वरणात्पूर्वमेव हृदि कृतस्य मनोरथमन्त्रेण हृदये कृतस्य भूपतेः कृते तृणीकृतस्वर्गपतेस्तृणवल्लाघवेन त्यक्त इन्द्रो येन एवंभूताज्जनादिव । लज्जयेति शेषः । अहं हि परिणीता सतीन्द्रं तृणप्रायमकरवम्, भैमी तु हृदि धारणमात्रादेवेति मत्तोपीयमेवाधिका सतीति भैम्याः सकाशाल्लज्जयेव कृशामित्यर्थः । स्वतःकृशत्वमेवमुत्प्रेक्षितम् । भूपतेः, जनादिति शब्दद्वयं सामान्यवाच्यपि नलभैमीलक्षणे विशेषे पर्यवस्यति । वैधमरुन्धतीविलोकनं कारितमिति भावः । अदर्शि ण्यन्ताच्चिण् । 'अभिवादिदृशोः–' इति अणौ (कर्तुर्णौ) कर्मत्वम् । तस्य चाभिहितत्वाद्द्वितीयाभावः ॥

प्रसूनता तत्करपल्लवस्थितै-
रुडुच्छविर्व्योमविहारिभिः पथि ।
मुखेऽमराणामनले रदावले-
रभाजि लाजैरनयोज्झितैर्द्युतिः ॥ ४० ॥

प्रसूनतेति ॥ तस्या भैम्याः करयोरेव पल्लवयोः स्थितैर्वर्तमानैर्लाजैः प्रसूनता पुष्पत्वमभाजि प्राप्ता । पल्लवेषु च पुष्पाणि युक्तानि । तथा—अनया भैम्योज्झितैः करान्मुक्तैर्व्योम्नि विहरणशीलैः सद्भिः पथि कराभ्यन्तरालरूपे मार्गे उडुच्छविर्नक्षत्रशोभा भेजे । व्योम्नि नक्षत्राणि युक्तानि । तथा—अमराणां मुखेऽनले-

---

१ अत्र 'पूर्ववाक्यार्थस्योत्तरवाक्यार्थहेतुकत्वात्काव्यलिङ्गमलंकारः' इति जीवातुः ।

१ 'इतः' सुखावबोधास्यपाठः ।

ऽग्नावनया हुतै रदावलेर्दन्तपङ्क्तेर्द्युतिः शोभा भेजे । मुखे च दन्तपङ्क्तिर्युक्ता । वंधो लाजहोमस्तया कृत इति भावः ॥

तया प्रतीष्टाहुतिधूमपद्धति-
र्गता कपोले मृगनाभिशोभिताम् ।
ययौ दृशोरञ्जनतां श्रुतौ श्रिता
तमाललीलामलिकेऽलकायिता ॥ ४१ ॥

तयेति ॥ तया भैम्या प्रतीष्टा करकुड्मलाभ्यां स्वीकृता आहुतिधूमपद्धतिर्हूयमानलाजादिद्रव्यसंबन्धिनी धूमपरम्परा कपोले मृगनाभिशोभितां कस्तूरीशोभां गता प्राप्ता । तत ऊर्ध्वं गच्छन्ती दृशोश्चक्षुषोरञ्जनतां ययौ प्राप । ततोऽप्यूर्ध्वं गच्छन्ती श्रुतौ कर्णयोस्तमाललीलां वतंसभूततमालदलसादृश्यं श्रिता । ततोऽप्यूर्ध्वतरं गच्छन्ती अलिके ललाटेऽलकायिता चूर्णकुन्तलवदाचरिता। तत्तुल्या जातेत्यर्थः । कपोले कस्तूरी, दृशोरञ्जनम्, श्रुतौ तमालम्, ललाटे चालका इति युक्तम् । वैधं धूमग्रहणं कृतमिति भावः । मृगनाभिशोभिनीति 'कर्तर्युपमाने' इति णिनौ मृगनाभिशोभिनी तस्या भावस्त्ता 'त्वतलोः-' इति पुंवत् ॥

अपह्नुतः स्वेदभरः करे तयो-
स्त्रपाजुषोर्दानजलैर्मिलन्मुहुः ।
दृशोरपि प्रस्रुतमस्रु सात्त्विकं
घनैः समाधीयत धूमलङ्घनैः ॥ ४२ ॥

अपह्नुत इति ॥ त्रपाजुषोर्लज्जावतोस्तयोः करे वर्तमानः स्वेदभरः सात्त्विकधर्मजलसङ्घो दानजलैर्ब्राह्मणेभ्यो दक्षिणादानार्थमुत्सृष्टैः संकल्पजलैर्मुहुर्वारंवारं मिलन्संबन्धं प्राप्नुवन्सन् अपह्नुतोऽपलपितः । दानजलयोगात्सात्त्विकः स्वेदोयमिति लोकेन न ज्ञात इत्यर्थः । करे मुहुर्मिलन्पुनःपुनरुद्भवन्दानजलैरपह्नुत इति वा । तत्रापि कामविकारवशात्स्वेदं लोको ज्ञास्यतीति भिया वा । दृशोरपि प्रस्रुतं गलितं सात्त्विकं कामविकारजमस्रु घनैः सान्द्रैर्धूमलङ्घनैर्धूमाक्रमणैः कृत्वा समाधीयत परिहृतं ताभ्यामित्यर्थात् । तैरेव कर्तृभिरपलपितं वा । परस्परसंस्पर्शात्तयोः स्वेदादयः सात्त्विका भावाः प्रवृत्ता इति भावः ॥

बहूनि भीमस्य वसूनि दक्षिणां
प्रयच्छतः सत्त्वमवेक्ष्य तत्क्षणम् ।
जनेषु रोमाञ्चमितेषु मिश्रतां
ययुस्तयोः कण्टककुड्मलश्रियः ॥ ४३ ॥

बहूनीति ॥ बहूनि वसूनि दक्षिणां प्रयच्छतो दक्षिणात्वेन ददतो भीमस्य सत्त्वं दानशौण्डत्वमवेक्ष्य तत्क्षणं तस्मिन्नेव क्षणे आश्चर्यातिशयाद्रोमाञ्चमितेषु प्राप्तेषु जनेषु मध्ये तयोर्भैमीनलयोः कण्टककुड्मलश्रियः कण्टककलिकाशोभा मिश्रतामैक्यं ययुः प्रापुः । सात्त्विकोऽपि रोमाञ्चोऽन्यजनवदाश्चर्यादयं जात इत्यपलपित इति भावः ॥

बभूव न स्तम्भविजित्वरी तयोः
श्रुतिक्रियारम्भपरम्परात्वरा ।
न कम्पमापत्तमलुम्पदग्रतः
स्थितोपि वह्निः समिधा समेधितः ॥४४॥

बभूवेति ॥ श्रुतिक्रियाया वेदविहितलाजहोमाग्निपरिभ्रमणादिकाया आरम्भस्य परम्परा एकस्मादनन्तरमन्यस्यारम्भः, तस्मादनन्तरमन्यस्य, एवमव्यवहितो य उत्तरोत्तरभावस्तद्विषया त्वरा वेगिता तयोः सात्त्विकभावजनितस्याद्राचलनात्मकस्य स्तम्भस्य विजित्वरी जयनशीला न बभूव । तं नापललापेत्यर्थः । अवश्यापेक्षितायामपि कर्मवेगितायां सात्त्विकस्तम्भवशात्तौ किमपि कर्म शीघ्रं कर्तुं समर्थौ नाभूतामिति भावः । तथा—समिधा काष्ठैः समेधितः संवर्धितद्युतिरप्यग्रतः स्थितोऽपि तयोः कम्पसंपत्तिं सात्त्विकं कम्पयाहुत्यं नालुम्पत् शमयति स्म । शीतजं हि कम्पं विशिष्टोऽग्निः शमयति, न तु सात्त्विकम् । तस्य तत्रासमर्थत्वादित्यर्थः । तयोरन्यसात्त्विकापलापेपि स्तम्भकर्मणो लोकैर्ज्ञातायेवेति भावः । 'अवर्ततास्तम्भ-' इति पाठे न स्तम्भविजित्वरीति नञ्समासः । अलुम्पत्, 'शे मुचादीनाम्' इति नुम् ॥

दमस्वसुः पाणिममुष्य गृह्णतः
पुरोधसा संविदधेतरां विधेः ।
महर्षिणेवाङ्गिरसेन साङ्गता
पुलोमजामुद्वहतः शतक्रतोः ॥ ४५ ॥

दमेति ॥ दमस्वसुः पाणिं गृह्णतोऽमुष्य नलस्य संबन्धिनो वैवाहिकस्य श्रौतस्य विधेः साङ्गता अङ्गसहितं पुरोधसा संविदधेतरां नितरां साकल्येन चक्रे । प्रधानमात्रं नलेन कृतम्, अङ्गानि तु पुरोधसा कृतानीति भावः । कस्य केनेव—पुलोमजामुद्वहतः परिणयतः शतक्रतोः संबन्धिनो विधेः साङ्गता आङ्गिरसेन महर्षिणा बृहस्पतिनेव ॥

स कौतुकागारमगात्पुरंध्रिभिः
सहस्मरन्ध्रीकृतमीक्षितुं ततः ।
अथात्मसाक्षत्तनुजन्मित्रता-
मधिष्ठितं यन्त्वलु जिष्णुनामुना ॥ ४६ ॥

स इति ॥ ततो वैवाहिकविधेरनन्तरं स नलः पुरंध्रिभिरन्तःपुराङ्गनाभिरीक्षितुं वधूवरचेष्टादिदर्शनार्थं सहस्मरन्ध्रीकृतं तृणका-

१ 'अत्रैकस्य लाजद्रव्यस्य क्रमेण कपोलवधूनेत्रकायस्तृतिरूपनानाप्रयोजनभेदस्तावत्, तदुपमेन (?) लाजानां प्रत्यनदन्तशोभासादृश्यान्निदर्शनाभेदः, इत्यनयोरङ्गाङ्गिभावेन संकरः' इति **जीवातुः** । २ 'अत्राप्येकस्यैव क्रमस्य क्रमादनेकाधारसंबन्धपर्यायात्तदुपजीविनामुत्प्रेक्षा यथायोगमुपमानिदर्शनाभ्यां पूर्ववत्संकरः' इति **जीवातुः** । ३ 'अत्र स्वेदास्रुणोः सहजयोगानन्तुकदानोदकधूमाभिभवाभ्यां तिरोधानान्मीलनभेदः' इति **जीवातुः** ।

१ 'अत्र क्रमस्य वरधर्मनिर्वाहरूपकार्यस्य तावत् स्तम्भकर्मनिवृत्तिरूपकार्यानुत्पत्तिविशेषोक्तिरलंकारः' इति **जीवातुः** । २ 'पाठः' इति पाठ 'विधिः समिधेतरां' इत्यन्वयः, इति **सुखावबोधा** । ३ 'समेतान' इति पाठे 'कीदृशी शचीम—समेता सम्यक् गता ज्ञानं यस्यास्तामुचितज्ञाम्' इति **सुखावबोधा** ।

ष्ठादिरचितबहुच्छिद्रगवाक्षं वधूवरसंवेशार्थं रचितशृङ्गारवेदिकं कौतुकागारं कुतूहलावहं दूर्वायवाङ्कुरादिनवमङ्गलद्रव्यसहितं गृहमगाद्ययौ। यद्गृहं जिष्णुना जयशीलेनामुना नलेनाधिष्ठितं सद्विलोकितुं नेत्रसहस्रावकाशरन्ध्रधारिणा सहस्राक्षस्य तनुत्रेण कवचेन सह मित्रतां साम्यमधाद्बभार। तदपि जिष्णुनेन्द्रेणाधिष्ठीयते। खलूत्प्रेक्षायां निश्चये वा ॥

तथाशनाया निरशेपि नो ह्रिया
न सम्यगालोकि परस्परक्रिया।
विमुक्तसंभोगमशायि सस्पृहं
वरेण वध्वा च यथाविधि त्र्यहम् ॥ ४७ ॥

तथेति ॥ वरेण वध्वा चाशनाया बुभुक्षा ह्रिया कृत्वा तथा पूर्ववन्नो निरशेपि न निःशेपिता। आतृप्ति न भुक्तमित्यर्थः। तथा—परस्परक्रियान्योन्यं चेष्टादिव्यापारोऽपि ह्रियैव सम्यक्संमुखदर्शनेन नालोकि न विलोकितः। किंतु दृगन्तमात्रेणेत्यर्थः। तथा—त्र्यहं दिनत्रयं यथाविधि विमुक्तसंभोगं त्यक्तसुरतं यथा तथा परं सस्पृहं सुरतेच्छासहितं यथा तथाशायि शयितम्। त्र्यहमिति सर्वत्र योज्यम्। विध्यतिक्रमभयादिनत्रयं ताभ्यां सह भुक्तम्, अन्योन्यं विलोकितम्, सह निद्रितं च। परं लज्जया न यावत्तृप्ति भुक्तम्, नाशेषाङ्गं दृष्टम्, न च चुम्बनालिङ्गनादिपूर्वं शयितमित्यर्थः। 'एकत्र शयनं त्रिरात्रं ब्रह्मचर्यं च' इति विधिः। अशनाया, 'अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु' इति साधुः। त्र्यहं, समाहारे द्विगौ 'राजा हः—' इत्यादिना टच्। 'न संख्यादेः समाहारे' इत्यह्नादेशाभावः। 'रात्राह्नाहाः पुंसि' इति पुंस्त्वम्। अत्यन्तसंयोगे द्वितीया। त्र्यहं विमुक्तसंभोगमिति योजना ॥

कटाक्षणाजन्यजनैर्निजप्रजाः
क्वचित्परीहासमचीकरत्तराम्।
धराप्सरोभिर्वरयात्रयागता-
नभोजयद्भोजकुलाङ्कुरः क्वचित् ॥ ४८ ॥

कटाक्षेति ॥ भोजकुलस्य भीमपूर्वजभोजाख्यक्षत्रियवंशस्याङ्कुर इवाङ्कुरो बालो दमः क्वचिन्नीमदक्षपथागोचरे कस्मिंश्चिद्देशे जन्यजनैर्वारयात्रिकैर्नलपक्षीयैः सह निजाः प्रजाः परिहासपात्रभूतपौरवारस्त्रीमुख्यास्ताभिः प्रयोज्याभिरित्यर्थः। कटाक्षणाज्ञेत्रसंज्ञया परीहासं श्लेषवक्रोक्त्यादिनार्थान्तरोपदर्शनरूपमुपहासमचीकरत्तरामतितरां कारयामास। तथा—क्वचिच्च वरयात्रया निमित्तेनागतान्नलपक्षीयानन्यान्राजलोकान्धराप्सरोभिर्दासीस्वैरिणीसैरन्ध्रीप्रभृतिभिः पुरसुन्दरीभिर्वाराङ्गनाभिरभोजयद्भोजनमकारयत्। परिवेषणार्थं काश्चित्सहभोजनार्थं काश्चिदादिष्टवानित्यर्थः। विवाहे कनीयसामेवोपहासकारणयोग्यत्वादङ्कुरपदप्रयोगो युक्तः। कटाक्षशब्दात् 'तत्करोति—' इति ण्यन्ताद्युट्। निजप्रजाः, 'हृक्रोः—' इति कर्मत्वम्। आगतान्, भुजेः प्रत्यवसानार्थत्वात् 'गतिबुद्धि—' इति कर्मत्वम्। अभोजयत्, 'निगरणचलनार्थेभ्यश्च' इति परस्मैपदम् ॥

तमेव प्रकारमाह—

स कंचिदूचे रचयन्तु तेमनो-
पहारमत्राङ्गरुचेर्यथोचितम्।
पिपासतः काश्चन सर्वतोमुखं
तवार्पयन्तामपि काममोदनम् ॥ ४९ ॥

स इति ॥ स दमः कंचित् नलपक्षीयमेवमूचे। स्वजनमुखेनेति शेषः। अङ्ग हे वारयात्रिक, अत्र पात्रे। आसु परिवेषिकासु मध्ये वा। काश्चन स्त्रियस्तव रुचेरभिलाषस्य यथोचितमुचितानतिक्रमेण तेमनाख्यस्य व्यञ्जनस्योपहारमानयनं रचयन्तु कुर्वन्तु यावदभिलाषं तेमनमानयन्तु किमिति प्रश्नकालः(कुः), एता एवं कुर्वन्तु, त्वं भुङ्क्ष्वेति भोजनोपदेशो वा। एवमुत्तरत्रापि। तथा—पिपासतस्तृपालोस्तव पानार्थं सर्वतोमुखं जलमप्यर्पयन्तां ददतु। तथा—ओदनमपि कामं यथेच्छमर्पयन्ताम्।

परिहाससस्तु ॥ अत्र आसु मध्ये। विविक्ते स्थाने वा। अङ्गरुचेः स्तनजघनाद्यङ्गानां रुचेर्दर्शनाद्यभिलाषस्योचितं यथा भवति तथा तव मानसोऽपहारमपहरणं रचयन्तु। स्तनादिदर्शनादिनान्तःकरणहरणं कुर्वन्त्वित्यर्थः। कायकान्तेर्हेतोः सौन्दर्यातिशयान्मनोहरणं कुर्वन्त्विति वा। तथा—पिपासतश्चुम्बनेच्छोस्तव सर्वतो नेत्रादिचुम्बनस्थाने दर्शनमात्रेण कामस्य हर्षकरं मुखमर्पयन्ताम्। बहूनां चुम्बनस्थानानामेकत्र मुखे वर्तमानत्वान्मुखमेव तव ददत्वित्यर्थः। अथ च—कामस्य हर्षकरं वराङ्गमपि चुम्बनार्थमर्पयन्ताम्। अथ च—मुखं पिपासतस्तव सर्वदा वराङ्गमेव ददतु। 'स्यात्तेमनं तु निष्टानम्' इत्यमरः। पूर्वव्याख्याने तवेत्युभयत्र योज्यम्। मुखं सर्वत इति, 'उभसर्वतसोः—' इति द्वितीया। तव, ते इति च संबन्धसामान्ये षष्ठी ॥

मुखेन तेत्रोपविशत्वसाविति
प्रयाच्य सृष्टानुमतिं खलाहसत्।
वराङ्गभागः स्वमुखं मतोऽधुना
स हि स्फुटं येन किलोपविश्यते ॥ ५० ॥

मुखेनेति ॥ काचित्खला वक्रोक्त्यादिभाषिणी हे वारयात्रिक, असौ मत्सखी पुरुषो वात्र स्थाने ते तव मुखेनोपलक्षितत्वात्। संमुखमिति यावत्। त्वदुपायेन वा। त्वदाज्ञयेति यावत्। त्वया सह भोजनार्थं तव पुरस्ताद्वा। भोजनार्थमुपविशत्विति प्रयाच्य संप्रार्थ्य मुखेनोपविशत्विति सृष्टा दत्तानुमतिरनुज्ञा येन तं वारयात्रिकं पश्चादहसत्। हासे कारणमाह—हि यस्माद्येन साधनेन किलोपविश्यते स हि वराङ्गभागो गुह्यदेशः। अमुना जनेन स्वस्यात्मनो मुखं स्फुटं निश्चितं मतः। मुखेन करणेनोपविशत्विलेवमर्थपरं तद्वचनमज्ञात्वा तेनानुज्ञायां दत्तायां कटिदेशाधःप्रदेशेन किलोपविश्यते इत्येवं वदतानेन स्वमुखं वराङ्गत्वेन मतं यस्मात्, तस्माद्धास्यं युक्तमित्यर्थः। सर्वजनबोधपुरःसरं जहासेति वा। अथच—ते मुखेनोपविशतु, अपितु पुरीषोत्सर्गार्थमुपविशत्विति प्रयाच्य तदीयं जुगुप्सितमर्थमगृहीत्वा सृष्टानुमतिं तमहसत्। 'मुखं निःसरणे वक्त्रे प्रारम्भोपाययोरपि' इति विश्वः ॥

१ 'अत्रोभयोरप्यर्थयोर्विवक्षितत्वेन प्रकृतत्वात्केवलप्रकृतश्लेषः' इति जीवातुः।

युवामिमे मे स्त्रितमे इतीरिणौ
गले तथोक्ता निजगुच्छमेकिका ।
न भास्यदस्तुच्छगलो वदन्निति
न्यधत्त जन्यस्य ततः पराकृपत् ॥ ५१ ॥

युवामिति ॥ इमे पुरोवर्तिन्यौ युवां मे मम (तेन) स्त्रितमे उत्तमे स्त्रियौ भवादृशे स्त्रीरत्ने न दृष्टे इतीरिणो वदतः स्तुवतः । अथच—मत्संबन्धिन्यौ प्रियतमे भवेतामिति वा परिहासाद्वदतः। कदाचिज्जनस्य वरपक्षीयस्य गले तथा यथा स्वयोच्यते तथेत्युक्त्वा तयोर्द्वयोर्मध्ये एकिका एकैव निजगुच्छं रज्जुस्थाने हारविशेषमेवेत्युक्त्वा न्यधत्त । इतीति किम्—हे जन्य, त्वं अदः पूर्वोक्तं इमे मे इति शब्दं वदन्कुर्वन्, तु पुनश्छगलश्छागो न भासि । अपितु एवं शब्दं कुर्वञ्छाग एव स्फुरसि । अथच—तुच्छः स्तनशून्यो गलः कण्ठो यस्य एवंभूतो न भासि । अजस्य गले स्तनौ तिष्ठतः, त्वं तु तादृकशब्दोऽपि स्तनशून्य इति कारणान्न शोभसे । अथच—रज्जुरहितकण्ठो न भासीति रज्जुस्थाने हारं धत्ते स्मेत्युभयतो लम्बमानो हार एव गलस्तनस्थाने भवित्वित्यर्थः । ततोऽनन्तरं परा द्वितीया रज्जुवद्धारमेव धृत्वाजमिव तमाकृष्यकण्ठे बद्ध्वा दूरं निनाय । अजो हि मिमेमेशब्दो रज्वा कण्ठे बद्ध्वा कृष्यते इति परिहासः । अथच—रिक्तकण्ठो ग्रासरहितो न भासीति निजगुच्छं स्वहस्तस्थितं पल्लवस्तबकं गले मुखान्तः न्यधत्त नितरां बलाच्चिक्षेप, द्वितीया च दत्तपल्लवग्रासं छागमिव चकर्षेति परिहासः । अथच—एवमस्मत्स्तुतिं कुर्वन् तुच्छगलो हाररहितकण्ठो न भासीति वदन्ती गले हारं परितोषवशाच्चिक्षेपेति वा । यद्वा अस्मत्प्रेम्णा भवत्यौ मे प्रियतमे इति वदन् त्वं शून्यकण्ठो न भासि मयापि त्वं वरणीय इति मालास्थाने हारमेव चिक्षेप । परा च य(त)त्रैव धृत्वा परिहासमिषेण संभोगार्थमेव चकर्षेति भावः । मिमेमे इति परिहासपक्षे युवामिति बिन्दुच्युतकेन । एवं वदन्युवा तरुणश्छगल इति वा योज्यम् । अकृपत लङ् ॥

नलाय वालव्यजनं विधुन्वती
दमस्य दास्या निभृतं पदेर्पितात् ।
अहासि लोकैः सरटात्पटोज्झिनी
भयेन जङ्घायतिलङ्घिरंहसः ॥ ५२ ॥

नलायेति ॥ नलाय नलार्थं वालव्यजनं मयूरपिच्छतालवृन्तं चामरं वा विधुन्वती कम्पयन्ती नलसेवापरा काचिन्मुन्दरी दमस्य दास्या निभृतं गुप्तं यथा तथा पश्चादागत्य पदे चरणसमीपेऽर्पितान्मुक्तात्सरटात्कृकलासाद्भयेन पटमुज्झत्येवंशीला त्यक्तवस्त्रा दिगम्बरीभूता सती लोकैरहासि हसिता । जनहासे हेतुरभूदित्यर्थः । किंभूतात्सरटात्—जङ्घाया आयतिर्दैर्घ्यं तल्लङ्घयत्येवंशीलं रंहो वेगो यस्य तस्मात् । अत एव भयहेतोः । सरटस्योर्ध्वारोहणं जातिस्वभावः ॥

पुरःस्थलाङ्गूलमदात्खला वृषी-
मुपाविशत्तत्र ऋजुर्वरद्विजः ।
पुनस्तदुत्थाप्य निजामतेर्वदा-
ऽहसच्च पश्चात्कृतपुच्छतत्प्रदा ॥ ५३ ॥

पुर इति ॥ काचित्खला धूर्ता समागताय कस्मैचिद्विजाय पुरःस्थमग्रे स्थितं लाङ्गूलं पुच्छं यस्यां क्रियायां तद्यथा तथा कूर्माकारां वृसीमृषीणामासनमदाद्दत्तवती । वरः श्रेष्ठः । वरस्य नलस्य वा । द्विजस्तत्र तस्यां पुरःस्थलाङ्गूलायामेव वृस्यामुपाविशदुपविष्टः । यतः—ऋजुस्तस्याः कौटिल्यमजानानः । सा च खला निजामतेः स्वीयाज्ञानस्य आसनं मया भ्रान्त्याऽन्यथा स्थापितम् इति वदा । स्वाज्ञानं नाटयन्तीत्यर्थः । तं पुनरुत्थाप्य पश्चात्कृतं पुच्छं यस्याः सा एवंभूता चासौ सा च वृसी तां प्रददाति प्रददत्येवंभूता सत्यहसत् । उपविष्टस्योरुद्वयमूलान्तरे स्थितमासनपुच्छं शिश्नमिव भविष्यति इति बुद्ध्या मया पुरोलाङ्गूलमासनं क्षिप्तम्, अयं तु मदभिप्रायमजानानोऽचतुरः पशुतुल्यः । पशोश्च पश्चादेव पुच्छेन भवितव्यमिति ज्ञापयितुं परिहासबुद्ध्यैव तां पश्चात्पुच्छं ददानोऽहमदिति भावः । अज्ञया मयोपहासनानर्हस्योपहासाय प्रवृत्तमिति केचित् । आसनस्थापनानभिज्ञाया निजायाः स्वमत्या अमतेर्वदति वा । 'ऋषीणामासनं वृसी' इत्यमरः ॥

स्वयं कथाभिर्वरपक्षसुभ्रुवः
स्थिरीकृतायाः पदयुग्ममन्तरा ।
परेण पश्चान्निभृतं न्यधापय-
दृदर्श चादर्शतलं हसन्खलु ॥ ५४ ॥

स्वयमिति ॥ कश्चित्खलः परिहासचतुरः स्वयं स्वेनैव कथाभिर्हंसदूत्यादिवार्ताभिः स्थिरीकृतायाः कथाश्रवणप्रवणीकृतायाः वरपक्षसुभ्रुवो नलपक्षीयायाः सुन्दर्याः । वरस्य पक्षे पार्श्वे स्थितायाः वा । पदयुग्ममन्तरा चरणद्वयमध्ये परेण स्वसख्यैन प्रयोज्येन निभृतं गुप्तं यथा तथा पश्चाद्भागेनादर्शतलं दर्पणं न्यधापयदस्थापयत् । हसन्सन् प्रतिबिम्बितोरुजघनकामसदनं तं दर्पणं ददर्श च । भगादिदर्शनादेव हासः । पश्चादनन्तरं ददर्शेति वा । पदयुग्मम् । 'अन्तरान्तरेण' इति द्वितीया ॥

अथोपचारोद्धुरचारुलोचना
विलासनिर्वासितधैर्यसंपदः ।
स्मरस्य शिल्पं वरवर्गविक्रिया
विलोककं लोकमहासयन्मुहुः ॥ ५५ ॥

अथेति ॥ अथ कामरहितकेवलपरिहासानन्तरं वरवर्गाणां नलपक्षीयराजसज्जानां विक्रिया मनोविकारो याभ्यस्ताः । यासां दर्शनेन नलपक्षीयाणां कामविकारो भवति ता वराङ्गना विलोककं द्रष्टारं लोकं मुहुरहासयन् । तद्रूपादिदर्शनसमुत्पन्नकामविकारं वरलोकं दृष्ट्वा लोकोऽहमदिति भावः । कीदृश्यः—उपचारे कटाक्षक्षेपादिना स्वानुरागज्ञापके प्रीतिविलोकने विषये उद्धुराण्युत्सुकानि चारूण्यतिविशालानि चतुराणि लोचनानि यासां ताः । तथा—विलासैः कटाक्षविक्षेपादिभिः कृत्वा निर्वासितास्त्याजिता धीराणां विलासिनां धैर्यसंपदो याभिस्ताः । तथा—स्मरस्य शिल्पं कृतिरतिसुन्दर्यः । उपचारे परिवेषणादावुद्धुराश्च ताश्चारुनेत्राश्चेति वा । उपचारोद्धुरचारुलोचनानां विलासैस्त्याजिता धैर्यसंपत्तेन तस्य स्मरस्य शिल्पं विलसितं कर्तृ वरवर्गविकारदर्शिनं लोकं मुहुरहासयदिति वा । स्वाशयज्ञापनोत्सुकानि चारूणि नेत्राणि

यासु । तथा—विलासैः पूर्वोक्तैरेव त्याजिता धैर्यसंपद्याभिः, यासु वा । तथा—कामजनिता वरवर्णस्य विक्रिया विकाराः कर्त्र्यो विलोककं लोकं मुहुरहासयन्निति वा । इदानीं कामचेष्टापुरःसरं परिहासः प्रवृत्त इति भावः ॥

तदेवाह—

तिरोवलद्वक्त्रसरोजनालया
स्मिते स्मितं यत्खलु यूनि बालया ।
तया तदीये हृदये निखाय त-
द्व्यधीयतासंमुखलक्ष्यवेधिता ॥ ५६ ॥

तिर इति ॥ कस्मिंश्चिद्युनि तरुणे स्मिते सानुरागं हसिते सति कयाचिद्बालया तिरो वक्त्रं यथा तथा वलद्वक्त्रसरोजनालया वलितः (वलन्) मुखकमलस्य दण्डो ग्रीवा यया (स्याः) एवंभूतया सत्या यस्मितमीषदहासि । तया बालया तदीये हृदये हसितुर्वक्षसि तस्मितमेव निखाय खनित्वा आरोप्यासंमुखस्य लक्ष्यस्य वेध्यस्य वेधिता वेधकता व्यधीयत कृता । खलूत्प्रेक्षे । पराङ्मुखलक्ष्यवेधकत्वं धनुर्विद्यायां निपुणस्यैव भवति । यः पराङ्मुखः सँल्लक्ष्यं विध्यति । पराङ्मुख्यापि तस्मिन्नात्मानुरागो निवेशित इत्यर्थः । स्मितं लज्जा चानुरागसूचिका । मया स्वानुरागद्योतनार्थं हास्ये कृतेऽनया हास्यपूर्वं लज्जितं चेत्तर्हीयं मय्यनुरक्तेति निश्चितवन्तं तस्मितमेव कामबाणीभूय न्यपीडयदिति भावः । बालत्वादपि वलितग्रीवत्वम् । प्रौढा तु संमुखमेव हसन्ति । स्मिते, स्मितमिति कर्तरि भावे च क्तः । वेधिता, विधेस्तौदादिकात्ताच्छील्ये णिनिः ॥

कृतं यदन्यत्करणोचितत्यजा
दिदृक्षु चक्षुर्यदवारि बालया ।
हृदस्तदीयस्य तदेव कामुके
जगाद वार्तामखिलां खलं खलु ॥ ५७ ॥

कृतमिति ॥ करणस्य कर्तव्यस्योचितं परिवेषणादि त्यजति त्वया बालया यदन्यदप्रस्तुतं व्यापारान्तरं कृतम् । तथा—पुनः पुनः दिदृक्षु दर्शनेच्छु किंचिद्गन्तमात्रेण द्रष्टुं प्रवृत्तमपि चक्षुर्यदवारि अर्धात्परावर्तितम् । तदेवान्यकरणचक्षुर्वारणरूपं द्वयमेव कामुके विषये तदीयस्य हृदो बालासंबन्धिनो मनसोऽखिलां वार्तामाशयं जगाद । यतः—खलं सूचकम् । खलूत्प्रेक्षे निश्चितं वा । दुर्जनो ह्यन्यदीयमनोगतमन्यस्मै निवेदयति । लज्जानुभावशादियं मय्यनुरक्तेति सोज्झासीदिति भावः । 'खले' इति पाठे स्वाशयद्योतनपरेङ्गितज्ञानचतुरे इति कामुकविशेषणम् ॥

जलं ददत्याः कलितानतेर्मुखं
व्यवस्यता साहसिकेन चुम्बितम् ।
पदे पतद्वारिणि मन्दपाणिना
प्रतीक्षितोऽन्येक्षणवञ्चनक्षणः ॥ ५८ ॥

जलमिति ॥ कंचित्पिपासुं जलं पाययमानायाः पादप्रक्षालनार्थं वा कस्मैचिज्जलं ददत्याः । अत एव कलितानतेर्नम्रीभूतायाः कस्याश्चित्सुन्दर्याः समीपवर्ति मुखं जनमध्ये चुम्बितं व्यवस्यता कृतोद्यमेन । अत एव साहसिकेनाविचार्यकारिणा केनचित्कामुकेन पतद्वारिणि पदे मन्दपाणिना विलम्बार्थं विरलाङ्गुलिस(ष)ङ्गलज्जलपाणिना सता । पादप्रक्षालनालसपाणिना वा सता । अन्यस्यां चुम्बनसामग्र्यां सत्यामेकपङ्क्तिनिविष्टानामन्येषां तत्र विचरतां वा । ईक्षणस्य दर्शनस्य । ईक्षणानां नेत्राणां वा वञ्चनार्थं प्रतारणार्थमनीक्षणार्थं क्षणोऽवसरः प्रतीक्षितो विलम्बेन गवेषितः । पानपक्षे—पदे चरणे विरलाङ्गुलिभ्यः पतद्वारि यस्मिन्नेवंभूते । पादप्रक्षालनपक्षे—पतद्वारिणि पदे मन्दपाणिनेति योज्यम् । अन्यानिरीक्षणावसरं प्रतीक्ष्य तन्मुखं चुचुम्बेति भावः ॥

युवानमालोक्य विदग्धशीलया
स्वपाणिपाथोरुहनालनिर्मितः ।
श्लथोपि सख्यां परिधिः कलानिधौ
दधावहो तं प्रति गाढबन्धताम् ॥ ५९ ॥

युवानमिति ॥ विदग्धशीलया चतुरया कयाचित्सुन्दर्या युवानं कंचित्तरुणमालोक्य कलानां सकलविद्याचातुर्याणां निधौ स्थानभूतायां स्वाशयज्ञायां प्रियसख्याम् । अथ च—सखीरूपे चन्द्रे स्वपाणिभ्यामेव पाथोरुहनालाभ्यां कमलनालाभ्यां निर्मितो रचितः कण्ठाश्लेषरूपः परिधिः श्लथोऽपि शिथिलबन्धोऽपि तं नेत्रलक्ष्यं युवानं प्रति लक्ष्यीकृत्य गाढबन्धतां दृढबन्धनत्वं दधौ बभार । अहो आश्चर्ये । कलानिधौ च परिवेषो युक्तः । श्लथस्य गाढत्वविरोधात्सख्यां चन्द्रे वा कृतस्यालिङ्गनस्य परिधेश्च बन्धनस्वरूपत्वादाश्चर्यम् । मदालिङ्गनेच्छुरियं स्वाशयज्ञापनाय सखीमालिङ्गितवती मामेवालिलिङ्गेति तदाशयमज्ञासीदिति भावः ॥

नतभ्रुवः स्वच्छनखानुबिम्बन-
च्छलेन कोपि स्फुटकम्पकण्टकः ।
पयो ददत्याश्चरणे भृशं क्षतः
स्मरस्य बाणैः शरणे न्यविक्षत ॥ ६० ॥

नतेति ॥ स्मरस्य बाणैर्भृशं क्षतो नितरां पीडितः । अत एव स्फुटः प्रकटः सात्त्विकः कम्पः कण्टका रोमाञ्चाश्च यस्य स कोपि कामी स्वच्छनखेषु तदीयनिर्मलनखेष्वनुबिम्बनच्छलेन प्रतिबिम्बव्याजेन पयो दुग्धं जलं वा परिवेषयन्त्याः पाययमानायाः कस्याश्चिन्नतभ्रुवश्चरणे एव शरणे रक्षितृणी न्यविक्षत प्राविशत् । कामपीडाशान्त्यर्थं चिरं चरणावलोकनव्याजेन प्रार्थनप्रणतिसंज्ञामकार्षीदिति भावः । भीतः सकम्पो बाणैः सशल्यः सन् कंचिच्छरणं विशति । क्षत इवेति लुप्तोत्प्रेक्षा वा । 'चरणोऽङ्घ्रियाम्' इत्यमरोक्तेश्चरणे द्वितीयाद्विवचनान्तम् । 'चरणौ' इति च पाठः । 'शरणम्' इति पाठे चरणरूपद्वयं रक्षितारमिति व्याख्येयम् । न्यविक्षत, 'नेर्विशः' इति तङ् ॥

मुखं यदस्मायि विभुज्य सुभ्रुवा
हियं यदालम्ब्य नतास्यमासितम् ।

---

१ 'चरणे इति द्वितीयाद्विवचनान्तम्, सप्तम्यन्तमित्यपि' इति सुखावबोधा । २ 'सापह्नवोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या' इति जीवातुः ।

अवादि वा यन्मृदु गद्गदं युवा
तदेव जग्राह तदाप्तिलग्नकम् ॥ ६१ ॥

मुखमिति ॥ तयैवान्यया वा सुभ्रुवा विभुज्य मुखं वक्रीकृत्य यदस्मायीषदहासि । तथा—ह्रियमालम्ब्य लज्जामाश्रित्य नतास्यं नम्रमुखं यथातथा यदासितं स्थितम् । मृदु मञ्जुलं गद्गदमस्पष्टवर्णं यथा तथा यदवादि । युवा तदेव त्रयं तस्या आप्तिस्तस्या लग्नकम् । प्राप्तिनिश्चायकमित्यर्थः । जग्राह । ज्ञातवानित्यर्थः । स्मिताद्यनुभाववशादियं मया लब्धैवेति निश्चिकायेति भावः । वा समुच्चये ॥

विलोक्य यूना व्यजनं विधुन्वती-
मवाप्तसत्त्वेन भृशं प्रसिष्विदे ।
उदस्तकण्ठेन मृषोष्मनाटिना
विजित्य लज्जां ददृशे तदाननम् ॥ ६२ ॥

विलोक्येति ॥ यूना व्यजनं विधुन्वतीं चालयन्तीं सुन्दरीमकस्माद्विलोक्य तद्दर्शनादेवाप्तसत्त्वेन प्राप्तसात्त्विकभावेन सता भृशं प्रसिष्विदे । सात्त्विकः स्वेदः प्राप्त इत्यर्थः । आनन्दोद्रिक्तो मनोविकारः सत्त्वम् । तमेव प्रस्वेदं निह्नोतुं मृषा अलीकमुष्माणं प्रस्वेदनिमित्तं संतापं नाटयति एवंशीलेनाभिनयता स्वेदापाकरणव्याजेनोदस्तकण्ठेनोर्ध्वीकृतमुखेन सता लज्जां विजित्य परित्यज्य तदाननं तस्या मुखं ददृशे । स्वकामपीडाज्ञापनार्थं तथापश्यदिति भावः । प्रसिष्विदे, षोपदेशत्वात्षत्वम् । 'प्रसिस्विदे' इति पाठश्चिन्त्यः ॥

स तत्कुचस्पृष्टकचेष्टिदोर्लता-
चलद्दलाभव्यजनानिलाकुलः ।
अवाप नानानलजालशृङ्खला-
निबद्धनीडोद्भवविभ्रमं युवा ॥ ६३ ॥

स इति ॥ स पूर्वोक्तो युवा व्यजनं चालयन्त्यास्तस्याः पूर्वोक्तायाः स्त्रियाः कुचयोः स्पृष्टकाख्यमालिङ्गनं चेष्टते करोति एवंशीला दोर्लता बाहुवल्ली तस्याः संबन्धि चलद्दलाभं चपलपर्णतुल्यं व्यजनं तालवृन्तं तस्यानिलेन कम्पनसंजातवायुना आकुलो विवशीकृतः स्तनस्पर्शिभुजचालितव्यजनविलोकनमात्रसंजातानुरागतरलः सन् नानानलानामनेकशरकाण्डानां जालस्य सङ्घस्य (नलनालानां नलदण्डानां वा) या शृङ्खला निर्बन्धनहेतुत्वात्तेषां परस्परग्रथननिर्मितः पञ्जरस्तया नितरां बद्धः संकुचितप्रचारीकृतो यो नीडोद्भवः पक्षी तस्येव विभ्रमः पञ्जरमध्य एव यद्विशिष्टं भ्रमणम् । अथ च—तस्य विलाससाम्यमवाप । जनसंमर्देप्यनुरागातिशयाद्व्यजनचालनचलद्भुजान्तर्वर्तितत्कुचयोः परम्परयापि संस्पर्शे सांसर्गिकप्रीत्या साक्षादिव तत्कुचस्पृष्टकालिङ्गनमनुभवञ्जनशङ्कया यथेष्टं चेष्टितुमशक्तः कामातुरः पञ्जरबद्धपक्षिनिर्बन्धमिवानुबभूवेति भावः । लतायाश्चञ्चलदलत्वं युक्तम् । व्यजनचालनव्याजाच्चलतो भुजस्यापि स्तनसंस्पर्शे स्पृष्टकालिङ्गनत्वं युक्तम् । 'नलजाल–' इति पाठः । 'गलनाल–' इति पाठे नानाविधाः कण्ठनालसंबन्धिन्यः कण्ठबन्धनकारिण्यः शृङ्खला इत्यर्थः ॥

अवच्छटा कापि कटाक्षणस्य सा
तथैव भङ्गी वचनस्य काचन ।
यथा युवभ्यामनुनाथने मिथः
कृशोपि दूतस्य न शेषितः श्रमः ॥ ६४ ॥

अवेति ॥ सा कापि वर्णयितुमशक्या भावोल्लसनचतुरा कटाक्षणस्य नेत्रप्रान्तवक्रवीक्षणस्यावच्छटा भङ्गिपरम्परा वा । तथैव तदुचितैव सा काचन कापि वक्रोक्त्यादिरूपा वचनस्य भङ्गी रचनाप्यभूदिति शेषः । सा का—यया कटाक्षावच्छटया वचनभङ्ग्या च कर्त्र्या युवाभ्यां मिथः परस्परमनुनाथनेऽन्योन्यप्रार्थने विषये कृशोऽप्यल्पोऽपि दूतस्य श्रमः प्रयासो न शेषितोऽवशिष्टीकृतः । यया कृत्वा युवभ्यां न शेषित इति वा । आत्मनैव चेष्टाविशेषरचनाद्वारा त्वं किमेष्यसि, अहं वेष्यामीत्यादिप्रश्ननिश्चयाद्दूतस्यानवसर इति भावः । यूनोर्वैदग्ध्यं सूचितम् । 'युवतिश्च युवा च' इत्यत्र 'पुमान् स्त्रिया' इत्येकशेषः । कर्तरि तृतीया चतुर्थी वा । शेषितः, 'तत्करोति–' इति ण्यन्तान्निष्ठा ॥

पपौ न कोपि क्षणमास्यमेलितं
जलस्य गण्डूषमुदीतसंमदः ।
चुचुम्ब तत्र प्रतिबिम्बितं मुखं
पुरः स्फुरत्याः स्मरकार्मुकभ्रुवः ॥ ६५ ॥

पपाविति ॥ कश्चित्कोपि युवा आस्येन मुखेन मेलितं योजितं करपुटे पानार्थं धृतं जलस्य गण्डूषं पेयं जलं क्षणमात्रं न पपौ । यतः—उदीतसंमद उत्पन्नानुरागः । तथापि किमिति न पपावित्यत आह—तत्राधरसंपृक्ते करपुटे धृते प्रतिबिम्बितं पुरः स्फुरत्या विलसन्त्याः स्मरकार्मुकवद्भ्रुवौ यस्यास्तस्या मुखं चुचुम्ब उदीतसंमदः सन्वा चुम्बितवान् जले । पीते प्रतिबिम्बासंभवात्पानार्थं गृहीते जले तस्या मुखप्रतिबिम्बे प्रतिबिम्बितनिजमुखचुम्बनदर्शनकौतूहलवशात्तस्या यावदवस्थानं तावन्न पपौ । गतायां तु प्रतिबिम्बाभावात्पपाविति भावः । पङ्क्तिस्थान्वे(न्ये)क्षणवञ्चनं यावन्न पपौ, तैरीक्षिते तु जलं पपौ । पुरः स्फुरत्या जलं ददत्या एव मुखमिति वा ॥

हरिन्मणेर्भोजनभाजनेऽर्पिते
गताः प्रकोपं किल वारयात्रिकाः ।
भृतं न शाकैः प्रवितीर्णमस्ति व-
स्त्विषेदमेवं हरितेति बोधिताः ॥ ६६ ॥

हरिदिति ॥ हरिन्मणेर्नीलमणेर्भोजनार्थं भाजने पात्रेऽर्पिते पुरःस्थापिते सति पद्मावलीभ्रान्त्या शाकपूर्णत्वभ्रान्त्या वा किल स्फुटं प्रकोपं नितरां रोषं प्राप्ता वारयात्रिका वरपक्षीया राजानो भीमसंबन्धिभिर्लोकैरिति बोधिताः । इति किम्—इदं वो युष्मभ्यं प्रवितीर्णं पात्रं शाकैः पलाशादिवृक्षपलाशैर्वास्तुकादिश्यामव्यञ्जनै-

१ 'अत्रागन्तुकेन घर्मस्वेदेन सहजसात्त्विकस्वेदगूहनान्मीलनालङ्कारः' इति जीवातुः । २ 'चेष्ट' इति पाठो जीवातुसुखावबोधासमतः । ३ 'नानानलनाल–' इति पाठे 'नलनालानां शरकाण्डदण्डानाम्' इति व्याख्येयम्—इति सुखावबोधा । जीवातावपि 'नलनाल–' इत्येव पाठो लभ्यते ।

रेव वा न भृतं तद्रचितं पूर्णं वा। किंत्वोदनादियुक्तमपि हरिता नीलया त्विषा भृतम्, न पद्मावली, नापि शाकेत्येवं ज्ञापिताः। ततस्तुष्टा इत्यर्थः। वारयाम्रिकाः वरयात्रा प्रयोजनमेषाम्, 'प्रयोजनम्' इति ठक्॥

ध्रुवं विनीतः स्मितपूर्ववाग्युवा
किमप्यपृच्छन्नविलोकयन्मुखम्।
स्थितां पुरः स्फाटिककुट्टिमे वधूं
तदङ्घ्रियुग्मावनिमध्यबद्धदृक्॥ ६७॥

ध्रुवमिति॥ विनीतो ध्रुवमाचारवानिव स्मितपूर्ववाग्मुखं नविलोकयन्नपश्यन् युवा तस्या अङ्घ्रियुग्मस्यावनिमध्ये भूमिभागे बद्धदृग्योजितनेत्रः सन् पुरः स्फटिकनिबद्धभूमौ स्थितां वधूं किमप्यपृच्छत्। अग्रे स्फटिककुट्टिमप्रतिबिम्बिततद्भगदर्शनसंजातस्मितः पुनरपि भगदर्शनार्थमेव गोष्ठीमिषेण तां स्थिरीचकारेति भावः। अधोदर्शनार्थमेव मुखं न विलोकितम्। अयं श्लोकः क्वचित्॥

अमी लसद्ब्राप्पमखण्डिताखिलं
वियुक्तमन्योन्यमभुक्तमार्दवम्।
रसोत्तरं गौरमपीवरं रसा-
दभुञ्जतामोदनमोदनं जनाः॥ ६८॥

अमी इति॥ अमी जना रसात्स्वादविशेषानुरागादोदनमभुञ्जत। किंभूतम्—लसद्ब्राप्पं विद्यमानोष्माणमीषदुष्णम्। तथा—अखण्डितश्चासावखिलः संपूर्णश्च (तम्)। पाकेप्यविच्छिन्नतण्डुलमिति यावत्। अभग्नमखिलं स्वरूपं यस्येति वा। तथा—पाकसमये नवनीतक्षेपाद्वियुक्तमसंलग्नसिक्थकम्। तथा—अमुक्तमत्यक्तं मार्दवं येन सुजातिशालिबीजत्वादतिकोमलम्। तथा—रसोत्तरं स्वादुबहुलम्। तथा—गौरं चन्द्रधवलम्। तथा—अपीवरं जीरकादिसुजातिशालिबीजत्वात्सूक्ष्ममदीर्घतण्डुलम्। अत एव—आमोदनं हर्षहेतुम्। परिमलबाहुल्याद्वा आमोदनम्। अणुत्वे चागलद्ब्राप्यत्वम्, मार्दवात्परागेऽन्योन्यं वियुक्तत्वम्, अन्तःकरणमार्दवे परस्परविरोध इति च विरोधाभासः॥

वयोवशस्तोकविकस्वरस्तनीं
तिरस्तिरश्चुम्बति सुन्दरे दृशा।
स्वयं किल स्रस्तमुरःस्थमम्बरं
गुरुस्तनी हीणतरा पराददे॥ ६९॥

वय इति॥ सुन्दरे जन्यजने दृशा वयोवशेन निर्गच्छदागच्छच्छैशवतारुण्यपारतन्त्र्येण स्तोकमीषद्विकस्वरावुल्लसितमण्डलौ स्तनौ यस्यास्तां वयःसंधौ वर्तमानां मुक्तां(ग्धां) तिरस्तिरो वक्रं यथा तथा (दृशा) चुम्बति पश्यति सति सानुरागकटाक्षमात्रेणापि चुम्बनजन्यं सुखमनुभवति। गुरुस्तनी तारुण्यभरपीवरदृढतरकुचा अपरान्या स्त्री तदनुरागाद्धीणतरातिसलज्जा सती यथास्थानस्थितमपि स्वयमात्मनैव स्रस्तं स्थानच्युतं जातमिवोरःस्थमम्बरं हृदयावरणवस्त्रं बलाद्विगलितं कृत्वा पुनस्तदाच्छादनायाददेऽङ्गीचकार। मुग्धां प्रत्यनक्षरं हृदयावरणसंज्ञानं चकार। विदग्धस्त्रीरीतिरीदृशी। अथ च—त्वमिमामल्पस्तनीं मुग्धां त्वत्संभोगासहनां किं पश्यसि। किंतु पीनघनस्तनीं त्वत्संभोगक्षमां मां पश्येति स्वाशयज्ञापनायादृष्टमपि पीनघनस्तनयुगमदर्शयदिति भावः। हीणतरा, 'तसिलादिषु-' इति पुंवद्भावः॥

[1]

यदादिहेतुः सुरभिः समुद्भवे
भवेद्यदाज्यं सुरभिर्ध्रुवं ततः।
वधूभिरेभ्यः प्रवितीर्य पायसं
तदोघकुल्यातटसैकतं कृतम्॥ ७०॥

यदिति॥ सुरभिः कामधेनुर्गौर्वा। अथ च—सौरभ्ययुक्तः पदार्थः। समुद्भव उत्पत्तिविषये यस्यादिहेतुर्दुग्धादिद्वारा परम्परया मूलकारणं ततो ध्रुवं तस्मादिव सौरभ्यधर्मयुक्तकारणादिव यदाज्यं सुरभि भवेत्स्यात् 'कारणगुणा हि कार्ये समवयन्ति' इति सुरभि भवितुमर्हति। तदाज्यमेभ्यो जन्यजनेभ्यो वधूभिः प्रवितीर्य परिवेष्य पायसं क्षीरपक्वतण्डुलमन्नं तदोघकुल्यानां घृतप्रवाहरूपाणां कृत्रिमाल्पसरितां तटयोः सैकतं कृतम्। पूर्वं पायसं परिवेष्य तस्योपरि धाराप्रवाहरूपे घृते क्षिप्ते द्विधाभूय घृतमभितः स्थितं पायसं शुभ्रस्वाद्वन्नकुल्यासैकतमिव शोभते स्मेति भावः। आज्यसौरभ्यबाहुल्यमुक्तम्। यदाज्यमित्येव पाठः॥

यदप्यपीता वसुधालयैः सुधा
तदप्यदः स्वादु ततोऽनुमीयते।
अपि क्रतूपर्बुधदग्धगन्धिने
स्पृहां यदस्मै दधते सुधान्धसः॥ ७१॥

यदपीति॥ यदपि यद्यपि वसुधालयैर्मनुष्यैः सुधामृतं न पीता तदपि तथापि सुधारसाज्ञानेऽपि अदः आज्यं ततोऽमृतादपि सकाशात्स्वादु मिष्टमित्यनुमीयते। यद्यस्मात्सुधान्धसोऽमृताशा देवा अपि क्रतावुपर्बुधेनाग्निना दग्धगन्धिने विनाशितसौरभाय अप्यस्मै घृताय स्पृहामिच्छां दधते। यागे हि हुतं घृतं देवा भुञ्जते। यद्यमृतादधिकरसं नाभविष्यत्, तर्ह्यमृतादा अपि देवा यागानलविकृतगन्धमप्येतत्सानुरागं कथमभ्यवाहरिष्यन्। अभ्यवहरन्ति तावत्। तस्मादमृतादपि विकृतगन्धमपि घृतमधिकरसम्, किमुत स्पष्टसौरभमिति भावः। मनुष्यैरपि सुधा यस्मान्न पीता, अमृतान्धसोऽपि विशिष्टा(ष्य) अस्मै यस्मात्स्पृहयन्ति, तस्मादपि हेतोरदो घृतं सुधायाः स्वादुतरमनुमीयते। एकेऽल्परसत्वाद्बहुद्विपूर्वममृतं नास्वादयन्त्येव, अन्ये च नित्यप्राप्तामृता अपि यस्माद्धृताय स्पृहयन्ति, तस्माद्धेतुद्वयादमृतादप्यधिकमेतदप्यनुमीयत इति वा। क्रतूपर्बुधेन दग्धश्चासौ गन्धश्च सोस्त्यस्येति कर्मधारयादिनिः। 'स्पृहेरीप्सितः' इति संप्रदानत्वम्॥

अबोधि नो ह्रीनिभृतं मदिङ्गितं
प्रतीत्य वा नादृतवत्यसाविति।
लुनाति यूनः स्म धियं कियद्वृता
निवृत्य बालादरदर्शनेषुणा॥ ७२॥

[1] 'अत्र कल्पितसादृश्यान्मरकतभाजने पद्मभाजनभ्रान्तिनिबन्धनाद्भ्रान्तिमदलंकारः' इति जीवातुः। [2] 'अत्र यूनः स्त्रीसंभाषणे पादावलोकनेन मुखावलोकनादिति(रस्करण)धर्मयोगादिनीतस्वोत्प्रेक्षा' इति जीवातुः।

अबोधीति ॥ असौ बाला ह्रीनिभृतं बालत्वालज्जावशादविस्पष्टमितीव हेतोर्भावबोधकं भ्रूविक्षेपादि मम चेष्टितं नो अबोध्यज्ञासीत्किम् । वाथवा प्रतीत्य ज्ञात्वाप्यननुरागान्नाद्दतवतीत्येवंरूपां पुनःपुनर्जायमानां यूनो धियं संशयबुद्धिं कियन्तं मार्गं गता अपि बाला निवृत्य परावृत्यादरदर्शनं सादरकटाक्षविलोकनं तद्रूपेणेषुणा लुनाति स्म चिच्छेद । तदिङ्गितज्ञानपुरःसरं स्वानुरागं प्रकटीचकारेत्यर्थः । तादृग्विलोकनान्मदिङ्गितं ज्ञात्वा इयं मय्यनुरक्तेति युवा निश्चिकायेति भावः । कियदूनेति, 'द्वितीयाश्रिता–' इति समासः । कियद्यथा तथा गतेति क्रियाविशेषणं वा ॥

न राजिकाराद्धमभोजि तत्र कै-
र्मुखेन सीत्कारकृता दधद्दधि ।
धुतोत्तमाङ्गैः कटुभावपाटवा-
दकाण्डकण्डूयितमूर्धतालुभिः ॥ ७३ ॥

नेति ॥ युग्मम् । तत्र भीमगृहे भोजनावसरे वा राजिकाभी राद्धं साधितं दधि दधद्दधिमिश्रितं व्यञ्जनं तैक्ष्ण्यातिशयात्सीत्कारकृता मुखेन कैर्जन्यजनैर्नाभोजि अपि तु सर्वैरपि भुक्तम् । किंभूतैः कैः—कटुभावपाटवात्कटुत्वातिशयाद्धुतोत्तमाङ्गैः कम्पितशिरोभिः । तथा—भोजनकाले शिरःकण्डूयनस्य स्मार्तवचनेनानिषिद्धत्वादकाण्डेऽकाले कण्डूयिते मूर्धतालुनी यैस्तैः । मुखस्यैव भोजनसाधनत्वे सिद्धेऽपि सीत्कारादिविशिष्टत्वद्योतनार्थं मुखेनेत्युक्तम् । राजिकाराद्धभोजिनामियं जातिः ॥

वियोगिदाहाय कटूभवत्त्विष-
स्तुषारभानोरिव खण्डमाहृतम् ।
सितं मृदु प्रागथ दाहदायि त-
त्खलः सुहृत्पूर्वमिवाहितस्ततः ॥ ७४ ॥

वियोगीति ॥ वियोगिनां स्त्रीपुंसानां पीडार्थं कटूभवन्त्यस्त्विषो दीप्तयो यस्यासद्दीप्तेस्तुषारभानोश्चन्द्रस्याहृतं खण्डमिव सितं श्वेतम् । तथा प्राक्प्रथमं मृदु प्रथमस्पर्शसमये कोमलमथ पश्चान्मुखप्रक्षेपानन्तरं तालुजिह्वादेस्तैक्ष्ण्यातिशयाद्दाहदायि दाहकारि आनीतम् । तद्राजिकाराद्धमभोजीति पूर्वेणान्वयः । तुषारभानोः सकाशादाहृतमिति वा । क इव—खल इव । किंभूतः—पूर्वं सुहृदापात (आप्तो) रमणीयः, ततोऽनन्तरमाहितो वैरी । 'रायी' इति कान्यकुब्ज (ज)भाषायाम् ॥

नवौ युवानौ निजभावगोपिना-
वभूमिषु प्राग्विहितभ्रमिक्रमः ।
दृशोर्विधत्तः स्म यदृच्छया किल
त्रिभागमन्योन्यमुखे पुनः पुनः ॥ ७५ ॥

नवाविति ॥ वयःसंधौ वर्तमानौ नवावप्रगल्भावत एव निजभावगोपिनौ स्वानुरागापह्नवपरौ कौचिद्युवानावभूमिषु लोकव्यवहारायोग्येषु स्वायोग्येषु वानुद्देश्येषु वा वस्तुषु प्राक्पूर्वं विहितः कृतो भ्रमेर्निरर्थकभ्रमणस्य क्रमः परम्परा यत्र येन वा एवंभूतं दृशोर्नेत्रयोस्त्रिभागं तृतीयांशरूपं कटाक्षमन्योन्यमुखे पुनः पुनर्विधत्तः स्म चक्रतुः । यदृच्छया किल । 'अन्यविलोकनवास्वेच्छामात्रेण क्रमप्राप्तमन्योन्यमुखविलोकनं कुरुतः, नत्वनुरागेणेति लोकप्रतीतिर्यथा स्यादेवं वस्त्वन्तरविलोकनव्याजेनान्योन्यमुखं पुनः पुनः कटाक्षैरवीक्षांचक्राते इति भावः । त्रिभागमिति पूर्वत्रापि सम्बन्धनीयम् ॥

व्यधुस्तमां ते मृगमांससाधितं
रसादशित्वा मृदु तेमनं मनः ।
निशाधवोत्सङ्गकुरङ्गजेरदः
पलैः सपीयूषजलैः किमश्नपि ॥ ७६ ॥

व्यधुरिति ॥ ते जन्यजना मृगमांसैः साधितं राद्धं संस्कृतं मृदु तेमनाख्यं व्यञ्जनविशेषं रसात्प्रीत्या भुक्त्वेति मनो व्यधुस्तमां नितरां चक्रुः । इति किम्—अदस्तेमनं निशाधवश्चन्द्रस्योत्सङ्गे वर्तमानः कुरङ्गो हरिणस्तस्माज्जातैः पीयूषजलरूपैर्जलैः सह वर्तमानैः पलैर्मांसैरश्नपि किमपाधि किम् । रसातिशयान्मनसैवं तर्कितवन्त इत्यर्थः । तेमनस्यातितरां स्वादुत्वमुक्तम् । अश्नपि, 'श्ना पाके' इत्यस्मात्कर्मणि क्विणि घटादित्वान्मित्त्वाद्ध्रस्वः ॥

परस्पराकूतजदृतकृत्ययो-
रनङ्गमाराद्धमपि क्षणं प्रति ।
निमेषणेनैव कियच्चिरायुषा
जनेषु यूनोरुदपादि निर्णयः ॥ ७७ ॥

परस्परेति ॥ परस्परस्याकूताच्चेष्टाविशेषादेव जातं दृतकृत्यं संभोगसंमतिर्ययोः कयोश्चिद्यूनोः स्त्रीपुंसयोरनङ्गमाराद्धं सुरतं कर्तुं यः क्षणः समयस्तं प्रत्युद्दिश्य सदा क्रियमाणनिमेषापेक्षया कियच्चिरायुषा किंचिदधिककालमायुर्वर्तमानता यस्यैवंभूतेन कियच्चिरकालस्थायिना निमेषणेनैवाक्षिपक्ष्मसंकोचेनैव कर्तृणा करणेन वा जनेषु मध्ये बहुषु जनेषु वर्तमानेषु सत्स्वपि निर्णयो निश्चय उदपादि कृतः जातो वा । कदा संभोग इतीङ्गितेन पृष्टे सति नेत्रे निमील्य कंचित्कालं स्थित्वा जने निद्राणे सत्यागन्तव्यमिति रात्रिसंकेतसमय इति निरणार्यीति भावः । उदपादि, 'क्विण् ते पदः' इति कर्तरि कर्मणि वा क्विण् ॥

अहर्निशा वेति रताय पृच्छति
क्रमोष्णशीतांशुकरार्पणाद्विटे ।
ह्रिया विदग्धा किल तन्निषेधिनी
न्यधत्त संध्यामधुरेऽधरेऽङ्गुलिम् ॥ ७८ ॥

अहरिति ॥ विटे कामुके रताय आवयोः संभोगं कर्तुमहः, निशा वेति उष्णकरघर्मोपलक्षितं दिनं वा, शीतांशुकरशैत्योपलक्षिता रात्रिर्वा समय इति क्रमेण उष्णशीतयोरंशयोरुपरि करार्पणादेव चेष्टिताकामपि पृच्छति सति विदग्धा चतुरा तत्प्रभावज्ञात्वा ह्रिया उपलक्षिता अनक्षरमिङ्गितेनैव तन्निषेधिनी तयोर्दिननिशयोर्निषेधं कुर्वाणा संध्यावन्मधुरे रमणीयेऽधरे स्वीयौष्ठे अङ्गुलिं न्यधत्ताप्यपयत् । अनभिमतमर्थं निषेधन्त्यः स्त्रियो मातः किमित्येवं जातमित्यार्थमिधायाधरेऽङ्गुलिं स्थापयन्तीति जातिः । किल प्रसिद्धम् । लोके चैवमेव प्रतीतिर्जाता, सा तु तन्निषेधव्या-

जेन दिने रात्रौ चानवसरः, संध्यैव रतसमय इत्यकथयदिति भावः। यद्वा—दिने सूर्यालोकात्, रात्रौ चन्द्रालोकात्, तद्वयमनुचितम्, किंतु सदान्धकारमलिना संध्यैव रन्तुं योग्येति भावः॥

क्रमेण कूरं स्पृशतोष्मणः पदं
सितां च शीतां चतुरेण वीक्षिता।
दधौ विदग्धारुणितेऽधरेऽङ्गुली-
मनौचितीचिन्तनविस्मिता किल॥ ७९॥

क्रमेणेति॥ अयं श्लोकः क्षेपकः। कूरं भक्तम्। सितां शर्कराम्। किमिदमनेनानुचितं क्रियत इत्यनौचितीचिन्तनेन विस्मिता किल विस्मितेव। अरुणिते। यावकेनेत्यर्थः। भावः स एव॥

कियत्त्यजन्नोदनमानयन्किय-
त्करस्य पप्रच्छ गतागतेन याम्।
अहं किमेष्यामि किमेष्यसीति सा
व्यधत्त नम्रं किल लज्जयाननम्॥ ८०॥

कियदिति॥ कृतसुरतकालनिर्णयः स एव युवा कियदल्पमोदनं पुरःस्थां तां वीक्ष्य त्यजन् पात्रे स्थापयन्, कियदोदनं स्वं प्रति पुनरानयन्सन्, करस्य भक्तपुरस्त्यागवशात्पुरोगमनेन स्वं प्रति भक्तानयनवशादागमनेन च, क्रमेण त्वां प्रत्यहं किमेष्यामि, त्वं वा मां प्रति किमेष्यसीति यां पप्रच्छ। सा आननं नम्रं व्यधत्त लज्जया किल। किलेत्यलीके। लोकप्रतीतौ अनया लज्जया मुखं नम्रीकृतमिति। तत्त्वतस्तु मुखनम्रीकरणेनाहमागमिष्यामीति स्वं दर्शितवतीति भावः। तं वीक्ष्य मुखं नम्रीकृत्य स्वचरणौ पश्यन्ती त्वमेवागत्य मच्चरणयोः पतेति वा भावः। भोजनसमये भोक्ता कियन्तमोदनमग्रे विभज्य स्थापयति, कियन्तं दध्यादिना सह भोक्तुं गृह्णातीति जातिः। कियन्तं त्यजन्बहुत्वात्पुनर्ददानः, कियन्तं च पुनः पात्रं प्रत्यानयन्निति वा॥

यथामिषे जग्मुरनामिषभ्रमं
निरामिषे चामिषमोहमूहिरे।
तथा विदग्धैः परिकर्मनिर्मितं
विचित्रमेते परिहस्य भोजिताः॥ ८१॥

यथेति॥ वारयात्रिका यथा येन प्रकारेणाऽऽमिषे मांसेऽप्यमांसस्य माषाद्यन्नस्य भ्रमं जग्मुः, यथा येन प्रकारेण निरामिषे मांसलेशवर्जितेऽपि तेमनादौ रूपस्वादादिभिः आमिषमोहं मांसभ्रममूहिरे[1] तार्कितवन्तः, तथा तेन प्रकारेण विदग्धैः नितरां कुशलैः सूपकारैः कर्तृभिरेते वारयात्रिकाः परिकर्मभिः साधनद्रव्यैर्निर्मितं विचित्रमन्नं परिहस्य विहस्य[2] पूर्वोक्तभ्रमनिमित्तपरिहासं भोजिताः॥

१ 'इदं तु 'ऊह वितर्के' इत्यस्य 'ऊहांचक्रिरे' इति प्रयोगादुपेक्ष्यम्' इति **सुखावबोधा**। तथा च 'वहन्तिसा' इति **जीवातुः**, 'प्रापुः' इति **सुखावबोधायां** व्याख्यातम्। २ 'परिहास्य' इति पाठे 'हास्यं कारयित्वा' इत्यर्थः' इति **सुखावबोधा**।

नखेन कृत्वाधरसन्निभां[1] निभा-
द्युवा मृदुव्यञ्जनमांसफालिकाम्।
ददंश दन्तैः प्रशशंस तद्रसं
विहस्य पश्यन्परिवेषिकाधरम्॥ ८२॥

नखेनेति॥ कश्चिद्युवा मृदुं व्यञ्जनमांसस्य फालिकां खण्डं नखेन कृत्वा निभाव्याजादधरसंनिभामोष्ठाकारां (द्विधा) कृत्वा, पूर्वमधरसदृशीमपि (नखेन द्विधा कृत्वा) मध्ये नखेन रेखाकरणान्नितरां मध्यस्थितरेखाधरसदृशीं वा कृत्वा, दन्तैर्ददंश। परिवेषिकाधरं मांसव्यञ्जनपायिन्या अधरं पश्यन्विहस्य एतादृशी स्वादुतरा मांसफालिका कदापि नोपभुक्तेत्यादिप्रकारैस्तस्याः फालिकाया रसं स्वादुतरं प्रशशंसास्मावीच्च। स्वादुतरं स्वदीयाधरमेव दशामीति हसंस्तस्मिन्मांसखण्डे तदधरतामारोपयन्स्वाशयं तामज्ञापयदिति भावः॥

अनेकसंयोजनया तथाकृते-
र्निकृत्य निष्पिष्य च तादृगर्जनात्।
अमी कृताकालिकवस्तुविस्मयं
जना बहु व्यञ्जनमभ्यवाहरन्॥ ८३॥

अनेकेति॥ अमी जना वारयात्रिका बहु मूलकन्दपुष्पपञ्चफलादिरूपं शाकादि व्यञ्जनमभ्यवाहरन्बुभुजिरे। किंभूतम्—अनेकेषां नानाविधमरीच्यादिद्रव्याणां संयोजनया संबन्धेन तथाकृतेर्वस्त्वस्यैव(स्येव) गन्धरसादिकरणात्तादृग्रसादिनिर्माणात्तथातथा निकृत्य नितरां कर्तित्वा निष्पिष्य चूर्णीकृत्य च आकारसाम्यादिना तादृगर्जनात्तद्वस्त्वन्तरसादृश्यसंपादनाद्रूपान्तरगन्धान्तरादिकरणाद्धेतोः कृत अकालिके असमयप्रभवे वस्तुनि विस्मय आश्चर्यं येन। क्रियाविशेषणं वा। तथा आकृतेराकारादिति वा। फलानि कर्तित्वा राजिकादध्यादिसंयोगाद्रसान्तरापत्तिः, तथा रूपान्तरापत्तिश्च। गोधूमादिपिष्टशर्करासंयोगाद्रसान्तरोत्पत्तिरित्यादिर्वैदग्ध्याद्भोक्तॄणां विस्मयः। अधिवासनाविशेषाच्चाकालिकत्वभ्रमो युक्तः॥

पिपासुरस्मीति विबोधिता मुखं
निरीक्ष्य बाला सुहितेन वारिणः।
पुनः करे कर्तुमना गलन्तिकां
हसात्सखीनां सहसा न्यवर्तत॥ ८४॥

पिपासुरिति॥ वारिणाम्बुना सुहितेन तृप्तेन विटेन मुखं निरीक्ष्य अहं पिपासुः पातुमिच्छुरस्मीति बोधिता विज्ञापिता बालाबुद्ध्यवक्तव्याद्यभिप्रायविशेषाऽप्रौढा पुनरपि करे गलन्तिकां सुवर्णभाजनं कर्तुमनाः धर्तुमनाः सती तदाशयज्ञानामतिचतुराणां सखीनां हसाद्धास्याद्धेतोः सहसा झटिति सुप्तप्रबुद्धवज्जलपायनारम्भसंभ्रमाच्यवर्तत परावृत्ता। सहसा सस्मिता सतीति वा। कर्मान्तरपरित्यागेन सामान्येन पिपासुरस्मीति वदन् अयमेतदी-

१-२—इदं च **सुखावबोधा**संमतं 'संनिभां युवा द्विधा मृदु—' इति मूलपाठं दृष्ट्वा कैश्चित्प्राज्ञैः प्रक्षिप्तमिति प्रतिभाति।

याधरं पिपासुरस्तीत्येतदाशयमियं नाजानादिति कृताद्वास्यादियमपि तदाशयं ज्ञात्वा गलन्तिकां पुनरस्थापयदिति भावः । 'पूरणगुण–' इत्यादिना सुहितार्थयोगे षष्ठीसमासनिषेधादेव वारिण इति षष्ठी ॥

युवा समादित्सुरमत्रगं घृतं
विलोक्य तत्रैणदृशोऽनुबिम्बनम् ।
चकार तन्नीविनिवेशिनं करं
बभूव तच्च स्फुटकण्टकोत्करम् ॥ ८५ ॥

युवेति ॥ अमत्रगं पात्रस्थं घृतं समादित्सुर्ग्रहीतुकामः कश्चिद्युवा तत्र घृते एणदृशः पुरःस्थाया मृगाक्ष्याः परिवेषिकाया अनुबिम्बनं प्रतिबिम्बं विलोक्य करं स्वहस्तं तस्य बिम्बस्य नीविषु भङ्गीनिबद्धनाभिचुम्बितविवस्त्रविच्छित्तिषु निवेशनशीलं चकार । तत्रास्थापयदित्यर्थः । तच्च तस्याः प्रतिबिम्बं स्फुटाः कण्टकोत्करा यस्मिन् । सरोमाञ्चमभूदित्यर्थः । स्वप्रतिबिम्बनीवीग्रन्थिविमोचनार्थं नाभिनीविसविधे स्पर्शकारिणस्तत्करस्य चेष्टां दृष्ट्वा तस्य स्वसंभोगवासनां ज्ञात्वा तदानीमेतस्मिन्ननुरागाद्रोमाञ्चिताभूत, तादृश्याश्च प्रतिबिम्बितत्वात्प्रतिबिम्बमपि रोमाञ्चितमभूदिति भावः । द्वयोरप्यनुरागस्तुल्यो जात इति भावः ॥

प्रलेहजस्नेहधृतानुबिम्बनां
चुचुम्ब कोपि श्रितभोजनच्छलः ।
मुहुः परिस्पृश्य कराङ्गुलीमुखै-
स्ततो नु रक्तैः स्वमवापितैर्मुखम् ॥ ८६ ॥

प्रलेहेति ॥ कोपि विटो लिह्यत इति लेहः, प्रकृष्टो लेहः प्रलेहः मृरणादिद्रव्ययुक्त आर्द्रकादिसंस्कृततक्रादिनिर्मितो द्रवद्रव्यविशेषस्तस्माज्जाते स्नेहे तैलादौ धृतमनुबिम्बनं यया । धृतं स्थितमनुबिम्बनं यस्या वा । एवंविधां पुरःस्थां सुन्दरीं श्रितं भोजनच्छलं येन एवंविधः सन् प्रतिबिम्बितां तामेव कराङ्गुलीनां मुखैरग्रैर्मुहुः परिस्पृश्य स्पृष्ट्वा चुचुम्ब । कीदृशैः—स्वमुखं समवापितैः प्रापितैः । तथा—रक्तैः (अरुणैः) स्वभावात्, उष्णस्य तस्य स्पर्शाद्वा । ततो नु तस्मादनुरागात्किम्, अङ्गुल्यग्रे रक्तत्वादनुरागाच्चुम्बिता किमित्युत्प्रेक्षा । 'रिक्तैः' इति पाठे मुहुः परिस्पृश्य ततो नु तदनन्तरमेव रिक्तैः प्रलेहशून्यैः स्वमुखं प्रापितैः कराङ्गुलीमुखैश्चुचुम्बेत्यर्थः । प्रलेहे वटकादिनिक्षेपात्तैलादिबिन्दवस्तरन्ति तत्र जातं प्रतिबिम्बमङ्गुल्या स्पृशति प्रलेहचलनात्प्रतिबिम्बभङ्गभयादङ्गुल्यग्रेलेहनच्छलात्परम्परया चुम्बितवानिति भावः । तां प्रति स्वानुरागमदर्शयदिति च भावः ॥

अराधि यन्मीनमृगाजपक्षिजैः
पलैर्मृदु स्वादु सुगन्धि तेमनम् ।
अशाकि लोकैः कुत एव जेमितुं
न तत्तु संख्यातुमपि स्म शक्यते ॥ ८७ ॥

अराधीति ॥ मीनेभ्यो मत्स्येभ्यः, चित्रकादिमृगेभ्यः, अजेभ्यइछागेभ्यः, पक्षिभ्यस्तित्तिरिलावकादिमक्ष्यपक्षिभ्यश्च जातैः पलैर्मांसैर्मृदु स्वादु सुगन्धि पाकेन परिमलविशेषयुक्तं च यत्तेमनाख्यं व्यञ्जनं सूपकारैरराधि साधितम् । तद्बाहुल्याल्लोकैः संख्यातुमपि न शक्यते स्म । जेमितुं तु पुनः कुत एवाशाकि । अपि तु भोक्तुं शक्यं नाभूदेव । जेमितुम् 'जिमु अदने' ॥

कृतार्थनश्चाटुभिरिङ्गितैः पुरा
परासि यः किंचनकुञ्चितभ्रुवा ।
क्षिपन्मुखे भोजनलीलयाङ्गुलीः
पुनः प्रसन्नाननयान्वकम्पि सः ॥ ८८ ॥

कृतेति ॥ किंचन किंचित्कुञ्चिते वक्रीकृत्योक्षिप्ते भ्रुवौ यया कयाचिद्दृङ्गितैरङ्गलिबन्धादिचेष्टितैश्चाटुभिः प्रियवचनैश्च कृता अर्थना संभोगप्रार्थना येन तथाविधो यो विटः पुरा पूर्वं परासि निरस्तः, प्रसन्ननयना सरसदृष्ट्यञ्जितप्रसादमुख्या तया भोजनलीलया ग्रासक्षेपेण मुखेऽङ्गुलीः क्षिपन्नङ्गुलीसंस्पर्शेन तां प्रति दीनत्वं सूचयन्स पुनरन्वकम्प्यनुगृहीतः । तदैक्यं दृष्ट्वा संभोगस्यानुमत इति भावः ॥

अकारि नीहारनिभं प्रभञ्जना-
दधूपि यच्चागुरुसारदारुभिः ।
निपीय भृङ्गारकमङ्ग तत्र तै-
रवर्णि वारि प्रतिवारमीदृशम् ॥ ८९ ॥

अकारीति ॥ यद्वारि प्रभञ्जनाद्व्यजनादिवायुसंयोगाद्धेतोर्नीहारनिभं तुषारतुल्यमकारि, यच्चागुरुसारस्य कृष्णागुरोर्दारुभिरधूपि धूपितम्, भृङ्गारके सुवर्णपानपात्रे यद्वारि तत्र भोजनावसरे । भीमगृहे वा । निपीय नितरां पीत्वा तैर्जनैः प्रतिवारं पुन पुनरीदृशं यक्ष्यमाणप्रकारेणावर्ण्यमादि । प्रतिवारं निपीयेति वा । 'अगुरुः' इत्येव पाठः । 'भृङ्गारः कनकालुका' इत्यमरः । अल्पत्वे कन् ॥

जलवर्णनमेवाह—

त्वया विधातर्यदकारि चामृतं
कृतं च यज्जीवनमम्बु साधु तत् ।
वृथेदमारम्भि तु सर्वतोमुख-
स्तथोचितः कर्तुमिदं पिपस्तव ॥ ९० ॥

त्वयेति ॥ हे विधातस्त्वया यदमृतसंज्ञं, यच्च जीवनसंज्ञमकारि कृतं तदुभयमपि साधूचितमेव कृतम् । अमृतमुभयरसत्वात्,प्राणधारणहेतुत्वाच्चान्वर्थत्वायुक्तमेवैतत्तस्य संज्ञाद्वयमित्यर्थः। तु पुनरिदं सर्वतोमुखसंज्ञं वृथा आरम्भि कृतम् । अन्वर्थत्वाभावाच्चिरर्थकमेतत्कृतम् । यस्मादिदं जलं पिबतीदृशोऽस्मदादिः पुरुषस्तथा सर्वतः सर्वदिक्षु मुखानि यस्य एवंविधस्तव कर्तुमुचितः । अस्मदादेर्बहूनि मुखानि सर्वेष्वप्यवयवेषु त्वं चेदकरिष्यः, तर्ह्यस्मदादिरिदमातृप्ति पातुमशक्ष्यत् नत्वेकेन मुखेनेति । नितरां शै-

१ 'अत्रैवकारस्य प्रयोजनं नावगतम । अवधारणस्यस्यापि नाम्नः श्रयमाणत्वात् । अत एव—'अगुरुसार–' इत्यपि पाठः साधीयान् 'अगुरुसारं राजार्हम्' इत्युक्तेः—'इति सुखावबोधा ।

त्यमाधुर्यादिगुणयुक्तमेतदिति भावः । चौ तुल्ययोगत्वद्योतकौ । 'पयः कीलालममृतं जीवनम्' 'पुष्करं सर्वतोमुखम्' इत्यमरः । इदंपिबः 'पाघ्राध्मा–' इत्यादिना शः ॥

सरोजकोशाभिनयेन पाणिना
स्थितेऽपि कूरे मुहुरेव याचते ।
सखि त्वमस्मै वितर त्वमित्युभे
मिथो न वादाद्ददतुः किलौदनम् ॥ ९१ ॥

सरोजेति ॥ उभे सख्यौ इति मिथो वादाद्धेमत्याकिलौदनं न ददतुः । किलेति व्याजे । इति किम्—हे सखि, त्वं पात्रमध्ये कूरे ओदने स्थितेऽपि (मुहुरेव वारंवारम्) सरोजकोशवदभिनय आकारो यस्य स्मनवराङ्गप्रार्थनासूचकेन पाणिना कूरं याचतेऽस्मै कामुकाय कूरं वितर देहि । द्वितीया वदति—त्वं वितर इति विवदमाने । तत्प्रार्थितस्मनवराङ्गदानेऽन्योन्यं प्रवर्तयन्त्योर्मध्येऽन्योन्यलज्जावशादेकतरा रिरंसुरपि नाङ्गीचकारेति भावः । 'अनुवादात्' इति पाठे उक्तरूपादनुवादादुभे अपि स्वल्पमोदनं किल ददतुरित्यर्थः । ओदनदानव्याजेन तत्प्रार्थितदानमङ्गीचक्रुरिति भावः ॥

इयं कियच्चारुकुचेति पश्यते
पयःप्रदाया हृदयं समावृतम् ।
ध्रुवं मनोज्ञा व्यतरद्यदुत्तरं
मिषेण भृङ्गारधृते करद्वयी ॥ ९२ ॥

इयमिति ॥ पयःप्रदायाः समावृतं वस्त्राच्छन्नमपि हृदयमिति विचार्य पश्यते पृच्छते कामुकाय ध्रुवं निश्चितं मनोज्ञा । अथ च—पराशयज्ञैव । तस्याः करद्वयी भृङ्गारस्य धृतेर्धारणस्य मिषेण यद् यस्मादुत्तरं तदीयप्रश्नस्य प्रतिवचनं व्यतरद्दौ । इति किम्—इयं स्त्री कियन्तौ किंप्रमाणौ चारू सुन्दरौ च कुचौ यस्याः सेति । स्वर्णकलशीपरिमाणौ स्वर्णवर्णौ चैतस्याः कुचाविति तं प्रत्यसूचयदित्यर्थः । उभावपि मिथोऽनुरागादन्योन्यविलोकनपरावेव तस्थतुरिति भावः । अन्योप्यभिप्रायज्ञः केनचिन्मिषेण प्रश्नस्योत्तरं ददाति ॥

अमीभिराकण्ठमभोजि तद्गृहे
तुषारधारामृदितेव शर्करा ।
हयद्विपद्वष्कयणीपयःसुतं
सुधाह्रदात्पङ्कमिवोद्धृतं दधि ॥ ९३ ॥

अमीभिरिति ॥ अमीभिर्जन्यजनैस्तद्गृहे भीमगृहे आकण्ठमतिबहु यथातथा शर्कराभोजि भुक्ता । तुषारधारया हिमोदकेन मृदितेव मिश्रितेव । तथा—हयं द्विपत्या अश्वैवरिण्या महिष्या वष्कयण्याश्चिरप्रसूतायाः पयो दुग्धं तस्मात्सुतं जातं दुग्धपरिणाममूतं दध्यप्यभोजि । सुधाह्रदादमृतस्यागाधजलाशयादुद्धृतं पङ्कमिवेत्युत्प्रेक्षा । शर्करातिशीता शुभ्रा च दध्यप्यमृतवत्स्वादु शुभ्रं घनं चेति भावः । तद्गृहेऽमीभिर्विशिष्टं दध्यभोजि । तुषारधारया मृदितेऽल्पकणत्वं प्रापिता शर्करेव, सुधाह्रदादुद्धृतं पङ्कमिव, इति दधिविषयमेवोत्प्रेक्षाद्वयं वा । दध्नः शैत्यं शौक्ल्यं स्वादुत्वं घनत्वं सूचितमेतेन । 'पयः श्रृतम्' इति पाठे शर्कराऽभोजि । श्रृतं पक्वं तप्तं महिषीपयश्चाभोजि । दधि चाभोजीति संबन्धः । 'चिरसूता वष्कयणी' इत्यमरः । महिष्या दधि स्वादुतरं भवति । 'द्विषः शतुर्वा' इति वचनात् 'हयं द्विषति' इति द्वितीयया 'द्वितीया श्रिता–' इति योगविभागात्समासः । द्विषद्वष्कयणीति 'पुंवत्कर्मधारय–' इति पुंवद्भावः । 'श्रृतम्' इति 'श्रृतं पाके' इति साधु ॥

तदन्तरन्तः सुषिरस्य बिन्दुभिः
करम्बितं कल्पयता जगत्कृता ।
इतस्ततः स्पष्टमचोरि मायिना
निरीक्ष्य तृष्णाचलजिह्वताभृता ॥ ९४ ॥

तदन्तरिति ॥ तद्दधि निरीक्ष्य रसातिशयात्तृष्णया ग्रासवासनया चला चञ्चलाधरप्रान्तलेहिनी गलज्जला जिह्वा यस्य तस्य भावस्त्ता तां बिभ्रता । तथा—अन्तरन्तर्मध्ये मध्ये सुषिरस्य छिद्रस्य बिन्दुभिः करम्बितं मिश्रितं व्याप्तं तद्दधि कल्पयता कुर्वता जगत्कृता इतस्ततः सर्वप्रदेशेभ्यः तद्दधि स्पष्टमचोरि प्रकटमपहृतम् । स्पष्टं संभावनायाम् । अपहृतमिवेत्यर्थः । अपहरन्कथं न दृष्ट इत्यत आह—यतो मायिना । अदृश्यतयापहृतमित्यर्थः । सफेनक्षीरस्य दध्याकारेण परिणामे दधनि छिद्राणि दृश्यन्ते । ब्रह्मणाऽदृश्यतया दधनि वर्तमानः सारो भोक्तुमिच्छया गृहीतः । अन्यथा छिद्राणि कथं दृश्यन्ते । अन्येन ग्रहीतुं न शक्यते । तत्रोत्प्रेक्षा—येन निर्मितं तस्य ब्रह्मणोपि जिह्वाचाञ्चल्यनिर्माणात्स्वादुतमं दधीति ध्वन्यते ॥

ददासि मे तन्न रुचेर्यदास्पदं
न यत्र रागः सितयापि किं तया ।
इतीरिणे बिम्बफलं पलच्छला-
ददायि बिम्बाधरयारुचच्च तत् ॥ ९५ ॥

ददासीति ॥ बिम्बफलतुल्योऽधरो यस्यास्तया सुन्दर्या पलव्याजान्मांसव्याजाद्बिम्बसंज्ञं फलं परिवेषितं मांसखण्डमेव बिम्बाकारं कृत्वा इतीरिणेऽधरचुम्बनवासनया भाषमाणाय विटायादायि दत्तम् । तद्बिम्बाकारं फलं तस्मै अरुचच्च । स्वादितमित्यर्थः । मदभिलाषं ज्ञात्वा स्वीकारपुरःसरं पलरूपबिम्बव्याजाद्बिजाधरदानमेवानया प्रतिज्ञातमिति संतुष्टोऽभूदिति भावः । इति किम्—हे बिम्बोष्ठि, यदुचेः प्रीतेरास्पदं यत्र वस्तुनि मम प्रीतिः, तन्मे मह्यं न ददासि । यद्वा—यदुचेः प्रीतेरास्पदं न भवति, तन्मह्यं ददासि । तथा—मम यस्यां रागः प्रीतिर्नास्ति तया सितयापि शर्करयापि किम् । अपि तु—न किंचित्प्रयोजनम् । माधुर्यमर्यादया शर्करयापि प्रयोजनं नास्ति, अभिलाषाभावात् । अन्येन नास्तीति किं वाच्यमित्यपिना सूच्यते । अथ च—यत्र लौहित्यं नास्ति तया श्वेतया प्रकरणाच्छर्करयापि किम् । तस्माद्यत्र मेऽनुरागो रक्तिमका-

१ 'वाह' इति जीवातुसंमतः पाठः ।

१ 'सितया कृतं तया' इति जीवातुसंमतः पाठः ।

न्तिश्च, तन्मह्यं देहीति । 'कृतं तया' इति पाठे तया पूर्यताम् । 'फलच्छेलात्' इति पाठे फलदानप्रसङ्गव्याजात् । बिम्बाकारोऽधरो यस्या इति 'सप्तम्युपमान–' इत्यादिनोत्तरपदलोपी समासः । अरुचत्, पुषादित्वादङ् । 'युष्मो लुङि' इति परस्मैपदम् ॥

समं ययोरिङ्गितवान्वयस्ययो-
स्तयोर्विहायोपहृतप्रतीङ्गिताम् ।
अकारि नाकूतमवारि सा यया
विदग्धयाऽरञ्जि तयैव भाववित् ॥ ९६ ॥

सममिति ॥ यो ययोर्वयस्ययोः सख्योर्विषये स्वाभिप्रायज्ञापनार्थं समं युगपदिङ्गितवान्भ्रूक्षेपादि चेष्टितवानभूत् । स तयोर्मध्य उपहृतं कृतं प्रतीङ्गितं तदभिलाषस्वीकारसूचकप्रतिचेष्टितं यया तामेकां विहाय स्थितः सन् तयैवारञ्जि द्वितीयया प्रत्यनुरञ्जितः । तया कया—यया चतुरया विदग्धया आकूतं प्रतीङ्गितं नाकारि । प्रतीङ्गितं कुर्वाणा सैव सखी जनसमक्षमिङ्गितकरणमयुक्तमित्यवारि निषिद्धा । यतो भाववित्तद्दग्ध्यस्य वेत्ता । द्वितीया तदिङ्गितदर्शनात्तस्मिन्ननुरागाल्लज्जित्वा प्रतीङ्गितं नाकरोत् । जनसमक्षमेतदनुचितमिति व्याजेन मत्प्रियं प्रतीयमिङ्गितं किमिति करोतीति सापह्नवेर्ष्यया च तां वारितवती इति तस्या वैदग्ध्यम् । स च तदीयगूढभावज्ञानाज्ज्ञातव्यः । सहचरीसमक्षमिङ्गितं कुर्वाणेयमचतुरा; द्वितीया इङ्गितं नाकरोत्, तां च न्यवारयदितीयमेव चतुरा मय्यनुरक्ता चेति चतुरो द्वितीयस्यामेवानुरक्तोऽभूदिति भावः । विहाय स्थितः सन् इति योजना । अन्यथा ह्यनस्य पुरुषः कर्ता, रञ्जनस्य स्त्री, इति भिन्नकर्तृकत्वात्कथा न स्यादिति । अरञ्जि, ण्यन्ताच्चिण् ॥

सखीं प्रति स्माह युवेङ्गितेक्षिणी
क्रमेण तेऽयं क्षमते न दित्सुताम् ।
विलोम तद्व्यञ्जनमर्प्यते त्वया-
वरं किमस्मै न नितान्तमर्थिने ॥ ९७ ॥

सखीमिति ॥ यून इङ्गितं चेष्टामीक्षते एवंशीला काचित्स्वसखीं प्रत्याह स्म इत्यवोचत । हे सखि, यस्मादयं क्रमेण परिपाट्या ते दित्सुतां त्वत्कर्तृकां व्यञ्जनस्य दातुमिच्छुतां न क्षमते । तस्मात्त्वया नितान्तमतिचञ्चलतयाऽर्थिने याचमानायास्मै यूने वरं श्रेष्ठमभीष्टं तत्तेमनादिव्यञ्जनं विलोम विपरीतं क्रमरहितं यथा तथा किं नार्प्यते दीयते । अपितु क्रमज्ञिह्वायास्मै युगपत्क्षिप्यतामिति छलोक्तिः । अयमालिङ्गनचुम्बनादिबाह्यरतपरिपाट्या तव वराङ्गदानेच्छुतां न सहते । तस्मादतितरलतयार्थिने संभोगविलम्बमसहमानायास्मै वरं केवलं । श्रेष्ठं वा । न विद्यते वरं श्रेष्ठं यस्मात्तदवरमतिश्रेष्ठं वा । अवरमधोदेशे वर्तमानं वा । रोमरहितं तद्गलक्षणं व्यञ्जनमवयवः किमिति त्वया नार्प्यते । अपि त्वर्पयेत्युपहासः । अतिसंभोगान्नितरां तान्तं ग्लानमिति व्यञ्जनविशेषणं वा । 'व्यञ्जनं लाञ्छनेऽमश्रुनिष्टानावयवेष्वपि' इत्यमरः । नितरां तान्तमिति पक्षे 'अनुनासिकस्य क्वि—' इति दीर्घः ॥

१ 'अत्रार्थान्तरस्यापि विवक्षितत्वात्केवलप्रकृतश्लेषः' इति जीवातुः ।

समाप्तिलिप्येव भुजिक्रियाविधे-
र्दलोदरं वर्तुलयालयीकृतम् ।
अलंकृतं क्षीरवटैस्तदभ्रतां
रराज पाकार्पितगैरिकश्रिया ॥ ९८ ॥

समाप्तीति ॥ क्षीरवटैः दुग्धमध्यक्षिप्तैर्मांसाधिवैर्वटकाख्यैः पक्वान्नविशेषैः स्वसंबन्धादलंकृतं तत्पूर्वोक्तं वटकव्यतिरिक्तं व्यञ्जनं वर्तुलया वृत्ताकारया पाकेन तप्तस्नेहद्वारकाग्निसंयोगेनार्पितया निर्मितया गैरिकश्रिया शैलरक्तधातोरिव श्रिया वटकानामेव शोभया रराज । विशिष्टवटकसंबन्धाद्व्यञ्जनान्तरं रेजे इत्यर्थः । विशिष्टया श्रियोपलक्षितैः क्षीरवटैरलंकृतं सद्रेजे इति वा । क्षीरवटैः कर्तृभिः श्रिया कृत्वा अलंकृतं सद्रेजे इति वा । किमिव —अभ्रतां भुञ्जानानां तेषां भुजिक्रियानिषेधाद्भोजनविधेः समाप्तेः वटकदर्शनमात्रेणान्यत्र रुच्यभावाद्व्यञ्जनान्तरविरतेः संबन्धिन्या लिप्या समाप्तिसूचिकया छकाररूपपुष्पिकारूपया आलयीकृतं आस्पदीकृतं दलोदरं श्वेतालादिपद्ममध्यमिव हरयुपमोत्प्रेक्षा वा । वृत्तया समाप्तिलिप्या श्रितं पाकेन बालकेनार्पितया गैरिकश्रियाऽलंकृतं दलोदरमिति वा योज्यम् । 'पोतः पाकोऽर्भकः' इत्यमरः । ग्रन्थलेखनसमाप्तिपक्षे समाप्तिसूचकं छकरादिवर्तुलमक्षरं क्रियते, गैरिकचिह्नितं च क्रियते । एवं भोजनसमाप्तिसूचकं क्षीरवटकादि ॥

चुचुम्ब नोर्वीवलयोर्वशीं परं
पुरोऽधिपारि प्रतिबिम्बितां विटः ।
पुनःपुनः पानकपानकैतवा-
च्चकार तच्चुम्बनचुंकृतान्यपि ॥ ९९ ॥

चुचुम्बेति ॥ कश्चिद्विटः पुरोऽग्रेऽधिपारि पानकरसपूर्णे सुवर्णादिपानपात्रे प्रतिबिम्बितामुर्वीवलये उर्वशीमिवातिसुन्दरीं कांचित्परं केवलं चुचुम्बेति न किंतु पुनःपुनः पानकस्य द्राक्षादिसाधितमधुररसप्रधानपेयद्रव्यरूपस्य यत्पानं तस्य कैतवात्प्रतिबिम्बितायास्तस्याश्चुम्बनस्य संबन्धीनि चुंकृतानि चुम् इति पानकानुकरणशब्दस्तस्य करणान्युच्चारणानि तान्यपि चकार । चुम्बनादिना,तस्यां स्वानुरागं प्रकटीचकारेति भावः । 'मधुरां वर्वरीं पारीं पानपात्रम्' इति क्षीरस्वामी । सप्तम्यर्थेऽव्ययीभावः । चुंकृतानि, 'नपुंसके भावे क्तः' ॥

घनैरमीषां परिवेषकैर्जनै-
रवर्षि वर्षोपलगोलकावली ।
चलद्भुजाभूषणरत्नरोचिषा
धृतेन्द्रचापैः श्रितचान्द्रमारभा ॥ १०० ॥

घनैरिति ॥ घनैर्बहुभिः परिवेषकैरनेकव्यञ्जनदायिभिर्जनैः । तैरेव घनैर्मेघैरमीषां भुञ्जानानां राज्ञां कृते वर्षोपलाः करकास्तुल्यानामेलाकर्पूरशर्कराललवङ्गतण्डुलपिष्टरचितानां गोलकानामतिवृत्तानां लड्डुकविशेषाणाम् । अथ च—करकारूपाणां गोलकानां । आवली पङ्क्तिरवर्षि वितीर्णा कृष्टा च । कीदृशैः—परिवेषणकर्मवशाच्चलन्त्यो या भुजास्तासां भूषणेषु रत्नानि तेषां रोचिषा कान्त्या

धृतमिन्द्रचापं यैः । नानाप्रकारकान्तिभिरित्यर्थः । अथ च—तदेवेन्द्रचापो येषु । कीदृशी—श्रितं चान्द्रं कर्पूरसंबन्धि सौरभं सौगन्ध्यं यया । अथच—चन्द्र एव चान्द्रः, सूर एव सौरः, तयोर्भा चान्द्रसौरभा, श्रिता चान्द्रसौरभा यया सा । शीतत्वदीप्तत्वाभ्यां चन्द्रसूर्यसदृशीत्यर्थः । रात्रिदिनयोर्जायमानत्वाद्वा क्रमेण तत्कान्तिसदृशी । चन्द्रसंबन्धिनश्चान्द्राश्चन्द्रकान्ताः, एवं सौराः सूर्यकान्ताः, तेषां भा श्रिता यया वा । चन्द्रसंबन्धि मनोज्ञत्वं सादृश्यं श्रितं ययेति वा । विश्वप्रकाशे सुरभिशब्दो मनोज्ञवाची ॥

कियद्बहु व्यञ्जनमेतदर्प्यते
ममेति तृप्तेर्वदतां पुनःपुनः ।
अमूनि संख्यातुमसावढौकि तै-
श्छलेन तेषां कठिनीव भूयसी ॥ १०१ ॥

कियदिति ॥ एतत्तेमनादिव्यञ्जनं मम कियत्किंपरिमाणं बहूपर्प्यते । अपितु तृप्ता वयमिति नार्पणीयमिति तृप्तेर्हेतोः पुनःपुनः वदतां तेषां जन्यानां 'कियत्संख्यं बहु एतद्व्यञ्जनमर्प्यते' इति 'एतद्बहुत्वसंख्येयत्ता भवद्भिः पृच्छ्यते किम्' इति च्छलेनामूनि व्यञ्जनानि संख्यातुं गणयितुमसौ गोलकावली भूयसी बहुतरा कठिनी खटिका इव तैः परिवेषकैरढौकि अर्पिता । भवद्भिर्व्यञ्जनसंख्या पृष्टा, तदनया कठिन्या एतानि गणयेति कठिनीवार्पितेत्युत्प्रेक्षिता । इति वदतामसूनि संख्यातुमिव व्याजेनासौ बहुतरा कठिन्यर्पितेति वा योज्यम् । कठिन्या च संख्यायते । एतद्व्यञ्जनम् अमूनीति, ममेति, अमीषामिति चैकवचनबहुवचनानि जातिव्यक्तिविवक्षयेति ज्ञातव्यानि ॥

विदग्धबालेङ्गितगुप्तिचातुरी
प्रवह्लिकोत्पाटनपाटवे हृदः ।
निजस्य टीकां प्रबबन्ध कामुकः
स्पृशद्भिराकूतशतैस्तदौचितीम् ॥ १०२ ॥

विदग्धेति ॥ कश्चित्कामुकः विदग्धायाश्चतुराया बालाया मुग्धाया इङ्गितगुप्तौ चेष्टितगोपनविषये चातुरी यत्कौशलं सैव दुर्ज्ञेयत्वात्प्रवह्लिका गुप्ताभिप्रायः प्रबन्धविशेषस्तस्या उत्पाटने भेदने ज्ञानविषये यत्पाटवं सामर्थ्यं प्रावीण्यं तत्र विषये तदौचितीं विदग्धबालेङ्गितानामानुगुण्यं स्पृशद्भिः गतैस्तदनुरूपैराकूतशतैर्बहुभिरिङ्गितैः कृत्वा निजस्य हृदः स्वीयाभिप्रायस्य टीकां विवरणं प्रबबन्ध प्रकर्षेण कृतवान् । गुप्तान्यपि मदिङ्गितानि ज्ञातवान्, अतिचतुरोयं मय्यनुरक्तश्चेति तदनुगुणैः स्वीयचेष्टितैस्तां स्वाशयं बोधितवानिति भावः । बालाया अपि विदग्धसखीशिक्षया वैदग्ध्यादिङ्गितकरणम्, सहजमौग्ध्यात्सलज्जया तद्गोपनं च युक्तम् । विदग्धः कश्चन युवा, बाला च काचन, तयोरिङ्गितगुप्तिर्वा । यद्वा—विदग्धस्येङ्गितं बालायाश्च (गुप्तिः) अर्थादिङ्गितस्यैव । तयोर्विषये या चातुरी तत्र, प्रवह्लिकोत्पाटनपाटवे विषये, तयोरौचितीं स्पृशद्भिः । अत्र द्वयोरपि भवतोराशयो मया ज्ञात इतीङ्गितैस्तज्ज्ञापनद्वारातिचतुरोऽहमेव त्वया भजनीय इति बालां प्रति स्वाशयं ज्ञापितवानिति भावः । अन्योपि विदग्धोऽतिगहनायाः प्रवह्लिकाया भेदने विषयेऽनेकैराशयैर्व्याख्यां करोति ॥

घृतप्लुते भोजनभाजने पुरः
स्फुरत्पुरंध्रिप्रतिबिम्बिताकृतेः ।
युवा निधायोरसि लड्डुकद्वयं
नखैर्लिलेखाथ ममर्द निर्दयम् ॥ १०३ ॥

घृतेति ॥ कश्चिद्युवा घृतप्लुत भाज्यपूर्णे प्रसृतघृते वा भोजनभाजने पुरः स्फुरन्त्या विलसन्त्याः पुरन्ध्याः प्रतिबिम्बिता या आकृतिस्तस्या उरसि लड्डुकद्वयं मोदकयुगं निधाय नखैर्लिलेख । अथ पश्चान्निर्दयं ममर्द । यदावयोः संयोगो भावी, तदैवं तव कुचावुपचरिष्यामीति, त्वत्कुचनखक्षतविमर्देच्छुरस्मीति, वा स्वाशयं बोधितवानिति भावः । घृतेन प्लुतम् । घृतं प्लुतं यस्मिन्निति वा । 'वाहिताग्न्यादिषु' इति परनिपातः ॥

विलोकिते रागितरेण सस्मितं
ह्रियाथ वैमुख्यमिते सखीजने ।
तदालिरानीय कुतोपि शार्करीं
करे ददौ तस्य विहस्य पुत्रिकाम् ॥१०४॥

विलोकित इति ॥ रागितरेण केनचित्कामुकेन सखीरूपे जने सस्मितं विलोकिते सति अथ विलोकनानन्तरं ह्रिया वैमुख्यं पराङ्मुखत्वमिते गते सति तस्य सखीजनस्यालिः सखी कुतोपि कस्मादपि स्थानाच्छार्करीं शर्कराबन्धनिर्मितां पुत्रिकामानीय विहस्य वैमुख्यात्संदिहानस्य तस्य करे ददौ । अधरादिचुम्बनायाङ्गेषु शर्करातुल्यरसामेनामप्यहमेव दास्यामि । स्वहस्तस्थितामेनां जानीहीति संज्ञां चकारेति भावः । सखीसमूहे वैमुख्यमिते सति तासां सखीनां काचित्सखी तदन्तर्वर्तिनी, अन्या वा, शार्करीं पुत्रिकां ददौ । शर्करापुत्रिकापरिवेषणमिषेण अहं त्वां भजामीति स्वदानसंज्ञानमकरोदिति भावः । इति वा । शार्करीमिति विकारप्रत्ययः । पुत्रिका 'पुत्रात्कृत्रिमे' इति कन् ॥

निरीक्ष्य रम्याः परिवेषिका ध्रुवं
न भुक्तमेवैभिरवाप्ततृप्तिभिः ।
अशक्नुवद्भिर्बहुभुक्तवत्तया
यदुज्झिता व्यञ्जनपुञ्जराशयः ॥ १०५ ॥

निरीक्ष्येति ॥ बहुभुक्तवत्तयात्याहारेणाशक्नुवद्भिर्भोक्तुमसमर्थैरेभिर्वीरयात्रिकैर्यद्यस्माद्व्यञ्जनपुञ्जानां राशयः परम्परा उज्झितास्त्यक्ताः, तस्माद्रम्याः परिवेषिका निरीक्ष्यावाप्ततृप्तिभिर्गतबुभुक्षरेतैर्भुक्तमेव नेति ध्रुवमहं मन्ये । यावद्भिक्षसं तावतस्तथैव दर्शनादियमुत्प्रेक्षा । एता निरीक्ष्यावाप्ततृप्तिभिरेतैर्ध्रुवं निश्चितं नैव भुक्तमिति वा । यथा लोको मन्यत इति शेषः । यथा व्यञ्जनपुञ्जपरम्परास्त्यक्ताः, यथैभिर्न भुक्तमिति लोको मन्यत इत्यर्थ इति वा ॥

पृथक्प्रकारेङ्गितशंसिताशयो
युवा ययोदासि तयापि तापितः ।

ततो निराशः परिभावयन्परा
मये तयातोषि सरोपयैव सः ॥ १०६ ॥

पृथगिति ॥ पृथक्प्रकारैर्नानाविधैरिङ्गितैश्चेष्टितैः कृत्वा शंसितः कथित आशयोऽभिप्रायो येन स युवा यया स्त्रिया उदास्युदासीनः प्रतीक्षितेन न संभावितः, तया तापितो व्यथितः। उदासीनो हि दुःखं न जनयति। अनयापि तु तादृश्यापि दुःखं जनितमिति विरोधार्थोऽपिशब्दः। ततोऽनन्तरं तस्यां निराशः, तस्याः सकाशान्निराशो निर्गताभिलाषः सन् परां तदन्यां परिभावयन्निङ्गितेनानुकूलयन्मानुरागं पश्यन्स युवा सरोपया तयैव पूर्वमुदासीनयैवातोषि परितोषितः, न तु द्वितीययेत्यर्थः। अये आश्चर्ये। सरोषो हि दुःखं जनयति न सुखम्। तयापि तादृश्यापि सुखं जनितमिति विरोधादाश्चर्यम्। जनसमक्षमिङ्गितकरणमयुक्तमिति तयेङ्गितं पूर्वं न कृतम्। स तु तदाशयमजानानोऽननुरागेणेयं प्रतीक्षितं नाकरोदिति बुद्ध्यान्यामपश्यत्। ततश्च सा सपत्नीबुद्ध्या सेर्ष्या जातेति। मय्यनुरक्तैवेयम्। पूर्वं तु गाम्भीर्यादिङ्गितं नाकरोत्। सानुरागैव च सरोषा भवतीति रोषादनुरागमनुमाय संतुष्ट इति भावः। 'उपेतया' इति पाठे रोषात्तदपसारणार्थं समीपमागतयेत्यर्थः ॥

पयःस्मिता मण्डकमण्डनाम्बरा
वटाननेन्दुः पृथुलड्डुकस्तनी।
पदं रुचेर्भोज्यभुजां भुजिक्रिया
प्रिया बभूवोज्वलकूरहारिणी ॥ १०७ ॥

पय इति ॥ भुजिक्रिया भोजनक्रिया भोज्यभुजां भक्ष्यं भुञ्जानानां तेषां प्रिया तृप्तिजननी। अथ च स्त्री बभूव। किंभूता—पयो दुग्धमेव स्मितं हासो यस्याः। तथा—क्वचिन्मृदुसूक्ष्माः, क्वचिदत्यन्ताग्निसंयोगेन शोणबिन्दवो मण्डका अपूपा एव पट्टसूत्रादिरचितरूपकरूपमण्डनयुक्तान्यलंकारभूतानि वाऽम्बराणि वस्त्राणि यस्याः। तथा—अतिवृत्तमापसाधितवटरूपः कुङ्कुमोद्वर्तनरक्तभावेनाह्लादक आननेन्दुर्मुखचन्द्रो यस्याः। तथा—पृथुलड्डुकस्तनी स्थूलातिकठिनमोदकरूपौ स्तनौ यस्याः सा। तथा—उज्वलकूरहारिणी विविक्तशुभ्रौदनरूपमौक्तिकमालावती। अथ च—उज्वलकूरेण मनोहारिणी। यतः रुचेर्प्रीतेरभिलाषस्य। अथ च—कान्तेः, अनुरागस्य च। पदं स्थानम्। प्रियापि पूर्वोक्तगुणसहिता रुचेः पदं बभूव। यतः प्रिया इति वा। 'भोज्यं भक्ष्ये' इति साधुः ॥

चिरं युवाकूतशतैः कृतार्थन-
श्चिरं सरोषेङ्गितया च निर्धुतः।
सृजन्करक्षालनलीलयाञ्जली-
नसेचि किंचिद्विधुताम्बुधारया ॥ १०८ ॥

चिरमिति ॥ कयाचिद्वेश्यया कश्चिद्युवा किंचिद्विधुतया चकचालितयाम्बुधारया कृत्वासेचि सिक्तः। किंभूतः—आकूतशतैरिङ्गितसहस्रैश्चिरं कृतार्थनः कृतप्रार्थनः सन् चिरं सरोषं कोपव्यञ्जि इङ्गितं यस्यास्तयैव वारंवारं निर्धुतो निराकृतः सन्नपि। तथा—करक्षालनस्य लीलया व्याजेन प्रसादप्रार्थनासूचकानञ्जलीन्करयुगसंपुटान्सृजन्रचयन्। अञ्जलीनिति वचनेन वारंवारमञ्जलेः करणं सूचितम्। वारिधाराकम्पनेन स्वत्प्रार्थना मयाङ्गीकृता, करयुगयोजनाद्विरमेति सूचितम्। इयं स्वीकारचेष्टा। करक्षालनं भुजिक्रियासमाप्तिं द्योतयति ॥

न षड्विधः षिङ्गजनस्य भोजने
तथा यथा यौवतविभ्रमोद्भवः।
अपारशृङ्गारमयः समुन्मिष-
न्मृशं रसस्तोषमधत्त सप्तमः ॥ १०९ ॥

नेति ॥ षड्विधो मधुराम्ललवणतिक्तकटुकषायास्वादरूपः षट्प्रकारो रसः षिङ्गजनस्य रसिककामुकसङ्घस्य भोजने विषये तथा तोषं नाधत्तोदपादयत्। यथा—यौवतं स्त्रीसङ्घस्य विभ्रमो विलासस्तस्मादुद्भवो यस्य स मृशं समुन्मिषन्वर्धमानोपारशृङ्गारमयो निर्मर्यादानेकविधविभावानुभावव्यभिचारिसंयोगजन्यशृङ्गाररूपः सप्तमो रसः तोषमधत्त। सप्तमत्वं मधुरादपेक्षया ज्ञेयं, न तु नाट्यरसापेक्षया। षड्भ्यो रसेभ्योऽन्यस्याभावाद्भोजने सप्तमरसस्य सद्भावादाश्चर्यम् ॥

मुखे निधाय क्रमुकं नलानुगै-
रथोज्झि पर्णालिरवेक्ष्य वृश्चिकम्।
दमार्पितान्तर्मुखवासनिर्मितं
भयाविलैः स्वभ्रमहासिताखिलैः ॥११०॥

मुखे इति ॥ अथ हस्तक्षालनानन्तरं नलानुगैर्नृभिः क्रमुकं पूगफलं मुखे निधाय वृश्चिकमवेक्ष्य दमेनार्पिता दत्ता पर्णालिर्नागवल्लीदलपङ्क्तिरुज्झि त्यक्ता। किंभूतं वृश्चिकम्—अन्तर्मुखवासेन कर्पूरकस्तूरीखदिरसारादिरूपेण मुखसौगन्ध्यकारिणा निर्मितम्। किंभूतैः—भयेन दशनभिया आविलैर्व्याप्तैः। अतएव स्वभ्रमेणावृश्चिके वृश्चिकबुद्ध्या हासिता हासं प्रापिता अखिला द्रष्टारो यैः। दमेनार्पितः पर्णमध्ये वर्तमानो योन्तर्मुखवासस्तेन निर्मितमिति वा ॥

अमीषु तथ्यानृतरत्नजातयो-
र्वराटराट्चारुनितान्तचारुणोः।
स्वयं गृहाणैकमिहेत्युदीर्य त-
द्द्वयं ददौ शेषजिघृक्षवे हसन् ॥ १११ ॥

अमीष्विति ॥ वराटराट् राजा दमो वा क्रमेण चारु सुन्दरं नितान्तचारुतिसुन्दरं च तयोरिहैतयोस्तथ्यानृतयोः सत्यासत्ययो रत्नजातयोर्मध्ये एकं तव प्रियं रत्नजातं त्वं स्वयमेव गृहाणेति अमीषु वारयाश्रिकेषु विषये उदीर्य कृत्रिमत्वादतिरमणीयकान्तिविशेषमलीकरत्नजातं जिघृक्षवे ग्रहीतुमिच्छवे वारयाश्रिकाय हसन्मदज्ञानहेतोः किंचिद्धास्यं कुर्वन्तयोः सत्यासत्ययो रत्नजातयोर्द्वयं युगं तदपं वा द्वयं ददौ। अमीषु मध्ये शेषजिघृक्षवे इति वा। इह द्वयोर्मध्ये शेषजिघृक्षवे इति वा। शेषजिघृक्षवे 'द्वितीया' इति योगविभागात्समासः ॥

---

१ 'विदग्धराट्' इति जीवानुमुखावबोधासंमतः पाठः।

इति द्विकृत्वः शुचिमृष्टभोजिनां
दिनानि तेषां कतिचिन्मुदा ययुः ।
द्विरष्टसंवत्सरवारसुन्दरी
परीष्टिभिस्तुष्टिमुपेयुषां निशि ॥ ११२ ॥

इतीति ॥ इति पूर्वोक्तप्रकारेण द्विकृत्वो द्विवारं दिवा रात्रौ च शुच्यदोषं मृष्टं स्वादु च भोजिनां भुञ्जानानां तेषां वारयात्रिकाणां कतिचित्पञ्चपाणि दिनानि मुदा ययुः । पञ्चपाणि दिनानि सहर्षास्तत्रोपुरित्यर्थः । किंभूतानाम्—निशि द्विः द्वौ वारावष्टौ द्विरष्टौ षोडश संवत्सरा यासां ताः वारस्य सङ्घस्य सुन्दर्यो वेश्यादास्यादयस्तासां परीष्टिभिश्चुम्बनादिसेवाभिस्तुष्टिं संतोषमुपेयुषां प्राप्तवताम् । 'द्विरष्ट' इतिवत्सुचः कृत्वसुचो बाधकत्वात् 'द्विः' इति प्राप्ते 'द्विकृत्वः' इत्यत्र अपवादविषये क्वचिदुत्सर्गस्यापि समावेशः' इति परिभाषया यथाकथंचित्परिहर्तव्यम् ॥

उवास वैदर्भगृहेषु पञ्चपा
निशाः कृशाङ्गीं परिणीय तां नलः ।
अथ प्रतस्थे निषधान्सहानया
रथेन वार्ष्णेयगृहीतरश्मिना ॥ ११३ ॥

उवासेति ॥ नलः कृशाङ्गीं तां परिणीय वैदर्भगृहेषु पञ्च पञ्च वा प्रमाणमासां ता निशा उवास । पञ्चपाणि दिनानि तत्र स्थितवानित्यर्थः । अथ सप्तमे दिनेऽनया भैम्या सह रथेन निषधान्प्रतस्थे । किंभूतेन—वार्ष्णेयनाम्ना सारथिना गृहीता रश्मयो यस्य । पञ्चपाः 'संख्ययाऽव्यया-' इति समासे 'बहुव्रीहौ संख्येये-' इति डच्, टिलोपः । निशाः । अत्यन्तसंयोगे द्वितीया ॥

परस्य न स्प्रष्टुमिमामधिक्रिया
प्रिया शिशुः प्रांशुरसाविति ब्रुवन् ।
रथे स भैमीं स्वयमध्यरूरुह-
न्न तत्किलाश्लिक्षदिमां जनेक्षितः ॥११४॥

परस्येति ॥ इति ब्रुवन्स नलो भैमीं स्वयमात्मनैव रथेऽध्यरूरुहदध्यारोपयामास । इति किम्—इमां पतिव्रतां भैमीं स्प्रष्टुं स्पर्शनेन्द्रियविषयीकर्तुं परस्य मदन्यस्य नाधिक्रियाधिकारः, प्रिया भैमी शिशुरल्पप्रमाणा, असौ रथश्च प्रांशुः उच्चतर इति स्वयमारोढुमसमर्थेति । तत्तस्माद्धेतोर्जनेक्षितो लोकैर्विलोकितः सन्निमां भैमीं नालिलिङ्ग । किलेति व्याजे । तत्त्वतस्तु जनसमक्षमालिलिङ्गैव । किंत्वेवं ब्रुवन्धाष्टर्यं परिजहारेति भावः । कर्मत्वस्याविवक्षितत्वाद्रथे इत्यधिकरणे सप्तमी । अध्यरूरुहत्, 'णौ चङि-' इत्युपधाह्रस्वत्वे 'दीर्घो लघोः' इत्यभ्यासदीर्घत्वम् । अश्लिक्षत्, 'श्लिष आलिङ्गने' इति क्सः । 'अश्लिष्यत्' इति पाठे लङ् ॥

इति स्मरः शीघ्रमतिश्चकार तं
वधूं च रोमाञ्चभरेण कर्कशौ ।
स्खलिष्यति स्निग्धतनुः प्रियादियं
प्रदीयसी पीडनभीरुदोर्युगात् ॥ ११५ ॥

इतीति ॥ इति हेतोः शीघ्रमतिस्त्वरितबुद्धिः शीघ्रमुचितोपायस्फुरणशीलस्तयोरन्योन्यविषयः स्मरस्तं नलं वधूं भैमीं चोभौ रोमाञ्चानां भरेण बाहुल्येन कर्कशत्वचौ चकार । अन्योन्यसंस्पर्शादुत्पन्नसात्त्विकरोमाञ्चौ तौ जाताविति भावः । इति किम्—प्रदीयसी स्निग्धतनुर्नितरां कोमला सस्नेहाङ्गी चेयं भैमी । अतः प्रियाङ्गलात्सकाशात्स्खलिष्यति निःसरिष्यति । यतः पीडने निबिडधारणे भीरु दोर्युगं बाहुयुगं यस्य तस्माच्छिथिलधारिणः इति । 'इतीव तं शीघ्रमतिः स्वरोऽकरोद्वधूम्' इति पाठः ॥

तथा किमाजन्मनिजाङ्कवर्धितां
प्रहित्य पुत्रीं पितरौ विषेदतुः ।
विसृज्य तौ तं दुहितुः पतिं यथा
विनीततालक्षगुणीभवद्गुणम् ॥ ११६ ॥

तथेति ॥ तौ पितरौ तं दुहितुः पतिं जामातरं नलं विसृज्य संप्रेष्य यथा विषेदतुः विषण्णौ बभूवतुः, तथा आजन्म जन्मप्रभृति निजाङ्कयोः स्वीयोत्सङ्गयोर्वर्धितां वृद्धिं प्रापितां प्रहित्य प्रस्थाप्य विषेदतुः किम् । अपितु नेति वैधर्म्योपमा । यतः—किंभूतम्—विनीततया स्वविनयत्वेन लक्षगुणीभवन्तः शौर्यादयो गुणा यस्य तम् । सुतावियोगादपि सगुणजामातृवियोगो नितरां तयोर्दुःसहो जात इत्यर्थः । प्रहित्य 'हि गतौ' क्त्वो ल्यपि तुक् । विषेदतुः । सदेरेत्वाभ्यासलोपौ । 'सदिरप्रतेः' इति षत्वम् ॥

निजादनुव्रज्य स मण्डलावधे-
र्नलं निवृत्तौ चटुलापतां गतः ।
तडागकल्लोल इवानिलं तटा-
द्धृतानतिर्व्यावृते वराटराट् ॥ ११७ ॥

निजादिति ॥ स वराटराट् भीमो नलमनुव्रज्यानुगम्य निजान्मण्डलावधेः सकाशान्निवृत्तौ परावृत्तिसमये चटु प्रियवचनं लपति भाषत इति चटुलापस्तद्भावं गतः प्राप्तः प्रियं भाषमाणो धृताङ्गीकृता नलकृता आनतिर्नमस्कारो येन स एवंभूतः सन् व्यावृते निजगृहान्प्रति परावृत्तः । क इव—तडागकल्लोल इव । यथानिलं वायुमनुव्रज्य तटान्निवृत्तो चटुला आपो यस्य तद्भावं गतः सन् तीरात्सकाशात्तडागतरङ्को व्यावर्तत इत्युपमा । चटुलाप इत्यत्र 'कर्मण्यण्' पक्षे 'ऋक्-' आदिना समासान्तः । स तु तत्पुरुष एवेति कश्चित्तदुपेक्ष्यम् ॥

पितात्मनः पुण्यमनापदः क्षमा
धनं मनस्तुष्टिरथाखिलं नलः ।
अतः परं पुत्रि न कोपि तेहमि-
त्युदस्रुरेष व्यसृजन्निजौरसीम् ॥ ११८ ॥

पितेति ॥ इत्युक्त्वा उद्गतान्यस्रूणि यस्य स एष भीमो निजामौरसीं स्वीयक्षेत्रबीजाभ्यामुत्पादितां भैमीं व्यसृजत्प्राहिणोत् ।

---

१ सुखावबोधाया पूर्वोत्तरार्धव्यत्यासः ।

१ 'विराटराट्' इति पाठः सुखावबोधासंमतः ।

इति किम्—हे पुत्रि, आत्मनस्तव पुण्यं धर्म एव पिता हितकारित्वात्, अहितनिवारकत्वाच्च । तथा—तव क्षमाः सहनशक्तयोऽनापदो न विद्यन्त आपदो याभ्यस्ताः । आपन्नाशिका इत्यर्थः । तव मनसस्तुष्टिः संतोषोऽलुब्धत्वमेव धनम् । अथानन्तरमखिलमपि तवेष्टं नल एव । किं बहुना—एतदतिरिक्तसकलाभीष्टदत्वात्सर्वं नल एवेत्यर्थः । अतः परमद्यतनदिनप्रभृत्यहं भीमस्ते कोपि संबन्धी बान्धवो न भवामीति ॥

प्रियः प्रियैकाचरणाच्चिरेण तां
पितुः स्मरन्तीमचिकित्सदाधिषु ।
तथास्त तन्मातृवियोगवाडवः
स तु प्रियप्रेममहाम्बुधावपि ॥ ११९ ॥

प्रिय इति ॥ प्रीणाति हर्षं जनयति प्रियो नलः पितुः स्मरन्तीं तां भैमीं प्रियस्य मनीषितस्य एकस्य वस्तुन आचरणात्करणान्मनीषितस्य यदेकं मुख्यं केवलं वा करणं तस्मादाधिषु पितृधियोगजमानसपीडासु सत्सु चिरेण बहुना कालेनाचिकित्सदुपचचार । कस्यचिदिष्टस्य मेलनात्पितृवियोगजन्यदुःखं चिरेणात्याजयदित्यर्थः । चिरकालं पितुः स्मरन्तीमिति वा । स सर्वजनप्रसिद्धस्तस्या मातृवियोग एवासह्यतरत्वाद्वाडवो वडवानलः । तु पुनः प्रियस्य नलस्य प्रेमा निरुपाधिकः स्नेहस्तद्रूपे महाम्बुधौ सत्यपि तथाप्रच्युतप्राच्यरूप एवास्त स्थितवान् । तस्मिन्नतिप्रियं कुर्वत्यपि स स्नेहमपि न शान्त इत्यर्थः । पितृवियोगदुःखान्मातृवियोगस्य गौरवं सूचितम् । विशेषतश्च कन्यानाम् । अपिरर्थे । जलानलयोर्विरोधेऽपि वाडवस्याम्बुधावेव स्थितिर्युक्तेत्यर्थः । शशाम (तृतीयचरणे), 'न तु प्रिय-' इत्यपि च पाठौ स्पष्टार्थौ । पितुः 'अधीगर्थ-' इति षष्ठी । अचिकित्सत् । 'कित निवासे रोगापनयने च' इत्यस्मात् 'गुप्तिज्किद्भ्यः-' इति स्वप्रतीकारे स्वार्थेसन् कितेश्चोदात्तेषु पाठात् सन्नन्तादपि परस्मैपदमेव, न त्वात्मनेपदमिति सिद्धान्तः ॥

असौ महीभृद्बहुधातुमण्डित-
स्तया निजोपत्यकयेव कामपि ।
भुवा कुरङ्गक्षणदन्तिचारयो-
र्बभार शोभां कृतपादसेवया ॥ १२० ॥

असाविति ॥ असौ भूभृच्चलस्तु पुनर्बहुधानेकप्रकारं मण्डितो नानारत्नादिभिरलंकृतस्तया भैम्या कामप्यतिशयितां शोभां बभार । किंभूतया—कुरङ्गवद्धरिणवदीक्षणं विलोकनम्, दन्तिवद्धस्तिवच्चारो गतिः तयोर्भुवा स्थानभूतया हरिणाक्ष्या गजगत्या च । तथा—कृता भर्तुः पादसेवा यया । कया क इव—निजोपत्यकया पर्वतासन्नभूम्या महीभृत्पर्वत इव । बहुभिर्गैरिकादिधातुभिर्मण्डितः । किंभूतयोपत्यकया—हरिणानामीक्षणस्य, हस्तिनां भक्षणस्य गमनस्य वा स्थानभूतया । यथा—कृता प्रत्यन्तपर्वतानां सेवा आश्रयणं यया । कृता प्रत्यन्तपर्वतैः सेवा यस्या इति वा ॥

तदेकतानस्य नृपस्य रक्षितुं
चिरोढया भावमिवात्मनि श्रिया ।
विहाय सापत्न्यमरञ्जि भीमजा
समग्रतद्वाञ्छितपूर्तिवृत्तिभिः ॥ १२१ ॥

तदिति ॥ चिरोढया चिरकालं श्रियमाणया । अथ च—चिरपरिणीतया श्रिया राज्यलक्ष्म्या तदेकतानस्य तदेकनिष्ठस्य भैमीतरस्य नृपस्यात्मनि स्वविषये भावमनुरागं रक्षितुं स्थिरीकर्तुमिव सापत्न्यमेकभर्तृकस्त्रीद्वयान्योन्येर्ष्यां विहाय समग्राणां तस्या भैम्या वाञ्छितानां पदार्थानां पूर्तिः पूरणं तस्यां वृत्तिभिर्वर्तनैरुपायैः कृत्वा भीमजारञ्जि प्रीणिता । संपद्वैभवेन दुर्लभान्यपि तद्वाञ्छितानि नलेन पूरितानि, ततश्च सा परितुष्टेति भावः । अन्यापि चिरपरिणीता विदुषी नवोढायामनुरक्तस्वामिन आत्मन्यनुरागरक्षणार्थं सापत्न्यं त्यक्त्वात्मनो ज्यैष्ठ्यं रक्षयन्ती सती नवोढाया हितकरणेन प्रीतिं जनयति ॥

मसारमालावलितोरणां पुरं
निजाद्रियोगादिव लम्बितालकाम् ।
ददर्श पश्यामिव नैषधः प्रिया-
मथाश्रितोद्वीविकमुन्नतैर्गृहैः ॥ १२२ ॥

मसारेति ॥ अथ बहुमार्गलङ्घनानन्तरं नैषधः पुरं प्रियामिव ददर्श । किंभूतां पुरम्—मसारमालावलिरिन्द्रनीलमालापरम्परा एवाम्रदलादिरचितमालारूपाणि तोरणानि यस्याम् । इन्द्रनीलमालावलियुक्तानि तोरणानि बहिर्द्वाराणि यस्यास्ताम् । तथा—अत एव—निजाद्रियोगाल्लम्बितालकामिव प्रसाधितचूर्णकुन्तलामिव । तथा—उन्नतैरत्युच्चैर्गृहैः कृत्वा आश्रिताङ्गीकृता उद्वीविकामूर्ध्वीकृतकण्ठतया विलोकनं यथा स्यादेवं पश्यामिव विलोकिकामिव । उच्चगृहत्वादूरत एव दृष्ट्वानित्यर्थः । 'पथाम्' इति पाठे मार्गाणां पश्यामिव । अन्यापि नायिका प्रोषिते नायकेऽप्रसाधितालका सती उद्वीविकया प्रियागमनमार्गान्पश्यति । मसाराणां नीलत्वादलकत्वम् । पथामिति 'कर्तृकर्मणोः-' इति कर्मणि षष्ठी ॥

पुरीनिरीक्षान्यमना मनागिति
प्रियाय भैम्या निभृतं विसर्जितः ।
ययौ कटाक्षः सहसा निवर्तिना
तदीक्षणेनार्धपथे समागमम् ॥ १२३ ॥

पुरीति ॥ अयं मत्प्रियो मनाक् ईषत्पुरीनिरीक्षया अन्यमना दुश्चित्त इति हेतोरस्मिन्नवसरेऽयं सम्यन्निरीक्षितुं शक्नुयात इति बुद्ध्या भैम्या प्रियाय प्रियं वीक्षितुं निभृतं गूढं यथा तथा विसर्जितः

---

१ 'तथाच 'अन्योन्याभावसंसर्गाभावभेदव्यवस्थितौ । मत्या स्यात्तव्यवस्थेति स्वाश्रयं कश्चिकित्सतु' इति श्रीहर्षमिश्रीयखण्डनस्यपद्यव्याख्यानावसरे **खण्डनप्रकाशे**—'चिकित्सताम्' इति युक्तः पाठः । कितियातोः केवलस्याप्रयोगात् 'भवत्येवं कृत लिङ्गं समुदायस्य विशेषकं भवति' इति न्यायादनुदात्तेष्वादात्मनेपदप्राप्तेः—इति यद्वर्धमानमिश्रैरुक्तं तच्चिन्त्यमेव'—इति **सुखावबोधा** ।

१ 'प्रियाम्' इति पाठः कुत्रापि नोपलब्धः । तथापि 'पथामिति पाठे' इति 'प्रियामिव' इति च टीकावगतत्वात्स्थापितः ।

प्रेषितः निजः कटाक्षः सकलां पुरीमविलोक्यैव किंचिन्निरीक्ष्य भैम्यनुरागबाहुल्यात्सहसासमय एव पुरीनिरीक्षणान्निवर्तिना शीघ्रं परावृत्तेन तदीक्षणेन नलकटाक्षेण सहार्धपथ एव समागमं संबन्धं ययौ। उभावपि परस्परानुरागेण क्षणमात्रमप्यवलोकनान्तरायं न सहेते स्मेति भावः। नितरामनुरागः सूचितः। 'पुरीं निरीक्ष्य' इति पाठे पुरीं निरीक्ष्य ईषदन्यमनाः किमिति वुद्ध्वा प्रेषितः। रहस्यं ज्ञातुं दूतोपि गुप्तं प्रेष्यते। प्रियाय, 'क्रियार्थोपपदस्य–' इति चतुर्थी ॥

अथ नगरधृतैरमात्यरत्नैः
पथि समियाय स जाययाभिरामः।
मधुरिव कुसुमश्रिया सनाथः
क्रममिलितैरलिभिः कुतूहलोत्कैः ॥१२४॥

अथेति ॥ अथ पुरसमीपप्राप्त्यनन्तरं जायया कृत्वाभिरामो मनोहरः स नलो नगरे धृतैः स्थापितैरमात्यरत्नैः सह पथि समियाय मेलनं प्राप। किंभूतैः—कुतूहले भैमीसहितनलदर्शनकौतुके विषय उत्कैरुत्कण्ठितैः। तेन वा उद्ध्वं कं शिरो येषाम्। ऊर्ध्वीकृतशिरोभिः। कः कैरिव—कुसुमश्रिया चम्पकादिपुष्पशोभया सनाथो रमणीयो मधुर्वसन्तः क्रमेण वसन्तागमपरिपाट्या मिलितैर्मध्वास्वादकौतुकेनोत्कण्ठितैरलिभिर्भ्रमरैरिव यथा संयुज्यते तथेत्युपमा ॥

कियदपि कथयन्स्ववृत्तजातं
श्रवणकुतूहलचञ्चलेषु तेषु।
कियदपि निजदेशवृत्तमेभ्यः
श्रवणपथं स नयन्पुरीं विवेश ॥ १२५ ॥

कियदिति ॥ स नलः पुरीं विवेश। किं कुर्वन्—स्वयंवरवृत्तान्तश्रवणकुतूहलचञ्चलेषु तेषु मन्त्रिप्रवरेषु कियदपि स्वसंबन्धि वृत्तजातं स्वदूत्येन्द्रादिमायाप्रभृतिरूपं मुख्यं वृत्तान्तं संक्षेपेण कथयन्। तथा—कियदपि निजदेशवृत्तं स्वराष्ट्रे जातमेभ्योऽमात्येभ्यः सकाशाच्छ्रवणपथं नयन्नाकर्णयन्। ग्रामगतजातिः। 'अमुत्र–' इति पाठे 'अदः परस्मिन्नत्रापि' इति वचनादमुत्रेत्यनेन व्यवहितोऽपि स्वयंवरः परामृश्यते ॥

अथ पथि पथि लाजैरात्मनो बाहुवल्ली-
मुकुलकुलसकुल्यैः पूजयन्त्यो जयेति।
क्षितिपतिमुपनेमुस्तं दधाना जनाना-
ममृतजलमृणालीसौकुमार्यं कुमार्यः ॥१२६॥

अथेति ॥ अथ पुरप्रवेशानन्तरं जनानां कुमार्योऽकृतविवाहाः कन्यास्तं क्षितिपतिमुपनेमुः समीपमागत्य नमश्चक्रुः। किंभूताः—पथि पथि प्रतिमार्गमात्मनो बाहुवल्लीनां भुजरूपलतानां मुकुलकुलेन कलिकावृन्देन सकुल्यैस्तत्तुल्यैर्लाजैर्मङ्गलद्रव्यतया शकुनदर्शनेन जय सर्वोत्कर्षेण वर्तस्वेति शब्दपूर्वं पूजयन्त्यः। तथा—अमृतजलैः जातायाः मृणाल्या बिसस्येव सौकुमार्यं मार्दवं दधानः। पुरप्रवेशे शकुनार्थं कुमार्य इत्युक्तम्। सकुल्यैः, दिगादित्वाद्यत् ॥

अभिनवदमयन्तीकान्तिजालावलोक-
प्रवणपुरपुरन्ध्रीवक्त्रचन्द्रान्वयेन।
निखिलनगरसौधाट्टावलीचन्द्रशालाः
क्षणमिव निजसंज्ञां सान्वयामन्वभूवन् ॥१२७॥

अभीति ॥ निखिलानां नगरसंबन्धिनां सौधानां सुधाधवलितगृहाणामट्टावल्य उपरितनगृहविशेषपङ्क्तयस्तासामप्युपरि चन्द्रशालास्तृतीयशिरोगृहाः। अट्टावलीनां गवाक्षविवराणि वा। ता अभिनवा नवोढा दमयन्ती तस्याः कान्तिजालस्यादृष्टपूर्वस्यावलोके प्रवणानामुत्सुकानां पुरपुरन्ध्रीणां वक्त्रचन्द्रस्यान्वयेन संबन्धेन कृत्वा क्षणमिव क्षणमात्रं यावत्तन्मुखसंबन्धस्तावत्पर्यन्तं निजसंज्ञां स्वीयं नाम मुखचन्द्रसंबन्धतया सान्वया चन्द्रयुक्ताः शालाः गृहाणि चन्द्रशालाः, चन्द्राणां वा संबन्धिन्यः शालाः (इति) योगसहितामन्वभूवन्। सान्वयामिवेति वोत्प्रेक्षा। सर्वा अपि पुरनार्यो गवाक्षविवरैर्भैमीमपश्यन्। तानि च तन्मुखचन्द्रसंबन्धेन यौगिकत्वेन कविनोत्प्रेक्षितानि ॥

निषधनृपमुखेन्दुश्रीसुधां सौधवाता-
यनविवरगरश्मिश्रेणिनालोपनीताम्।
पपुरसमपिपासापांसुलत्वोत्परागा-
ण्यखिलपुरपुरन्ध्रीनेत्रनीलोत्पलानि ॥१२८॥

निषधेति ॥ अखिलानां सकलानां पुरपुरन्ध्रीणां नगरस्त्रीणां नेत्राण्येव नीलोत्पलानि निषधनृपस्य मुखेन्दुश्रीस्तल्लक्ष्णां सुधाममृतं पपुः सादरमालोकन्त। किंभूतां सुधाम्—साधवातायनानां विवरेभ्यश्छिद्रेभ्यो गच्छन्त्यो बहिर्निर्गच्छन्त्यो रश्मिश्रेणयो नयनकिरणपङ्क्तयस्तद्रूपा ये नाला बिसयुक्तत्वादल्पजलपानसाधनभूताः कमलनालदण्डास्तैरुपनीतां नेत्रसमीपं प्रापिताम्। किंभूतानि नीलोत्पलानि—असमयासुल्यया तिभूयस्या पिपासया पानेच्छया पांसुलत्वं शुष्कत्वं सोत्कण्ठतरत्वं च तेनैवोत्कृष्टा उत्पतन्तो वा परागाः कौसुमरजांसि येषु तानि। गवाक्षविवरैः कृत्वा नलमुखशोभां सर्वा अपि सादरं ददृशुरित्यर्थः। कुमारीणां समीपगत्या, पौरस्त्रीणां च गवाक्षान्तर्गत्या, कौतुकमात्रेण दृष्टेरार्जवेन कनीनिकानीलरश्मीनां नालारूपाणामुचिततरत्वमुक्तम्। अन्योपि पिपासात्यन्तशुष्ककण्ठो दूरस्थं कूपाद्युदकं सच्छिद्रकमलनालादिना पिबति। नत्वेकवारमेव बहु पिबत्यन्तर्हृदयपीडाभिया ॥

अवनिपतिपथाट्टस्त्रैणपाणिप्रवाल-
स्खलितसुरभिलाजव्याजभाजः प्रतीच्छन्।
उपरि कुसुमवृष्टीरेष वैमानिकाना-
मभिनवकृतमैर्मासौधभूमिं विवेश ॥ १२९ ॥

---

१ 'अवनिपतिरथोर्ध्वस्त्रैण–' इति पाठो जीवातुसंमतः। २ 'लाजव्रात–' इति 'लाजव्राज–' इति, 'लाजाव्राज–' इति, च पाठः सुखावबोधासंमतः।

अवनीति ॥ एष नलोऽभिनवकृतस्य नूतननिर्मितस्य भैमीसंबन्धिनः सौधस्य शान्तिहोमाद्यलंकृतां भूमिमुपरितनीं वा भूमिं विवेश । किं कुर्वन्—कौतुकविलोकनार्थं गगने स्थितानां वैमानिकानां देवानां कुसुमवृष्टीरुपरि शिरस्यादरेण प्रतीच्छन्स्वीकुर्वन् । किंभूता वृष्टीः—अवनिपतिपथे राजमार्गेऽट्टेषु विपणिस्थेष्वट्टालकेषु वर्तमानानां स्त्रैणानां स्त्रीवृन्दानां पाणिप्रवालेभ्यः स्खलिताः सुरभयः पङ्कजपरिमलविशेषयुक्ता लाजास्तेषां व्याजं मिषं भजन्ति । शकुनार्थं विकीर्यमाणानां लाजानां शुभ्रत्वादूर्ध्वदेशस्रंसनाच्च पुष्पवृष्टित्वम् । ता अपि पल्लवेभ्यो निर्गच्छन्ति । वैमानिकाः, चरत्यर्थे ठक् ॥

इति परिणयमित्थं यानमेकत्र याने
दरचकितकटाक्षप्रेक्षणं चानयोस्तत् ।
दिवि दिविषदधीशाः कौतुकेनावलोक्य
प्रणिदधुरिव गन्तुं नाकमानन्दसान्द्राः १३०

इतीति ॥ दिविषदां देवानामधीशा इन्द्रादयश्चत्वारो देवा नाकं स्वर्गं प्रति गन्तुं प्रणिदधुरिव गन्तुमचिन्तयन्निव । तत्त्वतस्तद्विहाय वाञ्छा नास्त्येवेतीवशब्दः सूचयति । किंभूताः—अनयोर्भैमीनलयोरिति पूर्वोक्तप्रकारं परिणयं विवाहमित्थमुक्तरीत्या च एकत्रैकस्मिन्याने रथे यानं स्थित्या गमनम्, तथा—दरचकितमीषत्सभयं सलज्जं यत्कटाक्षैरन्योन्यविलोकनं, तच्च एतत्सर्वं दिव्याकाशे स्थित्वा कौतुकेनावलोक्यानन्देन परमहर्षेण सान्द्राः पूर्णाः । 'प्रणिदधुरथ–' इति पाठे तयोर्गृहप्रवेशानन्तरमित्यर्थः । स्वयंवरानन्तरमेव देवा निर्गता इति चतुर्दशे सर्गे यद्यप्युक्तं तथापि भूमेर्निर्गत्य नलपुरप्रवेशपर्यन्तं नलभैमीकौतुकविलोकनार्थं गगने स्थिता इति दिविपदेन सूचितम् । इदानीं पुनः स्वर्गं प्रति निर्गता इत्युक्तेर्न कोपि विरोधः । किंचानन्तरसर्गसंगत्यै कलिनलद्वेषारम्भस्याप्रस्तुततां परिहर्तुं नलः पुरं प्रविष्टः, देवाश्च स्वर्गं जग्मुः । गच्छतां च तेषां मध्येमार्गं कलेरुत्तरप्रत्युत्तरदानादिप्रसक्तानुप्रसक्त्यवतरणाय युक्तमुक्तम् ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
काश्मीरैर्महिते चतुर्दशतयीं विद्यां विदद्भिर्महा-
काव्ये तद्भुवि नैषधीयचरिते सर्गोऽगमत्षोडशः १३१

श्रीहर्षमिति ॥ पूर्वार्धः पूर्ववत् । किंभूते काव्ये—चतुर्दशतयीं विद्यां विदद्भिर्जानद्भिः सरस्वतीजाग्रदधिष्ठानकाश्मीरदेशोद्भवैरपि विद्वद्भिः परीक्षापूर्वं महिते पूजिते । दोषलेशेनापि रहिते सर्वगुणपूर्णे । तथा—तद्भुवि तस्माच्छ्रीहर्षाद्भवतीति तद्भु । तस्माद्भूरुत्पत्तिर्यस्यैवंविधे वा । 'नैषधेश–' इति पाठे नैषधश्चासावीशश्चेति व्याख्येयम् । काश्मीरैरिति पूजार्थक्तयोगे 'क्तस्य च वर्तमाने' इति षष्ठीविधानात्तृतीया चिन्त्या । 'पूजितो यः सुरैरपि' इत्यादिशिष्टप्रयोगदर्शनाद् 'वर्तमानेर्थे विहितस्य क्तस्य योगे षष्ठी भवति, चकारात्प्रयोजनानुरोधेनान्यापि' (इति) सूत्रार्थं निर्वर्ण्य, 'चतुर्थ्यर्थे बहुलं छन्दसि' इत्यतो बहुलग्रहणं वानुवर्त्य, काश्मीरैः करणभूतैः, महः पूजा संजातास्येति महित इति तारकादेराकृतिगणत्वात् क्तान्तत्वाभावं वा संपाद्य, क्तान्तत्वेपि 'कलहंसरागमहित' इत्यादि भट्टिप्रयोगे समासदर्शनात् 'मतिबुद्धिपूजार्थेभ्यश्च' इति चकाराद्भूतेपि शिष्टप्रयोगानुसारेण क्तप्रत्ययमङ्गीकृत्य, 'क्तस्य च वर्तमाने' इति षष्ठीप्राप्त्यभावात्कर्तरि तृतीयैवेति वा यथाकथंचित्समर्थनीयम् । चतुर्दशतयीमिति 'संख्याया अवयवे–' इति तयपि 'टिड्ढाणञ्–' इति ङीप् । विद्यां विदद्भिः 'न लोका–' इति षष्ठीनिषेधः । तद्भुवि, भाषितपुंस्कत्वान्नुमभावः । षोडशः पूर्ववत् ॥

इति श्रीबेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे षोडशः सर्गः ॥

सप्तदशः सर्गः ।

अथारभ्य वृथाप्रायं धरित्रीधावनश्रमम् ।
सुराः सरस्वदुल्लोललीला जग्मुर्यथागतम् ॥ १ ॥

अथेति ॥ अथ स्वर्गगमनचिन्तनानन्तरं धरित्रीं प्रति धावनेन जनितं प्रयासं वृथेव वृथाप्रायं व्यर्थमिवारभ्य विधायागाधत्वेनानुपलक्षितहर्षविषादतया । अथ च—तटभूमिं प्रति निष्प्रयोजनभावगमनेन ततः पुनर्यथागतं व्यावर्तनेन च । सरस्वतः समुद्रस्योल्लोलास्तरङ्गास्तद्वल्लीला येषां तत्तुल्याः सुरा आगतमनतिक्रम्य यथागतं स्वर्गं जग्मुः । भैमीमप्राप्यैव जग्मुरित्यर्थः । भैम्यलाभाच्छ्रमस्य वैयर्थ्यम् । नलभैमीवरदानद्वारात्मगौरवरक्षणात्प्रायशब्दः प्रायोजि, न तु वृथैवेत्युक्तम् । वृथा वृथात्वं प्रायते प्राप्नोति वा वृथाप्रायम् । यथागतमव्ययीभावः । यथा आगतं यथा जग्मुरिति वा ॥

तदेवाह—

भैमी पत्ये भुवस्तस्मै चिरं चित्ते धृतामपि ।
विद्यामिव विनीताय न विषेदुः प्रदाय ते ॥ २ ॥

भैमीति ॥ ते देवाश्चिरं चित्ते धृतामपि भैमीं तस्मै भुवः पत्ये नलाय प्रदाय दत्त्वा न विषेदुः । पश्चात्तापं न प्राप्ता इत्यर्थः । कस्मै कामिव—विनीताय शिष्याय चिरं चित्ते धृतामभ्यस्तां विद्यामिव । दत्तापि विद्या चित्ताद्यथा नोपरमति, तथा तस्मै दत्तापि सा सगुणतया तेषां चित्तान्नोपरतेति ॥

कान्तिमन्ति विमानानि भेजिरे भासुराः सुराः ।
स्फटिकाद्रेस्तटानीव प्रतिबिम्बा विवस्वतः ॥ ३ ॥

कान्तीति ॥ भासुरास्तेजोरूपाः सुराः कान्तिमन्ति रत्नैर्दीप्राणि विमानानि यदृच्छया गामिनो रथान्भेजिर आरुरुहुः । के कानीव—विवस्वतः सूर्यस्य भासुराः प्रतिबिम्बाः स्फटिकाद्रेः कैलासस्य तटानीव । प्रतितटं प्रतिफलितत्वात्प्रतिबिम्बानां बहुत्वम् । भासुराः 'भञ्जभास–' इति घुरच् ॥

जवाज्जातेन वातेन बलाकृष्टबलाहकैः ।
श्वसनात्स्वस्य शीघ्रत्वं रथैरेषामिवाकथि ॥ ४ ॥

जवादिति ॥ जवान्निजवेगाज्जातेन वातेन कृत्वा बलादाकृष्टाः सहचरीकृता मेघा यैरेषां देवानां रथैः श्वसनाद्वायोः सकाशात्स्वस्यात्मनः शीघ्रगामित्वं द्रष्टृणामग्रेऽकथीव कथितमिव । आकृष्टबलाहकस्य वायोः पश्चाद्गामित्वात्पुरश्चलितानां रथानां शीघ्रत्वमित्यर्थः । शीघ्रशब्दोऽत्र धर्मिवचनः । वेगजेन वातेन गमनेनेति वा । वाधातोर्भावे क्तः । श्वसनात्, 'पञ्चमी विभक्ते' इति पञ्चमी ॥

क्रमाद्दवीयसां तेषां तदानीं समदृश्यत ।
स्पष्टमष्टगुणैश्वर्यात्पर्यवस्यन्निवाणिमा ॥ ५ ॥

क्रमादिति ॥ क्रमाद्गमनाद्दवीयसां दूरतराणां तेषां तदानीमणिमाणुत्वं स्पष्टं प्रकटं समदृश्यत । किंभूत इव—अष्टानां गुणानामणिमादीनामैश्वर्यादाधिपत्यात्पर्यवस्यन्निव । पृथग्भूत इव । सर्वेभ्यो महिमादिभ्यो गुणेभ्यः पृथग्भूतत्वादिव स्पष्टं दृष्ट इत्यर्थः । स्थूलमपि वस्तु दूरत्वात्सूक्ष्मं दृश्यते तेषामष्टौ गुणा विद्यन्ते तन्मध्येऽणिमैव तस्मिन्समये स्पष्टो दृष्टः, नत्वन्य इत्यर्थः । तस्मिन्काले पर्यवस्यन्स्फुटीभवन्निति वा । स्पष्टमुत्प्रेक्षे । तेषां रथानामिति वा देवानामष्टगुणैश्वर्यात्तत्संबन्धाद्रथेष्वप्यणिमा समागत इति व्याख्येयम् । दवीयसामतितरां दूराणाम्, ईयसुनि 'स्थूलदूर-' इति परयणादिलोपे पूर्वस्य गुणः । अणिमा पृथ्वादिः ॥

ततान विद्युता तेषां रथे पीतपताकताम् ।
लब्धकेतुशिखोल्लेखा लेखा जलमुचः क्वचित् ॥६॥

ततानेति ॥ क्वचित्कस्मिंश्चिदाकाशप्रदेशे लब्धः केतुशिखया ध्वजाग्रेणोल्लेखो योगो यया तत्संबन्धात्कृतविद्युत्प्राकट्येति यावत् । एवंविधा जलमुचो मेघस्य लेखा पङ्क्तिस्तेषां देवानां रथे विद्युता कृत्वा पीता पताका यस्य तद्भावं ततान ध्वजाग्रसंबन्धात्प्रकटिता विद्युद्ध्वजाग्रे पीता पताकेवाभूदित्यर्थः ॥

पुनःपुनर्मिलन्तीषु पथि पाथोदपङ्क्तिषु ।
नाकनाथरथालम्बि बभूवाभरणं धनुः ॥ ७ ॥

पुनरिति ॥ इतस्ततो गमनवशात्पथि पुनः पुनः मिलन्तीषु संबध्यमानासु पाथोदा मेघास्तेषां पङ्क्तिषु वर्तमानं धनुरिन्द्रधनुर्मार्गसंबन्धवशान्नाकनाथरथमालम्बते एवंशीलं संबद्धं सदिन्द्ररथस्येवाभरणं भूषणं बभूव । इन्द्ररथे वर्तमानं धनुरागच्छन्तीषु मेघपङ्क्तिषु क्षणं भूषणमभूदिति वा । मेघा हि सेन्द्रचापाः शोभन्ते ॥

जले जलदजालानां वज्रिवज्रानुबिम्बनैः ।
जाने तत्कालजैस्तेषां जाताशनिसनाथता ॥ ८ ॥

जल इति ॥ जलदजालानां जले तस्मिन्काले इन्द्रादिगमनसमये जातैर्वज्रिणो वज्रस्तस्यानुबिम्बनैः प्रतिबिम्बैः कृत्वा तेषां मेघजालानामशनिना वज्रेण सनाथता सस्वामिकता जातेति जाने । तदाप्रभृति प्रायेण मेघानां सवज्रत्वमित्युत्प्रेक्षा ॥

स्फुटं सावर्णिवंश्यानां कुलच्छत्रं महीभुजाम् ।
चक्रे दण्डभृतश्चुम्बन्दण्डश्चण्डरुचिं क्वचित् ॥ ९ ॥

स्फुटमिति ॥ दण्डभृतो यमस्य दण्डः क्वचिदाकाशदेशे चण्डरुचिं सूर्यं चुम्बन्स्पृशन्सन् तं सूर्यमेव सावर्णेर्मनोर्वंशे जातानां महीभुजां कुलच्छत्रं कुलश्रेष्ठम् । अथ च—कुलक्रमायातं राजचिह्नं स्फुटमिव चक्रे । स्वयं वृत्तत्वात्, अधो दण्डसंबन्धात्, छत्रमिवेत्युत्प्रेक्षा । ते सूर्यमण्डलं प्राप्ता इति भावः । उदये अस्तमये च समानो वर्णोऽस्य स सवर्णः सूर्यस्तस्यापत्यं सावर्णिः, 'अत इञ्' । वंश्यः, दिगादिः ॥

नलभीमभुवोः प्रेम्णि विस्मिताया दधौ दिवः ।
पाशिपाशः शिरःकम्पस्रस्तभूषश्रवःश्रियम् ॥१०॥

नलेति ॥ पाशिपाशो वरुणपाशो नलभीमभुवोरनन्यतुल्ये प्रेम्णि विषये विस्मिताया दिवो विस्मयवशादेव शिरःकम्पेन स्रस्ता भूषा भूषणं यस्मादेवंविधस्य श्रवसः कर्णस्य श्रियं लक्ष्मीं दधौ । तस्यास्ताटङ्करहितः कर्ण इव शुशुभ इत्यर्थः । अनेन दिवो नायिकात्वं व्यज्यते ॥

पवनस्कन्धमारुह्य नृत्यत्तरकरः शिखी ।
अनेन प्रापि भैमीति भ्रमं चक्रे नभःसदाम् ११

पवनेति ॥ पवनस्य चन्द्रसूर्याद्याधारेष्वावहादिषु सप्तसु स्कन्धेषु मध्ये ताराचक्राधारभूतं स्कन्धमारुह्य नृत्यत्तरा उद्गच्छन्तः करा: किरणा ज्वालारूपा यस्य स शिखी वह्निरनेनाग्निना भैमी प्रापीति नभःसदां देवानां भ्रमं चक्रे । भैमीप्राप्तिहर्षादयं नृत्यति किमिति सर्वेषां देवानां भ्रान्तिर्जातेत्यर्थः । अन्योऽपि नववधूलाभे कस्यचिन्मित्रस्य स्कन्धमारुह्य नृत्यत्करो भवति ॥

तत्कर्णौ भारती दूनौ विरहाद्भीमजागिराम् ।
अध्वनी ध्वनिभिर्वेणैरनुकल्पैर्व्यनोदयत् ॥ १२ ॥

तत्कर्णाविति ॥ भारती वाणी भीमजागिरां भैमीवाणीनां विरहाद्दूनौ संतप्तौ तेषां देवानां कर्णावध्वनि मार्गेऽनुकल्पैर्भैमीवाण्याः सकाशाद्यूनैर्वेणैर्वीणासंबन्धिभिर्ध्वनिभिर्व्यनोदयत्सुखिनौ चकार । मुख्याभावेऽनुकल्पोपि कार्यार्थमङ्गीक्रियते । 'स्तनादीनां द्वित्वविशिष्टा जातिः प्रायेण' इति वचनात्कर्णाविति प्रतिनियतापेक्षं द्विवचनम् ॥

अथायान्तमवैक्षन्त ते जनौघमसित्विषम् ।
तेषां प्रत्युद्गमप्रीत्या मिलद्व्योमेव मूर्तिमत् ॥ १३ ॥

अथेति ॥ अथ वाणीवीणाकणितश्रवणानन्तरं ते देवीदेवा असित्विषं खड्गतुल्यकान्तिमायान्तं संमुखमागच्छन्तं जनौघमवैक्षन्तापश्यन् । उत्प्रेक्षते—तेषां देवानां प्रत्युद्गमनस्य प्रीत्या वाञ्छया मिलद्युज्यमानं मूर्तिमत्सशरीरं व्योमाकाशमिव । यतः—सशरीरस्य क्रियावत्त्वं युक्तम् । 'जनौघं मषीत्विषम्' इत्यपि पाठः ।

---

१ 'गित्त्वाङ्गत्वम्' इति **जीवातुस्तु** निर्मूला । अदन्तत्वादेव वृद्धेरप्राप्तेः ।
२ 'तादृशासंबन्धे संबन्धोक्तेरतिशयोक्तिरलंकारः'—इति **जीवातुः** ।

१ 'चण्डरुचम्' इति **सुखावबोधा**संमतः पाठः । २ 'अत्र श्रियमिति श्रियमिति सादृश्याक्षेपान्निदर्शनाभेद' इति **जीवातुः** ।

अद्राक्षुराजिहानं ते स्मरमग्रेसरं सुराः ।
अक्षाविनयशिक्षार्थं कलिनेव पुरस्कृतम् ॥ १४ ॥

अद्राक्षुरिति ॥ ते सुरा अग्रेसरं पुरःसरमाजिहानमागच्छन्तं स्मरमद्राक्षुः । उत्प्रेक्षते—तज्जनौघस्वामिना कलिनाक्षाणामिन्द्रियाणाम् । अथ च—द्यूतपाशकानाम्। संबन्धिनोऽविनयस्याविनीतत्वस्य शिक्षार्थं पुरस्कृतमिवाग्रेकृतमिव । अथ च—पूजितमिव । स्मरो होन्द्रियवैकृतं कर्तुं जानातीतीन्द्रियार्थाक्षशब्दच्छलेन द्यूते पाशकेषु विषये नलमविनयं शिक्षयितुं पाशकाज्ञानद्वारा नलं निग्रहीतुं कलिना पूजितः पुरःप्रेषितश्च । प्रायेणेत्युत्प्रेक्षा ॥

अगम्यार्थं तृणप्राणाः पृष्ठस्थीकृतभीह्रियः ।
शम्भलीभुक्तसर्वस्वा जना यत्पारिपार्श्विकाः ॥१५॥

अगम्येति ॥ एवंभूता जना यस्य कामस्य परितः पार्श्वयोरन्तीति पारिपार्श्विकाः । वयस्या इत्यर्थः । सेवका वा । किंभूताः—गन्तुमशक्यानामनर्हाणां राज्ञ्यादीनां मात्रादीनां च संभोगार्थे तृणमिवानायासत्याज्याः प्राणा येषां ते । अत एव—पृष्ठस्थीकृते पश्चात्कृते परित्यक्ते भीह्रियौ यैस्ते । वधभयं पापभयं लोकलज्जा च, तत्सर्वं यैस्त्यक्तं ते तादृशा निर्भया निर्लज्जाश्चेत्यर्थः । तथा—अप्राप्याभेद्यस्त्रीभेदनकृतप्रतिज्ञाभिः शम्भलीभिः कुट्टनीभिर्भुक्तं सर्वस्वं येषां ते । सन्तीति शेषः । पारिपार्श्विकाः, पूर्ववत् ॥

बिभर्ति लोकजिद्भावं बुद्धस्य स्पर्धयेव यः ।
यस्येशतुलयेवात्र कर्तृत्वमशरीरिणः ॥ १६ ॥

बिभर्तीति ॥ यः स्मरो लोकान्जयतीति लोकजित्तस्य भावं सर्वजनविजयितां बिभर्ति । उत्प्रेक्षते—बुद्धस्य स्पर्धयेव । जिनो हि मारजिदिति स्वशत्रुस्पर्धयेव 'मारजिल्लोकजिज्जिनः' इत्यभिधानाल्लोकजित्पदवाच्यत्वं बिभर्तीत्यर्थः। तथा—यस्याशरीरिणः शरीररहितस्य दग्धदेहत्वादनङ्गस्यात्र लोके कामिनां मनोविकारं प्रति मैथुनद्वारा सर्वजनान्प्रति वा कर्तृत्वं स्रष्टृत्वम् । अत्राप्युत्प्रेक्षते—विश्वकर्तुरीशस्य तुलयेव स्पर्धयेव । ईश्वरो हि स्मरहरत्वात्स्मरस्य शत्रुः, तस्मात्तत्स्पर्धयेव तस्याशरीरकर्तृत्वं स्वयमविनयेनाङ्गीकृतमित्यर्थः । यथा—अशरीरिण एवेश्वरस्य कर्तृत्वमिति न्यायविदः, तथा—अयमप्यनङ्ग एव सन्कार्यकारीत्यर्थः । जिनमहेशाभ्यां जितोऽपि लोकजित्वेनाशरीरकर्तृत्वेन च यः पुनस्ताभ्यां समः । एवंविधोऽतिबलवानिति भावः ॥

ईश्वरस्य जगत्कृत्स्नं सृष्टिमाकुलयन्निमाम् ।
अस्ति योऽस्त्रीकृतस्त्रीकस्तस्य वैरं स्मरन्निव ॥१७॥

ईश्वरस्येति ॥ अस्त्रीकृताः शस्त्रीकृताः स्त्रियो येन एवंविधो यः काम ईश्वरस्य इमां सृष्टिमीश्वरेण निर्मितं कृत्स्नं जगदाकुलयन्व्यवृत्तिं चतः स्ववशं कुर्वन् । अथ च—पीडयन् । अस्ति । उत्प्रेक्षते—तस्येश्वरस्य देहदाहजनितं वैरं स्मरंश्चिन्तयन्निव । देहदाहो ममानेन कृतः तस्मादेतेन रचितमेतदीयं जगत्पीडयिष्यामीति बुद्ध्येश्वरस्य किंचिदपकर्तुमसमर्थः, तदा जगत्स्त्रीरूपेण शस्त्रेण पीडयंस्तेन सह स्पर्धते इत्यर्थः । प्रत्यनीकाग्रे आयुधनिष्कृता स्त्री येनेति स्त्रिया अस्त्रीत्वकरणे विरोधाभासश्च । अथवा—या ईश्वरेण स्त्री कृता सानेनास्त्री कृतेत्यपि प्रतिकूलाचरणेनेश्वरेण सह स्पर्धते । अथवा—ईश्वरेणापि त्रिपुरवधे मोहिनी स्त्री शस्त्रीकृतानेनापि स्त्री शस्त्रीकृतेत्येकविषयतया स्पर्धा । शक्तिरूपो हि श्रीविष्णुस्त्रिपुरवधे भगवता शरतां नीत इत्यागमः । 'अनुस्मरन्' इति पाठे लुप्तोत्प्रेक्षा । सृष्टिशब्दो नियतस्त्रीलिङ्गः । तत्परामर्शाच्च इमामिति निर्देशः । अस्त्रीकृतेत्यत्रानङ्गमङ्गं कृतास्त्रीकृतेति 'वर्णा' इतीकारः । पक्षे—न स्त्री अस्त्री, अस्त्रीकृता स्त्री येनेति समासः । 'नञ्तश्च' इति कप् । कुलकम् ॥

चक्रे शक्रादिनेत्राणां स्मरः पीतनलश्रियाम् ।
अपि दैवतवैद्याभ्यामचिकित्स्यमरोचकम् ॥ १८ ॥

चक्र इति ॥ स्मरः कामः पीतनलश्रियां सादरदृष्टनलशोभानां शक्रादिनेत्राणामिन्द्राद्यादिनेत्राणां दैवतवैद्याभ्यां नासत्याभ्यामपि न चिकित्स्यं प्रतिकर्तुमशक्यमरोचकं रुग्भावं चक्रे । अधिकरूपस्य नलस्य दृष्टत्वात्, तद्धीनरूपे स्मरे दृष्टे तन्नेत्राणां प्रीतिर्न जाता । न केवलं स्मरं दृष्ट्वा न प्रीतास्ते, किंतु दृग्भावपि । तयोरपि नलाद्धीनत्वादित्यर्थः । स्मरदृग्भ्योऽपि नलोऽधिक इति ध्वन्यते । स्मरमनादृत्य पुरश्चलिता इति भावः । अथवा—अरोचकं सर्वथाऽन्नादिरुग्भावो रोगविशेषः । स कर्मजत्वाद्दैववैद्याभ्यामपि चिकित्सितुमशक्यः । किं पुनर्नृवैद्यैरिति समासोक्तिः। भङ्ग्यन्तरेण नलरूपातिशयप्रकाशे तात्पर्यमुक्तम् । उपमानतिरस्काराच्च प्रतीपं च। पीतनलश्रियामिति 'तृतीयादिषु -' इति पुंवद्भावाभावपुंसकह्रस्वत्वाभावान्नुडभावः। अचिकित्स्यमिति शक्यार्थे 'अचो यत' इति यत । 'दुश्चिकित्स्यम्' इति पाठे कर्मणि ण्यत् । दुर्नयार्थः । ण्यत्(र्थ)योगात् 'न लोका–' इति षष्ठीनिषेधात् 'वैद्याभ्याम्' इति तृतीया । अरोचकमिति रोगाख्यायां बाहुलकादस्त्रियामपि ण्वुल् ॥

यत्तत्क्षिपन्तमुत्कम्पमुत्थायुकमथारुणम् ।
बुबुधुर्विबुधाः क्रोधमाक्रोशाक्रोशभीषणम् ॥१९॥

यत्तदिति ॥ अथ स्मरदर्शनानन्तरं यत्तत्किंचिल्लोष्टकाष्ठपाषाणादि परप्रहारार्थं मुञ्चन्तम्, नितरां सर्वाङ्गकम्पिनम्, जनैर्वार्यमाणमथा(प्या)वेशातिशयात्केशाकेशि योद्धुं पौनःपुन्येनोत्तिष्ठन्तम्, लोहितीभूतसर्वाङ्गम्, क्रोशं मर्यादीकृत्याभिव्याप्य वा परनिन्दावाक्यस्य उच्चैर्घुष्टं यस्य । अतिदूरश्रूयमाणपरुषभाषिणमिति यावत् । एवंभूतं सशरीरं क्रोधं तत्र जनौघे ते देवा बुबुधिरे ! एतश्चिह्नः क्रोधोऽयमिति ज्ञातवन्त इत्यर्थः । क्रोधाक्रान्तस्य जातिरियम् । 'आक्रोशाक्रोशभूषणम्' इति पाठे आक्रोशं य आक्रोशः स भूषणं यस्येत्यर्थः । उत्थायुकमिति पूर्ववत् ॥

यमुपामन्त दन्तौष्ठक्षतासृक्कशिप्यनक्षुपः ।
भ्रुकुटीफणिनीनादनिभनिश्वासफूत्कृतः ॥ २० ॥

यमिति ॥ दन्तैरोष्ठयोर्यो व्रणस्तत्र यद्रक्तं तस्य शिष्यभूते तस्मादिव संक्रान्तलौहित्ये लक्षणया तत्तुल्ये नेत्रे येषां ते । तथा—भ्रुकुटी भ्रुवोराक्षेपः संकोचः सैव भुजगी तस्या नादः फूत्कारस्तद्वत्

---

१ 'अगम्यार्थतृणप्राणाः' इति वा पाठः सुखावबोधासंमतः ।

१ इत्यथाप्रत्यनीकम् । आयुधीकृता स्त्री येनेति स्त्रिया 'अस्त्रीत्व' इति पाठः प्रतिभाति ॥

ल्याः संरम्भनिर्गच्छच्छ्वासापवनानां फूत्कारा येषामेवंभूता जना यं सेवन्ते। तं बुबुधिरे इति पूर्वेण संबन्धः। क्रोधवशादन्तरोष्ठौ दश्येते नेत्रे रक्ते जायेते। तेन श्वासफूत्काराश्च निगच्छन्ति। यस्य सेवका एवंविधा इत्यर्थः। रूपकम्। क्षतशोणितस्य, चक्षुस्थितेस्तदुणाः ॥

दुर्गं कामाशुगेनापि दुर्लङ्घ्यमवलम्ब्य यः।
दुर्वासोहृदयं लोकान्सेन्द्रानपि दिधक्षति ॥ २१ ॥

दुर्गमिति ॥ यः क्रोधो मदनबाणेनापि लङ्घयितुमशक्यमत एव दुर्गम्। अथ च—गिर्यादिविषमदुर्गरूपम्। एवंभूतं रुद्ररूपस्य दुर्वाससो मुनेर्मानसमाश्रित्य शक्रादिसहितान्सस्त्रापि लोकान्शापाग्निना दग्धुमिच्छति। दुर्वासा हि सर्वदा क्रोधाविष्टः सर्वमपि शापाग्निना दग्धुमिच्छति। अन्योऽपि क्षुद्रो बाणेनाप्राप्यमतिविषमं गिर्यादिदुर्गमाश्रित्य सर्वानपि पीडयति। रूपकं, समासोक्तिश्च ॥

वैराग्यं यः करोत्युच्चै रञ्जनं जनयन्नपि।
सूते सर्वेन्द्रियाच्छादि प्रज्वलन्नपि यस्तमः ॥२२॥

वैराग्यमिति ॥ यः क्रोधो नितरां मुखादिलौहित्यं कुर्वन्यावत्स्वकार्यं करोति तावदुद्वेगमपि जनयति। तथा—नितरां प्रदीप्तोऽभिवृद्धोऽभिभवेच्चक्षुरादीनि सर्वाणि बाह्याभ्यन्तरेन्द्रियाण्याच्छादयत्येवंशीलमज्ञानमप्युत्पादयति। प्रसिद्धं तम आलोकाभावाच्चक्षुरिन्द्रियमेवाच्छादयति रूपाग्रहणात्, ननु रसादीनि। तमस्यपि रसगन्धादीनां ग्रहणस्य सर्वसाक्षिकत्वात्। इदं तु क्रोधवशान्मनसोऽनवस्थानात्सहकारिसंनिधानाभावाच्चक्षुरादीनां रूपादिस्वविषयग्रहणासामर्थ्यजननात्सर्वेन्द्रियाच्छादि। एवमाश्चर्यजनकं तमश्च यः सूत इत्यर्थः। अपी परस्परसमुच्चयार्थौ। अथ च—यो हिंसादौ प्रीतिं जनयन्महानिष्टोत्पादनानुशयात्प्रायश्चित्ताहत्वनिदानभूतं वैराग्यं जनयति। अथ च पूर्वोक्तप्रकारेण वैराग्यं फलभूतं जनयितुं रञ्जनं करोति। प्रज्वलितुं च तमः सूत इति वा यथाकथंचिद्धेतौ शत्रा व्याख्येयम्। अथवा—अपी विरोधार्थौ। यो लौहित्यं च जनयति, यश्च प्रीतिमुत्पादयति स एवाप्रीतिमिति कथम्। यश्च प्रकर्षेण दीप्तस्तेजोरूपः सोऽन्धकारं रञ्जनं च कथं सूते, तत्रापि सर्वेन्द्रियाच्छादिनमिति विरोधाभासौ। वैराग्यशब्दस्य लौहित्याभावप्रीत्यभावार्थश्लेषात्, तमःशब्दस्य चान्धकारार्थश्लेषात्। तत्परिहारस्तूक्तप्रकारेण ॥

पञ्चेषुविजयाशक्तौ भवस्य क्रुध्यतो जयात्।
येनान्यविगृहीतारिजयकालनयः श्रितः ॥ २३ ॥

पञ्चेष्विति ॥ पञ्चेषुविजयाशक्तौ कामजयविषये अभिनिवेशाभावादशक्तौ सत्यां कुप्यतो महेश्वरस्य जयात्स्ववशीकरणाद्धेतोर्येन क्रोधेन परेण प्रारब्धविग्रहे शत्रौ स्वजयस्य समयः तत्पराभवारम्भसमयः स इत्येवंरूपो नीत्युपदेशोऽङ्गीकृतः। अन्यदा यो जेतुमशक्यः सोऽन्येन विगृहीतो यदा भवति तदा जय्यो भवतीति नीत्युपदेशः। अन्यदा जेतुमशक्यस्य भवस्य स्मरेण सह विग्रहसमये जितत्वाच्छ्रित इवेत्युत्प्रेक्षा। महेश्वरोपि येन स्ववशीकृतः, तस्य क्रोधस्य माहात्म्यमशक्यवर्णनमिति भावः। विगृहीतारिजय इति सप्तमीसमासः। अरेर्जयकाल इति षष्ठीसमासो वा। पञ्चभिः कुलकम् ॥

हस्तौ विस्तारयन्निभ्ये बिभ्यदर्धपथस्थवाक्।
सूचयन्काकुमाकूतैर्लोभस्तत्र व्यलोकि तैः ॥ २४ ॥

हस्ताविति ॥ इभ्ये धनिनि विषये द्वावपि पाणी लोभात्प्रसारयन्, दास्यति न वेति हेतोर्भयं प्रामुवन् अत एवार्धपथस्थवाक् हृदयान्निर्गत्य कण्ठमागत्य मुखादनिःसरन्ती वाणी यस्यैवंभूतः, तथा—आकूतैर्निजदैन्यज्ञापकैश्चेष्टितैः काकुं शोकभयादिजन्यं ध्वनिविकारं सूचयञ्ज्ञापयन् खण्डोक्तिं वदन्निति यावत्। तथा—अङ्गुलीमुखनिक्षेपादिचेष्टितैर्देहि देहीत्यादिभयदैन्यादिवक्तितां वाणीं वदन्, एवंभूतो मूर्तो लोभस्तत्र जनौघे तैर्दैवैर्दृष्टः। यत्तु—धनिनि बिभ्यदिति। तदव्याख्यानम्। 'भीत्रार्थानां भयहेतुः' इति पञ्चमीप्रसङ्गात्। 'इभ्य आढ्यो धनी स्वामी' 'काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः' इति चामरः। लुब्धस्येयं जातिः ॥

दैन्यस्तैन्यमया नित्यमत्याहारामयाविनः।
भुञ्जानजनमाकूतपश्या यस्यानुजीविनः ॥ २५ ॥

दैन्येति ॥ नित्यं दैन्यस्तैन्यमयाः सदा दीनत्वचौरत्वे प्रचुरे येषु तादृशा दैन्यचौर्यरूपा वा, तथा—जाठरवह्न्यननुरूपाहारगौरवादजीर्णरसत्वान्नित्यं दीर्घरोगिणः, तथा—अयमेव सकलं भोक्ष्यते मह्यं भोक्तुं न दास्यति, कीदृग्घृतं दधि च, मह्यं किं वितीर्यम्, अस्मै च किमित्यादिदुष्टदृष्ट्याशयादिनाभ्यवहरतो लोकस्य साभिप्रायं विलोकका एवंभूता यस्य लोभस्य सेवकाः स व्यलोकीति पूर्वेण संबन्धः। इयमपि जातिः। (स्तैन्येति 'स्तेनाद्यन्नलोपश्च' इत्यत्र 'स्तेनात्' इति योगविभागात्ष्यञ्) । आमयावीति 'सर्वत्रामयस्योपसंख्यानम्' इति दीर्घश्च ॥

धनिदानाम्बुवृष्टेर्यः पात्रपाणावनग्रहः।
स्वान्दासानिव हा निःस्वांद्विक्रीणीतेऽर्थवत्सु यः२६

धनीति ॥ संग्रदानभूतब्राह्मणहस्ते विषये समृद्धधनानां नराणां संकल्पसंबन्धिजलवर्षणस्य यो लोभः प्रतिबन्धकः। वृष्टेश्चावग्रहः संभाव्यते। महाधनिकोपि यद्वशात्पात्रपाणौ जलं न वितरतीत्यर्थः। तथा—निःस्वान्निर्धनात् (हेतोः) स्वानात्मनः स्वीयान्पुत्रदारादीन्वा। धनिकेषु विषये निर्गतस्नेहाभिमानः कञ्चन विनिमये स्ववशवर्तिनो दासीपुत्रानिव यो विक्रीणीते वितरति। हा खेदे। निःस्नेन च लोभवशादात्मनो दासा यथा स्वेच्छया धनार्थं विक्रीयन्ते, तथेत्यर्थः। अवग्रहः पूर्ववत् ॥

एकद्विकरणे हेतू महापातकपञ्चके।
न तृणे मन्यते कोपकामौ यः पञ्च कारयन्॥२७॥

एकेति ॥ ब्रह्मवधादिपञ्चमहापातकसङ्घमध्ये एकस्य महापातकस्य द्वयोश्च करणे क्रमेण कारणभूतो यस्माद्, अत एव तयोर-

१ 'अयं पाठः सर्वत्र नोपलभ्यते'। २ 'निःस्वान् धनहीनान्' इति जीवातुः।

ल्पकार्यकारित्वादुभौ कोपकामौ यो लोभस्तृणतुल्यावपि न मन्यते यतः—स्वयं पञ्चापि महापातकानि नरादिना कारयन् । कोपाच्च योऽपि ब्राह्मणो हन्यते, तस्यैकं ब्रह्मवधं प्रति हेतुत्वम्, कामात—गुरुतल्पगमनम्, स्त्रीकामाच्च तद्भर्तुर्ब्राह्मणस्य वधश्चेति महापातकद्वयं प्रति तस्य हेतुत्वम् । धनादिलोभात्तु—ब्रह्मवधः, सुवर्णस्तेयं च । रसलोभात्सुरापानम् । कामलोभात्स्त्रीजातिप्रदर्शितधनलोभाद्वा गुरुतल्पगमनम्, इष्टसंग्रहलोभादेतैश्चतुर्भिरपि सह संसर्ग इत्येवं लोभस्य पञ्चापि महापातकानि प्रति हेतुत्वादधिकत्वात्कोपकामावप्यकिंचित्करौ मन्यते । ताभ्यामप्यधिको लोभ इति भावः । 'एकद्वि–' इति द्वन्द्वत्वाद्बहुजभावः । 'संख्याया अल्पीयस्याः' इत्येकशब्दस्य पूर्वनिपातः । यदा तु एकं वा द्वौ वा प्रमाणं येषामिति समासे 'बहुव्रीहौ संख्येये डजबहुगणात्' इति डच्प्रसङ्गस्तदा 'एकद्व–' इति पाठो युक्तः । तृणे इति 'मन्यकर्मण्यनादरे विभाषाप्राणिषु' इति चतुर्थ्या वैकल्पिकत्वात्पक्षे द्वितीया ॥

यः सर्वेन्द्रियसम्रापि जिह्वां बह्वलम्बते ।
तस्यामाचार्यकं याञ्चावटवे पाटवेर्जितुम् ॥ २८ ॥

यः सर्वेति ॥ यो लोभः सर्वेन्द्रियाणि पञ्चेन्द्रियाणि मनश्चेति यस्य एवंविधः । घ्राणं गन्धलुब्धम्, चक्षू रूपलुब्धमित्यादिप्रकारेणेत्यर्थः । (अपि) बहु यथा भवति तथा जिह्वामवलम्बते । किं कर्तुम्—तस्यां जिह्वायां याञ्चावटवे याञ्चावदुर्व्रतचारी शिष्यस्तस्मै पाटवे पटुत्वविषये याञ्चाचाटूक्तिकौशले आचार्यकं गुरुत्वमर्जितुम् । लुब्धस्यैषा रीतिः । अयमत्र तात्पर्यार्थः—यो लोभो दुर्वाचे विप्रियवाक्यवचनाय यस्यामर्थ्यं नैपुण्यं तद्विषये गुरुतां विधातुमिवास्याः सकाशात्प्रियवचनसंभाषणाभ्यासं कर्तुमिव शिष्यभूतः तामतितरां सेवत इत्यर्थः । लोभवशात्सर्वोऽपि याञ्चाप्रियवाक्यानि ब्रूत इति भावः । 'याञ्चाव(च)टवे पटवे' इति पाठे पटुने इदाय याञ्चाव(च)टव इत्यर्थः । याञ्चा चाटुपाटवे विषये स्वस्या गुरुतां विधातुमिवोत्प्रेक्षा । 'योपधात–' इति वुञि 'आचार्यकम्' इति साधु । 'व(च)टवे पटवे' इति भाषितपुंस्कम् । पञ्चभिः कुलकम् ॥

पथ्यां तथ्यामगृह्णन्तमन्धं बन्धुप्रबोधनाम् ।
शून्यमाश्लिष्य नोज्झन्तं मोहमैक्षन्त हन्त ते ॥२९॥

पथ्यामिति ॥ हितां सत्यां बन्धुना मातापित्रादिना कृतां प्रबोधनां सत्कर्म कुरु, असन्मार्गात्परिस्यादिरूपां प्रवर्तनामङ्गीकुर्वाणम् । यतः—अन्धमज्ञानबहुलम् । तथा—(शून्यम्) अलीकमप्रामाणिकमपि.....रजतत्वेन, अनात्मभूतानि जडान्यपि देहेन्द्रियादीन्यविद्याविलासवशादात्मत्वेन, (आश्लिष्य) प्रतिपद्य सहस्रशो बोध्यमानमपि न त्यजन्तं एवंभूतं मोहं ते देवास्तत्र जनौघे ददृशुः । हितस्य प्रियस्य चानङ्गीकरणात्, आश्लिष्टशून्यापरित्यागाच्च । 'हन्त' इत्याश्चर्ये खेदे वा । मूढस्येयं जातिः ॥

१ 'याच्ञाचाटवे पाटवे' इति सुखावबोधासंमतः पाठः । २ 'अत्रोपमोत्प्रेक्षाभ्यां स्वजातीयकाभ्यां वाक्ययोर्ययोः शब्दहेतुत्वाच्छब्दार्थहेतुकाव्यलिङ्गमलंकारः संकीर्यते इत्यलंकारत्रयस्य परस्परसंबन्धेनाङ्गाङ्गिभावः' इति जीवातुः ।

श्वःश्वः प्राणप्रयाणेऽपि न स्मरन्ति स्मरद्विषः ।
मग्नाः कुटुम्बजम्बाले बालिशा यदुपासिनः ॥३०॥

श्वःश्व इति ॥ यस्य मोहस्य सेवका बालिशा मूर्खाः । अथवा स्वयंप्र(स्वप्र)ज्ञत्वाभिमानात्, परोपदेशानङ्गीकाराच्च शिशुभूताः । एवंभूता जनाः पुत्रकलत्रादिरूपकुटुम्बरूपे कर्दमे मुद्रिता अपि मृतो(ऽहम्), अयं पुत्रः किं करिष्यति, इदं कलत्रं वा किं करिष्यति, अस्य क्षेत्रादेः किं भविष्यतीत्यादिप्रकारेण पुत्रादियोगक्षेमविचारणामात्रपराः शिश्नोदरपरायणाः सन्तः परेद्यवि । अतिसंनिहित इति यावत् । 'जातस्य हि ध्रुवो मृत्युः' इत्यादिवचनप्रामाण्यादनातुरत्वेऽपि संनिहिते प्राणगमने ज्ञाते । संनिपातादिनातुरत्वेऽपि वा श्वः प्राणप्रयाणे निश्चिते सत्यपि संसारसमुद्धरणकारं स्मरहरं न ध्यायन्ति । किंतूक्तप्रकारेण मरणसमयेऽपि कुटुम्बचिन्तामेव कुर्वन्तीत्यर्थः । इदमपि मूढलक्षणम् । जम्बाले निमग्नोऽन्योऽपि किमपि न स्मरति । 'श्वःश्वः' इति वीप्सायां द्विः । 'श्वः स्वप्राण–' इति स्वस्य प्राणानामित्यर्थः । स्मरद्विषः इति 'अधीगर्थ–' इति कर्मणि षष्ठी । 'द्विषम्' इति पाठे कर्मत्वविवक्षया द्वितीया ॥

पुंसामलब्धनिर्वाणज्ञानदीपमयात्मनाम् ।
अन्तर्म्लापयति व्यक्तं यः कज्जलवदुज्ज्वलम् ॥३१॥

पुंसामिति ॥ यो मोहो न लब्धं निर्वाणं विनाशो येन स ज्ञानरूपो दीपस्तन्मयस्तत्प्रचुर आत्मा मनो येषां यमिप्रभृतीनां ज्ञानिनां पुंसामुज्ज्वलमप्यन्तो निर्मलमप्यन्तःकरणं व्यक्तं प्रकटं म्लापयति मलसहितं करोति । मोहमोहिताः कामाधीनाः सन्तो ज्ञानिनोऽपि विश्वामित्रादयः स्वमनो मेनकादिदेवाङ्गनाप्रवणं चक्रुः पूर्वमुज्ज्वलस्यापि मनसो मोहेन मालिन्यं कृतम्, 'ज्ञानिनामपि चेतांसि–' इत्यादि मार्कण्डेयवचः प्रमाणम् । न लब्धः साक्षात्कृतो निर्वाणोपयोगी मोक्षोपयोगी ज्ञानदीपकरूपः स्वप्रकाशज्ञानरूप आत्मा यैस्तेषामद्वैतज्ञानरहितानामिति वा । किमिव—कज्जलवत् यथा मध्ये स्थापितस्य दीपस्य कज्जलं सुधाधवलितानां घटादीनां मध्यं मलिनयति ॥

ब्रह्मचारिवनस्थायियतयो गृहिणं यथा ।
त्रयो यमुपजीवन्ति क्रोधलोभमनोभवाः ॥ ३२ ॥

ब्रह्मेति ॥ ब्रह्मचारी, वनस्थायी वानप्रस्थः, यतिः संन्यासी, एते त्रयोऽपि आश्रमिणो गृहिणं गृहस्थं यथाशनाच्छादनार्थमुपजीवन्ति सेवन्ते । 'यस्माच्चयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम् । गृहस्थेरेव धार्यन्ते तस्माज्ज्येष्ठो गृहाश्रमी ॥' इति स्मार्तवचनात् । तं लक्ष्यीकृत्य वा प्राणधारणं कुर्वन्ति, तथा—क्रोधलोभमनोभवा यं मोहं सेवन्ते यं लक्ष्यीकृत्य वा स्वरूपं लभन्ते । मूढ एव क्रुद्धो लुब्धः कामी च भवति ॥

जाग्रतामपि निद्रा यः पश्यतामपि योऽन्धता ।
श्रुते सत्यपि जाड्यं यः प्रकाशेऽपि च यस्तमः ३३

जाग्रतामिति ॥ यो मोहो जाग्रतां सावधानानामपि निद्राविवेकरूपं निश्चलत्वम् । तथा—यः पश्यतां चाक्षुषज्ञानवतामप्यहध-

१ 'शश्वत्' इति पाठोऽपि ।

ता चक्षुराच्छादनाद्दृष्टव्यदर्शनाभावरूपं सदसद्वस्त्वग्रहणम् । संसारस्यानित्यदुःखरूपतां जानतामपि तदपरित्यागहेतुत्वादज्ञानरूप इत्यर्थः । तथा—यः श्रुते शास्त्राधिगमे सत्यपि मूढत्वेन ज्ञेयानुरूपं जाड्यम् । विधिनिषेधाद्यनिर्णयरूप इत्यर्थः । तथा—यश्च प्रकाशे सौराग्नेयचाक्षुषाद्यालोके सत्यपि द्रष्टव्यघटपटाद्याच्छादनरूपतयान्धकाररूपः । प्रकटेऽप्यर्थे प्रतीतिप्रतिबन्धक इत्यर्थः ॥

कुरुसैन्यं हरेणेव प्रागलज्जत नार्जुनः ।
हतं येन जयन्कामस्तमोगुणजुषा जगत् ॥ ३४ ॥

कुर्विति ॥ तमोगुणजुषाज्ञानरूपतमोगुणसेविना येन मोहेन हतं जगज्जयन्कामो नालज्जत । क इव—तमोगुणजुषा आश्रिततमोगुणेन हरेण संहारकारकेण रुद्रेण प्राप्तकालतया प्राक् हतं प्रस्तं कुरुसैन्यं पश्चाद्विनाशयन्नर्जुन इव । मया हतमित्यभिमानेन लज्जां नाप । अन्येन हतस्य पश्चात्स्वेन हनने हि लज्जा युक्ता । सा तु कामस्य न जातेत्यर्थः । मूढ एव कामपरवशो भवतीत्यर्थः । ईश्वरः प्राक्कुरुसैन्यं शूलेन हन्ति, पश्चाच्छरेणार्जुन इति द्रोणपर्वकथा । कुलकम् ॥

चिह्निताः कतिचिद्देवैः प्राचः परिचयादमी ।
अन्ये न केचनाचूडमेनःकञ्चुकमेचकाः ॥ ३५ ॥

चिह्निता इति ॥ अमी कामादयः कतिचित्कतिपयैर्देवैरिन्द्रादिभिः प्राचः पूर्वजातात्परिचयात्पटुतरात्संसर्गाच्चिह्निताः चिह्नैर्निश्चिताः । देवानामपि कामाद्यायत्तत्वात्प्राचीनः परिचयः । अन्ये तदुपजीविनो बौद्धादयः केचन विशेषेण न ज्ञाताः । यतः—आचूडं शिखामभिव्याप्य मर्यादीकृत्य वा एनसा पापरूपेण कञ्चुकेन मेचकाः श्यामवर्णाः । यो हि नीलवस्त्रादिनावृतदेहः, स विशेषतो न लक्ष्यते । श्यामत्वान्न बुद्धा इत्यर्थः ॥

तत्रोद्भूर्ण इवार्णोधौ सैन्येऽभ्यर्णमुपेयुषि ।
कस्याप्याकर्णयामासुस्ते वर्णान्कर्णकर्कशान् ॥३६॥

तत्रेति ॥ उद्भूर्णे त्यक्तमर्यादेऽर्णोधौ समुद्र इवातिगभीरे तत्र तस्मिन्कलिसैन्येऽभ्यर्णमुपेयुषि सामीप्यं गते सति ते देवाः कस्याप्यनुपलक्षिताकारस्य चार्वाकस्य कर्णकर्कशान्वर्णानाकर्णयामासुः । अभ्यर्णम्, 'अभेश्चाविदूर्ये' इति नेट् । 'गुरी उद्यमे' मर्यादाधारणे उद्यमत्यागिनीत्यर्थः ॥

तानेव वर्णानाह—

ग्रावोन्मज्जनवद्यज्ञफलेति श्रुतिसत्यता ।
का श्रद्धा तत्र धीवृद्धाः कामाध्वा यत्खिलीकृतः ३७

ग्रावेति ॥ ग्रावोन्मज्जनवत् 'ग्रावाणः प्लवन्ते' इति प्रतिपादितपाषाणतरणवज्ज्योतिष्टोमादियज्ञानां साध्ये स्वर्गादौ फलेपि 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादिश्रुतीनां सत्यता यथार्थता । ग्रावोन्मज्जनवाक्यस्य प्रत्यक्षबाधितत्वात्, यागानन्तरमेव स्वर्गादेरदृष्टत्वाज्ज्योतिष्टोमादियागप्रतिपादिका श्रुतिरपि प्रत्यक्षबाधिता । तथाच 'यागश्रुतिरप्रमाणम् प्रत्यक्षविरुद्धत्वाद्ग्रावोन्मज्जनश्रुतिवत्' इति प्रयोगाद्यागश्रुतेरपि स्वर्गादावसत्यतेति च व्याख्येयम् । अत्र विरुद्धलक्षणया सत्यतेत्यस्याऽसत्यतेत्यर्थः । एवमन्येषामपि वेदवाक्यानां श्रुतित्वाविशेषादप्रमाणत्वे हे धीवृद्धाः बुद्धिमन्तो देवास्तत्र फले श्रुतौ वा युष्माकं का श्रद्धा कथमास्तिक्यम्। अपि स्वप्रामाणिकेऽर्थे श्रद्धा न कार्या । यद्येन कारणेन यद्वशाद्वेदोक्तविध्यतिक्रमभिया कामाध्वा यदृच्छाचारमार्गः खिलीकृतो बद्धः। त्यक्त इत्यर्थः । श्रुतिमात्रस्याप्रमाणत्वाद्यज्ञे यजमानर्त्विजां कतिचिदहानि यद्ब्रह्मचर्यं तदप्यप्रामाणिकत्वाद्यजतेति भावः । 'धीवृद्धाः' इत्युपहासे । अतिमूर्खा भवन्त इत्यर्थः ॥

केनापि बोधिसत्त्वेन जातं सत्त्वेन हेतुना ।
यद्वेदमर्मभेदाय जगदे जगदस्थिरम् ॥ ३८ ॥

केनेति ॥ केनाप्यज्ञातनाम्ना बोधिसत्त्वेनातिप्राज्ञेन जिनभट्टारकेण वेदस्य मर्मभेदाय रहस्यभङ्गाय जातमुत्पन्नम् । वेदमर्मभेदः कर्तुमारब्ध इति यावत् । कथमत आह—यद्यस्मात्सत्त्वेन हेतुना सत्त्वरूपेण लिङ्गेन यत्सत्तत्क्षणिकम्, यथा घट इत्यादिरूपेण जगदस्थिरं क्षणिकं जगदे प्रत्यपादि । सत्त्वलिङ्गेन विश्वस्य क्षणिकत्वसिद्धावुभयलोकगतं स्थिरमेकं कर्तारमधिकारिणमाश्रित्य वेदैर्विहितानां विधिनिषेधानां निराश्रयतया वेदस्याप्रामाण्यापादनाद्वेदमर्मभेदः कृत इत्यर्थः । बौद्धसिद्धान्तस्तु ग्रन्थान्तराद्बोद्धव्यः । विस्तरभयादत्र नोक्तः । अयं वक्ता पूर्वस्माद्भिन्नः । चार्वाक एव वा स्वमतं वेदाप्रामाण्यं बौद्धसंवादेन द्रढयति—केनेति । सत्त्वेन हेतुना यस्माज्जगदस्थिरं जगदे । तस्मात्केनापि लोकोत्तरप्रज्ञेन तेनैव चार्वाकेण वेदमर्मभेदाय बौद्धेन जातम् । तदीयमताङ्गीकरणात्तद्रूपेणैव जातमित्यर्थः । 'जगाद' इति पाठे यद्बोधिसत्त्वं जगदस्थिरं जगादेति व्याख्येयम् । क्षणिकत्वे सिद्धे येन पापं कृतं, स नष्ट एवेति किमिति पापाद्भयमित्यादि प्रकरणाज्ज्ञेयम् ॥

अग्निहोत्रं त्रयीतन्त्रं त्रिदण्डं भस्मपुण्ड्रकम् ।
प्रज्ञापौरुषनिःस्वानां जीवो जल्पति जीविका॥३९॥

अग्नीति ॥ नित्यं काम्यं च सायंप्रातर्होमरूपमग्निहोत्राख्यं कर्म त्रयी च तन्त्रं मीमांसा, वेदत्रयसंबन्धि वा यत्तन्त्रं वेदविहितोऽन्योऽपि कर्मकलापः, तथा—त्रयो दण्डा यत्र तत्पाशुपतव्रतम्, तथा—भस्मनः पुण्ड्रकः तिलको यत्रैवंविधं शैवादिव्रतं एतत्सर्वं प्रज्ञाया बुद्धेः पौरुषेण सामर्थ्येन तीक्ष्णया प्रज्ञया निःस्वानां हीनानां प्रज्ञया पौरुषेण च वा हीनानां, वञ्चनेन चौर्येण च बलाद्वा ग्रहीतुमसमर्थानां, पुरुषाणां जीविका जीवनोपायः । तद्वेषधारणाधर्मेण द्रव्यमर्जयितुमेव । न तु तात्त्विको धर्मः परलोकसाधनम् । एवं वेदप्रामाण्यवादिनां भवति । जीवो बृहस्पतिर्जल्पति वदति । वाक्यार्थः कर्म । तदुक्तं तेनैव—'अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मपुण्ड्रकम् । बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः ॥' इति । तस्मादग्निहोत्राद्यप्रमाणमेवेति भावः । 'जीविका' इति धात्वर्थनिर्देशे ण्वुल् ॥

---

*१ इदं पद्यं जीवातौ न व्याख्यातम् । कस्मिंश्चिन्मूलपुस्तकेपि नोपलभ्यते ॥

इदानीं ब्राह्मण्यादिजातिधर्मानसहमानो जातिं दूषयति—

शुद्धिर्वंशद्वयीशुद्धौ पित्रोः पित्रोर्यदेकशः ।
तदनन्तकुलादोषाददोषा जातिरस्ति का ॥ ४० ॥

शुद्धिरिति ॥ विशुद्धमातापितृजन्यत्वं ब्राह्मण्यादेर्लक्षणम् । सा शुद्धिर्दुर्निरूपा । यद्यस्मात्पित्रोर्मातापित्रोर्यौ पितरौ मातामहपितामहौ, मातामहीपितामह्यौ च, तयोरेकशः प्रत्येकं वंशद्वयीशुद्धौ सत्याम्, एवं तयोरपि पितृपितामहीमातृपितामह्यादिमातामहमातुः, पितामहादिमातामहीमातुः, पितामह्यादिशुद्धौ सत्याम् । एवं ब्रह्माणं यावत्प्रत्येकं शुद्धौ सत्यां शुद्धिः परीक्षणीया । तत्तस्मादनन्तकुला एवमपरिमितवंशभेदा अत एव दोषादुर्विज्ञेयशुद्धिसंतानस्त्रीपुंसपारम्पर्यतया शुद्धेः संदेहात्, इन्द्रचन्द्रादीनां च पुराणप्रामाण्येन व्यभिचारदर्शनादशुद्धेर्निश्चयाच्च, जातिसंकररूपादोषात्का जातिर्निर्दोषास्ति । अपि तु न कापि । यदाहुः—'अप्येकपङ्क्त्यां नाश्नीयात्संयतः स्वजनैरपि । को हि जानाति किं कस्य प्रच्छन्नं पातकं भवेत् ॥' इति । तथा—'अनादाविह संसारे दुर्वारे मकरध्वजे । कुले च कामिनीमूले का जातिपरिकल्पना ॥' इति । तस्मात्संकीर्णयोनित्वात्सर्वा अपि जातयो दुष्टा एवेति जातिधर्मान्विहाय स्वेच्छाचारं कुरुतेति भावः । यद्वा—तस्माद्ब्रह्माणमनन्तानां कुलानामदोषादोषाभावाद्व्यभिचारादिदोषरहिता जातिः स्यात्, सा काप्यस्ति, अपि तु न कापि । पूर्वपूर्वपित्रादिव्यभिचारादिदोषात्सर्वापि जातिर्दुष्टेति व्याख्या । 'यदा तदा' इति पाठः सम्यक् । तयोः पित्रोरनन्तकुलानां दोषाभावेन कृत्वाऽदोषा जातिरस्ति । अपि तु महति कुले कस्यचिद्दोषसंभवात्सर्वापि जातिर्दुष्टैवेत्यर्थ इति वा व्याख्या । यच्छब्दसामर्थ्यात्तच्छब्दाध्याहारः । एकशः, 'संख्यैकवचनात्' इति शस् ॥

अन्यदप्याह—

कामिनीवर्गसंसर्गैर्न कः संक्रान्तपातकः ।
नाश्नाति स्नाति हा मोहात्कामक्षामव्रतं जगत् ॥४१॥[1]

कामिनीति ॥ यस्मात् 'आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा । षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥' इति वचनात्स्त्रीणां पुरुषापेक्षयाष्टगुणकामानां कामिनीनां नानाजातीयानां वर्गः समूहस्तस्य संसर्गैर्योगैः संबन्धैः कृत्वा कः पुरुषः संक्रान्तं प्रविष्टं पातकं यत्र एवंविधो न । अपितु—'संवत्सरात्तु पतति पतितेन सहाचरन्' इति शास्त्रात्कृतपातकस्त्रीसंसर्गात्सर्वोपि प्राणी संक्रान्तपातक एव । तस्मात्काम्यते कामः फलम् तेन क्षामं रहितमेकादश्युपवासादिव्रतं नियमो यस्य मदनेन कृत्वा क्षीणं निष्फलं व्रतं यस्य वा । तज्जगत्सर्वोपि लोकः मोहाद्विचाराभावात् । वृथा इति यावत् । न अश्नाति न भुङ्क्ते एकादश्यादौ, वृथैव च स्नाति तीर्थादौ, हा कष्टम् । स्वयं शुचित्वेऽपि स्त्रीव्यभिचारादिदोषसंसर्गात्, स्त्रीणां शुचित्वेऽपि दुष्टसंसर्गात्, सर्वेषां पातकित्वादुपवासादि वृथैव करोति केवलं प्रयास एव तस्य भवतीत्यर्थः । तस्मात्स्वेच्छाचार एव कार्य इति भावः । चार्वाकमते विधिनिषेधाभावात्रैष दोष इत्यर्थः । तेषां सदोषत्वाज्जातिरपि सदोषैवेत्युक्तं भवति । अभिलाषेण कृत्वा नष्टं व्रतं यस्य । एकादश्यां भोजनाभिलाषे सत्यपि न भुङ्क्ते, अभिलाषे सत्येवा(त्यप्य)मावास्यादौ स्त्रीनिवृत्तिः, स्नाति च तीर्थादौ, वृथैव कामोपहतत्वादित्यर्थः । बहिः शोधयन्तु, अन्तरशुद्धम् । क्षामेति, 'क्षायो मः' ॥

ईर्ष्यया रक्षतो नारीर्धिक्कुलस्थितिदाम्भिकान् ।
स्मरान्धत्वाविशेषेपि तथा नरमरक्षतः ॥ ४२ ॥

ईर्ष्ययेति ॥ ईर्ष्ययासहनत्वमात्रेण नारी रक्षतस्तासां परपुरुषदर्शनमपि कर्तुमप्रयच्छतः कुलस्थितिः ब्राह्मण्यादिजातेरसांकर्येणावस्थानं तद्रूपेण दम्भेन चरन्ति ये तान्पुरुषान्स्त्रीरक्षण एव कुलस्थितिं मन्यमानान्धिक् ते निन्द्याः । निन्द्यत्वे दाम्भिकत्वमेव हेतुः । किंभूतान्—स्त्रियः पुरुषाश्च विवेकशून्या यतः, अतः—स्मरान्धत्वस्याविशेषे साधारण्ये सत्यपि तथा नारीवन्निर्बन्धेन नरमरक्षतः परदारसङ्गादिनिवारयतः । नहि जातिसंकरो नारीणामेव व्यभिचारेण यतः ता एव रक्षणीयाः । किं तु पुरुषाणामपि व्यभिचारेण । यदि रक्षणीयम्, तर्हि द्वयमपि । न चैवं क्रियते । तस्मादन्यतरस्यैव रक्षणे जातिसंकरस्य तादवस्थ्यात्कुलस्थित्यभावान्नारीमात्ररक्षणं तेषां दम्भ एवेत्यर्थः । तस्मादीर्ष्यां त्यक्त्वा नरस्य वेश्यान्तरादाविव, स्त्रीणामपि नरान्तरे प्रवृत्तिप्रतिषेधं मा कृर्वामिति भावः । ईर्ष्यया इत्यनेन ईर्ष्यैवात्र हेतुर्न तु धर्म इति सूचितम् । अथ च स्मरान्धत्वाविशेषेऽपि नारी रक्षतोऽनेकपतिभ्यः, किंत्वेकमेकस्याः कुर्वतः नरं तु स्त्रीवदरक्षतः । स्त्रिया यथा एक एव पतिः तथा नरस्यैकैव स्त्रीति न, किं तु बह्वीः कुर्वन्ति । तस्मान्निन्द्यास्ते । अत्रापीर्ष्यैव हेतुः ॥

परदारनिवृत्तिर्या सोऽयं स्वयमनादृतः ।
अहल्याकेलिलोलेन दम्भो दम्भोलिपाणिना॥४३॥

परेति ॥ परदारेभ्यो या निवृत्तिः, 'ताः सादरं न द्रष्टव्याः, किं पुनः स्पृष्टव्याः' इत्येतदर्थप्रतिपादकं शास्त्रम्, सोऽयं परवञ्चनरूपो दम्भः अहल्यया गौतमस्त्रिया सह केलिः कामक्रीडा तत्र लोलेन सत्परेण दम्भोलिपाणिनेन्द्रेण स्वयमाश्मनवानादृत उपेक्षितः । परदारगमनप्रायश्चित्तविभागोप्येतेन दूषितः । अन्यं प्रति तत्र कार्यमित्युपदिशन्ति, स्वयं तु तदेव कुर्वन्तीत्युपहासोपि सूचितः । अहल्यासंभोगलम्पट इन्द्र एवादाम्भिकः । अन्ये परदारपराङ्मुखाः सर्वेपि दाम्भिका एवेति भावः । यद्यहल्यावत्परदारमर्शनं कृतवान् । तस्मादयं शास्त्रीयनिषेधो न भवति । किं स्वशक्त्याद्यम्भ एवेत्यपि ॥

अन्यच्चाह—

गुरुतल्पगतां पापकल्पनां त्यजत द्विजाः ।
येषां वः पत्युरत्युच्चैर्गुरुदारग्रहे ग्रहः ॥ ४४ ॥

गुर्विति ॥ भो द्विजाः यूयं गुरुतल्पगतां पित्रादिभार्यासंभोगविषयं पापकल्पनाम् 'ब्रह्महा मद्यपः स्तेनस्तथैव गुरुतल्पगः । (एते) महापातकिनः—' इत्यादिवचनानुरोधेन महापातकसंभावनां त्यजत । यस्माद्येषां वो युष्माकं पत्युः स्वामिनो द्विजराजस्य चन्द्रस्य देवानां गुरोः वेदादिपाठयितुः बृहस्पतेः दाराः तारा तेषां ग्रहे संभोगे अत्युच्चैरतितरां ग्रहोऽभिनिवेशः । श्रूयत इति शेषः । वेदादिपाठनाद्बृहस्पतेर्देवगुरुत्वम् । तस्मात्तत्रायोगमने देवस्य चन्द्रस्य दोषलं-

१ 'कामक्षाममिदं जगत्' इति पाठो जीवातुसंमतः ।

शोऽपि न। तत्सेवका यूयमपि गुरुतल्पगमनं कामं कुरुतेति भावः। यथोक्तम्—'राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः। राजानमनुवर्तन्ते यथा राजा तथा प्रजाः॥' इति। अयमप्युपहासः। गुरुशब्दच्छलेनैवमुक्तम्। 'महः' इति पाठे उत्सवः। अथ च—तेजःसमूहः। गुरुतल्पगमनेऽपि प्रत्यहमुदेत्येव, न तु पतित इत्यर्थः। इन्द्रादिनिकटे वाल्मीकिप्रमुखा द्विजाम्बिष्टन्ति तेषां संबोधनम्। बृहस्पतिभार्यायां गर्भमुत्पाद्य तत्सुतस्वीकारार्थं सोद्यमानिन्द्रादीन्प्रति चन्द्रेण महारणारम्भसंरम्भेण तेजः प्रकटितम्। अनन्तरं ब्रह्मणा गुरुभार्यां त्याजितोऽपि गर्भजं पुत्रं गृहीतवानिति पुराणकथा। 'तल्पं च शयनीये स्यात्तल्पमट्टकलग्नयोः' इति विश्वः॥

'पुण्यो वै पुण्येन कर्मणा, पापः पापेन' इत्यादिश्रुतिं दूषयति—

पापात्तापा मुदः पुण्यात्परासोः स्युरिति श्रुतिः।
वैपरीत्यं द्रुतं साक्षात्तदाख्यात बलाबले॥ ४५॥

पापादिति॥ परागता असवः प्राणा यस्य। मृतस्येत्यर्थः। तस्य प्राणिनः इह कृतान्निषिद्धाचरणजात्पापात्तापाः दुःखानि, पुण्यादिह कृताद्विहिताचरणजाद्धर्मान्मुदः सुखानि स्युः भवन्तीति श्रुतिराह। साक्षात्प्रत्यक्षेण द्रुतं शीघ्रं वैपरीत्यम्। दृश्यत इति शेषः। प्रयागादौ प्रातर्माघस्नानं कुर्वतो भवदभिमतसुकृतकारिणः पुरुषस्य तदानीमेव दुःखं भवति। भवदनभिमतपरदारसंगमादिपापकारिणस्तदानीमेव सुखं भवतीति वैपरीत्यमनुभूयते। अथ च—एवं श्रुतिः श्रवणमात्रम्, न तु तत्र किंचित्प्रमाणम्। किं च मृतस्य किं वा भविष्यतीति को वेद। जीवता तावद्वैपरीत्यमनुभूयते। तत्तस्माच्छ्रुतिप्रत्यक्षयोर्विषये यूयं बलाबले स्वयमेव आख्यात कथयत। भवन्त एव विचारयन्त्वित्यर्थः। प्रमाणयोः परस्परविरोधे सबलत्वेन दुर्बलत्वेन च व्यवस्था क्रियते। ततश्च यथा—प्रत्यक्षानुमानविरोधे प्रत्यक्षं बलीयः, तथा—श्रुतिप्रत्यक्षविरोधे प्रत्यक्षमेव बलीय इति निश्चित्य पापात्सुखमनुभूयत इति पापं सर्वैः कार्यमिति भावः। प्रबलदुर्बलत्वव्यवस्थापकस्य न्यायस्याप्ययमुपहासः॥

'संदिग्धेऽपि परे लोके त्याज्यमेवाशुभं बुधैः' इत्यादि प्रतिबन्ध्या दूषयति—

संदेहेऽप्यन्यदेहाप्तेर्विवर्ज्यं वृजिनं यदि।
त्यजत श्रोत्रियाः सत्रं हिंसादूषणसंशयात्॥४६॥

संदेह इति॥ तत्र तत्र व्यभिचरितत्वाच्छ्रुतिप्रामाण्यानिश्चयात्, 'पापं न कार्यं जन्मान्तरे निरयादिदुःखभयात्' इत्येके वदन्ति, अन्ये तु—येन कृतं स तु दग्धः अन्यदेहप्राप्तिस्तस्य स्यादित्यत्र का प्रत्याशा, इति वादिविप्रतिपत्तेश्च, अन्यदेहाप्तेः देहान्तरप्राप्तेः संदेहे सत्यपि पाक्षिकोऽपि दोषः परिहर्तव्य इति न्यायेन यदि देहान्तरं स्यात् तर्हि पापफलं दुःखमनुभूयेतेति बुद्ध्या यदि वृजिनं पापं वर्ज्यं सर्वथा न कार्यं तर्हि हे श्रोत्रियाश्छन्दोध्यायिनो वसिष्ठादयो यूयं सत्रमनेककर्तृकं यागं मैव कृत्वम्। कुतः-पशुहिंसायाः संबन्धिनो दोषस्य संशयात्संदेहात्। 'न हिंस्यात्सर्वा भूतानि' इति 'अहिंसा परमो धर्मः' इत्यादि श्रुतिस्मृतिवशाद्यागेपि हिंसा न कार्येत्येके। विधिबलादशङ्कितपापोत्पत्तिः सा कार्यैवेत्यन्ये इति संदेहे यागीयपशुहिंसा चेत्पापहेतुः स्यात्, तदा नेष्टप्राप्तिः किं त्वनिष्टमेव स्यादिति 'पाक्षिकोऽपि दोषः परिहरणीयः' इत्यनेनैव न्यायेन यागमपि त्यजत। न चेदेवं पापमपि कुरुतेति भावः। 'संश्रयात्' इति पाठे संबन्धादित्यर्थः। 'कलुषं वृजिन-' इत्यमरः॥

'त्याज्यमेवाशुभं बुधैः' इत्यपि सव्यभिचारमाह—

यस्त्रिवेदीविदां वन्द्यः स व्यासोऽपि जजल्प वः।
रामाया जातकामायाः प्रशस्ता हस्तधारणा॥४७॥

य इति॥ यः त्रिवेदीविदां वेदत्रयवेदिनां वो युष्माकं वन्द्यो नमस्करणीयः स व्यासोऽपि इति भारतादौ जजल्प उक्तवान्। इति किम्—जातकामायाः कामार्तायाः रिरंसो रामाया अज्ञातकुलशीलाया अपि रमण्या हस्तधारणा पाणिग्रहणमङ्गीकरणं च प्रशस्ता युक्तैव। न केवलं वाल्मीकिः, किं तु व्यासोपीत्यपिशब्दार्थः। तद्वचनं पूज्यत्वाद्ब्रह्मवद्गिरङ्गीकर्तव्यमित्यपि सूच्यते। 'स्मरार्तां विह्वलां दीनां यो न कामयते स्त्रियम्। ब्रह्महा स तु विज्ञेयो व्यासो वचनमब्रवीत्॥' इत्यार्जुनतीर्थयात्रायां नागाङ्गनासंबन्धावसरे उर्वश्यादिप्रसङ्गे स्वर्गगमनावसरे च भारतादौ। रामायणे च सूर्पणखोद्वाहो प्रसिद्धम्। ततश्च पापं वर्ज्यम्, कार्यमित्यप्युच्यते। उभयथापि दोष इति भावः। वेदविदामिति, 'कृत्यानाम्-' इति षष्ठी॥

युक्त्यन्तरेण पूर्वोक्तमाह—

सुकृते वः कथं श्रद्धा सुरते च कथं न सा।
तत्कर्म पुरुषः कुर्याद्येनान्ते सुखमेधते॥ ४८॥

सुकृत इति॥ सुकृते चान्द्रायणादौ वो युष्माकं कथं केन हेतुना श्रद्धा आस्तिकता। अपि त्वनुचितमेतत्। सा च श्रद्धा सुरते कामिनीरतिविषये कथं न किमिति न। अपि तु तया तत्र भवितुं युक्तम्। यस्मात्पुरुषः तत्कर्म व्यापारं कुर्यात् येन कर्मणा कृत्वा अन्ते कर्मावसान एव सुखमेधते। अनुभूयते पुरुषेणेत्यर्थः। जन्मान्तरे व्रतादिजन्यं सुखं संदिग्धम्; सुरतजन्यं च सर्वस्य स्वानुभवसाक्षिकम्। तस्माच्चान्द्रायणादि सुकृतं त्यक्त्वा सुरतमेवाङ्गीकर्तव्यमिति भावः। एतेन 'मासैरष्टभिरब्दा च पूर्वेण वयसायुषा। प्राज्ञस्तत्कर्म कुर्वीत येनान्ते सुखमेधते॥' इत्यादि विडम्बितम्। 'दुरिते च' इति पाठे परदारगमनादावित्यर्थः। परदारगमनाद्यनन्तरमेव सुखं दृश्यते यतः॥

बलात्कुरुत पापानि सन्तु तान्यकृतानि वः।
सर्वान्बलकृतान्दोषानकृतान्मनुरब्रवीत्॥ ४९॥

बलादिति॥ भो द्विजाः, यूयं पापानि परस्त्रीगमनादीनि बलादनुमतौ असत्यामपि कुरुत। तानि पापानि वः संबन्धीनि कृतान्यप्यकृतानि सन्तु। फलदायीनि मा भूवन्नित्यर्थः। यतः—मनुः बलेन कृतान्सर्वानर्थान्व्यापारानकृतानेवाब्रवीत्। 'बलादृत्तं बलाद्भुक्तं बलाच्चयासीकृतं च यत्' इत्यन्यार्थमपि मनुवचनं छलेनार्थान्तरपरिकल्पनया प्रकृते निदर्शयन्प्रतिबन्ध्या विडम्बयति॥

---

१ आधुनिकपुस्तके तु 'बलाच्चापि लेखितम्' (८।१६८) इत्येव पाठो दृश्यते।

स्वागमार्थेऽपि मा स्थाऽस्मिंस्तीर्थिका विचिकित्सवः ।
तं तमाचरतानन्दं स्वच्छन्दं यं यमिच्छथ ॥५०॥

स्वागमेति ॥ भोस्तीर्थिकाः संप्रदायागतविद्याः, यूयमस्मिन्पूर्वोक्तमनुवचनरूपस्वीयागमप्रतिपाद्येऽर्थे प्रमेये 'आत्मारामः स्यात्' इति श्रुत्यर्थे वा विषये विचिकित्सवः संशयालवः मा स्थ भवथ । इदं कार्यं नवेति संशयः परित्याज्य इत्यर्थः । मनुना श्रुत्या वा ईदृक् कथं प्रतिपादितमित्युभयत्राप्यनादरपरा वा मा भवत । तर्हि किं कार्यमित्यत आह—यूयं यं यमानन्दं परदारगमनादीच्छत, तं तं स्वच्छन्दं स्वेच्छया निःसंशयमादरेण चाचरत आत्मारामः स्यामिति श्रुतिप्रामाण्यात्पूर्वोक्तस्मृतिप्रामाण्याच्च संशयं परित्यज्यादरेण यदृच्छया सुखमुपभुङ्ग्ध्वमिति भावः । अस्मदागमे निन्दापराः, तथापि स्वागमे निन्दा न युक्तेत्यपिना सूचितम् । मा निरनुबन्धकः, ततो न लुङ् । तीर्थेन आगमेन चरति ठक् । सदुपाध्यायो वा तीर्थम्, तस्मादस्त्यर्थे ठन् ॥

पूर्वोक्तश्रुतिस्मृतीनामर्थमज्ञात्वा स्वयंयमुक्तं व्याख्यानमप्रमाणमित्याशङ्क्याह—

श्रुतिस्मृत्यर्थबोधेषु[1] कैकमत्यं महाधियाम् ।
व्याख्या बुद्धिबलापेक्षा सा नोपेक्ष्यामुखोन्मुखी ॥

श्रुतीति ॥ श्रुतिस्मृत्यर्थबोधेषु महाधियामप्यैकमत्यमविसंवादः कास्मि, अपितु—सर्वत्रापि [2]संवाद एव । बुद्धिबलेन परम्परविजयात । एवं सति व्याख्या पदार्थवाक्यार्थनिरूपणं बुद्धिबलं प्रज्ञाबलमपेक्षते एवंभूता । यस्य यथा स्फुरति, स तथा व्याख्याति । अत एवाद्वैतवादिनः श्रुतीरभेदपरत्वेन, द्वैतवादिनस्तु भेदपरत्वेन व्याचक्षते सा व्याख्या सुखोन्मुख्यनायासमाप्या । अथच—सुखपर्यवसायिनी । नोपेक्ष्या नानादरणीया । स्वाङ्गीकार्येत्यर्थः । स्वेच्छाचारमेव कुरुतेति भावः । एका समाना अविसंवादिनी मतिः । चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् ॥

स्वन्मताङ्गीकारे निरयादिप्राप्तिः स्यादित्याशङ्क्याह—

यस्मिन्नस्मीति धीर्देहे तद्दाहे वः किमेनसा ।
क्वापि तर्हि फलं न स्यादात्मेतिपरमाक्षिके ॥५२॥

यस्मिन्निति ॥ यस्मिन्देहे अहमस्मि इति धीः, गौरः कृश इत्याद्याकारः प्रत्ययस्तस्य शरीरस्य दाहे सति वो युष्माकमेव एनसा पापेन किम् । अपि तु पापेन निरयपातादि किंचिदपि न कार्यते । अयमाशयः—अयं देह एवात्मा, देहातिरिक्तो वा । यद्याद्यः कल्पस्तर्हि येन देहेन पापं कृतं तस्य विनष्टत्वाद्देहात्मवादिनां वः पापेन किं कर्तुं शक्यते । अपि तु—न किंचिदित्यर्थः । अथ देहातिरिक्त एव देहे विनष्टेऽपि देहान्तरे देशान्तरे कालान्तरे च पुण्यपापफलानां भोक्तास्मि । तत्राप्येवं वक्तव्यम् । स किं स्वसाक्षिकः परसाक्षिको वा । नाद्यः—अहंप्रत्ययस्य देहविषयत्वेनैव सिद्धेः, तदतिरिक्तालम्बनकल्पनानवकाशात । ततश्च 'तद्दाहे वः किमेनसा' इति पुनरायातम् । द्वितीयं दूषयति—परो वेदादिः साक्षी यस्य तस्मिन्देहान्तरे देशान्तरे कालान्तरे च फलभोक्तरि देहातिरिक्ते वेदप्रतिपादिते आत्मनि तस्य पापस्य निरयादि फलं चेत् । स चेत्फलस्य भोक्ता, तर्हि आत्मेति हेतोः । आत्मत्वाविशेषादिति यावत् । तस्मात्क्वाप्यात्मान्तरेऽपि तर्हि न स्यात् । अपि तु भवितव्यमेव । तेन देहेन पातके कृते तदतिरिक्तेनात्मना चेत्फलं भोक्ष्यते तर्हि देवदत्तेन पापे कृते आत्मत्वाविशेषाद्यज्ञदत्तेनापि तत्फलमुपभोक्तव्यमित्यप्यापद्यते । किं च पापफलदुःखानुभवे तस्य देहस्य नाशे तत्पातकफलं देहव्यतिरिक्ते परप्रत्ययवेद्ये आत्मनि चेद्भवेत्, तथापि न दोषः । दुःखं ह्युपभुज्यमानं प्रतिकूलं भवति, उपभोक्ता चाहंकारास्पदं देहो विनिष्टः, आत्मा तु नोपभोक्तेति फलसंबन्धेऽपि न दोषः । ततश्च पापकारिणो देहस्य विनष्टत्वान्मृत्योरिव चापवर्गत्वाच्च कश्चित्फलभोक्तेति । स्वेच्छाचारमेव कुरुतेति भावः । यद्वा—परश्चासौ साक्षी च परसाक्षी स एव परसाक्षिक आत्मेत्यात्मलक्षणे परे देहातिरिक्ते साक्षिणि तत्स्थे चेत्तत्फलम्, तर्हि क्वापि पाषाणादौ वा तत्फलं किं न स्यात् अपि तु स्यादेवात्मत्वाविशेषात् । तस्माद्देहातिरिक्त आत्मा नास्त्येव, देहश्च नष्टः, कस्य पापफलं स्यादिति भावः । यद्वा—क्वापि जन्मान्तरीयदेहान्तरे आत्मास्मीति पापफलं चेत्स्यात्, तर्हि परो देवदत्ताद्यात्मा साक्षी यस्य तस्मिन्नात्मान्तराधिष्ठिते देवदत्तादिदेहेऽपि । परस्य वा देवदत्तादिदेहस्य साक्षिण्यात्मनि किं न स्यात् ॥ अपित्वविशेषात्स्यादेवेति । अलमतिप्रसङ्गेन ॥

पुनरपि देहातिरिक्तात्मवादिनमुपहसति—

मृतः स्मरति जन्मानि मृते कर्मफलोर्मयः ।
अन्यभुक्तैर्मृते तृप्तिरित्यलं श्रुतिवार्तया ॥ ५३ ॥

मृत इति ॥ यत्प्राणो नष्टशरीरत्वान्निरन्वयध्वंसपूर्वमुभयसंस्कारोद्बोधोऽपि पूर्वजन्मान्यनेकजन्मतत्कर्मजात्यादीनि पूर्वमहं ब्राह्मणोऽभूवमित्यादीनि स्मरति । मृते च कर्मणां सुकृतदुष्कृतकर्मणां फलानि सुखदुःखरूपाणि तेषामूर्मयः परम्परा भोगा वा भवन्ति । तदधिकरणा भवन्तीत्यर्थः । तथा—अन्येषां ब्राह्मणानां भुक्तैर्भोजनैः कृत्वा मृते स्वस्मदेहे प्रेते तृप्तिर्भवतीति श्रुतानां परवञ्चनमात्रेण स्वोपजीविनां वार्तया अप्रामाणिकेन वार्तामात्रेणालम् । सा न कार्येत्यर्थः । सर्वमप्येतदधिकरणत्वादनुपपन्नम् । स्वभोजनादित्याभाय परं प्रतारयन्ति । तस्माद्देह एवात्मेति भावः । 'अन्यभुक्तानि' इति पाठे 'अन्येषां भुक्तानि' इति शेषषष्ठीसमासः॥

देहातिरिक्तात्मप्रतिपादिकां श्रुतिमप्युपहसति—

जनेन जाननास्मीति कायं नायं त्वमित्यसौ ।
त्याज्यते ग्राह्यते चान्यदहो श्रुत्यानिधूर्तया ॥५४॥

जनेनेति ॥ अतिधूर्तया नितरां परवञ्चनपरया 'तत्त्वमसि' इति 'य वाएष महानज आत्मा' इत्यादिश्रुत्या प्रयोजककर्त्र्या कायम् 'अस्मि' इति अहंप्रत्ययं जानता 'स्थूलोऽहम्, कृशोऽहम्' इत्याद्यहंप्रत्ययविषयो देह एव, न तु तदतिरिक्तः कश्चिदिति देहमेवात्मानं जानता जनेन प्रयोज्येन अयम् 'अस्मि' इति प्रत्ययविषयः (कायः) त्वं न भवसीति असौ देहः त्याज्यते अहंप्रत्ययविषयत्वेनेति शेषः । जनेन स्वयं कायः अहंप्रत्ययविषयत्वेन त्याज्यते, श्रुत्या तु तेन त्याज्यत इत्यर्थः । अन्यच्चानुभवविरुद्धमिथ्यैतया वक्तुमशक्यमप्रामाणिकमहंप्रत्ययविषयमात्मलक्षणं वस्तु प्राज्ञेनाङ्गीकार्यते ।

---

१ 'स्मा' इति पाठः सुखावबोधासंमतः । २ [illegible] इति 'बाधक' इति रूपेण भाव्यम् । 'बोधेऽपि' इत्यपि पाठः सुखावबोधास्थः ।

१ 'अन्यभुक्तानि तत्तृप्तिः' इत्येव मूलपाठः प्रतिभाति ।

अहो आश्चर्यम्, कष्टं वा । महदनुचितमेतदित्यर्थः । 'देह आत्मभावं परित्यज्य तदन्यस्मिन्नात्मनि नित्यतां गृहीत्वा दीक्षातपआदिभिर्देहं कर्शय, तदतिरिक्तात्मवेदनं कुरु' इति श्रुत्या लोक उपदिश्यत इत्यर्थः । विप्रलम्भकवाक्यत्वेन श्रुतिमात्रमप्रमाणम् । वार्तामात्रेणालम् । सा न कार्येत्यर्थः । अन्योपि धूर्तोन्येन रत्नादि त्याजयति, काचादि ग्राहयति । कर्तृद्वयस्यानभिहितत्वादुभयत्र तृतीया ॥

ननु पुत्रेष्टया पुत्रस्य प्रत्यक्षोपलम्भाज्ज्योतिष्टोमादेरपि फलस्यानुमानाच्छ्रुतिमात्रप्रामाण्यात्कथं श्रुतेर्धूर्तत्वमित्याशङ्क्य दूषयति—

एकं संदिग्धयोस्तावद्भावि तत्रेष्टजन्मनि ।
हेतुमाहुः स्वमन्त्रादीनसङ्गानन्यथा विटाः ॥५५॥

एकमिति ॥ भवनाभवनाभ्यां संदिग्धयोरर्थयोः पुत्रादिलाभालाभयोर्मध्ये एकमिष्टमनिष्टं वा तावन्निश्चितं भावि भविष्यति । तत्र तयोर्मध्ये । तथा सति वा । इष्टस्य पुत्रादेर्जन्मनि लाभे सति विटा धूर्ताः परवञ्चनचतुराः स्वमन्त्रादीन्हेतुं कारणभूतानाहुः । अस्माभी रुद्रजपादि त्वदर्थं कृतम्, तेन त्वया पुत्रादि लब्धमिति वदन्तीत्यर्थः । अन्यथा पुत्राद्यलाभे तु तानेव मन्त्रानसाङ्गानङ्गविकलतया फलस्यासाधकान्प्राचीनपुत्रवियोगादिविपरीतफलकारिणश्चाहुः । सामग्रीसाकल्याभावाद्यथोक्तदक्षिणाभावात्फलं न जातम्, विपरीतं च जातमित्यर्थः । तस्माद्दृष्टफलपुत्रेष्ट्यादिदृष्टान्तेनादृष्टफलेष्वपि फलकल्पना निरवकाशेति श्रुतिरप्रमाणमेवेति भावः॥

श्रुतिप्रामाण्यमभ्युपगमवादेनाङ्गीकृत्याप्येकात्मवादिमतमनिष्टापत्त्या दूषयति—

एकस्य विश्वपापेन तापेनन्ते[1] निमज्जतः ।
कः श्रौतस्यात्मनो भीरो भारः स्यादुरितेन ते ५६

एकस्येति ॥ विश्वेषां सर्वेषां परदारगमनजनितेन पापेन हेतुनानन्तेऽक्षये तापे निरयादिदुःखे निमज्जतोऽनन्तदुःखमनुभवतः सतः श्रौतस्य 'एकमेवाद्वितीयं ब्रह्म' 'नेह नानास्ति किंचन' इत्यादिश्रुतिसिद्धस्यैकस्याद्वितीयस्यात्मनः हे भीरो पापाद्भयशील, ते तव एकस्य दुरितेन को भारो गौरवं स्यात् अपि तु पूर्णस्य शकटस्य सूर्षणेव न कश्चिद्भारो भवेत् । एकात्मवादिमते प्रामाणिकस्यैवात्मनो यदि सकलशरीरोपाधिकृतपापसंबन्धः, तदा तत्फलानन्त्यान्निरयादिदुःखानुभवावसरे तवैकपापेन कृत्वा पापाक्षयराशिभूतस्तस्य न कोपि भारः स्यात् । किं च तैर्यत्पुण्यं कृतम्, तत्त्वयैव कृतमिति पापे कृतेपि तव दोषो नेति यथेच्छं पापं कुर्वित्यर्थः । अपि चात्मैक्यात्स्वपरव्यवहाराभावे परदारत्वपरस्वत्वाद्यभावात्परदारगमनादौ पापलेशस्याप्यभावात्स्वेच्छाचारमेव कुर्वित्यर्थः । भीरो तात्पर्यपर्यालोचनया विना भयशील, इत्युपहासः । तस्मादेकात्मश्रुतिरुपासनपरा ज्ञेया, न तु तात्त्विकीति भावः ॥

देवपूजादिबुद्धिं निराकरोति—

किं ते वृन्तहृतात्पुष्पात्तन्मात्रे हि फलत्यदः ।
न्यस्य तेन्मूर्ध्यनन्यस्य न्यास्यमेवाश्मनो यदि ५७

किमिति ॥ भो देवपूजक वृन्ताग्रप्रसवबन्धनात्सकाशाद्धृतमवचितं चम्पकादिपुष्पं तस्माद्धेतोस्ते तव किं प्रयोजनम् । प्रत्युतदोष एवेत्यर्थः । हि यस्माददः पुष्पं तन्मात्रे वृक्षाग्रवृन्त एव वर्तमानमेव फलति फलरूपेण परिणमते, नतु तेन विना । पुष्पेऽवचिते फलोत्पत्तिप्रतिबन्ध एव भवति । नत्वन्यत्फलमित्यर्थः । अथ देवपूजादौ विनियोगात्साफल्यमिति चेत् । तदप्यसत् । अश्मनः शालग्रामशिवलिङ्गादेः पाषाणस्यैव मूर्ध्नि न्यास्यं यदि चेत्तत्र न्यस्तं सत्फलाय भविष्यतीत्याशयः, तर्ह्यनन्यस्य शिलातोऽभिन्नस्य पाषाणसदृशस्य स्वस्य मूर्ध्नि तत्पुष्पं न्यस्य निधेहि । अनन्यस्यैवेति वा । नास्यमेवेति वा । किं च भवन्मते भेदस्य प्रापञ्चिकत्वात्परमेश्वरस्य सर्वत्र सत्त्वाच्छालग्रामादेस्त्वच्छिरसश्चैक्यादेवपूजापि पृथग्वृथेति स्वशिरस्येव पुष्पाणि क्षिपेत्युपहास इति भावः । न्यास्यं हलन्तत्वाण्ण्यत् ॥

वैराग्यजननार्थमन्यदप्याह—

तृणानीव घृणावादान्विधूनय वधूरनु ।
तवापि तादृशस्यैव का चिरं जनवञ्चना ॥ ५८ ॥

तृणानीति ॥ हे पुरुष 'मुखं श्लेष्मागारं, स्तनौ मांसग्रन्थी' इत्यादीनि वधूरनु स्त्रीरुद्दिश्य घृणावादाञ्जुगुप्सावचनानि निःसारत्वेन तृणानीव विधूनय त्यज । यतः—तादृशस्य मांसादिमयस्यैव तवापि गर्हितस्यापि स्त्रियोऽनेन प्रकारेण निन्द्या इति चिरं जनवञ्चना लोकप्रतारणा का । अपि तु न कार्येति भावः । स्त्रियो व्यभिचारिण्यः पापनिरता इति निन्दावाक्यानि तवापि व्यभिचारिणो न युक्ता इति वा ॥

कुरुध्वं कामदेवाज्ञां ब्रह्माद्यैरप्यलङ्घिताम् ।
वेदोपि देवकीयाज्ञा तत्राज्ञाः काधिकार्हणा ॥५९

कुरुध्वमिति ॥ हे अज्ञा मूर्खा ब्राह्मणा यूयम् 'अहल्याया जारः सुरपतिरभूदारगतनयां प्रजानाथोऽयासीत्' इत्यादि स्मरणाद्ब्रह्मविष्णुमहेशादिभिरप्यलङ्घितां काम एव देवः; तस्य स्त्रीपारवश्यलक्षणामाज्ञां कुरुध्वम् । यस्माद्वेदोऽपि 'श्रुतिस्मृती ममैवाज्ञा' इति श्रीभगवद्वचनाद्देवकीया आज्ञा । अतः—तत्र वेदरूपायां देवाज्ञायां कामाज्ञातोऽधिका अर्हणा पूजा मान्यता का । अपि तु—देवत्वाविशेषाद्वेदाज्ञेव कामाज्ञापि माननीयैवेत्यर्थः । आज्ञाद्वयमपि समानम्, तस्मात्कामाज्ञामपि कुरुध्वम्, न त्वेकत्र पक्षपातः कार्य इति भावः । यद्वा—तत्र द्वयोराज्ञयोर्मध्येऽधिकमर्हणं यस्याः सा का आज्ञा । अपि तु पूर्ववदविशेषाद्वे अपि समे एवेत्यर्थः । द्वयोर्मध्ये अधिकार्हणा का इति यूयमेव कथयतेति ब्रह्मादिभिरप्यङ्गीकृतत्वाच्छिष्टपरिगृहीतत्वलक्षणप्रामाण्यात्, प्रत्यक्षसुखहेतुत्वाच्च कामदेवाज्ञैवाधिकार्हणा । वेदो हि ब्रह्मादीनामेवाज्ञा, ब्रह्मादयश्च कामदेवाज्ञाकारिणः, ततश्च यदीयाज्ञा भवद्भिरनुष्ठीयते, तैरपि याऽनुष्ठीयते सा भवतां सुतरामनुष्ठेयेति भाव इति वा । पक्षपातात्तारतम्याज्ञानाच्च मूर्खत्वम् । 'वेदो हि' इति च पाठः । कामदेवाज्ञामेव कुरुध्वम्, यस्माद्वेदोऽपि देवाज्ञा । तत्र वेदे अधिका पूजा । अपितु—कामदेवाज्ञैवानुष्ठेया ब्रह्मादिभिरप्यनुष्ठितत्वादिति वा । 'का विगर्हणा' इति पाठे तत्र कामाज्ञायां का निन्दा कोऽनादर इत्यर्थः । देवकीया गर्हादिषु 'जनपरयोः कुक्' इत्यत्र 'देवस्येति च वक्तव्यम्' इति वक्तव्याच्छः कुक् ॥

---

१ 'तापेनान्ते' इति पाठे 'अन्ते प्रान्तावस्थायाम् अशुभकर्मफलसमये तापेन अशुभकर्मजनितदुःखेन हेतुना निमज्जतः' इति व्याख्येयम्—इति सुखावबोधा । २ 'न्यस्य ते मूर्ध्यनन्यस्य' इति वा पाठः कुत्रचिन्मूलपुस्तके ।

श्लोकत्रयेण मीमांसकान्परिहरति—

प्रलापमपि वेदस्य भागं मन्यध्व एव चेत् ।
केनाभाग्येन दुःखान्न विधीनपि तथेच्छथ ॥६०॥

प्रलापमिति ॥ महता प्रयासेन यस्य प्रामाण्यमुपपादितम्, तस्य वेदस्यैव कंचन भागमंशं 'सोऽरोदीत्, यदरोदीत्' इत्यादिवादमन्त्रनामधेयात्मकं प्रलापमिवानर्थकवचोरूपं चेन्मन्यध्वे कुरुध्वे 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इत्यादिना पूर्वपक्षसूत्रेण प्रतिपादितस्यानर्थक्यस्य 'विधिना त्वेकवाक्यत्वात्' इत्यादिना सिद्धान्तसूत्रेण स्तुत्यर्थत्वादिनाऽर्थवादादेरुपयोगेऽभिहितेऽपि सार्थक्याभावादनिराकृतत्वादर्थवादादिवेदभागमनर्थकवचनप्रायं चेन्मन्यध्वे। तर्हि बहुधनव्ययायाससाध्यत्वात्, दुःखजनकान् 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादीन् विधिभागानपि केन भाग्याभावेन तथा प्रलापरूपान्न इच्छत नाङ्गीकुरुथ। अपि तु तानपि प्रलापरूपानेव स्वीकुरुथ इत्यर्थः । सर्वोऽपि वेदो विधिरूपः प्रलापरूपो वा अस्तु । नस्वर्धजरतीयन्यायः समाश्रयितुं युक्त इति भावः । वेदत्वाविशेषेऽप्यभाग्यमेव वैषम्यहेतुरित्यर्थः। दुःखशब्दस्य नपुंसकत्वेऽपि दुःखं करोतीति ण्यन्तात्पचाद्यचि दुःखानिति ज्ञेयम् ॥

प्रकारान्तरेणापि मीमांसकानुपहसति—

श्रुतिं श्रद्धत्थ विक्षिप्राः प्रक्षिप्तां त्रुथ च स्वयम् ।
मीमांसामांसलप्रज्ञास्तां यूपद्विपदापिनीम् ॥६१॥

श्रुतिमिति ॥ हे मीमांसायां वेदविचारे मांसला परिपुष्टा प्रज्ञा बुद्धिर्येषां ते यूयं श्रुतिं वेदं प्रत्यक्षं श्रद्धत्थ आदरेण स्वीकुरुथ। अक्षरमात्रमपि सार्थकं मन्यध्वे । तथा—विक्षिप्ता वादिभिर्निराकृता भ्रान्तचित्ताः पूर्वापरानुसंधानविकलाः सन्तः तामेव श्रुतिं यूपसंबन्धिनं द्विपं दापिनीं दापयन्तीं स्वयमात्मनैवाङ्गीकृतप्रामाण्यामपि प्रक्षिप्तां केनचिद्बुद्धकेन खिलरूपां निक्षिप्तां च त्रुथ। चकारः पूर्वापरविरोधद्योतनार्थः । पूर्वापरानुसंधानविकलत्वाद्वेदविचारचतुरा साध्वी भवतां बुद्धिरित्युपहासार्थं 'मीमांसा–' इत्यादि संबोधनम् । मांसला—इत्यनेन च स्थूलदृष्टय आपातग्राहिणो यूयम्, न तु कुशाग्रबुद्धय इति सूचितम्। ऋत्विजो यज्ञमध्ये यजमानं यज्ञसमापनाग्रहशीलं समाप्त्युत्तरकालभावि स्वाच्छन्द्यं विदित्वा कार्यवत्तावेलायामेव स्वयं 'यूपे यूपे हस्तिनो बद्ध्वा ऋत्विग्भ्यो दद्यात्' इत्येतत्प्रतिपादकानि वेदवाक्यानि यजमानस्य श्रद्धाजननार्थं पठित्वा याचन्ते । प्रत्यक्षश्रुतिविहितदेयान्तरनिदर्शनव्यामोहितश्च स यजमानः श्रद्दधानतया तथैव प्रतिपद्य तेभ्यः प्रयच्छतीति तैरेवंपरा स्मृतिः प्रवर्तिता स्यादित्याशङ्क्य 'नयं वेदमूला' इति 'लोभपूर्वकमेभिरुक्तम्' इति वेदवाक्यानामर्थवादत्वमङ्गीकरोति । ततश्च कानिचिद्वाक्यानि प्रधानानि, कानिचिदप्रधानानीत्यर्धजरतीयन्यायमतदत्य एवेत्यर्थः। 'यूपहस्तिनो दानमाचरन्ति' इतिस्मृतेर्मूलभूता श्रुतिरभिधीयते । कल्पितश्रुतिमूलत्वात्स्मृतिरेव वा श्रुतित्वेनोच्यते। यूपवद् अभ्युच्चा द्विपा यूपद्विपाः तान् दापयतीति । वाजपेयादौ हि सप्तदश हस्तिनो रथा दास्यश्च दक्षिणाः । इत्युपलक्षणमेतदित्यन्ये ॥

को हि वेदास्त्यमुष्मिन्वा लोक इत्याह या श्रुतिः ।
तत्प्रामाण्यादमुं लोकं लोकः प्रत्येतु वा कथम् ॥६२

कोहीति ॥ 'को हि तद्वेद यदमुष्मिंलोकेऽस्ति वा न वा' इति 'दिक्षवतीकाशान्करोति' इत्यादिर्या श्रुतिः, अमुष्मिँल्लोके परलोके विषये सुखादिकमस्ति वास्त्येव नास्त्येव इति वा हि निश्चितं को वेद । अपि तु न कोपि । इत्याह ब्रवीति । तस्याः श्रुतेः प्रामाण्यादमुं लोकं परलोकं लोकः परीक्षकोऽस्मदादिः कथं वा कथमिव प्रत्येतु विश्वासेन निश्चिनोतु । अपितु न कोपि । यदीयास्तित्वनास्तित्वयोः श्रुतेरेव संदेहस्तत्प्रामाण्यात्पामरो भवाशे एव परलोकं मन्यते, नतु प्रामाणिकः कश्चिदिति भावः ॥

स्मृतिप्रामाण्यमपि दूषयति—

धर्माधर्मौ मनुर्जल्पन्नशक्यार्जनवर्जनौ ।
व्याजान्मण्डलदण्डार्थी श्रद्दधायि मुधाबुधैः॥६३॥

धर्मेति ॥ बहुधनव्ययायाससाध्यत्वात्, शीतभयात्तीर्थस्नानाशक्तत्वात्, अर्थो चरणसंतापनादिरूपतया तत्तदिन्द्रियवेगस्य परिहर्तुमशक्यत्वात्, सुखानुभवमूलत्वाच्च, क्रमेणाशक्यमर्जनं करणं, वर्जनं च ययोस्तौ धर्माधर्मौ बुद्धिपूर्वं जल्पन्बहुधा प्रतिपादयन्मन्वन्तराधिपतिरादिराजो मनुर्मुख्यस्मृतिकर्ता ब्रह्मपुत्रः स्वायंभुवः व्याजाद्धर्माधर्मोपदेशकस्मृतिप्रणयनमिषेण विधिनिषेधातिक्रमनिमित्तप्रायश्चित्तद्वारा मण्डलस्य राष्ट्रस्य लोकस्यापराधं निमित्तीकृत्य दण्डार्थी द्रव्यमभिलाषुको यतः,–तस्माद्बुधैः पण्डितंमन्यैर्मुधा वृथैव श्रद्दधायि आदृता । अधर्माचरणं सुकरमित्यधर्ममेव सर्वः करोति । ततश्च येन केनाप्युपायेनार्थग्रहणोपाय एव दण्डो मनुनाऽभिहितः, नतु धर्म इत्यर्थः । अबुधैरिति वा । मनुवचनमूलत्वात्स्मृतिमात्रस्याप्रामाण्यमुक्तम् ॥

पुराणप्रामाण्य दूषयति—

व्यासस्येव गिरा तस्मिञ्श्रद्धेयद्धा स्थ ताश्विकाः ।
मत्स्यस्याप्युपदेश्यान्वः का मत्स्यानपि भाषताम् ॥

व्यासस्येति ॥ दाशदारिकाव्यभिचारजातस्य भ्रातृजायायां पुत्रोत्पादिन इत्यादिशीलस्य व्यासस्येव कवित्वरूपया गिरा तस्मिन्धर्मे । परलोके वा । व्यास एव वा । श्रद्धा भावना आस्तिक्यबुद्धिरिति [1]येतस्माद्धेतोरद्धा निश्चितं यूयं ताश्विका युक्तिज्ञा वाक्यविचारचतुराः स्थ भवथ । विरुद्धलक्षणया—एवं विगीतेन व्यासेन प्रतिपादिते धर्मे परलोके तस्मिन्वा येषामास्तिक्यबुद्धिः, ते यूयं मूर्खतमा इति भावः । अथ च—ताश्विकाः कुविन्दतुल्या मूर्खा इत्यर्थः । व्यासस्येत्येकवचनेन, एवकारेण विगीतत्वं सूचितम् । मूलापरिशुद्ध्या भारतादीनां पुराणानां चोपहासः कृतः । मत्स्यपुराणं तु मत्स्यरूपधारिणा श्रीविष्णुना मनवे प्रोक्तमिति तत्पृथगुपहसति—मत्स्यस्य उपदेश्यान्वः युष्मान्मनुप्रभृतीन्को भाषतां युष्माभिः सह संवादं कः करोतु । यतः—मत्स्यानपि को भाषताम् । मत्स्या अपि संवादार्हा न भवन्ति । तदुपजीविनस्तच्छिष्या भवन्तस्तु दूरे इति को भाषताम् । युष्मान्मन्वादीन्म-

१ 'प्रत्येति' इति पाठो जीवातु–सुखावबोधाभ्यामभ्यातः । २ 'श्रद्धे वा' इति पाठः सुखावबोधाभ्यामभ्यातः ।

१ 'दापिनीम्' इति पाठे यूपद्विपानां दावो दानं विद्यते यस्याम्' इति व्याख्येयम्—इति सुखावबोधा ।

त्स्यान्को वदतु । अपि तु न कोपि । यतो मत्स्यस्योपदेश्यान् । जलस्थलचारिभ्यो यो हीनो मत्स्यः, तस्यापि शिष्यास्तन्निदेशकारिणः । ततश्चोपदेशकापेक्षयोपदेश्यस्य हीनत्वान्मत्स्यशब्देनापि नाभिधेया इति भावः । एवं कूर्मपुराणादीनामुपहासः । अथ च मनुसंबन्धित्वेन सर्वेऽपि मानवशब्दवाच्या यथा, तथा मत्स्यसंबन्धिनो मात्स्यशब्दाभिधेयत्वमेव युक्तम्, नतु मत्स्यशब्दाभिधेयत्वमिति को मत्स्यानपि भाषतामिति युक्तमुक्तमिति व्याख्येयम् । तान्त्रिका इति 'तन्त्रमधीते वेद वा' इत्यर्थे वसन्तादेराकृतिगणत्वाट्ठक् । मत्स्यस्येति 'कृत्यानाम्-' इति कर्तरि षष्ठी ॥

पूर्वोक्तमेव व्यासस्याप्रमाणत्वं श्लोकद्वयेनाह—

पण्डितः पाण्डवानां स व्यासश्चाटुपटुः कविः ।
निनिन्द तेषु निन्दत्सु स्तुवत्सु स्तुतवान्न किम् ॥

पण्डित इति ॥ पण्डितो बुद्धिमान्, अत एव कविरौत्प्रेक्षिकस्यार्थस्य वर्णकः, तथा—पाण्डवानां युधिष्ठिरादीनां चाटुनि प्रियवचने पटुः एवंभूतः स भवद्भिराप्ततमत्वेनाङ्गीकृतो व्यासस्तेषु पाण्डवेषु दुर्योधनादीन्निन्दत्सु सत्सु न निनिन्द किम् । तथा—तेषु श्रीकृष्णादीन्स्तुवत्सु सत्सु न स्तुतवान्किम् । तेषु निन्दत्सु स्वयमपि निनिन्द, तेषु स्तुवत्सु स्वयमपि तुष्टावेति पूर्वविशेषणयुक्तस्यापि व्यासस्य पराधीनत्वादनाप्तत्वाच्च तत्प्रणीतं भारताद्यप्रमाणमेवेति भावः । अन्योपि पण्डितः प्रभुचित्तानुगुणमेव व्यवहरति, तद्वदयमपीत्यर्थः ॥

न भ्रातुः किल देव्यां स व्यासः कामात्समासजत् ।
दासीरतस्तदासीद्यन्मात्रा तत्राप्यदेशि किम् ॥६६॥

नेति ॥ स भवदीयो व्यासो भ्रातुर्विचित्रवीर्यस्य देव्यां महिष्यां कामात्स्मरपरवशत्वादनुरागान्न समासजद्व्यवहरति स्म । किलेत्युपहासे श्रुतौ वा । अस्मद्बुद्ध्या तावत्कामादेव संगतः । पौराणिकास्तु—देवरात्सुतोत्पत्तेर्धर्म्यत्वात्तस्यां सुतोत्पादनार्थं मात्राज्ञप्तस्तस्यां सक्त इति वदन्ति । तस्मात्तद्यथा, तथास्त्वित्यर्थः । तदा पुत्रोत्पादनोपलक्षिते काले दास्यां रत आसीदिति यत्प्रसिद्धम् । तत्र दासीरतेऽपि मात्रा सत्यवत्या अदेशि आदिष्टः किम् । कथयतेति प्रश्नकाकुरुपहासार्था अपि तु तत्र तावन्नादिष्टः, तस्मादुभयत्रापि स्मरपरवशत्वादेव प्रवृत्तः । एवंविधस्यानाप्तत्वात्तद्वचनमप्रमाणमेवेति भावः । समासजत, 'दंशसञ्ज-' इति न लोपः ॥

इदानीं देवद्विजगोभजनं दूषयति—

देवैर्द्विजैः कृता ग्रन्थाः पन्था येषां तदादृतौ ।
गां नतैः किं न तैर्व्यक्तं ततोऽप्यात्माधरीकृतः ॥६७

देवैरिति ॥ देवैर्ब्रह्मादिभिः, द्विजैर्याज्ञवल्क्यादिभिश्च कृता ग्रन्था पुराणानि स्मृतयश्च त एव येषां भवादृशां वैदिकानां तदादृतौ तेषां देवानां द्विजानां चादृतावादरे विषये पन्थाः । देवा ब्राह्मणाश्चावश्यं भजनीया इत्युपदेशपराः प्रमाणमिति यावत् । स्वपूजार्थमेव तैर्ग्रन्था निर्मिताः, तद्वचनप्रामाण्याद्देवादीनाद्रियन्ते एवंभूता मूर्खा ये, तैर्युष्माभिस्तद्ग्रन्थप्रामाण्यादेव गां पशुरूपां सुरभिं नतैः सद्भिस्ततः पशोर्गोरपि सकाशादात्मा स्वरूपं व्यक्तं स्पष्टं नाधरीकृतः किम् । नम्रः । अथच-हीनः । न कृतः किम् । अपि तु—कृत एव नमस्कार्यापेक्षया नमस्कर्तुर्हीनत्वात्पशोरपि सकाशाद्भवन्तो मूर्खतमा इत्यर्थः । व्यक्तं मन्ये इति यावदिति वा । स्वार्थपरपरवचनस्याप्रमाणत्वाद्देवब्राह्मणसुरभिभजनं निर्मूलत्वात्त्याज्यमिति भावः । देवैर्द्विजैः कृता ग्रन्था येषां वः पन्थाः प्रमाणम्, तैर्भवद्भिस्तस्य पथस्तेषां देवादीनां वा, ग्रन्थादीनां वा, आदरणनिमित्तं गां नतैः । ततोऽप्यात्मेति पूर्ववत् ॥

इदानीं परलोकमङ्गीकृत्यापि यज्वनां ब्रह्मचर्यादि परिहरति—

साधुकामुकतामुक्ता शान्तस्वान्तैर्मखोन्मुखैः ।
सारङ्गलोचनासारां दिवं प्रेत्यापि लिप्सुभिः ॥६८॥

साध्विति ॥ शान्तं विषयभोगपराङ्मुखं स्वान्तं चित्तं येषां तैर्मखोन्मुखैर्गृहीतदीक्षैरपि यज्ञेषु सोत्साहं प्रवृत्तैर्याज्ञिकैः कामुकता संभोगलोभिता यदमुक्ता न त्यक्ता, तत्साधु युक्तम् । यद्वा—साध्वी सुखकारिणी सा चासौ कामुकता च सा न मुक्ता । शान्तस्वान्तैर्यज्वभिः कामुकता साधु मुक्ता त्यक्ता । साध्विति काक्वा । विरुद्धलक्षणया नैव मुक्ता, किं तु संभोगैकनिष्ठा एव त इति व्याख्येयम् । सर्वत्रापि हेतुगर्भं विशेषणमाह—किंभूतैः—सारङ्गलोचनाभिः सुन्दरीभिः सारां श्रेष्ठाम् । ता एव सारः श्रेष्ठः पदार्थो यस्यां तादृशीं वा । दिवं प्रेत्यापि मृत्वापि लिप्सुभिः । रम्भादिकाम्य (मा)यैव बहुधनव्ययायाससाध्यान्यज्ञान्ये कुर्वन्ति, तैः कामुकता नैव त्यक्ता । अन्येषां तु यावज्जीवमेव कामुकत्वम् । यज्वनां तु मरणानन्तरमपीति प्रेत्यापीत्यनेन सूचितम् । तस्माद्दीक्षासमयेऽपि ब्रह्मचर्याङ्गीकरणेनात्मा न वञ्चनीय इति भावः । दिवं 'न लोका-' इति षष्ठीनिषेधाद्द्वितीया ॥

एतदेवोपजीव्याह—

कः शमः क्रियतां प्राज्ञाः प्रियाप्रीतौ परिश्रमः ।
भस्मीभूतस्य भूतस्य पुनरागमनं कुतः ॥ ६९ ॥

क इति ॥ हे प्राज्ञाः प्रकर्षेणाज्ञा भो मूर्खाः, तस्माच्छमः शान्तिः कः । अपि तु न कोपि । शमाङ्गीकरणेन परलोकसाधनेपि काम्यमानकमनीयकामिनीसंभोगफलत्वाद्व्यर्थैव शान्तिः । तस्मान्न कार्येत्यर्थः । तर्हि किं कार्यमित्यत आह—प्रियायास्तरुणरमणीयरमण्याः प्रीतौ प्रेम्णि तस्याः सुखोत्पादने विषये परिश्रमः भूयान्प्रयासः कार्यः क्रियतां कर्तव्यः । शान्तिः का, अपि तु न कापि । भोः प्राज्ञाः बुद्धिमन्तस्तारतम्यविचारचतुराः, प्रियाप्रीतौ प्रयासः कार्यः सद्यः सुखहेतुत्वादिति वा । परस्त्रीगमने लोकान्तरे निरयादिभयं भविष्यतीत्याशङ्क्याह—भस्मीभूतस्य मृतस्य भूतस्य जातस्य । देहिनो वा । पुनरागमनं लोकान्तरे क्रिम्यादिदेहप्राप्तिरिति यत्, स भ्रमः परलोकस्यैवाभावात्, तत्सद्भावेऽपि च देहस्यैवात्मत्वात्, तस्य च भस्मीभूतत्वात्केन नरकादि भुज्यते । तस्माद्यावज्जीवं यथेच्छं सुखं भोक्तव्यमिति भावः । 'प्रियाप्राप्तौ' इति च पाठः ॥

मोक्षेधिकाराभावाद् ब्रह्मचर्यपरित्यागेन काम एव सेवनीय इति शब्दच्छलेन वृद्धसंमत्या स्वीयं मतं द्रढयति—

उभयी प्रकृतिः कामे सज्जेदिति[1] मुनेर्मनः ।
अपवर्गे तृतीयेति भणतः पाणिनेरपि ॥ ७० ॥

१ 'सजेत्' इति पाठे सञ्जधातोनकारस्य 'दंशसञ्ज-' इति लोपः ।

उभयीति ॥ 'अपवर्गे तृतीया' इति भणतः पाणिनेरपि मुनेरुभयी प्रकृतिः स्त्रीपुंसलक्षणा द्वयी व्यक्तिः कामलक्षणे पुरुषार्थे मैथुने मिथुनधर्मे सज्जेदासक्ता भवेदिति मनोन्तःकरणाभिप्रायः लक्ष्यत इति शेषः ॥ अयमाशयः—'अपवर्गे' तृतीया' इति वदतः पाणिनेर्मैथुनधर्मेऽशक्तेन नपुंसकेन तीर्थयात्राब्रह्मचर्यादिद्वारा मोक्षे प्रयतितव्यम्, स्त्रीपुंसलक्षणा व्यक्तिर्मैथुने शक्तत्वात्कामभोगेऽधिकारिणी, न तु तीर्थयात्रादिद्वारा मोक्षे इति । तस्मात्कामाज्जैव कार्येत्यर्थः । न केवलमस्मदाचार्यस्यैव संमतम्, किं तु भवदीयस्य पाणिनेरपीत्यपिशब्दार्थः । अथ चैवं वदतः पाणिनेरप्ययमाशयः—धर्मार्थलक्षणा व्यक्तिः । अथ च—पूर्वप्रयोज्यत्वात्प्रकृतिः कामे संबद्धा भवेत् । 'धर्मार्थकाममोक्षाः स्युः-' इत्यादौ कामादव्यवहितपूर्वत्वेन तस्या उक्तत्वात् । तृतीया तु कामलक्षणा व्यक्तिः । अथ च—पूर्वप्रयोज्यप्रकृतिरपवर्गे संबन्धुमर्हा । अपवर्गादव्यवहितपूर्वत्वेन तस्या उक्तत्वात् । तस्मादपवर्गे निमित्ते कामाख्या तृतीयैव व्यक्तिर्युक्तेत्युक्तत्वात् । मोक्षमार्गं प्रति कामस्यैव हेतुत्वात्प्रियाप्रीतिरेव सुतरां कार्येति भावः । अपवर्गः फलप्राप्तिरि (ती) मं सूत्रार्थं शब्दच्छलेनान्यथोत्प्रेक्ष्य वृद्धसंमतिः स्वीयमतसमर्थनाय दर्शिता । 'तृतीयाप्रकृतिः षण्ढः' इत्यमरः । उभयीत्यत्रायचः स्थानिवत्त्वात्तयग्रहणान्ङीप् सज्जेत, अर्हार्थे लिङ् ॥

गङ्गास्नायिनो दूषयति—

बिभ्रत्युपरियानाय जना जनितमज्जनाः ।
विग्रहायाग्रतः पश्चाद्गत्वरोरभ्रविभ्रमम् ॥ ७१ ॥

बिभ्रतीति ॥ उपरि यानाय स्वर्गं गन्तुम् । अथ च—ऊर्ध्वं देशं गन्तुम् । जनितमज्जनाः कृतगङ्गास्नानाः । अथ च—कृताधोगमनाः जना अग्रतः विग्रहाय युद्धाय पश्चाद्गत्वरः पश्चाद्गमनशील उरभ्रो मेषस्तस्य विभ्रमं सादृश्यं बिभ्रति धारयन्ति । मज्जनादूर्ध्वं गमनं विरुद्धमिति विपरीतार्थकारित्वान्मेषवन्मूर्खा एवेति । गङ्गास्नानेन स्वर्गो भवतीति भ्रान्तिरेवेति भावः । 'विग्रहस्य' इति पाठे उपरियानाय कृतगङ्गास्नाना जना मार्गे गच्छतो मेषस्य भ्रान्तिं सादृश्यं वा धारयन्ति । शीतबाधया नीचग्रीवतया गमनाच्छरीरस्याग्रतः शिरोदेशे पश्चात्कटिदेशे च हस्तयोर्धारणात्कृतगङ्गास्नानानां गङ्गास्नानसमयेऽपि मेषतुल्यत्वम् । तथा जलमध्येऽघमर्षणवशाद्दक्षिणकरेण प्राणानायच्छतः पृष्ठस्थितवामहस्तस्य नीचग्रीवतया पुरः सादृश्यम्, पश्चात्स्थितहस्तस्य च पुच्छसादृश्यमिति मेषतुल्यास्ते जना उच्चैर्जिगमिषोर्नीचैर्भावस्य विरुद्धस्य कारणादुपहास इति व्याख्येयम् । यानाय विग्रहायेति च 'तुमर्थाच्च—' इति चतुर्थी ॥

परलोकसद्भावेपि देहान्तरप्राप्तावपि च न किंचिदनिष्टमित्याह—

एनसानेन तिर्यक्स्यादित्यादिः का बिभीषिका ।
राजिलोऽपि हि राजेव स्वैः सुखी सुखहेतुभिः ॥७२॥

एनसेति ॥ अनेन लोकैः क्रियमाणेन ब्रह्महत्याद्येनसा पातकेन तिर्यक्कृमिपक्ष्यादि स्याद्भवेदित्यादिरेवंप्रकारिका बिभीषिका भयोपदर्शनं किम् । अपि त्वनिष्टहेतुत्वाभावान्न किंचिदेतत् । हि यस्माद्राजिलोऽपि तिर्यक्ष्वतिहीनः सर्पविशेषो जलव्यालोऽपि स्वैः स्वीयैः सुखहेतुभिर्भेकभक्षणजलाहारसजातीयतरुणीसंभोगादिभिः सुखकारणै राजेव सुखी । स्वजात्यनुगुणाहारविहारसंभोगादीनि विचित्राण्येव सर्वेषां सुखसाधनानि न तु नियतानि कानिचित् । ततश्च पापफलभूते तिर्यग्योनित्वे जातेऽपि सुखसद्भावान्न किंचिदनिष्टमित्यर्थः । 'समौ राजिलडुण्डुभौ' इत्यमरः । बिभीषिका 'धात्वर्थनिर्देशे ण्वुल्' इति ण्वुल् । 'भियो हेतुभये षुक्' इति षुक् । 'प्रत्ययस्थात्-' इतीत्वम् ॥

युद्धे हतानां स्वर्गप्राप्तिरित्यादि भारतादिवचनं दूषयति—

हताश्चेद्दिवि दीव्यन्ति दैत्या दैत्यारिणा रणे ।
तत्रापि तेन युध्यन्तां हता अपि तथैव ते ॥ ७३ ॥

हता इति ॥ सङ्ग्रामे हताः संमुखं पतिता दिवि दीव्यन्ति क्रीडन्ति इति चेद्यदि तर्हि दैत्यारिणा श्रीविष्णुना रणे हता हिरण्यकशिपुप्रभृतयो दैत्यास्तत्रापि स्वर्गेपि तेन सह युध्यन्तां युद्धं कुर्वन्तु । यस्माद्धता मारिता अपि ते दैत्या भवदीयमते तथैव रणे संमुखपतनात्स्वर्गे जीवन्त एव । ततश्च 'यं यं वापि स्मरन्भावं-' इत्यादिवचनप्रामाण्यान्मरणसमयेऽपि दैत्यैर्दैत्यारिणा सह विरोधस्य चित्ते धृतत्वात्स्वर्गप्राप्तावप्यसुरभावस्य तथैव वर्तमानत्वात्तत्रापि तेन सह योद्धव्यमेव । तत्रापि युध्यन्त एवेति कुत्रचित्पुराणादौ नाकर्ण्यते । तस्माद्रणे पतितानां मरणादधिकं किंचिदपि नास्तीति 'रणादपलायनात्स्वर्गः' इत्यादिक्षात्रधर्मप्रतिपादकं वाक्यजातमप्रमाणमेवेति भावः । हता अपीत्यत्र 'हतौ, अपि' इति पदेन हतौ हिंसायां कृतायामपि मरणे प्राप्तेपि । अन्यत्पूर्ववत् । 'हतावपि' इति वा पाठः ॥

इदानीं मायावेदान्तसिद्धान्तं दूषयति—

स्वं च ब्रह्म च संसारे मुक्तौ तु ब्रह्म केवलम् ।
इति स्वोच्छित्तिमुक्त्युक्तिर्वैदग्धीवेदवादिनाम् ॥ ७४ ॥

स्वमिति ॥ संसारे संसरणावसरे स्वं जीवात्मस्वरूपः प्रपञ्चश्च, तथा अनाद्यविद्याविलासवासनाविद्यमानभेदं ब्रह्म च, इति द्वयमप्यस्ति । चौ समप्राधान्यद्योतनार्थौ । मुक्तौ तु मोक्षे संजाते पुनराविद्यकजीवव्यवहारनिवृत्तेः केवलं स्वप्रपञ्चरहितं ब्रह्मैव वर्तते । घटोपाधिनिवृत्तेर्घटाकाशनिवृत्तावाकाशमात्रस्यावस्थानवत्संसारोपाधिनिवृत्तेः स्वनिवृत्तौ 'एकमेवाद्वितीयं ब्रह्म' ब्रह्मात्मना संपत्तिर्भवतीत्यर्थः । तथापि प्रपञ्चस्य शुक्तिरजतवन्मिथ्यादृश्यत्वादित्येवं स्वस्योच्छित्तिरेव मुक्तिस्तस्या उक्तिर्वचनं तत्र वैदग्धी नानारूपोक्तिनिरूपणकौशलं वेदवादिनां वेदान्तमतानुसारिणाम् । आत्मार्थं सर्वम्, तस्योच्छेदः प्रतिपादित इति महत्कौशलम्, इति मायावेदान्तमतोपहासः । वेदवादिनामिति छान्दसास्ते किंचिदपि न जानन्तीति सूचितम् । अपि च संसारे द्वयम्, मुक्तौ त्वेकम्, ततश्च द्वयं परित्यज्यात्मोच्छेदपुरःसरमेकं मूर्खादन्यः कोपि नेहते । तस्मान्मूर्खा एव त इति भावः । वेदवेदि-

१ 'उरभ्राणां मेषाणां विभ्रमानेव विभ्रमं चेष्टां बिभ्रति' इति निदर्शनालंकारः । स चोर्ध्वगमनायाधो गच्छन्त इति विचित्रालंकारोत्थापित इति संकरः । तेन तेषामविमृश्यकारित्वं व्यज्यत इत्यलंकारेण वस्तुध्वनिः' इति जीवातुः ।

नाम्' इति च पाठः। पूर्व एव भावः। 'वेदवेदिता' इति पाठे स्वोच्छित्तिमुक्त्युक्तिर्वेदग्धीरूपा वेदार्थज्ञातृता आत्मविनाशोक्तिर्वेदार्थपरिज्ञानं नामेत्युपहासः॥

न्यायवैशेषिकसिद्धान्ताभिमतां मुक्तिं दूषयति—

मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम्।
गोतमं तमवेक्ष्यैव यथा वित्थ तथैव सः॥ ७५॥

मुक्तय इति॥ यः सचेतसां चैतन्यवतां सुखदुःखाद्यनुभवाभावाच्छिलात्वाय पाषाणावस्थारूपाय मुक्तये मुक्तिं प्रतिपादयितुं शास्त्रमूचे न्यायदर्शनं निर्ममे 'तदत्यन्तविमोक्षोऽपवर्गः' इत्यनेन सकलविशेषगुणोच्छेदो मुक्तिरिति मुक्तस्य शिलातुल्यत्वं प्रत्यपादयत्। यूयं तं स्वयमेवावेत्य विचार्यैव गोतममेतन्नामानं मुनिं यथा वित्थ जानीथ स एव तथा नान्य इत्यर्थः। एवं येनोक्तं स गोतम इति यथा युष्माकं संमतः, तथा ममापीत्यर्थः। वैशेषिकास्तु तदीयमतानुसारिण इति भावः। अथवा—नायं परं नाम्ना गोतमः। किं तु प्रकृष्टो गौर्गोतमः पशुरेव सचेतसां शिलारूपमुक्तिप्रतिपादनादित्यर्थतोऽपि गोतम एवेति भावः। आत्यन्तिकी दुःखनिवृत्तिर्मोक्ष इति, सुखमपि दुःखानुषङ्गित्वाद्धेयमेवेति वदताम् 'अशरीरं वा व सन्तं प्रियाप्रिये न स्पृशतः' इति च तत्र प्रमाणमुदाहरतां वैशेषिकाणामपीयमेव मुक्तिः संमतेति न्यायवैशेषिकसिद्धान्तोपहासोऽनेन कृत इति॥

हरिहरादिध्यानान्मुक्तिरिति वचनानि दूषयति—

दारा हरिहरादीनां तन्मग्नमनसो भृशम्।
किं न मुक्ता कुतः सन्ति कारागारे मनोभुवः॥७६॥

दारा इति॥ हरिहरादीनां लक्ष्म्यादयो दाराः स्त्रियः भृशं निरन्तरं तेष्वेव मग्नं ध्याननिश्चलं मनो यासामेवंविधा अपि किं कस्माद्धेतोः न मुक्ताः। प्रत्युत कस्माद्धेतोः मनोभुवः कारागारे सन्ति। सदैव कामपरवशास्तिष्ठन्तीत्यर्थः। तस्मान्न मुक्ता इति भावः। एतेन 'सकृदुच्चरितं येन शिव इत्यक्षरद्वयम्' तथा—'मय्यर्पितमनोबुद्धिर्यः स मामेति पाण्डव' इत्यादिवचनैर्हर्यादिध्यानमात्रं मोक्षकारणमिति प्रतिपादयतः शैवादिशास्त्रस्य मुक्त्यभावेन सम्यभिचारत्वादप्रामाण्यम्॥

ईश्वरवादिनो नैयायिकान्दूषयति—

देवश्चेदस्ति सर्वज्ञः करुणाभागवन्ध्यवाक्।
तर्किं वाग्व्ययमात्रान्नः कृतार्थयति नार्थिनः॥ ७७॥

देव इति॥ 'भूम्यादिकं सकर्तृकं कार्यत्वाद्घटवत्' इत्यादिना विचित्रस्य कार्यजातस्यास्मदादिविलक्षणेन कर्त्रा भवितव्यमिति सर्वज्ञस्य परमकारुणिकस्य सत्यवचसः सर्वकर्तुः प्रभोरीश्वरस्य साधितत्वात्सर्वज्ञः कालत्रयवर्तिवस्तुविज्ञानवान्, तथा—करुणाभाक्कृपावान्, तथा—अवन्ध्या सत्या वेदरूपा वाग् यस्य। नैयायिकादिमते ईश्वरप्रणीतत्वादाप्तवचनत्वाद्वेदानां प्रामाण्यात्स्वतःप्रामाण्यस्य दूषितत्वादित्यर्थः। अथच—सफला यथोक्तार्थसाधिका वाग् यस्य स सत्यवाक्। भवत्सिद्धान्तेन देवश्चेदस्ति, तर्ह्यर्थिनो भुक्तिमुक्त्याद्यभिलाषिणो नोऽस्मान् भवन्तः प्राप्तमनोरथा भवन्त्विति वाग्व्ययमात्राद्वाङ्निर्गममात्रेण व्ययेन किं कस्मान्न कृतार्थयति पूर्णमनोरथान्करोति। कथयतेत्यर्थः। सर्वज्ञादिविशेषणत्रयेण युक्तोऽपि चेन्न ददाति, तस्मान्नास्त्येव। यद्यभविष्यत्तर्ह्यकृतार्थयिष्यत्, न च कृतार्थयति तस्मान्नास्तीति भावः। अनेनाप्युपहासः सूचितः॥

इदानीं कर्ममीमांसकमतावलम्बेनायोग्योपलम्भनमाह—

भविनां भावयन्दुःखं स्वकर्मजमपीश्वरः।
स्यादकारणवैरी नः[1] कारणादपरे परे॥ ७८॥

भविनामिति॥ भविनां संसारिणां स्वकर्मजं स्वकृतपापफलभूतं दुःखं भावयन्कुर्वन्स्वयं भवदपि भवने पुनः स्वयं प्रवर्तयन्नीश्वरो नोस्माकमकारणवैरी दायादत्वादिहेतुं विनैव शत्रुः स्यात्। अपरेन्ये पुनः कारणाद्रक्षेत्राद्यपहारबन्धुवधादेर्वैरहेतोः (परे) वैरिणो भवन्ति। भविनां न इति वा संबन्धः। 'ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा।' कर्मफलदातेश्वर इति मते कर्मानुगुणं फलं भवेत् तर्हीश्वरेण कर्तव्यं न किंचिदस्ति, तादृशः कर्मण एव दुःखोत्पत्तेः। एवंसति स चेदनुभावयति तर्ह्यस्मदादीनां द्वेष एवनेन कृतः स्यात्। तस्मात्तस्य दयालुत्वादयो गुणा गताः तस्मात्कर्मण एव प्राधान्यादीश्वरो नास्त्येवेति भावः। 'पञ्चमी' इति योगविभागात् 'कारणाद्वैरी' इति समासं कृत्वा पश्चान्नञ्समासः॥

अन्यदप्याह—

तर्काप्रतिष्ठया साम्यादन्योन्यस्य[2] व्यतिघ्नताम्।
नाप्रामाण्यं मतानां स्यात्केषां सत्प्रतिपक्षवत्॥ ७९॥

तर्केति॥ प्रमाणानुग्राहकयुक्तिसंघरूपस्य तर्कस्याप्रतिष्ठयानन्तयाऽपर्यवसानेन कृत्वा यत्साम्यं तुल्यत्वं तस्मात्तुल्यत्वाद्धेतोः सुन्दोपसुन्दन्यायेन विनिमयेनान्योन्यस्य परस्परं व्यतिघ्नतां दूषयतां केषां मतानां प्रमाणत्वेन समानानामनुमानादीनाम्। अथ च—सत्त्वासत्त्वैकात्म्यनानात्म्यसेश्वरत्वानीश्वरत्वादि प्रतिपादयतां दर्शनानामप्रामाण्यं न स्यात्। अपितु—तुल्यबलत्वेन परस्परविरोधादप्रमाणत्वमेव स्यात्। किं च—सन् प्रतिपक्षो विरुद्धसाध्यसाधको हेतुर्यस्य तदनुमानं सत्प्रतिपक्षं तद्वत्तस्येवाप्रामाण्यं स्यादिति संबन्धः। वैशेषिकादयो यथा कृतकत्वाद्घटवदनित्यं शब्दं वदन्ति। मीमांसका निरवयवत्वादात्मवन्नित्यं शब्दं वदन्ति। तत्रोत्तरेण पूर्वप्रदर्शिते दोषविशेषे पूर्वस्य यथाऽप्रामाण्यं तथेत्यर्थः। सत्प्रतिपक्षानुमाने यथाऽप्रामाण्यं द्वयोरपीत्यर्थः। सप्तम्यर्थे वतिः। तर्क्यते निश्चीयतेऽर्थो यैस्ते तर्का अनुमानानि तेषामप्रतिष्ठया समबलद्वितीयसद्भावेनानिश्चितस्वरूपतयेत्यर्थ इति वा व्याख्येयम्। गगनं नित्यममूर्तत्वादात्मवत्; गगनमनित्यमस्मदादिबाह्येन्द्रियग्राह्यगुणाधारभूतत्वाद्घटवदिति सत्प्रतिपक्षानुमानयोरिवेत्यर्थः॥

अन्यच्चाह—

अक्रोधं शिक्षयन्त्यन्यैः क्रोधना ये तपोधनाः।
निर्धनास्ते धनायैव धातुवादोपदेशिनः॥ ८०॥

---

१ 'कारणवैरी न' इति पाठे काका व्याख्येयम्' इति सुखावबोधा।
२ 'अन्योन्यस्येति कर्माविवक्षया शेषे षष्ठी इति सुखावबोधा।

अक्रोधमिति ॥ क्रोधना अकारणरोषणा ये तपोधनाः तपःसर्वस्वा दुर्वासःप्रभृतयस्ते 'क्रोधो बहूनर्थकारित्वात्सर्वथा त्याज्यः' इत्यक्रोधं क्रोधाभावमन्यैः प्रयोज्यैः शिक्षयन्ति । अन्ये क्रोधाभावं शिक्षन्ते, तान् क्रोधो न कार्य इति प्रयोजयन्त्युपदिशन्तीति यावत् स्वयं तु कुद्धा यत्किंचिदाचरन्ति अन्यांस्वेतदुपदिशन्तीत्युपहासः। तथा–येऽतिनिर्धनास्ते धनायैव स्वस्य धनप्राप्त्यर्थमेव लोहादिधातूनां संबन्धिनं वादं स्पष्टं वचनमन्योन्यरिपुमित्रभावज्ञानेन धातूनां संयोगात्स्वर्णरूप्यादि मया कर्तुं शक्यते, मदुपदेशात्त्वमपि कुर्वित्येवंरूपं धातुवादमुपदिशन्ति एवंशीला भवन्ति । परं तु स्वस्मै किंचित्तेन दातव्यमित्येवं परप्रतारणबुद्ध्यैव ननु तत्त्वतः । यतः स्वयं निर्धनाः । इति हेतुः । तात्त्विकसामर्थ्यसद्भावे तेषामधनत्वं न युज्यते। ततश्च 'यः स्वयमतीर्णः स कथं परांस्तारयति' इत्यनेन धातुवादिनामप्युपहासः । अन्यैः प्रयोज्यकर्तुरनभिहितत्वात्कर्तरि तृतीया । क्रोधनाः 'क्रुधमण्डार्थेभ्यश्च' इति युच् ॥

इदानीं दानधर्मं दूषयति—

किं वित्तं दत्त तुष्टेयमदातरि हरिप्रिया ।
दत्त्वा सर्वं धनं मुग्धो बन्धनं लब्धवान्बलिः॥८१॥

किमिति ॥ भो जनाः, यूयं वित्तं स्वर्णादि यज्ञादौ दक्षिणात्वेन पात्रेभ्यः किमिति दत्त । अपि तु—कस्मैचिदपि न देयम् । यस्माद् इयं हरिप्रिया विष्णोः प्रेयसी संपद्रूपा लक्ष्मीरदातरि अकृतदानोपभोगे कृपणे तुष्टा प्रीतिं प्राप्नोति । तत्रैव वसतीत्यर्थः । दाने बाधकमाह—यस्मात् मुग्धो मूर्खो दानव्यसनपरः, तथोदर्कविचारशून्यः स्मृतिपुराणादौ श्रद्धावांश्च बलिः सर्वं धनं श्रीवामनाय दत्त्वा बन्धनं लब्धवान् । वाक्पाशेन बद्धः सन्पातालप्रवेशरूपं बन्धनं प्राप्तवानिति पुराणकथा । दानं कर्तव्यमित्यत्र स्मृत्यादिकमेव प्रमाणम्, दानमशुभोदर्कं जातमित्यत्रापि तदेव प्रमाणम् । तथा च—कर्तृद्रव्यपात्रशुद्ध्यादियुक्तेऽपि दानविधौ सति विरुद्धफलदर्शनात् अदातरि च लक्ष्म्याः स्थैर्यदर्शनादन्वयव्यतिरेकाभ्यां दानधर्मः सर्वथा त्याज्य एवेत्युक्तमिति भावः । हरिप्रियेत्यनेन श्रीहरिणाऽपि याचकत्वाङ्गीकाराल्लक्ष्मीप्रीत्यर्थमदातृत्वमेवाङ्गीकृतमिति च सूचितम् ॥

पात्राभावाद्दानं न कर्तव्यमित्याह—

दोग्धा द्रोग्धा च सर्वोयं धनिनश्चेतसा जनः ।
विसृज्य लोभसंक्षोभमेकद्वा यद्युदासते ॥ ८२ ॥

दोग्धेति ॥ अयं प्रत्यक्षग्रहणयोग्यः सर्वोपि जनो धनिन आत्मनश्चान्दोग्धा दोहनशीलः । स्वामिभक्तदानादिविध्युपदेशादिना येन केनाप्युपायेन धनिकेभ्यो धनमाकर्षतीत्यर्थः । तथा—द्रोग्धा मनसा तद्विषये द्रोहकरणशीलश्च । कथमेनं हन्याम्, एतस्य धनादि च कथं गृह्णीयामित्यादिप्रकारेण तद्विषये द्रोहमेव चिन्तयतीत्यर्थः । ननु सर्वोप्येवमिति कथमुच्यत इत्यत आह—लोभसंक्षोभं द्रव्याद्यभिलाषजनितं मनसो नितरां क्षोभं कार्पण्यपारवश्यलक्षणं विकारमभिलाषातिरेकं वा विसृज्य यद्युदासत उदासीना भवन्ति परस्वापकर्षणादेरुपरता भवन्ति तर्हि एकद्वा एको द्वौ वा, न तु तृतीयः । तादृशस्त्वल्पीयान् तस्मादुक्तमेवोक्तमित्यर्थः । तस्मात्परप्रतारणप्रयोजनक एव दानधर्मोपदेश इति भावः । परप्रतारकत्वात्पात्रत्वाभावाद्दानं न कर्तव्यमित्यर्थः । 'विपक्ष' इति पाठे लोभातिरेकं बलान्निरुध्येत्यर्थः । दोग्धा, द्रोग्धा तात्छील्ये तृन् । तद्योगे च 'न लोका–' इति षष्ठीनिषेधाद्धनिन इति द्वितीया । एको द्वौ वा एकद्वाः, 'संख्ययाव्ययासन्न–' इत्यादिना बहुव्रीहौ 'बहुव्रीहौ संख्येये' इति डच् समासान्तः ॥

इदानीं विधिनिषेधजातं दूषयन्नुपसंहरति—

दैन्यस्यायुष्यमस्तैन्यमभक्ष्यं कुक्षिवज्ञना ।
स्वाच्छन्द्यमृच्छतानन्दकन्दलीकन्दमेककम् ॥८३॥

दैन्यस्येति ॥ अस्तैन्यं चौर्याभावो दैन्यस्य निर्धनत्वस्यायुष्यम् । वर्धकमित्यर्थः । चौर्यं यावन्न क्रियते तावद्दैन्यं नापयाति । तस्मात्तत्कर्तव्यमेवेति भावः । तथा—अभक्ष्यं लशुनगृञ्जनग्राम्यसूकरादि । तद्भक्षणमिति यावत् । तन्न कुक्षिवज्ञना स्वोदरविप्रलम्भनमेवं स्वादुतमभक्ष्यपरिहारे जठरवज्ञनैव भवति, न तु स धर्मः । तस्मान्न किंचिद्बहुना—आनन्दस्य सकलसुखस्य कन्दलीकन्दं प्ररोहमूलभूतमेकमसहायं केवलं स्वाच्छन्द्यं स्वेच्छाचारित्वमृच्छत आश्रयत । श्रौतस्मार्तसकलनिषेधान्परित्यज्य सर्वसुखहेतुत्वात्स्वेच्छाचारमेव कुरुतेत्युपदेशानस्मात्समाकर्णयतेति भावः । आयुष्यं, 'तस्मै हितम्' इति यत् । अस्तैन्यं स्तेनशब्दात् 'स्तेनाद्यन्नलोपश्च' इत्यत्र 'स्तेनाद्' इति योगविभागात्ष्यञि अर्थाभावेऽव्ययीभावः । एवमभक्ष्यमित्यत्रापि । 'विन्दत' इति वा (पाठः) 'विदॢ लाभे' लोट् ॥

इत्थमाकर्ण्य दुर्वर्णं शक्रः सक्रोधतां दधे ।
अवोचदुच्चैः कस्कोयं धर्ममर्माणि कृन्तति ॥८४॥

इत्थमिति ॥ शक्र इत्थं पूर्वोक्तं दुर्वर्णं वेदादिदूषकं चार्वाकस्य दुष्टवर्णवाक्यमाकर्ण्य सक्रोधतां दधे । सकोपोऽभूदित्यर्थः । अनन्तरमुच्चैर्नितरां तारस्वरमित्यवोचत् । इति किम्—एतेषु मध्ये अनिश्चितरूपोऽयं कस्कः श्रुत्यादिमूलानि धर्मरहस्यभूतानि मर्माणि वेददूषणात्कृन्तति छिनत्ति । कोयं कोयमेवं भाषत इति वक्तृविशेषनिश्चयाय कोपाभिव्यञ्जकसंभ्रमोक्तौ । कस्कशब्दः कस्कादित्वात्साधुः ॥

क्रोधमेव द्योतयन्वेदप्रामाण्यं प्रतिजानीते—

लोकत्रयीं त्रयीनेत्रां वज्रवीर्यस्फुरत्करे ।
क इत्थं भाषते पाकशासने मयि शासति ॥८५॥

लोकेति ॥ पाकशासने पाकासुरमर्दने मयि त्रयीनेत्रां प्रसिद्धचक्षुर्दृयागोचरार्थगोचरीकरणसमर्थवेदत्रयरूपनेत्रां वेदविहिताचरणवेदनिषिद्धवर्जकारिणीं लोकत्रयीं धर्मव्यापनपूर्वं शासति परिपालयति सति क इत्थमेवं सकलधर्मदूषणप्रकारेण भाषते । किंभूते—वज्रवीर्येण स्फुरन्प्रकाशमानः करो यस्य तस्मिन् । वज्रेत्यादिना वेदादिनिन्दकस्य कण्ठच्छेदसामर्थ्यं स्वस्य सूचितम् । मयीति करेण हृदयस्पर्शनपूर्वं क्रोधाहंकाराविष्काराभिनयः । 'वज्रहस्तः पुरंदरः' इत्यादिवाक्यप्रतिपाद्ये मयि प्रत्यक्षदृश्ये सति श्रुतिप्रामाण्यं को वाऽन्यथाकर्तुं समर्थ इति 'वज्रवीर्य–' इत्यनेन विग्रहत्वं सूचितम् । 'प्रावोम्मज्जनवत्–' 'अग्निहोत्रं त्रया–

इत्यादिवेदाप्रामाण्यप्रतिपादनं चार्वाकवाक्यं दूषितमिति ज्ञेयम्। शासति मयि शासतं मामनादृत्येत्यनादरसप्तमी वा ॥

श्लोकद्वयेन 'शुद्धिर्वंशद्वयी' इत्यादि यज्जातिदूषणं कृतं तत्परिहरति—

वर्णासंकीर्णतायां वा जात्यलोपेऽन्यथापि वा।
ब्रह्महादेः परीक्षासु भङ्गमङ्ग प्रमाणय ॥ ८६ ॥

वर्णेति ॥ अङ्ग रे चार्वाक, ब्राह्मणादिवर्णानामसंकीर्णतायां सत्यामन्योन्ययोनिसंकराभावे सति यो जात्यलोपो ब्राह्मणादिजातेर्लोपाभावः सद्व्यवहारविषयत्वं तस्मिन्वा विषयेऽन्यथापि वर्णसंकराज्जात्यभावे वा विषये परीक्षासु शुद्धत्वादिज्ञापकेषु स्मृत्याद्युक्तेषु जलानलादिदिव्येषु विषये ब्रह्महादेर्ब्राह्मणक्षत्रियादिवधकारिणोऽभियोज्यस्य भङ्गं पराजयं प्रमाणय संदिग्धस्यार्थस्य कोट्यन्तरनिरासननिश्चायकं कुरु। यदि ब्राह्मण्यादिशुद्धिर्न स्यात्, तर्हि ब्रह्मवधादौ कृतेपि ब्रह्महा नास्मीति प्रतिज्ञाते च लिङ्गभूतो भङ्गो न स्यात्। भवति च तावत्, तस्माद्भङ्गेनैव हन्यमानस्य तत्पित्रादिपरम्परायाश्चासंकीर्णत्वाद्ब्राह्मण्यादिजातेरस्तित्वं कथितम्। यत्र च संकराज्जातिशुद्धिर्नास्ति तस्य वधादौ कृतेपि ब्रह्महत्यादिप्रतिज्ञाकृतो भङ्गो नास्त्येवेति वर्णसंकराज्जातिलोपे व्यतिरेकमुखेन भङ्ग एव प्रमाणं धूम इव वह्न्यभावेपीत्यर्थः। अङ्गेति प्रातिकूल्यद्योति संबोधनम्। मिथ्यातत्त्वपरीक्षायामभियोक्तृभङ्गेऽभियोज्य(स्य) जातिशुद्धिः पातित्याभावश्च। अभियोज्यभङ्गे तु हन्यमानादेर्जातिशुद्धौ सत्यामप्यभियोज्यस्यैव संकीर्णजातित्वं पातित्यं चेति निश्चयसिद्धेर्भङ्गमेव प्रमाणयेत्यर्थ इति व्याख्येयम्। यथामति व्याख्या ज्ञातव्या ॥

पूर्वोक्तमेव द्रढयति—

ब्राह्मण्यादिप्रसिद्धाया गन्ता यन्नेक्षते जयम्।
तद्विशुद्धिमशेषस्य वर्णवंशस्य शंसति ॥ ८७ ॥

ब्राह्मण्येति ॥ ब्राह्मण्यमादिर्यस्य क्षत्रियत्वादिजातिविशेषस्य तेन प्रसिद्धा। यद्वा-ब्राह्मणी आदिर्यस्याः क्षत्रियादिस्त्रियाः सा ब्राह्मण्यादिः सा चासौ प्रसिद्धा च। तस्याः इयमुत्तमा ब्राह्मणी इत्यादिप्रकारेण रूढायाः स्त्रियाः गन्ता कामुकस्तां भुञ्जानो नरो दिव्ये जयं न ईशते पश्यतीति यत्। न प्राप्नोतीत्यर्थः। तज्जयानीक्षणमेव कर्मशेषस्य वर्णवंशस्य ब्राह्मणादिवर्णसङ्घस्य मातापित्रादिपरम्परया विशुद्धिं नितरां निर्दोषत्वं शंसति कथयति। ब्राह्मणीव्यभिचारी नरो ब्राह्मणोऽहं ब्राह्मणीं नागममिति प्रतिज्ञाय यदा दिव्यं करोति तदा स पराजयत एवेति तावत्प्रत्यक्षम् तथाच गम्यायां गन्तुश्च पारदार्यादिदोषदूषितत्वेपि तन्मातापित्रादिपरम्परायां ब्राह्मण्यादिविशुद्धिस्तत्पराजयेनैव स्पष्टं कथिता। यदि जातेः शुद्धिर्नाभविष्यत्, तर्ह्येवं प्रतिज्ञायां कृतायामपि तयोर्ब्राह्मणत्वाभावाद्भङ्गो नाभविष्यत्। स तु दृश्यत इति भङ्ग एवान्यथानुपपत्त्या जातिशुद्धौ प्रमाणमित्यर्थः। ब्राह्मणादिव्यभिचारिण्यपि पराजयत एवेति तस्या अप्येतदुपलक्षणं ज्ञेयम् प्रसिद्धाया इत्यनेन जातेरनपलापनीयत्वं सूचितम्। ब्राह्मण्यादिप्रसिद्धाया गन्ता ना पुरुषो यदजयं भङ्गमीक्षते तद्भङ्गेक्षणमिति वा व्याख्या। गन्तेति तृच्। अन्यथा 'न लोका—' इति षष्ठ्यभावः स्यात्। 'प्रसिद्धायाम्' इति पाठे विषयसप्तमी। अन्या व्याख्या क्लिष्टत्वादुपेक्ष्या ॥

इदानीं संवादादपि वेदस्य प्रामाण्यमित्याह—

जलानलपरीक्षादौ संवादो वेदवेदिते।
गलहस्तितनास्तिक्यां धिग्धियं कुरुतेऽनते ॥८८॥

जलेति ॥ हे चार्वाक, वेदेन वेदिते बोधिते वेदमूले जलानलयोः, ताभ्यां वा, या परीक्षा शुद्धत्वनिश्चयः स आदिर्यस्य तुलादिव्यादेस्तादृशेऽर्थे संवादो यथोक्तदर्शनरूपः स ते तव धियं बुद्धिं गलहस्तितं बलान्निर्वासितं नास्तिक्यं यस्यास्तां न कुरुते धिक्। वाक्यार्थः कर्म। अनुचितमेतदित्यर्थः। जलदिव्ये हि जलमग्नः पुरुष आकर्णपूर्णपुरुषमुक्तशरप्रत्यानयनमपेक्षमाणो यद्यनानीते शरे उन्मज्जति, तर्ह्यशुद्धः। आनीते तु शुद्ध इति यदोक्तजलदिव्यम्। तच्च तथैव दृश्यत इति संवादः। वह्निदिव्ये तु तप्तलोहादौ दाहादाहाभ्यामशुद्धिशुद्धी इत्युक्तं येदेन। तत्रापि संवादः। तस्मिन्प्रामाण्यहेतौ संवादे सत्यपि नास्तिक्यं न जहासीत्याश्चर्यम्। मूर्खतरोऽसीति भावः तव धिग्धियं निन्द्यां बुद्धिं निराकृतनास्तिक्यां न कुरुते इति वा तव धियं धिक् निन्द्यां न कुरुते अपि तु करोत्येव। दूषयतीत्यर्थः। तव धियं न धिक्करोति, अपि तु धिक्करोत्येवेति वा। यतो निराकृतनास्तिक्यामित्युभयत्रापि हेतुगर्भम्। संवादेन नास्तिक्यापनयात्स्वरूपहानेर्धिक्कार एव कृत इत्यर्थः। जलानलपरीक्षादौ ते तवापि यतः संवादः संप्रतिपत्तिरस्ति। तेन कारणेन संजातगलहस्तमालिङ्गितकण्ठं नास्तिक्यं यस्यां तां स्वीकृतनास्तिक्यां बुद्धिं त्वं धिक्कुर्वित्यर्थ इति वा। अत्र गलहस्तशब्दः परिरम्भपरः। यतस्तवापि संवादोस्ति। तेन स्वीयां धिग्धियं नास्तिक्यवादादुष्टां बुद्धिं निर्वासितनास्तिक्यां कुर्विति वा। कुत्सिता रुतिः शब्दो यस्य तत्संबोधनं कुरुत। तथा—अविद्यमाननतेऽविनीत चार्वाक वैदिके जलानलपरीक्षादौ यस्मात्संवादोऽस्ति तस्मादाश्लिष्टनास्तिक्यां नास्तिकमतिं धिक्। सा निन्द्येत्यर्थ इति यत्तदोः संबन्धेन वा व्याख्येयम्। नास्ति मतिरस्येत्यर्थे 'अस्ति नास्ति दिष्टं मतिः' इति ठकि नास्तिकः। मतिः परलोकविषया। तद्भावो नास्तिक्यम्। ब्राह्मणादित्वाद्ष्यञ् ॥

इदानीं 'मृते कर्मफलोर्मयः' इत्यादीनि वाक्यानि दूषयति—

सत्येव पतियोगादौ गर्भादेरध्रुवोदयात्।
आक्षिप्तं नास्तिकाः कर्म न किं मर्म भिनत्ति वः ८९

सतीति ॥ पतियोग ऋतौ स्त्रिया भर्तृसंबन्धः शुक्रशोणितसंनिपातलक्षणः, अयुग्मासु गमनं निषिद्धतिथ्यादिवर्जनमेतदादेर्यस्यैतादृशे बीजक्षेपादौ कर्षणजलसेकादौ च वर्तमान एव दृष्टकारणसामग्र्यां सर्वदा सत्यामपि गर्भादेरध्रुवोदयादनिश्चितादुद्भवात्कस्मिंश्चित्काले ऽनुत्पत्तेर्हेतोराक्षिप्तमलौकिकस्य परलोकसाधनस्याभावे दृष्टकारणसामग्रीत एव सदा स्यात्, न चैवमस्ति, तस्माद्धर्माधर्मरूपमदृष्टं कारणान्तरमप्यस्तीत्यर्थापत्तिप्रमाणकं कर्म शुभाशुभफल-

१ 'नेक्षते जयन्, इति पाठे ब्राह्मण्यादिप्रसिद्धाया गन्ता जयन् विजयमानो नेक्षते यदिति व्याख्येयमिति' सुखावबोधा।

कमदृष्टं भो नास्तिका अवैदिकत्वाद्द्रष्टुमनर्हाः, वो युष्माकं मर्म हृदयं किं न भिनत्ति, अपि तु विदारयत्येव । कुतो हेतोर्न भिनत्तीति वा । एतन्निदर्शनेन सचेतसो हृदयेन विदरीतुं युक्तम्। तत्र जातमित्याश्चर्यम् । मूर्खतमा भवन्त इत्यर्थः । कर्म वो मर्म दर्शनरहस्यरूपं न किं दूषयति, किं तु दूषयत्येवेति वा । सर्वोद्देशेन नास्तिका इति बहुवचनम् । गृहस्थाग्निचतुरासु पत्नीषु सतीष्वपि पुत्राद्यसंभवे एवं वदन्ति—अस्माभिरपत्यप्राप्तिहेतुकं कर्म प्राङ् कृतम् । अजातमम्यक्प्रेतकृत्येनास्मद्वंश्येन केनचित्प्रेतेन प्रतिबन्धः कृतः, तस्मादपत्यं न भवतीत्यादि वा कथयन्ति । तस्माल्लोकप्रवादपारम्पर्यादर्थापत्तिरदृष्टं कारणान्तरमङ्गीकरणीयम् । आदिशब्दाभ्यां कृषिवाणिज्यस्वामिसेवादिव्यवसायास्तत्फलावाप्तयश्च व्याख्याताः ॥

'मृतः स्मरति–' 'अन्यभुक्तेर्मृते तृप्तिः–' 'संदेहेप्यन्यदेहाप्तेः–' इत्यादेरुत्तरमाह—

याचतः स्वगयाश्राद्धं प्रेतेस्याविश्य कंचन ।
नानादेशजनोपज्ञाः प्रत्येपि न कथाः कथम् ॥ ९० ॥

याचत इति ॥ पापवशादप्राप्तसद्गतेः पिशाचत्वादियोनिं प्राप्तस्य स्वसंबन्धिनम्, उदासीनं वा, यं कंचनाविश्य सूक्ष्मरूपेण तच्छरीरमधिष्ठाय स्वसंबन्धि गयाश्राद्धं निजदुर्गतिपरिजिहीर्षया गयायां श्राद्धं प्रयागे माघस्नानादिजन्यं पुण्यविशेषं याचतो मम सद्गतिप्राप्त्यर्थमिदं करणीयमिति प्रार्थयमानस्य एवं कृते एनं मोक्ष्यामीति वदतः प्रेतस्य संबन्धिनीर्नानादेशेभ्य आगता जनास्तेभ्य उपज्ञाः श्रुताः, तैर्वा ज्ञाताः सत्यत्वेन सर्वेषां संमताः कथाः कथं न प्रत्येषि तासु कथं न विश्वसिषि, अपि तु नानाविधप्रामाणिकजनसंवादसिद्धत्वात्पूर्वजन्मकथनात्पूर्वं मयात्रैतावत्सुवर्णादि निक्षिप्तं तत्पश्यतेति निध्यादिदर्शनसंवादादेशान्तरकालान्तरप्रवृत्तिकथनाद्वयाश्राद्धादौ कृते तस्य सद्गतेरनुमानाच्च ताः सर्वथा विश्वसितुं योग्या इत्यर्थः । एतेन तीर्थादिप्रभावविशेषपरलोकदेहान्तरप्राप्तिधर्माधर्ममूलस्वर्गनरकादिप्राप्तीनां प्रामाण्यं समर्थितम् । नानादेशजन उपज्ञोऽनुभविता यासां ताः सर्वसाक्षिका इत्यर्थः ॥

'को हि वेद–' इत्यादेरुत्तरमाह—

नीतानां यमदूतेन नामभ्रान्तेरुपागतौ ।
श्रद्धत्से संवदन्तीं न परलोककथां कथम् ॥ ९१ ॥

नीतानामिति ॥ प्राणापकर्षणार्थं यमेनैव प्रेषितेन यमदूतेन देवदत्तमानयेत्यादिष्टे समाननामतया भ्रान्तेर्हेतोः स्थूलशरीराल्लिङ्गिकं शरीरमाकृष्य यो देवेनानायितः सोयमानीत इति यममानीय्यं नीतानां मारणीयादन्येषां जनानामुपागतौ सत्यामानायितो यः सोयं न भवति पुनरयं मर्त्यलोकं नेय इति एतत्सदृशमन्यमानयेति यमचित्रगुप्ताभ्यामुक्ते सति प्रत्यावृत्तौ भौतिकशरीरमध्ये लैङ्गिकशरीरे पुनः प्रविष्टे सति तद्बान्धवैरेतावत्पर्यन्तं किं जातम्, त्वं कुत्र गतः, किं वा तत्र दृष्टमित्यादि प्रश्ने कृते यमदूतैर्यमं प्रापितः तेन च पुनरायुःशेषादत्र पातितोऽहम्, स्वर्गो नरकश्चेत्यविध इति प्रकाशकश्रुतिस्मृतिप्रमाणेषु यथा स्वर्गादिरूपं श्रुतम्, तादृशस्यैव तस्य कथनात्संवदन्तीं संवादं कुर्वतीं परलोकसंबन्धिनीमस्तित्वकथां कथं कुतो हेतोस्त्वं न श्रद्धत्से परलोकास्तित्वे प्रमाणरूपां न मन्यसे वद । न किंचिदविश्वासे कारणमस्ति । तस्मात्परलोकोस्त्येवेति भावः ॥

जज्वाल ज्वलनः क्रोधादाचख्यौ चाक्षिपन्नमुम् ।
किमात्थ रे किमात्थेदमस्मदग्रे निरर्गलम् ॥ ९२ ॥

जज्वालेति ॥ अथ ज्वलनोऽग्निः क्रोधाज्जज्वाल । अमुं चार्वाकमाक्षिपन्परुषभाषणैरधिक्षिपन्नित्याचख्यावुषे च । इति किम्—रे चार्वाक नीच, त्वमस्माकं वैदिकानामग्रे निरर्गलं निर्भयं यथा तथा इदं पूर्वोक्तप्रकारं किमात्थ किमात्थ किं ब्रूषे किं ब्रूष इति । (अतः परं चेद्वक्ष्यसि, तर्हि तव कण्ठोष्ठमेव कुण्ठयिष्यामीत्यर्थः ।) क्रोधाविष्टस्य जातिरियम् । क्रोधावेशद्योतनार्थमेव वीप्सया पुनरुक्तिः ॥

इदानीं 'नाभाति स्वाति–' इत्यादेरुत्तरमाह—

महापराकिणः श्रौतधर्मैकबलजीविनः ।
क्षणाभक्षणमूर्छाल स्मरन्विस्मयसे न किम् ॥ ९३ ॥

महेति ॥ हे क्षणं क्षणमात्रमभक्षणेनाभोजनेन मूर्छालातिविह्वल रे नास्तिक, द्वादशादिबहुदिवसोपवासमाध्यमहापराकाख्यव्रतवत्सहृतचारिणः श्रौतधर्मरूपेणैवैकेन बलेन जीविनः प्राणधारणशीलानेवंभूतान्मनुष्यान्स्मरंश्चिन्तयंश्चिरं न विस्मयसे । एतावन्तिदिनान्येतेऽभोजनाः कथमासत इत्याश्चर्यं न प्राप्नोषि एतन्महद्विस्मयास्पदम् । क्षणमात्रमप्यभोजने पीडायाः स्वेनैवानुभवे, मासोपवासादिकारिणां जीवितधारणस्य प्रत्यक्षदर्शने च सत्यपि भवादृश एव मूर्खो न विस्मयत इत्यर्थः । तस्माच्चिरमभोजनेपि जीवितधारणसामर्थ्याद्धर्मोऽस्त्येवेति । एकादश्युपवासादिकं धर्ममन्वयव्यतिरेकाभ्यां जानीहीति भावः । पराकिणः शेषत्वाविवक्षायां द्वितीयाबहुवचनम् । शेषत्वविवक्षायाम् 'अधीगर्थ' इति षष्ठ्येकवचनं वा । मूर्छालोस्त्यर्थे सिध्मादिषु 'क्षुद्रजन्तूपतापाभ्यां चेष्यते' इति वचनादुपतापकारित्वाल्लच् । 'विस्मयसेऽपि न' इति च पाठः ॥

इदानीं 'प्रावोन्मज्जनवत्–' 'एकं संदिग्धयोस्तावत्–' इत्यादेरुत्तरमाह—

पुत्रेष्टिश्येनकारीरीमुखा दृष्टफला मखाः ।
न वः किं धर्मसंदेहमन्देहजयभानवः ॥ ९४ ॥

पुत्रेति ॥ भो नास्तिकाः, पुत्रप्राप्त्यर्थं विहितः पुत्रफलको यागः पुत्रेष्टिः, 'श्येनेनाभिचरन्यजेत्' इति वेदवाक्यविहितः श्येनसाधनकोऽभिचारफलको यागः श्येनः, तथा—'कारीरीं निर्वपेद्वृष्टिकामः' इति वंशाङ्कुरसाधनको वृष्टिफलको यागः कारीरीत्युच्यते, एते यागा मुखमादिर्येषां ते, तथा दृष्टं प्रत्यक्षानुभूयमानसुतसंभूतिवैरिमारणजलवर्षणादिरूपं फलं प्रयोजनं येषां ते मखा वो नास्तिकानां युष्माकं धर्मोऽस्ति नास्ति वेति धर्मसंबन्धी

---

१ 'ब्युषाभ्यां चतुरोऽच्' इति वार्तिकेन डचं बाधित्वाच्। २ 'भूतस्येति' सुखावबोधासंमतः पाठः ।

१ अत्र पाठः सर्वत्रोपलभ्यमानोपि 'तिष्ठ भोस्तिष्ठ–' (१६)श्लोकव्याख्यायोर्योर्व प्रमादात्पतित इति भाति ।

संदेहो वेदवाक्यविहितादृष्टफलकयागादिरूपो धर्मस्तत्संबन्धी वा, अदृष्टफलकयागादिविधायकवेदवाक्यान्येव वा धर्महेतुत्वाद्धर्मस्तत्संबन्धी वा यः प्रामाण्याप्रामाण्यसंदेह एव मन्देहाः संख्याद्वये सूर्यग्रासार्थमुत्पद्यमानाः षष्टिसहस्रा(धिका): सार्धास्तिस्रः कोट्यो राक्षसास्तेषां जये विनाशे भानवः सूर्यरूपा विनाशकाः किं न भवन्ति । एवं दृष्ट्वापि धर्मं न मन्यसे चित्रमित्यर्थः । किं न अपि तु भवन्त्येवेति वा । 'तिस्रः कोट्योऽर्धकोटी च मन्देहा नाम राक्षसाः । उदयन्तं सहस्रांशुमभियुध्यन्ति ते सदा । गायत्र्या चाभिमन्त्र्योर्ध्वं जलं ग्रिः संध्ययोः क्षिपेत् । तेन शाम्यन्ति ते दैत्या वज्रीभूतेन वारिणा' इत्यादिवचनप्रामाण्याद्गायत्र्याभिमन्त्रितजलप्रक्षेपेण तन्नाशपुरःसरमेव सूर्योदयात्सूर्य एव तान्विनाशयतीत्युच्यते । तथाच सूर्यो यथा तान्नाशयति, तथा मत्खैरपि भवदीयः संदेहो विनाश्य एवेति प्रामाणिकमेव सर्वं जानीहि ॥

दण्डताण्डवनैः कुर्वन्स्फुलिङ्गालिङ्गितं नभः ।
निर्ममेऽथ गिरामूर्मीर्भिन्नमर्मेव धर्मराट् ॥ ९५ ॥

दण्डेति ॥ अथाग्निवचनानन्तरं धर्मराट् यमः स्वायुधस्य दण्डस्य ताण्डवनैरितस्ततश्चालनैर्नभः स्फुलिङ्गालिङ्गितमग्निकणाकीर्णं कुर्वन्रचयन् चार्वाकवाक्शरैर्भिन्नमर्मेव विदारितजीवस्थान इवासहमानो गिरामूर्मीर्वाक्यपरम्परा निर्ममे ऊच इत्यर्थः । ऊर्मिपदेन वाचामप्रतिहतप्रसरत्वं सूचितम् । 'ऊर्मिर्वा स्त्रियाम्' इति स्त्रीलिङ्गोऽपि ॥

तदेवाह—

तिष्ठ भोस्तिष्ठ कण्ठोष्ठं कुण्ठयामि हठादयम् ।
अपष्ठु पठतः पाठ्यमधिगोष्ठि शठस्य ते ॥ ९६ ॥

तिष्ठेति ॥ भो नास्तिक तिष्ठ तिष्ठ क्षणं सहस्व सहस्व । धर्मदूषणाद्विरम विरमेति वा अयमहमधिगोष्ठि गोष्ठ्यामिन्द्रादिसभायामपष्ठु प्रतिकूलं पाठ्यं पठनार्हं वचनं पठतो भाषमाणस्य शठस्य वाक्छलमात्रनिष्ठस्य नास्तिकाधमस्य ते तव कण्ठोष्ठं कण्ठनालमोष्ठौ च हठाद्बलात्कारेणेदानीमेव कुण्ठयामि वर्णोच्चारणाशक्तं करोमि । दण्डेन चूर्णयामीत्यर्थः । सर्वाणि विशेषणानि दण्ड्यत्वज्ञापने हेतवः । अथच—एवंविधस्य तेऽधिगोष्ठि कथामधिकृत्य वाचोयुक्तौ कण्ठोष्ठं कुण्ठयामि युक्त्या प्रतिहतत्वाद्वक्तुमसमर्थं करोमि । सर्वमपि भवच्छास्त्रं दूषयिष्यामीत्यर्थः । वाग्व्यापारं प्रति कण्ठोष्ठस्यैव दण्डो युक्तः । अयमिति क्रोधाहंकाराविष्कारः । तिष्ठतिष्ठेति क्रोधातिशयद्योतनार्था पुनरुक्तिः । कण्ठोष्ठं प्राप्यङ्गत्वादेकवत् । कुण्ठयामि, वर्तमानसामीप्ये भविष्यति लट् ॥

इदानीं श्लोकत्रयेण परलोकं धर्मं च साधयन् 'को हि वेद–' 'तर्काप्रतिष्ठया–' इत्यादेरुत्तरमाह—

वेदैस्तद्वेषिभिस्तद्वत्स्थिरं मतशतैः कृतम् ।
परं कस्ते परं वाचा लोकं लोकायत त्यजेत् ॥ ९७ ॥

वेदैरिति ॥ चतुर्भिर्ऋग्वेदादिवेदैर्यथा स्थिरीकृतम्, तद्वत्तस्य वेदस्य वेषश्छाया तद्युक्तैस्तदंशोपजीविभिर्वेदानुसारिभिर्मतानां शतैः स्मृतिपुराणादिभिर्वादिप्रतिवादिभेदैर्मीमांसाशास्त्रैश्च तथा स्थिरं कृतं निश्चयेन व्यवस्थापितं परं श्रेष्ठम्, अन्यं च स्वर्गादिलक्षणं लोकं हे लोकायत नास्तिकाधम । परं केवलं ते वाचा निर्युक्तिकेन वचनमात्रेण कोपि विद्वांस्त्यजेत् । अपि तु—न कोपि । किं तु सर्वैरपि तद्युक्तिभिः परलोकः स्वीकृत एवेत्यर्थः । तदस्तित्वसंदेहापादिनी 'को हि वेद–' इत्यादिश्रुतिस्त्वन्यपरेति भावः ॥

समज्ञानाल्पभूयिष्ठपान्थवैमत्यमेत्य यम् ।
लोके प्रयासि पन्थानं परलोके न तं कुतः ॥ ९८ ॥

समेति ॥ एकस्मिन्मार्गादावर्थे समज्ञानास्तुल्यमतयोऽल्पेऽल्पसंख्या भूयिष्ठा बहुतरसंख्याश्च पान्थास्तेषां वैमत्यं मार्गान्यत्वविरोधमेत्य प्राप्य ज्ञात्वा वा इह लोके यं पन्थानं त्वमेव प्रयासि परलोकेऽपि विषये तमेव तादृशमेव मार्गं कुतो हेतोर्न गच्छसीति प्रश्नः । अपि तु तमेव गच्छेत्युपदेशो वा । यथा केनचित् 'वामो दक्षिणो वा काशीमार्गः' इति मध्येमार्गे पथिकेषु केषुचित्पृष्टेषु पञ्चपर्वाममार्गे कथिते सति, पञ्चाशद्भिर्दक्षिणमार्गे कथिते द्वेधे 'बहूनां वचनं ग्राह्यम्' इत्यादिन्यायात्कुशलेन पञ्चाशदुक्तमार्गेणैव गम्यते । एवं परलोकेऽप्यल्पविमतिं निरस्य बहुनुगत एव मार्गः किमिति नाश्रीयत इत्यर्थः । परलोकमार्गश्च लक्षणया धर्मः, तं कथं न मन्यसे । अपितु तमेवाङ्गीकुरु । परलोकसत्तानिश्चयमपि गन्तव्यग्रामवत्कुर्विति भावः । 'तर्काप्रतिष्ठया–' इत्यस्याप्येतदुत्तरं ज्ञेयम् ॥

बहुसंमतिमेव दर्शयति—

स्वकन्यामन्यसात्कर्तुं विश्वानुमतिदश्वनः ।
लोके परत्र लोकस्य कस्य न स्यादृढं मनः ॥ ९९ ॥

स्वकन्यामिति ॥ स्वकन्यामात्मपुत्रीमन्यसात्कर्तुमन्यस्मै वरायाधीनां देयां कर्तुं विश्वेषां सर्वेषां श्रुतिस्मृतिपुराणादीनां लोकानां चानुमतिं दृष्टवतोऽनुभवतः, तथा कुर्वतश्च कस्य लोकस्य जनस्य परत्र लोके स्वर्गादौ मनो दृढं निःसंदेहं निश्चलं न स्यात् । अपितु सर्वस्यापि स्यादेव । न केवलमन्यस्यैव, किंतु चार्वाकस्य तवापीत्यर्थः । सर्वेऽपि परलोकबाधभिया स्वकन्यामन्यस्मै ददति । यदि परलोको नाभविष्यत्, तर्हि स्वपुत्रीमप्यन्यस्मै कथमदास्यत् । अयमाचारः सर्वेषां संमतः । स च त्वयाप्यन्यस्मै पुत्रीदानादङ्गीकृत एव । अन्यथा स्वपुत्र्याः स्वेनैव ग्रहणमापद्येत । तस्मादन्येषामनुमतिं गृहीत्वैव यथा कन्याऽन्यस्मै दीयते, तथा बहुसंमतिदर्शनात्परलोकमप्यङ्गीकुर्विति भावः । अन्यसात् 'देये त्रा च' इति सातिः दृश्येति पूर्ववत् ॥

श्लोकद्वयेन 'श्रुतिस्मृत्यर्थबोधेषु–' 'तर्काप्रतिष्ठया–' इत्यादेरुत्तरमाह—

कस्मिन्नपि मते सत्ये हताः सर्वमतत्यजः ।
तद्दृष्ट्या व्यर्थतामात्रमनर्थस्तु न धर्मजः ॥ १०० ॥

कस्मिन्निति ॥ धर्मपरलोकादिप्रतिपादनपराणां बहूनां मतानां मध्ये कस्मिंश्चित्कस्मिन्नपि मते सत्ये सत्यत्वेनाङ्गीकृते सति सर्वमतत्यजः सर्वमतत्यागिनः परस्परविरोधात्सर्वमतासत्यत्ववादिनो नास्तिका यूयं हता मारिताः । तत्रायमभिसंधिः—मतानामसत्यत्ववादिभिः किंचिन्मतं सत्यमङ्गीक्रियते न वा । चेदङ्गीक्रियते,

तर्हि कस्यापि कन्यादानादिप्रतिपादकस्यान्यमतस्य स्वीयमतस्यैव वासत्यत्वाङ्गीकारात् 'सर्वमप्रमाणम्' इति सर्वासत्यत्ववादिनो व्याघातापसिद्धान्ताभ्यां दूषिता एवेति वैदिकसिद्धान्तो निर्दोष इत्यायातं न वेति । पक्षे—नास्तिकमतस्याप्यसत्यत्वादसत्यभूतस्य दूषकत्वाभावान्निर्दोषो वैदिकः पक्षः सिद्ध एवेत्यपि नास्तिका दूषिताः । निर्दोषत्वेपि वैदिकपक्षानङ्गीकारे स्वपक्षोपि तैर्नाङ्गीकार्य इति ज्ञेयम् । एवंच तस्यैकस्य मतस्य दृष्ट्या सत्यताज्ञानेनोभयवादिसिद्धतया पुत्रेष्ट्यादौ पुत्रजन्मादिफलसिद्धौ सत्यां यत्र क्वचित्फलव्यभिचारः, तत्र कर्मणो वैकल्याद्व्यर्थतामात्रं वैयर्थ्यमात्रं फलसाधनत्वराहित्यमात्रम् । तु पुनः (अधर्मः) प्राचीनपुत्रवियोगादिरनर्थो दुःखराशिर्धर्मजो न पुत्रेष्ट्यादिधर्मजन्यो न भवति । विपरीतं तु धर्मेण न जन्यते, किंतु प्राचीनदुष्कर्मनिमित्तमेव । केवलं तु काकतालीयन्यायेन तस्य पुत्रेष्ट्यनन्तरभावित्वम् । नच तावतैव तत्कार्यत्वमनिव्याप्तेरित्यर्थं इत्यादि ज्ञातव्यम् । कस्मिन्नपि मातृगमनादिनिषेधे स्वकन्यादानादौ च विषये वैदिके मते सत्ये सति तस्मिन्नंशे सत्यत्वेऽङ्गीकृते सति सर्वमतमसंगतमिति वदन्तो नास्तिका हताः । मातृगमननिषेधादेरंशस्य भवद्भिरपि परिपालनादित्यर्थः । तथाच तदृष्ट्या कन्यादानमातृगमननिषेधरूपाणां सत्यानां विधिनिषेधांशानां दृष्टान्तेनान्यत्रांशे व्यर्थतामात्रं वचनमात्रेण व्यर्थमित्युच्यते । ननु धर्मजो वास्तवोऽनर्थः प्रयोजनाभावः । तदृष्टान्तेन व्यर्थतामात्रम्, अन्यत्राप्यर्थतैवेत्यलमतिप्रसङ्गेन ॥

उपसंहरति—

क्वापि सर्वैरवैमत्यात्पातित्यादन्यथा क्वचित् ।
स्थातव्यं श्रौत एव स्याद्धर्मे शेषेऽपि तत्कृतेः ॥१०१॥

क्वापीति ॥ सर्वैर्नास्तिकैरपि क्वापि कस्मिन्नप्यहिंसाकन्यादानादौ श्रौते वेदोक्त एव धर्मे स्थातव्यं वर्तितव्यम् । कुतः—अवैमत्यात् । सर्वेषामिति शेषः । श्रौतानां बौद्धमाध्यमिकादीनामपि संप्रतिपत्तेः । अहिंसादेस्तैरप्यनिषिद्धत्वाद्गृहीतत्वाच्चेत्यर्थः । स्थातव्यमेवेति वा । तथा—क्वचिद्वर्णाश्रमाधिकारविहितेऽन्यथाकरणे-निषिद्धाचरणे पातित्यदोषाद्विहिताकरणनिषिद्धाचरणप्रत्यवायभयादपि श्रौत एव धर्मे स्थातव्यम् । अन्यथा वैमत्येपि श्रौत एव क्वचित्कस्मिंश्चिद्धर्मे स्थातव्यम् । कुतः—पातित्यात । यत्र तु श्रौते धर्मे तेषां विप्रतिपत्तिस्तदनङ्गीकारेपि प्रत्यवायः स्यादित्यङ्गीकार्य एवेत्यर्थ इति वा । एवं शेषेपि नित्यनैमित्तिकाभ्यामतिरिक्ते काम्ये ज्योतिष्टोमादावपि स्थातव्यम् । कुतः—तत्कृतेस्तस्य वेदस्य कृतेः करणात् । वेदविहितत्वाविशेषादित्यर्थः । यद्वा—तत्कृतेर्वेदमूलत्वाच्छेषे स्मार्तेपि धर्मे स्थातव्यम्। सदाचारानुमितस्मृत्या श्रुतेरनुमानात्स्मार्तधर्मा अपि वेदमूला इति नेष्यङ्गीकर्तव्या इत्यर्थः । एतेन 'जनेन जानता-' इति 'एकस्य विश्वपापेन-' 'स्वं च ब्रह्म च-' इत्यादेः सर्वस्याप्युत्तरं दत्तम् । धातुवादादिकं प्रामाणिकमेव, असिद्धिस्तु साधनवैगुण्यादिति समर्थितमिति ज्ञेयम् । 'तत्कृते' इति पाठे हेतुगर्भविशेषणम् । तस्मान्न मतानामप्रामाण्यम् । श्रुतिस्मृत्योश्चैकमत्यमप्यविरुद्धमिति श्लोकद्वयतात्पर्यार्थः । अहिंसादयः स्मृत्युक्ताः सर्वसाधारणा धर्माः, तेषु क्वापि श्रौते च धर्मे स्थातव्यम् । पातित्यादित्युभयत्रापि हेतुः । सर्वेषामनुपमते विहिते चेन्न स्थीयते तर्हि 'विहितस्याननुष्ठानात्' इति स्मृतेः पातित्यम् । सर्वेषां विमते निषिद्धे चेत्स्थीयते तथापि 'निन्दितस्य च सेवनात्' इति स्मृतेः पातित्यमित्यर्थः । तथा च विहितानां केषांचिन्नवह्निरप्यनुष्ठानात्, निषिद्धानां केषांचिन्नवह्निरपि वर्जनात्तदृष्टान्तेनान्येष्वपि विधिनिषेधांशेषु तत्कृतेः श्रौतत्वाविशेषादेव हेतोः स्थातव्यम् । तेपि प्रामाणिकत्वेन स्वीकार्या इत्यादि ज्ञातव्यम् ॥

बभाण वरुणः क्रोधादरुणः करुणोज्झितम् ।
किं न प्रचण्डात्पाखण्डपाश पाशाद्बिभेषि नः॥१०२॥

बभाणेति ॥ क्रोधादरुणो रक्तकायकान्तिर्वरुणः करुणयोज्झितं वचो नितरां परुषं यथा तथा बभाण । हे पाखण्डपाश नास्तिकाधम, त्वं नोऽस्माकं प्रचण्डाद्दुःसहत्वाशाश्च बिभेषि किम् । कुत्सायां 'याप्ये पाशप्' इति पाशप्प्रत्ययः ॥

मानवाशक्यनिर्माणा कूर्माद्यङ्कबिला शिला ।
न श्रद्धापयते मुग्धास्तीर्थिकाध्वनि वः कथम् ॥१०३॥

मानवेति ॥ मानवैर्मनुष्यैरशक्यं निर्माणं यस्याः, तथा—कूर्मवराहनरसिंहादयोऽङ्काश्चिह्नानि येषामेवंविधं बिलं बिवरं यस्याः सा शिला गण्डकाख्यतीर्थविशेषसंभवा शालग्रामशिला भो मुग्धा मूर्खाः, तीर्थिकाध्वनि सेश्वरमार्गे वैदिकाध्वनि वा वो युष्मान्कथं न श्रद्धापयते आस्तिक्यं न प्रापयति । चित्रमेतत् । भवतां मूर्खत्वमित्यर्थः । मनुष्यैरशक्यरचनं सामयवर्ण्येन कार्यं शिलादि स्वनिर्माणशक्तिमिच्छामात्रेण कर्तारं मनुष्यादिलक्षणमीश्वरमाक्षिपति । 'विमतंसकर्तृकंकार्यत्वाद्घटवत्' इत्यनुमानात्पक्षधर्मतावलाद्विलक्षणे कर्तरीश्वरे सिद्धेऽपि कथमनास्थास इत्याशयः । एतेन 'देवश्चेदस्मि सर्वज्ञः-' इत्यादेरुत्तरं दत्तमिति ज्ञेयम् ॥

शतक्रतूरुजाद्याख्याविख्यातिर्नास्तिकाः कथम् ।
श्रुतिवृत्तान्तसंवादैर्न वश्चमदचीकरत् ॥ १०४ ॥

शतेति ॥ भो नास्तिकाः, शतक्रतुश्च श्रीविष्णोरूरुभ्यां जायत इत्यूरुजो वैश्यः स आदिराद्यो वा येषां ते ब्राह्मणादिवर्णाश्च तेषामाद्या शतक्रतुः, मुखजो बाहुज ऊरुज इत्यादीनि नामानि तेषां सर्वत्र विशेषेण ख्यातिः कर्त्री श्रुतिवृत्तान्तसंवादैर्वेदोक्तेतिहासैः करणैर्वो युष्मान्कथं न चमदचीकरच्चमत्कारं नाकारयत । अपि त्वाश्चर्यं भवतां तयोत्पाद्यम् । चमदित्यव्ययमाश्चर्यार्थे । 'शताश्वमेधक्रतुकारीन्द्रो भवति' इतीन्द्रस्यैव शतक्रतुत्वं वेदनोक्तम् । लोकेनापीन्द्र एव शतक्रतुत्वेन व्यवह्रियते ननु ब्रह्मादिरिति । तथा—'ब्राह्मणोऽस्य मुखमासीत्-' इत्यादिश्रुत्या ब्राह्मणक्षत्रियादीनां मुखजत्वबाहुजत्वाद्युक्तम् । लोकेनापि ब्रह्मक्षत्रादय एव मुखजत्वबाहुजत्वादिभिर्व्यवह्रियन्ते, ननु विपर्ययेणेति वेदोक्तेन सह लोकस्यानुभूयमानात्संवादादपि वेदे यथोक्तं तथैव लोको व्यवहरत्याश्चर्यमेतदित्याश्चर्यपूर्वं वेदप्रामाण्यं कथं न विश्वसिषीति, अपितु विश्वसनीयं तत्रेत्याशयः । ऊरुजपदं वृत्तानुरोधात्प्रायोजि । तथा च सर्वेपि वर्णाः संगृहीताः । विख्यातिः प्रयोजिका संवादैः प्रयोज्यैर्वा युष्माकं चमदाश्चर्यं कथं न कारयामासेति वा । शतक्रतुश्च ऊरुजोर्वशी च तदादिर्वह्निर्मनकेत्यादिराख्या येषां यासां च ब्रह्मादीनां

मेनकादीनां च तेषां प्रसिद्धिर्वेदवृत्तान्तसंवादैर्हेतुभिर्युष्माकं कथमाश्रयं नाङ्गीकरत्। लोकवेदप्रसिद्धानिन्द्रादीनुर्वश्याद्यप्सरसश्चैतान्सर्वान्प्रत्यक्षेणाग्रैव पश्यतेत्यर्थः। ततश्च वेदः, तन्मूलं परलोकादि च प्रामाणिकमेवेति भाव इति वा। प्रथमव्याख्याने व इति 'हक्रोः-' इत्यणौ कर्तुर्णौ कर्मत्वम्, चमदिति च कर्मान्तरम्, संवादैरिति करणे तृतीया। पक्षान्तरे तु तेनैव सूत्रेणाणौ कर्तुः कर्मत्वस्य वैकल्पिकत्वेन कर्मत्वाभावादनभिहिते कर्तरि संवादैरिति तृतीया, व इति षष्ठी ॥

तत्तज्जनकृतावेशान्गयाश्राद्धादियाचिनः।
भूताननुभवन्तोपि कथं श्रद्धत्थ न श्रुतीः ॥ १०५ ॥

तदिति ॥ तेषु तेषु जनेषु कृतावेशान्कृतसंचारान्, तथा—गयाश्राद्धादियाचिनो गयापिण्डदानादिपुण्ये याचतः प्राप्तप्रेतभावान्भूतान्प्राणिनोऽनुभवन्तोऽपि पश्यन्तोऽपि यूयं श्रुतीः कथं न श्रद्धत्थ सत्यत्वेन मन्यध्व इति। पौनरुक्त्यं न शङ्कनीयम्, भिन्नवक्तृत्वात्। एवमुत्तरत्रापि ज्ञेयम् ॥

नाभ्रमाद्यमं नीतानथ स्वतनुमागतान्।
संवादवादिनो जीवान्वीक्ष्य मा त्यजत श्रुतीः॥१०६॥

नाभेति ॥ नाभ्रमाद्यमदूतैर्यमं नीतान्प्रापितानथ मुक्त्वाप्रत्यावृत्य स्वतनुमागतान्प्राप्तान्संवादं 'चन्द्रः क्षयी-' इत्यादिवेदसंवादं वदन्त्येवंशीलाञ्जीवान्वीक्ष्य श्रुतीर्वेदान्मा त्यजताप्रामाणिकान्मा ब्रूत। एवं वेदप्रामाण्योपसंहारात्स्मृत्यादेरपि वेदमूलत्वात्तदुक्तसर्वधर्माणां प्रामाण्यं व्यवस्थापितम् ॥

संरम्भैर्जम्भजैत्रादेस्तभ्यमानाद्बलाद्बलन्।
मूर्धबद्धाञ्जलिर्देवानथैवं कश्चिदूचिवान् ॥ १०७ ॥

संरम्भैरिति ॥ अथ देववचनानन्तरं जम्भजैत्रः शक्र आदिर्यस्य इन्द्रानलादीनां संरम्भैर्भ्रूभङ्गाद्याकारविकारैर्भीतेन कलिना पुरश्चलितुं स्तभ्यमानान्निषिध्यमानानिन्द्रादिसंरम्भान्दृष्ट्वा भयात्तत्संमुखं पदमपि चलितुमशक्ताद्बलात्कलिसैन्याद्बलन्पृथग्भवन्किञ्चिद्वाष्टर्यमवलम्ब्य द्वित्राणि पदानि संमुखभागच्छन्दीनत्वद्योतनपुरःसरं शक्रादिनमस्कारार्थं मूर्ध्नि बद्धाञ्जलिः कश्चिदज्ञातनामा पापरूपत्वेनाज्ञातनामा वा चार्वाको देवानेवं वक्ष्यमाणप्रकारेण ऊचे ॥

नापराधी पराधीनो जनोऽयं नाकनायकाः।
कालस्याहं कलेर्बन्दी तच्चाटुचटुलाननः ॥ १०८ ॥

नेति ॥ हे नाकनायका इन्द्रादयः, अयं मल्लक्षणो जनोऽपराधी न यतः—पराधीनः। तदेवाह—कलेः कलिनाम्नः कालस्याहं बन्दी स्तुतिपाठकः। अत एव—तस्य चाटुनि प्रियवचनविषये चटुलं प्रियवादि वावदूकं वानना यस्यैवंभूतः। अथ च—कालस्य कृतान्तरूपस्य। बन्दिनो हि यमाश्रयन्ति तत्प्रियं वदन्ति, न च दण्डार्हाः तस्मादेतत्प्रियं वेदादिदूषणं मया कृतम्। यदि न करोमि तर्ह्ययं दण्डयिष्यतीति परप्रयुक्तत्वाज्जाई दण्ड्यः श्रीमन्निरिति ॥

इति तस्मिन्वदत्येव देवाः स्यन्दनमन्दिरम्।
कलिमाकलयांचक्रुर्द्वापरं चापरं पुरः ॥ १०९ ॥

इतीति ॥ देवास्तस्मिंश्चार्वाके इति पूर्वोक्तप्रकारेण वदति भाषमाणे सत्येव स्यन्दनमन्दिरं रथस्थं कलिम्, अपरं द्वितीयं द्वापरं च पुरोऽग्र आकलयांचक्रुर्ददृशुः ॥

संददर्शोन्नमद्ग्रीवः श्रीबहुत्वकृताद्भुतान्।
तत्तत्पापपरीतस्तान्नाकीयान्नारकीव सः ॥ ११० ॥

समिति ॥ तैस्तैः प्रसिद्धैर्ब्रह्महत्यादिभिर्मूर्तैः पापैः, तत्कारिभिः पुरुषैर्वा परीतः समन्ताद्व्याप्तः, तथा—उन्नमन्ती दर्शनार्थमूर्ध्वा ग्रीवा यस्यैवंभूतः स कलिः श्रीबहुत्वेन कायकान्तिबाहुल्येन संपद्बाहुल्येन वा कृताद्भुतान्कृताश्चर्यान्नाकीयान्स्वर्गहितान्स्वर्गभवान्वा तानिन्द्रादीन्संददर्श। क इव—नारकीव। यथा ब्रह्महत्यादिकारी आकण्ठं नरके मग्न ऊर्ध्वग्रीवो नरकस्थः पुरुष इव। पापकारित्वादहमेवंरूपः, पुण्यकृत्वाच्चैते दीप्तस्वरूपा इति ज्ञातवांश्च। नरकस्थोपि देवकायकान्तिदर्शनाज्जायमानसुखोऽनुष्ठितपापकृतपश्चात्तापः सुरानार्ततया पश्यतीत्युपमा। 'उन्नतग्रीवः' इत्यपि पाठः। नाकीयानिति हितार्थे 'तस्मै हितम्' इति, बृद्धत्वान्नवार्थे 'वृद्धाच्छः' इति वा छः। नारकी, नारकशब्दात् 'अत इनिः' ॥

गुरुरीढावलीढः प्रागभून्नमितमस्तकः।
स त्रिशङ्कुरिवाक्रान्ततेजसेव विडौजसः ॥ १११ ॥

गुर्विति ॥ प्राग्दर्शनात्पूर्वं इन्द्रादयः के नाम वराका इत्यादिरूपया गुर्व्या महत्या रीढयावज्ञयावलीढो व्याप्तस्तेषु कृतावज्ञोपि दर्शनानन्तरं विडौजस इन्द्रस्य तेजसा आक्रान्तः पराभूतस्तिरस्कृततेजस्कः सन् अवज्ञां त्यक्त्वा स कलिरनमन्नपि बलात्स्वेनैव शक्रतेजसैव वा नमितो नम्रीकृतो मस्तको यस्यैवंभूतोऽभूत्। इन्द्रादीन्नमश्चकारेत्यर्थः। क इव—त्रिशङ्कुनामा सूर्यवंश्यो नृप इव। स हि स्वयाजने प्रार्थितेन पुरोधसा वसिष्ठेन निरस्तो गुरोर्वसिष्ठस्यावज्ञया व्याप्तस्तस्मिन्कृतावज्ञः सन्नभिमानाद्विश्वामित्रेण सार्वकामिकं क्रतुं याजितस्तत्प्रभावात्सशरीर एव स्वर्गं गच्छन्निन्द्रेऽपि कृतावज्ञः संस्तत्तेजसा पराभूतः स्वर्गाद्भ्रंशित इत्येवं नमितमस्तकोऽभूदिति पुराणेतिहासः। 'रीढावमाननावज्ञा-' इत्यमरः ॥

विमुखान्द्रष्टुमप्येनं जनंगम इव द्विजान्।
एष मत्तः सहेलं तानुपेत्य समभाषत ॥ ११२ ॥

विमुखानिति ॥ मत्तः सगर्वोयं कलिः सहेलं सविलासमुपेत्य समीपमागत्य एवं तान्देवान्समभाषत। किंभूतान्—एनं कलिं द्रष्टुमपि न केवलं भाषितुं स्प्रष्टुं किंतु वीक्षितुमपि विमुखाननर्हान्सावज्ञान्। कः कानिव—मत्तो निरर्गलो मदिरामत्तो वा जनंगमश्चण्डालो द्विजानिव। किंभूतान्—एनं चण्डालं द्रष्टुमप्यनर्हान्। 'चण्डालपुक्कसमातङ्गदिवाकीर्तिजनंगमाः' इत्यमरः। 'गमश्च' इति खच्, खित्वान्मुम् ॥

स्वस्ति वास्तोष्पते तुभ्यं शिखिभस्ति न खिद्यता।
सखे काल सुखेनासि पाशहस्त मुदस्तव ॥ ११३ ॥

१ 'मूर्ध्नि इति क्वाचित्कः पाठः' इति सुखावबोधा।

स्वस्तीति ॥ हे वास्तोष्पते इन्द्र, ते तुभ्यं स्वस्ति क्षेममस्ति कच्चित् । तथा—हे शिखिन्नग्ने, तव खिन्नता चित्तक्लेशो नास्ति कच्चित् । हे सखे काल यम, सुखेनासि किम् । हे पाशहस्त वरुण, तव मुदः सन्ति कच्चित् । गृहमात्रस्याधिपत्यादसामर्थ्यं, वृथैव ज्वालाजटिलत्वम्, कुत्सितरूपत्वम्, आयुधधारणवैयर्थ्यं च संबुद्धिभिः सूचितम् । उत्तमानां कुशलप्रश्नस्तैः सह साम्यं, तेभ्योऽधिकत्वं सूचयति । इन्द्राय स्वस्तिप्रयोगः स्वामिभावं, ब्राह्मण्यं वा कलेर्द्योतयति । वर्णसाम्येन यमे सखिशब्दप्रयोगः । अयमेव च गर्वोऽवज्ञा चेति ज्ञेयम् । 'स्वस्त्याशीःक्षेमपुण्यादौ' इत्यमरः । 'वास्तोष्पतिगृहमेधाच्छ च' इति लिङ्गाद्वास्तोष्पतिशब्दः साधुः । तुभ्यमिति 'नमः स्वस्ति–' इति चतुर्थी । इतरत्र तवेति संबन्धनीयम् ॥

स्वयंवरमहे भैमीवरणाय त्वरामहे ।
तदस्मानुमन्यध्वमध्वने तत्र धाविने ॥ ११४ ॥

स्वयमिति ॥ हे देवाः, वयं स्वयंवररूपे मह उत्सवे भैमीवरणाय यस्मात्त्वरामहे सवेगाः स्मः तत्तस्मात्तत्र धाविने स्वयंवरस्थानं प्रति ऋजुगामिनेऽध्वनेस्माननुमन्यध्वमाज्ञापयत । त्वरावशादन्या गोष्ठी न क्रियते, आज्ञैव दीयतामित्यर्थः । अध्वने, तादर्थ्ये चतुर्थी ॥

तेऽवज्ञाय तमस्योच्चैरहंकारमकारणम् ।
ऊचिरेतिचिरेणैनं स्मित्वा दृष्टमुखा मिथः ॥ ११५ ॥

त इति ॥ ते देवाः पूर्वोक्तमकारणं निर्हेतुकमुच्चैरतिशायितमस्य कलेरहंकारं दर्पमवज्ञाय मिथोऽन्योन्यं दृष्टमुखाः सन्तः मूर्खोऽयं स्वयंवरवार्तां करोतीति स्मित्वा हास्यं कृत्वातिचिरेण पापीयसानेन सह कथं वा वक्तव्यमिति बुद्ध्या भूयांसं कालं विलम्ब्य एनं कलिं प्रत्यूचिरे वक्ष्यमाणं बभाषिरे ॥

पुनर्वक्ष्यसि मामैवं कथमुद्वक्ष्यसे तु सः ।
सृष्टवान्परमेष्ठी यं नैष्ठिकब्रह्मचारिणम् ॥ ११६ ॥

पुनरिति ॥ हे कले, त्वं स्वयंवरार्थं गमिष्यामीत्येकवारमज्ञानाद्यदुक्तम्, तदिदमतः परं पुनर्मा मा एवं वक्ष्यसि मा मा वोचः । यस्मात्परमेष्ठी यं त्वामामरणं गुरुकुलनिवासिनं नैष्ठिकब्रह्मचारिणं सृष्टवान् । स तु पुनस्त्वं कथमुद्वक्ष्यसे परिणेष्यसि । कृतयुगादयो निष्कलत्रा एव सृष्टाः । तस्मात्तव स्वयंवरवार्तानुचिता, अवकीर्णित्वापातात् । तस्मादेवं पुनर्मा स्म वोच इत्यर्थः । पापरूपं प्रत्युपहासवचनमेतत् । माशब्दस्य निरनुबन्धकत्वाद्वक्ष्यसीति वचेर्लृट् । मामेति निषेधातिशयार्थं वीप्सायां द्विरुक्तिः ॥ परमे स्थाने तिष्ठतीति 'परमे स्थः कित्' इतीनिः, स च कित्, तत आलोपः । 'अम्बाम्ब–'इति सूत्रेण षत्वम् । तत्रैव 'परमेबर्हिर्'–इति निपातनादेदन्तत्वम् । 'नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसंनिधौ । तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ॥' इति स्मृतेः ॥

द्रोहिणं द्रुहिणो वेत्तु त्वामाकर्ण्यावकीर्णिनम् ।
त्वज्जनैरपि वा धातुः सेतुर्लङ्घ्यस्त्वया न किम् ॥ ११७ ॥

द्रोहिणामिति ॥ द्रुहिणो ब्रह्मा त्वामवकीर्णिनं क्षतव्रतमाकर्ण्य निजाज्ञाभङ्गाद्द्रोहिणं गुरुद्रोहकारिणं वेत्तु । एवं त्वया कृते ब्रह्मा एवं ज्ञास्यतीति यावत् । वाथवा तेन ज्ञातेपि तव किं भयमिति सोपहासमाह—त्वज्जनैस्त्वदुपजीविभिः कामक्रोधादिभिरपि धातुः सेतुर्ब्रह्मकृता धर्ममर्यादा लङ्घ्यः । त्वया (पुनः) किं न लङ्घ्यः । त्वदीयाः सेवका अपि ब्रह्माज्ञां लङ्घयन्ति, त्वं लङ्घयसीति किमाश्चर्यमित्यर्थः । यद्वा—त्वज्जनैरपि सेतुर्न लङ्घ्यः, त्वया न लङ्घ्य इति किं वाच्यम्, तदाज्ञालङ्घनमनौचित्यान्न कार्यमित्यर्थ इति काक्वा । 'धाताब्जयोनिर्द्रुहिणः–' इत्यमरः । द्रुह्यत्यसुरेभ्यः । औणादिकः किनः ॥

स्वयंवरं प्रत्यगमने हेत्वन्तरमपि ब्रुवते—

अतिवृत्तः स वृत्तान्तस्त्रिजगद्युवगर्वनुत् ।
आगच्छतामपादानं स स्वयंवर एव नः ॥ ११८ ॥

अतीति ॥ एकं विना सर्वपरित्यागस्त्रिजगत्सु वर्तमानानां तरुणानां सौन्दर्यादिविषयं गर्वं नुदति नुत नाशकः स वृत्तान्तो भैमीस्वयंवरोऽतिवृत्तोऽतिक्रान्तः संजात इत्यर्थः । भवद्भिः कथं ज्ञातमित्यत आहुः—स स्वयंवर एवागच्छतां नोऽस्माकमपादानं निश्चलोऽवधिभूतोर्थ इत्यर्थः । वयमपि तत्र गतास्तत एवागच्छाम इति सर्वोपि वृत्तान्तोऽस्माभिर्ज्ञायत इत्यतोपि त्वया न तत्र गन्तव्यमिति भावः । विश्लेषे चञ्चलं स्थिरं वा यदुदासीनं तदपादानमिति वैयाकरणाः ॥

कथं यूनां गर्वनोदः, को वा तया वृत इत्याशङ्कायामाहुः—

नागेषु सानुरागेषु पश्यत्सु दिविषत्सु च ।
भूमिपालं नरं भैमी वरं साववरद्वरम् ॥ ११९ ॥

नागेष्विति ॥ नागेषु वासुकिप्रभृतिषु सानुरागेष्वस्मदादिषु दिविषत्सु देवेषु च पश्यत्सु सानुरागां भैमीं स्वीयार्तिद्योतनपूर्वं विलोकयत्सु सत्सु । अथवा—अस्मदन्येषु देवेषु सानुरागेष्वस्मदादिषु कौतुकवशादेव पश्यत्सु । तान्सर्वाननादृत्य सा भैमी नागाद्यपेक्षया वरं सर्वगुणाश्रयत्वाच्छ्रेष्ठं भूमिपालं सार्वभौमं नरं नृवरं वरं परिणेतारमववरद्वरयामास । सर्वानादरेण नलवरणात्सर्वेषां सौन्दर्यादिदर्पो गत इत्यर्थः । पश्यत्सु दिविषत्स्वित्यनेनास्माभिः कौतुकार्थं वरदानार्थमेव च गतम्, न तु तद्वरणार्थमिति च व्याख्यान्तरेण सूचितमिति ज्ञेयम् । नागेष्वित्यादौ 'षष्ठी चानादरे' इति सप्तमी । अववरत्, 'वर ईप्सायाम्' इति चुरादावदन्तपाठात्स्वार्थणिजन्ताद्वरयतेश्चङ्यग्लोपित्वात्सन्वद्भावाभावादित्वदीर्घत्वाभावः ॥

किमिति ते परित्यक्ता इत्याशङ्कायां कारणमाहुः—

भुजगेशानसद्वेशान्वानरानितरान्नरान् ।
अमरान्पामरान्भैमी नलं वेद गुणोज्ज्वलम् ॥ १२० ॥

---

१ 'त्वया तु किम्' इति पाठे 'त्वया पुनर्लङ्घ्य इति किं वाच्यम्' इति सुखावबोधा । २ 'अपाये यदुदासीनं चलं वा यदि वाचलम् । ध्रुवमेवातदावशात्तदपादानमुच्यते ।' इति हयुक्तेः

भुजगेशानिति॥ भैमी भुजगेशान्वासुकिप्रमुखान्फणागणजिह्वालालनादिवैरूप्यादसद्वेशानमनोहराकारान्वेद जानाति । तथा-इतरान्नलादन्यान्नरान्मनुजाधीशांश्चापल्यनिर्गुणत्वाभ्यां वानरान्वेद। तथा-अमरानचतुरत्वात्पामरान्नीचान्वेद। केवलं नलमेव गुणोज्ज्वलं श्रुतधीर्यौदार्यसौन्दर्यादिभिः प्रकाशमानं वेद । सर्वगुणाकरत्वान्नल एव तया वृतोऽन्ये तु परित्यक्ता इत्यर्थः । 'विवर्णः पामरो नीचः' इत्यमरः । वेदेतीदानीमपि तथैव प्रतीतेः सत्त्वाद्वर्तमानता, विभक्तिप्रतिरूपको निपातो वा । तथा चाज्ञासीदित्यर्थः ॥

इति श्रुत्वा स रोषान्धः परमश्वरमं युगम् ।
जगन्नाशनिशारुद्रमुद्रस्तानुक्तवानदः ॥ १२१ ॥

इतीति॥ चरममन्त्यं युगं स कलिः इतीन्द्रादिवचनं श्रुत्वा परमोऽत्युत्कृष्टो रोषान्धो रोषान्नितरां निर्विचारतया पुरःस्थमपि वस्त्वजानन्, अत एव—जगन्नाशसंबन्धिनी निशा । यस्यां निशि जगन्नाशो भवतीति यावत् । तत्संबन्धी प्रलयकाले सकलभूतग्रासलालसा-संपन्नो रुद्रस्तद्वन्मुद्रा आकारो यस्य । क्रोधवशान्नितरां विकृताकार इति यावत् । एवंभूतः संस्तान्सुरानदो वक्ष्यमाणमुक्तवान् ॥

'पुनर्वक्ष्यसि मा मैवम्' इत्यादेरुत्तरमाह—

कयापि क्रीडतु ब्रह्मा दिव्याः स्त्रीर्दीव्यत स्वयम् ।
कलिस्तु चरतु ब्रह्म यैतु वातिप्रियाय वः ॥ १२२ ॥

कयेति॥ हे देवाः, ब्रह्मा कयाप्यतिसुन्दर्या गायत्र्यादिपदवाच्यया । अज्ञातनामजातिगोत्रया वा । अथ च-अगम्यत्वाद्यस्या नामकथनेप्यस्माकं लज्जा भवति तया सुतया । सह सुखेन क्रीडतु । तथा—यूयं स्वयमात्मना दिव्याः स्त्रीः स्वर्गभवाः रम्भादीः। अहल्यामुख्या वा । रमणीर्दीव्यत स्वेच्छया ताभिः सह सुरतक्रीडां कुरुत । 'प्रजापतिः स्वां दुहितरमभ्यधावत्' इति श्रुत्या ब्रह्मणः स्वाच्छन्द्याद्भवतां सुतरां स्वाच्छन्द्यमिति स्वयमित्यनेनोक्तम् । कलिस्तु पुनर्ब्रह्मचर्याख्यं व्रतं यावज्जीवं चरतु । वा अथवा जीवन्कलिरस्मानुपहसिष्यतीत्यनेन न जीवितव्यमिति वो युष्माकमतिप्रियाय नितरां तुष्टयै प्रैतु म्रियताम् । स्वयं सर्वैः स्वेच्छाचारः क्रियते, मया तु स्वेच्छाचारो न कर्तव्यः, मर्तव्यमेवेति कीदृशीयं भवतां परप्रद्वेषरीतिरिति लोकरीत्योपहासः । अथ च—यूयं ब्रह्मादयः सर्वेपि स्वेच्छाचारिणः स्वाच्छन्द्यं कुरुत नाम, कलिस्तु न तादृगिति ब्रह्मैव चतुरः, युष्माकमप्यतिप्रियाय भैमीलक्षणाय वस्तुने म्रियताम् । भवद्भिस्वेच्छाचारं न करोमि किं तु भैमीप्राप्तये प्रवृत्तस्य मम मरणं चेत्स्यात्, तदप्यस्विति भावः । अत्राप्युपहास एव तात्पर्यम् । क्रीडार्थत्वेति (पि) 'दिवः कर्म च' इति करणस्यापि कर्मत्वात्स्त्रीभिरित्यर्थे द्वितीया ॥

उपहासमेव प्रकटयति—

चर्यैव कतमेयं वः परस्मै धर्मदेशिनाम् ।
स्वयं तत्कुर्वतां सर्वं श्रोतुं यद्भिभितः श्रुती ॥ १२३ ॥

चर्येति॥ हे देवाः, परस्मा अन्यस्मै जनाय 'स्वसुतादिगमनं न कार्यम्' इति धर्मदेशिनां धर्ममुपदिशतां स्वयं तद्ब्रह्महत्या-स्वसुतादिगमनं सर्वं निषिद्धं कर्म कुर्वतां वो युष्माकमियं कतमैव कैव चर्या आचाररीतिः अपि तु न कापीत्याक्षेपः। अचेतने अपि श्रुती कर्णौ यद्भवदीयमहल्यादिगमनं कर्म श्रोतुं बिभितः त्रस्यतः स्वेच्छाचारिणां भवतां परपीडायामेव तात्पर्यमिति भावः । चर्या भावे 'गदमद-' इति यत् ॥

तत्र स्वयंवरेऽलम्भि भुवः श्रीर्नैषधेन सा ।
जगतो ह्रीस्तु युष्माभिर्लाभस्तुल्याभ एव वः ॥१२४॥

तत्रेति॥ तत्र स्वयंवरे नैषधेन भुवः श्रीः सौन्दर्यातिशयाद्भूलक्ष्मीः सा भैमी अलम्भि प्राप्ता । युष्माभिस्तु पुनर्जगतो हीस्त्रैलोक्ये यावती वर्तते सा लज्जा, जगतः सकाशाद्वा, भैम्यनादृतत्वाद्या लज्जा सा लब्धा । इति वो नलस्य युष्माकं च लाभोऽपूर्ववस्तुप्राप्तिस्तुल्य एवाभासते तुल्याभ एव । शकारहकारमात्रवैरूप्यमितरत्तुल्यमेवेति । भवद्भिर्लज्जैव लब्धा, ननु भैमीति रूपदर्पो वृथैवेति भावः । अयं च यूयं च यूयं तेषां वः । एकशेषः ॥

दूरान्नः प्रेक्ष्य यौष्माकी युक्तेयं वक्रवक्रणा ।
लज्जयैवासमर्थानां मुखमास्माकमीक्षितुम् ॥ १२५ ॥

दूरादिति॥ आगच्छतो नोऽस्मान्दूरादूरत एव प्रेक्ष्य यौष्माकीयं वक्रवक्रणा मुखकौटिल्यकरणं युक्तैव । किंभूतानां युष्माकम्—[गुणीभूतस्य विग्रहान्तर्गतस्य युष्मच्छब्दस्य विशेषणम्] यतो भैम्यवृतत्वात्संजातया लज्जयैव हेतुना आस्माकं मुखमीक्षितुमसमर्थानाम् । लज्जाशीलो ह्यन्यं दूरादेव दृष्ट्वा लज्जया मुखं न दर्शयति । तस्मात्सलज्जा भवन्त इति । युक्तमेवैतदिति भावः । अयमप्युपहासः । 'लज्जयेव' इति पाठे उत्प्रेक्षा । प्रेक्ष्येति वक्रणापेक्षया समानकर्तृकत्वम् । यौष्माकीति 'तस्मिन्नणि च-' इति युष्माकादेशः । 'युष्माकम्' इति पाठः साधुः । एवमेवास्माकमित्यत्रापि द्रष्टव्यम् । वक्रणेति नामधातोर्युच् ॥

स्थितं भवद्भिः पश्यद्भिः कथं भोस्तदसांप्रतम् ।
निर्दग्धा दुर्विदग्धा किं सा दृशा न ज्वलत्क्रुधा १२६

स्थितमिति॥ हे देवाः, तन्नलवरणं पश्यद्भिर्भवद्भिः कथं स्थितम् । औदासीन्येनेति शेषः । असांप्रतम् । अनुचितमेतदित्यर्थः । दुर्विदग्धा भवदवज्ञानादचतुराचारा सा भैमी ज्वलन्ती देदीप्यमाना क्रुत्क्रोधो यस्यां तया दृशा कृत्वा किमर्थं न निर्दग्धा सुतरां न भस्मसात्कृता । अपि तु तादृक्सामर्थ्यसद्भावे तस्याश्च सापराधत्वे दग्धुमुचितम्, तदपि न कृतमित्येतदप्युचितमेवेत्यर्थः । 'युक्ते द्वे सांप्रतं स्थानं' इत्यमरः । भोरिति प्रत्येकं संबुद्धिः ॥

महावंशाननादृत्य महान्तमभिलाषुका ।
स्वीचकार कथंकारमहो सा तरलं नलम् ॥ १२७ ॥

महेति॥ कुलशीलादिना महान्तमत्युत्कृष्टं नलं (वरं) अभिलाषुका सा भैमी कश्यपसुतत्वान्महावंशान्दिव्यवस्त्रादिभूषितान्यु-

---

१ 'परमम्' इति तु युक्तः पाठः । तत्र परमं रोषान्ध इति योज्यम् । इति सुखावबोधा ।

१ अलम्भि लब्धा । लभेर्ण्यन्तात्कर्मणि लुङि 'विभाषा निष्णमुलोः' इति विकल्पानुमागमः' इति मल्लिनाथस्तु भ्रान्तः ।

ष्मान्परित्यज्य तरलं चलस्वभावमनिश्चितबुद्धिं नलं कथंकारं कथमेव स्वीचकार । अहो आश्चर्यम् । महान्तं कामयमानया देवपरित्यागेन मनुष्यवरणान्महच्चित्रमित्यर्थः । अथ च—या महापरिमाणं वाञ्छति सातिविशालान्दृढान्वेणून्परित्यज्य तरङ्गस्पर्शमात्रेणापि चञ्चलं ह्रस्वं नलाख्यं तृणमङ्गीकरोतीति चित्रमेव । अत एव सा किं न भवद्भिर्दग्धेति भावः । अभिलाषुका, 'लषपत-' इत्युकञ् । महान्तमिति, 'न लोका-' इति षष्ठीनिषेधाद्द्वितीया । कथंकारं पूर्ववत् ॥

इदानीं नलः कथं सोढ इत्याह—

भवादृशैर्दिशामीशैर्मृग्यमाणां मृगेक्षणाम् ।
स्वीकुर्वाणः कथं सोढः कृतरीढस्तृणं नलः ॥१२८॥

भवादृशैरिति ॥ भो देवाः, दिशामीशैर्महासमृद्धिभिर्भवादृशैर्मृग्यमाणां काम्यमानां मृगेक्षणां भैमीं स्वीकुर्वाणः समुद्वहन्, अत एव भवत्सु कृतरीढः कृतावज्ञः, तृणतुल्योऽतिनिःसारः, अथ च—नलशब्दवाच्यत्वात्तृणभूतः, स नलो भवद्भिः कथं केन प्रकारेण सोढः क्षान्तः । सा भवद्भिरभिलाषिता तया भवन्तोऽनादृता इत्युपहासः । मृगेक्षणां, 'न लोका-' इति षष्ठीनिषेधः । सोढः, 'तीषसह-' इतीड्विकल्पाद् 'यस्य विभाषा' इति निष्ठाया नेट् ॥

दारुणः कूटमाश्रित्य शिखी साक्षीभवन्नपि ।
नावहत्किं तदुद्वाहे कूटसाक्षिक्रियामयम् ॥१२९॥

दारुण इति ॥ अयं शिखी वह्निर्दारुणः कूटं काष्ठराशिमाश्रित्याग्निसाक्षिके विवाहे साक्षीभवन्नपि तत्र प्रकाशमानोपि तयोर्भैमीनलयोः तस्य, तस्या वा, उद्वाहे विवाहे विषये कूटसाक्षिणोऽलीकसाक्षिणः क्रियां सत्यापलापलक्षणां किं नावहत् । अपितु—एतदप्यनुचितं कृतम् । कूटसाक्षी तु परकीयं वस्त्वन्यस्मै दापयति । तदनेन प्रायशस्तत्र न स्थितमित्यग्निसाक्षिको विवाह एव न भवतीति । भैमी नलेन नोढेति भैमी नलादन्यस्मै भवत्स्वेव मध्ये कस्मैचित्किमिति न दापितेत्यर्थः । अथ च—दारुणः । पापकारित्वादतिक्रूरः पुरुषः कपटमाश्रित्य व्यवहारे साक्षीभवन्नपि तस्य चित्ते धृतस्य कार्यस्योद्वाहे निर्वाहे कूटसाक्षित्वं धत्ते । अत्र तु नेत्याश्चर्यम् ॥

अहो महःसहायानां संभूता भवतामपि ।
क्षमैवास्मै कलङ्काय देवस्येवामृतद्युतेः ॥ १३० ॥

अहो इति ॥ भो देवाः, महःसहायानां तेजस्विनां दिव्यमूर्तीनां भवतामपि क्षमैवास्मै कलङ्काय इन्द्रादिषु सत्स्वपि भैमी नलं वृतवतीत्ययशसे । अथ च—नलकृतानादररूपाय । अथ च—लज्जावशादन्यवदनवीक्षणाशक्तिमुखमालिन्यरूपाय कलङ्काय संभूता । अहो महदाश्चर्यम् । गुणभूता क्षमा दोषाय जातेत्यर्थः । महःसहायस्य तेजस्विनोऽमृतपतेर्देवस्य दीप्यमानस्य चन्द्रस्येव । यथा चन्द्रस्य क्षमा भूमिः कलङ्काय जाता । भवतामपीत्यपिशब्देन यत्र कलङ्कशङ्कापि नास्तीति सूचितम् । 'भूश्चन्द्रकलङ्कः' इति ज्योतिर्विदः । महःसहायानामपीति वा । चन्द्रस्य यथा तथा भवतामपीति समुच्चयार्थो वा । क्षमां परित्यज्य भवद्भिरन्यतरस्य चेद्दण्डोऽकरिष्यत तर्ह्ययशो नाभविष्यदिति भावः ॥

सा वव्रे यं तमुत्सृज्य मह्यमीर्ष्याजुषः स्थ किम् ।
ब्रूतागः सद्मनस्तस्माच्छद्मनाद्याच्छिनद्मि ताम् १३१

सेति ॥ हे देवाः, सा भैमी यं वव्रे तं नलमुत्सृज्य यूयं मह्यं कलये किमितीर्ष्याजुषोऽक्षान्तिपराः स्थ भवथ । अपराधिनस्तस्यापकर्तुमशक्ताः सन्तोऽनपराधाय मह्यं किमितीर्ष्यायुक्ताः स्थेत्युपहासः, तस्माद्यूयं ब्रूत कथयत—अहं तस्मान्नलात्सकाशाच्छद्मना कपटेन कथमपि वञ्चयित्वा तामाच्छिनद्मि आहरामि । यतः—आगसो भवदनादररूपापराधस्य सद्माश्रयभूतः, तस्मादविलम्बेनैव तामाहरामि । गच्छेति मामनुमन्यध्वमित्यर्थः अन्येनापराधे कृतेऽन्यस्मै द्रुह्यत इति युक्तमिति लोकरीत्योपहासः । ब्रूत नो युष्माकमस्माकं चागःसद्मानादरणादपराधिनीं तां नलादानयामीति वा । मह्यं, 'क्रुधद्रुह-' इति चतुर्थी । आच्छिनद्मि, वर्तमानसामीप्ये लट् ॥

यतध्वं सहकर्तुं मां पाञ्चाली पाण्डवैरिव ।
सापि पञ्चभिरस्माभिः संविभज्यैव भुज्यताम् १३२

यतध्वमिति ॥ यूयं मां सहकर्तुं यतध्वं यत्नं कुरुत । भैमीमानेतुमहं गच्छामि, यूयं मम सहायार्थमागच्छतेत्यर्थः । तव साहाय्यकेऽस्माकं किं फलमित्यत आह—अस्माभिरिन्द्राग्नियमवरुणैर्मया सह पञ्चभिः सा भैम्यपि संविभज्य संभोगकालं समानभागमेव कृत्वैवोपभुज्यताम् । तथा च भवतामपि फलमस्तीति भावः । कैः केव—पञ्चभिः पाण्डवैः पाञ्चाली द्रौपदीव । पाञ्चालीदृष्टान्तेनैकस्याः पतिव्रताया बहुभिरुपभोगो न दृष्टचर इत्यलौकिकत्वं परिहृतम् । पाण्डवानामग्रभावित्वात्तदानीं दृष्टान्तत्वेन कलेर्योगित्वाद्भविष्यदर्थज्ञानसामर्थ्याद्वचनं युक्तम् । जगत्प्रवाहानादितया पाण्डवपाञ्चालीवृत्तान्तानामतीतत्वात्तदुदाहरणीकृत्य तदुक्तमिति वा । पाञ्चाली । जनपदवाचिनः क्षत्रियाभिधायिनः पाञ्चालशब्दात् 'जनपदशब्दात्-' इत्यपत्येऽञ् ॥

अथापरिवृढा सोढुं मूर्खतां मुखरस्य ताम् ।
चक्रे गिरा शराघातं भारती सारतीव्रया ॥ १३३ ॥

अथेति ॥ अथ पूर्वोक्तकलिवचनाकर्णनानन्तरं तामुक्तप्रकारां मुखरस्यानुचितभाषणशीलस्य कलेर्मूर्खतां सोढुं क्षन्तुमपरिवृढाऽसमर्था भारती सरस्वती अर्थगाम्भीर्यात्सारया श्रेष्ठया, परुषत्वाच्च तीव्रया दुःसहया गिरा कलेः शराघातं बाणव्यधमिव चक्रे । बाणवत्पीडाकरं परुषं वचनमूच इत्यर्थः । 'भारतीव्रया' इति पाठे—अर्थगाम्भीर्येण दुःसहया ॥

कीर्तिं भैमीं वरं चास्मै दातुमेवागमन्नमी ।
न लीढे धीरवैदग्धीं धीरगम्भीरगाहिनी ॥ १३४ ॥

---

१ 'शतेषु षट्सु सार्धेषु त्र्यधिकेषु च भूतले । कलगतेषु वर्षेषु प्राभवन् कुरुपाण्डवाः ॥' इति राजतरङ्गिणीतः पाण्डवानां कल्यन्तगतत्वेनेति बोध्यम् । २ 'नालीढ' इत्यपि पाठः—' इति सुखावबोधा । ३ 'गाहिनीम्' इति पाठे 'विरुद्धलक्षणया धीरे संबोध्य गम्भीरार्थस्य गाहिनीं धीरवैदग्धीं न लीढे इति व्याख्येयम्' इति सुखावबोधा ।

कीर्तिमिति ॥ हे कले, अमी देवा अस्मै नलाय भैमीं दातुमेव, तथा—भैमीं कामयमानोपीन्द्राद्यर्थं भैम्या एव दूत्यं कृतवान्, एवंविधोऽतिधीरः कोपि नास्तीति कीर्तिं यशः, तथा—भैमीं च प्रत्यक्षलभ्याम्, तथा—उक्तप्रकारान्वरांश्च अस्मै नलाय दातुमेवागमन्स्वयंवरं गतवन्तः। ननु भैमीं वरीतुमिति त्वं नो वेत्सीति शेषः। देवा हि केनापि प्रकारेण परीक्ष्य परितुष्टाः सन्तो वरं ददते। कुतोऽहं न वेद्मीत्यत आह—यस्मादगम्भीरस्योत्तानस्यार्थस्य गाहिनी स्पर्शिनी गम्भीरार्थग्राहिणी न भवतीत्यर्थः। एवंभूता मूढानां बुद्धिर्धीराणां महाशयानां वैदग्धीं चातुरीं न लीढे न वेत्तीत्यर्थः। त्वं तु मूर्खत्वादेतेषामभिप्रायमज्ञात्वोपहसितवानिति भावः। अधीरेत्यकारप्रश्लेषेण संबोध्य, अगम्भीरगाहिनी ते धीः वैदग्धीम्। अर्थादेतेषां न लीढ इति वा। हे अधीर्बुद्धिरहित मन्दबुद्धे कले, अगम्भीरगाहिनी ते धीरवैदग्धीमचातुर्यं नास्वादयति। अपि तु प्राप्नोत्येवेति काक्वा वा व्याख्येयम्। लीढे, लिहेः स्वरितेत्वात्सङ्। क्वचित् 'लेढि' इति पाठः ॥

वाग्मिनीं जडजिह्वस्तां प्रतिवक्तुमशक्तिमान्।
लीलावहेलितां कृत्वा देवानेवावदत्कलिः ॥ १३५ ॥

वाग्मिनीमिति ॥ कलिर्वाग्मिनीं वाचोयुक्तिपरम्पराचतुरां तां देवीं प्रतिवक्तुं प्रत्युत्तरं दातुमशक्तिमानसमर्थो यतः—प्रत्युत्तरास्फुरणाज्जडजिह्वः कुण्ठितवदनशक्तिः, अत एव तां लीलया विलासव्याजेनावहेलितामवज्ञातां कृत्वा स्त्रियं त्वां प्रतिवक्तुमयुक्तमित्येवंप्रकारं परिहस्य देवानेवावदत् ॥

प्रौञ्छि वाञ्छितमस्माभिरपि तां प्रति संप्रति।
तस्मिन्नले न लेशोपि कारुण्यस्यास्ति नः पुनः ॥१३६॥

प्रौञ्छीति ॥ हे देवाः, संप्रत्यस्माभिरपि तां भैमीं प्रति वाञ्छितमभिलाषः प्रौञ्छि परिमार्जितः। त्यक्तमित्यर्थः। नोऽस्माकं पुनः कारुण्यस्य लेशोपि तस्मिन्नले नास्ति। नलमपकर्तुं प्रवर्तामह इत्यर्थः। प्रौञ्छि, उञ्छेर्वर्जनार्थात्कर्मणि चिण् ॥

वृत्ते कर्मणि कुर्मः किं तदा नाभूम तत्र यत्।
कालोचितमिदानीं यः शृणुतालोचितं पुनः ॥१३७॥

वृत्त इति ॥ हे देवाः, स्वयंवरलक्षणे कर्मणि वृत्ते जाते सति किं कार्यं कुर्मः, अपि तु किंचिदिदानीं कर्तुं न शक्यम्। पश्चात्तापमात्रं भवति, न तु तल्लाभः परदारत्वात्, गतशोको न कर्तव्य इति च। तस्मात्तां प्रति वाञ्छितं त्यक्तमित्यर्थः। यतो यस्मात्तदा स्वयंवरसमये वयं तत्र नाभूम स्थिताः। तदानीं चेत्तत्राभविष्याम, तर्हि तथैवाकरिष्याम, तन्नाभूदित्यर्थः। हे देवाः, यूयमिदानीं पुनर्भैम्या नले वृते सत्यपि कालोचितं, नोऽस्माकमालोचितं विचारं शृणुताकर्णयत। नले कृपालेशोपि नास्तीति मयोक्तम्, तत्प्रकारमाकर्णयतेत्यर्थः। नः 'अस्मदो द्वयोश्च' इति बहुत्वम्। आलोचितं भावे क्तः ॥

तदेवाह—

प्रतिज्ञेयं नले विज्ञाः कलेर्विज्ञायतां मम।
तेन भैमीं च भूमिं च त्याजयामि जयामि तम्॥१३८

प्रतिज्ञेति ॥ हे विज्ञाः, कलेर्ममेयं प्रतिज्ञा विज्ञायताम्। भवद्भिरिति शेषः। इयमिति किम्—अहं तेन नलेन प्रयोज्येन भैमीं च भूमिं च त्याजयामि शीघ्रं मोचयामि। अत एव तं जयामीति प्रतिज्ञा मम चेतस्येवं वर्तत इति भवद्भिर्ज्ञायत एव तथापि स्पष्टं मया कथ्यते तदाकर्ण्यतामित्यर्थः। कलेर्ममेत्यहंकारः सूचितः। तेन, अनुक्ते कर्तरि तृतीया त्याजयामि, जयामीति वर्तमानसामीप्ये भविष्यति लट् ॥

नैषधेन विरोधं मे चण्डतामण्डितौजसः।
जगन्ति हन्त गायन्तु रवेः कैरववैरवत् ॥ १३९ ॥

नैषधेनेति ॥ चण्डतया भूभैमीपरित्याजनद्वारातिपीडाकारित्वान्निर्दयत्वेन मण्डितौजसोऽलंकृततेजसो मे मम नैषधेन सह विरोधं जगन्ति त्रयोऽपि लोका गायन्तु कीर्तयन्तु। कस्य किमिव—चण्डतामण्डितौजसो रवेः सूर्यस्य कैरवैः कुमुदैः सह वैरवद्विरोधमिव। हन्त खेदे। अयोग्येन हीनतेजसा नलेन सह विरोधारम्भाल्लोक्ये यद्यप्ययशो भविष्यति, तथापि किं कुर्म इति खेदः। अयशःसमुदयेऽपि सूर्येण कैरववैरवन्मयापि नलवैरं करिष्यत एवेति भावः। एतेन दर्पः सूचितः ॥

द्वापरः साधुकारेण तद्विकारमदीदिपत्।
प्रणीय श्रवणे पाणिमवोचन्नमुचे रिपुः ॥ १४० ॥

द्वापर इति ॥ द्वापरस्तृतीययुगरूपः सहचरस्तस्य कलेर्विकारं नलेन सह विरोधरूपं साधुकारेण साध्वितिशब्दोच्चारणेनादीदिपत्साधु, उचितमेतत्वया विचारितमित्युद्दीपयामास। तस्य प्रोत्साहनं चकारेत्यर्थः। अथ नमुचेर्दैत्यस्य रिपुरिन्द्रो युष्माभिः साहाय्यं कर्तव्यमिति कलिनोक्तस्य वचस उत्तरत्वेनैतद्व्यापारमध्येऽस्माभिर्न स्थीयत इति लौकिकाभिनयव्यञ्जनवशाच्छ्रवणे पाणिं प्रणीय यत्वया विचारितं तदस्माभिः श्रोतुमप्यनर्हमिति वा पाणिभ्यां कर्णौ पिधाय कलिमवोचन्,। अदीदिपत्, दीपेर्ण्यन्ताल्लङि 'भ्राजभासभाषदीप–' इत्यादिनोपधाह्रस्वविकल्पः ॥

विस्मेयमतिरस्मासु साधु वैलक्ष्यमीक्षसे।
यदत्तेऽल्पमनल्पाय तदत्ते ह्रियमात्मनः ॥ १४१ ॥

विस्मेयेति ॥ हे कले त्वं विस्मेयाश्चर्यहेतुर्मतिर्यस्यैवंविधोऽसि। यस्मात्त्वमस्मासु वर्तमानं वैलक्ष्यं सलज्जत्वं साधु सम्यक्प्रकारेणेक्षसे जानासि। पराशयवेदितया तव तीक्ष्णबुद्धित्वाद्वयं विस्मिताः स्मेत्युपहासः। साधूचितं यद्वैलक्ष्यं तद्यस्मादीक्षस इति वा। कथं भवत्सु वैलक्ष्यस्यौचित्यमित्याशङ्क्य समर्थयते—यः पुरुषोऽनल्पाय महते पुरुषायाल्पमतितुच्छं वस्तु दत्त इति यत्, स पुरुषस्तदल्पवस्तुदानं कर्मात्मने स्वस्मै ह्रियमेव दत्ते। महते यदल्पं दीयते तदल्पदानमेव कर्तृ दात्रे पुरुषाय लज्जामेव दत्ते। तेन तस्य लज्जैव भवतीत्यर्थ इति वा तथा च महते नलायास्माभिरल्पमेव दत्तमिति लज्जा युक्तैवेति भावः। अतितरां नलमाहात्म्यं सूचितम्। एतेन 'दूराद्वः प्रेक्ष्य—' इत्यस्योत्तरम्। यद्यपि, तत्तर्हीति

१ 'हन्त हर्षे। आत्मनः सकाशादधिकेन नैषधेन विरोधाल्लोके मम यशो भावीति हर्षः' इति सुखावबोधा।

ता योज्यम् । यद्वा—अनल्पाय न विद्यतेऽल्पो यस्माद् । अतिशायेत्यर्थः । यदस्मदादिरल्पं 'कस्कोऽयं धर्ममर्माणि कृन्तति' इत्याद्युपालम्भवचनं दत्ते करोतीति तत्स्वस्मै ह्रियमेव दत्ते । अधमस्य महोपालम्भयोग्यस्य तवाल्प एवोपालम्भः कृत इति विषादादस्माकं वैलक्ष्यं युक्तमेवेति व्याख्येयम् । अधमायाल्पमत्युपालम्भादि यद्दत्ते तत्स्वस्मै ह्रियं दत्ते । अधमेन सह संभाषणनिषेधात्तस्योपालम्भोऽपि न कार्यः । स त्वस्माभिः कृतः । तथा च पापरूपेण भवता सह संभाषणमस्माभिरनुचितं कृतमिति विषादादस्मासु वैलक्ष्यं युक्तमेवेति वा । इयमपि वक्रोक्तिः ॥

दानाल्पत्वनलमहत्त्वप्रकटनपूर्वं वैलक्ष्यस्यौचितीं समर्थयते—

फलसीमां चतुर्वर्गं यच्छतांशोपि यच्छति ।
नलस्यास्मदुपघ्ना सा भक्तिर्भूतावकेशिनी ॥ १४२ ॥

फलेति ॥ यस्या नलभक्तेः शतांशोपि शततमो भागः फलस्य सीमां मर्यादाभूतं निरतिशयफलरूपं चतुर्वर्गं धर्मार्थकाममोक्षरूपं यच्छति नलाय दातुं शक्नोति, सास्मदुपघ्नास्मदाश्रयाऽस्मद्विषया नलस्य भक्तिरवकेशिनी निष्फला भूता जाता । यस्याः शततमांशेन वशीकृतैरस्माभिः संतुष्य फलरूपत्वेन चतुर्वर्गोपि नलाय दातुं शक्यते, तस्या निरतिशयायाः परिपूर्णायाश्चतुर्वर्गादधिकतमस्य फलस्याभावादस्माकं दातुमसामर्थ्यात्सा निष्फलैव जातेत्यर्थः । निरतिशयभक्तेर्युक्तत्वान्महते नलाय चतुर्वर्गोप्यल्पतरफलत्वाद्दातुमयुक्तः । तादृशाय भैमीलक्षणाल्पतमफलदाने कृतेस्माकं लज्जा युक्तैवेति भावः । यच्छततमांशवशीकृतैरस्माभिर्दत्तसामर्थ्यो नलोऽन्यस्मै जनाय फलावधि चतुर्वर्गं दातुं शक्नोतीति यावत्, सा भक्तिरपूर्णा निष्फला जातेति वा व्याख्येयम् । 'सोपि' इति पाठे चतुर्वर्गं ददतामस्माकं स नलोपि क्रियमाणकर्मफलमर्यादां ब्रह्मार्पणरूपेण ददाति तस्याः पुनः प्रत्यर्पणात्तस्यास्माकं च साम्यमेव । किंतु नलस्यास्मद्विषया सा निरतिशया कर्ममात्रस्यापि ब्रह्मण्येवार्पणात्फलाभिसंधानरहिता भक्तिर्वन्ध्या जाता, तादृग्भक्तिफलादानेऽस्माकमसामर्थ्यात् । तथा च वैलक्ष्यं युक्तमेवेति व्याख्येयम् । यच्छताम् । संबन्धे षष्ठी । शतं चासावंशश्चेति विगृह्य लक्षणया शततमोंश इति । 'उपघ्न आश्रये' इति साधुः ॥

नलो वैरार्हो न भवतीत्याह—

भव्यो न व्यवसायस्ते नले साधुमतौ कले ।
लोकपालविशालोऽयं निषधानां सुधाकरः ॥ १४३ ॥

भव्य इति ॥ हे कले, रागद्वेषादिराहित्येन साध्वी निर्मला मतिर्यस्य तस्मिन् नले विषये ते व्यवसायो वैरकरणोद्यमो भव्यः शुभोदर्को न । किं च निषधदेशानामाह्लादकत्वात्सुधाकरश्चन्द्रोऽयं नलो लोकपाला दिक्पालास्तद्वद्विशेषेण शालते शोभते स्वाभाविकेन शौर्यादिना । तदंशत्वाद्वा लोकपालवन्महाशयः । अतस्तेन सह वैरं तव शुभोदर्कं न भवतीति न तत्कार्यमित्यर्थः । 'मते' इति पाठे असाध्वी मतिर्यस्येति कलिविशेषणम् । 'मतः कले' इति पाठे–असाधोर्द्वापरादेरनुमत इति व्यवसायविशेषणम् ॥

एतदेव स्फुटयति—

न पश्यामः कलेस्तस्मिन्नवकाशं क्षमाभृति ।
निचिताखिलधर्मे च द्वापरस्योदयं वयम् ॥ १४४ ॥

नेति ॥ वयं तस्मिन्क्षमाभृति राज्ञि नले कलेस्तुर्ययुगस्य तवावकाशं प्रवेशावसरं न पश्यामः संभावयामः । तथा—भवन्निषधस्य द्वापरस्य चोदयं नलपराभवनसामर्थ्यं न संभावयामः । यतः—नितरां चिता अर्जिता अखिला धर्मा येन । श्रौतस्मार्तधर्मानुष्ठातरीत्युभयत्र हेतुः । तस्य धर्ममयत्वात्, युवयोः पापरूपत्वात्तत्रावकाशलेशोपि न संभाव्यत इत्यर्थः । यद्यपि देवा नलपराभवस्य भविष्यत्तां जानन्ति, तथाप्युत्साहभङ्गद्वारा कलिनिषेध एव तात्पर्यादवकाशं न पश्याम इत्यूचुः । यद्वा—पश्याम इति वर्तमानसामीप्ये भविष्यति लटप्रयोगात्प्रस्तुतमवकाशो नास्ति, विलम्बेन भविष्यतीति सूचितमिति ज्ञेयम् । अथ च—यथासंख्येन तितिक्षाशीले कलावकाशो न, निश्चितसकलधर्मरहस्ये च संदेहस्योदयो न भवतीति युक्तम् ॥

भैम्यपि न बाध्येत्याह—

साविनीततमा भैमी व्यर्थानर्थग्रहैरहो ।
कथं भवद्विधैर्बाध्या प्रमितिर्विभ्रमैरिव ॥ १४५ ॥

सेति ॥ पातिव्रत्यादिधर्मनिष्ठत्वाद्विनीततमा सा भैमी व्यर्थो निर्हेतुको वैराचरणलक्षणोऽनर्थस्तत्र ग्रहोऽभिनिवेशो येषां तैर्भवद्विधैः कथमिव बाध्या पीडनीया । अपितु–अनुचितमेतत् । अहो कष्टं, संवृद्धिर्वा, आश्चर्यं वा । कैः केव—विशिष्टैर्भ्रमैर्विपर्ययज्ञानैर्विनीतं सुतरामपाकृतं तमोऽज्ञानं ययैवंभूता भ्रान्तिज्ञानविरोधिनी प्रमितिः सम्यगनुभूतिस्मारिका रजतादिधीरिव । कथं बाध्येत्यर्थः । किंभूतैर्विभ्रमैः—व्यर्थो निष्फलोऽनर्थस्य शुक्तिरजतादेर्ग्रहो ज्ञानं येषां तैः । 'अविनीततम आः' इति पदच्छेदः । आः कोपे । नितरामविनीत अधम कले इति वा ॥

उक्तिविशेषेण पञ्चभिः श्लोकैः पुनरपि तौ न बाध्यावित्याह—

तं नामत्ययुगं तां वा त्रेता स्पर्धितुमर्हति ।
एकप्रकाशधर्माणं न कलिद्वापरौ युवाम् ॥ १४६ ॥

तमिति ॥ न असत्यं नासत्यं किंतु सत्यमेव युगं सत्ययुगम् । कृतयुगमिति यावत् । तं नलं तां भैमीं वा स्पर्धितुं तुलयितुमर्हति । तथा—त्रेतायुगमपि स्पर्धितुमर्हति न तु जेतुमित्यर्थः । यथासंख्येन वा योज्यम् । यस्मादेको मुख्यः स चासौ प्रकाशधर्मा च तम् तां वा, प्रकाशः प्रसिद्धो धर्मो यस्य यस्याश्च । पश्चादेकशब्देन कर्मधारयः । लोकत्रयस्त्रीपुंसमध्ये तावेव धर्मप्रधानौ । यतः, तस्मात्सत्ययुगस्यापि चतुश्चरणधर्मत्वादेकप्रकाशधर्मत्वात्सत्ययुगं स्पर्धितुमर्हति त्रेतायास्तु त्रिचरणधर्मत्वेपि कलिद्वापरापेक्षया धर्मबाहुल्यात्कृतयुगसाधर्म्यादेकप्रकाशधर्मत्वसंभवात्स्पर्धितुमर्हतीत्यर्थः । कलिद्वापरौ युगे युवां पुनस्तौ स्पर्धितुं नार्हथ इति विभक्तिविपरिणामः कार्यः । तयोर्धर्मैकप्रधानत्वात्, युवयोश्चाधर्मबाहुल्याद्युवां तौ तुलयितुमप्यसमर्थौ, किं पुनर्जेतुमित्यर्थः । आ सामस्त्येन सत्यं यत्र तदासत्यम् । तच्च तद्युगं

१ 'असौ' इति पाठः सुखावबोधास्थः ।

च, चतुश्चरणधर्मयुक्तं कृतयुगं तथा—त्रेतायुगं तौ स्पर्धितुं नार्हतः अपित्वर्हत एवेति काकुः। उक्तादेव हेतोरासत्ययुगं, कृतयुगं तौ स्पर्धितुमर्हति तत्रैव तयोः सत्त्वाद्धर्मप्रधानत्वाच्च। त्रेतायुगं च नार्हति; त्रयाणामप्यधर्मसंस्पर्शात्; तत्र तयोरसत्त्वाच्चेति वा। कलिद्वापरयोः पुरुषत्वान्नलेन सह, त्रेतायाश्च स्त्रीत्वाद्भैम्या सह, स्पर्धासंभावनायां पार्थक्येन निषेधो युक्त इति वा। कृतयुगं तं स्पर्धितुं नार्हति। युवामपि नार्हतः। सत्ययुगेऽधर्मलेशसंस्पर्शसंभावनापि संभवेत्, नतु नले तथा—त्रेतायामपि, नतु भैम्याम्। तथा चाद्यं युगद्वयं ताभ्यां स्पर्धितुमपि न शक्तम्, युवां पुनर्न शक्ताविति किं वाच्यमित्यर्थ इति वा। अथ च—दस्रयोर्युगं नलं स्पर्धितुमर्हति। गार्हपत्याहवनीयदक्षिणाग्नित्रयरूपा च भैमीं स्पर्धितुमर्हति। यतः—एकः केवलः प्रकाश उज्ज्वलः प्रसिद्धो वा धर्मः स्वभावः सौन्दर्यादिगुणो वा ययोर्भैमीनलयोः प्रकाशः शोभालक्षणो धर्मो ययोरिति वा। अग्नित्रयपक्षेप्येकः केवलः प्रकाशस्तेज एव धर्मः स्वभावो यस्या इति सौन्दर्याद्दीप्तत्वात्पावित्र्याच्च दस्रयुगमग्नित्रयं च ताभ्यां तुल्यं भवितुमर्हतीत्यर्थः। कलिद्वापरौ युवां पुनर्न, असुन्दरत्वात्पापप्रधानत्वाच्चेत्यर्थः। अथ च—एको विरुद्धधर्मरहितः प्रकाशो निश्चितश्च धर्मो यत्र तं च तां च कलहसंदेहौ स्पर्धितुं नार्हतः। विरुद्धधर्मत्वे हि कलहसंभवो विशेषधर्माप्रकाशे च संदेहसंभवः। अत्र त्वेकधर्मत्वात्प्रकाशमानधर्मत्वाच्च कलहसंदेहौ न संभवत इति युक्तमिति भावः। 'त्रेताऽग्नित्रितये युगे' 'प्रकाशश्च प्रसिद्धे स्यात्' 'संदेहद्वापरौ चाथ' इत्यमरः। प्रकाशधर्मशब्दयोः पूर्वं बहुव्रीहौ 'धर्मादनिच्-' इति समासान्तः। पश्चात्पूर्वेण समासः॥

करिष्येऽवश्यमित्युक्तिः करिष्यन्नपि दुष्यसि।
दृष्टादृष्टा हि नायत्ताः कार्यीया हेतवस्तव ॥ १४७ ॥

करिष्य इति॥ हे कले, अवश्यं निश्चितं करिष्ये। अर्थान्नलपराभवमित्युक्तिः प्रतिज्ञावचो यस्यैवंभूतस्त्वं करिष्यन्नपि कर्तुकामोपि दुष्यसि दुष्टो भवसि। अपकारस्य भविष्यत्त्वादिदानीं साक्षात्कायव्यापाराभावेपि मनस्यपकारकरणवासनाया धृतत्वाद्वचनेन चानुवादाद्विविधपातकसद्भावात्। ब्रह्महत्याया अकरणेऽपि ब्रह्महत्यां करिष्यामीत्यादाविवेत्यर्थः। कुर्वाणो दुष्टो भविष्यसीति किं वाच्यमित्यपिशब्दार्थः। अथ च—अकर्ता दुष्यस्येव प्रतिज्ञाभङ्गादिति किं वाच्यम्। किं तु यद्यपि नलस्य पराभवं करिष्यसि, तथापि दुष्यसि, प्रतिज्ञातार्थसंपादनेप्येवंप्रतिज्ञाकरणस्यायुक्तत्वात्। हि यस्मात्कार्यीयाः कार्यसाधनसमर्था दृष्टाश्चक्रचीवरादयः, अदृष्टा देशकालेश्वरेच्छादयो हेतवः कारणानि तवायत्तास्त्वदधीना (न) भवन्ति। कार्यसाधिका दृष्टादृष्टसामग्री तावत्त्वया संपादयितुमशक्या। किंतु सा तस्य तस्य तत्तत्कर्मवशात्स्वयमेव संपद्यत इत्यर्थान्तरन्यासः। तथाचैवं त्वया चित्ते धृतेऽनूदिते च द्विविधं पातकमेव भवति। न तु तं पराभवितुं शक्नोषीति। यद्यपि तं पराभवितुं शक्ष्यसे, तथापि नलीयदृष्टादृष्टसामग्र्येव तत्र प्रयोजिका, न तु त्वमिति। मयैवं करिष्यते, मयैवं कृतमित्यादिरूपां प्रतिज्ञां प्रति स्वमात्रस्य करणत्वाभावादृष्टादृष्टकारणवैगुण्येन प्रतिज्ञाभङ्गस्यापि शङ्कितत्वादिन्द्रोपि कर्तुमशक्तः, त्वं तु को नाम वराक इति च भावः। यद्वा दृष्टादृष्टरूपा हेतवः, (तत्र) दृष्टसामग्री यथाकथंचिद्यद्यपि संपादयितुं शक्यते तथाप्यदृष्टसामग्री त्वया न शक्यते। तथा च नलेन यदि परमो धर्मः कृतः, तर्हि स त्वया पराभवितुमशक्यः। अथाधर्मः कृतः तर्ह्यधर्मवशादेव तादृशी दशा भविष्यति त्वया किं क्रियत इत्युभयथापि दोषात् 'मयैवं करिष्यते, कृतम्' इत्यादि वल्गना न कार्येति भावः। 'इत्युक्त्वा' इति पाठे अवश्यं वश्यं वा करिष्ये इत्युक्त्वाकारप्रश्लेषेणाकरिष्यन्नपि दुष्यसि वाङ्मात्रेणापि पापसिद्धेः। किं पुनः करिष्यन्निति। अन्यत्पूर्ववत्। कार्यीयाः, 'तस्येदम्' इत्यर्थे 'वृद्धाच्छः'। हितार्थे 'तस्मै हितम्' इति वा॥

द्रोहं मोहेन यस्तस्मिन्नाचरेदचिरेण सः।
तत्पापसंभवं तापमाप्नुयादनयात्ततः ॥ १४८ ॥

द्रोहमिति॥ यः पुरुषो मोहेनाज्ञानेनापि तस्मिन्पुण्यश्लोकेऽनपकारिणि द्रोहमपकारमाचरेत्, स पुरुषः ततस्तस्मादनयादन्यायाद्धेतोरचिरेण तस्मात्तादृशापकारेण जातात्पापात्संभवो यस्य तं तापं दुःखमाप्नुयात्। बुद्धिपूर्वकारी लभत इति किं वाच्यमित्यर्थः। नलद्रोहस्तस्मात्त्वया सर्वथा त्याज्य इति भावः। अनेन शापोपि दत्त इति ज्ञेयम्। मोहेनेत्यत्रार्थादपिशब्दो योज्यः। मोहस्येन स्वामिन्नज्ञानाश्रय मूर्खतमेति वा संबोधनम्॥

युगशेष तव द्वेषस्तस्मिन्नेष न सांप्रतम्।
भविता न हितायैतद्वैरं ते वैरसेनिना ॥ १४९ ॥

युगेति॥ हे युगानां सत्यादीनां शेष कले, तस्मिन्नले तवैष द्वेषो न सांप्रतमयुक्तः यस्माद्वैरसेनिना नलेन सह एतत्प्रारब्धं वैरं ते तुभ्यं हिताय न भविता शुभोदर्कं न भविष्यति। युगेषु शेष इति निर्धारणसप्तमीसमासः। सांप्रतमव्ययम्। 'हितयोगे च' इति चतुर्थी॥

तत्र यामीत्यसज्ज्ञानं राजसं सदिहास्यताम्।
इति तत्र गतो मा गा राजसंसदि हास्यताम् ॥१५०॥

तत्रेति॥ हे कले, तत्र नलसमीपे पराभवार्थं यामि गच्छामीत्येवंरूपं राजसं रजोगुणजनितं विचारासहम्। अत एवासदशोभनं सद्वर्तमानमिहास्मिन्काले देशे वाऽस्तां त्यज्यतामिति। सद्भद्रमिति वा। इति विचार्येति यावत्। इति किम्—तत्र राजसंसदि तस्यां नलसभायां गतः सन् हास्यतां परिहास्यतां त्वं मा गाः। एवं विचार्य तत्र गतः सभ्यैरुपहास्य एव भविष्यसि। ननु नलं पराभवितुं शक्ष्यसीत्येवंविधो विचारः परित्याज्य एवेत्यर्थः। असत्सदिति च विरोधाभासः। तत्र यामीति ज्ञानमसदयुक्तम्। यतो राजसम्। तर्हि किं कर्तव्यं तत्राह—इहास्मिन्नेव देश आस्तां स्थीयताम्। इत एव परावर्तनीयमित्यर्थः। इत्यसदीयं ज्ञानं सद्भद्रमितीतिशब्दमावर्त्य व्याख्येयम्। विपक्षे बाधकमाहोत्तरार्धेन—तत्र स्वयंवरे गतो राजसभायां स्वयंवरे वृत्ते किमर्थमागत इति हास्यतामेव गमिष्यसि॥

---

१ "सांप्रतः' इति पाठे—संप्रतिशब्दात् 'तस्येदम्' इत्यणि सांप्रतो नाधुनिक इत्यर्थः'—इति सुखावबोधा।

गत्वान्तरा नलं भैमीं नाकस्मात्त्वं प्रवेक्ष्यसि ।
षण्णां चक्रमसंयुक्तं पठ्यमानं डकारवत् ॥१५१॥

गत्वेति ॥ हे कले, निषधदेशान्गत्वा प्राप्य नलं भैमीमन्तरा नलभैम्योर्मध्येऽकस्माच्छीघ्रं दुरितलक्षणकारणमन्तरेण वा त्वं न प्रवेक्ष्यसि । नलस्य पुण्यश्लोकत्वात्, भैम्याश्च पातिव्रत्यादिधर्मयुक्तत्वात्, तौ पराभवितुं न शक्नोषीत्यर्थः । क इव—असंयुक्तं पूर्वं विसंधितया पृथक्कृतप्रकृतिप्रत्ययविभागं पश्चात्पठ्यमानं संहितया प्रयोगार्हम् । उच्चार्यमाणमिति यावत् । एवंभूतं षण्णां चक्रं षण्णामिति शब्दरूपस्थवर्णवृन्दमन्तरा मध्ये डकारवत् । डकारो वर्णो यथाऽकस्माद्विधिमन्तरेण न प्रविशतीति साधर्म्योपमा । षष्शब्दात्षष्ठीबहुवचने 'षट्चतुर्भ्यश्च' इति नुटि तत्सहित आमि 'स्वादिष्वसर्वनामस्थाने' इति पूर्वपदस्य पदत्वात् 'झलां जशोऽन्ते' इति जश्त्वेन षकारस्य डकारे 'न पदान्तात्—' इति निषेधस्य 'अनाम्नवति—' इति निषेधात् 'ष्टुना ष्टुः' इति ष्टुत्वेन नाम्नकारस्य णकारादेशे 'यरोऽनुनासिके—इति डकारस्याप्यनुनासिकस्य व्यवस्थितविकल्पत्वादनुनासिकस्यात्र नित्यत्वेन णकारे जाते सर्वथापि न स्वेन रूपेण 'षण्णाम्' इति पदमध्ये डकारो यथा प्रवेशं लभते, तथा तयोर्मध्ये त्वमपीत्याशयः । अन्यथा विकल्पत्वात्पक्षे षड्णामिति स्यात्' तन्मा भूदित्यत्र व्यवस्थितविभाषाऽङ्गीकरणीया । षण्णां चेति चकारो भैमीं चेति योज्यः । तथा च—क्रमेण परिपाट्या संयुक्तं षण्णामिति कर्मभूतं शब्दरूपमन्तरा डकारो यथा न प्रविशति । असंयुक्तावस्थायां यद्यपि स्वेन रूपेणावस्थानं वर्तते, तथापि संयुक्तावस्थायां नास्तीत्यर्थ इति वा । षण्णामित्यत्र प्रकृतिप्रत्ययदशायामकस्मादागन्तुकादेशरूपतया डकारो यथा प्रविशति, तथा त्वं न प्रविशसीति वैधर्म्योपमया वा व्याख्येयम् । 'टकारवत्' इति पाठे-'वावसाने' इत्यवसान इव चर्त्वविकल्पात्, खरश्चाभावात् षट्, षट्स्वित्यादिवत् षण्णामित्यत्र खरवसानयोरभावाट्टकारो यथा न प्रविशतीति साधर्म्योपमैव । क्षेपकोऽयम् । नलं भैमीं 'अन्तरान्तरेण—' इति द्वितीया ॥

अपरेपि दिशामीशा वाचमेतां शचीपतेः ।
अन्वमन्यन्त किंत्वेनां नादत्त युगयोर्युगम् ॥१५२

अपरे इति ॥ अपरे दिशामीशा वह्न्यादयः शचीपतेरेनां पूर्वोक्तां वाचमन्वमन्यन्त । 'इन्द्रो युक्तमाज्ञापयति' इत्येवमभ्यनन्दन् । किंतु पुनर्मूर्खं युगयोः कलिद्वापरयोर्युगमेनामिन्द्रगिरं नादत्त नाङ्गीचक्रे । दिगीशानामपि संमतायां वाचि तयोरसंमतेः किंतु शब्देन मूर्खतरत्वमाग्रहित्वं चोक्तम् । एनाम्, अन्वादेशे एनादेशः । आदत्त, अनास्यविहरणत्वात्तङ् ॥

कलिं प्रति कलिं देवा देवान्प्रत्येकशः कलिः ।
सोपहासं समैर्वर्णैरित्थं व्यररचन्मिथः ॥ १५३ ॥

कलिमिति ॥ देवाः कलिं युगं प्रति लक्षीकृत्य, कलिर्देवान्प्रत्येकश एकैकमुद्दिश्य मिथोन्योन्यं समैर्वर्णैस्तुल्यैरक्षरैः श्लिष्टैः शब्दैः सोपहासमुपहासवाक्यसहितं कलिं कलहं वाग्युद्धमित्थं वक्ष्यमाणप्रकारेण व्यररचन्, व्यररचच्च कृतवन्तः कृतवांश्चेत्यर्थः । व्यररचत्, रचयतेश्चौरादिकस्यादन्तत्वादग्लोपित्वान्न सन्वद्भावः । व्यरचयदित्यपि पाठः ॥

इन्द्रः कलिं प्रत्याह—

तवागमनमेवार्हं वैरसेनौ तयावृते ।
उद्वेगेन विमानेन किमनेनापि धावता ॥ १५४ ॥

तवेति ॥ हे कले, तया वैरसेनौ नले वृते सति तवागमनं गमनाभावोर्ह युक्तम् । उद्वेगेनोत्कृष्टजवेन, अत एव—धावता शीघ्रगामिनाऽनेन प्रत्यक्षदृश्येन विमानेनाकाशगामिना रथेन किम्, अपितु—न किंचित्प्रयोजनमस्ति । अन्यस्य वृतत्वादित्यर्थः । वैरसेनावुत्तरेण वा संबन्धनीयम् । अनया नलेऽवृते एव तव स्वपुराद्गमनं युक्तम् । नलवरणानन्तरमिदानीं सर्वथा गमनं न कार्यमित्यर्थ इति वा । एतावत्पर्यन्तं किं कृतम्, इदानीं किमर्थं गम्यत इत्युपहासः ॥

एतदेव वाक्यं कलिरिन्द्रं प्रत्याह—हे शक्र, भैम्या नले वृते सति तव यथागतमागमनमेवाकृतकार्यत्वादिदानीं स्वर्गं प्रत्यगमनमेव युक्तम् । निर्लज्जत्वमङ्गीकृत्येन्द्राण्यादीनामग्रे कथं मुखं दर्शयिष्यसि; अपि तु—अनुचितमेतत् । सर्वथा स्वर्गं प्रति न गन्तव्यमेव युक्तमित्यर्थ इति वा । विमानेनाहंकाररहितेनापिधा तिरोधानं तद्युक्तेन नितरां गोपितेनानेन मुखदर्शनानुमितेनोद्वेगेन निर्वेदेन किम्, अपि तु—तद्गोपनं व्यर्थम् । धैर्यमवलम्ब्य निर्वेदो यद्यपि त्वया गोप्यते, तथापि मया ज्ञात एव । अथ च—भैमीनलाभ्यां वरदानार्थमेव मयागतमित्यादिव्याजेन निर्वेदगोपनं क्रियते, तथापि स निर्वेदो ज्ञात एव । अभिमानशून्यत्वान्न किंचिदनेन निर्वेदेन साधयितुं शक्यते, तस्मात्सर्वथा दुःखं मा कार्षीरित्युपहसितवानित्यर्थः । विमानेनान्यवरणादपमानेन हेतुना य उद्वेगस्तेन प्रकटेन किम्, अपितु—तं गोपायेति वा । विगतमानानामिन स्वामिन्नितरामभिमानशून्य इन्द्र, गोपितेन चानेन निर्वेदेन किमिति वा । उद्वेगेन किम्, अनेन धावता विमानेनापि किमिति वा । अपिधा, 'आतश्चोपसर्गे' इत्यङ् प्रत्ययः ॥

वह्निः कलिमाह—

पुरा यासि वरीतुं यामग्र एव तया वृते ।
अन्यस्मिन्भवतो हास्यं वृत्तमेतत्त्रपाकरम् ॥१५५॥

पुरेति ॥ हे कले, त्वं यां वरीतुमितोपि पुरा यासि गमिष्यसि तयाऽग्र एव त्वदागमनात्पूर्वमेवान्यस्मिन्वृत एतदिदानीं गमनं भवतस्त्रपाकरं हास्यं हास्यकरणं वृत्तं जातम् । वर्तिष्यमाणमपि वृत्तप्रायत्वाद्वृत्तमित्युक्तम् । सर्वोपि लोकस्त्वामुपहसिष्यतीत्यर्थः ॥

१ 'प्रत्यये भाषायां नित्यवचनम्' इति वार्तिकेन नित्यत्वे सिद्धेऽस्य प्रयासस्य गतिश्चिन्त्या । छन्दोविषयत्वं वा कल्प्यम् ।

१ 'अवाप्योः—इत्यल्लोपे नञ्समासे अपिधावता प्रकटेन' इति सुखावबोधा । २ 'अत्र द्वयोरप्यर्थयोः प्रकृतत्वात्केवलप्रकृतश्लेषः' इति जीवातुः ।

एतत्तव वृत्तं गमनाचरणं हास्यहेतुभूतं त्रपाकारि च। भविष्यतीति शेष इति वा। एतल्लोकैः क्रियमाणं हास्यं तव त्रपयाऽकं दुःखं राति एवंविधं वृत्तं जातप्रायमेवेति वा। अत्राप्युपहासः॥

इदानीं कलिरग्निमाह—हे वह्ने, त्वं यां वरीतुं पुरा यास्यथासीः, तया तव समक्षमेव त्वामनादृत्यान्यस्मिन्नले वृते तवैतत्प्रत्यक्षदृश्यं वृत्तं वर्तुलमास्यं मुखं त्रपामा सामस्त्येन करोति नितरां लज्जावहं जातमिति शेषः। हा कष्टम्। त्रपयाऽकं दुःखं रात्यादत्ते लज्जास्पदं वृत्तं जातमिति वा। हे वह्ने पुराऽस्मदूमनात्पूर्वं यां वरीतुमयासि त्वया प्रयत्नोऽकारि स्वयंवरं प्रति गतम्। यद्वा—स्वस्य गमनात्पूर्वं दूतीहस्तेनोपदाप्रदानादिद्वारा यां वरीतुं प्रयत्नोऽकारि, तया तव समक्षमेव नले वृते एतत्स्वर्गं प्रत्यागमनलक्षणमाचरणं तव त्रपां न करोतीति त्रपाऽकरं लज्जां नावहति। एवं वृत्तेपि निर्लज्जः सन् स्वगृहं गच्छन् स्वां वनितां मुखं कथं दर्शयितास इति भाव इति। तया विनैतत्स्वर्गगमनाचरणं लज्जावहं सदहास्यं हासयोग्यं न, अपितु—सर्वैर्हास्यमेवेति काकुर्वा। मुखं लज्जाकरम्, वृत्तमाचरणमपि लज्जाकरमिति वा। (पुरा) यासीति 'यावत्पुरा—' इति भविष्यति लट्। पक्षे 'पुरिलुङ् चा—' इति भूते लट्। पक्षे 'यसु प्रयत्ने' भावे क्विप्॥

यमः कलिमाह—

पत्यौ तया वृतेन्यस्मिन्यदर्थं गतवानसि।
भवतः कोपरोधस्तादक्षमस्य वृथारुषः॥ १५६॥

पत्याविति॥ हे कले, त्वं यदर्थं यस्या निमित्तेन गतवान्गमनयुक्तोऽसि यां वरीतुमेव गच्छसि तया पूर्वमेवान्यस्मिन्पत्यौ वृते स्वभर्तृत्वेनाङ्गीकृते सति भवतः कोपस्य रोधो निवारणं स्यान्नवतु। यतोऽक्षमस्यासमर्थस्य अत एव—वृथा रुट् कोपो यस्य। तस्मादिदानीं कोपो रोद्धव्यः, न कार्य इत्यर्थः। नलद्वेषे कारणाभावाद्वा निष्कारणरोषस्य। यस्मादसहनस्यासमर्थस्य वा रुषो वृथा कोपा निष्फलाः, तस्मात्कोपो निवार्य इति वा॥

कलिरेतदेव यममाह—हे यम, यां वरीतुं गतवानसि तया नले पत्यौ वृते भवतः सकाशादन्योऽधस्तादधरो हीनः कः, अपितु त्वमेव। त्वत्सकाशादन्योऽधो हीनः कः स्तात्, अपि तु -त्वमेव हीन इति वा। अपरोर्थात्त्वदन्यो भवमुत्पत्तिं तस्यत्युपक्षयं प्रापयतीति भवतो निरर्थकजन्मा, अत एव—अधो हीनः कः स्तात्, अपि तु—त्वमेव हीन इति वा। संबुद्ध्यन्तं वा निरर्थकजन्मन्नित्यर्थः। अक्षमस्य भूस्पर्शरहितस्य देवस्य रुषो वृथा। अस्मादृशानामेव रोषाः सफलाः, न तु भवादृशानामित्यर्थ इति वा। अक्षमासहनासमर्थ यम वृथा निष्कारणमस्मान्प्रति रुषः कोपान् स्य मा कुर्वित्यर्थ इति वा। यस्यै यदर्थं 'चतुर्थी तदर्थां—' इति समासः। गतवान्मतुप्। पक्षे भूते क्तवतुः। भवतः षष्ठी पञ्चमी च दिग्योगे। पक्षे प्रथमा 'अधातोः' इति प्रतिषेधात् 'अत्वसन्तस्य—' इति न दीर्घः। अधस्तादिति दिक्शब्दत्वादधरशब्दादस्तातिः, 'अस्तात्ति च' इत्यधरस्याधादेशः। अध इति। तस्मादेव 'पूर्वाधरा—' इत्यसिधरस्याधादेशश्च। स्येति 'षोऽन्तकर्मणि'॥

वरुणः कलिमाह—

यासि स्मरञ्जयन्कान्त्या योजनौघं महार्वता।
समूढस्तं वृतेऽन्यस्मिन्किं न ह्रीस्तेत्र पामर॥१५७॥

यासीति॥ हे कले, कायकान्त्या स्मरं जनयन्विरुद्धलक्षणयाऽतिकुरूपस्त्वं महान्तोऽर्वन्तोश्वा यस्मिन्रथे तेन रथेन कृत्वा योजनौघं चतुःक्रोशरूपयोजनसमूहमतिदूरमिदानीमपि यासि स त्वं मूढो मूर्खः। यस्मात्—हे पामर नीच, भैम्याऽन्यस्मिन्नले वृते सति अत्रास्मिन्नर्थे वर्तमानस्य ते तव ह्रीः किं न, अपितु—भविष्यत्येव। भाविनीं वर्तमानां वा लज्जामवगणय्यापि गच्छसि, तस्मान्मूर्ख एवेत्यर्थः। सेनापुरःसरमतिगौरं कामं कज्जलतुल्यया स्वकायकान्त्या पराभावुकः। तथा-जनौघं स्वसेनासमूहमपि पराभावुकः प्रसरन्त्या श्यामकायकान्त्या सर्वसेनाग्रेसरं स्मरं च श्यामीकुर्वन्नतिकुरूपः एवंभूतो रथेन समूढः सम्यग्धृतो यस्त्वं तयाऽन्यस्मिन्वृते सत्यपि यासि। अर्थात्स्वयंवरम्। तस्य तेऽन्यार्थे स्वयंवरे वा ह्रीः किं न भवेत। अपितु—भवेदेवेति वा॥

एतदेव कलिर्वरुणमाह—हे अमर देव वरुण, कान्त्या दिव्यदेहदीप्त्या योजनौघं दूरं देशं रञ्जयन्दीप्रं कुर्वन्। जनौघं स्वयंवरस्थलोकसमूहं वा रञ्जयन्नत्याश्चर्यदिव्यरूपदर्शनान्नलाकारधारणाद्वात्मनि सानुरागं कुर्वन्नतिजवनहययुतेन विमानेन महता श्यावकर्णादिनाऽर्वता हयेन वा समूढस्तामारूढो यस्त्वं यासि स्म स्वयंवरमयासीः, तस्य तवान्यस्मिंस्तया त्वत्समक्षं वृते ह्रीः किमिति न भवति। अत्रप निर्लज्जेति धिक्कारः। अहं तु तदा नासं त्वं तु गतोपि न वृत इत्यपमानाल्लज्जया भवितुं युक्तम्। परं सा न जायत इति चित्रम्। अत एव चात्रपत्वमित्यर्थः। अत्रप(ःसन्) न म्रियसे इत्यमरः। अन्योप्येवमनादरे कृते लज्जया म्रियते, त्वं तु निर्लज्जो न म्रियस इति चित्रमित्यर्थ इति वा। अत्रपया लज्जाभावेनामरेत्येकं पदं वा। त्रपायां सत्यामप्यमरेति वा। अत्रपया लज्जाभावेनामं रोगं पीडामस्मादृशां रासि ददासीत्यत्रपामर। तव निर्लज्जत्वेन वयमतिदुःखिनो भवाम इत्यर्थ इति वा। एते चत्वारोपि श्लोका यथाक्रममिन्द्रादिदेववचनत्वेन ज्ञेयाः। कलिकलहस्तु सर्वत्रानुस्यूतः। तत्रापि पूर्वं देववचः, पश्चात्कलिवचः। महार्वता 'अर्वणस्त्रसा—' इति त्रन्तादेशः, 'आन्महतः—' इत्याकारः। यासि स्मेति पक्षे 'लट् स्मे' इति भूते लट्॥

नलं प्रत्यनपेतार्तिं तार्तीयीकतुरीययोः।
युगयोर्युगलं बुद्ध्वा दिवि देवा धियं दधुः॥१५८॥

नलमिति॥ देवा इन्द्रादयस्तार्तीयीकतुरीययोस्तृतीयचतुर्थयोर्युगयोर्द्वापरस्य कलेश्च युगलं द्वयं नलं प्रत्युद्दिश्यानपेतार्त्यनपगतव्यथं 'सर्वथा नलः पीडनीयः' इति नलेऽनिवृत्तापकारवाञ्छं बुद्ध्वा दिवि धियं दधुः। 'युगद्वयमस्मद्वचनं न शृणोति, इतःपरं यत्किंचिन्नवतु, किमस्माकम्' इति विचार्य स्वर्गं गन्तुमीषुरित्यर्थः। तार्तीयीकः पूर्ववत्। तुरीयः 'चतुरश्छयतावाद्यक्षरलोपश्च' इति छस्य लोपश्चेति॥

द्वापरैकपरीवारः कलिर्मत्सरमूर्छितः।
नलनिग्राहिणीं यात्रां जग्राह ग्रहिलः किल॥१५९

द्वापरैकेति ॥ कामादिसैन्यं परावर्त्य द्वापर एवैकः सहायो यस्य । तथा—मत्सरेण नलशुभद्वेषेण मूर्छितो विनष्ट इव, अतिमत्सरेण प्रवृद्धो वा । तथा—प्रहिलो निवारणस्यानाकर्णनादाग्रहवान्कलिरवश्यं नलं निग्रहीष्यामीत्येवंरूपां नलनिग्राहिणीं यात्रां जग्राह निषधान्प्रतस्थ इत्यर्थः । किल यस्मात्—प्रहिलः, तस्मात्प्रतस्थे । उपहासे वा । एकः परिवारो यस्येति विगृह्य द्वापरेणैकपरीवार इति समासः । परीवारः 'उपसर्गस्य घञि-' इति दीर्घत्वम् । निग्राहिणीमावश्यके णिनिः ॥

नलेष्टापूर्तसंपूर्तेर्दूरं दुर्गानमुं प्रति ।
निषेधन्निषधान्गन्तुं विघ्नः संजघटे घनः ॥ १६० ॥

नलेति ॥ नलस्य इष्टापूर्तानां यागतडागादिधर्माणां संपूर्तेः संपूर्णत्वाद्धेतोर्नितरां धर्मबाहुल्यात्पापरूपं प्रस्थितममुं प्रत्यनु दूरं दुर्गान्दुर्गमाननेन प्रवेष्टुमशक्यान्निषधान्गन्तुं गमनायामुं निषेधन्वारयन्घनो महान्निरन्तरश्च विघ्नो वक्ष्यमाणप्रकारेण संजघटे संजज्ञे । धर्मबाहुल्यं दृष्ट्वा सहसा तान्प्रवेष्टुं शङ्कित इत्यर्थः । अथ च—घनो मेघो जलपूर्तेर्दुर्गमं देशं गन्तुं विघ्नरूपो भवन्निषेधति । इष्टं च पूर्तं चेति द्वन्द्वे 'अन्येषामपि दृश्यते' इति दीर्घः ॥

मण्डलं निषधेन्द्रस्य चन्द्रस्येवामलं कलिः ।
प्राप म्लापयितुं पापः स्वर्भानुरिव संग्रहात् ॥ १६१ ॥

मण्डलमिति ॥ पापः कलिः, पापग्रहमध्ये गणितत्वात्पापः स्वर्भानुरिवामलं निष्पापं निषधेन्द्रस्य मण्डलं राष्ट्रम्, अमलं परिपूर्णप्रकाशं चन्द्रस्य मण्डलं बिम्बमिव सम्यग्ग्रहाद्बलाद्ग्रहणयोगवशाच्च म्लापयितुं विनाशयितुं ग्रसितुं च प्राप ॥

कियतापि च कालेन कालः कलिरुपेयिवान् ।
भैमीभर्तुरहंमानी राजधानीं महीभुजः ॥ १६२ ॥

कियतेति ॥ कालो युगलक्षणः समयरूपः । अथ च—पापरूपत्वाच्छ्यामवर्णः । अथ च—दारुणत्वात्कृतान्ततुल्यः । तथा—अहंमानी नलपीडनेऽहंकारवान्कलिः कियतापि भूयसा कालेन भैमीभर्तुर्महीभुजो नलस्य राजधानीं चोपेयिवान्प्राप्तवान् । पूर्वं देशं प्राविशत्, इदानीं तु राजधानीमिति वार्थः । भूमीभैमीत्याजने कलेरभिनिवेशाभिप्रायो विशेषणद्वयेन सूच्यते । कियताऽल्पीयसेति वा । अहमिति मननमहंमानः, सोस्यास्तीति, सर्वकार्येष्वहमेवेति मन्यते तच्छील इति वा ॥

इदानीं पुरप्रवेशविघ्नानाह—

वेदानुद्धरतां तत्र मुखादाकर्णयन्पदम् ।
न प्रसारयितुं कालः कलिः पदमपारयत् ॥ १६३ ॥

वेदानिति ॥ तत्र पुरे वेदानृगादीनुद्धरतां गुणनिकां कुर्वतां श्रोत्रियाणां मुखात्पदं पदकारकल्पितं संहिताविभागरूपं पदमंशमाकर्णयन्शृण्वन्कालः सभयरूपः, अथ च—पापरूपः कलिः पदमेकमपि चरणन्यासं प्रसारयितुं नापारयत् । पापरूपत्वादित्यर्थः । एतेन नलपुरस्य धर्मपूर्णत्वमुक्तम् । वेदान्, शतृयोगे 'न लोका-' इति षष्ठीनिषेधः ॥

श्रुतिपाठकवक्त्रेभ्यस्तत्राकर्णयतः क्रमम् ।
क्रमः संकुचितस्तस्य पुरे दूरमवर्तत ॥ १६४ ॥

श्रुतीति ॥ तत्र पुरे श्रुतिपाठका वेदाध्यापयितारस्तेषां वक्त्रेभ्यः सकाशात्क्रमं पूर्वपदपरित्यागेनोत्तरपदग्रहणादिकं क्रमसंज्ञं ग्रन्थमाकर्णयतः शृण्वतोऽस्य कलेः क्रमश्चरणो गतिर्वा दूरं नितरां संकुचितोऽवर्तत । क्रमाकर्णनाभ्रमेण पापः पदमपि पुरश्चलितुमशक्तस्ततो देशाद्दूरं न्यवृतदित्यर्थः ॥

तावद्गतिर्धृताटोपा पादयोस्तेन संहिता ।
न वेदपाठिकण्ठेभ्यो यावदश्रावि संहिता ॥ १६५ ॥

तावदिति ॥ तेन कलिना वेदपाठीनां कण्ठेभ्यो मुखेभ्यो यावत्संहिता पदक्रमरूपावस्थाद्वयविलक्षणा ऋगादिरूपा नाश्रावि नाकर्णिता तावत्कालं तावद्देशपर्यन्तं च प्रतिबन्धराहित्याद्धृताटोपा धृतसंरम्भा सत्वरा पादयोर्गतिः संहिता संयोजिता । यावत्कालं यावति च देशे संहिता नाकर्णिता, तावत्कालं तावद्देशपर्यन्तं च प्रतिबन्धराहित्याच्छीघ्रगतिरभूत् । यदा यस्मिंश्च देशे सा श्रुता तदैव तस्य गतिभङ्गोऽभूदित्यर्थः । यावत्संहिताऽश्रावि, तावत्पदयोः सत्वरा गतिर्न योजिता, अपि तु तावदेव योजिता । संहिताश्रवणपर्यन्तमेव सत्वरगतिः सोऽभूत्, नानन्तरमित्यर्थ, इति वा ॥

तस्य होमाज्यगन्धेन नासा नाशमिवागमत् ।
तथातत दृशौ नासौ क्रतुधूमकदर्थितः ॥ १६६ ॥

तस्येति ॥ तस्य नासा अग्निहोत्रादिहोमाज्यं होमसंबन्धि घृतं तस्य गन्धेन परिमलेन हेतुना नाशमिव मरणवेदनामिवागमदन्वभूदित्युत्प्रेक्षा । इवशब्द एवकारार्थो वा । तथा तेनैव प्रकारेणासौ कलिः क्रतुधूमेन कदर्थिते पीडिते दृशौ नेत्रे अपि नासत प्रसारितवान्, किंचिन्न ददर्शेत्यर्थः । आज्यगन्धक्रतुधूमसंबन्धमात्रेण विव्यथ इत्यर्थः । अततेति ततोतेर्लुङि सिचि 'तनादिभ्यस्थाश्योः' इति पाक्षिके सिज्लोपे तकारस्य झलादिकित्त्वाद् 'अनुदात्तोपदेशवनति-' इत्यनुनासिकलोपः ॥

अतिथीनां पदाम्भोभिरिमं प्रत्यतिपिच्छिले ।
अङ्गणे गृहिणां तत्र स्खलेनानेन चस्खले ॥ १६७ ॥

अतिथीनामिति ॥ तत्र पुरेऽनेन स्खलेन कलिना गृहिणामङ्गणे चस्खले । यस्मादतिथीनां पदाम्भोभिश्चरणक्षालनोदकैरिमं पापरूपं कलिं प्रत्युद्दिश्यातिपिच्छिलेऽतितरां कर्दमयुक्ते । एवंविधमतिपवित्रमङ्गणं प्रवेष्टुं नाशकदित्यर्थः । अन्योपि पिच्छिले देशे पतति ॥

पुटपाकमसौ प्राप क्रतुशुष्ममहोष्मभिः ।
तत्प्रत्यङ्गमिवार्कर्तिं पूतोर्मिव्यजनानिलैः ॥ १६८ ॥

पुटेति ॥ असौ कलिः क्रतुशुष्मा यागसंबन्धी वह्निस्तस्य महो-

---

१ 'स ग्रहात्' इति पठित्वा 'स प्रसिद्धः कलिर्ग्रहाद् इठाद्बृहणवशाच्च, --इति सुखावबोधायां व्याख्यातम् । जीवातौ तु वर्तत एव नेप श्लोकः ।

प्मभिः प्रकृष्टतापैः कृत्वा पुटाभ्यां पुटयोर्वा पाकमुभयपार्श्वयोः पात्रादिसान्तरमग्निसंयोगमिव प्रापत्। प्रतिगृहं यागबाहुल्याद्वामदक्षिणपार्श्वयोर्यद्धितापैर्नितरां पीडामन्वभूदित्यर्थः। तथा—पूर्तानां धार्मिकनिर्मितवापीकूपतडागादीनामूर्मयस्तरङ्गास्तद्रूपाणि व्यजनानि तेषामनिलैर्वायुभिस्तस्य प्रत्यङ्गं सर्वाङ्गमकर्तीव छिन्नमिवाभूदित्युत्प्रेक्षा। प्रत्यवयवकर्तनेन च पीडातिशयाद्वाप्यादितरङ्गवायुस्पर्शमात्रेण नितरां व्यथितोऽभूदित्यर्थः। 'बर्हिः शुष्मा कृष्णवर्त्मा' इत्यमरः॥

पितॄणां तर्पणे वर्णैः कीर्णाद्वेश्मनि वेश्मनि।
कालादिव तिलात्कालादूरमत्रसदत्र सः॥१६९॥

पितॄणामिति॥ अत्र पुरे वेश्मनि प्रतिगृहं ब्राह्मणादिचतुर्वर्णैः पितॄणां तर्पणे जलसमर्पणे विषये कीर्णात्क्षिप्तात्पितृप्रियात्कालारकृष्णवर्णात्तिलात्सकाशात्स कलिः कालात्कृतान्तादिव दूरं नितरामत्रसद्भयमाप। 'तर्पणैः' इति पाठे—तर्पयन्तीति तर्पणैरिति वर्णविशेषणम्। तिलादिति जातायेकवचनम्॥

स्नातॄणां तिलकैर्मेने स्वमन्तर्दीर्णमेव सः।
कृपाणीभूय हृदयं प्रविष्टैरिव तत्र तैः॥ १७०॥

स्नातॄणामिति॥ स कलिः स्नातॄणां स्नानं कुर्वतां वैदिकानां तैस्तादृशैर्गोपीचन्दनादिरचितैर्ललाटादिस्थानस्थैर्द्वादशभिस्तिलकै कृपाणीभूय खड्गतामङ्गीकृत्य तस्य कलेर्हृदयं विदार्य प्रविष्टैरिव स्वं स्वकीयमन्तः शरीरमध्यं दीर्णमेव शकलीभूतमेव मेने। कृपाणैर्हि विदारणं भवतीति युक्तम्। खड्गाकारांस्तिलकान्दृष्ट्वा विव्यथ इत्यर्थः॥

पुमांसं मुमुदे तत्र विंदन्मिथ्यावदावदम्।
स्त्रियं प्रति तथा वीक्ष्य तमथ म्लानवानयम् १७१

पुमांसमिति॥ तत्र पुरेऽयं पुमांसं मिथ्यावदावदं मृषाभाषिणं विदञ्जानन्स्वमित्रलाभान्मुमुदे। अथ पश्चात्तं नरं स्वस्त्रियं प्रत्युद्दिश्य तथाऽलीकभाषिणं वीक्ष्य ज्ञात्वा मित्रनाशादिव दुःखवशान्म्लानवान्म्लानतां गतः। पत्नीं प्रति क्रीडायामसत्यदोषाभावाद्व्यथितोऽभूदित्यर्थः। 'न नर्मयुक्तं वचनं हिनस्ति स्त्रीपुंसयोः—' इति भारतादौ। विदन् 'विदेः शतुर्वसुः' इत्यत्र विकल्पानुवृत्तेर्वसोरभावः। एवं 'चतुर्दशतयीं विद्यां विदद्भिः—' इत्यत्रापि ज्ञेयम्। षदावदं 'चरिचलि—' इत्यादिना द्वित्वमभ्यासस्याक। म्लानवान् क्तवतोस्कारस्य 'संयोगादेरातः—' इति नः॥

यज्ञयूपघनां जज्ञौ स पुरं शङ्कुसंकुलाम्।
जनैर्धर्मधनैः कीर्णां व्यालक्रोडीकृतां च ताम्१७२

यज्ञेति॥ स यज्ञयूपैः खादिरौदुम्बरपशुबन्धस्तम्भैर्घनां नितरां व्याप्तां तां पुरं शङ्कुभिस्तीक्ष्णाग्रकीलैः संकुलां व्याप्तामिव जज्ञौ मेने। तथा—धर्मधनैर्जनैः कीर्णां तां पुरं व्यालैः सर्पैर्दुष्टश्वापदैर्वा दुष्टगजैर्वा क्रोडीकृतां सर्वत्र पूर्णां व्यालाः क्रोडे मध्ये यस्यास्तामेतादृशीं कृतामिव मेने। कीलसर्पादिभिर्व्याप्तं स्थानं यथा प्रवेष्टुमशक्यम्, तथा सा पुरी तस्य प्रवेष्टुमशक्या जातेत्यर्थः। 'व्यालो भुजंगमे क्रूरे श्वापदे दुष्टदन्तिनि' इति विश्वः। रेफान्तः पूःशब्दः स्त्रीलिङ्गः। चः समुच्चयार्थ इवार्थो वा॥

स पार्श्वमशकद्गन्तुं न वराकः पराकिणाम्।
मासोपवासिनां छायालङ्घने घनमस्खलत् १७३॥

स इति॥ वराकः क्वचिदपि स्थानालाभादीनः स कलिः पराकिणां द्वादशरात्रोपवासरूपपराकाख्यकृच्छ्रविशेषव्रतचारिणां पार्श्वं गन्तुं नाशकत्। तथा—मासोपवासिनां कायप्रतिच्छायाया अपि लङ्घनेऽतिक्रमणे तस्या अपि समीपे गन्तुं घनं नितरामस्खलद्भ्रमत्पदोऽभूत्। तच्छायामपि द्रष्टुं नाशकदित्यर्थः। वराकः 'जल्पभिक्ष—' इति पाकन्॥

आवाहितं द्विजैस्तत्र गायत्रीमर्कमण्डलात्।
स संनिदधतीं पश्यन्दृष्टनष्टोऽभवद्भिया॥ १७४॥

आवाहितामिति॥ तत्र पुरे स द्विजैस्त्रैवर्णिकैः 'आगच्छ वरदे-' इत्यादिमन्त्रैरावाहिताम् अनन्तरमर्कमण्डलाद्भक्त्यतिशयसामर्थ्यात्सूर्यबिम्बान्निर्गत्य दिव्यरूपेण संनिदधतीं तत्समीपमागच्छन्तीं प्रातःसंध्याधिदेवतां गायत्रीं पश्यन्गायत्र्याः सकाशाद्भयेन गायत्र्यैवादौ दृष्टः पश्चात्तदानीमेव नष्टोऽदृश्योऽभवत्। संध्यावन्दनं कुर्वतो द्विजान्दृष्ट्वा गायत्री मां विनाशयिष्यतीति ततः स्थानात्पलाय्य गत इत्यर्थः। 'गायत्री सूर्यबिम्बस्था—'इति ध्यानम्। अर्कमण्डलादावाहितामिति वा। दृष्टनष्टः 'पूर्वकाल—' इति समासः॥

स गृहे गृहिभिः पूर्णे वने वैखानसैर्घने।
यत्याधारेऽमरागारे क्वापि न स्थानमानशे॥१७५॥

स इति॥ स गृहिभिर्गृहस्थैः पूर्णे गृहे, तथा—वैखानसैर्वानप्रस्थैर्घने व्याप्ते वने, तथा—यतीनां परमहंसानां संन्यासिनामाधार आश्रयभूतैर्व्याप्तेऽमरागारे। क्वापि कस्मिन्नपीति सर्वत्र योज्यम्। देवालये स्थानं न आनश आश्रयं न प्राप। गृहिभिर्गृहे पूर्णे सतीति सतिसप्तमी वा सर्वत्र॥

क्वापि नापश्यदन्विष्यन्हिंसामात्मप्रियामसौ।
स्वमित्र तत्र न प्राप्नोदपि मूर्खमुखे कलिम्॥१७६॥

क्वापीति॥ असौ कलिस्तत्र पुर आत्मनः प्रियामिष्टां निषिद्धां हिंसाम्। अथ च—स्त्रियम्। अन्विष्यन्नपि क्वापि कस्मिन्नपि देशे नापश्यत्। तथा—कलहप्रियत्वान्नामसाम्याच्च स्वस्य मित्रं कलिं कलहं मूर्खाणामपि मुखे संभाविते स्थले नाप्नोत्। मूर्खा अपि तत्र न कलहायन्ते हिंसाकलहयोरभावात्तत्र स्थितिं न लेभ इत्यर्थः। अन्योऽपि यत्र स्वस्त्रीमित्राद्यभावस्तत्र क्षणमपि न तिष्ठतीत्युक्तिः॥

हिंसागवीं मखे वीक्ष्य रिरंसुर्धावति स्म सः।
सा तु सौम्यवृषासक्ता खरं दूराभिरास तम् १७७

हिंसेति॥ मखे गोमेधाख्ये यज्ञे हिंसागवीं हिंसासंबन्धिनीं गवीं वीक्ष्य रिरंसुर्हृष्टचित्तः स 'निषिद्धगोहिंसा मत्प्रिया' इति

---

१ 'विन्दन्' इत्यपि पाठः सुखावबोधायाम्। २ 'व्याड' इत्यपि पाठः सुखावबोधायाम्।

धावति स्म । सा तु हन्यमाना गौः पुनः सौम्ये सोमदेवताकद्रव्यसाध्ये वृषे धर्मे आसक्ता तत्संबन्धिनी तत्साधिका सती । अभिचारादिदुष्टकर्मराहित्यात्सौम्यो रमणीयः पारलौकिको धर्मस्तत्साधिका वा । खरं पापरूपत्वादुःसहं । रलयोरभेदात्खलं वा । पापरूपं दूरादेव निरास निराचकार । अधर्मसाधनं गोहिंसादि दृष्ट्वा प्रवृत्तेः पश्चाद्धर्मसाधनमग्नीषोमीयवैदिकपशुहिंसादि दृष्ट्वा मन्प्रिया हिंसा न भवतीति दूरात्परावृत्त इत्यन्वयः । 'मुखे' इति पाठे—हिंसाप्रतिपादिकां गां वाणीं यज्वनां मुखे वीक्ष्य । श्रुत्वेति यावत् । रिरंसुरधावत् । सा तु वाणी सौम्यप्रतिपादका सती तमखरम् 'अग्नीषोमीयं पशुम्–' इत्यादिवाक्याकर्णनमात्रेण दुःखवशान्निम्नेजस्कं दूरान्निरासेति वा । अथ च—कामातुरः सुरतेच्छुः खरो गर्दभो गां वीक्ष्य यद्यपि धावति, तथापि सा रमणीयवृषभानुरक्ता सती विजातीयत्वाद्गर्दभं दूरान्निराचकारेति । मुखे यज्ञप्रारम्भ इति वा । अथच—गौर्यथा सौम्यं वृषभमनुसरन्ती क्रूरं वृषभं त्यजति । 'सुकृते वृषभे वृषः' इत्यमरः । हिंसागवीति 'गोरतद्धित–' इति टच् ॥

मौनेन व्रतनिष्ठानां स्वाक्रोशं मन्यते स्म सः ।
वन्द्यवन्दारुभिर्जज्ञौ स्वशिरश्च पदाहतम् ॥ १७८ ॥

मौनेनेति ॥ स कलिर्व्रतनिष्ठानां वाग्यमव्रतिनां संध्यादिजपमौनिनां वा मौनेन वाङ्नियमेन कृत्वा स्वस्याग्रत आक्रोशं गालीप्रदानमेव मन्यते स्म । तथा—वन्द्येषु नमस्कारार्हेषु गुर्वादिषु वन्दारुभिर्नमस्कुर्वद्भिर्नरैः स्वशिरश्च पदाहतं चरणताडितमिव जज्ञावशासीत् । च इवार्थो वा । वन्दारुः 'शृवन्द्योरारुः' इत्यारुः । 'वन्द्यान्' इति पाठे—तद्योगे 'न लोका–' इति षष्ठीनिषेधाद्द्वितीया ॥

ऋषीणां स वृसीः पाणौ पश्यन्नाचामतामपः ।
मेने घनैरमी हन्तुं शस्तुं मामद्भिरुद्यताः ॥ १७९ ॥

ऋषीणामिति ॥ स कलिः ऋषीणां पाणौ हस्ते वृसीः कुशमानानि पश्यन् 'अमी ऋषयो घनैर्लोहमुद्गरैर्मां हन्तुमुद्यताः' इति मेने । तथा—आचामतां तेषामेव हस्ते आचमनार्थं गृहीता अपः पश्यन् अमी मामद्भिश्च 'त्वं भस्मसाद्भव' इति शस्तुमुद्यता इति मेने । ततोऽप्यतिभयेनापासरदित्यर्थः । केषांचिद्धस्ते वृसीः, केषांचिद्धस्तेऽपः पश्यन्निति वा । हन्तुमिव, शस्तुमिवेति प्रतीयमानोत्प्रेक्षा । 'स कुशान्' इति पाठे—कुशानपश्च पश्यन्नित्यर्थः । अत्र दैर्घ्यात्कुशा एव घनतुल्याः । आचामतां 'ष्टिवुक्लमु–' इति दीर्घः ॥

मौञ्जी धृतो धृतापाढानाशशङ्के स वर्णिनः ।
रज्ज्वामी बन्द्धुमायान्ति हन्तुं दण्डेन मां ततः ॥ १८० ॥

मौञ्जीति ॥ स कलिर्मौञ्जीधृतो मुञ्जतृणमेखलाधारिणः तथा—धृत आषाढः पालाशदण्डो यैस्तान्वर्णिनो ब्रह्मचारिणः एवंभूतानाशशङ्के मेने । अमी पुरुषा रज्ज्वा मां बन्द्धुं ततो बंधानन्तरं च दण्डेन मां हन्तुमायान्तीति । मौञ्जीधृतो धृतापाढा एते ब्रह्मचारिणो न भवन्ति, किंतु मां रज्ज्वा बन्द्धुम्, दण्डेन हन्तुमायान्तीत्याशशङ्क इति वा । 'धृतापाढाश्चा–' इति पाठे—एवंभूता ब्रह्मचारिण इति नाशशङ्के, किंत्वित्युत्तरार्धम् । 'पालाशो दण्ड आषाढः' 'वर्णिनो ब्रह्मचारिणः' इत्यमरः । मौञ्जी विकारेम् । वर्णोऽस्येषाम् 'वर्णाद्ब्रह्मचारिणि' इतीनिः ॥

दृष्ट्वा पुरः पुरोडाशमासीदुत्त्रासदुर्मनाः ।
मन्वानः फणिनीस्तत्र स मुमोचास्रु च स्रुचः ॥ १८१ ॥

दृष्ट्वेति ॥ स तत्र पुरि पुरोऽग्रेऽभशफमात्रं पुरोडाशमष्टाशकपालादिसंस्कृतं पशुशरीरावयवं दृष्ट्वा उत्त्रासेनोत्कृष्टभयेन दुर्मना दुःखित आसीत् । तथा—स्रुचः सर्पफणाकारपुरोभागा वैकङ्कतादीर्जुहूः फणिनी. सर्पिणीर्मन्वानोऽस्रु मुमोच । दंशनभिया रुरोदेत्यर्थः । पुरोडाशोऽकारान्तः । 'पुरोडाशभुजामिष्टम्' इति माघे ॥

मुमुदे मदिरादानं विदन्नेष द्विजन्मनः ।
दृष्ट्वा सौत्रामणीमिष्टिं तं कुर्वन्तमदूयत ॥ १८२ ॥

मुमुद इति ॥ एष द्विजन्मनो ब्राह्मणस्य मदिरादानं मदिरास्वीकारं विदन्नानन्पश्यन् 'अयं महापातकी' इति बुद्ध्या मुमुदे । अनन्तरं च सौत्रामणीमिष्टिमिन्द्रदेवताकं यागं कुर्वन्तं तं द्विजं दृष्ट्वाऽदूयत । 'सौत्रामण्यां सोमग्रहान्सुराग्रहांश्च गृह्णन्ति' इति श्रुतेर्मदिरादानस्य वैधत्वालब्धाश्रयविनाशादिव विव्यथ इत्यर्थः । सौत्रामणी देवतार्थे संबन्धमात्रे वाण 'अन्' इति प्रकृतिभावः ॥

अपश्यद्यावतो वेदविदां ब्रह्माञ्जलीनसौ ।
उदडीयन्त तावन्तस्तस्यास्राञ्जलयो हृदः ॥ १८३ ॥

अपश्यदिति ॥ असौ वेदविदां यावतो यावत्संख्याकान्बहून्ब्रह्माञ्जलीन्ब्रह्मयज्ञसमये क्रियमाणान्, हस्तस्वरूपनार्थं संयोजितान्करपुटान्वा, सूर्योपस्थायिनां गायत्रीमन्त्रजपाञ्जलीन् 'प्रतारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा । संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः,' इति मनूक्तलक्षणान्करसंपुटानपश्यत् । तावन्तस्तस्य कलेर्हृदः सकाशादस्राञ्जलयो रक्तपूर्णा अञ्जलय उदडीयन्त उत्पतिता निर्गताः । तद्दर्शनमात्रेण नितरां विदीर्णहृदयोऽभूदित्यर्थः । 'तदस्र–' इति पाठ उपेक्ष्यः ॥

स्नातकं घातकं जज्ञे जज्ञौ दान्तं कृतान्तवत् ।
वाचंयमस्य दृष्ट्येव यमस्येव बिभाय सः ॥ १८४ ॥

स्नातकमिति ॥ स विद्यास्नातकम्, व्रतस्नातकम्, उभयस्नातकं च स्वस्य घातकं विश्वासघातिनं जज्ञे मेने । तथा—दान्तं तपःक्लेशसहं जितेन्द्रियं नरं कृतान्तवद्यममिव भयहेतुं जज्ञौ ज्ञातवान् । तथा—वाचंयमस्य मौनिनो दृष्ट्येव दर्शनमात्रेण मौनिकर्तृकस्वकर्मक—स्वकर्तृकमौनिकर्मकदर्शनेनेव वा बिभायात्रसत् । कस्येव—यमस्येव । यमकर्तृकस्वकर्मक—स्वकर्तृकयमकर्मकदर्शनेनेव । यमेन दृष्टे, यमे वा दृष्टे, यथा भयं, तथा मौनिन इत्यर्थः । 'स्नातकस्त्वाप्लुतो व्रती' 'तपःक्लेशसहो दान्तः' इत्यमरः । 'गुरवे तु वरं दत्वा स्नायाच्च तदनुज्ञया । वेदव्रतानि वा पारं नीत्वा उभयमेव वा' इति याज्ञवल्क्यः । स्नातीति स्नातकः याजकादिस्वात्साधुर्णुलन्तः । घातकं हन्तेर्ण्वुलि 'हनस्ता' । जज्ञौ जज्ञ इति

१ 'अनन्दत' इति सुखावबोधाख्यपाठः ।

ज्ञानातेः कर्त्रभिप्रायक्रियाफलविवक्षया 'शेषात्कर्तरि–' इति परस्मैपदम् । तद्विवक्षया तु 'अनुपसर्गाज्ज्ञः' इति तङ् । दृष्टयेति भयहेतुत्वाविवक्षयानपादानत्वम् ॥

स पाखण्डजनान्वेषी प्राप्नुवन्वेदपण्डितान् ।
जलार्थीवानलं प्राप्य पापस्तापादपासरत् ॥ १८५ ॥

स इति ॥ स पाखण्डजनान्वेषी स्वपक्षीयान्वेददूषकान्विचारयन्सन् वेदेषु पण्डिताञ्श्रोतस्मार्तकर्मठान्प्राप्नुवन्पश्यंस्तापादतिदुःखाद्धेतोरपासरत्पलायितः । यतः—पापरूपः । क इव—अनलं प्राप्य जलार्थीव । तृषितो जलं विचिन्वन्नग्निं प्राप्यौष्ण्याद्दूरं पलायते ॥

तत्र ब्रह्महणं पश्यन्नतिसंतोषमानशे ।
निर्वर्ण्य सर्वमेधस्य यज्वानं ज्वरति स्म सः ॥ १८६ ॥

तत्रेति ॥ स तत्र ब्रह्महणं नरं पश्यन्महापातकित्वादात्माश्रयादतितरां संतोषमानशे प्राप । अनन्तरं सर्वमेधाख्यस्य यज्वानं तं प्रोक्षणावदानादिसंस्कारादिकर्मणा निर्वर्ण्य निर्धार्य ज्वरति स्म नितरां संतप्तोऽभूत् । सर्वमेधे हि तत्तज्जातीयैकैकप्राणिहिंसाधिकारात् 'ब्राह्मणो ब्राह्मणमालभेत' इति ब्रह्मवधस्य वैधत्वान्निराश्रयत्वात्संतप्त इत्यर्थः । ब्रह्महणम् 'ब्रह्मभ्रूण–' इति क्विप् । ज्वरतिर्भ्वादिः ॥

यतिहस्तस्थितैस्तस्य राम्भैरारम्भि तर्जना ।
दुर्जनस्याजनि क्लिष्टिर्गृहिणां वेदयष्टिभिः ॥ १८७ ॥

यतीति ॥ यतीनां संन्यासिनां हस्तस्थितैः राम्भैर्वेणुदण्डैस्तस्य कलेस्तर्जना भर्त्सना आरम्भ्यकारि । तथा—गृहिणां गृहस्थानां वेदैरेव यष्टिभिर्दण्डैर्वेदानां क्रमजटारूपाभिर्वा यष्टिभिस्तस्य दुर्जनस्य क्लिष्टिः क्लेशोऽजनि । राम्भयष्टीर्दृष्ट्वा भीत इत्यर्थः । 'राम्भस्तु वैणवः' इत्यमरः । रम्भो वेणुः 'तस्येदम्' इत्यण् । क्लिष्टिः 'तिसृभ्र–' इतीण्निषेधः ॥

मण्डलत्यागमेवैच्छद्वीक्ष्य स्थण्डिलशायिनः ।
पवित्रालोकनादेष पवित्रासमविन्दत ॥ १८८ ॥

मण्डलेति ॥ एष स्थण्डिलशायिनो वेदिकाशयनव्रतचारिणो नरान्वीक्ष्य मण्डलस्य तद्राष्ट्रस्य त्यागमेवैच्छत् । तथा—पवित्राणां यज्ञोपकरणादीनामालोकनात्पवेर्वज्रात्त्रासस्तमविन्दत प्राप । ततोऽपि महद्भयमापेत्यर्थः । 'अगर्भौ साग्रौ दर्भौ पवित्रम्' इति कात्यायनः । स्थण्डिल एव शेते व्रतवशात्स स्थण्डिलशायी 'व्रते' इतीनिः ॥

अपश्यज्जिनमन्विष्यन्नजिनं ब्रह्मचारिणा ।
क्षपणार्थी सदीक्षस्य स चाक्षपणमैक्षत ॥ १८९ ॥

अपश्यदिति ॥ स जिनं बौद्धविशेषं स्वमित्रमन्विष्यन्ब्रह्मचारिणामजिनं कृष्णमृगचर्मोत्तरासङ्गमपश्यत् । क्षपणेन दिगम्बरेण वेदबाह्येनार्थी (व) प्रयोजनार्थी तमपि गवेषयन्यज्ञदीक्षासहितस्य यज्वनोऽक्षपणं दीक्षाङ्गधर्मपरित्यागाभावमैक्षत । यद्वा—अक्षाभ्यां पाशकाभ्यां पणं क्रीडां पाशकसंबन्धिजयपराजयदेयं राशीकृतं धनं ददर्श । 'राजसूये यजमानोऽक्षैर्दीव्यति' इति श्रुतेर्विहितत्वाद्यृतं युक्तम् । वैधं सर्वं दुःखदं स्वस्यामित्रमेव ज्ञातवान्, नतु मित्रमित्यर्थः । पणं 'नित्यं पणः' इत्यप् ॥

जपतामक्षमालासु बीजाकर्षणदर्शनात् ।
स जीवाकृष्टिकष्टानि विपरीतदृगन्वभूत् ॥ १९० ॥

जपतामिति ॥ स जपतां नराणामक्षमालासु पद्माक्षरुद्राक्षादिमणिनिर्मितजपमालिकासु वर्तमानानां पद्माक्षादिबीजानां जपगणनार्थमाकर्षणं तस्य दर्शनाद्धेतोर्जीवानां प्राणानामाकृष्टिराकर्षणं तया जातानि कष्टानि दुःखान्यन्वभूत् । यस्माद्विपरीतदृक् विरुद्धदर्शी सर्वहितं धर्ममहितत्वेन । जानानस्तादृग्धर्मदर्शनमात्रेण महदुःखमन्वभूदित्यर्थः । अथ च—विपरीतदर्शनशीलत्वाद्बीजेत्यत्र व्यञ्जनमात्रव्यत्ययेन, बवयोः सावर्ण्येन च जीवेति भवतीति जीवाकृष्टिकष्टानुभवनं युक्तम् ॥

त्रिसंध्यं तत्र विप्राणां स पश्यन्नघमर्षणम् ।
वरमैच्छद्दृशोरेव निजयोरपकर्षणम् ॥ १९१ ॥

त्रिसंध्यमिति ॥ स तत्र त्रिसंध्यं प्रातर्मध्याह्नसायाह्नरूपं संध्यात्रयमभिव्याप्य विप्राणामघमर्षणम् 'ऋतं च–' इति ऋग्भिर्नासास्पर्शाभिमन्त्रितं चुलुकोदकं तत्प्रक्षेपोदकं वा पश्यन्निजयोर्दृशोरपकर्षणमुन्मूलनमेव वरं श्रेष्ठमित्यैच्छत् । मदीयनेत्रे यदि कोप्युदमूलयिष्यत् तर्ह्येतद्दुःखमूलं नाद्रक्ष्यत । तस्मान्नेत्रोन्मूलनमेव वरमिति मेन इत्यर्थः । तदपि दृष्ट्वा दुःखितोऽभूदिति भावः । अघमर्षणदर्शनव्यथा नेत्रापकर्षणव्यथातुल्या । त्रिसंध्यमत्यन्तसंयोगे द्वितीया ॥

अद्राक्षीत्तत्र किंचिन्न कलिः परिचितं क्वचित् ।
भैमीनलव्यलीकाणुप्रश्नकामः परिभ्रमन् ॥ १९२ ॥

अद्राक्षीदिति ॥ भैमीनलयोर्व्यलीकस्यानृतस्याणु दोषलेशमपि प्रष्टुकामः प्रष्टुं वाञ्छन् । अत एव तत्र पुरे कथकस्वमित्रगवेषणार्थं परिभ्रमन्परितो विचरन्स कलिः क्वचिदपि स्थाने किंचिदपि स्वस्य परिचितं जिनक्षपणादिमित्रं नाद्राक्षीत् । नलेन भैम्या वा तत्रस्थेन जनेन वा कृतेषु क्वचिदपि केषुचिदपि महापातकोपपातकादिषु मध्ये किंचिदपि परिचितपातकं नाद्राक्षीत् । 'त्वया भैमी नलोऽत्यन्तलोको वा स्पृष्टः किम्' इति कलिर्यं पृच्छति। तदेकमपि पापं नास्त्येवेति भाव इति वा ॥

तपःस्वाध्याययज्ञानामकाण्डद्विष्टतापसः ।
स्वविद्विषां श्रियं तस्मिन्पश्यन्नुपतताप सः ॥ १९३ ॥

तप इति ॥ पञ्चाग्निसाधनादि तपः, वेदपाठरूपः स्वाध्यायः, देवतोद्देशेन द्रव्यत्यागो यागो यज्ञः, एषां स्वस्य पापरूपत्वाद्विद्विषां वैरिणां तस्मिन्पुरे श्रियं समृद्धिं बाहुल्यं पश्यन्नकाण्डं निष्कारणमेव द्विष्टास्तापसा येन स कलिरुपतापातिदाहमाप । अतिदुःखितोऽभूदित्यर्थः । अन्योपि स्ववैरिलक्ष्मीं पश्यन्नुपतप्यते । यज्ञापेक्षया स्वाध्यायस्याभ्यर्हितत्वात्पूर्वनिपातः ॥

कम्रं तत्रोपनम्राया विश्वस्या वीक्ष्य तुष्टवान् ।
स मम्लौ तं विभाव्याथ वामदेव्याभ्युपासकम् ॥ १९४

कम्रमिति ॥ स तत्र पुरे उपनम्राया उपासकस्य समीपमागत्य स्थितायाः स्वजातीयाया विजातीयाया गम्याया अगम्याया वा विश्वस्याः सर्वस्याः स्त्रियाः कम्रं कामुकं तां संभुञ्जानं कंचन नरं वीक्ष्य अयं महापातकी ममाश्रयो भविष्यतीति बुद्ध्या तुष्टवान् । अथ पश्चाद्विचारणायां क्रियमाणायां तं कम्रं वामदेवेन मुनिना दृष्टं ब्रह्मसाम 'कयानश्चित्र–' इत्यादि वामदेव्यं नाम साम तस्य ब्रह्मविद्याया अभ्युपासकं विभाव्य मत्वा मम्लौ दुःखितोऽभूत् । 'वामदेव्योपासने सर्वाः स्त्रिय उपसीदन्ति' इति श्रुतिः । 'दृष्टं साम' इत्यर्थे 'वामदेवाड्ड्यड्ड्यौ' इति ड्यः ॥

वैरिणी शुचिता तस्मै न प्रवेशं ददौ भुवि ।
न वेदध्वनिरालम्बमम्बरे विततार वा ॥ १९५ ॥

वैरिणीति ॥ शुचिता लोकानां बाह्याभ्यन्तरशुचिता मनःशुद्धिर्गोमयाद्यनुलेपनजनिता च शुचिता भुवि प्रवेशं तस्मै न ददौ । यस्मादशुचेस्तस्य वैरिणी । नगरमध्ये सर्वेषां जनानां भूमेश्च शुचित्वात्स्थातुं नाशकदित्यर्थः । तथा—वेदध्वनिरम्बरे शब्दाश्रये नग(र)संबन्ध्युपरितनाकाशदेशे आलम्बमाश्रयं न विततार । अम्बरस्य वेदध्वन्याश्रयत्वात्तत्रापि स्थातुं नाशकदित्यर्थः । वा समुच्चये । अन्योपि वैरिणे स्थानं न ददाति ॥

दर्शस्य दर्शनात्कष्टमग्निष्टोमस्य चानशे ।
जुघूर्णे पौर्णमासेक्षी सोमं सोमन्यतान्तकम् ॥१९६

दर्शस्येति ॥ स दर्शस्याग्निष्टोमस्यामावास्यायागस्य दर्शनात्कष्टं महद्दुःखमानशे प्राप । तथा—पौर्णमासंयागमीक्षते एवंशीलः सन् जुघूर्णे बभ्राम । तद्दर्शनेन मुमूर्च्छेत्यर्थः । सोमयागं त्वन्तकमेवामन्यत । तद्दर्शनान्मरणमेवान्वभूदित्यर्थः । अन्यस्यापि ज्वरादिपीडा, पश्चान्मूर्च्छा, अनन्तरं च मरणं भवति ॥

तेनादृश्यन्त वीरघ्ना न तु वीरहणो जनाः ।
नापश्यत्सोभिनिर्मुक्ताञ्जीवन्मुक्तानवैक्षत ॥१९७॥

तेनेति ॥ तेन कलिना वीराञ्शूरान्घ्नन्तीति क्षात्रधर्मजीविनो धार्मिका अदृश्यन्त । वीराञ्श्रेष्ठानाचारवतो घ्नन्तीति वीरहणो जना न दृष्टाः । शूरा एव यैर्हन्यन्ते, न तु सदाचाराः । तादृशा महावीरा एव तत्र तेन दृष्टा इत्यर्थः । यद्वा—वीरयते शूरो भवति वीरोऽतितेजस्वी वह्निस्तं घ्नन्त्युपेक्षया नाशयन्तीति वीरहणो नष्टाग्नयस्ते पुनर्न दृष्टाः । सर्वोपि गृहस्थः साग्निक एव तत्रेत्यर्थः । तथा—सोऽभिनिर्मुक्तान् येषु सुप्तेषु सूर्योस्तमेति तादृशान्सूर्यास्तमयसमये निद्रिताननाचारांस्तत्र नापश्यत् । किंतु—जीवन्तश्च ते मुक्ताश्च तान्विषयपरित्यागिनोऽब्रह्मज्ञानिनोऽवैक्षत । वीरघ्ना वीरहननयोग्या दृष्टाः न तु ये वीरान्हतवन्तस्ते दृष्टाः । वीरमारणमपि तत्र राष्ट्रे न क्रियत इत्यर्थ इति वा । 'सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च । अंशुमानभिनिर्मुक्ताभ्युदितौ तु यथाक्रमम्' इत्यमरः । वीरघ्नाः मूलविभुजादित्वात्कः ॥

स तुतोषाश्नतो विप्रान्दृष्ट्वा स्पृष्टपरस्परान् ।
होमशेषीभवत्सोमभुजस्तान्वीक्ष्य दूनवान् ॥१९८॥

स इति ॥ स विप्रान्स्पृष्टं परस्परं यैस्तानन्योन्यस्पर्शिनोऽश्नतो भुञ्जानान्दृष्ट्वा तुतोष । उच्छिष्टानां मिथः स्पर्शनिषेधात्तदतिक्रमकारिणः स्वाश्रयत्वेन संभाव्य हृष्ट इत्यर्थः । अनन्तरं होमशेषीभवन्होमावशिष्टः सोमस्तं भुञ्जते सोमलताचूर्णं भुञ्जानांस्तान्वीक्ष्य विचार्य दूनवान्व्यथितोऽभूत् । 'न सोमेनोच्छिष्टो भवति' इति श्रुतेः । 'इक्षुदण्डे तिले सोमे नोच्छिष्टं मनुरब्रवीत्' इति स्मृतेश्च सोमभक्षणेऽनुच्छिष्टत्वादन्योन्यस्पर्शेपि पापाभावाद्दुःखितोभूदित्यर्थः ॥

श्रुत्वा जनं रजोजुष्टं तुष्टिं प्राप्नोज्झटित्यसौ ।
तं पश्यन्पावनस्नानावस्थं दुःस्थस्ततोऽभवत् १९९

श्रुत्वेति ॥ असौ कंचन जनं रजोजुष्टं धूलिमलिनं श्रुत्वा निषिद्धस्त्रीरजःस्पर्शबुद्ध्या खरादिनिषिद्धरजःस्पर्शबुद्ध्या दृष्ट्वा स्वाश्रयाशया झटिति शीघ्रं तुष्टिं प्राप्नोत् । ततोऽनन्तरं विचारावसरे पवनसंबन्धि पवित्रं च यद्गोरजःस्नानं तत्र तेन वाऽवस्था स्थितिर्यस्य तत्र वाऽवतिष्ठते तं पश्यन्दुःस्थो दूनोऽभवत् । 'वारुणं तु जलस्नानमापोहिष्ठेति मान्त्रिकम् । वायव्यं गोरजःस्नानमाग्नेयं भस्मनोदितम् । यत्तु सातपवर्षेण दिव्यं तदिति पञ्चधा' इति मनुः । पावनस्नानस्य धर्म्यत्वाद्दूनोऽभूदित्यर्थः । प्राप्नोत् लङ् । 'प्राप्तः' इति च पाठः ॥

अधावत्क्वापि गां वीक्ष्य हन्यमानामयं मुदा ।
अतिथिभ्यस्तथा बुद्ध्वा मन्दो मन्दं न्यवर्तत ॥२००॥

अधावदिति ॥ अयं क्वापि यज्ञशालायां गृहे वा हन्यमानां गां वीक्ष्य स्वाश्रयाशया मुदाऽधावत् अनन्तरं तु पुनस्तां गामतिथिभ्योऽभ्यागतार्थं हन्यमानां बुद्ध्वा मन्दो मूर्खोऽसौ दुःखवशान्मन्दं शनैर्न्यवर्तत परावृत्तः । क्षणमपि तत्र स्थातुमशक्तः सन्नमन्दं शीघ्रं परावृत्त इति वा । 'महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्' इति स्मृतेः ॥

हृष्टवान्स द्विजं दृष्ट्वा नित्यनैमित्तिकत्यजम् ।
यजमानं निरूप्यैनं दूरं दीनमुखोऽभवत् ॥२०१॥

हृष्टवानिति ॥ स द्विजं नित्यानि संध्यास्नानादीनि, नैमित्तिकानि ग्रहणस्नानादीनि त्यजति तमकुर्वाणं दृष्ट्वा हृष्टवान्स्वाश्रयाशया जहर्ष । अनन्तरमेनं यजमानं यागे कृतदीक्षं निरूप्य निश्चित्य निराशत्वाद्दीनमुखः सन् अद्रवत्तस्मात्प्रदेशाद्दूरं पलायांचक्रे । 'दीक्षितो न ददाति न जुहोति' इत्यादिश्रुतेर्नित्यनैमित्तिककर्मत्यागस्य वैधत्वाद्दोषाभावात्ततोपि पलायित इत्यर्थः । नैमित्तिकः, आगतार्थे भवार्थे वा ठक् ॥

आननन्द निरीक्ष्यायं पुरे तत्रात्मघातिनम् ।
सर्वस्वारस्य यज्वानमेनं दृष्ट्वाथ विव्यथे ॥२०२॥

आननन्देति ॥ अयं तत्र पुर आत्मघातिनं कंचन निरीक्ष्याननन्द । 'सर्वत एवात्मानं गोपायेत्' इति विध्यतिक्रमात्पापकार्ययं ममाश्रयः स्यादिति बुद्ध्या जहर्षेत्यर्थः । अथ विचारणायां सत्यामेनमात्मघातिनं नाम्ना सर्वस्वारस्य यज्ञस्य यज्वानं यजमानं दृष्ट्वा ज्ञात्वा विव्यथे । आसन्नमरणो ह्यविचिकित्स्यरोगादिस्तत्रा-

धिकारी। 'सोन्त्येष्टौ सर्वस्वाराख्ये यज्ञे आत्मानमेव पशुमत्रैः संस्कृतं घातयित्वा यज्ञभागमर्पयति' इति श्रुतिः। वैधत्वादात्मघातदोषाभावाद्व्यथित इत्यर्थः। आत्मघातिनं, ताच्छील्ये णिनिः॥

ऋतौ महाव्रते पश्यन्ब्रह्मचारीत्वरीरतम्।
जज्ञे यज्ञक्रियामज्ञः स भण्डाकाण्डताण्डवम्॥२०३

ऋताविति॥ स महाव्रताख्ये ऋतौ ब्रह्मचारी चेत्वरी च तयो रतं मैथुनं पश्यन्यज्ञक्रियां भण्डानामसत्यभाषणादिव्यापारशीलानामकाण्डताण्डवमसमयोद्धतनृत्तमिव जज्ञे मेने। यतोऽज्ञो मूर्खः। भण्डा यथा बहुजनसमक्षं गुह्यादि प्रकाशयन्ति, तथा—दिवैव बहुजनसमक्षमश्लीलव्यापारकरणाद्यागकर्म भण्डव्यापारतुल्यमिति यज्वानः सर्वेऽप्यसभ्या इति मेन इत्यर्थः। 'महाव्रते ब्रह्मचारिपुंश्चल्योः संप्रवादः' इत्युपनिषत्। एति तच्छीलेत्वरी स्त्रैरिणी 'इण्नश-' इति क्वरपि तुकि च 'टिड्ढाणञ्-' इति ङीप्॥

यज्वभार्याश्वमेधाश्वलिङ्गालिङ्गिवराङ्गताम्।
दृष्ट्वाचष्ट स कर्तारं श्रुतेर्भण्डमपण्डितः॥२०४॥

यज्वेति॥ स यज्वनो यजमानस्य भार्याया अश्वमेधाख्यस्य यज्ञस्याश्वस्य लिङ्गमालिङ्गत्येवंशीलं वराङ्गं गुह्यं यस्यास्तस्या भावस्तत्ता तां दृष्ट्वा श्रुतेर्वेदस्य कर्तारं भण्डमाचष्टाकथयत्। द्वापरस्याग्र इत्यर्थः। उन्मत्तत्वादात्मानं प्रत्येव वा। यतोऽपण्डितः शास्त्रानुसारिबुद्धिरहितः 'पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम्। आज्ञासिद्धानि चत्वारि न हातव्यानि हेतुभिः'। इति राजाज्ञावन्निर्विचारं वेदार्थोऽनुष्ठेयः। अश्वमेधप्रकरणे 'अश्वस्य शिश्नं महिष्या उपस्थे निधत्ते' इत्यादिश्रुतेः। 'कर्ता भण्डः' इति श्रुतिकर्तुर्भण्डत्वाभिधानान्मूर्खः॥

अथ भीमजया जुष्टं व्यलोकत कलिर्नलम्।
दुष्टदृग्भिर्दुरालोकं प्रभयेव प्रभाप्रभुम्॥२०५॥

अथेति॥ अथैवं पुरपरिभ्रमक्रमवशा(त्सकलनगरे धर्मात्मनामेव दर्शनेन चित्तखेदा)दनन्तरं कलिर्भीमजया भैम्या जुष्टं प्रीत्या सेवितं नलं व्यलोकत। कमिव—प्रभया संज्ञादेव्या, अथव—असह्यतेजसा, जुष्टं प्रभाप्रभुं सूर्यमिव। किंभूतमुभयम्—दुष्टा मत्सरादिदोषोपहता दृग् बुद्धिर्येषां तैः पापरूपैर्दुरालोकं पुण्यश्लोकत्वात्पतिव्रतया तया च युक्तत्वात्कलिप्रभृतिभिः सुखेन द्रष्टुमशक्यम्, काचकामलादिदोषदृग्भिर्दुर्दर्शं च। प्रकृष्टा भा कायकान्तिर्यस्या इति भैमीविशेषणं च। प्रकृष्टया कायकान्त्या पापिभिर्दुरालोकं नलमिति वा। दुरालोकं खल, तद्योगे च 'न लोका-' इति षष्ठीनिषेधाद्दुष्टदृग्भिरिति तृतीया॥

तयोः सौहार्दसान्द्रत्वं पश्यञ्शल्यमिवानशे।
मर्मच्छेदमिवानर्च्छ स तन्मर्मोर्मिभिर्मिथः॥२०६॥

तयोरिति॥ स तयोर्भैमीनलयोः सौहार्दं सान्द्रत्वमन्योन्यानुरागोत्कर्षं पश्यञ्शल्यमिव हृदि नाराचव्यधमिवानशे प्राप। तत्तुल्यदुःखोऽभूदित्यर्थः। तथा—मिथोऽन्योन्यं तयोर्नर्मोर्मिभिः क्रीडाकल्लोलैः प्रीत्यालिङ्गनचुम्बनादिभिरनुभावैः कृत्वा मर्मच्छेदमिव प्राणहरणशरीरावयवकर्तनमिवानर्च्छं प्राप। सौहार्दसान्द्रत्वस्य कारणत्वादालिङ्गनादिनर्मणश्च कार्यत्वान्न पौनरुक्त्याशङ्का। सौहार्दम्, युवादित्वाद्भावेणि 'हृन्मग-' इत्युभयपदवृद्धिः॥

अमर्षादात्मनो दोषात्तयोस्तेजस्वितागुणात्।
स्प्रष्टुं दृशाप्यनीशस्तौ तस्मादप्यचलत्कलिः २०७

अमर्षादिति॥ कलिरमर्षाद्धैमीनलप्रीतिनर्मासहनशीलत्वरूपाद्दोषात्, तथा—आत्मनो महापातकादिरूपाद्दोषाद्धार्मिकाश्रयणाशक्तेः, तथा—तयोर्भैमीनलयोस्तेजस्वितागुणात्कायकान्तिरूपाद्गुणात्सौन्दर्यातिशयात्क्षात्रतेजसश्चाधर्षणीयत्वरूपाद्गुणादित्येवंहेतुत्रयात्तौ भैमीनलौ न परं मनसा किं तु दृशापि नयनरश्मिनापि स्प्रष्टुमनीशोऽसमर्थः। किं पुनर्हस्तादिना, एवंभूतो यतोऽतस्तस्मान्नलावासात्प्रासादादपि सकाशात्स कलिरचलन्निर्गतः। एवंविधौ तौ दृष्ट्वा तत्रापि प्रवेष्टुमशक्तस्ततोऽपि प्रस्थित इत्यर्थः। अन्योपि मलिनस्तेजस्विनं दृशा वीक्षितुमप्यशक्तस्ततः पलायते॥

अगच्छदाश्रयान्वेषी नलद्वेषी स निश्वसन्।
अभिरामं गृहारामं तस्य रामसमश्रियः॥२०८॥

अगच्छदिति॥ नलद्वेषी नलद्वेषपरः, अतएव तत्पराभवार्थमाश्रयान्वेषी निवासं मृगयमाणः कुत्रचिदपि तदलाभाद्दुःखादमर्षेण च निश्वसन्स कलिः रामेण श्रीरामेण समा तुल्या श्रीः शोभा संपद्यस्य तस्य नलस्याभिरामं वृक्षादिसमृद्धिमत्त्वाद्रमणीयं गृहारामं प्रासादसमीपवर्ति क्रीडावनमगच्छत्। समीपे स्थितौ क्रियमाणायां नलदोषविचारः सुशक इति गृहारामं प्राप्तवानित्यर्थः। श्रीरामसाम्येन नलस्य पावित्र्यं सौन्दर्यं संपदाधिक्यं भाविराज्यपरित्यागश्चेति सूचितम्। तदानीं रामस्य भावित्वे कव्यपेक्षयाभूतत्वात्प्रवाहस्यानादितया वा भूतत्वादुपमा युक्तेवेति ज्ञेयम्॥

रक्षिलक्षवृतत्वेन बाधनं न तपोधनैः।
मेने मानी मनाक्तत्र स्वानुकूलं कलिः किल २०९

रक्षीति॥ कलिस्तत्र पुरे रक्षिणां रक्षकाणां लक्षं संघस्तेन यद्वृतत्वं परिवेष्टितत्वं तेन हेतुना प्रवेष्टुमप्यशक्यत्वात्तपोधनैः कृत्वा न बाधनं बाधयतीति बाधनमेवंविधं न भवति तापसानां तत्र प्रवेशाभावात्तापसनिमित्तस्वबाधारहितम्, अत एव—मनाक् ईषत्स्वानुकूलं स्वस्मै हितम्, एवंविधं मेने। विशेषणबलाद्विशेष्याक्षेपात्तमारामं स्वहितं मेन इत्यर्थः। यतो—मानी अभिमानवान्। नलपराभवार्थं तत्रैव निवासवाञ्छां दधारेत्यर्थः। किल प्रसिद्धौ। रक्षिलक्षवृतत्वेनैव बाधकम्, न पुनस्तपोधनैर्बाधकम्। अतस्तत्र पुरे तमारामेव मनाक् स्वहितं मेन इत्यर्थः। रक्षकबाधने सत्यप्यदृश्यतयापि स्वस्य प्रवेष्टुं शक्यत्वान्नतु तपोधनबाधन इति मनागित्युक्तम्। एवं संकटे किमित्यवात्सीदित्यत आह—यतो मानी। अभिमानसाधनाय संकटमपि मानिनः सहन्त इत्यर्थ इति वा। रक्षकवृतत्वेन मुनिकर्तृकं बाधनं मनागपि तत्रारामे नास्तीति तं स्वानुकूलं मेन इति वा॥

१ 'भाण्डा—' इति पाठे—'भण्डानामिदं भाण्डं तच्च तदकाण्डं ताण्डव वा' इति व्याख्येयम्—इति सुखावबोधा।

दलपुष्पफलैर्देवद्विजपूजाभिसंधिना ।
स नलेनार्जितान्प्राप तत्र नाक्रमितुं द्रुमान् ॥२१०॥

दलेति ॥ स कलिस्तत्रोद्यानवने दलैः पत्रैः पुष्पैः फलैश्च कृत्वा देवानां द्विजानामतिथीनां च पूजा तद्विषयेणाभिसंधिनाशयेन कृत्वा देवद्विजपूजैवाभिसंधिराशयो यस्यैवंविधेन वा दलादिभिर्देवपूजां कर्तुकामेन नलेनार्जितानारोपितानाम्रादिद्रुमानाक्रमितुमारोढुमाश्रयितुं च न प्राप । तेषां धर्मोपयोगित्वात्, स्वस्य च पापरूपत्वात्तानाश्रयितुं नाशकदित्यर्थः ॥

अथ सर्वोद्भिदासत्तिपूरणाय स रोपितम् ।
बिभीतकं ददर्शैकं कुटं धर्मेऽप्यकर्मठम् ॥ २११ ॥

अथेति ॥ अथ स कलिर्धर्मे धर्मकार्ये विषयेऽकर्मठमकर्मशूरमपि पत्रादीनां देवाद्यनुपयोगाद्धर्मकार्यानर्हमपि सर्वेषामुद्भिदां वृक्षाणामासत्तेः सांनिध्यस्य पूरणाय वृक्षलतागुल्मादिजातमत्रास्तीति कीर्तिपूर्तिमात्राय तत्रोद्याने नलेनारोपितमेकं सर्ववृक्षासत्तिपूरणस्यैकेनैव कृतत्वादेकसंख्यं बिभीतकं कुटं वृक्षं ददर्श । 'अनोकहः कुटः शालः' इत्यमरः । कर्मणि घटत इति 'कर्मणि घटोऽठच्' । 'कर्मशूरस्तु कर्मठः', 'उद्भिदस्तरुगुल्माद्याः' इत्यमरः ॥

स तं नैषधसौधस्य निकटं निष्कुटध्वजम् ।
बहु मेने निजं तस्मिन्कलिरालम्बनं वने ॥ २१२ ॥

स इति ॥ स तस्मिन्वने नैषधसौधस्य निकटं समीपवर्तिनं निष्कुटस्य गृहारामस्य ध्वजं लाञ्छनभूतम्, अथच—उच्चोच्चतरत्वाद्ध्वजमिव तदग्रस्थित्या नलदर्शनवशात्तदीयदोषविचारोपायभूतं तं बिभीतकं निजं स्वीयमालम्बनमाधारं बहु मेने । 'गृहारामास्तु निष्कुटाः' इत्यमरः ॥

निष्पदस्य[1] कलेस्तत्र स्थानदानाद्बिभीतकम् ।
कलिद्रुमः परं नासीदासीत्कल्पद्रुमोपि सः ॥ २१३ ॥

निष्पदस्येति ॥ तत्र पुरे वने च निष्पदस्याश्रयरहितस्य कलेः स्थानदानात्स्वेनैव तदाधारभूतत्वात्स बिभीतकः केवलनिवासभूतत्वात्कलिद्रुमः कलिसंबन्धी द्रुमः परं केवलमासीदिति न । किंतु कलिं प्रत्यभिलाषपूरणात्कल्पद्रुमोप्यासीत् । अन्योपि निराश्रयस्याश्रयदानात्कल्पद्रुमत्वेन व्यपदिश्यते । 'भूतावासः कलिद्रुमः' इत्यमरः ॥

पापिनापि कलिना बिभीतकः स्थानं प्राप्तमित्यत्र हेतुमुत्प्रेक्षते—

ददौ पदेन धर्मस्य स्थातुमेकेन[2] यत्कलिः ।
एकः सोपि तदा तस्य पदं मन्येऽमिलत्ततः ॥२१४॥

ददाविति ॥ यद्यस्माद्धेतोः कलिः प्रवाहानादितयाऽतीते कलियुगसमये धर्मस्यैकेन पदेन चतुर्थांशेन स्थानं ददौ । ततस्तस्मात्तदा नलराज्यसमये कृतयुगे स बिभीतकोप्येक एव तस्य कलेः पदं चरणः, अथच-स्थानम्, अमिलत्संजात इत्यहं मन्ये । 'कृतं कर्म युज्यते' इति न्यायेन कालान्तरे यावद्दत्तं तावदेव तदानीं तेन लब्धमित्यहं मन्य इत्युत्प्रेक्षा धर्मस्य संबन्धमात्रविवक्षया षष्ठी ॥

उद्भिद्विरचितावासः कपोतादिव तत्र सः ।
राज्ञः साग्नेर्द्विजादस्मात्संतापं प्रापदीक्षितात् ॥२१५॥

उद्भिदिति ॥ तत्रोद्यान उद्भिदि वृक्षे बिभीतके विरचित आवासः स्थितिर्येन सः कलिः साग्नेरग्निहोत्रवतो द्विजात्क्षत्रियात्, तथा—दीक्षितात्स्वीकृताग्निहोत्रदीक्षादस्माद्राज्ञोऽभिषेकादिगुणयुक्तान्नलात्सकाशात्सम्यक् त्रासं महाशापनिग्रहं प्राप । 'राज्ञो द्विजात्' इत्येताभ्यां स्वाभाविकं निग्रहे सामर्थ्यं सूचितम् । 'साग्नेर्दीक्षितात्' इत्येताभ्या च तपोजनितं शापे सामर्थ्यं सूचितम् । एवंविधोऽयं समीपस्थितं मां निश्चयेन ज्ञास्यति, शापं च दास्यतीत्यन्तर्महद्भयं प्रापेत्यर्थः । अग्निहोत्रिणो नलस्य संबन्धिनः कृतयज्ञदीक्षात्तस्मादतिप्रसिद्धाद्द्विजाद्ब्राह्मणाद्गौतमात्पुरोधसः सकाशाद्भयं प्राप । नलाग्निहोत्रपरिचर्यार्थं तत्र वर्तमानात्स्वयमप्यग्निहोत्रादिदीक्षायुक्ताच्च गौतमात्पुरोधसः सकाशाद्भीत इत्यर्थ इति वा । कस्मादिव—कपोतादिव । यथा—अग्निसहितादङ्गारभक्षिणः, तथा-ईक्षितात्कपोतनाम्नो द्विजात्पक्षिणः सकाशाद्वृक्षे विरचितावासः काकादिः पक्षी पुरुषो वा वृक्षारूढो वृक्षाधःस्थायी वा भयं प्रापत्पूर्वं कदाचित्, तथेत्युपमा । स यथा प्राप्नोति, तथेत्यर्थः । अग्निः कपोतजठरमन्तःप्रविष्टोऽत एव तद्भक्षिता पाषाणकणिकापि जीर्यत इत्यैतिह्यम् । साग्नेरङ्गारभक्षिणः कपोतविशेषो ह्यङ्गारान्भक्षयति । उद्भिदा तृणकाष्ठादिना निर्मितगृहः पुरुषोऽग्न्युद्गारिनेत्रात्स्वोपवेशमात्रेण गृहदाहाद्यनिष्टसूचकाद्गृहोपरि विलोकितात्कपोताद्वृकात्पक्षिणः सकाशाद्यथा भयं प्राप्नोति तथासावपि ।

……कपोतो हि गृहं प्रविष्टोऽनिष्टसूचकः । एवमद्भुतकर्मणोऽतिस्थूलाच्च वृक्षादिरोहिणो दृष्टात्कपोतात्तद्वृक्षवासी पक्षी नरो वा स्वस्यापि भक्षणशङ्कया शाखापतनशङ्कया वा यथा बिभेति तथेत्यर्थः । एवं यथामति व्याख्यातव्यम् ॥

बिभीतकमधिष्ठाय तथाभूतेन तिष्ठता ।
तेन भीमभुवोऽभीकः स राजर्षिरधर्षि न ॥ २१६ ॥

बिभीतकमिति ॥ बिभीतकमधिष्ठायाश्रित्य तथाभूतेन तिष्ठता तस्य धर्मोपयोगाभावाद्भयराहित्येन स्थितवता, अथ च—तादृशनलदर्शनात्पूर्वोक्तप्रकारेण बिभ्यता सता स्थितेन कलिना भीमभुवोऽभीकः भैम्याः कामुकः स राजा चासावृषिश्च राजत्वेपि धर्मप्रधानत्वान्मुनितुल्यो नलः नाधर्षि न पराभूतः । अपराभवे राजर्षित्वमेव हेतुः । अथच—बिभीतकतुल्यं तरुमाश्रित्य तिष्ठता, तथा अतिमहता भूतेन भूतत्वं प्राप्तेन केनचित्प्रेतेन पिशाचेन भीमाया भयानकाया भूमे रणभूमे रुद्रभूमेर्वा हेतोरभीको भयरहितो राजर्षिर्धार्मिको न पराभूयत इत्युचितम् । भीमां भूमिमनादृत्य निर्भय इत्यनादरे षष्ठी ॥

तमालम्बनमासाद्य वैदर्भीनिषधेशयोः ।
कलुषं कलिरन्विष्यन्नवात्सीद्वत्सरान्बहून् ॥ २१७ ॥

---

१ 'निःस्पन्दस्य' इति पाठे—'पदमात्रमपि गन्तुमसमर्थस्येति व्याख्येयम्' इति सुखावबोधा । २ 'स्थानमिति पाठेपि स एवार्थः—' इति सुखावबोधा ।

तमिति ॥ कलिः तं बिभीतकमालम्बनमाश्रयमासाद्य प्राप्य वैदर्भीनिषधेशयोः कलुषं पापाचरणमन्विष्यन्, गवेषयितुमित्यर्थः। बहून्वत्सरानवात्सीत् । दोषसंस्पर्शनेन विना तयोः पराभवेऽशक्तस्वाहोपपरीक्षार्थं बहुकालं तत्रैव स्थित इत्यर्थः । अन्विष्यन्हेतौ शता । अवात्सीत्, वसेर्लुङि सिचि 'वदव्रज-' इति वृद्धौ 'सः स्यार्धधातुके' इति तत्वम् । वत्सरान्, अत्यन्तसंयोगे द्वितीया ॥

यथासीत्कानने तत्र विनिद्रकलिका लता ।
तथा नलच्छलासक्तिर्विनिद्रकलिकालता ॥ २१८ ॥

यथेति ॥ तत्र कानने तस्मिन्नुद्याने यथा येन प्रकारेण विनिद्रकलिका विकसितकोरका लता वल्ली आसीत्, तथा तेन प्रकारेण नलस्य छले आसक्तिरभिनिवेशस्तद्वशाद्विगतनिद्रो जागरूकः सावधानः कलिलक्षणः कालः समयो यत्र तद्भावस्तत्ता सापि वने आसीत् । विकसितकोरकवल्लीसंबन्धस्तस्योद्यानस्य यथाऽभूत्, तथा सदा (जाग्रत्) कलिसंबन्धोऽप्यभूदित्येतावन्मात्रेण श्लेषमात्रेण वैषम्यम् । नलच्छलनार्थं, नलदोषान्वेषणार्थं च जागरूकः स कलिस्तत्राथात्सीदित्यर्थः ॥

एवं कलेरवस्थानं निरूप्य द्वापरस्यावस्थानमाह—

दोषं नलस्य जिज्ञासुर्बभ्राम द्वापरः क्षितौ ।
अदोषः कोपि लोकस्य मुखेस्तीति दुराशया ॥२१९॥

दोषमिति ॥ लोकापवादरूपमभिशस्तिरूपं वा नलस्य दोषं जिज्ञासुर्द्वापर इत्यघटमानया दुराशया क्षितौ बभ्राम । इति किम्—लोकस्य मुखे जनवार्तायामदोषो दोषरहितः कोपि नरो नास्ति, सर्वो जनो यं निर्दोषमाह तादृशः पुरुष एव नास्तीति नलस्यापि कंचिद्दोषं कोपि वदिष्यतीति । 'न दोषः' इति पाठे—लोकोक्तावल्पोपि दोषो नास्ति, अपितु प्रायेण भविष्यतीति दुराशयेति काक्वा संभावनपरत्वेन व्याख्येयम् । दोषं 'न लोका-' इति षष्ठीनिषेधः ॥

अमुष्मिन्नारामे सततनिपतद्दोहदतया
प्रसूनैरुन्निद्रैरनिशममृतांशुप्रतिभटे ।
असौ बद्धालम्बः कलिरजनि कादम्बविहग-
च्छदच्छायाभ्यङ्गोचितरुचितयालाञ्छनमृगः२२०

अमुष्मिन्निति ॥ असौ कलिः श्यामपक्षहंसजातीयाः कादम्बविहगाः कलहंसाख्याः पक्षिविशेषास्तेषां छदाः पक्षास्तेषां छायायाः कान्तेरभ्यङ्ग उचिता योग्या तैलाभ्यङ्गेनेव स्वसंस्पर्शमात्रेण स्निग्ध्यातिशयकारिणी श्यामतरा रुचिः कान्तिर्यस्य तस्य भावस्तत्ता तया कृष्णवर्णतया च चन्द्रलाञ्छनमृगः कलङ्कमृगोऽभूत् । किंभूतः—सततं सदा निपतन्निक्षिप्यमाणो धूपादिर्दोहदो यत्र तस्य भावस्तत्ता तयानिशं सदा उन्निद्रैर्विकसितैः प्रसूनैर्मालत्यादिसितपुष्पैः कृत्वोज्ज्वलत्वादानन्ददायित्वाच्चामृतांशोश्चन्द्रस्य प्रतिभटे प्रतिस्पर्धिनि चन्द्रतुल्येऽमुष्मिन्पूर्वोक्त आरामे नलोद्याने बद्धः कृत आलम्बो वासो येन सः । चन्द्रे हि कलङ्केन भवितव्यम्। तस्योद्याने कलिरेवाभूदिति । निर्दोषे नलोद्याने । एतेन कलिरेव दूषकोऽभूदित्युक्तम् । तत्र न्यवात्सीदित्यर्थः । पुष्पफलानामाकालिकसमृद्धये वृक्षेषु वृक्षायुर्वेदोक्तो धूपादिर्दोहदः क्रियते । यथा—चम्पके पिण्याकादिजलक्षेपः, बकुले सुन्दरीगण्डूषजलमदिरासेकः, रक्ताशोके च तरुणीचरणप्रताडनमित्यादिः ॥

स्फारे तादृशि वैरसेनिनगरे पुण्यैः प्रजानां घनं
विघ्नं लब्धवतश्चिरादुपनतिस्तस्मिन्किलाभूत्कलेः ।
एतस्मिन्पुनरन्तरेऽन्तरमितानन्दः स भैमीनला-
वाराद्धुं व्यधित स्मरः श्रुतिशिखावन्दारुचूडं धनुः२२१

स्फार इति ॥ स्फारे विशालतरे तादृशि उक्तप्रकारेण धर्मबहुले स्फारत्वेपि सर्वत्र धर्मपूर्णे वैरसेनिर्नलस्तस्य नगरे प्रजानां पुण्यहेतुभिर्घनं भूयांसं विघ्नं लब्धवतः प्राप्तवतो निराश्रयस्य कलेस्तस्मिन्नलोद्याने चिराद्बहुकालं नलदोषगवेषणार्थमुपनतिरवस्थितिः किलाभूत् । किलेति पुराणादौ श्रूयत इत्यर्थः । प्रजानां पुण्यैः स्फारे व्याप्त इति वा हेतुगर्भं विशेषणम् । एतस्मिन्नन्तरेऽवसरे पुनरन्योन्ययोग्यमेलनादन्तर्मनस्यमितानन्दः प्राप्तनिःसीमहर्षः स प्रसिद्धप्रभावः स्मरो भैमीनलावाराद्धुं सेवितुं सुतरां पीडयितुं वा धनुः श्रुतिशिखा कर्णोर्ध्वदेशस्तां वन्दारुः स्पर्शिनी चूडा अग्रभागो यस्यैवंविधमाकर्णपूर्णं व्यधित चकार । भैमीनलौ नगरं प्राप्तौ सुरेषु स्वर्गतेषु, कलौ च वनालम्बिनि सतीतरेतरानुरागातिशयेन चिरविरहिणाविव सस्पृहौ स्मराराधनं चक्रतुरिति भावः । अनेनोत्तरसर्गे संभोगारम्भवर्णनरूपा संगतिः सूचिता । कलिकर्तृकपराभवस्य भविष्यत्वान्नायकापकर्षस्यावर्णनीयत्वाच्च स नोक्तः ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
यातः सप्तदशः स्वसुः सुसदृशि च्छिन्दप्रशस्तेर्महा-
काव्ये तद्भुवि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः१७

श्रीहर्षमिति ॥ एककर्तृकत्वात्स्वसुर्भगिन्याश्छिन्दस्य राजविशेषस्य प्रशस्तेर्वर्णनाग्रन्थस्य सुसदृशि तत्तुल्ये तद्भुवि श्रीहर्षरचिते सप्तदशानां पूरणः स्वभावसुन्दरः सर्गः समाप्तः । छिन्दप्रशस्तिरपि ग्रन्थो मया कृत इति सूचितम् । सोदर्याश्च तुल्या भवन्ति । 'छन्दःप्रशस्तेः' इति पाठे—छन्दोबन्धक्रमस्वरूपनिरूपणपरस्य ग्रन्थस्येत्यर्थः । सप्तदश इति 'तस्य पूरणे-' इति डट् । तद्भुवि भाषितपुंस्कम् ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणविरचिते नैषधीयप्रकाशे सप्तदशः सर्गः ॥

---

१ द्वित्रपुस्तकानुरोधेनेत्थं लिखितम् । पञ्चपुस्तकेषु तु—

'इति श्रीशेषरामचन्द्रविरचितायां नैषधचरितभावद्योतनिकायां सर्वानन्दकारिण्यां सप्तदशः सर्गः' इति लिखितं दृश्यते । पुस्तकानि तूभयविधान्यपि प्राचीनानि दृश्यन्ते ।

अष्टादशः सर्गः ।

सोयमित्थमथ भीमनन्दिनीं
दारसारमधिगम्य नैषधः ।
तां तृतीयपुरुषार्थवारिधेः
पारलम्भनतरीमरीरमत् ॥ १ ॥

सोयमिति ॥ सर्गसंगतिरुक्तैव । सोऽयमुक्तसौन्दर्यादिगुणप्रभावो नल इत्थमुक्तप्रकारेण त्रैलोक्यनायकसमक्षं दारसारं स्त्रीरत्नभूतां तामिन्द्रादिभिरप्यभिलष्यमाणां भीमनन्दिनीमधिगम्य तृतीयपुरुषार्थवारिधेः कामरूपदुरवगाहजलधेः संबन्धिनीं पारलम्भनतरीं परतीरप्रापणनौकारूपां तां भैमीमरीरमद्रमयामास । तादृश्या विना कामपुरुषार्थपारं कामशास्त्रोक्तनानारतपारं न प्राप्यत इत्यनेन सौन्दर्यातिशयः सूचितः । अन्यापि तरी वारिधेः पारं प्रापयति । 'तारणतरीम्' इत्यपि पाठः । अरीरमत्, रमेर्ण्यन्ताल्लुङि चङि सन्वद्भावादिरवादि ॥

अनुरागातिशयादहोरात्रं तत्संभोगे दोषमाशङ्क्य परिहरति—

आत्मवित्सह तया दिवानिशं
भोगभागपि न पापमाप सः ।
आहृता हि विषयैकतानता
ज्ञानधौतमनसं न लिम्पति ॥ २ ॥

आत्मविदिति ॥ स नलस्तया सह दिवानिशं भोगभाक् सन्नपि दिवामैथुननिषेधातिक्रमजनितं पापं नाप । यतः—आत्मविज्जीवब्रह्माभेदबुद्धिमान् । उक्तमर्थं युक्त्यन्तरेण द्रढयति—हि यस्मादाहृता कृत्रिमा विषयैकतानता स्वकचन्दनादिविषयपरता ज्ञानेन परमात्मज्ञानेन धौतं क्षालितं कामक्रोधादिमलिनं मनो यस्य तं पुरुषं न लिम्पति पापसंस्पर्शिनं न करोति । स्वाभाविकी हि विषयपरता पापासञ्जिनी, परमात्मज्ञानवतश्च सा न भवति किंतु भोगात्पूर्वकर्मक्षयार्थमेव सा (स) विषयपरतामङ्गीकरोति । आहार्या विषयपरता ब्रह्मज्ञानिनं पापिनं न करोतीत्यात्मविन्न पापं नापेति युक्तमेवोक्तमित्यर्थः । विषयपरतायां आहार्यत्वे दोषाभावाद्दिवारात्रं तया सह विक्रीडेत्यर्थः । दिवानिशम्, अत्यन्तसंयोगे द्वितीया ॥

दिवानिशं भोगे राज्यरक्षणं कथं जातमित्यत आह—

न्यस्य मन्त्रिषु स राज्यमादरा-
दारराध मदनं प्रियासखः ।
नैकवर्णमणिकोटिकुट्टिमे
हेमभूमिभृति सौधभूधरे ॥ ३ ॥

न्यस्येति ॥ स नलो मन्त्रिषु राज्यं न्यस्य नैकवर्णमणिकुट्टिमे नानावर्णरत्नसमूहबद्धभूमिके, तथा—हेमभूमिभृति सुवर्णभूमिधारिणि सौधभूधरे प्रासादरूपाद्युच्चे पर्वते प्रियासखः सन् मदनमादरादासक्त्या आरराध सिषेवे । प्रियासख इत्यालम्बनविभावः, कामस्य धर्मविषयत्वं च प्रस्तौति । नैकवर्णेत्यादिविशेषणसामर्थ्यादूधरो हेमाद्रिः सौधभुवं धरति । नवप्रासादाकारेण परिणतेऽनेकवर्णमणिकुट्टिमे हेम्नः सुवर्णस्य भूमिभृति पर्वते हेमाद्रौ प्रासादसौन्दर्यमुच्चत्वं च सूचितम् । इत आरभ्य 'तत्र सौध-' इति यावन्महाकुलकम् ॥

वीरसेनसुतकण्ठभूषणी-
भूतदिव्यमणिपङ्क्तिशक्तिभिः ।
कामनोपनमदर्थतागुणा-
द्यस्तृणीकृतसुपर्वपर्वतः ॥ ४ ॥

वीरसेनेति ॥ यः सौधभूधरो वीरसेनसुतस्य नलस्य कण्ठभूषणीभूता दिव्या मणयस्तेषां पङ्क्तयोऽतिकलब्धोत्तमचिन्तामणिमाला तस्याः शक्तिभिरलौकिकसामर्थ्यैः कृत्वा कामनयाऽभिलाषमात्रेणोपनमन्तः संनिहितीभवन्तो नलेनान्येन वा लभ्यमाना इष्टा अर्थाः पदार्था यत्र तद्भावस्तत्ता तया गुणस्तस्माद्धेतोस्तृणीकृतः सुपर्वणां देवानां पर्वतो मेरुर्येन सः । सर्वार्थदायिचिन्तामणिरत्नस्य मेरावत्र च विद्यमानत्वाद्यो मेरुतुल्य इत्युपमा । अत्र बहूनां चिन्तामणीनां सद्भावात्ततोऽप्याधिक्यं वा ॥

धूपितं यदुदरान्तरं चिरं
मेचकैरगरुसारदारुभिः ।
जालजालधृतचन्द्रचन्दन-
क्षोदमेदुरसमीरशीतलम् ॥ ५ ॥

धूपितमिति ॥ मेचकैः श्यामलैरगरुसंज्ञकैः सारैः श्रेष्ठैर्दारुभिः काष्ठैश्चिरं यदुदरान्तरं यदीयो गर्भभागः धूपितं वासितम् । यदुदरान्तरधूपार्थं दह्यमानैर्मलयरपितपरिमलमित्यर्थः । तथा—धूपजमंतापत्याजनाय जालप्रकारेषु जालजालेषु सर्वेषु गवाक्षेषु जालानां वा जालेषु गवाक्षसङ्घेषु धृतः स्थापितः चन्द्रचन्दनक्षोदः कर्पूरचन्दनचूर्णं तेन मेदुरः पुष्टस्तत्स्पर्शवशाच्छिशिरतरः परिमलबहुलश्च यः समीरो वायुस्तेन शीतलं शीततरम् । सर्वत्रैत उद्दीपनविभावाः । जालजालेति प्रकारे द्विरुक्तिः, षष्ठीसमासो वा ॥

कापि कामशरवृत्तवर्तयो
यं महासुरभितैलदीपिका ।
तेनिरे वितिमिरं स्मरस्फुर-
दोःप्रतापनिकराङ्कुरश्रियः ॥ ६ ॥

कापीति ॥ महासुरभि चम्पकादिद्रव्यसुगन्धि तैलं यासु एवंविधा दीपिका यं सौधभूधरं कापि भैमीनलालंकृते देशे वितिमिरं विगतान्धकारं तेनिरे प्रकाशमानगर्भं चक्रुः । किंभूताः—कामशरवृत्ताः कामबाणवर्तुलाः कामशरेण कर्पूरेण धूपविशेषेण वा वृत्ता निर्वृत्ता धूपकर्पूरगर्भा जर्जरयन्त्रमयरचिता दीपाधारभूता दशा यासां ताः । तथा—स्मरस्य भैमीनलव्यधार्थं स्फुरन्दोःप्रतापनिकरस्याङ्कुराणां प्रथमोद्भेदानामिव श्रीः शोभा यासां ताः ।

---

१ 'नन्दनाम्' इति पाठो जीवातुसुखावबोधासंमतः । २ अस्मिन्सर्गे रथोद्धतावृत्तम्–इति जीवातुः । ३ यद्यपि बहुषु प्राचीनपुस्तकेषु 'दिवारात्रम्, इति पाठ उपलभ्यते परं च "अचतुर–" (७।४।७७) इति पाणिनिसूत्रेण रात्रिंदिवेति निपातनात् 'रात्रिंदिवम्' इति टीकाकृद्भिः प्रयोक्तव्यम् ४ 'सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः' इति जीवातुः ।

१ 'यदुदराम्बरम्' इति जीवातुसुखावबोधासंमतः पाठः ।

एतादृग्दीपिकादर्शनमात्रेण कामोत्पत्तेस्तुल्यरूपत्वाच्च दीपिकाः कामप्रतापाङ्कुरा इवेत्युपमोत्प्रेक्षा। राजनिकटस्था दीपाः कर्पूरादिवृत्तवर्तयः क्रियन्ते। 'पुरसर्जाभयालाक्षानखाञ्जादिजटागदैः। समैः समधुभिर्धूपो मतः कामशराभिधः' इति कामशरो धूपः॥

कुङ्कुमैणमदपङ्कलेपिताः
क्षालिताश्च हिमवालुकाम्बुभिः।
रेजुरध्वततशैलजस्रजो
यस्य मुग्धमणिकुट्टिमा भुवः॥ ७॥

कुङ्कुमैणेति॥ यस्य मुग्धानि रमणीयानि मणिकुट्टिमानि यासु ता भुवो रेजुः। किंभूताः—कुङ्कुमं चैणमदः कस्तूरी च तयोः पङ्केन कर्दमेन लेपिताः। तथा—जलमध्ये निक्षेपाद्द्रवीभूतहिमवालुकाम्बुभिः कर्पूरवासितोदकैः क्षालिताश्च। तथा—अध्वनि नलागमनमार्गे तता विस्तारिताः शैलजा हिमवत्समुद्भूतमालत्यादिमाला यासु। अतिस्नैग्ध्यसौगन्ध्यार्थं पूर्वं कुङ्कुमकस्तूरीलेपः कृतः, अनन्तरं च तत्पङ्कस्पर्शभिया कर्पूरजलैः क्षालनं कृतम्, तेन पङ्को गतोऽधिकं च सौगन्ध्यं जातम्, अनन्तरं च भैमीनलचरणयोर्मृदुतरत्वान्मणिबद्धभूकाठिन्यपरिहारार्थं मृदुतरशैलजप्रक्षेप इति पाठक्रमादर्थक्रमो बलीयानिति पूर्वं कर्पूरोदकैः क्षालिताः पश्चाद्धेमयस्थानीयकुङ्कुमकस्तूरीपङ्केन कृताङ्गोद्वर्तनाः, अनन्तरं च धृतशैलेयमाला धृतसुन्दरमणिखचित(मणि)भूषणाः सत्यः शुशुभिर इति वा। 'यत्र' इत्यपि पाठः। 'वालुकांशुभिः' इति पाठे—शुभ्रकर्पूरचूर्णैः क्षालिताश्छुरिताः कृतरङ्गमालिका इत्यर्थः। अत्र शाब्दोपि क्रमो घटते। लेपिताः ण्यन्तान्निष्ठा॥

नैषधाङ्गपरिमर्दमेदुरा-
मोदमार्दवमनोज्ञवर्णया।
यद्भुवः क्वचन सूनशय्यया[2]-
भाजि भालतिलकप्रगल्भता॥ ८॥

नैषेधेति॥ क्वचन नलनिद्रास्थानदेशे सूनशय्यया पुष्परचितास्तरणेन यस्य सौधभूधरस्य संबन्धिन्या भुवो भूमेर्भालस्य ललाटस्य तिलकस्तस्य प्रगल्भता रमणीयताभाजि धृता। पुष्पशय्या यद्भूमेर्ललाटतिलक इव रेज इत्यर्थः। कीदृश्या—नलाङ्गस्य परिमर्देन संस्पर्शेन वरुणस्य वरदानसामर्थ्यान्मेदुरो नितरामधिकीभूत आमोदः सौरभं मार्दवं मनोज्ञः सदैवाम्लानत्वात्सुन्दरो वर्णश्च यस्यास्तया। तिलकोपि कस्तूर्यादिनिर्मितत्वात्सुगन्धिः सुवर्णश्च भवति। अथच—यद्भूसंबन्धिनि क्वचन देशे नलाङ्गसंबन्धेनामोदादियुक्तया पुष्पशय्यातुल्ययाऽतिमृद्व्या भैम्या भालतिलकेन या प्रगल्भता प्रकाशमानता सा अभाजि भञ्जिता। संभोगवशात्तिलकस्य मृष्टत्वादित्यर्थ इति वा। अभाजि पक्षे 'भञ्जेश्च चिणि' इति नलोपः॥

---

१ 'समृद्धिमद्वस्तुवर्णनादुदात्तालंकारः' इति **जीवातुः**। २ 'यान्ति भालतिलकप्रगल्भताम्' इति पाठे—'यस्य भूमयः सूनशय्यया कृत्वा भालतिलकप्रगल्भतां यान्तीत्यर्थः' इति **सुखावबोधा**। ३ 'निदर्शनालंकारः' इति **जीवातुः**।

कापि यन्निकटनिष्कुटस्फुर-
त्कोरकप्रकरसौरभोर्मिभिः।
सान्द्रमाद्रियत भीमनन्दना-
नासिकापुटकुटीकुटुम्बिता॥ ९॥

कापीति॥ कापि क्वचित्प्रदेशे यस्य सौधस्य निकटे निष्कुटे गृहारामे स्फुटन्तो विकसन्तः कोरकप्रकरा मल्लिकादिकलिकासमूहास्तेषां सौरभोर्मिभिः सौगन्ध्यपरम्पराभिर्भीमनन्दनाया नासिकापुटकुटी नासिकापुटरन्ध्ररूपमल्पगृहं तत्र कुटुम्बिता पुत्रकलत्रादिसहावस्थायिता सान्द्रं नितरामाद्रियताङ्गीकृता। अल्पगृहे बहुकुटुम्बो यथा संमर्देन वसति, तथा भैमीनासिकायां तैरुपितमित्यर्थः। वनोपान्तेषु दत्तदृष्टिर्भैमी सकलपुष्पपरिमलं यत्र प्रत्यहमन्वभूदिति भावः। अथच—भैमीनासापुटकुट्या कुटुम्बितासादृश्यं धृतम्। कुटुम्बिनो हि सजातीया भवन्ति। भैमीनासाश्वाससौरभतुल्यता यन्निकटवर्तिवनपुष्पसौरभैर्धृतेत्यर्थः॥

ऋद्धसर्वऋतुवृक्षवाटिका-
कीरकृत्तसहकारशीकरैः।
यज्जुषः स्म कुलमुख्यमाशुगः
प्राणवातमुपदाभिरञ्चति॥ १०॥

ऋद्धेति॥ आशुगो वायुः ऋद्धाः फलपल्लवादिसमृद्धिमन्तः सर्वऋतुवृक्षा वसन्तादिसकलर्तुसंबन्धिन आम्रादयो वृक्षा यस्यां सा, ऋद्धाः सर्वे ऋतवः सर्वे वृक्षाश्च यस्यां वा तस्यां वाटिकायां कीरैः शुकैश्चञ्चुपुटैः कृत्वा कृत्तानि खण्डितानि यानि सहकाराणामाम्रवृक्षाणां पुष्पाणि फलानि वा तेषां शीकरैर्मकरन्दबिन्दुभिर्निर्यासबिन्दुभिर्वोपदाभिस्तद्रूपैरुपहारैः कृत्वा यज्जुषो यत्सौधसेविनो नलस्य भैम्या वा यस्य कस्यापि वा प्राणवातं नासाश्वासरूपं प्राणाख्यं वायुं, यज्जुषो यत्संबन्धी वा वायुरर्थाद्भैमीनलयोरन्यतरस्य वाञ्छति स्मापूपुजत्। उपहारैरुपतिष्ठते स्मेति वा। यस्मात्—कुलमुख्यं पञ्चवायुमध्ये प्राणस्यादिभूतत्वात्कुलवृद्धम्। कुलवृद्धश्च तदीयैः पूज्यते। आम्रशीकरानानयन्वायुर्यत्सेविनं जनं सुखयति स्मेत्यर्थः। सहकारशीकरैरित्यनेन वायोः शैत्यसौगन्ध्ये, अञ्चतीत्यनेन मान्द्यं च सूचितानि। सर्वऋत्वित्यत्र 'ऋत्यकः' इति प्रकृतिभावः। सहकारेत्यत्र पुष्पे फले वा प्रत्ययस्य 'पुष्पमूलेषु–' इति लुप्। 'फले लुक्'। इति वा लुक्। यज्ञ ष इति क्विबन्तात्षष्ठी, पक्षे इगुपधात्कः॥

कुत्रचित्कनकनिर्मिताखिलः
कापि यो विमलरत्नजः किल।
कुत्रचिद्रचितचित्रशालिकः
कापि चास्थिरविधेन्द्रजालिकः॥ ११॥

कुत्रेति॥ यः सौधः कुत्रचित्कचित्प्रदेशे कनकेन निर्मितमखिलं मूर्धाधोभागादि यस्यैवंविधः कापि विमलै रत्नैर्जातो रचितः। तथा—कुत्रचिद्रचिताश्चित्रशाला उपरितनोत्तमगृहविशेषाः पुत्रिका वा यत्र। रचितेन चित्रेण शालते तच्छीलो वा। कापि

चास्थिराभिरव्यवस्थिताभिर्विधाभिः प्रकाशान्धकारादिरूपैः प्रकारैः कृत्वा ऐन्द्रजालिकोऽनेकचमत्कारकारी । शालिकेति शालाशब्दात्स्वार्थे संज्ञायां वा कनि 'प्रत्ययस्थात्कात्–' इतीत्वम् । पक्षे—ताच्छील्यणिन्यन्तात्स्वार्थे कन् । ऐन्द्रजालिकः, 'शिल्पम्' इति ठक् । 'विधा विधौ प्रकारे च' इत्यमरः ॥

चित्रतत्तदनुकार्यविभ्रमा-
धाय्यनेकविधरूपरूपकम् ।
वीक्ष्य यं बहु धुवञ्छिरो जरा-
वातकी विधिरकल्पि शिल्पिराट् ॥ १२ ॥

चित्रेति ॥ यं सौधं वीक्ष्याश्चर्यातिशयाद्बहु वारंवारं शिरः धुवन्कम्पयञ्छिल्पिनामतिचमत्कारिनानावस्तुनिर्माणनिपुणानां राट् राजा श्रेष्ठो विधिर्ब्रह्मा विश्वकर्मा वा जरया वृद्धत्वेन वातकी वातरोग्यकल्पि तर्कितो देवादिभिरिति शेषः । किंभूतम्—चित्र आलेख्ये चित्राण्याश्चर्यरूपाणि वा तेषां तेषामनुकार्याणामभिनेयानां देवर्षिमनुष्यादीनां विभ्रमं विलासं विशिष्टां तत्तद्भ्रान्तिं वाधायीन्युत्पादयन्त्येवंभूतानि शुक्लनीलपीतादिवर्णवशात्काष्ठपाषाणरूप्यस्वर्णादिघटितत्वाद्वानेकविधरूपाणि नानाप्रकारस्वरूपाणि रूपकाणि प्रतिमा यत्र । चित्रमाश्चर्यं तन्वन्ति विस्तारयन्ति चित्रतन्ति तादृशानीति पूर्ववत् । अचेतनास्वलीकास्वपि प्रतिमासु चेतनत्वादिभ्रमोत्पादिनिर्माणनैपुणाद्भुतभरकम्पितशिराः शिल्पिराडपि ब्रह्मा विश्वकर्मा किमयं जरया निमित्तोद्भूतवाताधिक्यप्रचलितग्रीव इत्युत्प्रेक्षित इत्यर्थः । रमणीयतमोऽयमिति भावः । 'वातकी वातरोगी स्यात्' इत्यमरः । वातकी, मत्वर्थे 'वातातीसाराभ्यां कुक्' इतीनिः कुक् ॥

भित्तिगर्भगृहगोपितैर्जनै-
र्यः कृताद्भुतकथादिकौतुकः ।
सूत्रयन्त्रजविशिष्टचेष्टया-
श्चर्यमज्ञिबहुशालभञ्जिकः ॥ १३ ॥

भित्तीति ॥ यः सौधो भित्तिगर्भे ये गृहा भित्तिभिराच्छादितान्यदृश्यमानविवराणि गर्भागाराणि तेषु तैर्वा गोपितैरदृश्यत्वेन स्थापितैर्जनैः कृत्वा कृतमद्भुतकथादिकौतुकमाश्चर्यजनकरमणीयगोष्ठीगीतनृत्तवाद्यादिसंबन्धिकौतूहलं येन सः । गर्भगृहस्थानामदृश्यमानत्वाच्चित्तस्य एव गोष्ठ्यादि कुर्वन्ति चित्रमेतदिति बहिर्वर्तमानानां जनानां कौतूहलं यः करोतीत्यर्थः । तथा—सूत्राणां तत्तत्प्रतिमादिसंचारिनन्तूनां यन्त्राश्रियमनादनुपलक्षितस्थानरचनाविशेषात्सूत्ररूपाद्वा यन्त्राज्ञातया विशिष्टयाऽद्भुतया चेष्टयाऽन्योन्यचुम्बनालिङ्गनतालवृन्तवालव्यजनादिचालनक्रियया कृत्वाश्चर्यसञ्ज्ञिन्योऽतिचमत्कारकारिण्यो बह्व्यः शालभञ्जिकाः सुवर्णगजदन्तादिनिर्मिताः पुत्रिका यत्र सः । गोपितैः, ण्यन्तात्क्तिष्ठा ॥

तामसीष्वपि तमीषु भित्तिगै-
रत्नरश्मिभिरमन्दचन्द्रिकः ।
यस्तपेऽपि जलयन्त्रपातुका-
सारदूरधुततापतन्द्रिकः ॥ १४ ॥

तामसीष्विति ॥ यः सौधस्तामसीष्वपि तमीषु तमोबहुलकृष्णपक्षरात्रिषु भित्तिगै रत्नरश्मिभिः कुड्यखचितरत्नकिरणैः सुवर्णादिषु प्रतिफलितैर्मणिबद्धभूमिकिरणैर्वाऽमन्दा भूयसी चन्द्रिका ज्योत्स्ना यत्र । तमोलेशस्याप्यभावात् । तथा—तपेऽप्युष्णबहुले ग्रीष्मर्तावपि जलधारासंचारिमण्डपस्तम्भादिरचितजलयन्त्रेभ्यः पातुकैर्निर्गमनशीलैरासारैर्धारासंपातैर्दूरं नितरां धुता निराकृता तापजनिता तन्द्रिका मूर्च्छा निःसंज्ञता येन सः । शीतत्वात्सुखकर इत्यर्थः । तामसी मत्वर्थीयप्रकरणे 'ज्योत्स्नादिभ्य उपसंख्यानम्' इत्यण् । तन्द्रिका तन्द्रीशब्दात्स्वार्थे कनि 'केऽणः' इति ह्रस्वः ॥

यत्र पुष्पशरशास्त्रकारिका-
सारिकाध्युपितनागदन्तिका ।
भीमजानिपधसार्वभौमयोः
प्रत्यवेक्षत रते कृताकृते ॥ १५ ॥

यत्रेति ॥ यत्र सौधेऽध्युपितोऽधिष्ठितो नागदन्तः शयनस्थाने गृहावयवभूतगजदन्तनिर्मितः पत्तरो यया सा । तथा—पुष्पशरस्य कामस्य वात्स्यायनादिप्रणीतं शास्त्रं तस्य कारिकाऽभ्यासबाहुल्यात्कामशास्त्रनिर्माणसमर्थशब्दं करोति एवंभूता सारिका पक्षिणी भीमजानिपधसार्वभौमयोर्भैमीनलयो रते विषये चुम्बनालिङ्गनादीनां कृताकृते विहिताविहिते कर्मभूते प्रत्यवेक्षतानुकारेणानुसंदधे । आलिङ्गनादीनां बहवो भेदाः कामशास्त्रे निरूपिताः । तत्र किंचिदालिङ्गनं कृतम्, किंचिन्न कृतमित्यालापयदित्यर्थः । अनुवदति स्म च । अनुचकार चेत्यर्थः । शास्त्रे श्लोकरूपाः कारिका भवन्ति । यज्ञादौ यज्ञादि कृताकृतावेक्षको भवति । नागदन्तिका, 'दोषाद्विभाषा' इति कनि 'प्रत्ययस्थात्–' इतीत्वम् ॥

यत्र मत्तकलविङ्कशीलिता-
श्लीलकेलिपुनरुक्तवत्तयोः ।
कापि दृष्टिभिरवापि वापिको-
त्तंसहंसमिथुनस्मरोत्सवः ॥ १६ ॥

यत्रेति ॥ यत्र सौधे मत्तैः कलविङ्कैर्गृहचटकैः शीलितानां मुहुः क्रियमाणानां चुम्बनादिराहित्याज्जनसमक्षं करणाच्छीलानां ग्राम्याणां केलीनां सुरतक्रीडानां पुनरुक्तं वर्तते यत्र, तैर्वा कृत्वा पुनरुक्तियुक्तं, यथा तथा कापि कस्मिंश्चित्प्रदेशे वापिकाया उत्तंसभूतानि भूषणीभूतानि तत्र वर्तमानानि हंसमिथुनानि तेषां स्मरोत्सवः सुरतक्रीडा तयोर्भैमीनलयोर्दृष्टिभिस्तद्व्यापारैर्वा अवाप्यलम्भि । अदर्शीत्यर्थः । आद्यं कलविङ्ककेलिदृष्टा, अनन्तरं च हंसकेलिरिति पुनः पुनः सुरतदर्शनात्पुनरुक्तिः । 'रतान्ते श्लथीभूतगात्राणां कामिनां तिर्यगादिसंभोगदर्शनं पुनः कामोद्दीपकं भवति' इति कामशास्त्रात्तिर्यक्संभोगं पश्यतः स्मेति भावः ॥

यत्र वेणुरववेणवस्वरै-
र्हुंकृतैरुपवनीपिकालिनाम् ।

१ 'पुनरुक्तिम ॥ पुनरुक्तिवदिति पाठ—उपमानार्थे वत्प्रत्ययः' इति मुन्नावबोधा ।

कङ्कणालिकलहैश्च नृत्यतां
कुञ्जितं सुरतकूजितं तयोः ॥ १७ ॥

यत्रेति ॥ यत्र सौधे संभोगं कुर्वतोस्तयोः भैमीनलयोः सुरतकूजितं कण्ठमात्रस्थाव्यक्तमधुरस्वररूपं वैणवैर्वीणाशब्दैः, तथा—वैणवस्वरैर्वेणुसंबन्धिभिर्गीतैः, तथा—उपवनीपिकालिनामारामवर्तिनां कोकिलपदपदानां हुंकृतैः कूजितैः संभुञ्जानाभ्यां ताभ्यां नृत्यन्तो यत्र दृश्यन्ते तैश्च तौ न दृश्येते तादृशे देशे नृत्यतां स्त्रीपुरुषाणां कङ्कणादीनां केयूरनूपुरादिभूषणगणानां कलैरन्योन्योपमर्दोदितशिञ्जितैश्च कुञ्जितं मन्दीकृतम् । आच्छादितमित्यर्थः । नृत्यन्त्यश्च नृत्यन्तश्च 'पुमान्स्त्रिया' इत्येकशेषः । कुञ्जितं 'तत्करोति–' इति ण्यन्तान्निष्ठा ॥

सीत्कृतान्यशृणुतां विशङ्कयो-
र्यत्प्रतिष्ठितरतिस्मरार्चयोः ।
जालकैरपवरान्तरेपि तौ
त्याजितैः कपटकुड्यतां निशि ॥ १८ ॥

सीत्कृतानीति ॥ अपवरान्तरे गर्भगृहमध्ये रतिस्मरप्रतिमागृहापेक्षयाऽन्यस्मिन्वा गृहे स्थितावपि तौ भैमीनलौ दिवा गवाक्षेष्वपि भित्तिभ्रमादच्छिद्रगृहनिवासवशादन्यानाकर्णनबुद्ध्या विशङ्कयोः शङ्कारहितयोः ससंभ्रमं कूजनादि कुर्वतोर्यस्मिन्सौधे प्रतिष्ठितयोः पुरोधसा मन्त्रसामर्थ्याच्चैतन्यमवलम्ब्य प्रतिमायां कृताधिष्ठानयोः रतिस्मरयोर्यें अर्चे सुवर्णादिरचितप्रतिमे तयोः सीत्कृतानि नखदन्तजपीडानुभावसूचकानि सीच्छब्दाभिनेयानि शब्दितानि निशि रात्रौ कपटकुड्यतामलीकभित्तिभ्रमं त्याजितैर्जालकैर्गवाक्षैः कृत्वा अशृणुताम् । दिने रजतादिभित्तीनां मणीनां वा भासा छादितानि जालानि भित्तितुल्यानि भवन्ति, रात्रौ तु रजतादिभित्तीनां तादृशप्रकाशाभावात्ताभिरेव कपटकुड्यत्वं त्याजितानि जालरूपेणैव प्रतीयन्ते । ततश्च प्रतिष्ठासामर्थ्यात्सचेतनौ सुरतलोलुपौ रतिस्मरावपि गवाक्षेषु दिवा जातभित्तिभ्रमाद्बुभावपि कुड्यभ्रमेणाविचार्यैव विशङ्कौ यत्र सुरतं चक्रतुः, जालमार्गेण शब्दसंचाराच्च तत्कूजितानि तौ शुश्रुवतुरिति भावः । पुरोधसो मन्त्रप्रभावश्च सूचितः । तण्डुलचूर्णादिमण्डलिप्तं चित्रमयं वस्त्रं कपटकुड्यम् । दिवोष्मप्रवेशभिया गवाक्षेषु चित्रपटा ध्रियन्ते, रात्रौ च पवनागमनार्थमपनीयन्ते, तथा च दिनवद्रात्रावपि कुड्यबुद्ध्या विशङ्कं मणितानि चक्रतुरिति वा । अपवृणोत्याच्छादयतीत्यपवरो गृहगर्भे पचाद्यच् । 'प्रतिकृतिरर्चा पुंसि–' इत्यादयमरः ॥

कृष्णसारमृगशृङ्गभङ्गुरा
स्वादुरुज्ज्वलरसैकसारिणी ।
नानिशं श्रुटति यन्मुखे पुरा
किन्नरीविकटगीतिझंकृतिः ॥ १९ ॥

कृष्णेति ॥ कृष्णो वर्णः सारः श्रेष्ठो यस्य तस्य मृगस्य शृङ्गवच्चतुराऽतिवक्रा बहुभङ्गियुक्ता, तथा—स्वादुः श्रुतिमधुरा, अत एव उज्ज्वलाः प्रकाशमानाः शृङ्गारादयो रसास्तेषामुज्ज्वलस्य शृङ्गाररूपस्यैव वा रसस्य एकाऽद्वितीया मुख्या वा सारिणी कृत्रिमनदी शृङ्गाररसपरिपूर्णेत्यर्थः । एवंभूता गाननिपुणानां किन्नरीणां विकटा षडादिसप्तस्वराणामारोहावरोहरीत्या विषमा गीतिर्गानं तस्या झंकृतिध्वनिविशेषः तस्य सौधस्य मुखे पुरोदेशेऽनिशं सर्वदा न त्रुटति कदाचिदपि विच्छिन्ना नाभूत् । भैम्याः सकाशाद्गानकलाशिक्षाहेतोरुत्तरस्य तस्य सुन्दरे द्वारि आगत्य गन्धर्वकन्या अपि यत्र सर्वदा जगुरिति भावः । वक्रे च ज्ञा(गा)नसद्भावाद्यः सर्वदा गायतीत्युत्प्रेक्षा च (मुखशब्देन) सूच्यते । अथ च—मृगशृङ्गवद्वक्रगामिनी, तथा—स्वादूदका, तथा—किन्नर्य इव किन्नर्यो भ्रमर्यः कमलबाहुल्यात्तासां श्रेष्ठा गुञ्जनहुंकृतिर्यस्या एवंविधा विकसत्कमलभ्रमरीमञ्जुगुञ्जनयुता निर्मलजला एका कुल्या यस्य सौधस्य पुरोभागे कदाचिद्ग्रीष्मर्तावपि नात्रुटत् । बहुजलेव स्थितेत्यर्थः । एकविंशे सर्गे (१४४ श्लो०) 'तुङ्गप्रसादवासात्' इत्यनेन कुल्याया अपि वर्णयिष्यमाणत्वात्प्रकृतेसौधवर्णनोपयोगित्वादयमर्थः कविना विवक्षित इति प्रतीयते । 'विकटः सुन्दरे प्रोक्तो विशालविकरालयोः' इति विश्वः । त्रुटति, भूते 'पुरि लुङ् चास्मे' इति लुट् ॥

भित्तिचित्रलिखिताखिलक्रमा
यत्र तस्थुरितिहाससंकथाः ।
पद्मनन्दनसुतारिरंसुता-
मन्दसाहसहसन्मनोभुवः ॥ २० ॥

भित्तीति ॥ यत्र सौधे पद्मनन्दनस्य ब्रह्मणः सुतायां सरस्वत्यां रिरंसुता संभोगाभिलाषस्तद्रूपममन्दं महत्साहसं अविचार्यकारित्वं तेन हसन्त्यसामर्थ्यदर्पेण सोल्लासो मनोभूर्यासु ताः, ब्रह्मणः सुतारिरंसुतायां भोगोत्पादने विषये तद्रूपे वा महत्साहसं कामस्यैव, तेन पौरुषदर्पेण सोल्लासस्य कामस्य संबन्धिन्यो वा इतिहाससंकथाः पुरावृत्ताख्यायिकाः भित्तिषु चित्ररूपेण चित्रकारलिखितोऽखिलः क्रमः परिपाटी यासामेवंभूताः सत्यः तस्थुः । ब्रह्मपराभवादिकामप्रभावाच्चित्ररूपेण यद्भित्तिषु लिखिता वर्तन्ते स्मेत्यर्थः । ब्रह्मणः सुतारिरंसुतादिकं मत्स्यपुराणादवगन्तव्यम् ॥

पुष्पकाण्डजयडिण्डिमायितं
यत्र गौतमकलत्रकामिनः ।
पारदारिकविलाससाहसं
देवभर्तुरुदटङ्कि भित्तिषु ॥ २१ ॥

पुष्पेति ॥ यत्र सौधे गौतमकलत्रमहल्यां कामयते कामी तस्य संभुञ्जानस्य देवभर्तुरिन्द्रस्य पुष्पकाण्डस्य कामस्य लोकत्रयजये डिण्डिमायितं वाद्यविशेषवदाचरितं पारदारिकस्य परस्त्रीगामिनो विलासवैभवं सुवर्णादिभित्तिषु रचितासु उद्दटङ्कि टङ्कैरुत्कीर्य लिखितम् । येनेन्द्रोपि पराभूतः तादृशस्य महाप्रभावस्य स्मरस्य सेवा युवाभ्यामपि नियतं कार्येति सुवर्णेष्टकचितभित्तिषु कामोद्दीपनार्थमिन्द्रपारदारिकविलासा यत्र टङ्कैरुल्लिखिता इत्यर्थः ।

---

१ अयं श्लोको जीवातुसुखावबोधयोर्नास्ति ।

१ 'अत्र गीतिझंकृतेः शृङ्गाररसस्मरणीयत्वेन रूपणाद्रूपकालंकारः–' इति जीवातुः ।

डिण्डिमायितम्, उपमानात्कर्तुः क्यङन्तान्निष्ठा । परदारान्गच्छति पारदारिकः 'गच्छतौ परदारादिभ्यष्ठग्वक्तव्यः' इति ठक् । उद्दटङ्कि 'टकि बन्धे' इत्यस्मात्कर्मणि चिण् ॥

उच्चलत्कलरवालिकैतवा-
द्वैजयन्तविजयार्जिता जगत् ।
यस्य कीर्तिरवदायति स्म सा
कार्तिकीतिथिनिशीथिनीस्वसा ॥ २२ ॥

उच्चलदिति ॥ उच्चत्वसौन्दर्यादिना वैजयन्ताख्यस्येन्द्रप्रासादस्य विजयेन याऽर्जिता लब्धा सा कार्तिकी कृत्तिकानक्षत्रयुक्ता तिथिः पूर्णिमा तस्या निशीथिनी रात्रिस्तस्याः स्वसा तद्वदत्युज्ज्वला यस्य प्रासादस्य कीर्तिः कान्तिरुच्चलतामुड्डीयमानानां कलरवाणां पारावतानामालिः पङ्क्तिस्तस्याः कैतवाद्व्याजाज्जगदवदायति स्म शोधयति स्म । उज्ज्वलं चकारेत्यर्थः । एते कलरवा न भवन्ति, किंतु शरच्चन्द्रचन्द्रिकातुल्या कीर्तिरेवैतस्येत्यर्थः । 'पारावतः कलरवः' 'स्यात्प्रासादो वैजयन्तः' इत्यमरः । दायति 'दैप् शोधने' इति भ्वादिरवपूर्वः सकर्मकः, 'लट स्मे' इति लट् । कार्तिकी 'नक्षत्रेण युक्तः कालः' इत्यणि ङीप्, अत्र कृत्तिकायुक्तो दिवसः कार्तिक इति भाषितपुंस्कत्वसंभवेपि 'तिथयो द्व्योः' इत्यभिधानात्पुंलिङ्गेन तिथिशब्देन समास स्त्रीलिङ्गस्य समानाधिकरणस्योत्तरपदस्याभावात् 'पुंवत्कर्मधारय---' इति सूत्रेण न पुंवत् । ततश्च कार्तिकी चासौ तिथिश्चेति समासः ॥

गौरभानुगुरुगेहिनीस्मरो-
द्वृत्तभावमितिवृत्तमाश्रिताः ।
रेजिरे यदजिरेऽभिनीतिभि-
र्नाटिका भरतभारतीसुधा ॥ २३ ॥

गौरेति ॥ गौरभानोश्चन्द्रस्य गुरुगेहिन्यां बृहस्पतिभार्यायां तारायां विषये स्मरजनितो य उद्वृत्तभावो गुरुतल्पगामित्वादाचार्यत्यागित्वं, चन्द्रतारयोर्विषये स्मरस्योद्वृत्तभावः कामजनितसामर्थ्यातिशयस्तल्लक्षणं वा, इतिवृत्तं पुरावृत्तमाश्रिताः प्रतिपादयन्त्यः, तथा—भरतेन मुनिना प्रणीता भारती भरताख्यो नाट्यवेदस्तस्मिन्सुधा अमृतरूपाः । भरतोक्तनाट्यरीत्याऽभिनीयमानाः सत्यः सुधाप्राया इति यावत् । एवंभूता नाटिका दशरूपकान्तर्गतचतुरङ्कबन्धविशेषा यस्य सौधस्याजिरेऽङ्गणेऽभिनीतिभिः सात्त्विकाङ्गिकवाचिकाहार्यभेदभिन्नैश्चतुर्विधैर्नटाभिनीयमानैरभिनयैः कृत्वा रेजिरे । तयोः स्मरोद्वृत्तभावस्य मितिः सम्यक्परिच्छित्तिः सैव वृत्तं व्यापारोऽतीतं वा प्रमेयं यत्रैवंविधनाटकादिप्रबन्धमाश्रिता इति वा ॥

शंभुदारुवनसंभृजिक्रिया-
माधवव्रजवधूविलासयोः ।
गुम्फितैरुशनसा सुभाषितै-
र्यस्य हाटकविटङ्कमङ्कितम् ॥ २४ ॥

शंभ्विति ॥ यस्य सौधस्य हाटकविटङ्कं सुवर्णघटितकपोतपालिका शंभोर्दारुवने मन्दरकन्दरायां देवदारुवने गौर्या सह दिव्यसहस्रवर्षपर्यन्तं या सुरतक्रीडा, माधवस्य श्रीकृष्णस्य व्रजवधूभिर्गोपिकाभिः सह विलासो रासक्रीडादिः, तयोर्विषय उशनसा शुक्राचार्येण गुम्फितैः श्लोकरूपेण ग्रथितैः सुभाषितैरतिचमत्कारकारिनवीनार्थशब्दविशेषैः करणैः कर्तृभिर्वाऽङ्कितं चिह्नितम् । हरकृष्णकामविलासवर्णकाद्यारचितकाव्यश्लोकाः कामोद्दीपनार्थं यदीयहाटकविटङ्के टङ्कोत्कीर्णा इत्यर्थः । 'कपोतपालिकायां तु विटङ्कः पुंनपुंसकम्' इत्यमरः । विशेषेण टङ्क्यते बध्यत इति विटङ्कः पक्षिविश्रमार्थं कुड्याद्बहिर्निर्गतं दारु ॥

अह्नि भानुभुवि दाशदारिकां
यच्चरः परिचरन्तमुज्जगौ ।
कालदेशविषयागहात्मरा-
दुत्सुकं शुकपितामहं शुकः ॥ २५ ॥

अह्नीति ॥ यस्मिन्सौधे चरतीति यच्चरः शुकः पक्षी शुकपितामहं पराशरमुज्जगौ तारस्वरं गायति स्म । किंभूतम्—अह्नि दिने भानुभुवि सूर्यपुत्र्यां यमुनायां विषये दाशदारिकां कैवर्तकुमारीं योजनगन्धां परिचरन्तं संभुञ्जानम् । अतएव -यथाक्रमं कालस्य राज्यादेरनिषिद्धस्य, देशस्य तीर्थदेवस्थानादिव्यतिरिक्तस्यानिषिद्धस्य निजशयनागारादेः, विषयस्य परदारादिव्यतिरिक्तस्य स्वभार्यालक्षणस्य, अग्रहात्कालादीनग्रहमानादधैर्यजनकात्स्मराद्धेतोरुत्सुकं कामातिरेकं सोढुमसमर्थमित्यर्थः । पौराणिककथ्यमानभारतादिकथाश्रवणमात्रेण प्राज्ञः शिक्षातिशयादतिमुखरो यद्विहारी कीरस्तादृशीं भारतोक्तां कथामुच्चैरनूदितवानिति भावः । अह्नीत्यादिना कामातुरस्य कालाद्यग्रहनत्वं समर्थितम् । अन्योऽपि साधुरेवंभूतं स्वपितामहमपि निन्दति । 'कैवर्तो दाशधीवरौ' इत्यमरः । यच्चरः, अधिकरणे 'चरेष्टः' ॥

नीतमेव करलभ्यपारता-
मप्रतीर्यं मुनयस्तपोर्णवम् ।
अप्सरःकुचघटावलम्बना-
स्थायिनः क्वचन यत्र चित्रगाः ॥ २६ ॥

नीतमिति ॥ मुनयः परमात्मज्ञानचतुरा ऋषयो यत्र सौधे क्वचन कस्मिन्नपि भित्तिभागे चित्रगाश्चित्रे लिखिता वर्तन्ते । किंभूताः—करलभ्यं पारं परतीरं यस्य तद्भावस्तत्ता नीतमेव लक्षणया संनिहितभाविफलत्वात्समाप्तिं प्रापितप्रायमेव । अथ च—संनिहितपरतीरमपि तपोरूपं दुस्तरमर्णवं समुद्रमप्रतीर्यापरिसमाप्यानुत्तीर्यं च तपोविघ्नार्थमिन्द्रेण प्रेषितानामप्सरसां रम्भादीनामत्युच्चकठिनकुचलक्षणानां घटानामवलम्बनाद्धारणादाधाराद्धेतोः स्थायिनः स्थातुं शक्ताः । कुचमर्दनादिसंभोगकारिण इत्यर्थः । योऽपि प्रतीर्यमाणं समुद्रं नद्यादि वा तीरे संनिहितेऽपि श्रान्तिवशादुत्तरीतुमशक्तः स जलमध्य एव घटादिकमवलम्बनमासाद्य चित्रलिखित इव निश्चलस्तिष्ठति । कुटेति पाठे—'कुटः कोटे घटे गेहे' इति विश्वः ॥

१ 'उच्छलत्' इति सुभाषावबोधापाठः ।

स्वामिना च वहता च तं मया
स स्मरः सुरतवर्जनाजितः ।
योऽयमीदृगिति नृत्यते स्म य-
त्केकिना मुरजनिस्वनैर्घनैः ॥ २७ ॥

स्वामिनेति ॥ यस्य सौधस्य संबन्धिना केकिना क्रीडामयूरेणेति हेतोर्घनैर्निबिडैर्मुरजस्वनैर्मृदङ्गध्वनिभिः, अथ च—तैरेव मेघैर्नृत्यते स्म । इति किम्—योऽयमीदृग्ब्रह्मादिवशीकारकारी स महाप्रभावः स्मरः स्वामिना कार्तिकेयेन प्रभुणा च तदीयमानत्वेन तं वहता पृष्ठेन धारयता मया मयूरेण च सुरतवर्जनाजित इति । चावन्योन्यसमुच्चये । कुमारस्य नैष्ठिकब्रह्मचारित्वान्मयूराणां च वर्षर्तुकामभाजां नेत्रोपान्तरन्ध्रमार्गेण निर्गच्छतामश्रुमयशुक्रबिन्दूनां मयूरीमुखग्रहणमात्रेण गर्भसंभूतेर्लिङ्गसंघर्षणरूपरतपरित्यागो जयहेतुः । मयूराश्च मेघशब्दभ्रान्त्या मृदङ्गशब्दैर्नृत्यन्ति ॥

यत्र वीक्ष्य नलभीमसंभवे
मुह्यतो रतिरतीशयोरपि ।
स्पर्धयेव जयतोर्जयाय ते
कामकामरमणीबभूवतुः ॥ २८ ॥

यत्रेति ॥ यत्र सौधे संभोगपरे नलभीमसंभवे नलभैम्यौ वीक्ष्य मुह्यतोः सुरताभिलाषिणोः अथ च—भ्रान्तिं प्राप्नुवतोः तथा—जयतोः सर्वोत्कर्षेण वर्तमानयोः अथ च—नलभैम्यौ स्ववशे कुर्वतोः, रतिरतीशयो रतिकामयोः स्पर्धयेव ईर्ष्ययेव जयाय तौ पराभवितुं ते नलभैम्यौ कामकामरमणीबभूवतुः स्मररती अभूताम् । संभोगयुक्तौ स्त्रीपुंसौ दृष्ट्वाऽन्यावपि स्त्रीपुंसावुद्दीप्तस्मरौ भवत इति तादृशौ भैमीनलौ दृष्ट्वा प्रतिष्ठावशात्तत्र कृतावासौ चेतनौ रतिकामौ संजातसुरतेच्छौ जातौ, तथा—सौन्दर्यातिशयाद्रतेर्नले काम इति, कामस्य च भैम्यां रतिरिति संजातभ्रमौ च जातौ । एवंभूतावतिशयितान्योन्यरागजननाद्वशीकृतभैमीनलौ यत्र मूर्तौ रतिकामावेवाभूतामिति रतिकामयोर्द्वन्द्वद्वयं जातमित्यर्थः । अयमेव च तयोर्जयः । अथ च—स्वसंभोगदर्शनात्तयोरपि संभोगवाञ्छोत्पादनाज्जयः तज्जयार्थं बुद्धिपूर्वव्यापाराभावात्स्पर्धयेवेत्युत्प्रेक्षा । स्पर्धाकारणं तूक्तम् । अथ च—रतिकामसंनिधाने यथा स्त्रीपुंसयोः संभोगवाञ्छासमुदयः, तथाऽनयोरपि रतिकामसंनिधानमेव प्रेमरसातिशयादन्योन्यसंनिधानमात्रेणैव कामसंमोहः प्रादुरासीदिति भावः । नलभैम्यौ दृष्ट्वा मोहं भजतोः अतएव नलभैमीभ्यामावां जिताविति यथाश्रुत एव वा संबन्धः । अत्र सर्वत्राल्पान्तरत्वाच्छ्यायप्राप्तोऽपि पूर्वनिपातो रतेर्नले कामभ्रमोदयान्नलरतिकामपदानां प्राक्प्रयोगस्य, रतीशस्य भैम्यां रतिभ्रमोदयान्नीमसंभवारतीशकामरमणीपदानां पश्चात्प्रयोगस्य, औचितीं सूचयतीति ज्ञेयम् । रतिरतीशयोर्विषये स्पर्धयेति केचित् । ते प्रथमाद्विवचनान्तम् । कामकामरमणीबभूवतुरिति क्विः । कुलकम् ॥

तत्र सौधसुरभूधरे तयो-
राविरासुरथ कामकेलयः ।

ये महाकविभिरप्यवीक्षिताः ।
पांसुलाभिरपि ये न शिक्षिताः ॥ २९ ॥

तत्रेति ॥ अथ तत्रोक्तगुणे सौधरूपे सुरभूधरे मेरौ तयोस्ते कामकेलय आविरासुः स्पष्टं दिदीपिरे । ते के कामकेलयः—महाकविभिर्व्यासकालिदासादिभिर्निगूढभावदर्शिभिरप्यवीक्षिता न बुद्धिगोचरीकृताः । तेषामपि न स्फुरिता इति यावत् । तथा—अनेकनरसंभोगचतुराभिः पांसुलाभिः स्वैरिणीभिरपि ये न शिक्षिता अभ्यस्ता नानाजारशिक्षोपदेशादपि न ज्ञाताः । एतेनालौकिकाः कामविलासा वर्णयिष्यन्त इति सूचितम् । 'द्रवकेलिपरीहासाः' इति केलिशब्दः पुंलिङ्गोऽपि ॥

पौरुषं दधति योषिता नले
स्वामिनि श्रिततदीयभावया ।
यूनि शैशवमतीर्णया किय-
त्प्रापि भीमसुतया न साध्वसम् ॥ ३० ॥

पौरुषमिति ॥ एवंभूतया भीमसुतया एवंभूते नले विषये कियत्किंपरिमाणं साध्वसं भयं न प्रापि, अपि तु बहु भयं प्राप्तम् । अधाष्टर्यं प्रापेत्यर्थः । किंभूते नले—पौरुषं दधति बलिनि । किंभूतया—स्वयं तु—योषिताऽबलया । तथा—स्वामिनि आत्मनः प्रभौ राजनि च । स्वयं तु—श्रितोऽङ्गीकृतस्तदीयभावस्तदीयत्वं यया नलदासीभूतया । तथा—यूनि तरुणे । स्वयं तु—शैशवं बाल्यमतीर्णयाऽनतिक्रान्तया वयःसंधौ वर्तमानया । बलिनः स्वामिनो राज्ञस्तरुणाच्चाबलया दासीभूतया बालया भयं प्राप्यत इति युक्तमिति । अत्र च प्रथमसंभोगे किं वा भावीति ईदृशे नले ईदृश्या तया महद्भयं प्रापीति भावः । सर्वाण्यपि विशेषणानि हेतुगर्भाणि । अथ च—श्रितो नलविषयो भावो रमणाभिलाषो ययैतादृश्यापि स्वामिनि भर्तरि नले महद्भयं प्रापि । यतः—पूर्वोक्तगुणविशिष्टे पूर्वोक्तगुणविशिष्टया चेति । एवंभूतेऽपि नले एवंभूतया तया साध्वसं कियदल्पमेव प्राप्तम् । बहु साध्वसं वर्तत एव, तथापि किंचित्साध्वसं परित्यक्तम् । यस्मात्—श्रितो नलविषयो रमणाभिलाषो ययेति वा । अथ च—श्रितः परिशीलितो ज्ञातो नलाशयो यया बाल(ला)या मम कण्ठोपभोगं न करिष्यतीति निश्चितनलाभिप्राया भयं न प्रापेति भाव इति वा । श्रितोऽनुष्ठितो नलाशयो यया नलभावानुकूलवर्तिन्या प्रथमसंभोगे पौरुषमवलम्ब्य क्रीडाकौतुककारी भवति, कान्ता चानुत्तीर्णशैशवा किमत्र भावीति सभया किंचिदप्यजानानाऽल्पभयं विहाय प्रियभावानुकूलमाश्रयतीति । एतदनुभवसाक्षिकमिति भावः ॥

इदानीं लज्जानुभावपूर्वं कामशास्त्रानुरोधेन प्रथमसंभोगक्रममाह—

दूत्यसंगतिगतं यदात्मनः
प्रागशिश्रवदियं प्रियं गिरः ।
तं विचिन्त्य विनयव्ययं ह्रिया
न स्म वेद करवाणि कीदृशम् ॥ ३१ ॥

दूत्येति ॥ इयं प्राक् विवाहात्पूर्वं दूत्येन देवदूतव्यापारेण संगतिं गतं सबन्धं प्राप्तं साक्षाद्दृष्टं नलं प्रियमात्मनो विरहप्रका-

१ अयं श्लोको जीवातौ न व्याख्यातः ।

शिनीर्नवमसर्गोक्ता गिरो वाणीरशिश्रवदाश्रावयामासेति यत्, तं प्रियस्य स्ववचनश्रावणलक्षणं विनयस्य व्ययं नाशं धाष्टर्यं विचिन्त्य विशेषेण स्मृत्वा ह्रिया कृत्वा कीदृशं करवाणीति न वेद स्म नाज्ञासीत् । तदानीं मया यदुक्तं तन्महदनुचितं कृतं, तत्प्रतिक्रिया कीदृशी, प्रकृते चार्थे किं कार्यमिति विनयव्ययस्मरणाज्जातया ह्रिया किंकर्तव्यतामूढाभूदित्यर्थः । उत्तमत्वं सूचितम् । उत्तमा हि पूर्वानुचितस्मरणाल्लज्जन्ते । अतीतस्मरणेनापि सल्लज्जाभूत्, प्रारब्धसंभोगानुभवदशायां तु सलज्जत्वं किं वाच्यमिति भावः । अशिश्रवत् शृणोतेर्णौ चङि द्विर्वचने उपधाह्रस्वत्वे 'सन्वल्लघुनि-' इति सन्वद्भावे 'स्रवतिशृणोति-' इत्यभ्यासस्य वेत्वम् । प्रिय शृणोतेः शब्दकर्मत्वाण्णौ कर्मत्वम् ॥

यत्तया सदसि नैषधः स्वयं
प्राग्वृतः सपदि वीतलज्जया ।
तन्निजं मनसिकृत्य चापलं
सा शशाक न विलोकितुं नलम् ॥ ३२ ॥

यदिति ॥ तया सदसि मिलितलोकत्रयसमक्षं वीतलज्जया निर्लज्जया सत्या सपदि स्वयं परप्रवर्तनाद्यभावेप्यात्मनैव वरणमालया कृत्वा प्राक् नैषधो वृत इति यत्, सा तत्तथा नलवरणलक्षणं निजं चापलं धाष्टर्यं मनसिकृत्य विचार्य तदानीं लज्जां त्यक्त्वा मया महद्धाष्टर्यमवलम्बितमेतदनुचितमिति स्मृत्वा लज्जातिशयवशात्तदानीं नलं विलोकितुमपि न शशाक । अत्राप्युत्तमत्वं सूचितम् । तच्चापलं मनसिकृत्य विशेषेणेता प्राप्ता चासौ लज्जा च तया कृत्वा नलं वीक्षितुं माशकदिति वा । मनसिकृत्य पूर्ववत् ॥

आसने मणिमरीचिमांसले
यां दिशं स परिरभ्य तस्थिवान् ।
ताममूयितवतीव मानिनी
न व्यलोकयदियं मनागपि ॥ ३३ ॥

आसन इति ॥ अनुरागातिशयादेकासने वर्तमानयोस्तयोर्मध्ये स नलो मणिमरीचिभिः खचितोत्तमरत्नप्रसारिकिरणैर्मांसले व्याप्त आसने सिंहासने (स नलः) यां दिशं परिरभ्य यं सिंहासनप्रदेशमाश्रित्य तस्थिवान्, इयं भैमी तां दिशं मनागपि न व्यलोकयत् । उत्प्रेक्षते—असूयितवतीव ईर्ष्यावतीव । दिशः स्त्रीत्वादियं मद्भर्त्रालिङ्गितेति सपत्नीबुद्ध्याऽसूयां कृतवतीव तां नापश्यदित्यर्थः । यतो मानिनी । लज्जाभयाभ्यां नापश्यत्, तत्रेयमुत्प्रेक्षा । असूयितवती कण्ड्वादियगन्तात् क्तवतुः, उगित्वान्ङीप् ॥

ह्रीसरिन्निजनिमज्जनोचितं
मौलिदूरनमनं दधानया ।
द्वारि चित्रयुवतिश्रिया तया
भर्तृहूतिशतमश्रुती कृतम् ॥ ३४ ॥

ह्रीति ॥ निरन्तरप्रवाहरूपत्वाद्ध्रीरूपायां सरिति निजस्यात्मनो निमज्जनं तस्योचितं योग्यं मौलेः शिरसो दूरं नितरां नमनमानाभेर्नम्रीभावं दधानया, तथा—द्वारि गृहद्वारदेशे चित्रलिखितयुवतिवत् श्रीः शोभा यस्यास्तया लज्जाभयाभ्यामन्तः प्रवेष्टुमशक्ततयाऽतिनिश्चलया तत्रैव स्थितया भैम्याऽपि भैम्या गच्छेति भर्तुर्नलस्य हूतीनामाह्वानानां शतमश्रुतीकृतं श्रुतमश्रुतं कृतम् । श्रुतं लज्जाभयाभ्यामनुत्तरदानागमनाच्चाश्रुतमिव कृतमित्यर्थः । नवोढाजातिरियम् ॥

वेश्म पत्युरविशन्न साध्वसा-
द्वेशितापि शयनं न साऽभजत् ।
भाजितापि सविधं न सास्वप-
त्स्वापितापि न च संमुखाभवत् ॥ ३५ ॥

वेश्मेति ॥ सा किमग्रे भविष्यतीति साध्वसाद्भयात्पत्युर्वेश्म न स्वयमविशत् । अनन्तरं सख्या नलेन वा वेशितापि गृहमध्यं प्रापितापि शयनं नाभजत् । ततोपि सख्या नलेन वा शयनं भाजितापि सा सविधं नलसमीपं यथा तथा नास्वपत्, किंतु दूरत एव निद्राति स्म । ततोपि सख्या नलेनैव वाङ्कपाल्यादिना सविधं स्वापितापि न च संमुखाऽभवत्, किंतु शय्यापार्श्वपट्टिकावलम्बिनी पराङ्मुख्येवाभूदित्यर्थः । प्रथमसंभोगे मुग्धाया जातिरियम् । साध्वसादिति सर्वत्र । अस्वपत् 'अङ्गार्य-' इति लङ्यट् । संमुखा 'स्वाङ्गाच्चोपसर्जनात्-' इति विकल्पान्न ङीप् ॥

केवलं न खलु भीमनन्दिनी
दूरमत्रपत नैषधं प्रति ।
भीमजाहृदि जितः स्त्रिया ह्रिया
मन्मथोपि नियतं स लज्जितः ॥ ३६ ॥

केवलेति ॥ भीमनन्दिनी केवलं नैषधं प्रत्युद्दिश्य दूरं नितरामत्रपत लज्जां प्रापेति न, किंतु भीमजाहृदि वर्तमानया ह्रिया लज्जारूपया स्त्रिया जितः खलु जित एव सोऽतिप्रसिद्धपराक्रमः हृद्येव वर्तमानो मन्मथोपि नियतं बहुकालं लज्जितः । अथच—मनो मथ्नाति पीडयतीति मन्मथः पृषोदरादिः । एवंविधोपि जितो लज्जितः संकुचितश्चेति चित्रम् । ह्रीवशान्नलविषयोऽतिपीडाकरोपि कामो बहुकालं तामभिभवति स्मेति भावः । अन्योपि स्त्रिया जितो लज्जते ॥

आत्मनापि हरदारसुन्दरी
यत्किमप्यभिललाष चेष्टितुम् ।
स्वामिना यदि तदर्थमर्थिता
मुद्रितस्तदनया तदुद्यमः । ३७ ॥

आत्मनेति ॥ हरदारवद्गौरीवत्सुन्दरी सा आत्मनापि स्वयमेव यत्किमपि यत्किंचिच्चेष्टितुं तदवसरोचितं कटाक्षवीक्षणताम्बूलदानतालवृन्तचालनाद्यभिललाष कर्तुमैच्छत् । तदर्थं तस्मै प्रयोजनाय तद्वस्तुदानाय इङ्गितज्ञेन स्वामिना नलेन ताम्बूलं देहीति यदि अर्थिता याचिता तर्ह्यनया भैम्या तस्य नलस्योद्यमो

१ इदं पद्यं जीवातौ न वर्तते ॥

याचनप्रयत्नो मुद्रितः ताम्बूलादीनामदानाद्व्यर्थीकृतः । तेन याचिता सती न ददाविति भावः । अपिरेवार्थे । स्वामिनेत्यनेनावश्यकर्तव्यतायां सत्यामर्पीति सूचितम् । गौर्यपि प्रथमसंभोगे हरेणार्थिता सत्येवमेवाकरोदिति ध्वनिः ॥

ह्रीभराद्विमुखया तया भियं
सञ्जितामननुरागशङ्किनि ।
स स्वचेतसि लुलोप संस्मर-
न्दृत्यकालकलितं तदाशयम् ॥ ३८ ॥

ह्रीभरादिति ॥ दृत्यकाले कलितं परीक्षितं तदाशयं भैम्यभिप्रायं सम्यग्दृढसंस्कारतया स्मरणपथारूढं स्मरन्विचारयन्स नलो ह्रीभराद्विमुखया तया विमुखत्वादेवाननुरागशङ्किनि किमस्या मय्यनुरागो नास्तीति शङ्काशीले स्वचेतसि सञ्जितां जनितामनुरागाभावसंभावनां भीतिं लुलोप निरस्यति स्म । दृत्यावसरे मय्यनुरागातिशयादिन्द्रादीनपि परित्यज्य मदलाभे कृतमरणनिश्चयेयमिदानीमनुरागं न लक्ष्यतीति निश्चित्य जातां शङ्कां तत्याज । मुग्धा लज्जाभरादेव विमुखीयं नत्वननुरागादिति निश्चिकायेत्यर्थः । तदाशयं शेषत्वाविवक्षया षष्ठ्यभावः ॥

पार्श्वमागमि निजं सहालिभि-
स्तेन पूर्वमथ सा तयैकया ।
क्वापि तामपि नियुज्य मायिना
स्वात्ममात्रसचिवावशेषिता ॥ ३९ ॥

पार्श्वमिति ॥ तेन नलेन भयवशादेकाकिनी नलस्य सविधमनागच्छन्ती सा आलिभिर्भूयसीभिः सह निजं पार्श्वमागमि प्रापिता । भवतीभिरपि किंचित्कालमनया सार्धमागन्तव्यमित्यादिष्टाभिस्ताभिस्तां स्वसंनिधिं प्रापितवानित्यर्थः । अथानन्तरं कियतापि कालेन किंचिद्विश्वासप्राप्त्यनन्तरमेकयैकाकिन्यैव तया सख्या सह सख्यन्तरपरिहारेण संनिधिं प्रापिता । अथानन्तरं कियतापि कालेन तामपि सखीं क्वापि गन्धमाल्यताम्बूलाद्याहरणे विषयेऽलीकं नियुज्य गन्धाद्यानयेति व्याजाप्रेष्य यतो मायिना कामशास्त्रोक्तकन्याविस्रम्भणकपटपटुना चतुरेण तेन स्वात्ममात्रो नल एव सचिवः सखा यस्याः स्वसहायैवैकाकिनी अवशेषिता स्वसमीपे स्थापिता । विजनोचितं स्त्रीयमिङ्गितमदर्शयत्, तदीयं चापश्यदिति भावः । कन्याविस्रम्भणप्रकारोयम् । आगमि प्यन्तात्कर्मणि चिण् '(विभाषा) चिण्णमुलोः-' इति दीर्घविकल्पाभावपक्षे ह्रस्वः ॥

संनिधावपि निजे निवेशिता
मालिभिः कुसुमशस्त्रशास्त्रवित् ।
आनयद्व्यवधिमानिव प्रिया-
मङ्कपालिवलयेन संनिधिम् ॥ ४० ॥

संनिधाविति ॥ स नल आलिभिः स्वयमेव निजे संनिधौ निवेशितां तेनैव प्रयोजकेन स्वसमीपे प्रयोज्याभिः सखीभिः स्थापितामपि प्रियामङ्कपालेर्भैमीपृष्ठभागस्पर्शिनः स्वीयैकभुजालिङ्गनविशेषस्य वलयाकारेण वेष्टनेन कृत्वा संनिधिमानयत् । यतः—कुसुमशस्त्रः कामस्तस्य वात्स्यायनादिप्रणीतं शास्त्रं वेत्तीति वित् । उत्प्रेक्षते—व्यवधिमानिव दूरस्थो यथा प्रियां संनिधिमानयति । कामशास्त्रे—'आदौ रतं बाह्यमिह प्रयोज्यं तत्रापि चालिङ्गनमेव पूर्वम्' इति । 'तथा सामीप्यगां भीरुं नवोढां संनिधापयेत् । विश्रासच्छद्मना गाढालिङ्गनाद्याजयेद्भयम्'इत्यादि । संनिधिस्थापनव्याजेन गाढमालिङ्ग्य भयं त्याजितवानिति भावः ॥

प्रागचुम्बदलिके ह्रियानतां
तां क्रमादरनतां कपोलयोः ।
तेन विश्वसितमानसां झटि-
त्यानने स परिचुम्ब्य सिष्मिये ॥ ४१ ॥

प्रागिति ॥ स ह्रिया आनतामतिनम्रां तां प्रागलिके ललाट एवाचुम्बत् । अतिनम्रत्वात्तदानीं कपोलादिचुम्बनस्याशक्यत्वादित्यर्थः । ततः—किंचिदुन्नतचुम्बनभयत्वात्पूर्वापेक्षया दरमीषन्नतां किंचिदुन्नतमुखीं क्रमात्परिपाट्या तदानीमेवान्यदा वा कियता द्वयोरपि कपोलयोश्चुम्ब । तेन कपोलचुम्बनेन ततोपि विश्वसितं मानसं यस्यास्तां ततोऽप्युन्नतमुखीमानने झटिति मुखवक्त्राभयाच्छीघ्रं परिचुम्ब्य दुर्लभाधरचुम्बनलाभजनितानन्दवशात्सिष्मिये ईषदव्यक्तमहसत् । स्फुटहासे पुनर्लज्जा स्यादिति भयादीषज्जहासेत्यर्थः । अथ च यदेतावत्पर्यन्तं त्वया वञ्चितं तदपीदानीं मया लब्धमिति हासः । ललाटादीनि कामशास्त्रोक्तानि चुम्बनस्थानानि । ह्रयमपि विस्रम्भणरीतिः ॥

लज्जया प्रथममेत्य हुंकृतः
साध्वसेन बलिनाथ तर्जितः ।
किंचिदुच्छ्वसित एव तद्धृदि
न्यग्भवभूव पुनरर्भकः स्मरः ॥ ४२ ॥

लज्जयेति ॥ ललाटादिचुम्बनक्रमानुभवजातसुखविशेषोल्लसितकामोदयायास्तस्या हृदि मानसे किंचिदुच्छ्वसित एव विकसित एवार्भको मुग्धत्वाद्प्रौढः स्मरः प्रथमं चुम्बनजनितया लज्जया एत्यागत्य हुंकृतः हुंकारेण निषिद्धः । अथ पश्चाद्बलिना प्रबलेन चुम्बनजन्येन साध्वसेन सात्त्विकभयेन तर्जितो भर्त्सितोऽस्मदीयं भैमीहृदयलक्षणं स्थानं त्वया प्रविष्टं तिष्ठेत्याक्षेपपूर्वं लज्जाभयाभ्यां भर्त्सित इत्यर्थः । एवकारो विलम्बद्योतनार्थः । अर्भकोऽपि किंचिच्चेष्टितुमुद्युक्तो मात्रा पूर्वमागत्य हुंकृत्य पश्चात्प्रभुणापि वाचा तर्जितः सन्संकुचितो भवति । हुंकृत इव तर्जित इवेति च प्रतीयमानोत्प्रेक्षा ॥

वल्लभस्य भुजयोः स्मरोत्सवे
दित्सतोः प्रसभमङ्कपालिकाम् ।
एककश्चिरमरोधि बालया
तल्पयत्रणनिरन्तरालया ॥ ४३ ॥

१ बहुत्रोपलभ्यमानमपि विभाषापदमत्र प्रक्षिप्तम् । 'विभाषा चिण्णमुलोः' इति सूत्रस्य नुम्विधायकत्वेन दीर्घविधायकत्वाभावात् । तस्मात् 'चिण्णमुलोरन्यतरस्याम्' इति सूत्र बोध्यम् ॥

वल्लभस्येति ॥ स्मरोत्सवे सुरतोत्सवारम्भेऽङ्कपालिकां कृतपृष्ठवेष्टनबाहुवलयालिङ्गनं प्रसभं हठाद्दित्सतोः कर्तुमिच्छतोर्वल्लभस्य नलस्य भुजयोर्मध्ये एकको भुजः बालया सुरताप्रौढया तया चिरमरोधि प्रतिबद्धः । कीदृश्या—तल्पस्य शय्याया यन्त्रणेन स्वपृष्ठदृढपीडनेन निरन्तरालया निरवकाशया । आलिङ्गनार्थं पृष्ठदेशे नलभुजप्रवेशो यथा न भवति तथा दृढं शय्यासंलीनयन्त्रणेन निरवकाशत्वाद्भुजरोधनाच्चालिङ्गनविघ्नं समाचरदित्यर्थः । अबलत्वादेकदैव द्वयोर्भुजयोः प्रतिरोद्धुमशक्यत्वाद्द्वाभ्यामपि निजभुजाभ्यामेकैकस्य नलभुजस्य पर्यायेण रोधनादेकक इत्युक्तेपि द्वावपि भुजौ निरुद्धाविति ज्ञेयम् । एकक इति पर्यायाशयेनोक्तम् । द्वाभ्यामेकस्यैव निरोधेपि द्वितीयेन स्पर्शमात्रं कर्तुं शक्यते, न तु द्विभुजसाध्यमङ्कपाल्यालिङ्गनमित्येकक इत्युक्तमिति वा । अन्योन्याभिमुख्येन सुप्तयोस्तयोरधस्तनबाहू शय्यासंलग्नत्वाच्छय्ययैव नियन्त्रितौ । आलिङ्गनोद्युक्तः शय्यासंलग्नो नलबाहुस्तल्पयन्त्रणनिरवकाशत्वात्पृष्ठदेशे प्रवेष्टुमशक्यत्वादवरुद्धः । उपरितनस्तूपरितनेन भैमीबाहुना चिरं प्रतिरुद्ध इत्याशयः ॥

हारचारिमविलोकने मृषा-
कौतुकं किमपि नाटयन्नयम् ।
कण्ठमूलमदसीयमस्पृश-
त्पाणिनोपकुचधाविना धवः ॥ ४४ ॥

हारेति ॥ हारस्य एकावल्यादिमुक्ताहारस्य चारिमा सौन्दर्यं तस्य विलोकने विषयेऽतिवृत्तस्थूलमुक्तायुक्तोऽत्यद्भुतोयं त्वदीयो हारो दर्शय दर्शयैनमित्यादि किमपि लोकोत्तरं मृषाकौतुकं नाटयन्नभिनयन्नयं धवो भर्ता नलः स्पर्शलोभवशादुपकुचं स्तनसमीपं धावत्येवंशीलेन पाणिनाऽदसीयं भैम्याः संबन्धि कण्ठमूलं कण्ठाधोभागमस्पृशत् । सार्वभौमस्य तस्यापूर्वस्य वस्तुजातस्य दृष्टत्वात्कुचस्पर्श एव तात्पर्याच्च तात्त्विककौतुकाभावेपि साक्षात्करस्पर्शमसहमानायास्तस्या हारसौन्दर्यदर्शने मृषाकौतुकनाटनेन कण्ठमूलस्पर्शव्याजेन कुचावेव स्पृशति । मुग्धाविस्रम्भणजातिः ॥

पुनः स्तनस्पर्श उपायान्तरमाह—

यत्त्वयास्मि सदसि स्रजाञ्चित-
स्तन्मयापि भवदर्हणार्हति ।
इत्युदीर्य निजहारमर्पय-
न्नस्पृशत्स तदुरोजकोरकौ ॥ ४५ ॥

यदिति ॥ स इत्युदीर्योक्त्वा भैमीकण्ठे निजमुक्ताहारमर्पयन् सन् हारार्पणमिषेण तस्या उरोजावेव काठिन्यादिगुणत्वेन कोरकौ पस्पर्श । इति किम्—हे भैमि सदसि सभामध्ये त्वयाऽहं स्रजा मधूकमालया कृत्वा यद्यस्मादञ्चितः सर्वेषां समक्षं पूजितोऽस्मि । तत्तस्मान्मयापि मत्कर्तृका भवत्या अर्हणा पूजा अर्हति । उपकारस्य प्रत्युपकर्तव्यमिति न्याययुक्तेति । अर्हणा कृतेत्यपि पाठः ॥

नीविसीम्नि निहितं स निद्रया
सुभ्रुवो निशि निषिद्धसंविदः ।
कम्पितं शयमपास यन्नयं
दोलनैर्जनितबोधयाऽनया ॥ ४६ ॥

नीवीति ॥ जाग्रदवस्थायां करं निराकरिष्यतीति बुद्ध्या निशि निद्रया निषिद्धा वारिता संविज्ज्ञानं यस्यास्तस्याः सुभ्रुवो भैम्या नीविसीम्नि रसनाकलापमोचनार्थं वसनपट्टिकापरिसरे निहिते स्थापित एव नीविस्पर्शमात्रेण कम्पितं सात्त्विककम्पयुक्तं शयं हस्तं स नलो दोलनैः समुद्भूतस्वगतसात्त्विककम्पनिमित्तहस्तचालनैर्जनितबोधया त्याजितनिद्रयाऽनया भैम्या करणभूतयापास निराकृतवान् । कीदृशः—अयं शुभावहविधिम् । संभोगानन्दमिति यावत् । तं यन् प्राप्नुवन् । 'अपासयन्निजम्' इति पाठे—भैम्या प्रयोज्यया स प्रयोजको नलो निजं करमपासयदमोचयदित्यर्थः । कम्पमानकरसंस्पर्शमात्रेण जातबोधया तदीयः करो निराकृत इत्यर्थः । अनयेति करणे तृतीया । पाठान्तरे तु प्रयोज्यकर्तरि ॥

स प्रियोरुयुगकञ्चुकांशुके
न्यस्य दृष्टिमथ सिष्मिये नृपः ।
आववार तदथाम्बराञ्चलैः
सा निरावृतिरिव त्रपावृता ॥ ४७ ॥

स इति ॥ स नृपः प्रियाया ऊरुयुगस्य कञ्चुकांशुके आवरणभूते वस्त्रे दृष्टिं न्यस्य अथानन्तरमेव सिष्मिये ईषदहसत् । सूक्ष्मवस्त्रावृतत्वात्सर्वं मया द्रष्टुं शक्यत एवेत्याशयेनेत्यर्थः । ल्यपा पूर्वकालत्वेऽभिहिते स्मितस्यानन्तर्येप्यव्यवहितेतरत्वद्योतनार्थमथशब्दः । नीविस्थापितकरापासनानन्तरमिति वा । अथ नलस्मितानन्तरं निरावृतिरिव वस्त्ररहितेव त्रपावृता सती सा तदूरुयुगवस्त्रं वस्त्रस्य तस्यैवाञ्चलैरग्रभागैराववाराच्छादयामास । वस्त्रस्यातिसूक्ष्मत्वाद्वृथासंभावितनिजगोप्याङ्गदर्शना सती घनावयवत्वसंपादनार्थं तद्वस्त्रं तदञ्चलैरेव प्रावृणोदिति भावः । कामिनोरियं जातिः । अञ्चलैरिति बहुत्वं पुनः पुनरावरणक्रियाभेदात् ॥

बुद्धिमान्व्यधित तां क्रमादयं
किंचिदित्थमपनीतसाध्वसाम् ।
किंच तन्मनसि चित्तजन्मना
ह्रीरनामि धनुषा समं मनाक् ॥ ४८ ॥

बुद्धिमानिति ॥ बुद्धिमान् कामशास्त्रोक्तकन्याविस्रम्भणप्रकारचतुरोऽयमित्थं पूर्वोक्तरीत्या क्रमात्परिपाट्या तामपनीतसाध्वसां त्याजिताकस्मिकसंभोगभयां व्यधिताकृत । किंचेत्यधिकोक्तौ । न परमेतावदेव, किंत्वन्यच्च—तस्या मनसि वर्तमाना ह्रीस्तत्रैव स्थितेन चित्तजन्मना स्वधनुषा समं सह मनाक् अनामि शिथिलिता कामेन धनुषि किंचिदारोप्यमाणे लज्जाप्यल्पा जातेत्यर्थः । पूर्वं कामो भयलज्जाभ्यां त्याजितः । इदानीं तु भैमीभयं नलेन निराकृतम्, एका स्त्रीव ह्रीरवशिष्टा, सा कामेन सुखेनाल्पितेति भयलज्जयोः किंचिदपासनेन पूर्वं मन्दीभूतोपि कामः स्तोकं पुनरुल्लासेति भावः । अनामि 'ज्वलह्वल-' इति वार्तिकान्मित्त्वस्य

१ 'आवृतमप्यनावृतमिवावृणोदिति त्रपातिशयोक्तिः' इति जीवातुः ।

पाक्षिकत्वान्निमित्ताभावे ह्रस्वाभावः । मित्त्वेऽपि वा 'चिण्णमुलोः'- इति पाक्षिको [1]दीर्घः ॥

सिष्मिये हसति न स्म तेन सा
प्रीणितापि परिहासभाषणैः ।
स्वे हि दर्शयति ते परेण का-
नर्घ्यदन्तकुरुविन्दमालिके ॥ ४९ ॥

सिष्मिय इति ॥ तेन परिहासभाषणैः परिहासप्रधानैः सप्रेमवचनैः प्रीणिता जनितप्रीतिरपि सा तस्मिन्हसत्यपि विकसत्कपोलनयनमलक्षितदन्तं सिष्मिये स्मितं चकार । दर्शितदन्तं प्रसरद्वास्यं तु न चकार । अन्या तु परिहासप्रीणिता हसति, इयं तु नेति चित्रमित्यपिशब्दार्थः । हि यस्मात्ते प्रसिद्धे अनर्घ्या निर्मूल्याः सुलक्षणा दन्ताश्च एव ताम्बूलरागत्वात्कुरुविन्दानि माणिक्यानि तेषां मालिके अल्पे ह्रस्वे वा माले स्वे आत्मीये सर्वस्वरूपे का कुलीना स्त्री परेणान्येन हास्येन येन केनचित्पुरुषेण च दर्शयति दर्शनवत्यौ करोति । अपि तु हास्यं स्त्रीणां दोषायेत्युत्तमस्त्रीत्वात्प्रकटितदशनं हास्यं न चकारेति युक्तम् । नह्यनर्घ्यवस्त्वन्यस्मै प्रदर्श्यते । तेन स हसति स्मेति वा । स्मितहसितविहसितोपहासाट्टहासप्रकारैर्हास्यरसो भरतेन पञ्चधा निरूपित इति स्मितहसितयोर्भेदः । 'अणौ यः कर्ता' इति कर्तृसंज्ञानुवादेन कर्मत्वविधानात्संज्ञापूर्वकविधेरनित्यत्वात्परेणेत्यत्र दृशेर्बुद्ध्यर्थत्वाद् 'गतिबुद्धि-' इति प्रौस्तकर्मत्वाभावः ॥

वीक्ष्य भीमतनयास्तनद्वयं
मग्नहारमणिमुद्रयाङ्कितम् ।
सोढकान्तपरिरम्भगाढता
सान्वमायि सुमुखी सखीजनैः ॥ ५० ॥

वीक्ष्येति ॥ सखीजनैः सा सुमुखी सोढा कान्तस्य परिरम्भाणामालिङ्गनानां गाढता दृढपीडनं यया एवंभूताऽन्वमाय्यनुमिता । किं कृत्वा—भीमतनयायाः स्तनद्वयं स्तनद्वये मग्नानां हारमणीनां मुद्रया किंचिद्गम्भीररक्तीभूतस्थानश्रियाऽङ्कितं चिह्नितं वीक्ष्य । स्तनयोर्मग्नहारमणिदर्शनादन्यथानुपपत्त्या गाढालिङ्गनमनया सोढमिति सखीभिर्ज्ञातमित्यर्थः । सुमुखीत्यनेनालिङ्गनसंजातहर्षोऽपि सूचितः ॥

याचते स्म परिधापिकाः सखीः
सा स्वनीविविनिबिडक्रियां यदा ।
अन्वमिन्वत तदा विहस्य ता
वृत्तमत्र पतिपाणिचापलम् ॥ ५१ ॥

याचत इति ॥ सा यदा यस्मिन्समये परिधापयन्तीति परिधापिकाः सखीः स्वनीव्या आत्मीयवस्त्रमेखलाबन्धस्य निबिडक्रियां गाढबन्धनं याचते स्म प्रार्थितवती तदा ताः सख्योऽन्योन्यविलोकनपूर्वं विहस्यात्र नीविबन्धश्लथीकरणार्थं वृत्तं जातं पत्युः पाणिचापलं बलादुन्मोचनव्यापारमन्वमिन्वत अनुमितिविषयान्यथानुपपत्त्यैवं प्रार्थनं युज्यत इति पूर्ववृत्तं निश्चितवत्य इत्यर्थः । याचिर्द्विकर्मा । अन्वमिन्वत मिनोतिः, स चानुपूर्वो ज्ञानार्थः ॥

कुर्वती निचुलितं ह्रिया किय-
त्सौहृदाद्विवृतसौरभं कियत् ।
कुड्मलोन्मिषितमूनसेविनीं
पद्मिनीं यजति सा स्म पद्मिनी ॥ ५२ ॥

कुर्वतीति ॥ कामशास्त्रोक्तलक्षणा पद्मिनी सा भैमी पद्मिनीं कमलिनीं जयति स्म । किंभूता—कियत्किंचिच्चुम्बनादि संभोगकर्म ह्रिया निचुलितं स्थगितमप्रकटं कुर्वती (तथा—) कियदालिङ्गनादिकं सौहृदाच्चित्तसौख्यादिवृत्तं प्रकटितं सौरभं कामशास्त्रोक्तकौशलं यत्र एवंभूतं कुर्वाणा । किंभूतां पद्मिनीम्—कुड्मलोन्मिषितानि मुकुलान्येव प्रफुल्लानि सूनानि पुष्पाणि सेवते भजत्येवंशीलाम् । अर्धविकसितपुष्पवतीम् । निचुलितं कलिकास्थानीयम्, विवृतसौरभं विकसितपुष्पस्थानीयम् । कियत्कलिकारूपा कियद्विकसितकमला कमलिनीव सा भूदित्यर्थः । विवृतं सौरभं मनोज्ञत्वं सौगन्ध्यं वा यस्येति वा ॥

नाविलोक्य नलमासितुं स्मरो
ह्रीर्न [1]वीक्षितुमदत्त सुभ्रुवः ।
तद्दृशः पतिदिशाचलन्नथ
व्रीडिताः समकुचन्मुहुः पथः ॥ ५३ ॥

नेति ॥ स्मरः सुभ्रुवो भैम्या नलमविलोक्यासितुं स्थातुं नादत्त । ह्रीश्च तमीक्षितुं नादत्त । यस्मात्, तस्मात्तस्या दृशः कटाक्षविक्षेपा नेत्रव्यापाराः क्रमेण पतिदिशा नलाधिष्ठितदेशमुद्दिश्य वलितग्रीवं वारंवारमचलन् । अथ पश्चादभिमुखं नलनेत्रसंमीलने सत्यनन्तरं व्रीडिताः सत्यो नलमप्राप्य पथो मार्गादेव मुहुः पुनः समकुचन्परावृत्ताः । कामप्रेरितत्वादीक्षितुमारेभे, लज्जया निपिद्धत्वाच्च तदीक्षणान्निवृत्तेति भावः । लज्जाकामयोः समबलत्वान्नावसंधिः । दृशः व्यापारापेक्षया बहुत्वम् ॥

नानया पतिरनायि नेत्रयो-
र्लक्ष्यतामपि परोक्षतामपि ।
वीक्ष्यते स खलु यद्विलोकने
तत्र तत्र नयने ददानया ॥ ५४ ॥

नेति ॥ अनया पतिः प्रियो नेत्रयोर्लक्ष्यतां गोचरत्वमपि नानायि, परोक्षतामगोचरत्वमपि न प्रापि । नन्वेकस्य वस्तुनः परोक्षता वा भवेदपरोक्षता वा भवेत्, ननूभयथा, विरोधादित्याशङ्क्योपपादयति—खलु यस्माद्धेतोर्यस्य हारमुकुररत्नस्तम्भादेर्विलो-

---

१ 'अत्र हि नमनधनुर्नमनयोः कार्यकारणयोः पौर्वापर्येण सहोक्त्यलंकारः' इति जीवातुः । २ स्थितस्य गत्यन्वेषणमिदम् । वस्तुतस्तु—'स्वे ह्यदर्शयत' इति पाठसत्त्वेन 'अभिवादिदृशोरात्मनेपदे वा' इति विकल्पेन यङ्लुगभावः । किंच संज्ञाया अनूद्यमानतायामेव 'संज्ञापूर्वको विधिरनित्यः' इत्यङ्गीकारे 'ओर्गुणः' इति धर्मिग्राहकमानविरोधः ।

१ 'वीक्षितुमदान्मृगीदृशः' इति जीवातुसंमतः पाठः ।

कने सति स नलो वीक्ष्यते तत्र तत्र हारादिवस्तुनि विषये नयने ददात्या प्रेरयन्त्या । मुकुरादेर्विलोकने तत्र तत्र प्रतिबिम्बितो नलोऽनुपलक्षितदर्शनेन दृष्टो मामियं पश्यतीति तेनाज्ञातत्वात्, उद्देश्यतया बिम्बरूपस्तु न दृष्ट इति विषयान्तरविलोकनव्याजेन प्रसङ्गात्संजातदर्शनस्य नलस्योभयरूपताकारेण वैचित्र्यादिकस्यापि विरुद्धोभयरूपसंभवे संस्कारेन्द्रियाभ्यां सहोत्पादनाच्छास्त्रे प्रत्यभिज्ञावत्, लोके च खरतुरगोभयोद्भूतत्वाद्वेसरवच्च युक्तेत्यर्थः । लज्जावशात्साक्षाद्यद्यपि नापश्यत्, तथापि कामप्रेरितत्वाद्दर्पणादिद्वारापश्यदिति भावः । वीक्ष्यते स्मेति पाठः सुयोजः । यद्यस्माद्विलोकननिमित्तं तत्र तत्र वस्तुनि नेत्रे ददत्या स वीक्ष्यते स्मैव, तस्मादृश्यतां परोक्षतां च नानायीति वा ॥

वासरे विरहनिःसहा निशां
कान्तसङ्गसमयं समेहत ।
सा ह्रिया निशि पुनर्दिनोदयं
वाञ्छति स्म पतिकेलिलज्जिता ॥ ५५ ॥

वासर इति ॥ सा यस्माद्वासरे दिने विरहनिःसहा संभोगविच्छेदं सोढुमशक्ता, तस्मात्कान्तस्य सङ्गसमयं संभोगसमयरूपां निशां समेहत रात्रिः कदा वा समेष्यतीति । निशि प्राप्तायां पत्युः केलिभिर्नवनवकामक्रीडाभिर्लज्जिता, अत एव—ह्रिया कृत्वा पुनर्दिनोदयं वाञ्छति स्म प्रभातं कदा वा समेष्यतीति । हेतुहेतुमद्भावान्न पौनरुक्त्यम् । सहजया ह्रिया युक्ता ततोपि पतिकेलिभिर्विशेषेण लज्जितेति वाऽपौनरुक्त्यम् ॥

तत्करोमि परमभ्युपैपि य-
न्मा ह्रियं व्रज भियं परित्यज ।
आलिवर्ग इव तेऽहमित्यमूं
शश्वदाश्वसनमूचिवान्नलः ॥ ५६ ॥

तदिति ॥ नलोऽमूं भैमीं शश्वन्निरन्तरमित्याश्वसनं विश्वासहेतुं वच ऊचिवान् । इति किम्—हे भैमि, बहुविधेष्वालिङ्गनचुम्बनादिषु मध्ये यत्त्वमभ्युपैपि मन्यसे तत्परं केवलं करोमि, नान्यत् । तस्माद्ह्रियं मा व्रज पुमङ्गसङ्गेन किं वा भावीति चित्ते धृतां भियं परित्यज । यतोऽहं त आलिवर्ग इव सखीसमूहतुल्यः । तस्मात्तस्मिन्यथा विश्वसिषि तथा मय्यपि विश्वसिहि । भयं मा यासीरिति । इह त इति पाठे—इह चुम्बनादौ विषयेऽहं तवालिवर्ग ए (इ)व । सखीकृतेऽपि चुम्बनादौ यथा कापि न भीतिस्तथात्रापीत्यर्थः ॥

येन तन्मदनवह्निना स्थितं
ह्रीमहौषधिनिरुद्धशक्तिना ।
सिद्धिमद्भिरुदतेजि तैः पुनः
स प्रियप्रियवचोभिमन्त्रणैः ॥ ५७ ॥

येनेति ॥ येन तस्या मदनरूपेण वह्निना ह्रीरेव महौषधिर्दिव्यौषधिस्तया निरुद्धा शक्तिः सामर्थ्यं यस्य तेन लज्जया निलीनेन स्थितं स कामाग्निः पुनः सिद्धिमद्भिः प्रकृतार्थसाधनसमर्थैः[1]रुक्तरूपैः प्रियस्य प्रियवचांसि तद्रूपाण्यनुमन्त्रणानि रहस्यमन्त्रजपास्तैरुदतेजि अदीपि, प्रकाशीकृतसामर्थ्योऽकारीत्यर्थः । पूर्वोक्ताश्वासनवचनैः पुनरुद्दीप्तकामा जातेति भावः । अन्योपि वह्निरौषधप्रतिबद्धशक्तिः सुसिद्धैरग्निप्रकाशकैर्मन्त्रैः पुनरुद्दीप्यते स्म । 'तिज निशाने' निशानमुद्दीपनकरणम् । अत्र क्षमार्थाभावान्न सन् ॥

यंद्विधूय दयितार्पितं करं
दोर्द्वयेन पिदधे कुचौ दृढम् ।
पार्श्वगं प्रियमपास्य सा ह्रिया
तं हृदिस्थितमिवालिलिङ्ग तत् ॥ ५८ ॥

यदिति ॥ सा दयितेन मर्दनार्थं कुचयोरुपर्यर्पितं करं कराभ्यां विधूय निराकृत्य स्वदोर्द्वयेन[2] कररूपेण द्वयं कुचौ यत्पिदधे तत्तेन कुचपिधानप्रकारेण पार्श्वगं पुरः समीपे स्थितं प्रियं ह्रियाऽपास्य हृदि स्थितं तमेवालिलिङ्गेवेत्युत्प्रेक्षा । स्त्रीणां याचने यन्निवारणं तदेव कामस्य परमायुधम् । आलिङ्गनेन यथा कामः प्रदीप्तो भवति, तथा कुचमर्दननिषेधपरेण कुचपिधानेनापि नलः प्रदीप्तकामो जात इति भावः । मुग्धाजातिरियम् ॥

अन्यदस्मि भवतीं न याचिता
वारमेकमधरं धयामि ते ।
इत्यमिस्वददुपांशुकाकुवा-
क्यमोपमर्दहठवृत्तिरेव तम् ॥ ५९ ॥

अन्यदिति ॥ इति एवंप्रकारा उपांशुर्मन्दा भीत्या प्रार्थनादैन्य(न्य)वशात्, काकुध्वनिविकारयुक्ता वाक् यस्य स नलो दीनप्रार्थनावशात्किंचिदनुमतौ सत्यामुपमर्दं दन्तदशनौष्ठपीडनगाढालिङ्गनादौ यो हठेन सहिता वृत्तिरधरपानादिव्यापारो यस्य, सोपमर्दो करधूननादिना सविघ्नोऽधरपानहठवृत्तिर्यस्य वा एवंभूत एव सन् तमधरमस्मिन्ददपात् । एवमालिङ्गनाद्यपि । इति किम्—हे भैमि, अहं भवतीं त्वामन्यदपरं किमपि कुचमर्दनादि न याचितास्मि याचिष्ये, किं तर्हि—अहमेकवारं तेऽधरं धयामि पिबामीति । आशया दीनवचनम्, पाने तु बलात्कारः । एकवाराधरपानानुमतेरुपमर्देन भङ्गेन सहिता हठवृत्तिरननुमतद्वितीयाद्यधरपानव्यापारो यस्येति वा एकवाराधरपानमात्रानुमतौ लब्धायामालिङ्गनाद्यपि द्वितीयाद्यधरपानमप्यकरोत्, अपराधशमनं त्वनन्तरं करिष्यामीति बुद्ध्येति भावः । पूर्वमोष्ठपानमात्रमकरोत् अनन्तरं नखक्षताद्यर्पीति केचित् । अन्यदिति पाठे—क्षणान्तरे पुनरधरपानमपि न याचिष्य इत्यर्थः । सोऽयमर्थ इति पाठे—सोऽयमर्थः किंचिन्मात्रो हठो यत्रैवंविधो व्यापारो यस्य । पूर्वपाठे स इति ज्ञेयम् । याचिता तृच् । वारं काले द्वितीया ॥

पीततावकमुखासवोऽधुना
भृत्य एष निजकृत्यमर्हति ।

---

१ 'स्वसि(क)स्वरूपेण करद्वयेन' कलिकातामुद्रितपाठः । २ 'अपाने' इति कलिकातामुद्रितपाठः । ३ अयं श्लोको जीवातौ न व्याख्यातः ।

तत्करोमि भवदूरुमित्यसौ
तत्र संन्यधित पाणिपल्लवम् ॥ ६० ॥

पीतेति ॥ असौ नल इत्युक्तिव्याजेन तत्रोरौ पाणिपल्लवं मृदुसुखस्पर्शतया पल्लवतुल्यं पाणिं संन्यधित स्प्रष्टुं संनिवेशितवान् । इति किम्—हे भैमि, एष भृत्यो मल्लक्षणो दासः पीतस्तावक मुखमेवासवो मद्यं येन, अथच—पीतस्त्वदीयमुखस्य सुरागग्रहणो येन एवंभूतः सन्नधुना निजकृत्यं चरणसंवाहनादिरूपं भृत्यसंबन्धिकार्यं कर्तुमर्हत्युचितो भवति । तत्तस्माद्गृहारामपुष्पावचयादिना खिन्नं भवदूरुं त्वदीयमूरुं करोमि संवाहयामि । अथच—सामर्थ्यादूर्ध्वं करोमीति । अनेकार्थत्वात्करोतिः संवाहनार्थः । अन्योपि भृत्यो भुक्तमुखोच्छिष्टश्चरणसंवाहनं करोति ॥

चुम्बनादिषु बभूव नाम किं
तद्वृथा भियमिहापि मा कृथाः ।
इत्युदीर्य रसनावलिव्ययं
निर्ममे मृगदृशोऽयमादिमम् ॥ ६१ ॥

चुम्बनेति ॥ इत्युदीर्य अयं मृगदृशस्तदानीमतितमां चञ्चलदृशो भैम्या आदिमं कदाचिदप्यकृतपूर्वत्वात्प्रथमं रसनावलिव्ययं मेखलाकलापमोचनं निर्ममे चक्रे । ऊरुस्पर्शादौ वाम्यं भयं च भजन्त्या भैम्या एवं विस्रम्भणपूर्वकं वसनमाचकर्षेति भावः । इति किम्—हे भैमि, नामेत्यनुभूतविषयप्रभाभिनये । हे भैमि, चुम्बनालिङ्गनादिषु किं नाम विरुद्धं बभूव, अपि तु न किंचित् । तत्तस्मादिहाप्यस्मिन्क्रियमाणे सुरतारम्भेपि ऊरुपीडने वा, मेखलामोचने वा वृथा अकारणां भियं मा कृथाः ॥

अस्तिवाम्यभरमस्तिकौतुकं
सास्तिघर्मजलमस्तिवेपथु ।
अस्तिभीति रतमस्तिवाञ्छितं
प्रापदस्तिसुखमस्तिपीडनम् ॥ ६२ ॥

अस्तीति ॥ सा एवंभूतं रतं प्रापत् । किंभूतम्—आरम्भसमयेऽस्ति वर्तमानो वाम्यभरो रतिप्रातिकूल्याचरणबाहुल्यं यत्र आरम्भानन्तरं चास्ति कौतुकमननुभूतचरत्वादस्याश्चर्यं यत्र । ततोऽपि—सात्त्विकोत्पत्तेः श्रान्तेश्चास्ति घर्मजलं यत्र । तथा—अस्ति वेपथुर्यत्र । ततः—संभोगे प्रारब्धे भये निवृत्तेऽपि किमन्ते भावीत्यस्ति भीतिर्यत्र । तथा—सुखहेतुत्वादस्ति वाञ्छितमभिलाषो यत्र । तथा—लिङ्गक्रमसंमर्दादस्ति सुखं यत्र । समरससुरतावसानसंजातसुखमिति यावत् । ततोप्यस्ति पीडनं संभोगावसाने सर्वाङ्गगाढालिङ्गनं यत्र । एवंभूतं प्रथमसंभोगमन्वभूदिति भावः । अस्तीति विभक्तिप्रतिरूपकमव्ययम् । 'अस्तिक्षीरादयश्च' इति समासः ॥

ह्रीस्तवेयमुचितैव यन्नव-
स्तावके मनसि मत्समागमः ।
तत्तु निस्त्रपमजस्रसंगमा-
द्व्रीडमावहति मामकं मनः ॥ ६३ ॥

इत्युपालभत संभुजिक्रिया-
रम्भविघ्नघनलज्जितैर्जिताम् ।
तां तथा स चतुरोऽथ सा यथा
त्रपुमेव तमनु त्रपामयात् ॥ ६४ ॥

ह्रीरिति ॥ इतीति ॥ युग्मम् । चतुरः कामकलाकुशलः स नलः संभुजिक्रियायाः सुरतस्यारम्भे विघ्नभूतैर्घनैर्निबिडैर्लज्जितैर्लज्जानिर्मितैरङ्गसंकोचादिभिर्जितामतिलज्जितां तामिति पूर्वोक्तप्रकारेणोपालभत सोलुण्ठमूचे । सा भैमी यथा येन प्रकारेणाथोपालम्भनानन्तरं तमनु लक्षीकृत्य त्रपुमेव लज्जितुमेव त्रपामयाल्लज्जां प्राप । लज्जागुणविषयेपि लज्जा यथा जायते तथेयमुपालब्धेत्यर्थः । मम लज्जावशादन्यथास्य चेतसि स्फुरितमिति भिया लज्जां विहाय विस्रम्भेण तेन सह चिक्रीडेति भावः । इति किम्—हे भैमि, तवेयं वर्तमाना ह्रीर्युक्ता उचितैव । यद्यस्मान्मत्समागमस्तावके मनसि नवो नूतनो जातः । नवसंभोगे हि स्त्रिया लज्जा युक्तैवेत्यर्थः । तत्प्रसिद्धं विवाहात्पूर्वमप्यजस्रसंगमात्सदास्वप्नसंजातसंभोगवशान्निस्त्रपं निर्लज्जमपि मामकं मनस्तु पुनः व्रीडं लज्जामावहति धारयति यत्, सेयमनौचिती सामर्थ्यालभ्योऽर्थः । निर्लज्जस्य लज्जा विरोधादयुक्ता । बहुवास(र)संजातसंगमस्याप्यतिपरिचयाल्लज्जा न युक्तेत्यर्थः । यद्वा—लज्जाया औचित्ये कारणान्तरमाह—तुरप्यर्थः । अजस्रसंगमान्निस्त्रपं मामकमपि मनो लज्जितां त्वां दृष्ट्वा यस्माल्लज्जते किमु वक्तव्यं प्रथमसंभोगे नेमनो लज्जत इति व्याख्या ॥

बाहुवक्त्रजघनस्तनाङ्कित-
बन्धगन्धरतसंगतानतीः ।
इच्छुरुत्सुकजने दिनेस्मिते
वीक्षितेति समकेति तेन सा ॥ ६५ ॥

बाह्विति ॥ तेन वीक्षिता सा भैमी इति पूर्वोक्तप्रकारेण समकेति संकेतिता । इति किम्—हे भैमि, उत्सुकाः स्वस्वकार्यसाधनोत्साहवन्तो जना यत्र रात्रिवृत्तान्तकर्णनाद्यर्थमुत्सुकः सखीजनो यस्मिंस्तथाविधे वा दिने दिवसेऽपि ते संबन्धिनीः बाहू च वक्त्रं च जघनं च स्तनौ चाङ्की च तस्य बाह्वादेः कामशास्त्रप्रसिद्धा ये बन्धा नागपाशादीनि करणानि तेषां गन्धो लेशो विद्यते यत्र तादृशं रतं तेन संगता मिलिताश्च ता आनतयश्च नितरां नम्रत्वानि कौशलातिशयनिर्मितानवयवनम्रीभावान् । संगता इति पृथग्वा । नतीरिच्छुरभिलाषुकोस्मीति । स्मित इति भैमीसंबोधनं वा । रात्रिकृतबन्धरतप्रत्यभिज्ञानं यथा भवति वीक्षणमात्रेणेङ्गितं कृत्वाऽनुरागातिशयाद्दिनेपि स्वीयं तादृशताभिलाषं तां प्रति ज्ञापितवानिति भावः । यद्वा—बाह्वादेस्ताः प्रसिद्धाः क्रमेण बन्धश्च, गन्धश्च, रतं च, संगतं च, आनतिश्च, ताः । बाह्वोर्नागपाशादिबन्धः, वक्त्रस्य गन्धः पद्मिनीत्वात्सौरभम्, जघनस्य रतम्, स्तनयोः संगतं श्लेषः, वक्त्रस्य गन्धः पत्यर्थः त्वत्संबन्धिनीस्ताः स्वस्वव्यापारकरणमात्रनि-

---

१ 'आलपन्निति तदीयमादिमं स व्यधत्त रसनावलिव्ययम्' इति जीवातुसंमतः पाठः ।

१ अयं श्लोको जीवातौ न व्याख्यातः ।

रता दुश्चित्ता जना यत्रैवंभूते दिनेऽपि इच्छुरस्मीति वीक्षिता साऽनेन स्वाशयं ज्ञापितेति भावः । यद्वा—त्वां पश्यामि तदैव ममैवं वाञ्छोदेति, त्वद्दर्शनमेव संभोगसमय इति च ज्ञापितेति भावः । उत्सुकसखीजनेऽस्मिते व्रीडितेति पाठे—रात्रिवृत्तप्रश्नवाञ्छागोपनार्थं तस्माल्लज्जा मा भूदित्यस्मिते स्मितरहित एवंविधे ज्ञातुमेवोत्सुके सखीजने सखीजनसंनिधौ पूर्वोक्तप्रकारेण सा तेन संकेतिता शब्दिता । यद्रात्रावाचरितं बाहुबन्धादि तदिदानीमिच्छुरस्मीति रात्रिवृत्तज्ञापनार्थं सखीसंनिधावेवमुवाचेत्यर्थः । अत एव सा व्रीडिता । उत्सुके सखीजने स्मिते प्रारब्धहास्ये सति व्रीडितेति वा । हे भैमि, ते बाह्वादिबन्धादीन् दिने वीक्षिता द्रष्टा एवंभूतोऽभिलाषुकोऽस्मि । रात्रौ यद्यपि कृताः, तथापि न दृष्टाः तस्माद्दिने तद्दर्शनेच्छुरस्मीत्येवं सा तेन शब्दिता । न परमहमेव, किंतु त्वत्सखीजनोपीत्युत्सुकपदेन सूचितमिति वा । व्याख्यानान्तरं ग्रन्थगौरवभयान्नोक्तम् । नतीरित्यत्र इच्छुर्वीक्षितेत्येताभ्यां योगे 'न लोका—' इति षष्ठीनिषेधः ॥

प्रातरात्मशयनाद्विनिर्यतीं
संनिरुध्य यदसाध्यमन्यदा ।
तन्मुखार्पणमुखं सुखं भुवो
जम्भजित्क्षितिशचीमचीकरत् ॥ ६६ ॥

प्रातरिति ॥ भुवो जम्भजिद्भूमीन्द्रो नलः प्रातरात्मशयनादुत्थाय विनिर्यतीं शीघ्रं बहिर्निर्गन्तुकामां संनिरुध्य चेलाञ्चलादौ सम्यग्धृत्वा क्षितिशचीं भूमीन्द्राणीं सुन्दरीं सौभाग्यवतीं चान्यदाऽन्यस्मिन्काले रात्रौ प्रागेव ह्रीभयवशाद्यदसाध्यमप्राप्यं तत्तस्या मुखार्पणं मुखमादिर्यस्य तत्सुखं सुरतमचीकरत् । रात्रिप्रान्तसमये त्वं मदुक्तं चेत्करिष्यसि तर्हि दुष्करमप्राप्यं तुभ्यं दास्यामि नान्यथेति तां संरुध्यालिङ्गनादि कारितवान् । सा गन्तुकामापि चेदेतदुक्तं न करिष्यामि, तर्ह्ययं गन्तुं न दास्यति, सखीनां चायमत्रागमनसमय इति विचार्य चुम्बनादि दत्त्वा शीघ्रं निर्गतेति भावः । सुखमनायासेनाचीकरदिति क्रियाविशेषणं वा । 'प्रभातप्रहरे पद्मिनी रन्तव्या' इति कामशास्त्रम् । क्षितिशचीमिति 'हृक्रोः—' इति कर्मत्वम् ॥

नायकस्य शयनादहर्मुखे
निर्गता मुदमुदीक्ष्य सुभ्रुवाम् ।
आत्मना निजनवस्मरोत्सव-
स्मारिणीयमहृणीयत स्वयम् ॥ ६७ ॥

नायकस्येति ॥ अहर्मुखे प्रातर्नायकस्य शयनान्निर्गता इयं भैमी सुभ्रुवां प्रौढानां सुन्दरीणां सख्यादीनां स्वस्वप्राणेशसुरतजनितां मुदमानन्दमुदीक्ष्यात्मनैव निजः स्वीयः नवः स्मरोत्सवः संभोगस्तस्य स्मारिणी स्मरणशीला सती स्वयमेवाहृणीयत लज्जिता । अनतिप्रौढोत्तमस्त्रीजातिः । शयनान्निर्गता सखीनामोष्ठयावककपोलपत्रवल्लीमार्जनादि दृष्ट्वा स्वसंभोगचिह्नेन स्वस्वरूपेण कृत्वा निजनवस्मरोत्सवं सखीः स्मरयत्येवंशीला सती स्वयं ललज्जे । निजधवेत्यपि पाठः । हृणीङ् कण्ड्वादिः ॥

तां मिथोभिदधतीं सखीं प्रिय-
स्यात्मनश्च स निशाविचेष्टितम् ।
पार्श्वगः सुरवरात्पिधां दध-
द्दृश्यतां श्रुतकथो हसन्गतः ॥ ६८ ॥

तामिति ॥ स नलस्तां भैमीं हसन् सन् दृश्यतां गतः । स्वेच्छयैव नयनगोचरत्वं प्राप्तः । किंभूताम्—प्रियस्य नलस्यात्मनः स्वस्य च स्वसखीं प्रति मिथो रहसि निशाविचेष्टितं संभोगादिरात्रिवृत्तान्तमभिदधतीं कथयन्तीम् । किंभूतः—सुराणां वरात्पिधामदृश्यत्वं दधत् । अत एव—पार्श्वगो निकटस्थः । अत एव—श्रुता भैम्याऽभिधीयमाना रात्रिवृत्तान्तकथा येन । अदृश्येन मयाऽत्रैव स्थित्वा सर्वं श्रुतमिति प्रत्यक्षो भूत्वा हसन्, न चाकथयदित्यर्थः । हसद्गत इति पाठे—श्रुतकथो दृश्यतां गतस्तामहसदित्यर्थः । पिधेति 'आतश्चोपसर्गे' इत्यङ् ॥

चक्रदारविरहेक्षणक्षणे
बिभ्यती धवहसाय साभवत् ।
क्वापि वस्तुनि वदत्यनागतं
चित्तमुद्यदनिमित्तवैकृतम् ॥ ६९ ॥

चक्रेति ॥ सा भैमी चक्राणां चक्रवाकाणां दारैश्चक्रवाकीभिः सह विरहस्तस्येक्षणक्षणे दर्शनकाले संध्यायां ममापि प्रियेण सहैतद्वियोगो मा भूदिति क्षणमात्रमपि वियोगाद्बिभ्यती धवस्य नलस्य हसाय हास्यार्थमभवत् । संध्यावन्दनमात्रजन्येन वियोगेन चक्रवियोगदर्शनमात्रेण च किमिति बिभेषीत्येवं सा प्रियेण हसितेत्यर्थः । तावतैव वियोगेन तद्वियोगदर्शनमात्रेण च किमिति भीतेत्याशङ्क्याह—क्वापि कस्मिंश्चिद्वस्तुनि विषय उद्यदुत्पद्यमानमनिमित्तमकारणं वैकृतं हर्षशोकभयादि यस्मिन्नेवंभूतं चित्तं कर्तृ अनागतं भाविनमर्थं शुभमशुभं वा वदति । तस्माद्भाविवियोगसूचिका साधारणी तस्या भीतिर्युक्तेत्यर्थः । भावी विरहः सूचितः । इयं ज्ञातास्वादा मय्यनुरक्ता चेति संतोषवशात्सा तेन हसितेति भावः । बिभ्यतीं स परिरभ्य नामुचदिति पाठे—भयमोचनार्थं गाढमालिङ्ग्यैव तस्थावित्यर्थः । विकृतिरेव वैकृतं प्रज्ञादित्वादण् ॥

चुम्बितं न मुखमाचकर्ष य-
त्पत्युरन्तरमृतं ववर्ष तत् ।
सा नुनोद न भुजं तदर्पितं
तेन तस्य किमभून्न तर्पितम् ॥ ७० ॥

चुम्बितमिति ॥ सा क्रमेण गतभीर्गतलज्जा च सती चुम्बितं प्रियेण चुम्बितुमारब्धं मुखं यन्नाचकर्ष वक्रीचक्रे, तच्चुम्ब्यमानमुखानाकर्षणं कर्तृ पत्युरन्तश्चेतस्यमृतं ववर्ष । तदीयं मनः सुधावृष्ट्येव परितुष्टं चक्र इत्यर्थः । तथा—तेन स्तनादावर्पितं भुजं न नुनोद निराचकार, तेन भुजस्वीकारेण प्रयोजकेन तस्य किमङ्गं तर्पितं नाभूदपि तु सर्वाङ्गं तेन प्रीणितमभूत् ॥

नीतयोः स्तनपिधानतां तया
दातुमाप भुजयोः करं परम् ।

वीतबाहुनि ततो हृदंशुके
केवलेऽप्यथ स तत्कुचद्वये ॥ ७१ ॥

नीतयोरिति ॥ स नलस्तया भर्तृकृतपाणिनिपीडनभिया स्तनपिधानतां कुचाच्छादनतां नीतयोः प्रापितयोस्तदीयभुजयोः परं केवलं करं दातुं स्थापयितुं पूर्वमाप । शक्तोऽभूदित्यर्थः । ततोऽनन्तरं वीतबाहुन्यपनीतभैमीकरे हृदंशुके हृदयावरणवस्त्रे करं दातुमाप । अथ ततोऽपि पश्चात्केवले निरंशुके तत्कुचद्वये करं दातुमाप । मुग्धाजातिः । लज्जापचयकामोपचयौ क्रमेणोक्तौ ॥

याचनाऽन्न ददतीं नखक्षतं
तां विधाय कथयाऽन्यचेतसम् ।
वक्षसि न्यसितुमात्ततत्करः
स्वं विभिद्य मुमुदे स तन्नखैः ॥ ७२ ॥

याचनादिति ॥ त्वमपि नखोल्लेखं कुर्विति प्रेमभरेण याचनादपि नखक्षतं न ददतीं कयापि कथयाऽन्यस्मिन्गोष्ठीरस एव चेतो यस्यास्तां विचित्तां विधाय गोष्ठीसंवादमुखाभिनयव्याजेन स्ववक्षसि न्यसितुं स्थापयितुमात्तः स्वहस्तेन गृहीतस्तस्याः करो येनैवंभूतः सन् तस्याः स्वहस्तधृतहस्तनखैः स्वं स्वशरीरं विभिद्योल्लिख्य मुमुदे ॥

स प्रसह्य हृदयापवारकं
हर्तुमक्षमत सुभ्रुवो बहिः ।
ह्रीमयं तु न तदीयमान्तरं
तद्विनेतुमभवत्प्रभुः प्रभुः ॥ ७३ ॥

स इति ॥ स प्रभुः स्वामी सुभ्रुवो भैम्या बहिर्हृदयापवारकं वक्षःस्थलादिवसनं प्रसह्य हठाद्धर्तुमक्षमत । तु पुनर्ह्रीमयमान्तरमन्तःस्थं भैमीसंबन्धितत्कामक्रीडानिवारकं कुलस्त्रीहृदयभूषणीभूतमपवारकमपनेतुं प्रभुः समर्थो नाभवत् । एवं विस्रम्भणक्रमेण यद्यपि लज्जां त्याजिता तथापि हृदयाच्छादिवस्त्रापाकरणपूर्वकुचस्पर्शादिना पुनरपि लज्जितैवेति भावः ॥

सा स्मरेण बलिनाऽप्यहापिता
ह्रीक्षमे भृशमशोभताबला ।
भाति चापि वसनं विना नतु
व्रीडधैर्यपरिवर्जनैर्जनः ॥ ७४ ॥

सेति ॥ बलिना प्रभावता, अथच-ह्रीक्षमेनापि स्मरेण ह्रीक्षमे लज्जाधैर्ये अहापितात्याजिता साऽबला स्त्री, अथच—स्त्रीत्वाद्दुर्बला भृशमशोभत । युक्तोऽयमर्थः—यतो जनो वसनं विनापि भाति च शोभत एव । तु पुनर्व्रीडधैर्ययोः परिवर्जने परित्यागे नैव शोभते । तस्माद्युक्तमर्थान्तरन्यासः । ह्रीक्षेपि कामे लज्जाधैर्यापरित्यागान्नितरां नलस्य स्पृहणीयत्वाच्छुशुभ इति भावः ॥

आत्थ नेति रतयाचिनं न य-
न्मामतोऽनुमतवत्यसि स्फुटम् ।
इत्यमुं तदभिलापनोत्सुकं
धूनितेन शिरसा निरास सा ॥ ७५ ॥

आत्थेति ॥ सा इत्येवं भङ्ग्या स्वनिषेधार्थमपि तस्या अभिलापने मञ्जुलवाणीश्रवण उत्सुकं कौतुकिनममुं धूनितेन कम्पितेन शिरसा कृत्वा निरास निषिषेध । इति किम्—हे भैमि, त्वं मह्यं सुरतं देहि प्रसीदेति सुरतयाचिनं मां यद्यस्मान्नेति न आत्थ अतो हेतोः 'अप्रतिषिद्धमनुमतं भवति' इति न्यायेन सुरतं कुर्विति मामनुमतवत्यसि अनुज्ञातवती त्वमसीति । इयं सुरतं नानुमन्यते परं मया सह न वदत्यपीत्येवं परिहासभाषणे क्रियमाणे निषेधार्थमपि किंचिद्वदिष्यतीत्याशया नलेन तद्वाचनार्थमेवं यत्ने कृतेपि कुशला लज्जाधैर्यवशाच्छिरोधूननेनैव तं न्यषेधत्, ननु साक्षादक्षरमप्युवाचेति भावः ॥

या शिरोविधुतिराह नेति ते
सा मया न किमियं समाकलि ।
तन्निषेधसमसंख्यता विधिं
व्यक्तमेव तव वक्ति वाञ्छितम् ॥ ७६ ॥

येति ॥ हे भैमि, ते या शिरोविधुतिः शिरःकम्पः नेत्याह निषेधार्थं ब्रूते । मया सेयं किं न समाकलि न सम्यग्ज्ञाता, अपि तु—सम्यग्ज्ञातैव । कथमित्याह—तयोः शिरोविधुतियुगरूपयोर्निषेधयोर्या समसंख्यता तुल्यता सा तव वाञ्छितं सुरतरूपं विधिं व्यक्तमेव वक्ति वदति । सुरतं तवेष्टमित्याहेत्यर्थः । द्वयोरेव निषेधयोः सुन्दोपसुन्दन्यायेनान्योन्यघातात् 'द्वौनञौ प्रकृतमर्थं गमयतः' इति न्यायेन च सुरतं त्वया विधेयमेवेति मां प्रति विधावेव तात्पर्यमिति मया त्वदाशयो ज्ञात इति भावः । इति पुनरपि भैमीवादनार्थं वक्रोक्तिः । विधिरिति पाठे—तस्य मत्प्रार्थितस्य शिरोधूनति(न)द्वयरूपौ निषेधौ तयोः समसंख्यतैव विधिस्ते तवाभिलाषं स्पष्टमेव वक्तीति व्याख्येयम् ॥

नात्थ नात्थ शृणवानि ते न किं
तेन वाचमिति तां निगद्य सः ।
सा स्म दूत्यगतमाह तं यथा
तज्जगाद मृदुभिस्तदुक्तिभिः ॥ ७७ ॥

नेति ॥ स नलः तामिति पूर्वोक्तं निगद्योक्त्वा सा दूत्यं गतं दूत्येन हेतुना वा भैमीसविधं गतं तं नलं 'तदद्य विश्रम्य वृणे–' इति यथा आह स्म ब्रूते स्म तदेव मृदुभिरतिमञ्जुलाभिस्तस्या भैम्या उक्तिभिस्तन्नाचणानुकारिणीभिः जगाद । तादृगेवानूदितवानित्यर्थः । इति किम्—हे भैमि, अहं ते वाचं न शृणवानि, तेन मदश्रवणेन हेतुना मया नाकर्णनीयमिति बुद्ध्या त्वं नात्थ नात्थ न ब्रूषे न ब्रूषे किम् त्वद्वाक्यानि मया पूर्वमेवाकर्णितानि, इदानीं तव भाषणं मया न श्रोतव्यमिति वृथैवेयं मुखमुद्रणेति त्वया वक्तव्यमित्यवददिति भावः । त्वं नात्थेति स्वरभङ्ग्या मा वादीरित्यर्थः । किमित्याक्षेपे वा । युग्मम् ॥

१ 'अत्रैकस्य करस्य क्रमादनेकेषु भुजांशुककुचेषु वृत्तिकथनात् 'क्रमेणैकमनेकस्मिन्' इत्याद्युक्तलक्षणः पर्यायालंकारभेदः' इति जीवातुः ।

नीविसीम्नि निबिडं पुराऽरुण-
त्पाणिनाऽथ शिथिलेन तत्करम् ।
सा क्रमेण नननेति वादिनी
विघ्नमाचरदमुष्य केवलम् ॥ ७८ ॥

नीवीति ॥ सा पुरा प्रथमसंभोगारम्भे नीविसीम्नि वर्तमानं तस्य करं स्वपाणिना निबिडमतिगाढं यथा तथाऽरुणत् । अथानन्तरं क्रमेण भयभङ्गानन्तरं दिनान्तरे नितम्बजघनस्पर्शकारिणं नलकरं शिथिलेन पाणिना रुरोध । ततोपि लज्जाविजयानन्तरं न न नेति वादिनी सती अमुष्य नलकरस्य नलस्यैव वा केवलं विघ्नमाचरत् । नननेत्युक्ते यदि न निवर्तेत, (तर्हि) मा निवृतत्, वदामि तावदेवमिति वचोमात्रेण विघ्नमाचरत्, न तु कर्मणेति भावः । मुग्धाजातिः । भयलज्जात्यागः सूचितः ॥

रूपवेषवसनाङ्गवासना-
भूषणादिषु पृथग्विदग्धताम् ।
सान्यदिव्ययुवतिभ्रमक्षमां
नित्यमेत्य तमगान्नवा नवा ॥ ७९ ॥

रूपेति ॥ सा रूपेषु देववरदानात्कायधारणानिर्मितेषु सौन्दर्यविशेषेषु, वेषेषु महाराष्ट्रलाटगुर्जरादिस्त्रीधृतवस्त्रालंकारादिशृङ्गारभङ्गीषु, वसनेषु नीलपीतदुकूलादिवस्त्रेषु, अङ्गवासनासु चन्दनकस्तूरीकर्पूराद्यङ्गरागैरगुरुचन्दनादिधूपैश्च कृतेषु देहामोदेषु, भूषणेषु सौवर्णेषु मुक्तामाणिक्यहीरकादिखचितेष्वलंकारेषु, तदादिषु च भाषान्तरेषु विषये पृथक् प्रत्येकं प्रतिदिनमन्यस्या दिव्ययुवते रम्भादिस्वर्गस्त्रिया भ्रमे क्षमां समर्थां रम्भादिरियमेवेति भ्रान्तिकारिणीं विदग्धतां चातुरीमेत्य प्राप्यात एव नवा नवा नूतना नूतना सती नित्यं तमगात् । संबुभुज इत्यर्थः । अन्वहमन्यैवेयमिति तस्य चेतसि स्फुरितेत्यर्थः । वा इवार्थः । नित्यं नवेन नागात्, अपि तु नवीनेव जगामेति काकुर्वा । अन्वहं नूतनत्वादनुरागातिशयादन्यावरोधाङ्गनासंभोगविमुखो नलो जात इति भावः । क्षमेति पाठे—भैमीविशेषणम् ॥

इङ्गितेन निजरागनीरधिं
संविभाव्य चटुभिर्गुणज्ञताम् ।
भक्ततां च परिचर्ययाऽनिशं
साधिकाधिकवशं व्यधत्त तम् ॥ ८० ॥

इङ्गितेनेति ॥ सा अधिका सर्वगुणैरुत्कृष्टा चतुरा च तमधिकमतितरां वशमात्मन्यनुरागिणं व्यधत्त चकार । किंचित्प्रौढाभूदित्यर्थः । किं कृत्वा—इङ्गितेन 'सख्यादिषु भर्तृगुणवर्णनपूर्वं भाषणम्, तद्दोषापलापः, पश्चादाभिमुख्येन शयनम्, पूर्वमुत्थानम्, आगमने तुष्टिः, प्रवासे वैमनस्यम्, सदा समसुखदुःखता,' इत्याद्यनुरागद्योतकेन चेष्टितेन निजम् अगाधत्वादनुरागमेव नीरधिं नलं संविभाव्य सम्यग्ज्ञापयित्वा, तथा—चटुभिः 'भवादृशोऽतिसुन्दरोऽतितेजस्वी वदान्यः सर्वकलाकुशलः कः, अपितु—न कोपि' इत्यादि प्रियभाषणैर्गुणज्ञतां च स्वीयगुणग्राहित्वं वैदग्ध्यं च ज्ञापयित्वा, तथा—अनिशं सर्वदा परिचर्यया चरणादिसंवाहनतालवृन्तचालनादिरूपया सेवया निजां भक्ततां भक्तियुक्ततां च ज्ञापयित्वा । आनिशं निशामभिव्याप्य मर्यादीकृत्य । अहोरात्रमित्यर्थ इति वा ॥

स्वाङ्गमर्पयितुमेत्य वामतां
रोषितं प्रियमथानुनीयसा ।
आतदीयहठसंबुभुक्षुतां
नान्वमन्यत पुनस्तमर्थिनम् ॥ ८१ ॥

स्वाङ्गमिति ॥ सा संभोगार्थिने नलाय स्वाङ्गं स्तनादिकं निजमङ्गमर्पयितुं दातुं किंचिद्वामतां प्रातिकूल्यमेत्य किंचिदङ्गमदत्त्वा, अथानन्तरं तेनैव व्यापारेण रोषितमुत्पादितरोषमौदासीन्यं प्राप्तं प्रियं नलं चुम्बनालिङ्गनाचरणपतनादिनाऽनुनीय प्रसादानन्तरमियं मां प्रसादयति चेत्तर्हि मदीप्सितं करिष्यतीति बुद्ध्या पुनरर्थिनं तदङ्गं याचमानं तं तदीयां नलीयां हठाद्बलात्कारेण संबुभुक्षुतां संभोगेच्छुताम् आ मर्यादीकृत्य नान्वमन्यत तावन्नानुमेने । पूर्वं याञ्चापूर्वं संभोगे प्रवृत्तः, अनन्तरं तदीयवामत्वाद्रोषवशादौदासीन्यं गतः स्वयन्तरं प्रति गमिष्यतीति बुद्ध्या तयाऽनन्तरमनुनीतः सन् पुनरर्थयमानोऽपि यावद्बलात्संभोगं करोति तावन्नानुमतः, अनन्तरं त्वनुमत इत्यर्थः । याञ्चानन्तरमेवानुमनने तादृशोऽनुरागो न वर्धते । तदीयमनुरागमात्मनि परां कोटिं प्रापयितुं हठसंभोगमेवैच्छदिति भावः । अनुनयानन्तरं संभोगे कृतेऽप्यनुरागातिशयात्पुनः सुरताभिलाषि नानुमेन इति पुनःशब्दार्थो वा । रोषितं ण्यन्तान्निष्ठा । आतदीयेति मर्यादायामव्ययीभावो नपुंसकत्वाद्ध्रस्वत्वम् ॥

आद्यसंगमसमादराण्यधा-
द्वल्लभाय ददती कथंचन ।
अङ्गकानि घनमानवामता-
व्रीडलम्भितदुरापतानि सा ॥ ८२ ॥

आद्येति ॥ सा अङ्गकानि ह्रस्वानि सौकुमार्यातिशयादनुकम्प्यानि निजान्यङ्गान्याद्यसंगमेन प्रथमसंभोगेन समस्तुल्य आदरः प्राप्त्युपायासक्तिर्येषु प्रथमसंभोगे भयलज्जात्यागपूर्वं विश्वासार्थं यावान् प्रतारणाद्युपायः कृतः, तावानेव पाश्चात्येष्वपि संभोगेषु यत्प्राप्तये नलेनोपायः कृतः, तादृशीं नीतिं यावदधाद्दधार । यतः—वल्लभायातिप्रेयसे नलाय कथंचन भूयसा प्रयासेन तान्येव ददती । तत्रापि हेतुः—यतः—घनैर्दृढैर्मानवामताव्रीडैः मानः प्रीतिकलहजोदासीनता, वामता स्वाङ्गसमर्पणप्रातिकूल्यम्, व्रीडा लज्जा, तैः घनेन मानेन या वामता तया लज्जया च, लम्भिता

१ 'अत्रैकस्मिन्नीविदेशे क्रमादनेकव्यापारसंबन्धोक्ति(क्तेः) पर्यायालंकारभेदः' इति जीवातुः ।

१ इतः प्राक्

'यत्क्रियां प्रति यदस्रजस्तया (?)स्वस्वरस्य लघुतां दधानया ।
पत्युरन्वहमह्रीयत स्फुटं तत्किलाह्रियत तस्य मानसम् ॥'

इत्यधिकः श्लोकः क्वापि दृश्यते ॥

प्रापिता दुरापता दुर्लभता येषां तानि । आदौ विवाहात्पूर्वं यः संगमस्तत्कालीनेनादरेण तुल्यादराणीति वा । मानादिना तदङ्गानां दुष्प्रापत्वादिच्छाविवृद्धेर्नलीयोनुरागः प्रत्यहं परां कोटिमध्यारोहदिति भावः । अङ्गकानि 'हृस्वे' 'अनुकम्पायाम्' इति वा कन् । वामतायुक्तो व्रीड इति समासः ॥

पत्युरागिरिशमातरु क्रमा-
त्स्वस्य चागिरिजमालतं वपुः ।
तस्य चार्हमखिलं पतिव्रता
क्रीडति स्म तपसा विधाय सा ॥ ८३ ॥

पत्युरिति ॥ सा पतिव्रता धर्मेण कार्ये कारणोपचारात्तपसा तपःफलेनेन्द्रादिवरदानेन वा पत्युर्नलस्य वपुरागिरिशं हरमारभ्य आतरु वृक्षपर्यन्तं, तरुमारभ्य गिरिशपर्यन्तं वा (तं), तथा—स्वस्य चात्मनः शरीरमागिरिजं गिरिजां पार्वतीमारभ्य आलतं लतापर्यन्तम्, लतामारभ्य पार्वतीपर्यन्तं वारो(हावरो)हक्रमेण प्रथमं प्रियस्य, पश्चादात्मन इत्येवंरूपेण, गिरिशरूपे गिरिजारूपं, तरुरूपे लतारूपमित्येवं वा क्रमेण विधाय तत्तद्रूपं विरचय्य तस्यावलम्बितशरीरान्तरस्य संबन्ध्यखिलं यज्ञोपवीतादि क्रीडादि चार्हं योग्यं तदपि विधाय क्रीडति स्म । यतः—पतिव्रता । नहि पतिव्रतानां किंचिदसाध्यमस्ति । चोऽवधारणे । अखिलं भाषावेषादि तस्यैवार्हं यथा तथा रेमे इति वा ॥

न स्थली न जलधिर्न काननं
नाद्रिभूर्न विषयो न विष्टपम् ।
क्रीडिता न सह यत्र तेन सा
सा विधैव न यया यया न वा ॥ ८४ ॥

नेति ॥ सा तेन सह यत्र न क्रीडिता संभोगं नाकृत सा स्थली अकृत्रिमा भूरेव नास्ति । तथा—जलधिः कूपमारभ्य समुद्रपर्यन्तं स जलाशयो नास्ति । तथा—काननं तदुर्गमं वनं नास्ति । साऽद्रिभूर्नास्ति । स विषयः कर्णाटादिरूपो देशविशेष एव सुखहेतुः स्वक्रन्दनादिर्वा नास्ति । तद्विष्टपं भूर्भुवःस्वराद्येव नास्ति । यस्यां यस्मिन्वा तेन सह न चिक्रीडेति प्रत्येकं योज्यम् । वा समुच्चये । तथा—सा विधैव पुरुषायितादिरूपः कामशास्त्रोक्तः प्रकार एव नास्ति । यया यया येन येन प्रकारेण सा न क्रीडिता । जलान्तःसंभोगनिषेधे पूर्वश्लोके नानारूपधारणोक्तेर्मत्स्यादिरूपत्वान्निषेधो न, मनुष्याधिकारत्वाच्छास्त्रस्येति ज्ञेयम् । क्रीडिता 'गत्यर्थाकर्मक–' इति कर्तरि निष्ठा ॥

नम्रयांशुकविकर्षिणि प्रिये
वक्रवातहतदीप्तदीपया ।
भर्तृमौलिमणिदीपितास्तया
विस्मयेन ककुभो निभालिताः ॥ ८५ ॥

नम्रयेति ॥ प्रियेंऽशुकविकर्षिणि सति लज्जावशादुत्तरावयववानवलोकनार्थं नम्रया, अत एव वक्रवातेन हतो निर्वापितो दीप्तः प्रकाशमानो दीपो यया तया भर्तृमौलौ मणयो मुकुटरत्नानि तैर्दीपिताः प्रकाशिताः ककुभो दिशः विस्मयेन निर्वापितेऽपि दीपे कथमयं प्रकाश इत्याश्चर्येण निभालिता विलोकिताः । रत्नप्रकाशाज्ञानाद्विस्मयः, रत्नप्रभातिशयाद्वा ॥

कान्तमूर्ध्नि दधती पिधित्सया
तन्मणेः श्रवणपूरमुत्पलम् ।
रन्तुमर्चनमिवाचरत्पुरः
सा स्ववल्लभतनोर्मनोभुवः ॥ ८६ ॥

कान्तेति ॥ तस्य पूर्वोक्तस्य दिक्षु दीप्तस्य मुकुटमणेः पिधित्सया आच्छादितुमिच्छया श्रवणपूरं कर्णभूषणीकृतं नीलोत्पलं कान्तमूर्ध्नि दधती स्थापयन्ती सा रन्तुं स्ववल्लभस्येव तनुः शरीरं यस्य नलदेहव्याजं धारयतो मनोभुवः पुर आदौ सुरतारम्भेऽर्चनमिवाचरत्पूजामिव चकार । पुष्पपूजा शिरसि कर्तुमुचिता । रतारम्भे च स्मरः समुचिता देवतेति तत्पूजा युक्ता । प्रकाशाभावार्थं कर्णोत्पलेन मुकुटमणिं पिदधाविति भावः ॥

तं पिधाय मुदिताथ पार्श्वयो-
र्वीक्ष्य दीपमुभयत्र सा स्वयोः ।
चित्तमाप कुतुकाद्भुतत्रपा-
तङ्कसंकटनिवेशितस्मरम् ॥ ८७ ॥

तमिति ॥ सा तं नलीयं मुकुटमणिं पिधाय कर्णोत्पलेनाच्छाद्य मुदिता सती अथ पश्चात्स्वयोर्निजयोरुभयत्र द्वयोर्वामदक्षिणयोः पार्श्वयोर्दीपं वीक्ष्यार्थाद्दौ दीपौ दृष्ट्वा स्वचित्तमघटमानघटनात्कुतुकं तद्दर्शनजातमाः किमेतदिति चमत्करणमद्भुतमाश्चर्यं, लज्जा त्रपा, आकस्मिकदीपनदर्शनादातङ्को भयं गोप्यान्यपि मदीयाङ्गानि प्रियेण दृष्टानीति शङ्कातिशये वातङ्कः, तेषां संकटे संमर्दे मध्ये निवेशितः स्मरो यत्र तदेवंभूतमाप । विशेषणविधौ तात्पर्यम् । दीपौ दृष्ट्वा कौतुकादिसहिताभूदिति भावः ॥

एककस्य शमने परं पुन-
र्जाग्रतं शमितमप्यवेक्ष्य तम् ।
जातवह्निवरसंस्मृतिः शिरः
सा विधूय निमिमील केवलम् ॥ ८८ ॥

एककस्येति ॥ द्वयोर्दीपयोर्मध्य एककस्य दीपस्य मुखचेलाञ्चलादिना शमने निर्वाणे क्रियमाणे सति पूर्वशमितमपि तं द्वितीयं दीपं नलेच्छामात्रेण पुनरपि जाग्रतं प्रदीप्तमवेक्ष्य जाता वह्निवरसंस्मृतिर्यस्याः सा स्मरणाभिनयवशाद्वा शिरो विधूय केवलं निमिमील निमीलितवती । लज्जाभिनयः । कौतुकवशात्तदीयगोप्यावयवविलोकनार्थं तस्या निरुपायत्वार्थं पुनः पुनः शमितानपि दीपानिच्छामात्रेणाजिज्वलदिति भावः । एकस्य शमने कृतेऽपरदीपं जाग्रतं दृष्ट्वा शमितमपि पुनर्जाग्रतं दृष्ट्वेति व्याख्येयम् । एककः पूर्ववत् ॥

पश्य भीरु न मयापि दृश्यसे
यन्निमीलितवती दृशावसि ।

इत्यनेन परिहस्य सा तमः
संविधाय समभोजि लज्जिता ॥ ८९ ॥

पश्येति ॥ अनेनेति परिहस्य सोपहासमुक्त्वा तदीयलज्जापाकरणार्थं दीपाभावेच्छामात्रेण तमः संविधायान्धकारं निर्माय सा समभोजि संभुक्ता । ततो लज्जिता । इति किम्—हे भीरु लज्जाभयकातरे, यद्यस्मात्त्वं दृशौ निमीलितवत्यसि तस्मात्त्वं मयापि न दृश्यसे पश्य नेत्रनिमीलनात्त्वया यथा स्वीयमङ्गं न निरीक्ष्यते, तथा मयापि त्वदङ्गमित्यर्थः । अथ च—त्वया नेत्रे निमीलिते, मया तु त्वं न दृश्यसे चित्रमेतत् । यस्मान्मया न द्रष्टव्यमिति हेतोस्त्वया नेत्रे निमीलिते, तावतैव मया न दृश्यसे, अपि तु दृश्यस एव । अन्या हि गोप्यमङ्गं वस्त्रादिनाच्छादयति, त्वया तु नेत्रे एव निमीलिते । तथा च मया त्वदीयगोप्यमङ्गं कामं दृष्टमेवेति किं नेत्रनिमीलनेन पश्येति । अमुना नलेन लज्जिता सा तमः सम्यग्विधायानन्तरं चैवं परिहासपूर्वमुक्ता । भीरु ऊङन्तत्वान्नदीत्वाद्ध्रस्वः । तत्सामर्थ्यान्न गुणः ॥

चुम्ब्यसेयमयमङ्क्यसे नखैः
श्लिष्यसेयमयमर्प्यसे हृदि ।
नो पुनर्न करवाणि ते गिरं
हुं त्यज त्यज तवास्मि किंकरा ॥ ९० ॥

इत्यलीकरतकातरा प्रियं
विप्रलभ्य सुरते ह्रियं च सा ।
चुम्बनादि विततार मायिनी
किं विदग्धमनसामगोचरः ॥ ९१ ॥ युग्मम्

चुम्ब्यसे इति ॥ इतीति । युग्मम् । हे प्रिय, मयाऽयं त्वं चुम्ब्यसे, अयं त्वं नखैरङ्क्यसे चिह्न्यसे, अयं त्वं श्लिष्यस आलिङ्ग्यसे, अयं त्वं हृदि अर्प्यसे हृदयोपरि धार्यसे । ते तव पुनरहं गिरं नो करवाणीति न, अपि तु करोम्येव । यत्त्वया चुम्बनादि याचितं तत्सर्वं करोम्येव । यत इत्यर्थः । हुमिति सुरतसंमर्दासहत्वेन पूर्यतामित्यर्थे । त्यज त्यज इति पीडानटने । मुञ्च मुञ्च मामित्यर्थः । अहं तव किंकरास्मीति दैन्यनटने । इत्येवंप्रकारेणालीकरते मिथ्यैव सुरते कातरा भीरुः । सुरते विषये बलात्कारभीता सती आत्मानं यथाकथंचिन्मोचयितुमेवेयं वदति, न तु हेलयेति । यथा—अद्यापीयमप्रौढेति प्रियं विप्रलभ्य प्रतार्य एतादृशीं वृथाबुद्धिं तस्योत्पाद्य तथा ह्रियमपि प्रतार्य मामियमद्यापि न मुञ्चति । बलात्कारभयाच्चुम्बनादि करोति, न तु स्वेच्छयेति लज्जात्यागमप्यप्रकटीकृत्य चुम्बनादि पूर्वोक्तं सकलमपि सुरतसंभारं प्रौढतयैव विततार प्रियाय ददौ । यतो मायिनी मायावती । उक्तप्रकारेण कपटेनाच्छादितनिजकामोन्मादप्रौढिरिति यावत् । यस्मात्—विदग्धं व्यवहारचतुरं मनो येषां मानवानां किं वस्तु अगोचरो विषयो न भवति, अपि तु—सर्वमपि साध्यमेव । चतुरा हि असाध्यमपि साधयन्ति । अलीकतरकातरेति पाठे—अलीकतरं कातरेति समासः । त्यज वीप्सायां द्विरुक्तिः । किंकरेति 'दिवाविभा—' इति टच्प्राप्तावपि 'किंयत्तद्बहुषु कृञोऽज्विधानम्' इत्यच् ततष्टाप् ॥

स्वेप्सितोद्गमितमात्रलुप्तया
दिपिकाचपलया तमोघने ।
निर्विशङ्करतजन्मतन्मुखा-
कूतदर्शनसुखान्यभुङ्क्त सः ॥ ९२ ॥

स्वेति ॥ स तमसा घने तस्मिन्सौधे, अथ च, तमस्तुल्ये घने मेघे तमोरूपे मेघे स्वेप्सितेन स्वेच्छामात्रेणोद्गमितमात्रा प्रकाशिता चासौ तदानीमेव लुप्ता शमिता च, तथा—दीपिकयैव चपलया विद्युता दृष्टनष्टया निर्विशङ्कं यद्रतं तस्माज्जन्म येषां तानि च तानि तस्या मुखाकूतानि वदनेङ्गितानि तेषां दर्शनानि तज्जन्यानि सुखान्यभुङ्क्तान्वभूत् । अन्धकारवशाद्भैमी स्वेच्छाविरचितमुखाकूतदर्शनसुखानुभवार्थं वह्निवरदानवशात्तदानीमेव दीपिकां प्रकाशितवान् तदानीमेव च लज्जावती स्यादिति भिया पुनस्तां शमितवानिति भावः । विद्युदप्येवंभूता भवति । लुप्तेत्यन्तर्भावितण्यर्थे ज्ञेयः ॥

यद्भ्रुवौ कुटिलिते तया रते
मन्मथेन तदनामि कार्मुकम् ।
यत्तु हुंहुमिति सा तदा व्यधा-
त्तत्स्मरस्य शरमुक्तिहुंकृतम् ॥ ९३ ॥

यदिति ॥ तया रते भ्रुवौ कुटिलिते वक्रिते इति यत्, तन्मन्मथेन कार्मुकमेवानामि । यत्तु पुनः सा तदा सुरतसमये सुरतसंमर्दनिःसहतावारणव्याजेन हुं हुमिति रतिक्लृप्तशब्दं व्यधात्, तत्स्मरस्य शरमुक्तिहुंकृतं बाणमोचनकालीनं हुंकारमेवाकृत हुंकार एवाभूत् । तस्या हुंकरणं कामस्य चापनमनमित्यर्थः । कामस्य वामत्वाद्भ्रूवक्रणादिना कामः पुनरुज्जृम्भित एवाभूदिति भावः ॥

ईक्षितोपदिशतीव नर्तितुं
तत्क्षणोदितमुदं मनोभुवम् ।
कान्तदन्तपरिपीडिताधरा
पाणिधूननमियं वितन्वती ॥ ९४ ॥

ईक्षितेति ॥ चुम्बनरसात्कान्तदन्तैः परिपीडिताधरा दष्टाधरा, अत एव—पाणिधूननं वितन्वती इयं तत्क्षणे सुरतसमये उदितमुदं संजातहर्षं मनोभुवं नर्तितुमुपदिशतीव नृत्यं शिक्षयन्तीव प्रियेणेक्षिता । यापि नृत्यं शिक्षयति सापि हस्तकाभिनयवशात्करकम्पनं करोति । उपदिशती 'आच्छीनद्योः—' इति पाक्षिकत्वान्नुमभावः ॥

सा शशाक परिरम्भदायिनी
गाहितुं बृहदुरः प्रियस्य न ।
चक्षमे च स न भङ्गुरभ्रुव-
स्तुङ्गपीनकुचदूरतां गतम् ॥ ९५ ॥

सेति ॥ परिरम्भदायिनी सा प्रियस्य बृहदुरो गाहितुं सामस्त्येन स्प्रष्टुं न शशाक । यतो बृहदतिविशालम् । सा च कृशाङ्गीत्यर्थः । स च नलोपि भङ्गुरे भ्रुवौ यस्यास्तस्या वक्षः सर्वमपि

स्प्रष्टुं न चक्षमे । यतः—तुङ्गाभ्यां कुचाभ्यां पीनाभ्यां दूरतां व्यवहिततां गतं प्राप्तम् । कुचमात्रमेवालिङ्गितम्, ननु सर्वं वक्षइत्यर्थः । उभावपि संपूर्णालिङ्गनाप्राप्तेर्नितरां सस्पृहत्वादुज्जृम्भितकामौ जाताविति भावः ॥

बाहुवल्लिपरिरम्भमण्डली
या परस्परमपीडयत्तयोः ।
आस्त हेमनलिनीमृणालजः
पाश एव हृदयेशयस्य सः ॥ ९६ ॥

बाहुवल्लीति ॥ तयोर्बाहव एव दैर्घ्यकार्श्याभ्यां वल्लयो लतातुल्यास्तासां परिरम्भ आलिङ्गनविषये या मण्डली वृत्ताकाराङ्कपाली परस्परमपीडयद्गाढमालिङ्गत् । स हृदयेशयस्य कामस्य हेमनलिनीमृणालाज्जातस्तेन निर्मितः पाश एव आस्त बभूव । अतिगौरत्वान्मार्दवत्वाच्च बाहूनां सौवर्णमृणालतुल्यत्वम् । पाशबद्धो यथा वश्यो भवति, तथाऽङ्कपालीपाशेन दृढं बद्धौ कामवशं यातावितिं भावः ॥

वल्लभेन परिरम्भपीडितौ
प्रेयसीहृदि कुचाववापतुः ।
केलतीमदनयोरुपाश्रये
तत्र वृत्तमिलितोपधानताम् ॥ ९७ ॥

वल्लभेनेति ॥ प्रेयसीहृदि वल्लभेन परिरम्भपीडितौ गाढालिङ्गनेन वामनीकृतौ कुचौ केलतीमदनयो रतिकामयोरुपाश्रये विश्रान्तिस्थाने तत्र वक्षसि वृत्तमिलितोपधानतां वर्तुलसंगतोच्छीर्षकभावमवापतुः । प्रभोर्हि विश्रान्तिस्थाने शय्यादौ गण्डोपधानं वृत्तमुच्छीर्षकं भवति, रतिकामौ च प्रभू तत्र वर्तेते, अतस्तत्रैव वर्तमानौ वृत्तौ वामनीभूतौ कुचौ द्वयोरुच्छीर्षके इव बभूवतुरित्यर्थः । इत्युत्प्रेक्षा । केलती रतिपर्यायः ॥

भीमजोरुयुगलं नलार्पितैः
पाणिजस्य मृदुभिः पदैर्बभौ ।
तत्प्रशस्ति रतिकामयोर्जय-
स्तम्भयुग्ममिव शातकुम्भजम् ॥ ९८ ॥

भीमजेति ॥ भीमजोरुयुगलं नलार्पितैर्मृदुभिः पाणिजस्य नखस्य पदैः श्लोकत्वज्ञात्रोल्लेखिभिर्नखक्षतैः कृत्वा रतिकामयोः शातकुम्भजं सौवर्णं तयोर्यशःप्रशस्तिर्लिपिरूपा यत्र, सैव नखस्वरूपैव यशःप्रशस्तिर्यत्रैवंभूतं वा, निजजयप्रकाशकं स्तम्भयुग्ममिव बभौ । रतिकामयोरियमेव यशःप्रशस्तिर्यन्नखक्षतादिकरणं नाम । सुवर्णतुल्यत्वादूर्वोः सुवर्णस्तम्भत्वम् । अन्यस्यापि प्रभोर्यशःप्रशस्तिर्जयस्तम्भे लिख्यते ॥

बहुमानि विधिनापि तावकं
नाभिमूरुयुगमन्तराङ्कम् ।
स व्यधादधिकवर्णकैरिदं
काञ्चनैर्यदिति तां पुराह सः ॥ ९९ ॥

बहुमानीति ॥ स तां पुरेत्याह अवोचत् । इति किम्—हे भैमि, नाभिमूरुद्वयमन्तरा नाभ्यूरुद्वयमध्येऽङ्कं कोमलतातिशयान्मर्दनासहतयाल्पं ह्रस्वं वा मदनसदनाख्यं तावकमङ्गं न केवलं मया, किंतु वीतरागेण विधिना ब्रह्मणापि बहु नितराममान्याद्दृतम् । यद्यस्मात्कारणात्स ब्रह्माधिको वर्णो येषां तैरतिगौरवर्णैरत्युत्तमैः काञ्चनैरिदं कामगृहं व्यधादकृत । निरन्तरावृतत्वादुष्णशीतवातादिसंबन्धाभावादलोमत्वाच्चाङ्गान्तरापेक्षयाऽधिकवर्णं वराङ्गं दृष्ट्वा प्रदीप्तकामः सन्नेवमुवाचेत्यर्थः । अश्लीलमप्येतन्मैथुनादन्यत्र निषेधाद्वराङ्गदर्शनं युक्तमिति ज्ञेयम् । नाभिमित्यादौ 'अन्तरान्तरेण–' इति द्वितीया । अङ्गकम् 'अल्पे' 'ह्रस्वे' इति वा कन् । पुराहेति भूते 'पुरि लुङ् चास्मे' इति लट् ॥

पीडनाय मृदुनी विगाह्य तौ
कान्तपाणिनलिने स्पृहावती ।
तत्कुचौ कलशपीननिष्ठुरौ
हारहासविहते वितेनतुः ॥ १०० ॥

पीडेति ॥ कलशवत्पीनौ पीवरौ निष्ठुरौ कठिनौ च तावतिप्रसिद्धगुणौ तस्याः कुचौ कर्तृभूतौ कान्तस्य पाणिनलिने करकमले कर्मभूते हारस्य हासः प्रकाशस्तेन विहते आच्छादिते वितेनतुश्चक्रतुः । स्पृशन्तावपि नलकरौ हारदीप्त्या पिहितावित्यर्थः । अथवा हार एव हासस्तेन पराभूते कृतोपहासे चक्रतुः । यतो—विगाह्य तावेवाभितः स्पृष्ट्वा पीडनाय मर्दनाय स्पृहावती साभिलाषे धृतेच्छे । यतो—मृदुनी मर्दयितुमसमर्थौ । स्वयं मृदुर्हि महतः कठिनस्य च पीडनाय न प्रभवतीति मृदुभ्यां युवाभ्यां विशालौ कठिनौ चावां मर्दयितुमशक्यावितीयं वाञ्छा वृथा धार्यते स्वपरतारतम्यं न ज्ञायते भवत्यामिति तत्कुचाभ्यां नलकरौ हारहास्येन विडम्बितावित्यर्थः । सर्वतः स्पृष्टावेव न तु पीडिताविति भावः । 'अकर्मकठिनौ हस्तौ–' इति लक्षणात्काठिन्यमेव राजकरस्य गुणः, तथापि नलिनरूपणात्कठिनत्वेपि कुचापेक्षया मार्दवान्मृदुनी इत्युक्तम् । पीडनाय स्पृहावती ते मृदुनी विशेषेण ज्ञात्वा हासविहते चक्रतुरिति वा । अन्योपि निष्ठुरो मृदुमुपहसति ॥

यौ कुरङ्गमदकुङ्कुमाञ्चितौ
नीललोहितरुचौ वधूकुचौ ।
स प्रियोरसि तयोः स्वयंभुवो-
राचचार नखकिंशुकार्चनम् ॥ १०१ ॥

याविति ॥ यौ वधूवरौ कुरङ्गमदेन कस्तूर्या कुङ्कुमेन चाञ्चितौ पूजितौ कृतविलेपनावत एव क्रमेण नीला लोहिता रुक्कान्तिर्ययोः, अथ च—नीललोहितो हरस्तत्कान्ती एवंभूतौ स नलस्तयोर्यौवनारम्भे प्रियोरसि भैमीवक्षसि स्वयमेव भवतोः । प्रादुर्भवतो रक्ततीक्ष्णाग्रत्वान्नखैरेव किंशुकैः पलाशपुष्पैरर्चनं पूजामाचचार । कृताङ्गरागयोः कुचयोर्नखपदानि रचितवानित्यर्थः । अल्पनखोल्लेखस्य व्यथाराहित्येन शोभामात्रहेतुत्वापादनमिवेत्युत्प्रेक्षा । कस्तूर्या अभ्यर्हितत्वात्पूर्वनिपातः ॥

अम्बुधेः कियदनुत्थितं विधुं
स्वानुबिम्बमिलितं व्यडम्बयत् ।

चुम्बदम्बुजमुखीमुखं तदा
नैषधस्य वदनेन्दुमण्डलम् ॥ १०२ ॥

अम्बुधेरिति ॥ सुरतावसरेऽम्बुजमुख्या भैम्या मुखं चुम्बद्भयञ्चैषधस्य वदनेन्दुमण्डलं कर्तृ प्रतिदिनमुदयसमयेऽम्बुधेः समुद्रात्किंयत्स्तोकमनुत्थितम्, तथा—समुद्रजले जातेन स्वानुबिम्बेनात्मीयप्रतिबिम्बेन मिलितं निरन्तरसंबद्धं विधुं चन्द्रं व्यडम्बयदनुचकार । भैमीमुखं कर्तृ नलमुखं कर्मीभूतं चुम्बदिति वा । अनेन विपरीतरतं सूचितम् । बिम्बप्रतिबिम्बभावनिरूपणेनात्यन्तं तन्मुखयोः सादृश्यं सूचितम् । काममुहच्चन्द्रोदयनिरूपणाच्च कामोज्जृम्भणं व्यज्यते ॥

पूगभागबहुताकषायितै-
र्वासितैरुदयभास्करेण तौ ।
चक्रतुर्निधुवनेऽधरामृतै-
स्तत्र साधु मधुपानविभ्रमम् ॥ १०३ ॥

पूगेति ॥ पूगफलफालिकानां भागोंऽशस्तस्य बहुतया कषायितैस्तुवररसं प्रापितैः 'कषायः सुरभावपि–' इत्यभिधानात्सुरभितैर्वा । तथा पक्केनोदयभास्कराख्येन ताम्बूलमध्ये गृहीतेन कर्पूरेण वासितैः, सुरभितैरन्योन्याधरामृतैर्वा, अधररसैरेवामृतैः कृत्वा तौ दमयन्तीनलौ तत्र निधुवने सुरते मधुपानस्य विभ्रमं मद्यपानरूपं विलासं साधु सम्यग्यथा तथा चक्रतुः । अथ च—मद्यपानजन्यं विभ्रमं चक्रतुः । मद्यपानस्थानेऽन्योन्याधरपानमेव चक्रतुस्तेनैव च नितरां सोन्मादौ जाताविति भावः । अन्योपि कषायरसं कर्पूरवासितं शीतलं मधु पिबति । माध्वनिषिद्धं मधिति वा । सुरते मधुपानविभ्रममधरामृतैः साधु यथा तथा चक्रतुः । उपदंशस्थानेऽधरामृतानि जातानीत्यर्थः । भोगेति पाठे—अनुभवः । रागेति पाठे—बहुताम्बूलचर्वणक्रमविवर्धमानरक्तिमबाहुल्येनेत्यर्थः कषायितैः 'तत्करोति' इति ण्यन्तान्निष्ठा ॥

आह नाथवदनस्य चुम्बनः
सा स्म शीतकरतामनक्षरम् ।
सीत्कृतानि सुदती वितन्वती
सत्त्वदत्तपृथुवेपथुस्तदा ॥ १०४ ॥

आहेति ॥ तदा सुरतचुम्बनावसरे सीत्कृतानि वितन्वती कुर्वती, तथा कामावस्थाविकारविशेषेण सत्त्वेन दत्तः पृथुर्वेपथुः कम्पो यस्यास्तादृशी सती चुम्बने (तो) नाथवदनस्यानक्षरं यर्णैर्विना तत्कार्यकारित्वेन शीतकरतां चन्द्रतामाह स्म । चन्द्रस्पर्शाद्यथा सुखं भवति, तथा नलमुखस्पर्शात्तस्या अभूदित्यर्थः । शीतेपि सीत्कारः कम्पश्च भवति, मुखादक्षरं च न निर्गच्छति । शीतं कर्तुं शीलमस्य शीतकरः 'कृञो हेतुताच्छील्य–' इति टः ॥

चुम्बनाय कलितप्रियाकुचं
वीरसेनसुतवक्त्रमण्डलम् ।
प्राप भर्तुममृतैः सुधांशुना
सक्तहाटकघटेन मिश्रताम् ॥ १०५ ॥

चुम्बनायेति ॥ चुम्बनाय कलितः स्पृष्टः प्रियाकुचो येन वीरसेनसुतस्य वक्त्रमण्डलं सुधांशुना चन्द्रेण मिश्रतां साम्यं प्राप । किंभूतेन चन्द्रेण—स्वैरेवामृतैरात्मानं भर्तुं पूरयितुं सक्तः संगतो हाटकघटः सुवर्णकलशो येन । मुखं चन्द्रसममृतभरणार्थं चन्द्रसंबद्धस्वर्णघटसमो भैमीकुचः । मुखेन्दुना स्वीयममृतं कुचकलशे निक्षिप्तम्, ननु तत्रत्यं गृहीतमिति अनौचिती नाशङ्कनीया । मुखचुम्बनादमृतांशुयोगादिव भैमीकुचः शान्ततापो जातसुखश्चाभूदिति भावः । 'मुखनेत्रस्तनबाहुमूलकपोलौष्ठद्वयवराङ्गान्यष्टौ चुम्बनस्थानानि, रागतः सर्वाण्यपि च' इति वात्स्यायनः । नयनगलकपोलदन्तवासोमुखान्तस्तनयुगललाटं वा चुम्बनस्थानम् । स्तने चूचुकं परिहृत्येति विशेषः । मिश्रशब्दस्य तुल्यार्थत्वात्सुधांशुनेति 'तुल्यार्थैः–' इति तृतीया ॥

वीक्ष्य वीक्ष्य पुनरैक्षि सा मुदा
पर्यरम्भि परिरभ्य चासकृत् ।
चुम्बिता पुनरचुम्बि चादरा-
त्तृप्तिरापि न कथंचनापि च ॥ १०६ ॥

वीक्ष्येति ॥ अमुना सा वीक्ष्य वीक्ष्य पुनरैक्षि । तथा—असकृद्वारंवारं परिरभ्य च पुनः पर्यरम्भि पुनरालिङ्गि । तथा—आदराद्वारंवारं चुम्बितापि पुनरचुम्बि च । तथापि कथंचनापि केनापि प्रकारेणानेन तृप्तिकारणसद्भावेपि तृप्तिर्नापि न प्राप्ता ॥

छिन्नमप्यतनु हारमण्डलं
मुग्धया सुरतलास्यकेलिभिः ।
न व्यतर्कि सुदृशा चिरादपि
स्वेदबिन्दुकितवक्षसा हृदि ॥ १०७ ॥

छिन्नमिति ॥ सुदृशा निरीक्षणे नितरां चतुरयाऽपि मुग्धया सुन्दर्या, अथ च—बालया भैम्या सुरतलास्यकेलिभिः सुरतसंबन्धिभिर्नृत्तविलासैः करधूननाद्यङ्गविक्षेपविलासविशेषैः कृत्वा हृदि छिन्नं त्रुटितगुणमप्यतनु आनाभिलम्बित्वाद्विशालं हारमण्डलं मुक्ताहारदाम चिरादपि भूयसापि कालेन न व्यतर्कि । यतः—स्वेदबिन्दुकितं संजातस्वेदबिन्दुकं वक्षो यस्यास्तया । सुरतायाससंजातस्वेदबिन्दुमण्डलस्य हारसादृश्यान्मौग्ध्याच्च त्रुटितोऽपि हारो नाबोधीत्यर्थः । स्वार्थिककप्रत्ययान्तात्स्वेदबिन्दुकशब्दात्तारकादित्वादितैच् ॥

यत्तदीयहृदि हारमौक्तिकै-
रासि तत्र गुण एव कारणम् ।
अन्यथा कथममुत्र वर्तितुं
तैरशाकि न तदा गुणच्युतैः ॥ १०८ ॥

---

१ 'सादृश्याक्षेपान्निदर्शनालंकारः' इति **जीवातुः** ।

१ 'अमृतांशुरिवत्युत्प्रेक्षयाऽमृतकरत्वं व्यज्यत इत्यलंकारेण वस्तुध्वनिः' इति **जीवातुः** । २ 'भ्रान्तिमदलंकारः' इति **जीवातुः** ।

यदिति ॥ हारमौक्तिकैस्तदीये हृदि वक्षसि, अथ च—चित्ते, यदासि स्थितं लग्नम्, तत्र गुणो दोरकस्तारस्वादिरेव कारणं हेतुः। अन्यथा नचेदेवं तर्हि तदा सुरतसमये गुणच्युतेः सूत्रभ्रष्टैस्तैर्मौक्तिकैरमुत्र तदीये हृदि वर्तितुं स्थातुं कथं कस्मान्नाशाकि समर्थैर्न जातम्। अथ च—तारस्वादिगुणहीनैर्मौक्तिकैस्तदीयहृदये न स्थीयते किंतूत्तमैरेव। तस्मादुभयविधेऽपि भैमीहृदये स्थातुं मौक्तिकानामन्वयव्यतिरेकाभ्यां द्विविधोपि गुणो हेतुरित्यनुमानम्। सुरतसंमर्दान्मुक्ताहारस्त्रुटित इति भङ्ग्यन्तरेणोक्तम्। अन्यस्यापि विदग्धहृदयगामित्वे गुण एव हेतुः, गुणहीनेन तु चित्ते स्थातुं न शक्यते इति भङ्ग्या सूचितम्। गुणच्युतेः 'पञ्चमी' इति योगविभागात्समासः ॥

एकवृत्तिरपि मौक्तिकावलि-
श्छिन्नहारविततौ तदा तयोः।
छायया ऽन्यहृदये विभूषणं
श्रान्तिवारिभरभावितेऽभवत् ॥ १०९ ॥

एकेति ॥ तदा संभोगसमये तयोर्द्वयोर्मध्य एकस्मिन्नल एव वृत्तिर्यस्या एवंभूतापि मौक्तिकावलिरन्यस्या भैम्या हृदये छायया विभूषणमभवत्। किंभूतेऽन्यहृदये—छिन्ना हारस्य विततिर्विस्तारो यस्य। यतः—श्रान्तिवारीणि स्वेदबिन्दवस्तेषां भरः पूरस्तेन भाविते व्याप्ते। द्वयोः समीपे संमुखस्थितयोर्मध्ये भैम्या हारे त्रुटितेऽपि स्वेदजलपूरिते हृदये प्रतिबिम्बितो नलस्य हार एवाभरणं बभूवेत्यर्थः। अन्यहृदय इति सर्वनामत्वात्पुंवद्भावः ॥

वामपादतललुप्तमन्मथ-
श्रीमदेन मुखवीक्षिणानिशम्।
भुज्यमाननवयौवनामुना
पारसीमनि चचार सा मुदाम् ॥ ११० ॥

वामेति ॥ वामपादतलेन लुप्तो मन्मथश्रीमदः कामसौन्दर्यगर्वो येनातिसुन्दरेणाप्यनिशं भैमीमुखवीक्षिणा केवलभैम्यधीनेनामुना नलेन भुज्यमानं नवं नूतनं यौवनं तारुण्यं यस्याः सा भैमी मुदां संतोषाणां पारसीमनि परतीरमर्यादायां परमोत्कर्षे चचारावर्तत। भावावसानसमयं प्रापेत्यर्थः। वामपादतल-, मुखवीक्षि—, इति पदद्वयं लौकिकोक्तिः। एवंभूतेन च भुज्यमानत्वान्मुदां परमोत्कर्षं प्रापेति युक्तम्। मुखवीक्षणं दिने रात्रावपि वरदानप्रकाशितदीपवशाज्ज्ञेयम् ॥

आन्तरानपि तदङ्गसंगमै-
स्तर्पितानवयवानमन्यत।
नेत्रयोरमृतसारपारणां
तद्विलोकनमचिन्तयन्नलः ॥ १११ ॥

आन्तरानिति ॥ नलः स्वीयानान्तराञ्शरीरमध्यवर्तिनोस्पृश्यमानप्यवयवान् तदङ्गसंगमैः सुकुमारभैम्यवयवस्पर्शैरतिवेधक-

१ 'अत्रैकस्यैव हारस्योभयत्र भूषणत्वेनासंबन्धेपि संबन्धोक्तिस्तद्गुणातिशयोक्तिरलंकारः' इति जीवातुः।

तया तर्पितान्सुखितानमन्यत। तथा—तद्विलोकनं च स्वीयनेत्रयोरमृतस्य सारेण श्रेष्ठभागेन पारणां तद्रूपं तृप्तीकरणमचिन्तयद्बुबुधे। पुनःपुनर्भैमीगाढालिङ्गनदर्शनादन्तर्बहिश्च प्रीणितो भूदित्यर्थः। अन्तरशब्दाद्वा भवार्थेऽण्। तर्पितान् ण्यन्तात्कर्मणि क्तः ॥

भूषणैरतुपदाश्रितैः प्रियां
प्रागथ व्यपददेप भावयन्।
तैरभावि कियदङ्गदर्शने
यत्पिधानमयविघ्नकारिभिः ॥ ११२ ॥

भूषणैरिति ॥ एष नलः प्रियामाश्रितैः स्वशरीरं मण्डयद्भिस्माटङ्कादिभिर्भूषणैर्दृष्टैः प्रागतुपत्पूर्वं संतोषमगात्। अथ तोषानन्तरं भावयन्विचारयन्व्यपदद्विषण्णोऽभूत्। यद्यस्मात्तैर्भूषणैरस्याः कियतोऽलंकृतस्याल्पस्याङ्गस्य दर्शने विषये पिधानमयानामाच्छादनरूपाणां दर्शनान्तरायाणां कारिभिस्तद्धेतुभूतैरभावि जातम्। अनलंकृतं चेत्तर्हि सर्वं दर्शनगोचरोऽभविष्यत्, नत्वेवम्, तस्माद्व्यपददित्यर्थः। भैमीसौन्दर्यं तस्यां नलानुरागातिशयश्च सूचितः। रतसमये भूषणमोचनस्यैव युक्तत्वाद्भूषणसद्भाववर्णनं यद्प्यनुचितम्, तथापि यावद्भूषणानि मोचयति, तावदपि विलम्बासहिष्णुतया हठसुरतसूचनाद्भूषणवर्णनोचिती न दोषायेति, तदाप्यत्यन्तापरिहार्यभूषणाभिप्रायेण वेति ज्ञेयम्। 'बह्वमन्यत दृशा न चेतसां भूषणानि स विदर्भसुभ्रुवः' इति वा पाठः सुगमः। अनुपसर्गादित्वादङ्ग ॥

योजनानि परिरम्भणेऽन्तरं
रोमहर्षजमपि स्म बोधतः।
तौ निमेषमपि वीक्षणे मिथो
वत्सरव्यवधिमध्यगच्छताम् ॥ ११३ ॥

योजनानीति ॥ तौ रोमहर्षजं सात्विकभावोत्थरोमाञ्चाज्जातमत्यल्पमप्यन्तरं परिरम्भण आलिङ्गने विषये बहूनि योजनानि बोधतः स्म अजान(नी)ताम्। तथापि मिथो वीक्षणे प्रारब्धेऽन्योन्यविलोकनेऽत्यल्पं निमेषमक्षिपक्ष्मसंकोचसमयमपि वत्सरेण वर्षेण व्यवधि व्यवधानं बहुवर्षदर्शनविच्छेदकालमध्यगच्छतामज्ञासिष्टाम्। अल्पीयसाऽपि देशकालव्यवधानेन प्रेमभरादन्योन्यविच्छेदस्ताभ्याममानीत्यर्थः। बोधतः 'बुध अवगमने' भौवादिकः। स्मयोगे लट् ॥

वीक्ष्य भावमधिगन्तुमुत्सुकां
पूर्वमच्छमणिकुट्टिमे मृदुम्।
कोऽयमित्युदितसंभ्रमीकृतां
स्वानुबिम्बमददर्शतैष ताम् ॥ ११४ ॥

वीक्ष्येति ॥ एष नलो मृदुं बालत्वात्सुरतभरासहां लघुद्रवां पद्मिनीम्, अत एव—स्वस्मात्पूर्वमेव बिन्दुपतनरयरूपं भावमधिगन्तुं प्राप्तुं नेत्रनिमीलनगाढालिङ्गनादिचिह्नेनोत्सुकां सत्वरां वीक्ष्य ज्ञात्वा तद्बिन्दुस्तम्भनार्थं कोऽयमपूर्वः पुरुष इति प्रभेन पूर्वमसंजा-

तभयामपि नलरूपधारिणान्येनाहमुक्तेति बुद्ध्या सुरतसमयसमागतजनान्तरदर्शनाद्वा उदितसंभ्रमीकृतां समुत्पादितभयां विमनस्कतया प्रतिबद्धभावोदयाम्, अनन्तरं कः कुत्र तिष्ठतीति कृतप्रश्नां तां भैमीमच्छमणिकुट्टिमे निर्मले मणिबद्धभित्तिभागे स्वानुबिम्बं स्वप्रतिबिम्बमददर्शत दर्शयामास । नायमपूर्वः कश्चित्, किंतु मदीयमेवेदं प्रतिबिम्बम् तत्र ममान्य इति भ्रान्तिर्जातेति स्वप्रतिबिम्बं तामदर्शयदित्यर्थः । अन्यतरस्य पूर्वं बिन्दुपतने विषमरतत्वाद्वैरस्यं स्यादिति बिन्दुस्तम्भार्थम् 'अन्यचित्ततया संभ्रमजननेन च भावबन्धं कुर्यात्' इति कामशास्त्रात्तस्या बिन्दुपातप्रतिबन्धमकरोदिति भावः । अददर्शत 'णिचश्च' इति तङ् । ('ऋदृशोऽङि गुणः') तां बुद्ध्यर्थत्वात्कर्मत्वम् ॥

एवं भैम्या भावलाभवेगभङ्गोपायमुक्त्वा नलस्य भावलाभवेगभङ्गभङ्गीमाह—

तत्क्षणावहितभावभावित-
द्वादशात्मसितदीधितिस्थितिः ।
स्वां प्रियामभिमतक्षणोदयां
भावलाभलघुतां नुनोद सः ॥ ११५ ॥

तत्क्षणेति ॥ स प्रियाय अभिमते क्षणे स्वेष्टसमये भैमीभावलाभौत्सुक्यात्पूर्वमेवोदय उत्पत्तिः समयो यस्यास्तां भावलाभे स्वां निजां बिन्दुच्युतौ लघुतां शीघ्रतां नुनोद अन्यचित्तीकरणेन व्यलम्बयदित्यर्थः । तदेवाह—किंभूतः—तस्मिन्नेव क्षणे निजभावौत्सुक्यसमयेऽवहितभावेनैतस्या इव ममापि भावलाभश्चेत्स्यात्, तर्हि विषमरतत्वाद्वैरस्यमेव स्यात्, अतस्तुल्यकालमेवोभयोर्भावलाभं करवाणीति सावधानतयोक्तप्रकारेणैव सावधाने वा भावे चित्ते भाविता ध्यानवासनादिभिश्चिन्तिता द्वादशात्मनः सूर्यस्य, सितदीधितेश्चन्द्रस्य, स्थितिर्मर्यादा गगनगमनादिप्रकारो येन सः । तद्ध्यानेन निजबीजस्तम्भनार्थं स्वस्यैव संपादितवैचित्र्यः सन्निति यावत् । अथ च—सावधानतया कृता सूर्यचन्द्रापरपर्यायेडापिङ्गलाख्यदक्षिणवामनाडीस्थयोर्मरुतोः स्थितिः स्थैर्यं येन । कुम्भितपवन इत्यर्थः । अन्यचित्ततासंपादनेन नासावायुस्तम्भनेन चोपायेनैकसमयोभयभावप्राप्तिपर्यन्तं स्वीयं भावं स्थिरीचकारेति भावः । एतेन भङ्ग्या नलस्य योगाभ्यासोपि सूचितः, अन्येन तथा कर्तुमशक्यत्वात् । 'दक्षिणनासामुद्रणे पुरुषस्य, वामनासिकामुद्रणे योषितो बिन्दुस्तम्भो भवति' इति कामशास्त्रात्स्वीयं तदीयं च भावं स्थिरीचकारेति वा । विस्तरेणालम् ॥

इदानीं समरतमाह—

स्वेन भावजनने स तु प्रियां
बाहुमूलकुचनाभिचुम्बनैः ।
निर्ममे रतरहःसमापना-
शर्मसारसमसंविभागिनीम् ॥ ११६ ॥

स्वेनेति ॥ स तु नलः पुनः स्वेन स्वयमेव भावजनने उभयोर्भावप्राप्तिसमये स्वेन सह वा स्वेनात्मनैव कर्त्रा यद्भावजननं तस्मिन्सति वा । स्वस्य भावजनकसमय इति यावत् । तत्र बाहुमूलं कक्षा, कुचौ नाभिश्च एतेषां चुम्बनैः कृत्वा रतस्य रहसि समापना तज्जनितं परमकाष्ठापन्नं शर्म सुखं, समापनारूपो वा शर्मसारस्तस्य समस्तुल्यो यः संविभागोंऽशस्तद्वतीं समरतप्रापणेन सुखिनीं निर्ममे चकार । स्वेनेत्यस्य प्रथमद्वितीयव्याख्ययोः कक्षादिचुम्बनं जातिः । तृतीयायां तु—कक्षादेर्निरन्तरं कामाधिष्ठानत्वात्तच्चुम्बनैरुपायैः स्वस्य भावप्राप्तिसमये तामपि भावमलम्भयदिति भावः । 'भावभजनेन तु—' इति पाठे—स्वीयेन भावभजनेन निमित्तेन बाह्वादिचुम्बनैरिति व्याख्या ॥

पुनरपि भङ्ग्यन्तरेण तदेवाह—

विश्लथैरवयवैर्निमीलया
लोमभिर्द्रुतमितैर्विनिद्रताम् ।
सूचितं श्वसितसीत्कृतैश्च तौ
भावमक्रमकमध्यगच्छताम् ॥ ११७ ॥

विश्लथैरिति ॥ तौ भावलाभश्रमवशात्स्वोद्वहनेपि विश्लथैः शिथिलीभूतैरवयवैरङ्गैः, तथा—निद्राभावेपि निमीलया श्रमजनितनयनसंकोचत(न)या, तथा—तस्मिन्क्षणे द्रुतं शीघ्रं विनिद्रतामुल्लासमितैर्गतैर्लोमभी रोमाञ्चैः, तथा—श्वसितैः श्रमजमुखनासिकाश्वासैः सीत्कृतैश्च तैः सर्वैः सूचितमक्रमकं युगपत्संजातं बिन्दुच्युतिजन्यसुखरूपं भावमध्यगच्छताम् । समरतं प्राप्ताविति यथः । भोगिनोः संभोगान्ते श्लथावयवत्वादि जातिः । क्रमकं 'क्रमादिभ्यो वुन्' इति वुन् ॥

आस्त भावमधिगच्छतोस्तयोः
संमदेषु करजक्षतार्पणा ।
फाणितेषु मरिचावचूर्णना
सा स्फुटं कटुरपि स्पृहावहा ॥ ११८ ॥

आस्तेति ॥ एवं भावमधिगच्छतोः सुरतान्तसुखमनुभवतोस्तयोः करजक्षतानां नखक्षतानामर्पणा दानं संमदेषु परमानन्देषु मध्ये आस्ताभूत् । आनन्ददायिकैवाभूदित्यर्थः । ननु क्षतस्य सुखदायित्वं कथमित्यत आह—स्फुटं यस्मात्फाणितेषु दुग्धविकाररूपेषु खण्डविकारेषु वा पानकेषु मध्ये सा सूपशास्त्रप्रसिद्धा मरिचावचूर्णना कटुरसापि स्पृहावहा मधुररसजन्यारुचिपरिहारेण दृढामिच्छामावहति, तथा—कटुः पीडाजनिकापि नखक्षतार्पणा सुखकारिण्येवाभूदित्यर्थः । संमदेषु नानाप्रकारेषु सुरतेषु भावं प्राप्नुवतोस्तयोस्तस्मिन्नेव समये सा कामशास्त्रप्रसिद्धा कटुः पीडाजनिकापि नखक्षतार्पणा स्पृहावहाऽभूत् । स्फुटशब्द इवार्थः । केषु केव—फाणितेषु कटुरसा मरिचावचूर्णनेव । सुरतान्ते कृताऽपि पुनः सुरतेच्छामेवोददीपदिति भाव इति वा । भावमधिगच्छतोस्तयोः कटुरपि सुरतेषु स्पृहावहा या नखक्षतार्पणा सा स्फुटं निश्चितेषु फाणितेषु मरिचावचूर्णनाऽभूत् तद्रूपैव तद्रूपेव वाऽभूदित्यर्थ इति वा । 'मत्स्यण्डी फाणितं खण्डविकारः शर्करा सिता' इत्यमरः । चूर्णना 'सत्यापपाश—' इति णिजन्ताद्युच् ॥

१ लेखकप्रमादपतितोयं पाठः । णिनिमित्तकगुणेन सकलष्टसिद्धेः । अङोऽभावेनोक्तसूत्राप्रवृत्तेः । अङ्चङोरभेदाङ्गीकरणे तु अवीवचदित्यत्रोमः, अपीपतदित्यत्र पुमोऽप्यापत्तेः । २ 'दृशेश्च' इति वार्तिकेनेति सुवचम् । सूत्रे ज्ञानविशेषार्थानामग्रहणात् ।

अर्धमीलितविलोलतारके
सा दृशौ निधुवनक्लमालसा ।
यन्मुहूर्तमवहन्न तत्पुन-
स्तृप्तिरास्त दयितस्य पश्यतः ॥ ११९ ॥

अर्धेति ॥ निधुवनक्लमेन सुरतश्रमेणालसा । सुरतायासनिःसहाङ्गीत्यर्थः । सा दृशौ मुहूर्तं क्षणमात्रमर्धनिमीलिते ईषत्संकुचिते विलोले तारके ययोस्तादृशे(शौ) यदवहदधार, तत्तादृग्भैमीनेत्रावस्थानं पश्यतो दयितस्य पुनस्तृप्तिर्नास्त मा भूत् । पुनः पुनः पश्यत इति वा (भावः) । पौनःपुन्यदर्शनाभिलाषस्यानिवृत्तत्वात्पश्यन्नेव स्थित इत्यर्थः । तादृशी तस्य सुतरां सुखायाभूदिति भावः ॥

तत्क्लमस्तमदिदीक्षत क्षणं
तालवृन्तचलनाय नायकम् ।
तद्विधा हि भवदैवतं प्रिया
वेधसोपि विदधाति चापलम् ॥ १२० ॥

तदिति ॥ इदानींतनस्तस्याः क्लमः सुरतजः श्रमः नायकं सैन्यस्वामिनं राजानमपि तं क्षणमात्रं तालवृन्तचलनायादिदीक्षतोपदिदेश । सुरतश्रान्तां तां दृष्ट्वा व्यजनवीजनेन श्रमापनयनं चकारेत्यर्थः । हि यतो—भवस्य संसारस्य काममुखसर्वस्वस्य दैवतमिष्टदेवता तद्विधा भैमीसदृशी अतिसुन्दरी प्रियसौभाग्यवती प्रिया वेधसो ब्रह्मणोपि स्वविषये चापलमनुरागतरलतां विदधाति करोति, किं पुनर्मनुष्यस्य नलस्येत्यर्थः । पुनरपि सानुरागो जात इति भावः । 'व्यजनं तालवृन्तकम्' इत्यमरः । अदिदीक्षत नियमार्थाद्दीक्षेर्हेतुमण्णिच्, चङ् ॥

स्वेदबिन्दुकितनासिकाशिखं
तन्मुखं सुखयति स्म नैषधम् ।
प्रोषिताधरशयालुयावकं
सामिलुप्तपुलकं कपोलयोः ॥ १२१ ॥

स्वेदेति ॥ तस्या मुखं नैषधं सुखयति स्म । किंभूतम्—स्वेदबिन्दुकाः संजाता यस्यास्तादृशी नासिकाशिखा नासाग्रं यस्य । तथा—प्रोषितो गतोऽधरशयालुरोष्ठस्थितो यावको यस्य । तथा—परिचुम्बनवशात्कपोलयोः साम्यर्धं । लुप्ताः पुलका रोमाञ्चा यस्य एवंभूतं दृष्ट्वा स सुखी जातः, संजातकामश्च जात इत्यर्थः । अत्र पूर्वोत्तरार्धे व्यत्यस्ते पठनीये, अन्यथा समाप्तपुनरात्तदोषापातः । सुखयति मतुबन्तात् 'तत्करोति-' इति णिचि 'णाविष्ठवत्-' इति मतुल्लोपः ॥

हीणमेव पृथु सस्मरं किय-
त्क्लान्तमेव बहुनिर्वृतं मनाक् ।
कान्तचेतसि तदीयमाननं
तत्तदालभत लक्षमादरात् ॥ १२२ ॥

हीणमिति ॥ तदतिसुन्दरं तदीयमाननं तदा सुरतान्तसमये कान्तचेतसि विषय आदरातिशयाल्लक्षं लक्षसंख्यं द्रव्यमलभत । मूल्यराहित्येऽत्युत्कृष्टे वस्तुनि 'एतल्लक्षं लभते' इति लोकोक्तया परमोत्कर्षस्याभिव्यञ्जनात्परमत्युत्कर्षं प्रापेत्यर्थः । किंभूतम्—सुरतसुखानुभववेगसंजातस्वीयस्मरचापलस्मरणात्पुरुषायितस्मरणाद्वा बहुतरं ह्रीणं लज्जितमेव । तथा—पुनः सुरताभिलाषधारणात्किंयदीषत्सस्मरमुद्दीप्तकामम् । तथा—सौकुमार्यातिशयायासबाहुल्याद्बहु सुतरां क्लान्तं म्लानमेव । तथा—प्रलयाख्यया कामावस्थया साध्यसाधनभेदावगमराहित्यादेकीभावात्परब्रह्मानन्दानुभवादिव महासुखानुभवविषयसुखापलापान्मनाङ्निर्वृतमल्पं सुखितम् । विस्मृतानुभूतसुखमिति यावत् । 'रतान्तसमये योषिन्मुखमत्यादरकारि भवति' इति कामशास्त्रम् । तदा तादृक्तदाननं दृष्ट्वा पुनः समदनोऽभूदिति भावः । अथ च—लक्षं विषयतामलभतेत्यर्थः ॥

स्वेदवारिपरिपूरितं प्रिया-
रोमकूपनिवहं यथायथा ।
नैषधस्य दृगपात्तथातथा
चित्रमापदपतृष्णतां न सा ॥ १२३ ॥

स्वेदेति ॥ नैषधस्य दृक्स्वेदवारिणा सुरतश्रमजलेन परिपूर्णं प्रियारोमकूपनिवहं यथा यथा यावदपात्सादरं व्यलोकयत्, सा नलदृक् तथातथा तावत्तावदपतृष्णतां तृप्तिं नापदिति चित्रम् । पुनःपुनरवलोकने हि तृप्तिर्भवति, अत्र तु न जातेत्याश्चर्यमित्यर्थः । अथ च—पिपासोरञ्जलिजलेनापि पिपासा शाम्यति, अस्यास्त्वाकण्ठवारिपूरितकूपसङ्कस्य पुनः पुनः पानेऽपि पिपासा न शान्तेति चित्रमित्यर्थः । एवंभूतभैमीरोमकूपदर्शनमात्रेण पुनः सकामोऽभूदिति भावः ॥

वीतमाल्यकचहस्तसंयम-
व्यस्तहस्तयुगया स्फुटीकृतम् ।
बाहुमूलमनया तदुज्ज्वलं
वीक्ष्य सौख्यजलधौ ममज्ज सः ॥ १२४ ॥

वीतेति ॥ स सुरतसंमर्दाद्वीतमाल्याच्युतकुसुमाः कचहस्तास्तेषां संयमाय ग्रन्थिबन्धनाय व्यस्तमूर्ध्वव्यापारितं हस्तयुगं यया तया भैम्या स्फुटीकृतं तदतिरमणीयं कामवसतिस्थानमुज्ज्वलमतिगौरं बाहुमूलं वीक्ष्य सौख्यजलधौ ममज्ज । निरवधि सुखमन्वभूदित्यर्थः । वान्तेति वा पाठः । कचहस्त इति हस्तशब्दः प्रशंसावाची । सुखमेव सौख्यं चतुर्वर्णादित्वात्स्वार्थे ष्यञ् ॥

वीक्ष्य पत्युरधरं कृशोदरी
बन्धुजीवमिव भृङ्गसंगतम् ।
मञ्जुलं नयनकज्जलैर्निजैः
संवरीतुमशकत्स्मितं न सा ॥ १२५ ॥

वीक्ष्येति ॥ सा कृशोदरी नेत्रचुम्बनवशात्संलग्नैर्निजैर्नयनकज्जलैर्भिन्नवर्णतया मञ्जुलं शोभमानं पत्युरधरं भृङ्गेण भ्रमरेण संगतं मिलितं पीयमानमकरन्दं बन्धुजीवपुष्पमिव वीक्ष्य समुत्पद्यमानं स्मितमीषद्वास्यं संवरीतुं गोपायितुमुत्पद्यमानमेव निरोद्धुं वा नाशकत्समर्था नाभूत् । उत्तमस्त्रीत्वात्सलज्जत्वात्प्राणे-

शस्य सन्निधे स्मितं कर्तुमयुक्तं यद्यपि, तथापि स्वीयसंभोगसौभाग्यवशादुत्पन्नस्य स्मितस्य संवरीतुमशक्यत्वात्सपत्नीदर्शने च सलज्जत्वेपि प्रागल्भ्यागमनशङ्कया सस्मित इति ॥

तां विलोक्य विमुखश्रितस्मितां
पृच्छतो हसितहेतुमीशितुः ।
ह्रीमती व्यतरदुत्तरं वधूः
पाणिपङ्कजरुहि दर्पणार्पणाम् ॥ १२६ ॥

तामिति ॥ वधूर्भैमी विमुखं तिर्यङ्मुखं यथा तथा पराङ्मुखीभूय श्रितस्मिता कृतेषद्धास्या विमुखी चासौ श्रितस्मिता च तादृशीं बालां विलोक्य हसितहेतुं पृच्छत ईशितुर्नलस्य पाणिरेव पङ्कजरुट् कमलं तस्मिन्करकमले दर्पणस्यार्पणामेवोत्तरं व्यतरद्दौ स्मितहेतुमाचष्ट । यतो—ह्रीमती । स्वनेत्रचुम्बनवशात्तवोष्ठे नेत्रकज्जलं लग्नमिति लज्जावशात्साक्षादुत्तरं दातुमशक्ता कज्जलाङ्कितं स्वाधरं पश्येति भावेन दर्पणार्पणामेवोत्तरं ददावित्यर्थः ॥

लाक्षयात्मचरणस्य चुम्बना-
च्चारुभालमवलोक्य तन्मुखम् ।
सा ह्रिया नतनताननाऽस्मर-
च्छेपरागमुदितं पतिं निशः ॥ १२७ ॥

लाक्षयेति ॥ कुपितभैमीप्रसादनार्थं चरणे पतनाद्भैम्याः पद्मिनीत्वात्पङ्कजासनबन्धेन सुरतारम्भवशाद्वात्मचरणस्य लाक्षया चुम्बनात्संबन्धाद्धेतोश्चारु भालं ललाटं यस्यैवंभूतं तस्य नलस्य मुखमवलोक्य निजसुरतधार्ष्ट्यस्मरणजातया ह्रिया हेतुना नतनतं नतप्रकारमाननं यस्याः सैवंभूता सती उदितं प्राप्तोदयम्, उदयानन्तरं च कालक्रमापचीयमानः शेषः कियदवशिष्टो रागो लौहित्यं यस्य तं निशो रात्र्याः पतिं चन्द्रमस्मरत् । तन्मुखं तादृगभूदित्यर्थः । ईषदवशिष्टरक्तिमचन्द्रदर्शने यथा प्रीतिर्भवति, तथा तादृङ्मुखदर्शनेपि तस्याः प्रीतिर्जातेति भावः । ननननेति प्रकारे द्विरुक्तिः । पतिं कर्मत्वविवक्षया षष्ठ्यभावः ॥

स्वेदभाजि हृदयेऽनुबिम्बितं
वीक्ष्य मूर्तमिव हृद्गतं प्रियम् ।
निर्ममे धुतरतश्रमं निजै-
र्ह्रीनतातिमृदुनासिकानिलैः ॥ १२८ ॥

स्वेदेति ॥ ललाटलाक्षादर्शनसंजातनिजसुरतधार्ष्ट्यस्मरणवशाद्ध्रिया नता सा स्वेदभाजि श्रमजलयुते स्वहृदयेऽनुबिम्बितं प्रियं नलं मूर्तं साकारं हृद्गतं चित्तस्थमिव वीक्ष्य निजैरतिमृदुभिर्विश्रान्तिक्रममन्दीभूतैर्नासिकानिलैः कृत्वा धुतोऽपनीतो रतश्रमो यस्यैतादृशं निर्ममे चकार । लज्जानम्रत्वान्नासाश्वासानां हृदयप्रतिबिम्बितप्रियसंबन्धाच्छ्रमापनोदनं युक्तम् । निर्ममे इवोत्प्रेक्षा वा । तादृशीं तां दृष्ट्वा स गतश्रमः सहर्षः संजातः, सापि तं तादृशं दृष्ट्वा हर्षवशान्मन्दतरान्नासाश्वासान्मुमोचेति भावः ॥

सूननायकनिदेशविभ्रमै-
रप्रतीतचरवेदनोदयम् ।
दन्तदंशमधरेधिगामुका
सास्पृशन्मृदु चेमच्चकार च ॥ १२९ ॥

सूनेति ॥ सूननायकस्य कामस्य निदेश आज्ञा तस्य विभ्रमैर्विलासैर्हेतुभिरप्रतीतचरः पूर्वं संभोगवेलायामज्ञातो वेदनोदयः पीडोद्भवो यस्मात्तं दन्तदंशमधरेऽधिगामुकाधुना पीडाकारिणं ज्ञातवती सा मृदुनिष्ठुराङ्गुलीस्पर्शं यथा तथा दन्तदष्टाधरमेवास्पृशत् । अनन्तरं च स्पर्शजपीडानुभवाच्चमच्चकार ससीत्कारमङ्गकम्पमपि चकार । आकस्मिकतयैव किमेतत्कृता जातमिति साश्चर्या चाभूत् । दन्तदंशं 'न लोका–' इति षष्ठीनिषेधः ॥

वीक्ष्य वीक्ष्य करजस्य विभ्रमं
प्रेयसार्जितमुरोजयोरियम् ।
कान्तमैक्षत हसस्पृशं किय-
त्कोपकुञ्चितविलोचनाञ्चला ॥ १३० ॥

वीक्ष्येति ॥ इयं प्रेयसा नलेन उरोजयोरुपरि बुद्धिपूर्वमर्जितं कृतं करजस्य नखस्य विभ्रमं कोपसंभ्रमवशाद्वीक्ष्य वीक्ष्य वारं वारं विलोक्य, अनन्तरमेव कियत्किञ्चित्कोपेन कुञ्चितावुन्मील्य मुकुलितौ पर्यायेण विलोचनाञ्चलौ नेत्रपल्लवौ यया एवंभूता सती स्वयंकृतत्वात्संभोगसमये तया ज्ञातत्वाच्च हसस्पृशं स्मितस्मितं कान्तमैक्षत । कोपेन वक्रमपश्यदित्यर्थः । कोपस्याप्यपराधेनोत्तमत्वं धीरत्वं च भैम्या व्यज्यते । वीक्ष्य संभ्रमे द्विरुक्तिः । हसस्पृशं 'स्पृशोऽनुदके ' इति क्विन् ॥

रोपरूषितमुखीमिव प्रियां
वीक्ष्य भीतिदरकम्पिताक्षराम् ।
तां जगाद स न वेद्मि तन्वि तं
कश्चकार तव कोपरोपणाम् ॥ १३१ ॥

रोपेति ॥ स रोपरूषितं कोपयुक्तं मुखं यस्यास्तामिव दन्तदंशादेः मुग्धकारित्वेन तत्त्वतः कोपरहितत्वेऽपि कृत्रिमकोपेन भ्रुकुटिनमुखीं प्रियां वीक्ष्य भीत्या दरमीषत्कम्पितानि सगद्गदान्यक्षराणि यस्यां क्रियायां तथा तामिति जगाद । इति किम्–हे तन्वि, अहं तं न वेद्मि, कस्त्व, कोपरोपणां चकार । 'मुहि शाद्धि तव कोपरोपिणम्' इति पाठे–कोपस्य रोपिणमाधायकम् । 'न वेद्मि' इत्यात्मनः कोपरोपित्वं गोपायति ॥

रोपकुङ्कुमविलेपनान्मना-
ङ्मन्यवाचि कृशतन्ववाचि ते ।
भूदयुक्तसमयेव रञ्जना-
माने विधुविधेयमानने ॥ १३२ ॥

रोपेति ॥ पुनरपि, हन्त किम्—ननु कृशतनु अवाचि कोपवशादभाव्यभाषणे, तथा—अवाचि नम्रीभूते, तथा—विधुनापि विधेया गुणाधिक्यवशात्कार्या मानना पूजा यस्यैवंभूते

१ 'चमत्कृता क्रियत्' इति जीवातुसम्मतः पाठः । २ 'कोपसंकुचितलोचनाञ्चलाम्' इति जीवातुसम्मतः पाठः । ३ 'भूषित' इति जीवातुसम्मतः पाठः ।

चन्द्राधिके तवानने रोषरूपेण कुङ्कुमेन विलेपनाद्धेतोर्मनागल्पीयसी इयं रञ्जना रक्तिमसंपादना मा भूत् न कार्या। यस्मादयुक्तसमयैवाप्रस्तावसमुद्भूतैव। किमपि मया नापराद्धमिति निर्हेतुकेयमनुचिता कोपरञ्जना त्यजतामित्यर्थः। अथ च-अयं संभोगसमयो रात्रिरियं, नतु कोपरञ्जनासमयः, तस्मादन्यदा कोपः कार्यः, अधुना तु त्यज्यतामित्यर्थः। अथ च—चन्द्राधिकं तव मुखम्, इदानीं रोषरूपितं सन्ध्यूनं भविष्यतीत्ययुक्तसमया रञ्जना न कार्या कोपस्त्यज्यतामित्यर्थः। अथ च—कोपकुङ्कुमविलेपनरञ्जनाऽयुक्तसमया। यतः, तस्मान्नैव कार्या। शीतकाले ह्युष्णवीर्यतया वदनप्रसाधनं कुङ्कुमविलेपनं युक्तम्, इदानीं वसन्तजेन श्रमजेनोष्मणा श्रीखण्डपाण्डिमैवाननप्रसाधनायालम्, न कुङ्कुमरञ्जनेत्यर्थः ॥

क्षिप्रमस्य तु रुजा नखादिजा-
स्तावकीरमृतसीकरं किरत्।
एतदर्थमिदमर्थितं मया
कण्ठचुम्बि मणिदाम कामदम् ॥ १३३ ॥

क्षिप्रमिति ॥ हे भैमि, कण्ठचुम्बि मम कण्ठे स्थितं, तथा—कामदमिच्छादायि, अत एव एतदर्थं त्वदीयकरजरदनक्षतजपीडापाकरणार्थं भैमीकरजादिक्षतपीडापनोदनं कुर्विति मयाऽर्थितं प्रार्थितं सदिदं चिन्तामणिरत्नानां दाम मालामृतसीकरं सुधाबिन्दुं किरत्स्रवत्सत् तावकीस्त्वदीया नखादिजा नखक्षतादिसमुद्भवा रुजाः पीडाः क्षिप्रमस्यतु। शमयत्वित्यर्थः। तस्मात्कोपं मा कार्षीरिति भावः। अर्पितमिति पाठे—पीडाशान्त्यर्थं मया त्वदीयकण्ठे क्षिप्तं सत्त्वदीयकण्ठचुम्बीति व्याख्येयम्। रुजा, भिदादित्वादङ्॥

स्वापराधमलुपत्पयोधरे
मत्करः सुरधनुष्करस्तव।
सेवया व्यजनचालनाभुवा
भूय एव चरणौ करोतु वा ॥ १३४ ॥

स्वापराधमिति ॥ हे भैमि, मत्करस्तव पयोधरे स्तने सुरधनुष्कर इन्द्रचापाख्यनखक्षतविशेषकारी सन् नखक्षतपीडाकरणजं स्वापराधं व्यजनस्य चालना तस्याः सकाशाद्भवतीति भूस्तया व्यजनवीजनसमुद्भूतया सेवयाऽलुपत्। वाऽथवा एतावत्याऽपि सेवया यदि न तुष्यति तर्हि भूय एव पुनरप्ययं करस्तव चरणौ करोतु संवाहयतु। चरणसंवाहने ह्यपराधमार्जनं भवति, तस्मात्तदयं करोत्वित्यर्थः। अथ च—चरणौ संभोगार्थमूर्ध्वीकरोत्वित्यर्थोवसेयः। अथ च—नानावर्णमुद्रिकायुक्तत्वात्वत्कुचे सुरधनुष्करः। तथा चापराधो नास्त्येव। अथ च—मेघे सुरधनुर्युक्तमेघेति पयोधरे तत्कारिणां न कोप्यपराधः। यद्यपि भवेत्। तथापि व्यजनसेवयाऽवलोपितः। चरणसंवाहनमपि करोत्वित्यर्थः। 'भूय एषः' इति पाठे—एष मत्करः। अलुपत् लृदित्वादङ्। धनुष्करः 'दिवाविभा-' इति टः, 'इसुसोः सामर्थ्ये' इति पक्षे विसर्जनीयस्य सः। करोतीति करः पचाद्यच्। सुरधनुषः कर इति षष्ठीसमासः चालना न्यन्ताद्युच्। मित्त्वस्य पाक्षिकत्वाद्वृद्धिः ॥

आननस्य मम चेदनौचिती
निर्दयं दशनदंशदायिनः।
शोध्यते सुदति वैरमस्य त-
त्किं त्वया वद विदश्य नाधरम् ॥ १३५ ॥

आननस्येति ॥ हे सुदति, ममाननस्य चेद्यद्यनौचिती। यतो-निर्दयं यथा तथा दशनदंशदायिनो दन्तक्षतदानशीलस्य। तस्मात्तस्य यद्यपराधिता तत्तर्हि अपराधकारिणोऽस्य मन्मुखस्याधरं विदश्यातितरां खण्डयित्वा त्वया किमिति तद्दन्तदशनरूपं वैरं न शोध्यते त्वं वद कथय, अपि त्वपराधिनोस्यावयवमोष्ठं दन्तैः खण्डयित्वा वैरनिर्यातनं कुरु। तथा च समः समाधिरित्यर्थः ॥

दीपलोपमफलं व्यधत्त य-
स्त्वत्पटाहृतिषु मच्छिखामणिः।
नो तदागसि परं समर्थना
सोयमस्तु पदपातुकस्तव ॥ १३६ ॥

दीपेति ॥ हे भैमि, यो मच्छिखामणिस्त्वत्पटाहृतिषु त्वदीयवसनकर्षणेषु सतीषु लज्जावशान्मुखवाद्यादिना त्वया कृतं दीपलोपं स्वकिरणैरेव तिमिरनिराकरणादफलं व्यर्थं व्यधत्त। तस्य मणेरागस्यपराधे परं केवलं करादित्वसमर्थना परिहारो नो अस्ति, तस्मादुपायान्तराभावात्सोयं मौलिमणिस्तव पदयोः पातुको वन्दारुरस्तु। उपायान्तराभावे हि नमस्कारेणाप्यपराधमार्जनं क्रियते, तस्मादयमपि नमस्कारं करोत्वित्यर्थः ॥

इत्थमुक्तिमुपहृत्य कोमलां
तल्पचुम्बिचिकुरश्चकार सः।
आत्ममौलिमणिकान्तिभङ्गिनीं
तत्पदारुणसरोजसङ्गिनीम् ॥ १३७ ॥

इत्थमिति ॥ स इत्थमुक्तप्रकारेण कोमलां सामयुक्तामुक्तिं वाचमुपहृत्योपहारीकृत्य प्रणामकरणवशात्तल्पचुम्बिनः शय्यास्पर्शिनश्चिकुराः केशा यस्य स आत्ममौलिमणिकान्तिर्निजशिखामणिद्युतिस्तद्रूपा भङ्गिनी नदी तां तत्पदे भैमीचरणौ तद्रूपे अरुणसरोजे तत्सङ्गिनीं संबद्धां चकार। प्रणनामेत्यर्थः। नद्याश्च रक्तोत्पलसंबन्धो युक्त एव। तल्पचुम्बीत्यनेन शय्यायामेव प्रणामः सूचितः। भङ्गाम्तरङ्गाः सन्त्यस्यां सेति विग्रहः ॥

तत्पदाखिलनखानुबिम्बनैः
स्वैः समेत्य समतामियाय सः।
रुद्रभूमविजिगीषया रति-
स्वामिनोपदशमूर्तितामृता ॥ १३८ ॥

तदिति ॥ कृतप्रणामः स नलः स्वैर्निजैस्तस्याः पदयोरखिलेषु दशस्वपि नखेषु जातैरनुबिम्बनैः प्रतिबिम्बैः समेत्य मिलित्वा रु-

द्रस्य भूमा बहुत्वमेकादशत्वं तस्यापि स्पर्धावशाद्विजिगीषया जेतुमिच्छयोपदशमूर्तितां धारयता रतिस्वामिना कामेन समतां साम्यमियाय मदीयः शत्रुर्यद्येकादशत्वं धारयति तर्हि मयापि तावत्संख्याकेन भवितुं युक्तमिति। एकादशत्वं यदि कामो धारयेत्, तर्हि भैमीदशनखसंजातस्वप्रतिबिम्बसंबन्धादेकादशमूर्तिधारी नलस्तेनोपमीयेतेत्यभूतोपमा। रुद्रभीर्नीति पाठे—एकादशभ्यो रुद्रेभ्यो भीतेर्विजिगीषया तदपाकरणाद्धेतोर्यद्येकादशमूर्तितां मदनो धारयेत्तर्हि स्वप्रतिबिम्बयोगादेकादशमूर्तिस्तेनोपमीयेतेत्यर्थः। प्रणामवशात्तन्नखेषु प्रतिबिम्बित इति भावः। दशानां समीपे उप दशाः 'संख्ययाऽव्यया-' इति समासः। 'बहुव्रीहौ संख्येये' इति डच्। उपदशा मूर्तयो यस्येति समासः॥

आख्यतैप कुरु कोपलोपनं
पश्य नश्यति कृशा मधोर्निशा।
एतमेव तु निशान्तरे वरं
रोपशेषमनुरोत्स्यसि क्षणम्॥ १३९॥

आख्यतेति॥ एप तामित्याख्यतावोचत्। इति किम्—हे भैमि, त्वं कोपलोपनं कुरु। मधोर्वसन्तस्य कृशा दिनापेक्षया स्वभावत एवाल्पपरिमाणा अथ च—प्रतिक्षणमपचीयमाना, निशा नश्यतीति पश्य। कोपापरित्यागे एवंप्रकारेणावशिष्टा रात्रिर्गमिष्यति, तस्मात्कोपं मुञ्च। तु पुनस्त्वमेतमेव रोपशेषं निशान्तर आगामिरात्र्यन्तरे दिनापेक्षयाऽधिकपरिमाणायां शिशिरतुरात्र्यां क्षणमात्रमनुरोत्स्यसि कामयिष्यसे वरमेतन्मनागिष्टम्। शिष्टं कोपं तदा कुर्विदानीं संभोगार्थं प्रसन्ना भव। सर्वं कोपमिदानीमेव चेत्करिष्यसि, तर्हि तदा किं करिष्यसि, तस्मादल्पं रोपं निशान्तरार्थं स्थापयेति लौकिकरीत्याऽधुना तावत्कोपं त्यजेति भैमीं प्रार्थयति स्मेत्यर्थः। आख्यत् 'चक्षिङः ख्याञ्' 'अस्तिर्वचि-' इत्यङ्, ङित्त्वात्तङ्॥

साथ नाथमनयत्कृतार्थतां
पाणिगोपितनिजाङ्घ्रिपङ्कजा।
तत्प्रणामधुतमानमाननं
स्मेरमेव सुदती वितन्वती॥ १४०॥

सेति॥ अथ प्रणामभाषणानन्तरं प्रणामं मा कार्षीरित्यादिवचनपूर्वं पाणिभ्यां गोपिते निजाङ्घ्रिपङ्कजे यया तया तस्य प्रमाणेन धुतो निरस्तो मानः कोपजमौद्धत्यं यस्यैवंभूतमाननं प्रसादात्स्मेरं सस्मितमेव वितन्वती कुर्वाणा सती सा सुदती नाथं कृतार्थतां कृतकृत्यतामनयत्प्रापयामास। तावन्मात्रेण प्रसन्नाऽभूदिति भावः॥

तौ मिथो रतिरसायनात्पुनः
संबुभुक्षुमनसौ बभूवतुः।
चक्षमे नतु तयोर्मनोरथं
दुर्जनी रजनिरल्पजीवना॥ १४१॥

ताविति॥ तौ मिथोऽन्योन्यं रतिरसस्यायनात्प्राप्तेः परस्परानुरागविवृद्धेर्हेतोः, अथ च—प्रीतिरेव रसायनं प्रशान्तसुरतेच्छायाः पुनरुज्जीवनौषधं तस्माद्धेतोः, पुनः संबुभुक्षुमनसौ सुरताभिलाषिचित्तौ च बभूवतुः। द्वितीयसुरतेच्छू जातावित्यर्थः। तु पुनः रजनिस्तयोर्मनोरथं द्वितीयसुरतवाञ्छां न चक्षमे विषेहे। यतः—दुष्टा जनिर्जन्म यस्याः। तथा—अल्पं जीवितं सत्वं यस्यास्तादृशी संजातप्रभातसमया। अथ च—अल्पायुषो जन्म दुष्टमेवेति। यद्वा—प्रभातस्यासन्नत्वाद्विरहसंभावनावशाद्वा दुष्टा व्याकुला जन्यो नवोढा यस्यां सा दुर्जनी। संभोगेच्छा तु न निवृत्ता, परं प्रभातसमयस्य जातत्वात्संभोगं न चकारेति भावः। अन्योपि सुरतविषये यद्रसायनं वीर्यवृद्ध्यर्थमौषधं सेवमानः पुनः पुनः सुरतेच्छुर्भवति। अल्पचित्ताऽन्यापि दुष्टा वधूः सपत्न्यादिस्त्रीपुरुषयोः संभोगं न क्षमते। जननं जनिः 'जनिघसिभ्यामिञ् (ण),' 'जनिवध्योश्च' इति वृद्धिर्न। 'ह्रस्वो पे-' इति दीर्घः। पक्षे—समासान्तविधेरनित्यत्वात्कप्भावः॥

स्वप्नुमाप्तशयनीययोस्तयोः
स्मेरमाख्यत वचः प्रियां प्रियः।
उत्तरोत्तरधरदानपानजैः
सान्तरायपदमन्तरान्तरा॥ १४२॥

स्वप्नुमिति॥ स्वप्नुमाप्तं शयनीयं शय्या याभ्यां तयोर्मध्ये प्रियः प्रियां प्रति स्मेरं रहसि स्थितत्वात्स्वच्छन्दं यथा तथा आख्यतावोचत्। किंभूतं वचः—परमरागधरस्य दानं खण्डनं पानं च ताभ्यां जातैरुत्सवैः परमानन्दकारणैर्निमित्तैरन्तरान्तरा मध्ये मध्ये सान्तरायाणि सविघ्नानि कियन्तं कालमनुच्चारितानि सुप्तिघ्नन्तानि पदानि यत्र तत्॥

किमुवाचेत्याह—

देवदृत्यमुपगम्य निर्दयं
धर्मभीतिकृतनादृशागसः।
अस्तु मेयमपराधमार्जना
जीवितावधि नलस्य वश्यता॥ १४३॥

देवदृत्यमिति॥ देवदृत्यमुपगम्याङ्गीकृत्य निर्दयं यथा तथा धर्मार्द्धीत्या चित्तशुद्ध्या तृत्याकरणं प्रतिश्रुतापरिपालनाद्धर्मो लुप्येतेति लुप्यमानाद्धर्मार्द्धीत्या धर्मस्यैव या भीतिर्लोपलक्षणा तया हेतुभूतया कृतं तादृशमनिर्वाच्यं भवतीदृशमप्युक्तप्रकारमागोऽपराधो येन तस्यापराधिनो नलस्य मम जीवितावधि यावज्जीवं या वश्यता भवद्ध्यानता सेयमपराधस्य मार्जना शोधयिष्यत्वु। अद्यप्रभृति यावद्दृढं जीवामि तावत्तव वश्यः किंकर एवेति प्रतिज्ञां तथ्यां मत्वा तमपराधं क्षमस्वेत्यवोचदिति भावः। मार्जनाप्यन्ताद्भावे युच्॥

स क्षणः सुमुखि यत्त्वदीक्षणं
तच्च राज्यमुरु येन रज्यसि।
तन्नलस्य सुधयाभिषेचनं
यत्त्वदङ्गपरिरम्भविभ्रमः॥ १४४॥

स इति ॥ हे सुमुखि, यत्त्वदीक्षणं स एव नलस्य क्षणो महानुत्सवः, शोभनवदनत्वादेवेत्यर्थः । अथ च यत्र महत्यपि काले भवदीक्षणं स महानपि कालः सुखरूपत्वात्क्षणतुल्यः । सुखेनातिवाहितुं शक्य इत्यर्थः । तथा—येन त्वद्विषये मदीयेन मद्विषये त्वदीयेन व्यापारेण त्वं रज्यसे प्रीता भवसि तच्च तदेव मम उरु महद्राज्यं त्वदनुरागहेतुव्यापार एव साम्राज्यम्, नतु सकलभूमण्डलाधिपत्यमित्यर्थः । तथा—यत्त्वदङ्गस्य परिरम्भविभ्रम आलिङ्गनविलासस्त्वच्छरीरेण मदङ्गे कृतो वा परिरम्भविभ्रमस्तदेव नलस्य मम सुधयाऽमृतेनाभिषेचनमभितः स्नानम् । सुधाभिषेकादपि भवदङ्गसुखकर इत्यर्थः । सर्वथा त्वमेव मम सकलपुरुषार्थसर्वस्वभूतासीत्यर्थः ॥

शर्म किं हृदि हरेः प्रियार्पणं
किं शिवार्धघटने शिवस्य वा ।
कामये तव महेषु तन्वि तं
नन्वयं सरिदुदन्वदन्वयम् ॥ १४५ ॥

शर्मेति ॥ हरेः श्रीविष्णोर्हृदि प्रियार्पणं लक्ष्म्याः स्थापनं किं नाम शर्म सुखम् । तथा—वाऽथवा शिवस्य शिवायाः पार्वत्या अर्धेन घटनं किं शर्म तदप्यल्पीयः । तर्हि किं नाम परमं सुखमित्याशङ्क्याह—ननु तन्वि भैमि, महेषु सुरतोत्सवेषु तव तमतिप्रसिद्धं सरिदुदन्वतोर्नदीसमुद्रयोरिवान्वयमभिन्नजलोपलम्भेन तादात्म्यलक्षणमयमहमयं शुभावहविधिरूपं वा संबन्धं कामये वाञ्छामि । इष्टदेवताभ्य इति शेषः । महेषूत्सवेषु मध्ये तव सरिदुदन्वदन्वयमेकं कामये नत्वन्यमिति वा । हरेर्हृदि प्रियार्पणे, शिवस्य च शिवार्धघटन आलिङ्गनादीनां पृथक्स्थितभिन्नदेहसाध्यत्वादालिङ्गनादिजन्यं सुखं तावन्नास्त्येव किंत्वेकदेशस्पर्शमात्रजन्यमेवास्ति तस्मादावयोर्यदि पृथक्त्वम्, तर्हि तदा सुरतसमये क्षीरवदेकीभावोस्तु । यद्यपृथक्त्वमिष्टम्, तर्हि नदीसमुद्रजलवत्तादात्म्यमेव भवतु, नतु हरिलक्ष्म्यादिवद्भेदोल्लेख इति भावः । नन्वहमित्यपि पाठः । 'तव मयेह–' इति पाठे—अयमहमिह भूलोके मया सह तव तं तादृशं सरिदुदन्वदन्वयं कामय इत्यर्थः ॥

धीयतां मयि दृढा ममेति धी-
र्वक्तुमेवमवकाश एव कः ।
यद्विधूय तृणवद्दिवस्पतिं
क्रीतवत्यसि दयापणेन माम् ॥ १४६ ॥

धीयतामिति ॥ हे भैमि, मयि त्वं ममेति धीर्निश्चिता बुद्धिर्धीयतां न्यस्यताम् । मयि स्वत्वबुद्धिरासंसारं त्वया क्रियतामिति वक्तुमेवाभिधातुमप्यवकाशोऽवसर एव कः, अपि तु—तात्त्विकेऽर्थे एवं वक्तुमवकाशलेशोपि नास्ति यतस्माद्धेतोर्दिवस्पतिमिन्द्रं तृणवत्तृणेन तुल्यं वर्तते तृणवदेव यथा तथा तृणमिव परित्यज्य दयारूपेण पणेन मूल्येन मां क्रीतवत्यसि । उदासीने हि ममत्वबुद्धिः कार्येत्यारोपः प्रार्थ्यते । विक्रीय मूल्येन गृहीते वस्तुनि तु स्वत्वं न्याय्यमस्त्येवेति तदारोपो न प्रार्थ्यत इत्यर्थः । यदि मयि स्वत्वं नाभविष्यत्तर्हि इन्द्रं परित्यज्य मां नावरिष्यः । वृतवत्यसि तावत्, तस्मादेवमपि मया याचितुमयुक्तमेवेति तव किंकरोस्मीति भावः । दिवस्पतिं, दयापणेनेत्येताभ्यामिन्द्रापेक्षया त्वदपेक्षया चाहमतितरां गुणवानिति वृत इति न, किंतु मद्वरणे तव कृपैव हेतुः, सा यावज्जीवं कार्येत्यर्थः ॥

शृण्वता निभृतमालिभिर्भव-
द्वाग्विलासमसकृन्मया किल ।
मोघराघवविवर्ज्यजानकी-
श्राविणी भयचलासि वीक्षिता ॥ १४७ ॥

शृण्वतेति ॥ किल कदाचित्समये आलिभिः सह असकृद्भवत्या वाग्विलासं कथासंवादं निभृतं पश्चादागत्याज्ञातं यथातथा वरदानाददृश्यत्वेन वा गुप्तं यथातथा शृण्वता, निभृतं रहसि स्थितत्वान्मच्छ्रावणशङ्काभावात्स्पष्टं स्वच्छन्दं सखीभिः सह भवत्संवादं किल शनैः पश्चादागमनादङ्गुष्ठिकरणादिना कपटेन शृण्वता सता वा, मया त्वं वीक्षिता एवंभूतां दृष्टाऽसि । किंभूता—मोघं वृथा परीक्ष्याप्यकारणं श्रीराघवेण विवर्ज्यां त्यक्तां स्वस्मिन्नेवानुरक्तामपि जानकीं शृणोतीति तच्छीला, सीतेव भयेन स्वत्यागशङ्काभीत्या चला व्याकुला । (तस्मात्किंकरभूते मयन्यथा धीर्न कार्येति भावः ।) यद्वा यस्माद्भीता दृष्टासि, तस्मादवश्यं मयि तवानुरागोस्तीति निश्चित्य 'धीयतां मयि–' इति वक्तुमयुक्तमिति भावः । राघवः गोत्रापत्ये बिदादेराकृतिगणत्वादञ् । बहुत्वे तु 'यञञोश्च' इत्यञो लुक् । तेन 'रघूणामन्वयं वक्ष्ये' इति साधुः ॥

छुप्तपत्रविनिमीलितात्क्षुपा-
त्कच्छपस्य धृतचापलात्पलात् ।
त्वत्सखीषु सरटाच्छिरोधुतः
स्वं भियोऽभिदधतीषु वैभवम् ॥ १४८ ॥
त्वं मदीयविरहान्मया निजां
भीतिमीरितवती रहः श्रुता ।
नोज्झितास्मि भवतीं तदित्ययं
व्याहरद्वरमसत्यकातरः ॥ १४९ ॥

छुप्तेति ॥ त्वमिति ॥ युग्मम् । अयं नलस्त्वां प्रतीति वरमभीष्टं व्याहरदुवाच । अभयदानं प्रादात् । इति किम्—हे भैमि, कदाचित्सखीसमूहेन सह गोष्ठ्यां प्रसृतायां प्रसङ्गात्का कस्माद्बिभेति, का कस्मादिति तथ्यं कथ्यतामित्यन्योन्यं भयहेतुप्रश्ने कृते छुप्तानि स्पृष्टानि पद्मानि यस्यैवंभूतोऽङ्गुल्यादिना स्पृष्टमात्रः सम्विशेषेण निमीलितः संचितः तस्मात्क्षुपालुजालुसंज्ञकादोषधिविशेषात्सकाशादहं सुतरां बिभेमीति कयाचिदुक्तम्, धृतं चापलं (ये) न स्वभावत एव चलतः कच्छपस्य पलान्मांसादहमित्यन्यया कथितम्, अनिशं शिरोधुतो मूर्धानं कम्पयतः प्रतिक्षणमन्यवर्णात्सरटात्कृकलासात्सकाशादहमित्यपरया, इत्येवं त्वत्सखीषु स्वं निजं भियो भयस्य वैभवं हेतुमभिदधतीषु भाषमाणासु सतीषु कयाचिदस्माभिर्निजभयहेतुरुक्तस्त्वयापि कथ्यतामिति त्वां प्रत्युक्ते सति नलवियोगाद्धेतोरहं बिभेमि क्षणमात्रमपि तेन न भाव्य-

१ अयं पाठः पूर्वश्लोकव्याख्यान्तर्गतः प्रतिभाति ।

मिति तस्मादेव बिभेमि नत्वन्यस्मादिति मदीयविरहाब्धिजां भीतिं रहसि ईरितवती त्वं मया श्रुतासि यस्मात् तस्मान्मा भैषीरहं भवतीं कदाचिदपि नोज्झितास्मीति । यतः—असत्ये नारीप्रलोभनवचनविषये कातरो भीरुः । भाविनस्त्यागस्य दैवाधीनत्वान्नासत्यवादित्वमिति भावः । यद्वा—असतीष्वकातरः, सतीषु विषये भीरुरेव । तन्नयनिराकरणार्थमेवमवददित्यर्थः । छुप्तेति 'छुप स्पर्शे' इति तौदादिकादनिटो निष्ठा । शिरोधुत इति क्रियन्तम् ॥

संगमय्य विरहेऽस्मि जीविका
यैव वामथ रताय तत्क्षणम् ।
हन्त दत्थ इति रुष्टयावयो-
र्निद्रयाऽद्य किमु नोपसद्यते ॥ १५० ॥

संगेति ॥ हे भैमि, इत्यतो हेतो रुष्टया कुपितयेव निद्रयाऽद्यास्यां रात्रावावयोर्नोपसद्यते आसङ्गया न भूयते किमिति वितर्के । इति किम्—हे भैमीनलौ, यैवाहं निद्रा विरहे विवाहात्पूर्वं वियोगसमये वां युवां स्वप्नदर्शनादिवशात्संगमय्य संयोगं प्रापय्य युवयोर्जीविकास्मि प्राणधारणहेतुरभूवमित्यर्थः । तत्क्षणं तस्या मम संबन्धिनं क्षणं रात्रिलक्षणं समयमवसरं वा अथ विवाहानन्तरं स्वकार्यार्थं रताय युवां दत्थः । रात्रिलक्षणे मदीयसमय एव सुरतस्य क्रियमाणत्वात् । हन्त कष्टमनुचितम् । कृतमुपकारं न स्मरथ इत्यर्थः । आपदि कृतोपकारा हि तदीयेऽवसरेऽन्यस्मै दत्ते सति कोपात्स्वामिसमीपं नागच्छन्तीत्यापदि कृतोपकारायां मम रात्रिरूपोऽवसरः सुरताय दत्तो युवाभ्याम्, मह्यं तु मदीयवासरस्य लेशोऽपि न दत्तः, प्रभातपर्यन्तं सुरतस्यैव करणादिति कोपवशादिवावयोर्निद्रा नायातीति नलस्तामवोचदित्यर्थः । आप्रभातं ताभ्यां कामकेलयः कृता इति भावः । न क्षणमिति पाठे—यैव जीविका तस्या मम रताय प्रीतये क्षणमल्पमपि समयं न दत्थ इति रुष्टयेति व्याख्येयम् । संगमय्य 'ल्यपि लघुपूर्वात्' इति णेरयादेशः । जीविका कर्तरि ण्वुल् । वां षष्ठीद्वितीयाद्विवचने वामादेशः ॥

ईदृशं निगदति प्रिये दृशं
संमदात्कियदियं न्यमीलयत् ।
प्रातरालपति कोकिले कलं
जागरादिव निशः कुमुद्वती ॥ १५१ ॥

ईदृशमिति ॥ इयं प्रिये ईदृशमेवंप्रकारमन्यदपि निगदति सत्येव संमदाद्धर्षात् । सुरतानन्दजश्रमादिति यावत् । तस्माद्धेतोरीदृशं नेत्रे कियत्किञ्चिन्न्यमीलयन्निमीलितवती । श्रमसंजातया निद्रया प्रयोजिकयेति शेषः । निद्रावित्यर्थः । श्रान्तो हि निद्राति । संमदादेवं गदति सतीति वा । दृशं न्यमीलयत् । संमदादिव प्रियोक्तिश्रवणसंजातहर्षवशादिवेत्यर्थः । आनन्दातिशयसुखमनुभवन् हि निमीलितदृग्भवतीति प्रतीयमानोत्प्रेक्षा वा । कियदित्यनेन दृशोऽर्धनिमीलनस्य सूचितत्वाद्बन्यतमत्वमस्याः सूचितम् । केव—प्रातः कोकिले कलं मधुरास्फुटध्वनिं श्रोत्रसुखमालपति सति कुमुदिनीव । कुमुदिनी यथा निमीलितोत्पला भवति तथेयमपि । कस्मादिव—निशो रात्रिसंबन्धिनो जागरादिव । रात्रावनिद्रो हि प्रातरीशं घूर्णनेन निमीलयति । कुमुदिन्यपि रात्रावनिद्रावशादिव प्रातर्निमीलयति, तस्मादियमपि । प्रतीयमानोत्प्रेक्षा । न्यमीमिलदिति पाठे—णौ चङि 'भ्राजभास-' इति पाक्षिक उपधाह्रस्वः । जागराभावे घञि 'जाग्रोऽविचिण्णल्ङित्सु' इति वृद्ध्यभावो गुणः ॥

मिश्रितोरु मिलिताधरं मिथः
स्वप्नवीक्षितपरस्परक्रियम् ।
तौ ततोऽनु परिरम्भसंपुटैः
पीडनां विदधतौ निदद्रतुः ॥ १५२ ॥

मिश्रितेति ॥ ततोऽनु तादृक्प्रियभाषणमद्य एव भैमीसंभोगरसानन्तरं परिरम्भरूपे संपुटे । संश्लेषपेटिकायामिति यावत् । तत्र पुनरपि पीडनां गाढालिङ्गनां विदधतौ कुर्वाणौ तौ मिश्रिते परस्परान्तरालघटिते ऊरू यस्यां क्रियायां तद्यथातथा, मिथः पानवशादन्योन्यमिलितावधरौ यस्यां क्रियायां तद्यथातथा, स्वप्ने वीक्षिता परस्परक्रियाऽन्योन्यचुम्बनादिव्यापारो यस्यां क्रियायां तद्यथातथा निदद्रतुः । क्षीरनीरालिङ्गनं कृत्वा निद्रितावित्यर्थः । पीडनां ण्यन्तत्वाद्युच् ॥

तद्यातायातरंहच्छलकलितरतश्रान्तिनिश्वासधारा-
जस्रव्यामिश्रभावस्फुटकथितमिथःप्राणभेदव्युदासम्
बालावक्षोजपद्माङ्कुरकरिमकरीं मुद्रितोर्वीन्द्रवक्ष-
श्चिह्नाख्यातैकभावोभयहृदयमयाद्बन्धुमानन्दनिद्राम् ॥

तदिति ॥ तद्बन्धुं स्त्रीपुंसमिथुनमानन्दन संभोगसुखभरेण निद्रामयाप्राप । किंभूतम्—निद्रासंबन्धिश्वासानां यातायातयोर्निर्गमप्रवेशयोः संबन्धिनो रंहसो वेगस्य छलेन व्याजेन कलिताऽङ्गीकृता या रतश्रान्तिनिश्वासधाराः सुरतश्रमसंजातनिश्वासपरम्पराम्नामान्योन्यभजस्रमनवरतं सुतरां यो व्यामिश्रभावः निद्रावशभैमीनामानिर्गतश्वासपरम्परासु निद्रावशनलनामानिर्गतनिश्वासपरम्पराः प्रविष्टाः, एवं वैपरीत्येनापि ज्ञातव्यम् । भैमीनिश्वासधारा निर्गत्य नलनिश्वासधारया सह मिलित्वा नलनासिकां प्रविशति, अत्रापि वैपरीत्यं ज्ञातव्यम् । इति मिश्रीभावार्थमिव यातायाते । तथा च—जले जलप्रवेशवदन्योन्यस्य निश्वासपरम्पराणामतितरामभेदोपलम्भ इति यावत् । तेन कर्तृभूतेन स्फुटं स्पष्टं कथितः मिथोऽन्योन्यस्य प्राणानां भेदव्युदासो भेदनाशः प्राणैक्यं यस्य तथा—बालाया वक्षोजौ स्तनौ तत्र पद्माङ्कुराः पद्मवल्लीभूताः, तत्पद्मवल्लीषु वर्तमानाः करिमकर्यः कस्तूर्यादिरचिता हस्तिमकर्यस्ताभिर्मुद्रितं चिह्नितं निद्रासमयकृतगाढालिङ्गनवशात्संलग्नप्रतिरूपकं कृतमुर्वीन्द्रवक्षस्तद्रूपं चिह्नं तेनाख्यातोऽतितरां स्पष्टं कथित एकभाव एकत्वमभेदो यस्यैवंभूतमुभयोर्भैमीनलयोर्हृदयं वक्षस्थलम्, अथ च—चित्तं यत्र । यातेत्यादि, बालेत्यादि च द्वयं क्रियाविशेषणत्वेन वा योज्यम् । आप्तैक्यं शरीरैक्यं च क्रमेण वर्णितमिति ज्ञेयम् । उभयोरपि मिश्रितश्वासत्वादेकप्राणशब्दश्लेषादुत्प्रेक्षितम् ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।

यातोऽस्मिञ्शिवशक्तिसिद्धिभगिनीसौभ्रात्रभव्ये महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गोयमष्टादशः॥१८

श्रीहर्षमिति ॥ शिवस्य शक्तेश्च सिद्धिर्यत्र (शिवशक्तिसाधनं यत्र कृतं) स शिवशक्तिसाधननामा ग्रन्थः । शिवभक्तीतिपाठे—शिवस्य भक्तेः सिद्धिर्यत्र शिवभक्तिप्रतिपादको ग्रन्थविशेषः । तस्य (सैव) भगिनी एककर्तृकत्वात्, तस्यां सौभ्रात्रेण शोभनभ्रातृभावेन भव्ये प्रशस्ते तत्तुल्यसरसशब्दार्थन्यासे नलीयचरितेऽष्टादशानां पूरणः सर्गः समाप्तः । शिवशक्तिसिद्धिरपि मया कृतेति सूचितम् । सौभ्रात्रमिति भावे युवादित्वादण् । अष्टादशः 'तस्य पूरणे डट्' ॥

इति श्रीबेदरकरोपनामकश्रीनरसिंहपण्डितात्मजनारायण-
विरचिते नैषधीयप्रकाशेऽष्टादशः सर्गः समाप्तः ॥

एकोनविंशः सर्गः ।

निशि दशमितामालिङ्गन्त्यां विबोधविधित्सुभि-
र्निषधवसुधामीनाङ्कस्य प्रियाङ्कमुपेयुषः ।
श्रुतिमधुपदस्रग्वैदग्धीविभावितभाविक-
स्फुटरसभृशाभ्यक्ता वैतालिकैर्जगिरे गिरः ॥ १ ॥

निशीति ॥ सर्गसंगतिः स्पष्टा । वैतालिकैर्बन्दिभिर्गिरो जगिरे । किंभूतैः—निशि रात्रौ 'बाल्यं वृद्धिर्वपुः पुष्टिः प्रज्ञोत्साहौ बलं महः । दशकेन निवर्तन्ते मनः पञ्चेन्द्रियाणि च' इति वचनाद्दशदशकस्य शतायुषः पुरुषस्यावसानोपलक्षकोऽवस्थाविशेषो दशमः स विद्यते येषां दशमिनो वृद्धास्तेषां भावो दशमिता तामालिङ्गन्त्यामवसानं प्राप्तायां संजातप्रायप्रभातायां सत्यां प्रियाङ्कं भैमीसमीपमुपेयुषः प्राप्तवतस्तया सह निद्रितस्य निषधदेशवसुधायां मीनाङ्कस्य कामस्य नलस्य विबोधं जागरां विधित्सुभिः कर्तुमिच्छुभिः । कीदृश्यो गिरः—श्रोतॄणां श्रुत्योः श्रवणयोर्मधु अमृतरूपाऽतिमधुरा पदस्रक् सुप्तिङन्तपदमाला तस्या वैदग्ध्या वक्रोक्त्यादिरचनाचातुर्येण विभाविता ध्वनिवृत्त्या व्यञ्जनाव्यापारेण प्रकाशिता भाविका रत्यादिस्थायिव्यभिचारिसहचारिरूपैर्भावैर्युक्ता । ज्ञापिता इति यावत् । तादृशाः स्फुटाः प्रसन्नतरत्वेन बालिशैरपि प्रतीता ये रसाः शृङ्गारादयस्तैर्भृशं नितरामभ्यक्ताः सर्वतः सिक्ताः । एकमपि पदं नीरसं यासु नास्त्यतिरसिकाः नलप्रबोधार्थं मागधैर्मधुरं प्रातर्वर्णनमारब्धमित्यर्थः । रत्यादयः स्थायिभावाः, निर्वेदादयस्त्रयस्त्रिंशद्भावाः । 'वैतालिका बोधकराः' इत्यमरः । दशमोऽवस्थाविशेषो विद्यते यस्यासौ दशमी वृद्धः । अत इनिः । योगरूढोयं शब्दः । दशमिन्या वृद्धाया भावो दशमितेति वा । विशिष्टस्तालो वितालः स शिल्पं येषां वैतालिकाः 'शिल्पम्' इति ठक् । सौखशायिका इत्यर्थः । तदुक्तम्—'वैतालिकास्तु कथ्यन्ते कविभिः सौखशायिकाः । राज्ञः प्रबोधसमये घण्टाशिल्पास्तु घाण्टिकाः ।' जगिरे 'गै शब्दे' कर्मणि तङ् । अस्मिन्सर्गे 'ब्रूमः–'(१९-५६)इति यावद्धरिणीछन्दः ॥

जय जय महाराज प्राभातिकीं सुषमामिमां
सफलयतमां दानादक्ष्णोर्दरालसपक्ष्मणी ।
प्रथमशकुनं शय्योत्थायं तवास्तु विदर्भजा
प्रियजनमुखाम्भोजात्तुङ्गं यदङ्ग न मङ्गलम् ॥२॥

जयेति ॥ भो महाराज, त्वं जय जय सर्वोत्कर्षेण वर्तस्व । त्वमिमां प्रत्यक्षदृश्यां प्राभातिकीं प्रातःकालसंध्यादिजनितां सुषमां परमां शोभां दरमीषदलसे तत्कालमेव निद्रात्यागादीषद्घूर्णनयुते अधोन्मिषिते पक्ष्मणी ययोरक्ष्णोर्नेत्रयोर्दानाद्विषयीकरणाद्धेतोः सफलयतमामतितरां सफलां कुरु । त्वत्कृतदर्शनेनेयं धन्या भविष्यति तस्माच्छीघ्रमुद्बुध्यस्वेति भावः । विदर्भजा शय्योत्थायं शय्यायाः सकाशादुत्थाय तव प्रथमं पूर्वं प्रातःकालभवं च शकुनं शुभसूचकं वस्त्वस्तु । तत्स्थाने भैम्येव भूयादुत्थितः सन् प्रथमोत्थितभैमीमुखमेव प्रथमं पश्येत्यर्थः । यद्यस्मात्—हे अङ्ग स्वामिन् प्रियाजनस्य मुखाम्भोजादन्यत्तुङ्गमुत्कृष्टं मङ्गलं शुभावहं वस्तु नास्ति । प्रातरुत्थाय प्रथमं प्रियजनमुखं कर्तव्यमिति लौकिकी स्थितिः । त्वत्तः पूर्वं भैम्युत्तिष्ठत्विति भावः । दरालसपक्ष्मत्वं तत्कालमुद्बुद्धस्य जातिः । 'पश्चाच्छयनं पूर्वमुत्थानम्' इति स्मृतिः, उत्तमकुलस्त्रीजातिश्च । जय जयेति वीप्सायां द्विरुक्तिः । प्रभाते भवेति 'कालाट्ठञ्' । सफलयतमाम् 'तत्करोति–' इति ण्यन्तालोटि तमपि 'किमेत्तिङ–' इत्यामुः शय्योत्थायम् 'अपादाने परीप्सायाम् इति णमुल् । परीप्सा त्वरा । 'तृतीयाप्रभृतीनि–' इति समासः ॥

वरुणगृहिणीमाशामासादयन्तममुं रुची-
निचयसिचयांशांशभ्रंशक्रमेण निरंशुकम् ।
तुहिनमहसं पश्यन्तीव प्रसादमिपादसौ
निजमुखमितः स्मेरं धत्ते हरेर्महिषी हरित् ॥३॥

वरुणेति ॥ हे राजन्, हरेरिन्द्रस्य महिषी राज्ञी असौ प्राची हरिदिक् इतः प्राग्भागेऽह्नः प्रारम्भभाग एव निजमुखं तिमिरत्यागे प्रसादमिषान्नैर्मल्यव्याजात्स्मेरं सहासं धत्ते बिभर्ति । उत्प्रेक्षते—कथंभूतेव—वरुणस्य गृहिणीं भार्यां प्रतीचीमाशामासादयन्तमभिगच्छन्तम् । अत एव—रुचीनिचयस्य कान्तिसमूहरूपस्य सिचयस्य वस्त्रस्यांशा भागास्तेषामप्यंशेन लेशेन भ्रंशस्तस्य क्रमेणैककभागापगमक्रमेण निर्गता अंशवो यस्य तं निरंशुकम्, अथ च—विवस्वन्तमुं तुहिनमहसं पश्यन्तीव । मय्यनुरक्तस्वभ्युदयभागभूत् इदानीमन्यस्यामनुरक्त इमां दशामापन्नोयमितीव हसतीत्यर्थः । अन्यापि नार्यनुरागातिविह्वलं गलद्वस्त्रं परस्त्रीं सेवमानं विटं दृष्ट्वा मुखं स्मेरं करोति । प्राच्यामरुणोदयोऽभूत्, प्रतीच्यां त्वरुणकिरणप्रसरणवशाच्चन्द्रो निष्प्रभोऽस्तं जिगमिषुरस्ति, तस्माच्छीघ्रं बुध्यस्वेति । अंशेन भ्रंशः 'तृतीया–' इति योगविभागात्समासः, ततः पूर्वेण षष्ठीसमासः । इतः सप्तम्यर्थे तसिः । एवंभूतं चन्द्रं पश्यती

१ 'अर्थान्तरन्यासः' इति जीवातुः ।

इतोऽस्माद्धेतोरिवेति । इतो दृश्यमानादस्मात्प्रसादमिषादिति वा संबन्धे पञ्चम्येव ॥

अमहतितरास्तादृक्तारा न लोचनगोचरा-
स्तरणिकिरणा द्यामञ्चन्ति क्रमादपरस्पराः ।
कथयति परिश्रान्तिं रात्रीतमस्सहयुध्वना-
मयमपि दरिद्राणप्राणस्तमीदयितस्त्विषाम् ॥४॥

अमहतीति ॥ भो राजन्, अमहतितराः स्वरूपेणैव सूक्ष्मतरा ध्रुवारुन्धत्यादयस्तारा इदानीं तादृक् पूर्ववल्लोचनगोचरा न भवन्ति । स्वरूपेण सूक्ष्मत्वात्पूर्वमपि चक्षुष्मतामपि महता यत्नेन या दृश्यन्ते ता इदानीं सर्वथा न दृश्यन्त एवेत्यर्थः । तादृश्यो बहुसंख्याः पूर्वं प्रकाशमानाश्च यास्तारकाः स्वात्यार्द्रादयस्ताः संप्रति सुतरामल्पाः सूक्ष्माश्च सत्यो नेत्रगोचरा न भवन्तीति वा । यस्मात्तरणेः सूर्यस्य किरणा अपरस्परा अहमहमिकया सततमविच्छेदेन प्रवृत्ताः सन्तः क्रमाद्द्यां गगनमञ्चन्ति गाहन्ते । सूर्यकरस्पर्शान्निष्प्रभत्वात्तारा न दृश्यन्त इत्यर्थः । तथा—दरिद्राणाः क्षीणाः प्राणा असवो यस्यैवंभूतोऽस्तं जिगमिषुरयं तमीदयितो निशानाथश्चन्द्रोऽपि रात्रीतमसा सहयुध्वनां संग्रामं कुर्वतीनां निजत्विषाम् परिश्रान्तिं सामस्त्येन म्लानिं रणपातं च कथयति । न केवलं त्विष एव दरिद्राणप्राणाः किंतु चन्द्रोऽपीत्यपिशब्दार्थः । अतिशयेन महत्यो महतितराः 'घरूप–' इति ह्रस्वः, ततो नञ्समासः । गोचरः पुमान् । अपरे च परे च 'अपरस्पराः क्रियासातत्ये' इति सुट् । द्यां सततमविच्छेदेनाञ्चतीत्यर्थः । सहयुध्वनां 'सहे च' इति युधेः क्वनिपि 'वनो र च' इति प्राप्तौ ङीब्रौ 'वनो न हशः' इति निषेधान्न भवतः । दरिद्राणेति 'दरिद्रातेरार्धधातुके—' इत्यादिना प्राप्तोऽप्यालोपो 'न दरिद्रायके लोपो दरिद्राणे च नेष्यते' इत्यादिनिषेधान्न भवति ॥

स्फुरति तिमिरस्तोमः पङ्कप्रपञ्च इवोच्चकैः
पुरुसितगरुच्चञ्चच्चञ्चूपुटस्फुटचुम्बितः ।
अपि मधुकरी कालिंमन्या विराजति धूमल-
च्छविरिव रवेर्लाक्षालक्ष्मीं करैरतिपातुकैः ॥५॥

स्फुरतीति ॥ हे राजन्, तिमिरस्य स्तोमः समूहः लाक्षालक्ष्मीमतिपातुकैरतिक्रामद्भिस्ततोऽप्यधिकं रक्ततरैः रवेः करैः कृत्वा पुरूणां बहूनां सितगरुतां श्वेतपक्षाणां चञ्चद्भिश्चपलैः, अरुणिम्ना विलसद्भिर्वा चञ्चुपुटैः स्फुटं यथा तथा चुम्बितः स्पृष्टः पङ्कस्य प्रपञ्चः समूह इवोच्चकैरतितरां स्फुरति शोभते । तिमिरस्तोमोऽन्तराप्रविष्टसूर्यकिरणस्पर्शाद्विसखननार्थं पङ्कप्रविष्टहंसारुणचपलचञ्चूपुटशबलपङ्कवच्छोभतेतरामित्यर्थः । तथा—आत्मानं कालीं मन्यते कालिंमन्या अतिकृष्णा भ्रमर्यप्यरुणतरैः सूर्यकिरणैर्धूमलच्छविरिव च कृष्णारुणकान्तिरिव शोभतेतराम् । सूर्यकराः प्रसृताः, तिमिरं चाल्पीभूतमिति भावः । 'धूमलौ कृष्णलोहिते' इत्यमरः । उच्चकैरव्ययत्वादकच् । मधुकरी जातिवाचित्वान्ङीप् । कालिंमन्या 'आत्ममाने खश् च' इति खश्, दिवादित्वाच्छ्यन्, 'खित्यनव्ययस्य' इति ह्रस्वः 'अरुर्द्विषद्–' इति मुम् । लाक्षालक्ष्मीं 'न लोका–' इति षष्ठीनिषेधः ॥

रजनिवमथुप्रालेयाम्भःकणक्रमसंभृतैः
कुशकिसलयस्याच्छैरग्रेशयैरुदबिन्दुभिः ।
सुषिरकुशलेनायःसूचीशिखाङ्कुरसंकरं
किमपि गमितान्यन्तर्मुक्ताफलान्यवमेनिरे ॥६॥

रजनीति ॥ रजन्याः वमथुवत्करिणीवदननिर्गतजलवत्प्रालेयाम्भसो हिमजलस्य कणा लेशास्तेषां गलनक्रमेण संभृतैः संचितैः कुशकिसलयस्याग्रेशयैरग्रस्थितैः सूचीतीक्ष्णाग्रभागे स्थितैरच्छैर्निर्मलतरैरुदबिन्दुभिर्हिमजलकणैः कर्तृभिर्मुक्ताफलान्यवमेनिरेऽवगणितानि । मौक्तिकतुल्यैर्जातमित्यर्थः । किंभूतानि मुक्ताफलानि—सुषिरे विवरकरणे कुशलेन मणिकारेण मध्ये किमपि लोकोत्तरं, स्तोकं वा, अयःसूच्या लोहसूच्या वेधनशलाकायाः शिखैव सूक्ष्मत्वादङ्कुरस्तेन संकरं संयोगं गमितानि प्रापितान्यर्धविद्धानि । 'वमथुः करिशीकरः' इत्यमरः । 'ट्वितोऽथुच्' । अग्रेशयैः 'अधिकरणे शेतेः' इत्यजन्ते शयशब्दे 'शयवास—' इति सप्तम्या अलुक् । सूची 'कृदिकारात्—' ङीप् । संकरं 'ऋदोरप्' ॥

रविरुचिऋचामोंकारेषु स्फुटामलबिन्दुतां
गमयितुममूरुच्चीयन्ते विहायसि तारकाः ।
स्वरविरचनायासामुच्चैरुदात्ततया हृताः
शिशिरमहसो बिम्बादस्मादसंशयमंशवः ॥७॥

रवीति ॥ रवेः पौर्वाह्णिक्यो रुचय एव ऋचस्तासां [प्रातःकाले रविकिरणानामृग्रूपत्वात् । 'ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदे तिष्ठति मध्येऽह्नः' इत्यादिश्रुतेः] ऋग्वेदवाक्यानामोंकारेषु प्रारम्भप्रणवेषु, अथ च—लक्षणया प्रारम्भेषूदयसमयेषु स्फुटां प्रकटाममलां स्वरोच्चारणादिदोषरहितां बिन्दुतामनुस्वाररूपां गमयितुममूर्विहायसि स्थितास्तारकाः केनाप्युच्चीयन्तेऽवचयेन संगृह्यन्त एव । वृत्तामलत्वाद्योग्यत्वाच्च ऋक्प्रणवबिन्दुनिर्माणार्थमेता गृह्यन्त इव ततो न दृश्यन्त इत्यर्थः । प्रत्यृचमोंकारसद्भावात्तद्बाहुल्यात्ताराबिन्दूनामपि बहुत्वम् । अथ च—उद् ऊर्ध्वं चीयन्ते, नीयन्त इति यावत् । सूर्यप्रभोदय एव तारका नश्यन्तीति भावः । तथा—अस्तमयोन्मुखादस्माच्छिशिरमहसश्चन्द्रस्य बिम्बात्सकाशादंशवोऽप्यासामृचामुच्चैर्नितरामुदूर्ध्वमात्ततया गृहीततया 'अथ च—लक्षणावशाद्विशालतयोपरिस्थिततया वा, अथ च—'उच्चैरुदात्तः' इत्युदात्तलक्षणयोगादुच्चैरुदात्तत्वेन योग्यत्वादुदात्तस्वरस्य विरचनाय निर्माणाय असंशयं निश्चितं केनापि हृता इव । उदात्तस्य शिरस्युपलभ्यमानत्वव्यञ्जिकोर्ध्वा रेखा लिख्यते । यजुर्वेदे चरकशाखायामुपनिषदि 'उच्चैरुदात्तः (नीचैरनुदात्तः), 'समाहारः स्वरितः' इति लक्षणं द्रष्टव्यम् । चन्द्रकिर-

१ 'अत्र मिषशब्देन प्रसादरूपापह्नवेन पराङ्गनासंगतपुरुषदर्शनजन्मस्मितत्वोत्प्रेक्षणात्सापह्नवोत्प्रेक्षा' इति जीवातुः । २ 'समुच्चयोलंकारः' इति जीवातुः ।

१ 'अत्र काल्या भृङ्ग्या रविकरैर्लौहित्याजीविकारात्तद्गतेन तदुत्थापिता धूमलत्वोत्प्रेक्षेति संकरः' इति जीवातुः । २ 'अत्र दर्भाग्रबिन्दूनां सूच्यग्रलग्नमुक्ताफलैरुपमा, प्रालेयाम्भःकणेषु वमथुत्वरूपणाद्रजनेः करिणीत्वरूपणसिद्धिरेकदेशावर्तक इत्यनयोरङ्गाङ्गिभावात्संसृष्टिः' इति जीवातुः ।

णानामप्यस्तमये उपरिगामित्वात्सूक्ष्मोपरितनरेखातुल्यत्वादेवमुत्प्रेक्षितम्। सूर्यप्रभोद्गमक्रमेण चन्द्रकिरणा अपि कृशीभूता इति भावः। वृता इति पाठे—स्वीकृताः। असंशयमुभयत्रापि योज्यम्। रुचिरुचाम् 'ऋत्यकः' इतिप्रकृतिभावः॥

व्रजति कुमुदे दृष्ट्वा मोहं दृशोरपिधायके
भवति च नले दूरं तारापतौ च हतौजसि।
लघु रघुपतेर्जायां मायामयीमिव रावणि-
स्तिमिरचिकुरग्राहं रात्रिं हिनस्ति गभस्तिराट् ८

व्रजतीति॥ गभस्तिराट् सूर्यः तिमिरमेव चिकुरास्तिमिरतुल्याः केशास्तेषु गृहीत्वेति ग्राहं रात्रिं हिनस्ति लघु शीघ्रं विनाशयति। कः कामिव—रावणिरिन्द्रजिन्मायामयीं मायानिर्मितां रघुपतेर्जायां सीतामिव। कस्मिन्सति—वाक्यार्थस्य कर्मत्वात्तदीयं रात्रिहिंसनरूपं कर्म दृष्ट्वा कुमुदे करवे मोहं संकोचं व्रजति सति। अथ च—सीताहिंसनरूपं कर्म दृष्ट्वा कुमुदाख्ये वानरे मूर्च्छां गच्छति। तथा—नले च भवति त्वयि दृष्ट्वा सूर्योदयसमये ज्ञात्वा दृशोरपिधायके उन्मीलितनेत्रे सति। यद्वा—नले त्वयि नेत्रयोराच्छादके भवति सति। अथ च—नले वानरसेनापतौ दारुणं तदीयं कर्म दृष्ट्वा किमपि कर्तुमशक्यत्वाद्दुःखवशाद्वा तारापतौ च सुग्रीवे दृशोरपिधायके हतौजसि च निस्तेजस्के म्लानवदने च सति। रात्रिर्गता, रविरुदितः, कुमुदं च निमीलितम्, कमलं चोन्मीलितम्, चन्द्रश्च निष्प्रभो जात इत्यर्थः। मायामय्याः सीताया वध इन्द्रजिता कृत इति रामायणे। मायामयीं प्राचुर्ये मयटि ङीप्। रावणिः, अपत्यार्थे बाह्वादित्वादिञ्। चिकुरग्राहं सप्तम्यन्त उपपदे 'समासत्तौ' इति ग्रहेर्णमुल्। गभस्तिभी राजते गभस्तिराट् 'सत्सूद्विष-' इति क्विप्॥

त्रिदशमिथुनक्रीडातल्पे विहायसि गाहते
निधुवनधुतस्रग्भागश्रीभरं ग्रहसंग्रहः।
मृदुतरकराकारैस्तूलोत्करैरुदरंभरिः
परिहरति नाखण्डो गण्डोपधानविधां विधुः ९

त्रिदशेति॥ ग्रहसंग्रहः शुक्रादिस्थूलतारासमूहः त्रिदशा देवास्तेषां मिथुनं तस्य क्रीडासंबन्धिनि तल्पे मञ्चरूपे विहायसि गगने निधुवनं सुरतसंमर्दनेन धुता विकीर्णाः स्रजः पुष्पमालास्तासां भाग एकदेशस्तस्य श्रीभरं शोभातिशयं गाहते। तथा—विधुरखण्डः पूर्णो वृत्तश्चन्द्रो गण्डोपधानविधां कपोलतलाधः स्थाप्यमानवृत्तं शुभ्रतरोच्छीर्षकप्रकारं न परिहरति न त्यजति, अङ्गीकरोत्येव, तद्वच्छोभत इत्यर्थः। किंभूतो विधुः—मृदुतरकराकारैरतिमृदुरश्मिरूपैस्तूलोत्करैः कार्पाससमूहैरुदरंभरिः परिपूरितमध्यः। गण्डोपधानं मृदुतरकार्पासपूरितमध्यं वृत्तं शुभ्रं च भवति। स्थूलतरास्तारास्तत्पविकीर्यमाणकुसुमतुल्या इतस्ततो दृश्यन्ते। चन्द्रोपि सौरप्रकाशस्यासन्नत्वेन संकुचिताभिः स्वकान्तिभिर्मध्यमेव पूरयन्मर्दितगण्डोपधानवन्निःशोभोऽस्तमयोन्मुखोजात इतिभावः। संग्रहः 'ग्रहवृदनिश्रिगमश्च' इत्यप्। उत्करः 'ऋदोरप्'। उदरंभरिः 'फलेग्रहिरात्मंभरिश्च' इति चकारस्यानुक्तसमुच्चयार्थकत्वादिन्। नुमागमश्च॥

दशशतचतुर्वेदीशाखाविवर्तनमूर्तयः
सविधमधुनाऽलंकुर्वन्ति ध्रुवं रविरश्मयः।
वदनकुहरेऽप्यध्येतॄणामयं तदुदञ्चति
श्रुतिपदमयस्तेषामेव प्रतिध्वनिरध्वनि॥ १०॥

दशेति॥ दश शतानि यासां ता एकसहस्रसंख्याश्चतुर्णामृग्वेदादिवेदानां समाहारश्चतुर्वेदी तस्याः शाखानामाश्वलायनतैत्तिरीयकादिसंज्ञानां तत्तद्वेदभागानां विवर्तनरूपा अतात्त्विका अन्यथाभावरूपाः शाखारूपतां प्राप्ता मूर्तयः स्वरूपाणि येषां तादृशा रविरश्मयो ध्रुवं यस्मादधुना प्रातःसमये सविधमस्मदादिसमीपदेशं भूषयन्ति सर्वेपि समीपदेशमागच्छन्ति। तत्तस्मादयमध्येतॄणां वेदं पठतां वदनलक्षणेषु कुहरेषु दरीषु विषय आकर्ण्यमानवर्णानुरूपत्वेषां वेदशाखीभवन्मूर्तीनां सूर्यकराणामेव श्रुतिपदमयो वेदपदरूपः प्रतिध्वनिः प्रतिशब्दोऽध्वनि गगन उदञ्चत्यूर्ध्वं प्रसरति। दरीषु प्रतिशब्दो युक्तः। अध्वनि मध्यतारध्वनिरहितं यथा तथेति। अध्येतारो हि प्रातर्मन्द्रध्वनिना वेदानधीयते। ध्रुवमुत्प्रेक्षायां वा। सूर्योदयो जातः, अध्येतारश्च वेदानधीयत इत्यर्थः। दशशतेति मूर्तिविशेषणम्। चतुर्वेदी समाहारे द्विगोर्ङीप्। पदमयः तादृप्ये मयट्॥

नयति भगवानम्भोजस्यानिबन्धनबान्धवः
किमपि मघवप्रासादस्य प्रघाणमुपघ्नताम्।
अपसरदरिध्वान्तप्रत्यग्वियत्पथमण्डली-
लगनफलदश्रान्तस्वर्णाचलभ्रमविभ्रमः॥ ११॥

नयतीति॥ अम्भोजस्य कमलकुलस्यानिबन्धनबान्धवोऽकारणमित्रं तदानन्दकारी भगवान् षड्गुणैश्वर्यसंपन्नः श्रीसूर्यो मघवत इन्द्रस्य वैजयन्ताख्यस्य प्रासादस्य प्रघाणमलिन्दं किमपि स्तोकं यथातथोपघ्नतामाश्रयतां नयति प्रापयत्याश्रयति। तावत्पर्यन्तमूर्ध्वमागत इत्यर्थः। अथ च—तं श्लिष्यति। पराङ्मुखशत्रोः शूरस्य परस्पराश्लेषो युक्तः। किंभूतः—अपसरत्पुरः पलायमानमरिरूपं ध्वान्तं तस्य प्रतीचः पश्चिमाशायाः संबन्धिनि वियत्पथे गगनमार्गे मण्डल्या संधिभावेन यल्लगनं संश्लेषः प्रत्यग्दिगन्तगामित्वम्, लयनमिति पाठे—संधिभावेन यत्तिरोधानं सामस्त्येनादर्शनं तेन फलन्सफलो भवन्नश्रान्तो निरन्तरः स्वर्णाचलस्य मेरोः प्रदक्षिणलक्षणो भ्रमः स एव विभ्रमो विलासो यस्य। सद्वस्तुपरिपालनाय रात्रौ भ्रमतो यामिकस्य चौरपलायनेन यथा साफल्यं भवति तथा स्वर्णाचलरक्षणाय सूर्यस्य भ्रमणविलाससाफल्यं युक्तमित्यर्थः। अत एव स्वर्णाचलपदं प्रायोजि। अत्रापि पूर्वोत्तरार्धविपर्यासो ज्ञातव्यः। 'प्रघाणप्रघणालिन्दाः' इत्यमरः। बान्धवः प्रज्ञादित्वात्स्वार्थेऽण्। मघवप्रासादस्य प्रातिपदिकान्तत्वान्नलोपः। 'अगारै-

---

१ 'अत्र श्रियमिव श्रियम्, विधामिव विधामिति सादृश्याक्षेपादुभयत्र निदर्शनोत्थानात्सजातीयसंसृष्टिः' इति जीवातुः। २ मघवत्प्रासादस्येति पाठो बहुपुस्तकस्थः।

कदेशे प्रघणः प्रघाणश्च' (इति) 'उपघ्न आश्रये' इति च प्रघाणोपघ्नशब्दौ साधू । प्रत्यक् 'दिक्शब्देभ्यः-' इत्यस्तातेः 'अञ्चेर्लुक्' इति लुक् । 'तसिलादिस्तद्धितः' (?) इत्यव्ययत्वम् ॥

नभसि महसां ध्वान्तध्वाङ्क्षप्रमापणपत्रिणा-
मिह विहरणैः श्यैनंपातां रवेरवधारयन् ।
शशविशसनत्रासादाशामयाच्चरमां शशी
तदधिगमनात्तारापारापतैरुदडीयत ॥ १२ ॥

नभसीति ॥ शशी निजाङ्कवर्तिशशाख्यपशुविशेषस्य विशसनं मारणं तस्माद्यस्त्रासो भयं तस्माच्चरमामाशां पश्चिमां दिशमयाद्ययौ । तथा—तारा नक्षत्राणि तद्रूपैः पारापतैस्तस्य चन्द्रपलायनवृत्तान्तस्य सूर्यस्य मृगयारम्भवृत्तान्तस्य चाधिगमनात्परिज्ञानादुदडीयत पलायितम् । किंविधः शशी—नभसि गगने ध्वान्तमन्धकारस्तद्रूपाणां ध्वाङ्क्षाणां काकानां प्रमापणे मारणे विषये पत्रिणां श्येनाख्यपक्षिरूपाणां महसां सूर्यतेजसामिह प्राग्भागे विहरणैः क्रीडनैः रवेः श्रीसूर्यस्य श्यैनंपातां मृगयामवधारयन्निर्धारयन् । अन्यस्मिन्नपि राज्ञि मृगयाश्येनपातेन काकादीन् हिंसति सति शशयुक्तः पुरुषो मदीयं शशमपि मांसार्थमेतदीयाः श्येना हनिष्यन्तीति भिया पलाय्य गच्छति । पारापता अप्युड्डीय यान्ति । सूर्यकिरणा गगने खेलन्ति, चन्द्रः प्रतीचीं गतः, ताराश्च न दृश्यन्त इति भावः । इह नभसीति वा । शशेन नित्ययुक्तः शशी । त्रासादिव, तदधिगमनादिवेति च प्रतीयमानोत्प्रेक्षा । 'अथ शशादनः । पत्री श्येनः' 'श्यैनंपाता च मृगया' 'पारावतः कलरवः' इत्यमरः । पतनं पातः । भावे घञ्, श्येनानां पातः श्येनपातः सोऽस्यां क्रियायां वर्तते श्यैनंपाता मृगयेति 'घञः सास्यां क्रिया-' इति ञः, 'श्येनतिलस्य-' इति मुम् ॥

भृशमबिभरुस्तारा हाराच्च्युता इव मौक्तिकाः
सुरसुरतजक्रीडालूनाद्द्युसद्वियदङ्गणम् ।
बहुकरकृतात्प्रातः संमार्जनादधुना पुन-
र्निरुपधिनिजावस्थालक्ष्मीविलक्षणमीक्ष्यते १३

भृशमिति ॥ सुरसुरतं देवमिथुनरतं तस्माज्जाता क्रीडा विलाससंमर्दः, अथ च—सुरतुल्यराजादिरतक्रीडासंमर्दः, तेन लूनाटिताद्धाराच्च्युता मुक्ता इव वृत्ततरास्तारा द्युसद्वियदङ्गणं सुराणामजिरभूतं यद्गगनं भृशं नितरामबिभरुरपूपुरन् । तद्गगनमधुना पुनः बहवः सहस्रं करा यस्य स सूर्यस्तेन, अथ च—रजःशोधकेन खलप्वा कृतात्प्रातःसंमार्जनात्प्राभातिकात्सम्यङ्मार्जनात्तिमिरनिराकरणद्वारा शोधनात्, अथ च—शोधन्या रजोपनयनेन शोधनान्निरुपधिरूपाधिरहिता स्वाभाविकी निजावस्था सहजदशा तस्याः स्त्रिया कृत्वा तमीसंबन्धिशोभात्यागात्, अथ च—रजः पुष्पमालामुक्ताद्युपाधित्याजनात्, सहजश्रिया विलक्षणमन्यादृशमीक्ष्यते विलोक्यते । सूर्यकरैर्गगनं भूषितम्, ताराश्च सर्वथा न दृश्यन्त इत्यर्थः । इयदिति पाठे—हस्ताभिनयादतिमहदित्यर्थः । 'खलपूः स्याद्बहुकरः' इत्यमरः । अबिभरुः, 'सिजभ्यस्त-' इति झेर्जुस् । दिवि सीदन्तीति द्युसदः, 'सत्सूद्विष-' इति क्विप् 'हृद्द्युभ्यां ङेरुपसंख्यानम्' इत्यलुक्प्राप्तावपि 'तत्पुरुषे कृति बहुलम्' इति बाहुलकान्ङेर्लुक्, 'दिव उत्', 'सात्पदाद्योः' इति षत्वनिषेधः । बहुकरः, खलपूपक्षे 'दिवाविभा-' इति टः । उपधिः 'उपसर्गे घोः किः' ॥

प्रथममुपहृत्यार्धं तारैरखण्डिततण्डुलै-
स्तिमिरपरिषद्दूर्वापर्वावलीशबलीकृतैः ।
अथ रविरुचां ग्रासातिथ्यं नभः स्वविहारिभिः
सृजति शिशिरक्षोदश्रेणीमयैरुदसक्तुभिः ॥१४

प्रथममिति ॥ नभः कर्तृ रविरुचां तिमिरपरिषत्तमःसमूहस्तद्रूपा दूर्वापर्वावल्यो दूर्वाग्रन्थिपरंपरास्ताभिः शबलीकृतैः कर्बुरीकृतैर्मिश्रितैस्तारैर्नक्षत्ररूपैरुज्ज्वलैश्चाखण्डिततण्डुलैरभग्ननिस्तुषशालिबीजैः कृत्वाऽर्धं पूजां प्रथममुपहृत्य दत्त्वा, अथानन्तरमेव स्वविहारिभिः स्वस्मिन्वर्तमानैः स्वसत्ताकैश्च शिशिरस्य हिमस्य क्षोदश्चूर्णबिन्दवस्तेषां श्रेणीमयैः परम्परारूपैरुदसक्तुभिर्जलमिश्रयवचूर्णैर्ग्रासातिथ्यं भोज्यान्नदानलक्षणमतिथिपूजनं सृजति करोति । अन्योपि तण्डुलदूर्वादलयुतेन जलेन पूर्वमर्घं दत्त्वा सक्त्वादिना स्वगृहप्राप्तायातिथये भोज्यं ददाति । सूर्यदीप्तयः पूर्वं तारास्तिमिरं च हिमजलकणानप्यपनयन्ति स्मेति भावः । 'मूल्ये पूजाविधावर्घः' 'मुक्ताशुद्धौ च तारः स्यात्' इत्यमरः । अत्र तारशब्दः पुंलिङ्गः । तारयति सांयात्रिकानिति ण्यन्तात्तरतेः पचाद्यच् । रविरुचां संबन्धसामान्यविवक्षया षष्ठी । उदकयुक्ताः सक्तवः मध्यमपदलोपी, उदकानि च सक्तवश्चेति वा समासः । 'मन्थौदन-' इत्युदादेशः ॥

असुरहितमप्यादित्योत्थां विपत्तिमुपागतं
दितिसुतगुरुः प्राणैर्योक्तुं न किं कचवत्तमः ।
पठति लुठतीं कण्ठे विद्यामयं मृतजीवनीं
यदि न वहते संध्यामौनव्रतव्ययभीरुताम् १५

अस्विति ॥ दितिसुता दैत्यास्तेषां गुरुः शुक्र आदित्येभ्यो देवेभ्यो हेतुभ्य उत्थां जाताम्, अथ च—सूर्यात्संजातां विपत्तिं मरणं नाशं, च कचवद्बृहस्पतिपुत्रवदुपागतं प्राप्तमसुरेभ्यो हितमपि तेषां रात्रिंचरत्वादनुकूलमपि तमः प्राणैर्योक्तुं संयोजयितुं कण्ठे लुठतीं जाग्रद्रूपां मृतानां जीवनीमित्यनुगतार्थां विद्यां किं न पठति अपि तु स्पष्टं पठेदेव । परं चेदयं शुक्राचार्यः प्रातःकालीनसंध्यायां मौनव्रतं मौनलक्षणो नियमस्तस्य व्ययो भङ्गस्तस्माद्भीरुतां भयशीलत्वं यदि न वहते न धारयेत्, तर्हीति संबन्धः । पठति वहते कालसामान्ये लट् । लुठतीम्, वैकल्पिकत्वान्नुमभावः ॥

उदयशिखरिप्रस्थान्यह्ना रणेऽत्र निशः क्षणे
दधति विहरत्पूषाण्यूष्मद्रुताश्मजतुस्रवान् ।
उदयदरुणप्रह्वीभावादरादरुणानुजे
मिलति किमु तत्सङ्गाच्छङ्क्या नवेष्टकवेष्टना १६

उदयेति ॥ अह्ना दिनेन सह निशो रात्रे रणे सङ्ग्रामरूपेऽत्रास्मिन्क्षणे । प्रातःकाल इत्यर्थः । तत्रोदयशिखरी उदयाचलस्तस्य

१ 'रूपकालंकारः' इति जीवातुः ।

प्रस्थानि शिखराणि कर्तृण्यूष्मभिः प्रातःकालीनातपसंतापैः द्रुतानामश्मजतूनां शिलाजतूनां स्रवान्प्रवाहान्दधति । यद्वा—क्षण उत्सवतुल्ये रात्रिविनाशकारित्वात्सङ्ग्राम इव सङ्ग्रामे विहरंस्तयोर्युद्धकौतुकदर्शनेन परिक्रीडमानः पूषा सूर्यो ग्रहराजो यत्रैवंभूतान्युदयाचलसानूनि बालातपसंतापविलीनशिलाजतुस्रवत्प्रवाहानेव कियत्कालविलम्बधूमलीभूतरुधिरप्रवाहान्धारयन्ति । रणभूमिषु हि कालविलम्बेन धूमला रुधिरप्रवाहा भवन्ति । अत एव—उदयमुदयं प्राप्नुवन्नरुणोऽग्रजस्तत्संबन्धिनि प्रह्वीभावे नमस्कारे विषये य आदरो भक्त्यतिशयस्तस्माद्धेतोररुणानुजे मिलति संगमं प्राप्नुवति सति तयोररुणगरुडयोः सङ्गान्मेलनाद्धेतोः रक्तप्रदीप्त्या नवास्तत्कालमापाकादाकृष्टा इष्टका यत्र तादृशी नूतनेष्टकानिर्मिता वेष्टना, नवा इष्टका यत्र शिल्पे तन्नवेष्टकं तेन (वा) वेष्टना प्राकारः किमु न शङ्क्या न तर्क्या, अपि तु सैव तर्क्येत्यर्थः । परिवारभूते दिनप्रकाशे युध्यमाने तद्दार्ढ्यनो लीलाविहारिणो प्रहराजस्य स्वामिनो महाराजोचितगैरिकसुवर्णभूषितनवेष्टकानिर्मितप्राकारोर्ध्वस्थितिरुचिता संभाव्यते। अथ च दिनराज्योः सेनानीभूतयोः सङ्ग्राम उदयाचलसानूनि तत्तटतुल्यानि रुधिरं धारयन्ति । भटाः प्रहारवशाद्रक्तसिक्ता भवन्ति । तत्र च दिनपक्षीयप्रस्थानां जयित्वात्सुवर्णमयगरुडसंपर्काद्वेष्टकस्य वेष्टना सुवर्णपट्टिकाया धारणा न तर्क्या किमु अपि तु जयिनां तया भवितव्यमेवेति । गरुडस्तेषां सुवर्णमयवीर(विरुद)पट्टिकास्थाने जात इत्युचितमित्यर्थः । नवेष्टकवेष्टनेति, 'स्त्रियाः पुंवत्–' इति पुंवत् । वेष्टकः, कर्तरि ण्वुल् ॥

रविरथहयानश्वस्यन्ति ध्रुवं वडवा बल-
प्रतिबलबलावस्थायिन्यः समीक्ष्य समीपगान् ।
निजपरिवृढं गाढप्रेमा रथाङ्गविहंगमी
स्मरशरपराधीनस्वान्ता वृषस्यति संप्रति ॥१७॥

रवीति ॥ भो राजन्, संप्रति प्रातःकाले बलस्य दैत्यस्य प्रतिबलः शत्रुः प्राचीवर्तीन्द्रस्तस्य बलं सैन्यं तत्रावस्थायिन्यो मध्यवर्तिन्यो वडवास्तुरङ्ग्यो गाढप्रेमाः सूर्याश्वेषु दृढानुरागाः सत्यो रविरथहयान्समीपगान्समीक्ष्य मैथुनार्थमात्मनोऽश्वानिच्छन्ति ध्रुवमुत्प्रेक्षायाम्, निश्चितं वा । इच्छन्तीवेत्यर्थः । यतः—स्मरशरपराधीनं स्वान्तं चित्तं यासाम् । तथा—रथाङ्गविहंगमी चक्रवाक्यपि निजं स्वीयं परिवृढं चक्रवाकमिदानीं प्रातः, समीपमागतं दृष्ट्वा कामबाणवशचित्ता, अत एव—रात्रियोगेन दृढानुरागा सती मैथुनवाञ्छया वृषस्यति। वृषवद्बलवन्तं तं मैथुनार्थं कामयत इत्यर्थः। सूर्याश्वाः पूर्वस्यामागताः, चक्रवाकयोश्च संगमो जात इति भावः । अश्वस्यति वृषस्यति आत्मनोऽश्वानिच्छति वृषमिच्छति च, क्यचि-'अश्ववृषयोर्मैथुनेच्छायाम्' इति मैथुनेच्छायामसुगागमः । व्युत्पत्तिमात्रं चैतत् । रूढ्या तु मैथुनार्थमिच्छन्तीत्येवार्थः । तथाच—'वृषस्यन्ती तु कामुकी' इत्यमरः । 'इति रामो वृषस्यन्तीम्' इति च कालिदासः । 'प्रभौ परिवृढः' इति निपातः । गाढप्रेमेति, 'डाबुभाभ्याम्–' इति पक्षद्वयेऽपि ङाप् । ङापो वैकल्पिकत्वादेकत्र नान्तता(पि) । विहंगमी, जातित्वान्ङीप् । रथाङ्गं चासौ विहंगमी चेति समासः ॥

निशि निरशनाः क्षीरस्यन्तः क्षुधाऽश्वकिशोरका
मधुरमधुरं हेषन्ते ते विलोलितवालधि ।
तुरगसमजः स्थानोत्थायं क्वणन्मणिमन्थभू-
धरभवशिलालेहायेहाचणो लवणस्यति ॥१८॥

निशीति ॥ भो राजन्, निशि रात्रौ निरशना निराहाराः, अत एव—क्षुधा क्षीरस्यन्त आत्मनोऽत्यर्थं क्षीरं दुग्धमिच्छन्तः ते अश्वकिशोरका अतिप्रसिद्धा अश्वबालकाः मधुरमधुरं यथातथातिलकशब्दं, तथा—विलोलिताः पुनःपुनश्चालिता वालधयः पुच्छानि यस्यां क्रियायां तद्यथा तथा हेषन्ते हेषारवं कुर्वन्ति । तथा—तव मन्दुरायां स्थितस्तुरगाणां समजः समूहः स्थानोत्थायं शय्यास्थानाच्छीघ्रमुत्थाय क्वणन् हेषमाणः मणिमन्थनामके भूधरे भवानां जातानां शिलानां सैन्धवशिलानां लेहायास्वादनाय ईहया इच्छया पुनःपुनर्मुखादिचालनचेष्टया वा क्वणः स्यातः सन् लवणस्यत्यात्मनो लोलुपत्वेन लवणमिच्छति । अश्वकिशोरकाः प्रातः क्षीरपानार्थं हेषन्ते, अश्वास्तु प्रातः सैन्धवास्वादनाय हेषन्त इति जातिः । सूर्योदयो जात इत्यर्थः । क्षीरस्यन्तो, लवणस्यन्तीत्यत्र चात्मेच्छायां क्यचि 'अश्वक्षीर–' इत्यादिना 'क्षीरलवणयोर्लालसायाम्' इति वचनाल्लालसायामसुक् । किशोरकाः, 'अल्पे' इति कन् । मधुरमधुरं प्रकारे द्विः । 'हेषङ् स्वने' । समजः पशुविषयत्वात् 'समुदोरजः पशुषु' इत्यप् । स्थानोत्थायम् । 'अपादाने परीप्सायाम्' इति णमुल् । लेहः, भावे घञ् ॥

उडुपरिषदः किं नार्हत्वं निशः किमु नौचिती
पतिरिह न यदृष्टस्ताभ्यां गणेयरुचीगणः ।
स्फुटमुडुपतेराश्मं वक्षः स्फुरन्मलिनाश्मन-
च्छवि यदनयोर्विच्छेदेपि द्रुतं बत न द्रुतम् १९

उडुरिति ॥ हे राजन्, उडुपरिषदो नक्षत्रपरम्पराया अर्हत्वं किं न, अपि त्वौचित्यमेवैतत् । तथा—निशो रात्रेरौचिती न किमु, अपि त्वौचित्यमेव । यद्यस्मात्ताभ्यां तारापङ्क्तिविभावरीभ्यां गणेयोऽल्पो रुचीगणो दीप्तिसमूहः (यस्य स)क्षीणतेजाः पतिः प्राणेशश्चन्द्र इहास्मिन्समये न दृष्टः । तस्मात्तयोरौचित्यमेवेत्यर्थः । 'धन्यास्तात न पश्यन्ति पतिभङ्गं कुलक्षयम्' इति वचनात्पतिविपदमदृष्ट्वैव द्वयोरपि ध्वस्तत्वादौचित्येव जातेत्यर्थः । स्फुरन्ती प्रकाशमाना कलङ्कव्याजेन मलिना कृष्णा आश्मनी पाषाणसंबन्धिनी छविः कान्तिर्यस्यैवंभूतमुडुपतेर्वक्षो मध्यम्, अथ च—हृदयम्, स्फुटं निश्चितमाश्मं पाषाणविकाररूपम् । पाषाणघटितमिवातिकठिनं मलिनं चेत्यर्थः । यद्यस्मादनयोस्तारारात्र्योर्विच्छेदे वियोगे, अथ च—विनाशे सत्यपि द्रुतं शीघ्रं न द्रुतं स्फुटितम् । पाषाणनिर्मितमेवेत्यर्थः । बत खेदे । यत् । वक्षोविशेषणं वा । स्वस्यापि विलये निकटे सत्यपि तत्पतिना चन्द्रेण स्वप्रेयस्योः प्रेम न दर्शितमिति तस्यानौचितीत्यर्थः । तारापरम्परा रात्रिश्च विनष्टा । चन्द्रोपि क्षीणतेजा आसन्ननाशो जात इत्यर्थः । आर्हन्तीति पाठे—'अर्हः प्रशंसायाम्' इति शतरि, अर्हतो भाव इति ब्राह्मणादित्वात्ष्यञि स्त्रियान्ङीपि 'अर्हतो नुम् च' इति नुम् । आश्मं, विकारेऽञि 'अश्मनो विकारे ढिलोपः' इति ढिलोपः । आ-

इमनेति संबन्धेऽणि विकाराभावाद्विलोपाभावे आइमनी चासौ छविश्चेति समासे 'पुंवत्कर्मधारय–' इति पुंवत् ॥

अरुणकिरणे वह्नौ लाजानुडूनि जुहोति या
परिणयति तां संध्यामेतामवैमि मणिर्दिवः ।
इयमिव स एवाग्निभ्रान्त्या करोति पुरा यतः
करमपि न कस्तस्यैवोत्कः सकौतुकमीक्षितुम् २०

अरुणेति ॥ भो राजन्, या संध्या अरुणस्य किरणरूपे वह्नौ उडूनि नक्षत्राण्येव लाजाञ्जुहोति, दिवो मणिस्तामेतां प्रातःसंध्यां परितो नयति प्रापयति विवाहयतीत्यहमवैमि मन्ये । यत इयमिव संध्या यथा रक्तवर्णत्वादग्निभ्रान्त्या वह्निविपर्ययज्ञानं पुरा करोत्यक रोत् । यद्वा—यथेयं करोति, तथा स एव सूर्योपि रक्ततरत्वादुष्णकरत्वाच्च वह्निबुद्धिं पुरा करोत्युदितमात्र एव करिष्यति । अथ चेयं संध्या पुरा प्रथमं वह्निप्रदक्षिणपरिभ्रमणं यथा करोति, तथैवास्या अनन्तरमेव सूर्योपि वह्निप्रदक्षिणपरिभ्रमणमिदानीमेव करिष्यति । एवकारोऽप्यर्थः । यतश्च सकौतुकं यथा तथा तस्य सूर्यस्यैव करं किरणमपीक्षितुं कः पुरुषो नोत्कः नोत्क्षिप्तजलः, अपितु सन्देहराक्षसनिराकरणद्वाराऽस्य किरणमीक्षितुं सर्वोप्यर्घ्यदानं करोतीत्यर्थः । अथच—सकौतुकं माङ्गलिकसूत्रकङ्कणेन सह तस्य विवोढुः सूर्यस्यैव हस्तमपि वीक्षितुं कः पुरुषो नोन्मनाः, अपि तु—सकङ्कणं वरकरं सर्वोपि द्रष्टुमुत्कण्ठित एव । या च वधूः परिणीयते, सा प्रदीप्ते वह्नौ लाजाञ्जुहोति । सा च वह्निं पूर्वं प्रदक्षिणीकरोति, वरोपि तया सह पश्चात्प्रदक्षिणीकरोतीति संध्यासूर्ययोर्वधूवरत्वमुक्तम् । अरुणोदयो जातः, तत्प्रभया च तारा न दृश्यन्ते, संध्यासमयश्च जातः, अधुना रविरुदेतीति भावः । 'कौतुकं कुतुके ख्याते हस्तसूत्रेपि कथ्यते' इति विश्वः । किरण इति पक्षे जातावेकवचनम् । परिणयति, णोपदेशत्वाण्णत्वम् । इयमिव पुरा करोतीति पक्षे 'पुरि लुङ् चास्मे' इति लङ् । पक्षान्तरे तु 'यावत्पुरानिपातयोर्लट्' इति भविष्यति लट् ॥

रतिरतिपतिद्वैतश्रीकौ धुरं बिभृमस्तरां
प्रियवचसि यन्नग्नाचार्या वदामतमां ततः ।
अपि विरचितो विघ्नः पुण्यद्रुहः खलु नर्मणः
परुषमरुषे नैकस्यै वामुदेति मुदेपि तत् ॥२१॥

रतीति ॥ रतिरतिपत्योः रतिकामयोर्द्वितयेव द्वैतम् । रतिद्वैतं कामद्वैतं चेति यावत् । तस्यैव श्रीर्ययोस्तत्संबोधनं हे भैमीनलौ, नग्नानां बन्दिनामाचार्या वैतालिका वयं प्रियेऽनुकूले वचसि यद्यस्माद्वां भारं बिभृमस्तरां चाटुवचनेषु वयमेव प्रगल्भतरास्ततस्माद्वदामतमामतितमां ब्रुवाम । सूर्योदयो जातः, तस्मात्क्रीडां त्यक्त्वा शीघ्रं शय्याया उत्तिष्ठतमिति वचनेऽस्माकं प्रातः काल इति धाष्टर्येन ब्रूम इत्यर्थः । यद्यूयं प्रियवचनचतुरास्तर्ह्येवं परुषं किमिति वदथेत्याशङ्क्याह—तदस्मदुक्तं परुषं वच एव पुण्यद्रुहः प्रातःकालीनस्नानसंध्यादिधर्मविरोधिनः नर्मणः प्रातःकालीनालिङ्गनचुम्बनादिविलासस्य पुनः प्रबोधपूर्वमुत्थापनाद्विरचितः परुषरूपो विघ्नोपि वां युवयोरेकस्यै अरुषे केवलाय क्रोधाभावाय उदेत्विति न, किंतु खलु निश्चितं मुदेपि हर्षायाप्युदेतु । यद्यप्येतत्परुषमुक्तम्, तथापि रोषो न कार्यः परुषस्यापि पुण्यहेतुत्वाद्धर्षोपि यस्माद्भविष्यति । तथा च हितवादिन एव तात्पर्यात्प्रियवचनचातुर्यमव्याहतमेवेत्यर्थः । क्रीडां विहाय शीघ्रमुत्तिष्ठतमिति भावः । रतीत्यादिविशेषणेन द्वयोरौचिती सूचिता । वां युवयोर्मध्येऽरुषे रोषहीनायै एकस्यै भैम्यै मुदे नोदेतु भैम्याः संभोगप्रियत्वाद्धर्मविघ्ने यद्यपि संतोषो न भवेत्, तथापि तव प्रियपुण्यत्वादेवास्माभिरुच्यत इत्यर्थ इति वा । भैम्यै कोपाभावायापि नोदेतु मुदेपि नोदेतु । भैम्या रोषो वास्तु हर्षोपि वा माभूत्, तथापि समयोचितमुच्यत एवेति वा । तत्तस्मादवसरोचितभाषित्वात्पुण्यद्रुहो नर्मणः परुषं यथा तथा विरचितो विघ्नोपि निश्चितमकोपाय केवलमुदेत्विति न, किंतु मुदेऽप्युदेतु । सदा स्वोपजीविनाभिहितेपि परुषे रोषो न भवति, किंतु हर्ष एव भवतीत्यर्थ इति वा । किंच प्रियवचःप्रवीणा अपि वयं यतो नग्नाचार्या जितलज्जाः, अतः स्वच्छन्दं वदाम इति भावः । 'नग्नो वन्दिक्षपणयोर्विवस्त्रे तु' इति विश्वः । द्वैतं पूर्ववत् । 'शेषाद्विभाषा' इति कप् । वदामतमां, 'प्रैषातिसर्ग–' इति प्राप्तकाले लोट् । 'तिङश्च' इत्यतिशये तमप् । पुण्यद्रुहः 'सत्सूद्विष–' इति क्विप् । उदेतीति पाठे —'वर्तमानसामीप्ये—' इति लट् । एकस्यै, तादर्थ्यमात्रविवक्षया चतुर्थी ॥

भव लघुयुताकान्तः संध्यामुपास्व तपोमल
त्वरयति कथं संध्येयं त्वां न नाम निशानुजा ।
द्युतिपतिरथावश्यं कारी दिनोदयमासिता
हरिपतिहरित्पूर्णभ्रूणायिता कियतः क्षणान् २२

भवेति ॥ हे राजन्, त्वं तस्मात्लघु शीघ्रं युता पृथग्भूता कान्ता यस्मादेवंभूतो भव । इदानीं भैम्या सह क्रीडां त्यज, ततः संध्यां नित्यकृत्योपासनामुपास्व कुरु । हे तपसा नित्यकर्मानुष्ठानरूपेणामलोज्ज्वल निर्दोष, निशानुजा रात्र्यनन्तरजाता प्रातिकीयं संध्या त्वां कथं नाम न त्वरयति, अपि तु त्वरयत्येव । अथ मुहूर्तानन्तरक्षणे द्युतिपतिः सूर्यो दिनोदयं दिवसप्रारम्भमवश्यंकारि अवश्यं करिष्यति । उदेष्यतीत्यर्थः । यतः—हरिरिन्द्रः पतिर्यस्यास्तस्या हरितो दिशः प्राच्याः पूर्णभ्रूणो दशमासगर्भ इवाचरितो रक्ततरः कियतश्चिच्चतुरामेव क्षणानासिता स्थास्यति । प्रातःसंध्यायाः सूर्योदयात्प्रागेव विधानाच्छीघ्रमुत्थाय प्रातःसंध्यामुपास्वेत्यर्थः । युतेति, 'यु मिश्रणामिश्रणे' क्तः । त्यक्तादिपदत्यागेनामङ्गलप्रतीतिपरिहारार्थं युतेति श्लिष्टपदं प्रायोजि । संध्यापदेन कर्मानुष्ठानपर्यन्तमेव कान्तारहितो भव, तदनन्तरं पुनरपि युता संयुक्ता कान्ता येनेति मिश्रणमपि विवक्षितम्, एतदर्थमेतत्प्रायोजि वा । कान्ताशब्दस्य प्रियादित्वाद्युतेत्यस्य न पुंवत् । त्वरयति । हेतुमण्णिगघ् । कारीति भविष्यत्यावश्यके णिनिः तयोगे च 'अकेनोः–' इति निषेधादिनोदयमिति पञ्चम्याः । आसिता, लुट् । भ्रूणायिता, आचारक्यङन्तात् क्तः । क्षणान्, कालवाचित्वाद्द्वितीया ॥

द्युषितमनमश्रित्रं भैमि त्वयाद्य कलागृहै-
र्निषधवसुधानाथस्यापि श्लथश्लथता विधौ ।
अजगणदयं संध्यां वन्ध्यां विधाय न दूषणं
नमसितुमना यन्नाम स्यान्न संप्रति पूषणम् २३

मुषितेति ॥ हे भैमि, चतुःषष्टिकलानां गृहैर्निवासभूतयाद्य मुषितं चोरितं मनो यस्यापहृतचित्तस्य त्याजितस्वभावस्य वा निषधवसुधानाथस्य नलस्यापि विधौ श्रुतिविहितसंध्यादिनित्यकर्मणि विषये श्लथश्लथता श्लथप्रकारता आलस्यातिशयोऽनादरातिशयो वा वर्तत इति चित्रम् । परमधार्मिकोऽप्यनेककलाभिज्ञत्वात्त्वया स्ववशीकारेण धर्मविमुखः कृत इत्याश्चर्यम् । अनुचितमेतदित्यर्थः। अथ च—कलानिधिभूतया त्वया मुषितमनस्कत्वात्कलानिधौ विधावप्यनादर इति चित्रम् । कथं शैथिल्यमित्यत आह—यद्यस्मात्परमधार्मिकोऽप्ययं संध्यां संध्योपलक्षितं प्रातःकालं वन्ध्यां नित्यस्नानादिप्रातःकृत्यरहितं विधाय कृत्वा विहिताकरणजन्यं दूषणं नाजगणत् । यच्च संप्रति पूषणं सूर्यं नमसितुमना नमस्कर्तुकामोऽपि न स्याद्भवति । नामाप्यर्थे । परित्यक्तनित्यकर्मा सूर्यस्य नमस्कारमपि न करोतीत्युपालम्भः । अन्योपि कामी कस्यांचिदासक्तो निजधर्मपत्नीमसंभुञ्जानो वन्ध्यां विधत्ते, दोषं न गणयति, संभोगविघ्नभूतत्वाद्दिनकरमपि नाद्रियते तथायमपि । संध्यादिनित्यकर्मानुष्ठानार्थं क्षणमिमं मुञ्चेति भावः । गृहस्य पुंस्त्वाद्बहुवचनान्तत्वेपि त्वयेत्यनेन सामानाधिकरण्यं युक्तम् । स्यात्, संभावने लिङ् ॥

न विदुषितरा कापि त्वत्तस्ततो नियतक्रिया-
पतनदुरिते हेतुर्भर्तुर्मनस्विनि मा स्म भूः ।
अनिशभवदत्यागादेनं जनः खलु कामुकी-
सुभगमभिधास्यत्युद्दामा पराङ्कवदावदः॥२४॥

नेति ॥ भो मनस्विन्यतिधैर्ययुक्ते सावधाने वा, त्वत्सकाशाद्विदुषितरातितरां पण्डिता सर्वलोकशास्त्ररहस्यं विदुषी काप्यन्या यद्यस्मान्नास्ति ततस्तस्माद्भर्तुर्नलस्य नियतक्रियापतनान्नित्यसंध्यादिकर्मलोपाद्यद्दुरितं तत्र त्वं हेतुर्मा स्म भूः । संध्याद्यनुष्ठानार्थं शीघ्रमेनं मुञ्चेत्यर्थः । किंच—खलु यस्मादुद्दामा निरङ्कुशोऽत एव पराङ्कवदावदोऽन्यदीयकलङ्कभाषणशीलो जनोऽनिशं भवत्या अत्यागात्, भवत्या कर्तृभूतया वा मोचनाद्धेतोरेनं नलं कामुक्यामतितरां मैथुनेच्छावत्यां सुभगं तत्परवशं कामुकी पूर्वोक्ता सुभगा सौभाग्यवती भवादृशी स्त्री यस्य एवंभूतं वा अभिधास्यति वदिष्यति । स्त्रीपरवशत्वादयं नित्यकर्मापि त्यजतीति निन्दां करिष्यति तस्माद्विहिताकरणप्रत्यवायलोकगर्हादिपरिहारार्थमेनं मुञ्चेतिभावः। विदुषितरा, उगित्वान्ङीपि तरपि 'उगितश्च' इति पक्षे ह्रस्वः । भवदत्यागात्सर्वनामत्वात्पुंवत् । पूर्वेण सह मयूरव्यंसकादित्वात्समासः । सुभगाशब्दस्य प्रियादित्वात्पूर्वस्य न पुंवत् । वदतीति वदावदः पचाद्यच् 'चरिचलि-'इत्यादिना द्वित्वमभ्यासस्यागागमश्च

रह सहचरीमेतां राजन्नपि स्त्रितमां क्षणं
तरणिकिरणैः स्तोकान्मुक्तैः समालभते नभः ।
उदधिनिरयद्भास्वत्स्वर्णोदकुम्भदिदृक्षुतां
दधति नलिनं प्रस्थायिन्यः श्रियः कुमुदान्मुदा॥

रहेति ॥ हे राजन्, त्वं सहचरीं सदा सहचरणशीलाम्, तथा—स्त्रितमां स्त्रीषु श्रेष्ठामेवंभूतामप्येनां क्षणमात्रं रह मुञ्च । यतः—नभःस्तोकान्मुक्तैरल्पनिर्गतैर्बालैस्तरणेः सूर्यस्य किरणैः समालभत आत्मनः कुङ्कुमानुलेपनं करोति । तथा—संकुचतः कुमुदात्सकाशाद्विकासोन्मुखं नलिनं कमलवनं प्रति मुदा प्रस्थायिन्यः प्रस्थास्यन्ते तच्छीलाः श्रिय उदधेः सकाशान्निरयन्निर्गच्छन्भास्वान्स एव स्वर्णस्योदकुम्भो जलपूर्णः कलशस्तं दिदृक्षुतां दर्शनेच्छुतां दधति धारयन्ति । कुमुदान्निर्गताः सत्यः कमलवनं प्रति गन्तुं सूर्योदयं प्रतीक्षन्त इत्यर्थः । जिगमिषवो हि जलपूर्णं कुम्भं दिदृक्षन्ते । प्रभातं जातमित्यर्थः । तस्मान्नित्यकर्मानुष्ठानार्थममोचनीयामप्येतां क्षणमात्रं मुञ्चेति भावः । रहेति 'रह त्यागे' । स्त्रितमां पूर्ववत् । स्तोकान्मुक्तैः 'स्तोकान्तिक-' इति पञ्चमीसमासः । अत एव पञ्चमी । 'पञ्चम्याः स्तोकादिभ्यः' इत्यलुक् । निरयत्, 'इ गतौ' इत्यस्माच्छता । उदकुम्भः, 'एकहलादौ पूरयितव्ये-' इत्युदकस्योदादेशः । दिदृक्षुरित्युप्रत्ययान्तत्वात् 'न लोका-' इति षष्ठीनिषेधाद्द्वितीया, ('द्वितीया' इति) योगविभागात्समासः ॥

प्रथमककुभः पान्थत्वेन स्फुटेक्षितवृत्रहा-
ण्यनुपदमिह द्रक्ष्यन्ति त्वां महांसि महस्पतेः ।
पटिमवहनादूहापोहक्षमाणि वितन्वता-
महह युवयोस्तावल्लक्ष्मीविवेचनचातुरीम्॥२६॥

प्रथमेति ॥ हे राजन्, महस्पतेः सूर्यस्य महांसि तेजांसि प्रथमककुभः प्राच्याः पान्थत्वेन पथिकतया तेनैव मार्गेण गमनवशात्स्फुटं सविशेषमीक्षितो वृत्रहा यैस्तादृशानि सन्त्यनुपदमनन्तरं सविधमागत्य इह प्रासादे वर्तमानं त्वां द्रक्ष्यन्ति विलोकयिष्यन्ति । अनन्तरं पटिम्नोऽतितैक्ष्ण्यस्य, अथ च—प्रज्ञातिशयस्य, वहनाद्धारणादसतः प्रकाशादेः प्रकटीकरणमूहा, सतश्च तिमिरादेरपोहो निराकरणं, तयोः क्षमाणि समर्थानि सामान्यविशेषभावादिनिर्णयनिपुणानि तानि रवितेजांसि युवयोरिन्द्रनलयोस्तावतीनामनेकप्रकाराणां शोभासंपद्रूपाणां लक्ष्मीणां विवेचनचातुरीं तारतम्यविचारकौशलं वितन्वतां विस्तारयतु । अहह चित्रम् । अन्यत्रैवंविधस्य चातुर्यस्यादर्शनादाश्चर्यम् । इन्द्रोऽतिशयशोभासंपत्तिमान्नलो वेति संशये प्रथम(मिन्द्र)दर्शनादिन्द्रे शोभासंपत्तिमत्त्वसामान्यबुद्धिः. अनन्तरं च नलदर्शनान्नले शोभासंपत्तिमत्त्वविशेषबुद्धिरिति सामान्यापेक्षया विशेषस्य बलवत्तरत्वादुभयदर्शिभिः सूर्यकिरणैरिन्द्रापेक्षया शोभासंपत्तिभ्यां नल एवाधिक इति निर्णीयतामिति भावः । अन्योऽपि प्राज्ञ ऊहापोहक्षमः सामान्यविशेषभावादिचातुरीं तनोति । 'अन्वगन्वक्षमनुगेऽनुपदं क्लीबमव्ययम्' इत्यमरः । पटिमा पृथ्वादिः । ऊहा, स्त्रीत्वविवक्षायां 'गुरोश्च हलः' इत्यप्रत्ययः ॥

अनतिशिथिले पुंभावेन प्रगल्भबलाः खलु
प्रसभमलयः पाथोजास्ये निविश्य निरित्वराः ।
किमपि मुखतः कृत्वानीतं वितीर्य सरोजिनी-
मधुरसमुषोयोगे जायां नवान्नमचीकरन् ॥२७॥

अनतीति ॥ हे राजन्, खलु यस्मात्पुंभावेन पौरुषेण प्रगल्भ-

१ इदंच 'गम्यादीनामुपसंख्यानम्' इति वार्तिकविस्मरणमूलकम् ।

वला उत्कटशक्तयोऽतिधृष्टाः, अत एव—अनतिशिथिले विकासोन्मुखेऽत्यक्तकलिकाबन्धकाठिन्येऽपि पाथोजास्ये कमलमुखे मकरन्दग्रहणार्थं प्रसभं हठान्निर्विश्य प्रविश्य निरिश्वरा निर्गमनशीला एवंभूता आलयो भ्रमराः किमपि कियद(मु)र्धं मुग्धतो मुग्धे कृत्वाऽऽनीतं किमप्यपूर्वरसं स्वादुतरं सरोजिनीमधुरसं कमलिनीमकरन्दरूपं रसमास्वाद्यं वस्तु उषोयोगे प्रभातकाले वितीर्य दत्वा नवान्नं नूतनमपूर्वम्, अथ च—प्रेमभरात्स्वयमभुक्तमनुच्छिष्टम्, अन्नं जायां मधुकर्या अचीकरन्कारयामासुः । अविकसिते कठिने कमलेऽबलत्वात्प्रवेष्टुमशक्ता एता इति कृत्वा पौरुषेण स्वयं तत्र प्रविश्य मकरन्दं मुखे कृत्वा समानीय मधुकरीभ्यो दत्वा ताभिस्तद्भोजयामासुरित्यर्थः । किंचिदासन्नसौरप्रकाशत्वात्कमलानि विकासोन्मुखानि जातानीति भावः । अन्येनापि प्रातः शुभयोगे वान्नप्राशनं कार्यते । उषायोगेति पाठे—'विभावरी नक्तमुषा च शर्वरी–' इति हलायुधः । उषाया अर्थाहिनेन सह योगे । प्रातरित्यर्थः । निरिश्वराः, 'इण्नश–' इति करपि नुक् । मुग्धतः कृत्वेति 'स्वाङ्गे तस्प्रत्यये' इति कृञः क्त्वा । जायाम्, 'हृको–' इति कर्मत्वम् । जाया इत्यपि पाठः ॥

मिहिरकिरणाभोगं भोक्तुं प्रवृत्ततया पुरः
कलितचुलुकापोशानस्य ग्रहार्थमियं किमु ।
इति विकसितेनैकेन प्राग्दलेन सरोजिनी
जनयति मतिं साक्षात्कर्तुर्जनस्य दिनोदये॥२८॥

मिहिरेति ॥ सरोजिनी कमलिनी दिनोदये प्रातःकाले प्रागन्यदलापेक्षया पूर्वविकसितेनैकेन दलेन पत्रेणोपलक्षिता साक्षात्कर्तुरात्मानं पश्यतो जनस्येति मतिं जनयति । इति किम्—इयं मिहिरस्य सूर्यस्य किरणानामाभोगं परिपूर्णतां भोक्तुमनुभवितुम्, अथ च—भक्षयितुं प्रवृत्ततया कृतप्रारम्भतया हेतुभूतया पुरो भोजनादावन्ना(ल)प्रामृतकरणार्थस्यापोशानस्यामृतोपस्तरणमन्त्रोदकस्य ग्रहार्थं कलितो बद्धश्चुलुकः प्रसृतिविशेषो यया एवंभूता किमु । 'भोजने प्रवृत्तेनापोशानक्रियापूर्वमादावन्ते च भोक्तव्यम्' इति स्मृतेः । आपोशानग्रहीता करकमले एकां कनिष्ठामङ्गुलिं प्रसारयति, अन्याश्च संकोचयतीति संप्रदायः । कमलविकाससमयो जातः, तस्मादुद्युध्यस्वेति भावः ॥

तटतरुखगश्रेणीसांराविणैरिव सांप्रतं
सरसि विगलन्निद्रामुद्राजनिष्ट सरोजिनी ।
अधरसुधया मध्ये मध्ये वधूमुखलब्धया
धयति मधुपः स्वादुंकारं मधूनि सरोरुहाम् २९

तटेति ॥ सांप्रतं सरसि सरोजिनी सरसस्तटे तरुषु वर्तमानानां खगश्रेणीनां सांराविणैर्मिलितैः कलकलशब्दैरिव विगलन्ती भश्यन्ती निद्रेव मुद्रा कोरकबन्धो यस्याः, यद्वा—विगलन्ती निद्रायाः संकोचस्य मुद्रा भङ्गी यस्याः, सा त्यक्तनिद्रा, उन्मीलितकमललोचनेवाजनिष्ट जाता । कलकलेन च निद्रितस्य निद्रापयाति । तथा—मधुपो भ्रमरः सरोरुहां मधूनि कमलमकरन्दान् वध्वा भ्रमर्या मुखालब्धयाधरसुधया ओष्ठगतपीयूषेण मध्ये मध्ये स्वादुंकारं स्वादूनि माधुर्यातिशययुक्तानि कृत्वा धयति पिबति । कमलानि विकसितानि, भ्रमराश्च तन्मधूनि भ्रमर्यधरं च पिबन्तीत्यर्थः । मधुप इति साभिप्रायम् । मद्यपा अप्येतादृशा भवन्ति । समन्ताद्रावाः सांराविणानि 'अभिविधौ भाव इनुण्' इतीनुण्नन्तात्स्वार्थे 'अणिनुणः' इत्यण् । स्वादुंकारं, 'स्वादुमि णमुल्' मान्तत्वं च पूर्वस्य 'स्वादुमि' इति निर्देशात् ॥

गतचरदिनस्यायुर्भ्रंशे दयोदयसंकुच-
त्कमलमुकुलक्रोडान्नीडप्रवेशमुपेयुषाम् ।
इह मधुलिहां भिन्नेष्वम्भोरुहेषु समायतां
सह सहचरैरालोक्यन्तेऽधुना मधुपारणाः ३०

गतेति ॥ गतचरदिनस्यातीतानन्तरदिनस्यायुर्भ्रंशेऽवसानकाले सायंसमये दयाया उदयादिव संकुचतां ग्लानानां कमलानां मुकुलानि कलिकास्तेषां क्रोडान्मध्यान्नीडेषु प्रवेशमुपेयुषां प्राप्तानाम् । मकरन्दास्वादलाम्पट्यात्सायंसंध्यासमयेऽपि कमलेषु स्थितानाम्, अनन्तरं च तेषु संकुचितेषु बहिर्निर्गन्तुमशक्तत्वात्संकुचत्कमलगर्भरूपेषु नीडेषु स्थितानामिति यावत् । 'क्रोडम्' इति पाठे विशिष्टकमलक्रोडमेव नीडप्रवेशं गतानाम्, अनन्तरं च रात्रावतीतायामिह प्रातःसंध्यासमये निःशेषेषु ईषद्विकसितेष्वम्भोरुहेषु समायतां स्थितानाम् । यद्वा—इह पूर्वदिनान्तसंकुचितेष्वीषदुन्मिषितेषु सत्सु सुखेन निर्गन्तुं शक्नुवद्भ्यः सकाशादर्धोन्मीलनकमलानि उद्दिश्य समागच्छताम् । मधुलिहामधुना सहचरैः पूर्वदिनान्ते कमलसंकोचात्पूर्वमेव कमलक्रोडान्निर्गतैः सहचरैः सहचरीमिश्रैश्च मित्रकलत्रादिभिः सह मधुना मकरन्देन कृत्वा पारणा उपोषितसंबन्धीनि भोजनान्यालोक्यन्ते । लोकैरिति शेषः । ये रात्रौ कमलबद्धास्ते तत्र मकरन्दाभावान्निर्बन्धवशाच्च कृतोपवासाः, अनियद्धाः सहचरास्तु रात्रौ निद्रावशात्तद्वियोगाद्वा कृतोपवासाः, अतः सर्वेऽपि प्रातर्मिलित्वा विकसितकमलमधुना पारणां कुर्वन्तीत्यर्थः । पूर्वदिनान्ते संकुचितानि कमलानि प्रातः पुनः किंचिद्विकसितानीति प्रसिद्धम् । भ्रमराश्च मधु पिबन्ति, भूयान्समयो जातः, तस्मादुद्युध्यस्वेत्यर्थः । अन्येऽपि कस्मिंश्चिन्महीयसि मृते बन्ध्वादौ वा निबद्धे कृपया संकुचितहर्षा भवन्ति । केचिच्च महागुरुनिपात उपवासं कुर्वाणा गृहमध्यं प्रविश्य दिनान्तरे ज्ञातिभिः सह भुञ्जते । 'ज्ञातिभिः सह भोक्तव्यमेतत्प्रेतेषु दुर्लभम्' इति शास्त्रार्थः सहचरपदेन सूचितः । निगडयन्त्रोऽपि कारागृहेषु भिन्नेषून्मोचितः समागच्छन्समस्य बन्धनवशान्निराहारैर्ज्ञातिभिः सह मधुरैरन्नैः पारणां करोति । क्रोडादिति यथायथं हेतौ ल्यब्लोपे च पञ्चमी । समायताम्, इणः शतृ । सहचरैः, 'पुमान्स्त्रिया' इत्येकशेषः ॥

तिमिरविरहान्पाण्डूयन्ते दिशः कृशतारकाः
कमलहसितैः श्येनीवोन्मीयते सरसी न का ।
शरणमिलितध्वान्तध्वंसिप्रभादरधारणा-
द्गगनशिखरं नीलत्येकं निजैरयशोभरैः ॥३१॥

तिमिरेति ॥ प्राच्यादयो दिक्शब्दास्तिमिरस्य विरहान्नाशात्पाण्डूयन्ते शुभ्रा इवाचरन्ति । अत एव—कृशा अप्रकाशाः किंचिद्दृश्यतारकाः कतिपयनक्षत्राणि यासु । अन्यापि प्रियवियोगात्पाण्डुरा निमग्नातिकृशनेत्रकनीनिका च भवति । तथा—का सरसी कम-

लानां हसितैर्विकासैः कृत्वा श्येनीव श्वेतवर्णेन नोह्यीयते न तत्क्रियते, अपितु—सर्वा अपि सरस्यस्तैः शुभ्रायन्ते । अन्यापि प्रियप्राप्तेः कमलतुल्यमुखहसितैः श्वेता भवति । एकं गगनशिखरं गगनमध्यभागः शरणार्थं स्वपरित्राणार्थं गगनं प्रति मिलितस्य प्रत्यागतस्य ध्वान्तस्य ध्वंसिनी विनाशिनी या सूर्यप्रभा तस्या आदरधारणाद्धेतोर्निर्जरयशोभरैः स्वीयैरकीर्तिसमूहैर्नीलति श्याम इवाचरति। अन्योपि शरणागतं परित्यज्य तद्वैरिणमादरेणाङ्गीकुर्वन्दुर्यशसा श्यामो भवति । दिशः सरांसि च प्रसेदुः, गगनं च नक्षत्राहार्यशोभापगमाज्जिजं नीलिमानं प्राप्तमिति भावः । पाण्डूयन्ते, उपमानादाचारेर्थे 'कर्तुः क्यङ्-' इति क्यङ् 'अकृत्सार्वधातुकयोः-' इति दीर्घः । श्येनी, श्येतशब्दाद्वर्णवाचिनो 'वर्णादनुदात्तात्-' इति ङीप् तस्य नश्च। नीलति, 'नील वर्णे' इति धातुः । आचारक्विबन्तान्नीलशब्दात्क्तिच्वा ॥

सरसिजवनान्युच्चत्पक्षार्यमाणि हसन्तु न
क्षतरुचिसुहृच्चन्द्रं तन्द्रामुपैतु न कैरवम् ।
हिमगिरिटपद्दायादश्रि प्रतीतमदः स्मितं
कुमुदविपिनस्याथो पाथोरुहैर्निजनिद्रया॥३२॥

सरसिजेति ॥ सरसिजवनानि न हसन्तु, अपि तु—विकसन्त्येव । यद्यस्मादुच्चन्नुदित्वरः पक्षः सहायभूतः अर्यमा सूर्यो येषाम् । विकस्वराणीत्यर्थः । अथ च—यदि मित्रस्योदयो भवति, तदा सर्वोपि हर्षवशाद्विहसत्येव । तथा—कैरवं कुमुदं तन्द्रां संकोचं नोपैतु, अपि तु—प्राप्नोत्येव । यतः—क्षतरुचिर्गतलक्ष्मीकः सुहृच्चन्द्रो यस्य तादृशम् । चन्द्रोदयविकासिनः कुमुदस्य चन्द्रक्षये संकोचो युक्त एवेत्यर्थः। अन्योऽपि सुहृत्क्षये मूर्च्छावशान्निमीलति । अथो अथवा पाथोरुहैर्विकसितकमलैः रात्रिसंबन्धिन्या निद्रया कृत्वा कुमुदवनस्यादः प्रत्यक्षदृश्यं स्मितं विकसितं प्रतीतं विनिमयेन गृहीतम् । किंभूतं स्मितम्—हिमगिरेर्हिमाचलस्य टपदां शिलानां दायादांशभागिनी सदृशी श्रीः शोभा यस्य । शुभ्रतरमित्यर्थः । कमलानां रात्रौ निद्राभूत, कुमुदानां विकासः । प्रातस्तु कमलानां विकासः, कुमुदानां च संकोचो दृश्यते, ततः स्वीयां निद्रां कुमुदेभ्यो दत्वा कमलैस्तद्विकासः परिवर्त्य गृहीत इति संभाव्यत इत्यर्थः । सूर्य उदितः, कमलानि विकसितानि, कुमुदानि च संकुचितानीति भावः । प्रतीतम्, प्रतिपूर्वादिणो निष्ठा । 'प्रतीष्टम्' इति च पाठः । अर्थः पूर्वोक्त एव ॥

धयतु नलिने माध्वीकं वा न वाभिनवागतः
कुमुदमकरन्दौघैः कुक्षिंभरिर्भ्रमरोत्करः ।
इह तु लिहते रात्रीतर्षं रथाङ्गविहंगमा
मधु निजवधूवक्त्राम्भोजेऽधुनाधरनामकम् ३३

धयत्विति ॥ अभिनवो नूतनः प्रभात आगतो भ्रमरोत्करो नलिने वर्तमानं माध्वीकं मकरन्दं धयतु पिबतु वा न वा। यतः—रात्रौ कुमुदमकरन्दौघैः कुक्षिंभरिः परिपूर्णोदर आकण्ठतृप्तः। रात्रौ कुमुदमकरन्दवृन्दैः पूरितोदरत्वात्प्रातर्मधु पिबतु वा मा पिबतु वा । न तत्रास्माकमाग्रह इत्यर्थः । अन्योऽप्याकण्ठतृप्तोऽतिथिर्भुङ्क्ते न वा, न तत्रादरः । रथाङ्गविहंगमास्तु रात्रीतर्षं सकलां रात्रिं तर्पित्वा वियुक्तत्वात्कुमुदमकरन्दं परित्यज्य पिपासयैव स्थित्वा इह प्रत्यक्षदृश्ये निजवधूवक्त्रलक्षणेऽम्भोजे वर्तमानमधरनामकमोष्ठसंज्ञं मधु अधुना प्रातःसमये लिहत आस्वादयन्ति । एतदुक्तम् । तावतैव चाम्भोजस्यापि कृतार्थत्वं जातमित्यर्थः । अन्यत्रापि तृप्तापेक्षयोपोषितभोजनं युक्ततरं भवति । भ्रमरा मकरन्दमास्वादयन्ति, चक्रवाकाश्च प्रातर्वियोगापगमात्कमलमकरन्दमनादृत्य निजसहचरीश्चुम्बन्तीति भावः । 'फलेग्रहिरात्मंभरिश्च' इति चात्कुक्षिंभरिः । रात्रीतर्षम्, 'अस्यतितृषोः-' इति णमुल, 'तृतीयाप्रभृतीनि-' इति समासः ॥

जगति मिथुने चक्रावेव स्मरागमपारगौ
नवमिव मिथः संभुञ्जाते वियुज्य वियुज्य यौ ।
सततममृतादेवाहाराद्यदापदरोचकं
तदमृतभुजां भर्ता शंभुर्विषं बुभुजे विभुः॥३४॥

जगतीति ॥ जगति त्रैलोक्यमध्ये चक्रावेव मिथुने स्त्रीपुंसौ स्मरागमपारगौ कामशास्त्रपारगामिनौ तद्रहस्यवेदिनौ नान्यौ । यद्वा—स्मरागमपारगौ चक्रवाकावेव जगति मिथुने । नान्ये एतादृशे चतुरे मिथुने स्त इत्यर्थः । कुत एतज्ज्ञातमित्यत आह—यौ चक्रवाकस्त्रीपुंसौ वियुज्य वियुज्य पुनः पुनरन्योन्येन सह रात्रौ वियोगं प्राप्य मिथोऽन्योन्यं नवमिवातिपरिचयजन्यावज्ञाशून्यं सातिस्पृहमिव संभुञ्जाते सुरतसुखमनुभवतः । अजस्रकामसेवनाद्विरागो भवेदिति वियुज्य संभोगः प्रत्यग्रसंभोगवद्रसातिशयचमत्कारकारी भवति, कामशास्त्ररहस्यं ज्ञात्वैव तावेवं कुरुत इत्यर्थः । अत्र दृष्टान्तः—यद्यस्मादमृतभुजां केवलपीयूषाहाराणां सुराणां भर्ता स्वामी । सुलभतरामृत इति यावत् । विभुर्व्यापकः समर्थः । विषभक्षणेप्यसंभावितोपद्रव इति यावत् । स शंभुर्नीरोगकरणद्वारा सर्वेषामारोग्यसुखकार्यसंभावितरोगोपीश्वरः सततममृतलक्षणादेवाहाराद्भक्ष्यादरोचकममृतात्यन्तानभिलाषरूपं रोगमापत्प्राप । तत्तस्मात्तत्परिहारार्थं विषं बुभुजे । सततमधुरतरास्वादजन्यारुचिपरिहारार्थमेव स कालकूटं भक्षितवान् । अनन्तरं च पुनरमृतभक्षणे प्रत्यग्रैव रुचिस्त(र्य)था जायते तथा वियोगपूर्वः संभोगो नितरां रुचिमुत्पादयतीति बुद्ध्वा चक्रवाकाभ्यां क्रियत इति तावेव कामशास्त्ररहस्यज्ञाविति भावः । पारगौ, 'भ्रम्ताल्यन्ता-' इति डः । 'संभुञ्जाते', 'भुजोऽनवने' इति तङ् । अनेन संभोगस्य वियोगादेव नूतनत्वं भवतीति सूच्यते ॥

विशति युवतित्यागे रात्रीमुचं मिहिकारुचं
दिनमणिमणिं तापे चित्तान्निजाच्च यियासति ।
विरहतरलजिह्वा बद्धाह्वयन्त्यतिविह्वला-
मिह सहचरीं नामग्राहं रथाङ्गविहंगमाः॥३५॥

विशतीति ॥ युवतित्यागे चक्रवाकनिष्ठे स्त्रीवियोगे मिहिकारुचं शीतांशुं विशति सति, यतो—रात्रीमुचं रात्रीलक्षणाप्रियात्यागिनम्, तथा—वियोगजन्ये तापे परितापे औष्ण्ये च निजाच्चित्ताच्चक्रवाकहृदयात्सकाशादिनमणिमणिं सूर्यकान्तं यियासति जिगमिषति सति विरहेण तरलन्ती तरलेवाचरन्ती विह्वलीभवन्ती स्खलन्ती जिह्वा येषां ते रथाङ्गविहंगमाः विरहेणातिविह्वलां सहचरीं चक्रवाकीं नामग्राहं स्वसंकेतेन नाम गृहीत्वेह प्रभाते क्रीडासरसि वा बहु वारं वारं आह्वयन्त्याकारयन्ति । अन्योप्यतिवि-

शृङ्खलो वारं वारमाकार्यते । श्वसिति न वेति संदेहात् । प्रातश्चक्रवाकानां संयोगः परितापत्यागः परस्पराह्वानम्, चन्द्रे धूसरत्वम्, सूर्यकान्ते तापश्च । 'प्रालेयं मिहिका' इत्यमरः । रात्रीमुचम्, 'क्विप्च' इति क्विप् । रुगिति संपदादित्वात् । मिहिका रुग्यस्येति समासः । तरलज्जिह्वा, तरलेवाचरतीत्याचारक्विबन्ताच्छतरि (ङीप्यपि) पुंवत् । आह्वयन्ति, स्पर्धाभावात्तङभावः ॥

स्वमुकुलमयैर्नेत्रैरन्धंभविष्णुतया जनः
किमु कुमुदिनीं दुर्व्याचष्टे रवेरनवेक्षिकाम् ।
लिखितपठिता राज्ञो दाराः कविप्रतिभासु ये
शृणुत शृणुतासूर्यंपश्या न सा किल भाविनी ॥

स्वेति ॥ जनो लोकः स्वमुकुलमयैरात्मीयकलिकारूपैर्नेत्रैः कृत्वान्धंभविष्णुतया अनन्धाया अप्यन्धत्वाङ्गीकाराद्धेतोः रवेरनवेक्षिकामनवलोकिकां कुमुदिनीं किमु किमर्थं दुर्व्याचष्टे दुष्टां कथयति । अवश्यदर्शनीयपवित्रसूर्यादर्शननियमादियं मित्रोदयं न सहत इति लोकः किमिति निन्दति, अपित्वयुक्तेयं निन्देत्याक्षेपः । नु अहो किं निन्दतीति वा । अन्धंभविष्णुतयाऽविचारतया रहस्यमजानन्नेव किमिति निन्दतीति जनविशेषणं वा । कथमयुक्तमित्यत आह—हे श्रोतारः यूयं शृणुत तस्याः सूर्यादर्शने हेतुमाकर्णयत । ये राज्ञो नृपस्य दाराः कवीनां पाणिन्यादीनां प्रतिभासमुत्पन्नेषु व्याकरणादिग्रन्थेषु विषये लिखितास्तच्छिष्यैः पठिताश्च, अतोऽवश्यदर्शनीयं सूर्यमपि न पश्यन्तीत्यसूर्यंपश्या राजदारा इत्येव लिखिताः, तच्छिष्यैश्च तथैव पठिताः । ननु प्रकृते किमित्याशङ्क्याह—सा कुमुदिनी किलं प्रसिद्धं न भाविनी भविष्यति, अर्थाद्राज्ञो दाराः, अपि तु राज्ञश्चन्द्रस्य, अथ च—नृपस्य दारा भवत्येव । राजमहिष्यो ह्यतिसुरक्षितत्वादसूर्यंपश्याः, इयमपि तथा । तस्मादेतस्या अप्यसूर्यंपश्यता युक्तेति रहस्यानभिज्ञो जनो वृथैवैता निन्दतीत्यर्थः । किलशब्दः किमर्थो वा । अत्र य इति कुमुदिनीपरामर्शेपि दारैः सामानाधिकरण्याद्बहुवचनम् । येति पाठः समीचीनः । पठिता, एकवचनं बहुवचनं वा । सूर्योदयवशात्कुमुदिनी संकुचितेति भावः । अन्धंभविष्णुतया, 'कर्तरि भुवः खिष्णुच्–' इति च्व्यर्थेऽन्धशब्द उपपदे भुवः खिष्णुच् खित्वान्मुम् । अवेक्षिका, ण्वुलि 'प्रत्ययस्थात्–' इति कात्पूर्वस्यैत्वम् । लिखितपठिताः, कर्मधारयो द्वन्द्वो वा । असूर्यंपश्याः, 'असूर्यललाटयोः–' इति खश्, खित्वान्मुम् । अत एव ज्ञापकात्क्रियायोगिनोऽपि नञः समासः ॥

चुलुकिततमः सिन्धोर्भृङ्गैः करादिव शुभ्यते
नभसि बिसिनीबन्धोरन्ध्रच्युतैरुदबिन्दुभिः ।
शतदलमधुस्रोतःकच्छद्वयीपरिरम्भणा-
दनुपदमदःपङ्काशङ्काममी मम तन्वते ॥ ३७ ॥

चुलुकितेति ॥ गगने गच्छद्भिर्भृङ्गैरुदबिन्दुभिरिव नभसि शुभ्यते दीप्यते । किंभूतैरुदबिन्दुभिः—चुलुकः कृतश्चुलुके धृत्वा पीतस्तमःसिन्धुस्तिमिरसमुद्रो येन तस्य बिसिनीबन्धोः पद्मिनीमित्रस्य सूर्यस्य करात्किरणादेव हस्ताद्रन्ध्रेभ्योऽङ्गुल्यन्तरालविवरेभ्यश्च्युतैर्गलितैः । चुलुकेन पीततमःसिन्धोरुपरिवर्तमानस्य रवेः कराङ्गुलीविवरेभ्योऽधो गलिताः कृत्स्ना जलबिन्दव इव भृङ्गा गगने शोभन्त इत्यर्थः । चुलुकितेति करविशेषणं वा । अनुपदं गगनात्सकाशात्कमलानि प्रति पातानन्तरं शतदलाख्यान्यतिस्थूलानि कमलानि तेषां मधुस्रोतसो मकरन्दप्रवाहस्य कच्छद्वयी मकरन्दार्द्रभागद्वयं यत्तटद्वयं तस्याः परिरम्भणात्संश्लेषादुभयतस्तत्र लगनाद्धेतोरमी भृङ्गा अदः—पङ्काशङ्काममुष्य पीतस्य तमःसिन्धोरधःस्थितावशिष्टकर्दमसंभावनां मम वैतालिकस्य मम तन्वते विस्तारयन्ति । सकलेऽपि तमोजले पीतेऽवशिष्टतदीयपङ्क इव भृङ्गाः शोभन्त इत्यर्थः । अमुष्या मकरन्दप्रवाहकच्छद्वय्याः पङ्क इति वा । प्रवाहतटद्वये पङ्को युक्तः । भृङ्गाश्च मकरन्दस्योपरि नोपविशन्ति; किंतु अभित इति तेषां जातिः । प्रातःकालो जातः, अन्धकारः साकल्येन विनष्टः, भ्रमरास्तरुनीडेभ्यो निर्गत्य गगनमुड्डीय मधुपानार्थं कमलान्युद्दिश्यायान्तीति भावः । चुलुकित इति 'तत्करोति–' इति ण्यन्तात्क्तः । शुभ्यते, 'शुभङ् दीप्तौ' भावे यक् ॥

घुसृणसुमनःश्रेणीश्रीणामनादरिभिः सरः-
परिसरचरैर्भासां भर्तुः कुमारतरैः करैः ।
अजनि जलजामोदानन्दोत्पतिष्णुमधुव्रता-
वलिशबलनाद्गुञ्जापुञ्जश्रियं गृहयालुभिः ॥३८॥

घुसृणेति ॥ घुसृणसुमनसः कुङ्कुमकुसुमानि तासां श्रेणिस्तस्याः श्रीणां कान्तीनामनादरिभिरनादरणशीलैस्ताभ्योपि रक्ततरैः सरसःपरिसरचरैस्तीरसंचरणशीलैः कुमारतरैरतिबालैर्भासां भर्तुः करैः सूर्यकिरणैर्जलजामोदो गगनावगाहिकमलपरिमलस्तद्विषय आनन्दस्तेनोत्पतिष्णुरुत्पतनशीला मधुव्रतावलिस्तया शबलनाम्मिश्रणाद्धेतोर्गुञ्जापुञ्जश्रियमर्धरक्तार्धकृष्णगुञ्जाराशिशोभां गृहयालुभिर्ग्रहणशीलैरजनि । तत्सदृशैर्जातमित्यर्थः । बाला अपि सुमनसां धीराणामप्यनादरिणो भवन्ति, बाला अपि रक्तकरा भवन्तीति केचित् । अजनि, भावे चिण् । उत्पतिष्णुः, 'अलंकृञ्–' इतीष्णुच् । शबलनं, 'तत्करोति–' इति ण्यन्तान्नपुंसके भावे ल्युट् ॥

रचयति रुचिः शोणीमेतां कुमारितरा रवे-
र्यदलिपटली नीलीकर्तुं व्यवस्यति पातुका ।
अजनि सरसी कल्माषी तद्ध्रुवं धवलस्फुट-
त्कमलकलिकापण्डैः पाण्डूकृतोदरमण्डला ३९

रचयतीति ॥ यद्यस्माद्रवेः कुमारितरातिबाला रुचिरेतां सरसीं शोणीं रक्तवर्णां रचयति । यस्माच्च कमलमकरन्दास्वादार्थं पातुका अलिपटली भृङ्गश्रेणी स्वसंबन्धादेतां नीलीकर्तुं व्यवस्यति । यतश्चेयं धवलानां स्फुटन्तीनां विकसन्तीनां कमलकलिकानां पण्डैः समूहैः पाण्डूकृतमुदरमण्डलं मध्यदेशो यस्याः सैतादृशी । तस्माद्ध्रुवं निश्चितमियं सरसी कल्माषी कर्बुरेवाजनि जाता । रक्तकृष्णश्वेतवर्णमिश्रणात्कर्बुरत्वोत्प्रेक्षा । ध्रुवमुत्प्रेक्षायाम् । बालातपो जातः, भ्रमराः परितो भ्रमन्ति, कमलानि विकसितानीति भावः । 'चित्रं किर्मीरकल्माष–' इत्यमरः । शोणीं, 'शोणात्प्राचाम्' इति ङीष् । कुमारितरा, 'घरूप–' इति ह्रस्वः । पटलकल्माषौ गौरादी ॥

कमलकुशलाधाने भानोरहो पुरुषव्रतं
यदुपकुरुते नेत्राणि श्रीगृहत्वविवक्षुभिः ।
कविभिरुपमानादप्यम्भोजतां गमितान्यसा-
वपि यदतथाभावान्मुञ्चत्युलूकविलोचने ॥४०

कमलेति ॥ कमलमात्रस्य कुशलाधाने आनुकूल्याचरणे भानोरहो अत्याश्चर्यरूपं पुरुषसंबन्धि व्रतं नियमः । अङ्गीकृतपरिपालनशीलत्वमितियावत् । यं दृष्ट्वाऽहो आश्चर्यरूपः पुरुष इति सर्वे वदन्ति । कुतो ज्ञातमत आह—यद्यस्मात्तात्त्विकानि कमलानि विकासयतीति किं वाच्यम् । किंतु श्रियोः कान्तिलक्ष्म्योर्गृहत्वं स्थानतां विवक्षुभिर्वक्तुमिच्छुभिर्व्यासवाल्मीकिकालिदासादिभिः कविभिरुपमानात्किंचिच्छ्रीगृहत्वादिगुणसादृश्यादप्यम्भोजतां कमलत्वं गमितानि प्रापितान्यारोपितकमलत्वान्यपि नेत्रकमलानीति निर्दिष्टानि लोकनेत्राण्यसौ रविरुपकुरुते उन्मीलयति । उदित्वरे हि सूर्ये लोकनेत्राण्युन्मीलन्ति । अथ च—घटाद्यर्थग्रहणसमर्थानि करोति । यत आलोकसहकृतमेव चक्षुः पदार्थग्रहणसमर्थम् । यदप्यतथाभावाच्छ्रीगृहत्वाभावात्कविभिः कमलत्वेनानुक्तत्वादुलूकविलोचने नोन्मीलयति, न च पदार्थान्ग्राहयति । यन्नोलूकस्य दृष्टिस्तत्रालक्ष्मीरिति लोकप्रसिद्धेस्तन्नेत्रयोः श्रीगृहत्वं दूरं निरस्तम् । सूर्येण कमलानि कमलतुल्यानि लोकनेत्राणि विकास्योलूकनेत्राणि कमलगुणयोगाभावादविकास्यान्वयव्यतिरेकाभ्यां स्वप्रतिज्ञा सत्या कृता । एवंविधः सत्यप्रतिज्ञः कोपि नास्तीत्यर्थः । कमलानि विकसितानि, सर्वोपि लोकः प्रबुद्धः, कौशिकनेत्रे च निमीलिते । प्रातःकालो जात इति भावः । श्रीगृहत्वविवक्षुभिः, 'द्वितीया' इति योगविभागात्समासः । उपमितिरुपमानं । नपुंसके भावे ल्युट । उपमीयतेऽनेनेत्युपमानं सादृश्यमिति वा ॥

यदतिमहती भक्तिर्भानौ तदेनमुदित्वरं
त्वरितमुपतिष्ठस्वाध्वन्य त्वमध्वरपद्धतेः ।
इह हि समये मन्देहेषु व्रजन्त्युदवज्रता-
मभि रविमुपस्थानोत्क्षिप्ता जलाञ्जलयः किल ॥

यदिति ॥ यद्यदि त्वं भानावतिमहती भक्तिर्यस्यैवंभूतो वर्तसे तत्तर्हि हे अध्वरपद्धतेर्यज्ञमार्गस्याध्वन्य महायाज्ञिक नल, उदित्वरमुदयशीलमेनं सूर्यं त्वरितमुपतिष्ठस्व पूजय । शीघ्रमुपस्थाने हेतुमाह—हि यस्मादिह समये प्रभाते किल प्रसिद्धं रविमभिलक्ष्मीकृत्योपस्थानमग्रेणोर्ध्वक्षिप्ता जलाञ्जलयो मन्देहाख्येषु राक्षसेषूदवज्रतां जलरूपाशनिभावं व्रजन्ति वज्रीभूय तान्भस्मीकुर्वन्तीति श्रुतावुक्तमित्यर्थः । 'तिस्रः कोट्योऽर्धकोटी च मन्देहा नाम राक्षसाः' इति पुराणं च । तस्मादुदयात्पूर्वं शीघ्रमुपतिष्ठस्वेत्यर्थः । 'अध्वन्यम्' इति पाठे—अध्वरपद्धतेरध्वानमलंगामिनम् । भक्तिशब्दस्य प्रियादित्वात्पुंवद्भावाभावः । अध्वन्यम्, अलंगाम्यर्थे 'अध्वनो यत्खौ' इति यत् । उदवज्रेति, 'मन्थौदन–' इत्युदकस्योदादेशः । 'अभिरभागे' इत्यभेः कर्मप्रवचनीयत्वाद्द्वितीया ॥

उदयशिखरिप्रस्थावस्थायिनी खनिरक्षया
शिशुतरमहोमाणिक्यानामहर्मणिमण्डली ।
रजनिदृषदं ध्वान्तश्यामां विधूय पिधायिकां
न खलु कतमेनेयं जाने जनेन विमुद्रिता ॥४२

उदयेति ॥ इयमहर्मणिः सूर्यस्तस्य मण्डली उदयशिखरिण उदयाचलस्य प्रस्थे सानुन्यवस्थायिनी वर्तमानाऽक्षया भूयसी शिशुतराणि महांसि तेजांसि तान्येव माणिक्यानि तेषां खनिरुत्पत्तिर्भूमिर्ध्वान्तेन तिमिरेण ध्वान्तवच्च श्यामां पिधायिकामाकरद्वाराच्छादिकां रजनिरूपां दृषदं शिलां विधूयापनीय कतमेन केन जनेन विमुद्रितोद्घाटितेति न खलु नैव जाने । रात्रिविगमे यतो दृश्यत इत्यर्थः । वाक्यार्थः कर्म । न जाने । अर्थात्तं जनमित्यर्थ इति वा । अन्यापि माणिक्यादिखनिः पर्वतप्रस्थावस्थायिनी कृष्णतरशिलापिहिता केनापि भाग्यवतोद्घाट्यते । अतिशयितः कः कतमो ब्रह्मा तेन विमुद्रितेत्यहं न जाने, अपित्वेवमेव जानामि । कालपरिवर्तकारिणा ब्रह्मणैवोद्घाटितेत्यर्थ इति काकुर्वा । खनिः खलु खनिरेवेत्युत्प्रेक्षा वा । कतमः डतमच्, अतिशये स्वार्थे वा तमब्वा ॥[1]

सुरपरिवृढः कर्णात्प्रत्यग्रहीत्किल कुण्डल-
द्वयमथ खलु प्राच्यै प्रादान्मुदा स हि तत्पतिः ।
विधुरुदयभागेकं तत्र व्यलोकि विलोक्यते
नवतरकरस्वर्णस्रावि द्वितीयमहर्मणिः ॥ ४३ ॥

सुरेति ॥ सुरपरिवृढः शक्रः कर्णात्कुण्डलद्वयं कर्णभूषणयुगं ब्राह्मणवेषं धृत्वा प्रतिग्रहरूपेणाग्रहीत् । किलेति पुराणादौ । अथ प्रतिग्रहानन्तरं मुदा तत्कुण्डलद्वयं खलु निश्चितं प्राच्यै दिशे प्रादात् । हि यस्मात्स शक्रस्तस्याः प्राच्याः पतिर्धवो रक्षिता च । प्रेयान्प्रियायै प्रीत्या निजकर्णादिभूषणं प्रयच्छति । तस्यै दत्तमिति कुतो ज्ञातमत आह—तत्र प्राच्यां तयोर्द्वयोर्मध्ये वा सायमुदयभागुदित्वर आरक्तकिरणरूपमेकं कुण्डलं व्यलोकि दृष्टम् । प्रातरहर्मणिर्नवतरास्तत्कालनिर्गताः करा रक्ततरकिरणास्तद्रूपस्वर्णस्रावि सुवर्णस्रवणशीलं तादृशमेव द्वितीयं कुण्डलं विलोक्यते । तस्मात्तस्यै तद्वयं तेन प्रत्तमित्यहं शङ्क इत्यर्थः । सूर्यस्य कुण्डलसम(र्थ)त्वमवश्यं वक्तव्यम्, प्रसङ्गाच्चन्द्रस्य कुण्डलत्वम् । बालबरकिरणः सूर्य उत्तमसुवर्णस्राविकर्णकुण्डलमिव शोभत इति भावः । कर्णेनेन्द्राय कुण्डलद्वयं दत्तमित्यारण्यके पर्वणि कथा ॥

दहनमविशद्दीप्तिर्यास्तं गते गतवासर-
प्रशमसमयप्राप्ते पत्यौ विवस्वति रागिणी ।
अधरभुवनात्सोद्धृत्यैषा हठात्तरणेः कृता-
मरपतिपुरप्राप्तिर्धत्ते सतीव्रतमूर्तिताम् ॥ ४४ ॥

दहनमिति ॥ या दीप्ती रागिण्यारक्ता सती विवस्वति सूर्यलक्षणे पत्यौ गतवासरप्रशमे पूर्वदिनावसाने सायंकाले प्रशमसमयमस्तमयकालं प्राप्ते, अत एव—अस्तं विनाशमस्ताचलं वा गते प्राप्ते सति । 'अग्निर्ज्योतिः–' इत्याद्यग्निहोत्रमन्त्रादिप्रामाण्याद्दहनमविशत् । सैषा दीप्तिरधरभुवनात्पातालात्सकाशाद्धठाद्बलात्कारेणार्यात्तरणिमेवोद्धृत्योदयं प्रापय्य तरणेरग्रे कृतामरपतिपुरस्य

[1] 'अत्र सूर्यमण्डल्यादीनां खनित्वाद्यारोपाद्रूपालंकारः' इति जीवातुः ।

स्वर्गस्य प्राप्त्या वा प्राप्तिर्यया एवंभूता तीव्रतया तीक्ष्णतया सह वर्तमाना मूर्तिर्यस्यास्तां धत्ते । सूर्ये ऊर्ध्वदेशं प्राप्ते दीप्तिः खरतरा जातेति भावः । या नारी भर्तरि विनाशसमयं प्राप्ते विनष्टे सति तस्मिन्ननुरागिणी सती जन्मान्तरेऽपि तत्प्राप्त्यर्थमग्निप्रवेशं कुरुते सा दुष्कृतैः पातालप्राप्तमपि निरयपतितं 'व्यालग्राही यथा व्यालम्–' इत्यादिवचनप्रामाण्याद्विरयाद्बलादुद्धृत्य तस्य कृतस्वर्गप्राप्तिः सती सतीनां पतिव्रतानां व्रतमेव मूर्तिः शरीरं यस्याः, सती गौरी तस्या व्रतयुक्ता मूर्तिर्यस्यास्तां धत्ते । गौरीवदियमपीत्यर्थः । समयप्राप्ते, 'प्राप्तापन्ने च द्वितीयया' इति समासः ॥

बुधजनकथा तथ्यैवेयं तनौ तनुजन्मनः
पितृशितिहरिद्वर्णाद्याहारजः किल कालिमा ।
शमनयमुनाक्रोडैः कालैरितस्तमसां पिबा-
दपि यदमलच्छायात्कायादभूयत भास्वतः४५

बुधेति ॥ तनुजन्मनोऽपत्यस्य तनौ वर्तमानः कालिमा श्यामत्वं किल प्रसिद्धं निश्चितं वा पितुः पित्रोर्वा शितिहरिद्वर्णादीनां कृष्णनीलवर्णपत्रशाकादीनां य आहारो भक्षणम् । शिति हरिद्वर्णे यदाद्यमदनीयं पत्रशाकादि वा । तस्माज्जातः 'स श्यामो मिश्रातनयत्वात्' इत्यादि बुधानामुदयनाचार्यादीनामियं कथा गोष्ठी तथ्यैव सत्यैव । यद्यस्माद्धेतोर्भास्वत इतः प्रत्यक्षदृश्यादमलच्छायादुज्ज्वलकान्तेः शुक्लभास्वरादपि तमसां पिबात्तमिस्रैकाहारात्कायाच्छमनयमुनाक्रोडैर्यमयमुनाशनैश्चरैः कालैः श्यामैरभूयतो प्यन्नम् । सूर्यकायस्योज्ज्वलत्वेपि श्यामतमतमीतमिस्राहारपरिणतिवशाद्यमादिभिरपत्यैः श्यामैर्यतो जातम् । तस्मादियं पण्डितकथा सत्यैवेत्यर्थः । सर्वमपि तमः सूर्येण नाशितमिति भावः । आद्यम्, अदेः 'ऋहलोर्ण्यत्' । काली च कालौ चेति 'पुमान्स्त्रिया' इत्येकशेषः । तमसां कर्मणि षष्ठी । अभूयत भावे तङ् । 'क्रोडः कालोऽसितः पङ्कुर्मन्दश्छायासुतः शनिः' इत्यमरशेषैः ॥

अभजत चिराभ्यासं देवः प्रतिक्षणदात्यये
दिनमयमयं कालं भूयः प्रसूय तथा रविः ।
न खलु शकिता शीलं कालप्रसूतिरसौ पुरा
यमयमुनयोर्जन्माधानेऽप्यनेन यथोज्झितुम्४६

अभजतेति ॥ अयं रविर्देवः क्षणदा रात्रिस्तस्या अत्यये प्रत्यूषं प्रति । रात्र्यवसान इत्यर्थः । दिनरूपं कालं युग्यादिलक्षणसमयम्, अथ च—तद्रूपं श्यामं वस्तु भूयो बहुतरं यथा तथा पौनःपुन्येन वा प्रसूयोत्पाद्य चिरं बहुकालमभ्यासं तथा तेन प्रकारेणाभजताशिश्रियत् । यथा येन प्रकारेण पुरा पूर्वं कालः प्रसूतिर्यस्य, अथ च—काली श्यामा प्रसूतिर्यस्यैवंभूतोऽसौ सूर्यः । यमयमुनयोरपि प्रसविष्यतोर्जन्माधाने जन्मार्थं बीजक्षेपसमयेऽप्यनेन चिराभ्यासेन हेतुना शीलं कालोत्पादनस्वभावमुज्झितुं खलु निश्चितं न शकिता न समर्थो भविता । कालप्रसूतिस्वभावः सूर्यः स्वभावस्य दुरतिक-

१ इदं तु चिन्त्यम्, प्राप्तशब्दस्य पूर्वनिपातापत्तेः । तस्मात् 'द्वितीयाश्रिता–' इति समासः । २ 'अत्र प्रस्तुतदीप्तिविशेषणसाम्यादप्रस्तुत (सती)-प्रतीतेः समासोक्तिरलंकारः' इति जीवातुः । ३ 'अत्र शमनादिकालिम्नस्तत्पितृतिमिरभार(राहार)परिणतिपूर्वकत्वोत्प्रेक्षा' इति जीवातुः ।

मत्वात्तावपि कालावुदपादयदित्यर्थैः । उदयमानेन सूर्येण दिवसः कृत इति भावः । प्रातःकाले क्रियमाणोऽभ्यासः पटुतरो भवति । चिराभ्यासम्, मयूरव्यंसकादित्वात्समासः । यद्वा—अकारान्तस्य चिरशब्दस्य 'अत्यन्तसंयोगे च' इति समासः । प्रतिक्षणदात्यये, वीप्सायामव्ययीभावे 'नाव्ययीभावात्–' इति सुपो न लुक् । 'अत्ययम्' इति पाठे पक्षे 'तृतीयासप्तम्योः–' इत्यम् । कालप्रसूतिः पुंवत् ॥

रुचिरचरणः सूतोरुश्रीसनाथरथः शनिं
शमनमपि स त्रातुं लोकानमूत सुताविति ।
रथपदकृपासिन्धुर्बन्धुर्दृशामपि दुर्जनै-
र्यदुपहसितो भास्वान्मान्हसिष्यति कः खलः

रुचिरेति ॥ सुजनैरेवंभूतो यो भास्वानिति संस्तुतः दुर्जनैर्यस्मादेवमुपहसितः, तस्मादतितुच्छान्परवर्णनोपजीविनः को नाम खलो नोपहसति, अपि तु—सर्वोऽप्युपहसत्येव । यथा—उदिते सूर्ये सद्भिः सूर्यस्यार्हणा क्रियते, तथा खलैर्न । एवं सुच्छा एते स्वोदरभरणार्थं यत्किंचिद्वदन्तीत्यस्माकं खलैर्निन्दायां कृतायां भवादृशै राजशिरोमणिभिरस्माकमर्हणा क्रियत एवेत्यर्थः । एवं कथं स्तुतः कथमुपहसित इत्यत आह—स सूर्यः रुचिराश्चरणा लक्षितलक्षणया किरणा यस्य, तथा—सूतस्यारुणस्योर्व्या महत्या श्रिया, सूता सूर्येणैव प्रसूता उर्वी श्रीमत्या सनाथोऽलंकृतो रथो यस्य सः । तथा—शनिं शमनमपि शनैश्चरदण्डधरौ सुतौ लोकांस्त्रातुमसूत । शनिर्हि शुत्यादिसिद्धया ग्रहेषु लोकपालतया लोकान्रक्षति, यमोऽपि दुष्टादुष्टयोर्निग्रहानुग्रहौ कुर्वन् धर्माधर्माचरणप्रवृत्तिनिवृत्तिजननद्वारा रक्षति । एतादृशौ परोपकारपरौ पुत्रौ प्रासूत । तथा—रथपदानामनाथानां चक्रवाकानां कृपासिन्धुर्दयासमुद्रः, रथस्य पदेन व्यवसायेन गत्या जगतो दृशां सकलपदार्थग्रहणसहकार्यालोकसंपादनद्वारा दृशां सर्वजननेत्राणां बन्धुर्मित्रम् । एवंभूतः सुन्दरः परोपकारकरणैकस्वभावोऽपीति स्तुतिपक्षः ॥

रुचिस्तेजोरूपः ॥ तापकर इति यावत् । तथा—अचरणश्चरणरहितः, यद्वा—विपरीतलक्षणया रुचिरौ चरणौ यस्य, पुराणादौ चरणाकृत्यादिध्याने कुष्ठादिदुष्टफलश्रवणात् । ध्यानेऽप्यचरण एव सूर्यः, विश्वकर्मणा कुन्द आरोपितस्य सूर्यस्य तेजसां दुःसहत्वाच्चरणाकारो न निर्मित इति वा । अन्धं प्रति सुनेत्र(त्र)वचनवदचरणस्यापि रुचिरचरणत्वोक्त्योपहासः । तथा—सूतस्यानूरोः सारथेरूरुशोभया समाधो रथो यस्य स इत्यपि विरुद्धलक्षणा तथा—शनेः क्रूरग्रहत्वाच्चिरकालभोग्यदुःखदत्वात्, यमस्यापि जगत्प्राणहरणशीलत्वात्, परपीडाहरणैकस्वभावौ शनीशमनौ पुत्रौ लोकांस्त्रातुमसूतेत्यपि विरुद्धलक्षणा । तथा—तिर्यग्योनिपक्षिविशेषचक्रवाकाणामेव दयासिन्धुः नान्येषां तापकरत्वात् । तथा—दृशामेव बन्धुः, नान्येषाम् । यद्वा—तेजोभरेण दृष्टिं प्रति घातकारित्वाद-

१ 'अत्र कालशब्दे वाच्यप्रतीयमानयोर्यथाध्यवसायेन भगवतो भानोः प्रत्यहं कालप्रसूत्यभ्यासादपरेऽपि शमनयमुनादिषु कालप्रसविष्णुत्वमुत्प्रेक्ष्यते, तत्र कालयोः कृष्णानेहसोरभेदाध्यवसाय इति तयोरेकवचनेनात्र संकरः' इति जीवातुः ।

बन्धुरपि इशां बन्धुरित्यपि विरुद्धलक्षणेत्युपहासपक्षः । एवंभूतः सूर्यः समुदेतीति भावः ॥

शिशिरजरुजां घर्मं शर्मोदयाय तनूभृता-
मथ खरकरश्यानास्यानां प्रयच्छति यः पयः ।
जलभयजुषां तापं तापस्पृशां हिममित्ययं
परहितमिलत्कृत्यावृत्तिः स भानुरुदञ्चति ४८

शिशिरेति ॥ सोयं भानुरुदञ्चत्युदेति । स कः—यः शिशिरतौ शिशिरं हिमं तस्माज्जाता रुक् पीडा येषां तेषां तनूभृतां जनानां शर्मणः सुखस्योदयाय प्राप्तये वसन्तनिदाघसंबन्धिनं घर्ममुष्णं क्रमेण प्रयच्छति, अथानन्तरं च वसन्तनिदाघसंबन्धिनः खरास्तीक्ष्णतराः कराः सूर्यकिरणास्तैः श्यानं शुष्कं म्लानमास्यं मुखं येषां तेषां देहिनां सुखाय पयो वर्षासंबन्ध्युदकं दत्ते, ततो जलभयजुषां वर्षासंबन्धिजलभीतानां तापं दत्ते, ततः—तापस्पृशां शारदतापवतां देहिनां हेमन्ते हिमं दत्ते, एवंप्रकारेण परेभ्यो यद्धितं तस्मिन्विषये मिलन्ती पौनःपुन्येन घटमाना कृतेः शीततापहिमदानरूपपुरुषव्यापारस्यावृत्तिरावर्तनं यस्य । यद्वा—कृत्यानां शीतादिदानरूपाणां कार्याणामावृत्तिर्यस्यैवंभूतः । परोपकारपरः सूर्य उदेतीत्यर्थः । श्यानेति द्रवमूर्तिस्पर्शवाचित्वाभावात्संप्रसारणाभावः । 'श्योस्पर्शे' इति निष्ठानत्वम् । परहितेति, 'चतुर्थी तदर्थार्थ-' इति समासः । 'कृञः श च' इति योगविभागात् क्तिनि कृतिः, चकारात्क्वयपि तुकि च कृत्या । पक्षे—अर्हार्थे 'विभाषा कृवृषोः' इति क्वयपि तुक् ॥

इह न कतमश्चित्रं धत्ते तमिस्रततीर्दिशा-
मपि चतसृणामुत्सङ्गेषु श्रिता[4] धयतां क्षणात् ।
तरुशरणतामेत्य च्छायामयं निवसत्तमः
शमयितुमभूदानैश्वर्यं यदर्यमरोचिषाम् ॥४९॥

इहेति ॥ पूर्वादीनां चतसृणामिह दिशामुत्सङ्गेषु प्रान्तदेशेषु श्रिता वर्तमानास्तमिस्रततीस्तिमिरपरम्पराः क्षणाद्धयतां विनाशयतामप्यर्यम्णः सूर्यस्य रोचिषां तेजसां तरवः शरणं यस्य तद्भावं वृक्षतलवासित्वमेत्य प्राप्य निवसद्वर्तमानं छायामयं छायारूपं तमः शमयितुं विनाशयितुमानैश्वर्यमसामर्थ्यमभूदिति यत्, इहाश्रासामर्थ्यविषये कतमः को नाम जनश्चित्रं विस्मयं न धत्ते । अपि तु सर्वोप्याश्चर्यं प्राप्नोत्येव । दिगन्तगतायां अपि तिमिरपरम्परायाः संहारे येषां शक्तिस्तेषां रवितेजसां तरुतलमात्रस्थितं छायारूपं समीपवर्त्यपि तमः शमयितुमपि शक्तिर्नाभूदित्याश्चर्यमित्यर्थः । 'तनु' इति पाठे—तनुरल्पः शरीरं वा शरणं यस्य तद्भावं प्राप्य निवसत् । महदाश्रयेण स्थितमपि यो विनाशयितुं शक्नोति सोल्पाश्रयेण वर्तमानं शमयितुमपि न शक्नोतीत्याश्चर्यमेव । तरुच्छायामयं देहच्छायामयं वा तमो विहाय सर्वमपि तमः सूर्येण विनाशितमिति भावः । आनैश्वर्यम्, अनीश्वरस्य भाव इत्यर्थे 'न

१ 'कैमुत्येनार्थान्तरापादनादर्थापत्तिरलंकारः' इति जीवातुः । २ 'क्रियासमुच्चयोऽलंकारः' इति जीवातुः । ३ 'कतरेति पाठोपि साधीयान्' इति सुखावबोधा । ४ 'स्थिता' इति पाठः सुखावबोधासंमतः ।

'नञ्पूर्वात्-' इति भावप्रत्ययनिषेधेऽपि ब्राह्मणादिष्वनीश्वरशब्दस्य पाठात्स्यञि 'नञः शुचीश्वर-' इति पक्षे उभयपदवृद्धिः ॥

जगति तिमिरं मूर्च्छामङ्गव्रजेपि चिकित्सतः
पितुरिव निजादस्रावस्रादधीत्य भिषज्यतः ।
अपिच शमनस्यासौ तातस्ततः किंमु नौचिती
यदयमदयः कह्लाराणामुदेत्यपमृत्यवे ॥ ५० ॥

जगतीति ॥ दस्रौ नासत्यौ निजात्स्वीयादस्रात्पितुः सूर्यादधीत्येवायुर्वेदं पठित्वेव भिषज्यतः स्वर्लोकचिकित्सां कुरुतः । किंभूतात्पितुः—जगति वर्तमानं तिमिरम्, अथ च—वस्तुदर्शनासामर्थ्यजनकं नेत्ररोगविशेषं चिकित्सतो नाशयतः । आयुर्वेदोक्तप्रतीकारेण शमयतः । तथा—अङ्गव्रजे कमलख(ष)ण्डे वर्तमानां मूर्च्छां संकोचमपि नाशयतः, अथ च—'अप एव ससर्जादौ-' इति वचनादपां मूलभूतत्वादङ्गव्रजे लोकसमूहे वर्तमानां मूर्च्छां वैचित्यध्वस्तचैतन्यभावरूपं मोहमपाकुर्वतः । उपचारचतुरात्कल्याणपाणेर्वैद्यादधीत्यैव हि राजवैद्यो भवति, तस्माद्वैद्यात्स्वपितुरेव वैद्यकमधीत्य ताभ्यामिन्द्रवैद्यत्वं प्राप्तमित्यर्थः । अपि च किंच सर्वभूतानि शमयति नाशयतीति शमनो यमस्तस्यासौ सूर्यो यस्मात्तातः पिताऽतस्तस्मात्कह्लाराणां कुमुदानामपमृत्यवे संकोचाय, अथ च—अकालमरणायोदेति । यतोऽयं सूर्योऽदयो निष्कृपः, साऽस्य सूर्यस्य नौचिती किमु, अपित्वेषाऽस्यौचित्येव । कारणगुणप्रक्रमेणैव कार्ये गुणारम्भाददयताऽपमृत्युदायिता च यमेनाप्यस्मात्स्वपितुरेव सकाशात्पठितेत्यर्थः । उदयता सूर्येण तमो नाशितम्, कमलान्युन्मीलितानि, कुमुदानि मुकुलितानीति भावः । पितुः 'आख्यातोपयोगे' इत्यपादानत्वम् । भिषज्यतः कण्ड्वादिः । 'तपति' इति वा पाठः ॥

उडुपरिवृढः पत्या मुक्तामयं यदपीडय-
द्यदपि बिसिनीं भानोर्जायां जहास कुमुद्वती ।
तदुभयमतः शङ्के सङ्कोचितं निजशङ्कया
प्रसरति नवार्के कर्कन्धूफलारुणरोचिषि ॥५१॥

उडुरिति ॥ अयमिदानीमस्तं जिगमिषुरुडुपरिवृढश्चन्द्रः सायमुदितः सन् अस्तं गतेन पत्या सूर्येण मुक्तां वियोगिनीं भानोर्भार्यां बिसिनीं पद्मिनीं यद्यस्माद्भृतरात्रावपीडयत्संकोचितवान् । अथ च—कैरवैर्दूषितवान् । यदपि यस्माच्चन्द्रे पद्मिनीं पीडयति सति कुमुद्वती कुमुदविकासव्याजेन रात्रौ जहास । अत एव हेतोस्तदुभयं चन्द्रकुमुदिनीरूपं द्वयमिदानीं कर्कन्धूफलवत्पक्वबदरवत्कोपादिवारुणरोचिषि रक्तकान्तौ नवार्के तरुणादित्ये प्रसरति प्रकर्षेणागच्छत्युदयति सति निजशङ्कया स्वकृतानाचारनिमित्तभयेनेव प्रयोजकेन संकोचितं संकोचं प्रापितम् । निष्प्रभीकृतमित्यर्थः । इत्यहं शङ्के मन्ये । सूर्य उदितः, पद्मिनी च विकसिता, चन्द्रो निष्प्रभोऽस्तमेति, कुमुदिनी संकुचितेति भावः । अन्यत्राप्युक्तं प्रमेयं बोद्धव्यम् । संकोचितमिति ण्यन्तात्कर्मणि निष्ठा । अन्यथाव्याख्याने संकुचितमित्येव स्यात् । तदुभयं निजशङ्कया करणभू-

१ 'किमनौचिती' इति पाठः जीवातुसुखावबोधासंमतः ।

तया स्वयमेव संकुचितुं कृतारम्भमिति वा व्याख्येयम् । कर्कन्धू-कुणेति पाठभिन्नत्यः । ग्रन्थविस्तरभयात्साधनिकादि नोक्तम् । सुबुद्धिभिर्विविच्य बोद्धव्यम् ॥

श्रुतिमयतनोर्भानोर्जानेऽवनेरधराध्वना
विहरणकृतः शाखा साक्षाच्छतानि दश त्विषाम् ।
निशि निशि सहस्राभ्यां दृग्भिः शृणोति सहस्वराः
पृथगहिपतिः पश्यत्यस्याक्रमेण च भास्वराः ॥ ५२ ॥

श्रुतीति ॥ अहिपतिः शेषो ज्योतिःशास्त्रानुसारेणावनेर्भूमेरधराध्वनाधस्तनेन मार्गेण पातालमार्गेण रात्रौ विहरणकृतः परिभ्रमतः, तथा—श्रुतिमयी वेदरूपा तनुर्देहो यस्य तस्यास्य भानोस्त्विषां दश शतानि एकसहस्रमेव दश शतानि कठकण्वादिशाखाः निशि रात्रौ सहस्रफणत्वात्प्रतिफणं च नेत्रद्वयसद्भावाद्भ्यां सहस्राभ्यां दृग्भिः सहस्रद्वयपरिमिताभिर्दृष्टिभिरक्रमेण युगपत्पृथक्क्षुःश्रवस्वात्साक्षाच्छृणोति पश्यति चेत्यहं जाने । क्रियाद्वये क्रमेण हेतुद्वयम्-यतः सहस्वराः स्वरूपेणोदात्ततयोदात्तादिस्वरैः सह वर्तमानाः । स्वराणां शब्दरूपत्वाच्छृणोति । तथा—भास्वराः शुक्लभास्वररूपाः । ततः साक्षात्पश्यति च । रात्रौ पातालगामित्वात्तत्र च शेषस्य वर्तमानत्वाद्वेदमयशरीरस्य किरणसहस्ररूपं शाखासहस्रं शेषो नेत्रसहस्रद्वयस्य सत्त्वाद्युगपत्पृथगेकेन नेत्रसहस्रेण शृणोति, द्वितीयेन च पश्यतीति युगपत्पृथक् श्रवणदर्शनाभ्यामेव शेषनेत्रसहस्रद्वयस्य सार्थक्यमभूदित्यर्थः । 'श्रुतिमयतरोः' इति पाठे—वेदवृक्षरूपस्य वृक्षस्य शाखा युक्ताः । अधस्तना बलिसद्मनेति पाठे—'बलिसद्म रसातलम्' इत्यभिधानात्तस्यैवार्थः । दशशतानीति काकाक्षिवदुभयत्रापि संबध्यते । सहस्वराः, 'वोपसर्जनस्य' इति पाक्षिकत्वात्सभावाभावैः ॥

बहुनखरता येषामग्रे खलु प्रतिभासते
कमलसुहृदस्तेऽमी भानोः प्रवालरुचः कराः ।
उचितमुचितं जालेष्वन्तःप्रवेशिभिरायतैः
कियदवयवैरेषामालिङ्गिताङ्गुलिलङ्गिमा ॥५३॥

बहुरिति ॥ येषां कराणां खरता तीक्ष्णताग्रे पूर्वं पूर्वाह्णसमये बहुतितरा न प्रतिभासते स्फुरति । सर्वथा नोपलक्ष्यते इत्यर्थः । यद्वा—नसमासेन नखरताऽतीक्ष्णता । पूर्वाह्णे येषामतितरां तीक्ष्णत्वाभाव उपलभ्यते । खलु निश्चितम् । अथ च—येषामुपरिभागे बहवो नखरा नखा येषां तत्तोपलभ्यते । तेऽमी प्रत्यक्षदृश्या विकासहेतुत्वात्कमलानां सुहृदो बन्धोर्भानोः कमलबन्धवो वा कराः किरणा एव पाणयः प्रवालरुचो विद्रुमवद्रक्तकान्तयः, अथ च—प्रकृष्टबालकान्तयोऽतिबालाः, अथ च—बालपल्लववद्रक्तका-

१ 'कर्कन्धूः पक्वबदरीफलमित्यर्थः । तत्कणाबदरुणरोचिषि' इति जीवातुः । २ 'जाने इत्युत्प्रेक्षा । रूपकसंकीर्णा चेयमुत्प्रेक्षेति व्यक्तमेव । एकेन दृक्सहस्रेण शृणोति, अपरेण दृक्सहस्रेण पश्यतीति विश्वेश्वरभट्टारकव्याख्यानं चिन्त्यम् । दृशां प्रत्येकमुभयशक्तियुक्तानां शक्तप्रविभागयोगात् । तस्माद्ग्राहकस्योभयशक्तिमत्त्वात्, ग्राह्यस्य च तेजःशब्दोभयात्मकत्वात्सर्वाभिरेव दृग्भिः सर्वांश्च शाखा युगपत्पश्यति शृणोति चेति रमणीयम्' इति जीवातुः ।

स्तवः । इदमन्त इति शेषः । तथा—जालेष्वन्तःप्रवेशिभिर्गवाक्षादिविवरमध्यप्रविष्टैः, अतएव—आयतैस्तद्वशादेव दण्डवद्दीर्घीभूतैरेषामेव कियदवयवैः कतिपयैरवयवैः करणैरेषां किरणानां पाणीनां च य आलिङ्गितः संबद्धप्रासादाङ्गुलिलङ्गिमा च, अङ्गुलिवल्लङ्गिमा मङ्गिमा, अथ च—अङ्गुलिभिर्लङ्गिमा, आलिङ्गिताङ्गुलिलङ्गिमा तदुचितमुचितम् । इयमतिशयेनौचिती । गवाक्षविवरप्रविष्टैः किरणावयवैः किरणानामङ्गुलीतुल्यत्वादाश्रिताङ्गुलिवच्चारुता युक्तैव । पाणीनामपि दीर्घैः कतिपयैरङ्गुलिकृता चारुता भवतीत्यपि युक्तमेवेत्यर्थः । जालेष्वन्तःप्रवेशिभिरायतैरेषां कियदवयवैः कर्तृभिरङ्गुलिलङ्गिमा आलिङ्गिता गवाक्षविवरप्रवेशानन्तरं समालिङ्गिष्यत इत्युचितम् । 'अङ्गुलिचारुता' इति पाठः स्पष्टार्थः । 'नखोऽस्त्री नखरः' इत्यमरः । उचितमुचितम्, वीप्सायां द्विरुक्तिः । प्रवेशिभिस्तादृच्छीत्य आवश्यके वा णिनिः । आलिङ्गिता, लिगिधातोः पक्षे कर्मणि लुट् पक्षे निष्ठा । लङ्गति रमणीयतया चित्तं प्राप्नोतीति गत्यर्थाल्लगिधातोः पचाद्यचि पृषोदरादेराकृतिगणत्वादिमनिच् समर्थनीयैः ॥

नय नयनयोर्द्राक्पेयत्वं प्रविष्टवतीरमू-
र्भवनवलभीजालाभाला इवार्ककराङ्गुलीः ।
भ्रमदणुगणक्रान्ता भान्ति भ्रमन्त्य इवाशु याः
पुनरपि धृता कुन्दे किंवा न वर्धकिना दिवः ॥

नयेति ॥ भो राजन्, त्वं भवनस्याधो गृहस्योपरि वर्तमानानां वलभीनां गृहविशेषाणां जालाद्गवाक्षविवराद्धेतोर्वलभीभेवार्थात्प्रविष्टवतीरमूरर्ककररूपा अङ्गुलीर्जालप्रवेशादङ्गुलीतुल्याम्सूर्यकरान्, अथ च—करेष्वङ्गुलीनां युक्तत्वादर्ककराणामङ्गुलीर्नाला इव कमलदण्डसदृशीर्नयनयोः पेयत्वं गोचरत्वं (द्राक् शीघ्रम्) नय प्रापय सादरं पश्य । स्वनेत्रयोः कमलत्वाज्जालमार्गप्रविष्टास्वया विलोक्यमाना एताःस्वनेत्रकमलनाला इव जनैर्द्रक्ष्यन्त इत्यर्थः । जालानां वा कमलतुल्यत्वात्तन्नाला इव त्वं पश्येति वा । अमूः काः—या भ्रमतां जालप्रविष्टकिरणमध्ये परिभ्रमतामणूनां त्रसरेण्वादिरूपरजःकणानां गणेन समूहेनाक्रान्ता व्याप्ताः, अत एव—दिवो वर्धकिना स्वर्लोकतक्ष्णा श्वशुरेण विश्वकर्मणा पुनरपि कुन्दे शाणचक्रे धृता आरोपिताः सत्य आशु भ्रमन्त्य इव किंवा न भान्ति, अपि तु—तथैव शोभन्ते । यद्वा—भ्रमन्तः शाणघर्षणवशात्परितः पतन्तो येऽणवः शातिततेजसः कणास्तेषां गणैराक्रान्तत्वं युक्तम् । विश्वकर्मणा सूर्यः शाणमारोपित इति पुराणम् । 'नयनयोराधेयत्वम्' इति पाठे—गुणेन वशेनेत्यर्थः । जालात् । जातावेकवचनम् ॥

दिनमिव दिवाकीर्तिस्तीक्ष्णैः क्षुरैः सवितुः करै-
स्तिमिरकबरीलूनां कृत्वा निशां निरदीधरत् ।
स्फुरति परितः केशस्तोमस्ततः पतयालुभि-
र्ध्रुवमधवलं तत्तच्छायच्छलादवनीतलम् ॥ ५५ ॥

१ अङ्गुलिवल्गुतेतिपाठो जीवातुसंमतः । २ 'विशेषणसंकीर्णा भिदेशनाभेदः' इति जीवातुः । ३ 'अर्कस्य करा इव करा हस्ता इति श्लिष्टरूपकम् । भ्रमन्त्य इव भान्तीत्युत्प्रेक्षा' इति जीवातुः । ४ 'तीक्ष्णाक्षुरात्सवितुः करात्' इति जीवातुसंमतः पाठः ।

दिनमिति ॥ दिवाकीर्तिरिव नापित इव दिनं दिवसस्तीक्ष्णैः सवितुः करैरेव क्षुरैर्निशां तिमिरैकबरीलूनां तमोरूपां वेणीं छिन्नमूलां कृत्वा निरदीधरन्निर्धारितवान्। मुण्डयित्वा क्वापि कश्चित्केशोऽवशिष्टः स्यादिति गवेषितवानित्यर्थः। अथ च—बहिर्निष्कासयामास। नापितोऽपि व्यभिचारादिदुष्टां स्वीयां परकीयां वा स्त्रियं क्षुरैर्मुण्डयित्वा देशाद्बहिर्निष्कासयति। ततोऽनन्तरं, तस्मान्मुण्डनाद्वा परितस्तत्र तत्र पतद्भिरधः पतनशीलैः केशसोमैः कृत्वावनीतलं तेषां तेषां वृक्षादिपदार्थानां छाया प्रतिबिम्बं तस्य छलाद्व्याजेन ध्रुवं निश्चितमधवलं श्यामं स्फुरति शोभते। वृक्षाद्यधोभागे कृष्णत्वं मुण्डितकबरीपतद्भिरालुकेशसंबन्धकृतम्, नतु प्रतिबिम्बकृतमित्यर्थः। छायाव्यतिरिक्तं सर्वमपि तमो दिवसेन सूर्यकरैर्नाशितमिति भावः। 'दिवाकीर्तिस्तु नापितः' इत्यमरः। कबरी, 'जानपद–' इति ङीप्। लूनाम्, ल्वादित्वान्निष्ठानत्वम्। निरदीधरत्, धारेश्चङि 'णौ चङि–' इत्युपधाह्रस्वत्वेऽभ्यासस्य सन्वद्भावादित्वम्, 'दीर्घो लघोः' इति दीर्घः। तत्तच्छायेति 'विभाषा सेना–' इति वा नपुंसकत्वम् ॥

इदानीं शाङ्किकानां शङ्खशब्दं श्रुत्वा तद्व्याजेन नलयशोवर्णनं कुर्वन्ति—

ब्रूमः शङ्खं तव नल यशः श्रेयसे सृष्टशब्दं
यत्सोदर्यं स दिवि लिखितः स्पष्टमस्ति द्विजेन्द्रः।
अद्धा श्रद्धाकरमिह करच्छेदमप्यस्य पश्य
म्लानिस्थानं तदपि नितरां हारिणो यः कलङ्कः ५६

ब्रूम इति ॥ हे नल, वयं श्रेयसे मङ्गलाय सृष्टः कृतः शब्दो यस्य तं शङ्खं तव यश एव ब्रूमः स्वत्कीर्तिमेव शङ्खरूपतया वर्णयामः। शाङ्किकैर्यः शङ्खो वाद्यते तत्त्वद्यश एव। तद्वदुज्ज्वलतरं तव यश इत्यर्थः। शङ्खस्वनो हि मङ्गलदायकः। त्वद्यशोऽपि लोकानां शुभाय तव पुण्यश्लोकत्वान्नवति यस्य शङ्खस्य यशसश्च समुद्रप्रभवत्वाच्छुभ्रतरत्वाच्च सोदर्यः समानोदर्यो भ्राता स प्रसिद्धो द्विजेन्द्रश्चन्द्रो दिवि स्पष्टं लिखितोऽस्ति। निष्प्रभत्वाच्चित्रलिखित इव निर्व्यापारः स्फुटो दृश्यत इत्यर्थः। त्वमिह गगने प्रत्यूषसमये वास्य चन्द्रस्याद्धा निश्चितं श्रद्धाकरं शङ्खसहोदरत्वास्तिक्यबुद्धिजनकं करच्छेदं किरणविनाशमपि पश्य। शङ्खेऽपि किरणा न सन्ति, अस्यापीदानीं न सन्ति। किंच—अस्य हरिणसंबन्धी हारिणो यः कलङ्कस्तद्रूपं नितरामतिशयितं म्लानेः श्यामतायाः स्थानमपि पश्य। शङ्खस्याप्युदरभागे नितरां श्यानतास्ति, सा चन्द्रेऽपि। तस्मादपि चन्द्रस्य शङ्खसोदर्यत्वं निश्चितं, तथा चन्द्रमपि तव यशो ब्रूम इत्यर्थः। उक्तप्रकारेण शङ्खसोदर्यत्वं चन्द्रस्य यद्यप्यस्ति (तदपि) तथापि हरिणसंबन्धी यः कलङ्कस्तदस्य सुतरां म्लानिस्थानं पश्य। चन्द्रस्य श्रद्धेयशङ्खभ्रातृत्वेऽपि निष्कलङ्कं शङ्खमेव तव यशो ब्रूमो, नतु सकलङ्कं चन्द्रमिति भाव इति वा। अथ च—हे राजन्, तव यशःश्रेयसे यशोविवृद्धये सृष्टशब्दं विरचितस्मृतिवाक्यं शङ्खनामानं मुनिं ब्रूमः। शङ्खस्तव यशोविवृद्धये स्मृतिं चकारेत्यर्थः। यस्य शङ्खमुनेः सोदर्यो भ्राता स लिखितनामा द्विजेन्द्रो ब्राह्मणश्रेष्ठो दिवि स्पष्टमस्ति। इह लिखिते श्रद्धाकरं सत्यविश्वासकारकमद्धा साक्षाल्लिखितं वा करयोः पाण्योश्छेदं कर्तनमपि पश्य। अथ च—श्रेयसे लोकानां कल्याणाय सृष्टः पुण्य(श्लोको)नल इति शब्दो यस्मिन्नेवंभूतं तव यशः शङ्खनामानमृषिं ब्रूमः समानधर्मत्वात्, नतु तद्भ्रातरं कलङ्कित्वात् सोपि धर्मार्थस्मृतिवाक्यानि सृष्टवान्। यस्य भ्रातेति पूर्ववत्। लिखितस्य शौर्यं हस्तच्छेदश्च भारते ज्ञातव्यः। शाङ्किकास्त्वत्प्रबोधार्थं शङ्खं वादयन्ति तस्माच्छीघ्रमुत्तिष्ठेति भावः। लिखितमुनिरेव दिवि ताराशङ्खो जात इति केचित्। समानोदरे शयित इत्यर्थे 'सोदराद्यत्' इति यत्। अस्मादेव निर्देशाद्यत्प्रत्ययविवक्षायामेव 'विभाषोदरे' इति पाक्षिकः समानस्य सः। हारिणः, संबन्धेऽण्, पक्षे आवश्यके णिनिः ॥

ताराशङ्खविलोपकस्य जलजं तीक्ष्णत्विषो भिन्दतः
सारम्भं चलता करेण निबिडां निष्पीडनां लम्भितः।
छेदार्थोपहृताम्बुकम्बुजरजो जम्बालपाण्डूभव-
च्छङ्खच्छित्करपत्रतामिह वहन्नस्तंगतार्धो विधुः ५७

तारेति ॥ विशाखानक्षत्ररूपस्य मातृमण्डलसंज्ञस्य शङ्खाकारत्वाच्छङ्खस्य विलोपकः स्वप्रभया विनाशकस्तस्य, तथा—जलजं कमलानि भिन्दतो विकासयतः। अथ च—यतस्ताराशङ्खविलोपकस्य, अतएव जलजं शङ्खं खण्डयतः। तीक्ष्णत्विषः सूर्यस्यैव शाङ्किकशिल्पिना सारम्भं सोद्योगं चलता प्रसरता। अथ च—वर्षणवशात्साटोपं गमनागमने कुर्वता। करेण रश्मिना पाणिना च निबिडां निष्पीडनां बाधां दृढां यन्त्रणां च लम्भितः प्रापितः। अस्तंगतमर्धं यस्य स विधुश्चन्द्रः शङ्खच्छेदसौकर्यार्थमुपहृतमानीतं यदम्बु जलं तस्य कम्बुजरजोजम्बालश्छिद्यमानशङ्खसंजातरजश्चयः कर्दमः। उदकसंबन्धाद्रजः कर्दमीभवति। तेन पाण्डूभवल्लोहमयत्वादधवलमपि धवलपङ्कवशाद्धवलं भवद्यच्छङ्खच्छेदकारि करपत्रं तद्भावमिह प्रातःसमये वहति। शाङ्किकशिल्पिनो हि छेदसौकर्यार्थं छिद्यमानशङ्खादिदेशे जलं क्षिपन्ति। दृढतरग्रन्थिच्छेदादौ च करपत्रं करेण निबिडं पीडयन्ति। शङ्खादिच्छेदककरपत्रं चार्धचन्द्राकारं संजातरजःपङ्कपाण्डुरं च भवति। अस्तमितार्धश्चन्द्रस्तादृक्करपत्रतुल्यो दृश्यत इत्यर्थः। सूर्योदयो जातः, तारा लुप्ताः कमलानि विकसितानि, चन्द्रश्चार्धेनास्तमित इति भावः। जलजं, करेणेति च पक्षे जात्येकवचनम्। पाण्डूभवदिति च्विः ॥

जलजभिदुरीभावं प्रेप्सुः करेण निपीडय-
त्यशिशिरकरस्ताराशङ्खप्रपञ्चविलोपकृत्।
रजनिरमणस्यास्तक्षोणीधरार्धपिधावशा-
द्धृतमधुना बिम्बं कम्बुच्छिदः करपत्रताम् ॥५७॥

जलजेति ॥ जलजं कमलं शङ्खश्च। करेणांशुना पाणिना च। अयं श्लोकः पूर्वेण समानार्थत्वात्क्षेपकः ॥

---

१ 'निशां शर्वरीं तिमिरकबरीं ध्वान्तलक्षणां वेणीं लूनां कृत्वा छिन्नमूलां विधाय। 'तिमिरकबरीलूनाम्' इति पाठस्तु लूनशब्दस्य क्तान्तत्वेन पूर्वनिपातप्राप्तेरुपेक्ष्य' इति सुखावबोधा। 'जातिकालसुखादिभ्यः परवचनम्' इति लूनेति निष्ठायाः(न्तस्य) परनिपातः। 'बहुव्रीहेश्चान्तोदात्तात्' इति ङीषू' इति जीवातुः। एवंच 'लूनीम्' इति पाठो जीवातुसंमतः प्रतिभाति।

यत्पाथोजविमुद्रणप्रकरणे निर्निद्रयत्यंशुमा-
न्दृष्टीः पूर्णयति स्म यज्जलरुहामक्ष्णा सहस्रं हरिः ।
साजात्यं सरसीरुहामपि दृशामप्यस्ति तद्वास्तवं
यन्मूलाद्रियतेतरां कविनृभिः पद्मोपमा चक्षुषः॥५८॥

यदिति ॥ अंशुमान्पाथोजानां कमलानां विमुद्रणप्रकरण उन्मीलनप्रस्ताव एव यद्यस्माद्दृष्टीर्लोकनेत्राणि निर्निद्रयति विगतनिद्राणि करोत्युन्मीलयति । यस्माच्च हरिः श्रीविष्णुः शिवपूजासमये एककमलन्यूनं जलरुहां कमलानां सहस्रं स्वीयेनाक्ष्णा पूर्णयति स्म । तस्मात्सरसीरुहां दृशामपि वास्तवमबाधितं साजात्यं तुल्यजातीयत्वमस्ति । यत्साजात्यं मूलमारोपकारणं यस्यास्तादृशी यन्निबन्धना चक्षुषः पद्मेन सह उपमा सादृश्यं कविनृभिः कालिदासादिभिः कविभिराद्रियतेतरामत्यादरेणोपनिबध्यते । यदि नेत्राणि कमलसजातीयानि नाभविष्यन्, तर्हि रविः कमलोन्मीलनप्रस्तावे तानि नोदमीलयिष्यत् । श्रीविष्णुश्च कमलसहस्रं नेत्रेण नापूरयिष्यत् । न ह्यन्यप्रस्तावेऽन्यस्य योग्यताऽस्ति । तस्माद्दृशां कमलानां च साजात्यं वास्तवमस्त्येवेत्यर्थः । उदितः सूर्यः, कमलानि विकसितानि, सर्वोपि जनः प्रबुद्धः, तस्मात्त्वमपि प्रबुध्यस्वेति भावः । विष्णुः स्वचक्षुषा कमलसहस्रं पूरितवानिति लिङ्गपुराणादौ द्रष्टव्यम् । विमुद्रणेति, विगतमुद्रं करोतीति ण्यन्ताद्भावे ल्युट् । निर्निद्रयति, 'तत्करोति–' इति णिच् । पूर्णयतीत्यत्रापि । समाना जातिः साजात्यमिति विग्रहे चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् (नतु)'समानस्य' इति योगविभागात्समानस्य सः । वास्तवम्, आगतार्थे संबन्धे वाऽण् । तत्त्वपर्यायाव्ययवस्तुशब्दाप्रज्ञादित्वात्स्वार्थे वा । पद्मोपमा, षष्ठीसमासः ॥

अवैमि कमलाकरे निखिलयामिनीयामिक-
श्रियं श्रयति यत्पुरा विततपत्रनेत्रोदरम् ।
तदेव कुमुदं पुनर्दिनमवाप्य गर्भभ्रम-
द्भिरेफरवघोरणाघनमुपैति निद्रामुदम् ॥ ५९ ॥

अवैमीति ॥ यत्कुमुदं कमलानामाकरे ख(प)ण्डे सरसि वा । अथ च—कमलायाः संपद्रूपाया लक्ष्म्या वाकरे गृहे कोशागारे, विततं विस्तारितं पद्मरूपनेत्राणामुदरं येन, विततानि पद्माण्येव नेत्रमध्यानि येन, तद्विकस्वरम् । अथ च—प्रसारितपक्ष्मनेत्रोदरम् उन्मीलितनेत्रम् । सत् (सा) निखिलयामिन्याः सकलरात्रिसंबन्धिनो यामिकस्य रात्रिचतुःप्रहरप्राहरिकस्य सकलरात्रिजागरूकस्य श्रियं शोभां पुरा श्रयत्यशिश्रियत् । सायमारभ्य सूर्योदयावधि यद्विकसितमभूत् । अथ च—सकलां रात्रिं जजागार, तदेव कैरवं पुनरिदानीं दिनमवाप्य गर्भे भ्रमन्तः सूर्यकिरणसंबन्धसंजातशीघ्रसंकोचवशाद्विनिर्गन्तुमशक्तेरन्तःसंचारिणो द्विरेफाणामेषां निर्बन्धसंजातो रवस्तद्रूपा या घोरणा प्रसुप्तघर्घरारवाडम्बरस्तस्या घनं निबिडं यथा तथा निद्रामुदं निद्रासंबन्धिसुखमुपैति । अन्तर्गतभ्रमरः सन् संकुचतीत्यर्थः । अथ च—यः कोशागारे सकलां रात्रिं जागर्ति स दिवसे घोरणाघनं यथा तथा निद्रातीत्यर्थः ।

इत्यहमवैमि । पुरा भवतीति, 'पुरि लुङ् चास्मे' इति भूते लट् । भीमशब्दाभ्यां धेरिर्णिजन्तात् 'ण्यासश्रन्थ–' इति युच् ॥

इह किमुपसि पृच्छाशंसिकिंशब्दरूप-
प्रतिनियमितवाचा वायसेनैष पृष्टः ।
भण फणिभवशास्त्रे तातङः स्थानिनौ का-
विति विहिततुहीवागुत्तरः कोकिलोऽभूत्॥६०॥

इहेति ॥ इह प्रभाते पृच्छाशंसिनः प्रश्नवाचिनः किंशब्दस्य प्रथमान्तं रूपं तेनैव प्रतिनियमिता प्रतिक्षणं शब्दान्तरभाषणाद्व्यावर्तिता वाग्येन कौ कौ इति नियतभाषिणा वायसेन काकेन फणिना शेषाद्भवमुत्पन्नं महाभाष्यलक्षणशास्त्रम् । पाणिनीयमिति यावत् । तत्र तातङ्लक्षणादेशस्य स्थानिनौ आदेशिनौ कौ भण कथयेति पृष्टः कृतप्रश्न एव कोकिलो विहिता कृता या तुहीतिवाक् सैवोत्तरं यस्यैवंभूतोऽभूत् किम् । काकः प्रातः स्वभावतः 'कौ कौ' इति वदति । कोकिलश्च 'तुही तुही' इति । काकः स्वभावात् 'कौ कौ' इति प्रथमाद्विवचनान्तं प्रश्नशब्दं ब्रूते, कोकिलश्च 'तुही तुही' इति । तत्रोत्प्रेक्षा । तुश्च हिश्च तुही, 'तुह्योस्तातङाशिष्यन्यतरस्याम्' इति पाणिनिसूत्रस्मरणशीलः सन् तुहिस्थाने तातङो विधानात्तुहीति तातङः स्थानिनावित्युत्तरं कोकिलो दत्तवान् । किम् । प्रभातं जातं, काकादयः शब्दायन्ते इति भावः । सूत्रवार्तिकयोर्महाभाष्येणैवार्थसंपादनात्फणिभवेत्युक्तम् । स्थानं प्रसङ्गः सोऽस्त्यनयोरिति स्थानिनौ, अत इनिः ॥

दाक्षीपुत्रस्य तत्रे ध्रुवमयमभवत्कोप्यधीती कपोतः
कण्ठे शब्दौघसिद्धिक्षतबहुकठिनीशेषभूपानुयातः ।
सर्वं विस्मृत्य दैवात्स्मृतिमुपसि गतां घोषयन्यो घुमंज्ञां
प्राक्संस्कारेण संप्रत्यपि ध्रुवति शिरः पट्टिकापाठजेन॥

दाक्षीति ॥ अयमाकर्ण्यमानशब्दः कोपि कश्चित्कपोतो घूकलक्षणः पक्षी दाक्षीपुत्रस्य दक्षगोत्रसंजातमातृकस्य पाणिनेस्तत्रे पाणिनीयव्याकरणेऽधीतं पठनमस्यास्तीति पठितपाणिनीयव्याकरणोऽभवत् । अनेकेषु पाणिनिशिष्येषु मध्ये कोपि कपोतरूपः शिष्योऽभूत् । ध्रुवमित्यहमुत्प्रेक्षे । किंभूतः—तदध्ययनवशादेव कण्ठे देवादिशब्दौघानां सिद्धये उदाहरणसाधनाय क्षता पृष्टा बद्धा कठिनी खटिका तस्याः शेषोऽङ्गुलीलग्नोऽवशिष्टभागस्तद्रूपया भूपयानुयातः संबद्धः खटिकाशेषरेखया कण्ठेऽलंकृत इत्यर्थः । बाला हि पट्टिकादौ खटिकया लिखितं पठित्वा सरस्वतीकृपया सायं लिपिप्रोञ्छनाङ्गुलिलग्नखटिकादिरजसा कण्ठे रचयन्तीति । कपोतस्य धूसरे कण्ठे स्वभावेनैव धवला रेखा भवति । यः कपोतः सर्वमपि शास्त्रं विस्मृत्य दैवात्स्मृतिं गतामुपसि प्रातः स्मृता 'दा धा ध्वदाप्' इति पाणिनिकृतां घुमंज्ञां पुनर्विस्मरणभिया घोषयन्पुनः पुनः पठन्सन् भूयसि कालेऽतीतेऽपि संप्रत्यपि प्राक्तु काष्ठघटितपट्टिकालिखितसूत्रपाठादिपाठजन संस्कारेण पटुतराभ्यासाहि-

---

१ 'अवैमीत्युत्प्रेक्षायाम् । एकस्मिन्कुमुदेऽनेकयोर्निद्राजागरयोः क्रमेण प्रत्यभिधानात् 'एकस्मिन्यदनेकम्' इत्युक्तलक्षणपर्यायालंकारेण पूर्वोक्तनिदर्शनासंकीर्णा' इति जीवातुः ।

तवासनया शिरो धुवति। विस्मृतस्य प्रातः स्मृतिर्भवति। कपोताश्च प्रातर्घुंशब्दं कुर्वन्ति, शिरश्च कम्पयन्ति। तस्मादियमुत्प्रेक्षा। बालाश्च श्यामासु काष्ठघटितपट्टिकासु खटिकादिलिखितं धवलाक्षरं सूत्रपाठाद्यावेशेन घोषयन्तः शिरः कम्पयन्ति। योपि विस्मृतं पुनः स्मरति सोपि शिरः कम्पयति। दक्षस्यापत्यम्, 'अत इञ्' इतीञि 'इतो मनुष्यजातेः' इति ङीष्। तस्मै 'कस्येन्विषयस्य कर्मणि' इति कर्मणि सप्तमी। अधीतमनेनेत्यधीती इष्टादेराकृतिगणत्वादिनिः। घोषयन् चौरादिकाद्धुषेः शता। धुवति, दीर्घोत्तौदादिकात् 'धू कम्पे' इत्यस्माच्छस्य श्लित्वाद्धुणनिषेधे उवङ्॥

पौरस्त्यायां घुसृणमसृणश्रीजुषो वैजयन्त्याः
स्तोमैश्चित्तं हरति हरिति क्षीरकण्ठैर्मयूखैः।
भानुर्जाम्बूनदतनुरसौ शक्रसौधस्य कुम्भः
स्थाने पानं तिमिरजलधेर्भाभिरेतद्भवाभिः ६२

पौरस्त्यायामिति॥ जाम्बूनदतनुरुत्तमस्वर्णतुल्यस्वरूपोऽत एव शक्रसौधस्य वैजयन्ताख्यस्योपरिवर्ती सुवर्णकलशरूपोऽसौ भानुः पौरस्त्यायां हरिति प्राच्यां दिशि कुङ्कुमेन कुङ्कुमवद्वा मसृणा स्निग्धरक्ता या श्रीः शोभा तां जुषो भजन्त्या वैजयन्त्याः पताकायाः स्तोमैः संघरूपैः क्षीरयुक्तकण्ठलक्षणयातिबालैर्मयूखैः कृत्वा चित्तं हरति। इन्द्रसौधस्योपरिवर्तमाना बालतराः सूर्यकिरणास्तदीयरक्तपताकासमूहा इव, सूर्यश्च स्वर्णकलश इव शोभत इत्यर्थः। राजादिप्रासादेषु हि रक्ता भूयस्यः पताकाः सुवर्णकलशाश्च वर्तन्ते। यतोऽयमिन्द्रसौधस्य स्वर्णकुम्भरूपः, अत एवैतस्माद्भवाभिरुत्पन्नाभिर्भाभिः कर्त्रीभिः निमिररूपोऽतिश्यामो जलधिस्तस्य पानं ग्रासेन तिरोधापनं तत्स्थाने नितरामुचितम्। कुम्भोद्भवो ह्यगस्त्यः पूर्वं समुद्रमधात्। अत एतासामपि भानुरूपकुम्भोद्भवत्वात्समुद्रपानं युक्तमित्यर्थः। सूर्य ऊर्ध्वमागतः, तिमिरं च सर्वं निरस्तमिति भावः। 'घुसृणसुमनः—' इति पाठे—कुङ्कुमकेसरश्रीजुष इत्यर्थः। 'तोकैः' इति पाठे—तोकमपत्यम्, पताकाया अपत्यरूपैस्तत्सदृशैरित्यर्थः। पुरोदेशे भवा, 'दक्षिणापश्चात्पुरसस्त्यक्' 'किति च' इति वृद्धिः। 'कर्तृकर्मणोः कृति' इति कर्तरि प्राप्तापि षष्ठी 'उभयप्राप्तौ कर्मणि' इति नियमेन व्यावर्तितत्वात्तिमिरजलधेरित्यत्रैव भवति, भाभिरित्यत्र तु कर्तरि तृतीयैव॥

द्वित्रैरेव तमस्तमालगहनग्रासे दवीभावुकै-
रुस्रैरस्य सहस्रपत्रसदसि व्यश्राणि घस्रोत्सवः।
घर्माणां रयचुम्बितं वितनुते तत्पिष्टपिष्टीकृत-
क्ष्मादिग्व्योमतमोघमोघमधुना मोघं निदाघद्युतिः ६३

द्वित्रैरिति॥ तमस्तमालानां तिमिररूपातिश्यामलतरूणां गहनस्य गाम्भीर्यस्यैव वनस्य वा ग्रासे विनाशे दवीभावुकैर्वनवह्नितां व्रजद्भिर्द्वित्रैरल्पसंख्यैरेवास्य सूर्यस्योस्रैः किरणैः सहस्रपत्राणां सदस्याकरे घस्रोत्सवो दिनसंबन्धी हर्षो विकासो यस्माद्व्यश्राणि वितीर्णः। तत्तस्मात्कारणान्निदाघद्युतिः सूर्यः घर्माणामुष्णानां किरणानामोघं समूहमधुना द्वित्रैरेव कैरस्तमोविनाशे पद्मविकासे च जाते रयचुम्बितं वेगवत्तरं मोघं निष्फलं वितनुते विस्तारयति। किंभूतम्—अत एव—पिष्टस्य पिष्टं पिष्टपिष्टमतस्तत्कृतं पिष्टपिष्टीकृतमत्यन्तचूर्णीकृतं क्ष्मादिग्व्योम्नां भूदिग्गगनानां तम एवाघं मालिन्यात्पातकं येन। तिमिरविनाशस्य कमलविकासस्य च द्वित्रैरेव किरणैः कृतत्वादन्यकिरणैस्तत्करणे पिष्टपेषणात्तद्वैयर्थ्यमित्यर्थः। 'दवदावौ वनारण्यवह्नी' 'किरणोस्रमयूख—' इत्यादि, 'घस्रो दिनाहनी—' इत्यादमरः। द्वौ वा त्रयो वा द्वित्राः, 'संख्ययाऽव्यया—' इति बहुव्रीहौ 'बहुव्रीहौ संख्येये—' इति डच्। दवीभावुकैः, भुवो 'लषपतपद—' इति ताच्छील्यादावुकञि अदवा दवा भावुका इत्यर्थे च्विः। व्यश्राणि, दानार्थाच्छ्राणतेः चौरादिकाच्छ्राणयतेर्वा कर्मणि चिण्। चुम्बितम्, पिष्टीकृतमिति च कर्मणि भावे च निष्ठा॥

दूरारूढस्तिमिरजलधेर्वाडवश्चित्रभानु-
र्भानुस्ताम्यद्वनरुहवनीकेलिवैहासिकोऽयम्।
न स्वात्मीयं किमिति दधते भास्वरश्वेतिमानं
द्यामद्यापि द्युमणिकरणश्रेणयः शोणयन्ति ६५

दूरेति॥ अयं भानुस्तिमिरजलधेस्तमःसमुद्रस्य शोषकत्वाद्वाडवो वडवानलः, चित्रभानुर्विभावसुः। तथा—ताम्यन्त्याः खिद्यन्त्या वनरुहवन्याः कमलवन्या एव कान्तायाः केल्या क्रीडया वैहासिकः परिहासकः क्रीडानर्मकारी हेलामात्रेण विकासकश्च। तथा—दूरं गगनमार्गमारूढ ऊर्ध्वमागतः, एवंभूतः सन् स्वात्मीयं स्वीयं तेजोरूपत्वात्सहजं भास्वरश्वेतिमानं स्वपरप्रकाशकशुक्लभास्वररूपत्वमद्यापि दूरारूढत्वेपि किमिति कुतो न दधते धारयति। तथा—द्युमणेः सूर्यस्य किरणश्रेणयश्चाद्यापि द्यां गगनं किमिति शोणयन्ति रक्तीकुर्वन्तीति प्रश्नद्वयम्। यद्वा—स्वीयं रूपं रविर्न धत्त इति कुतो ज्ञातमित्याशङ्क्य प्रत्यक्षं प्रमाणयति—यद्यस्माद्यापि सूर्यकिरणपङ्क्तयो द्यां शोणयन्ति, तस्माद्भास्वरश्वेतिमा सूर्येण न धृत इति ज्ञायत इत्यर्थः। एवंविशिष्टः सूर्यो दूरारूढः संजातः, तस्मादद्यापि सूर्यकिरणाः स्वीयं शुक्लभास्वरत्वं किमिति न दधते न धारयन्ति। ऊर्ध्वमागतः सूर्यः, कमलानि च विकसितानि, तस्माच्छीघ्रमुत्तिष्ठेति भावः। 'चित्रभानुर्विभावसुः' इत्यमरः। दूरारूढः, गम्यादिदर्शनात्समासः। विहासे नियुक्तः स प्रयोजनम्, शिल्पं वास्येति 'तत्र नियुक्तः' इति 'शिल्पम्' इति वा ठक्। 'प्रयोजनम्' इति वा ठञ्। स्वात्मीयं, 'वृद्ध्याच्छः' दधते 'दध धारणे' एतस्यैकवचनान्तम्, धाञश्च बहुवचनान्तम्। श्वेतिमा, पृथ्वादिः। शोणीं कुर्वन्तीति 'तत्करोति' इति ण्यन्तात् 'णाविष्ठवत्' इति पुंवद्भावष्टिलोपो वा॥

प्रातर्वर्णनयानया निजवपुर्भूषाप्रसादानदा-
देवी वः परितोषितेति निहितामान्तःपुरीभिः पुरः।
सूता मण्डनमण्डलीं परिदधुर्माणिक्यरोचिर्मय-
क्रोधावेगसरागलोचनरुचा दारिद्र्यविद्राविणीम्॥६५॥

प्रातरिति॥ सूता मागधा मण्डनमण्डलीं भूषणश्रेणीं परिदधुः तत्तद्धस्तकर्णांघ्रयवयवेषु धारयामासुः। किंभूताम्—आन्तःपुरीभिरवरोधसंचारिणीभिः सखीभिरित्युक्त्वा पुरो मागधानामग्रे निहितां स्थापिताम्। इति किम्—हे मागधाः, अनया प्रातर्वर्ण-

नया प्रयोजिकया परितोषिता नितरां संतोषं प्रापिता देवी कृताभिषेका राज्ञी भैमी निजवपुर्भूषाः स्वीयशरीरालंकारभूता अनेकविधसुवर्णमणिप्रभृतीनि भूषणान्येव प्रसादान्पारितोषिकाणि वो युष्मभ्यमदात् इति । पुनः किंभूताम्—माणिक्यरोचिर्मय्या पद्मरागप्रभारूपया क्रोधस्यावेग आडम्बरस्तेन सरागलोचनरुचारुणनेत्ररुचा कृत्वा दारिद्र्यस्य विद्राविणीं पलायनकारिणीम् । मयि स्थितायामप्यत्र दारिद्र्य, त्वं कथं नाम स्थातुमिच्छसीति क्रुद्धया यया माणिक्यप्रभारूपनेत्रारुणकान्त्या कृत्वा दारिद्र्यं दूरादपसारितम् । एवं प्रभातवर्णने क्रियमाणे भैम्या निजशरीरभूषणैस्ते संमानिता इत्यर्थः । अन्योपि रोषारुणलोचनरुचा किंचिद्विद्रावयति । आन्तःपुरीभिरिति बहुत्वेन माणिक्येत्यादिना च भूषणानां बहुत्वममूल्यत्वं च सूचितम् । देवी प्रादादित्यनेन च नलः स्नानार्थं गतः प्रासादे नास्तीति सूचितम् । प्रातर्लुप्तषष्ठीकमव्ययम् । परितोषिता, ण्यन्तान्निष्ठा । आन्तःपुरीभिः, संबन्धेऽण् 'आन्तःपुरिक्या' इति पाठे—अन्तःपुरशब्दात् 'अन्तःपूर्वपदाट्ठञ्' इति भवार्थे ठञ् । रोचिर्मयेति 'स्त्रियाः पुंवत्–' इति पुंवत् ॥

आगच्छन्भणतामुषः क्षणमथातिथ्यं दृशोरानशे
स्वर्गङ्गाम्बुनि बन्दिनी कृतदिनारम्भाप्लुतिर्भूपतिः ।
आनन्दादतिपुष्पकं रथमधिष्ठाय प्रियायौतके
प्राप्तं तैरवरागतैरविदितप्रासादतोनिर्गमः ॥६६॥

आगच्छन्निति ॥ अथ भूपतिर्नलो बन्दिनां दृशोरातिथ्यं प्रेक्षणविशेषद्योतितप्रेमभक्तिबाहुल्यनेत्रगोचरत्वमानशे लेभे । किंभूतानाम्—क्षणमात्रमुषः प्रभातसमयं भणतां वर्णयताम् । किंभूतः—स्वर्गङ्गाम्बुनि मन्दाकिनीजले कृतदिनारम्भाप्लुतिः कृतप्रातःस्नानः । तथा—अवरागतैर्नलबहिर्गमनानन्तरमागतैस्तैर्मागधैरविदितोऽज्ञातः प्रासादतो निर्गमो राजगृहाद्बहिर्निर्गमो यस्य । तथा—प्रियायौतके भैमीपाणिग्रहणसमये कन्यादानप्रतिष्ठाङ्गतया दीयमाने वस्तुनि मध्ये प्राप्तमतिपुष्पकमतिक्रान्तपुष्पकाख्यकुबेरविमानमतिरमणीयवेगवत्तरं सर्वत्राप्रतिहतगमनं च रथमधिष्ठायारुह्यानन्दात्तज्जवातिशयसंजातहर्षादागच्छन् । मागधागमनात्पूर्वम्, नतु वर्णनानन्तरं प्रबुद्धः प्रासादान्निर्गच्छन्नित्यर्थः । अत एव भैम्यैव ते संभाविता इति पूर्वश्लोक उक्तम् । तस्य परमधार्मिकत्वं सूचितम् । कृतदिनारम्भाप्लुतिरागच्छन्नित्यनेन वक्ष्यमाणभैमीप्रत्युद्गमनम्, उत्तरसर्गसंगतिश्च सूचिता । नलस्य पुण्यश्लोकत्वात्सर्वत्राप्रतिहतगतित्वात्तस्य च रथस्य पूर्वमेव 'सुलङ्घ्याद्रिसमुद्रकापथम्' इत्यादिना सर्वत्राप्रतिहतगतित्वोक्तेश्चातिपुष्पकत्वोक्तेश्च स्वर्गगमनोक्तिर्युक्तैव । आनशे, 'अश्नोतेश्च' इति नुट् । अतिपुष्पकम्, 'अत्यादयः क्रान्ताद्यर्थे–' इति समासः । रथम्, 'अधिशीङ्–' इत्याधारस्य कर्मत्वम् । 'यौतकप्राप्तम्' इति पाठे—'कर्तृकरणे–' इति समासः । अवरागतैः, 'कालाः' इति द्वितीयासमासः । प्रासादतोनिर्गमः 'पञ्चमी' इति योगविभागात्समासः, पश्चाद्बहुव्रीहिः ।

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
एकामत्यजतो नवार्थघटनामेकान्नविंशो महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गोऽयमस्मिन्नगात् १९

श्रीहर्षमिति ॥ मुख्यां नवार्थघटनामपूर्वार्थनिर्मितिमत्यजतोऽमुञ्चतो नूतनमेव प्रमेयं सर्वत्र वदतः श्रीहर्षस्य । एकान्नविंशः विंशतेः पूरण इत्यर्थे डटि 'ति विंशतेर्डिति' इति तिलोपे च विंशः । तत एकेन न विंश इति 'तृतीया' इति योगविभागात्समासे 'एकादिश्चैकस्य चादुक्' इति नञः प्रकृतिभावः, एकशब्दस्यादुगागमः ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे एकान्नविंशः सर्गः ॥

विंशः सर्गः ।

सौधाद्रिकुट्टिमानेकधातुकाधित्यकातटम् ।
स प्राप रथपाथोभृद्वातजातजवो दिवः ॥ १ ॥

सौधेति ॥ सर्गसंगतिरुक्तैव । स रथ एव पाथोभृन्मेघः दिवः स्वर्गाद्गगनाच्च सौधो राजसदनमेवाद्रिस्तस्य कुट्टिमो नानावर्णानेकमणिबद्धभूमिः सैवानेकधातुका नानाविधगैरिकादिधातुयुक्ता अधित्यकोर्ध्वभूमिस्तस्यास्तटं पर्यन्तप्रदेशं प्राप । किंभूतः—वातात्सकाशात् (अर्थादधिको) जातो जवो वेगो यस्य । यद्वा—जातो जवो यस्य स जातजवः, वातो जातजवो यस्माद्धेतोः, तेनापि यस्माद्रथात्सकाशाद्वेगः शिक्षितः । अथवा (वा) तेन जातः । मेघोप्युक्तविशेषणविशिष्टः पर्वतोर्ध्वदेशं गगनात्पतति । धातुकेति, 'शेषाद्विभाषा' इति कप् ॥

ततः प्रत्युदगाद्भैमी कान्तमायान्तमन्तिकम् ।
प्रतीचीसिन्धुवीचीव दिनोंकारे सुधाकरम् ॥ २ ॥

तत इति ॥ ततः सौधोपरिभूमिप्राप्त्यनन्तरं दिनोंकारे दिनप्रारम्भे प्रभातेऽन्तिकमायान्तं सुधाकरं चन्द्रं प्रतीचीसिन्धुवीचीव पश्चिमदिक्समुद्रलहरीव भैमी रथादवतीर्यान्तिकं गृहपरिसरप्रदेशमागच्छन्तं कान्तं नलं प्रति लक्षीकृत्योदगात्प्रत्युज्जगाम । एतेन भैम्या नल आदरातिशयः सूचितः । 'अन्तिके' इत्यपि पाठः । 'अधिकरणे च' इति चात्सप्तमी । वीची, 'कृदिकारात्—' इति ङीप् । दिनोंकारे, 'ओमाङोश्च' इति पररूपम् ॥

स दूरमादरं तस्या वदने मदनैकदृक् ।
दृष्टमन्दाकिनीहेमारविन्दश्रीरविन्दत ॥ ३ ॥

स इति ॥ दृष्टा मन्दाकिन्या हेमारविन्दश्रीर्येन स नलस्तस्या वदने दूरं स्वर्णकमलादपि नितरामादरमविन्दत लेभे । अत एव मदने एका केवला मुख्या वा दृग्यस्य सः । स्वर्णकमलादप्यधिकं तद्दृष्ट्वा संभोगवासनयापश्यदित्यर्थः । एका दृग्यस्येति एकदृक्, मदने एकदृक् । 'सप्तमी' इति योगविभागात्समासः । माद्यति सहर्षा भवति मदना, नन्द्यादित्वाल्लुः, ततः समानाधिकरणो वा बहुव्रीहिः ॥

तेन स्वर्देशसंदेशमर्पितं सा करोदरे ।
बभ्राजे बिभ्रती पद्मं पद्मेवोन्निद्रपद्मदृक् ॥ ४ ॥

तेनेति ॥ सा पद्मेव श्रीरिव बभ्राजे । किंभूता—स्वर्देशस्य स्वर्गदेशस्य गमनसमये मन्दाकिनीस्वर्णकमलं मम क्रीडार्थमानेयमिति संदेशरूपं तेन नलेनार्पितं दत्तं (पद्मं) करोदरे बिभ्रती । तथा—हर्षादुन्निद्रपद्मदृग्विकसितकमलतुल्यनेत्रा । लक्ष्मीरपि करे पद्मं धारयति, प्रसादाद्विकसितपद्मदृग्भवति । संदेशः, कर्मणि घञ् ।

प्रियेणाल्पमपि प्रत्तं बहु मेनेतरामसौ ।
एकलक्षतया दध्यौ यत्तमेकवराटकम् ॥ ५ ॥

प्रियेणेति ॥ असौ भैमी प्रियेण प्रेम्णा प्रत्तं दत्तमेककमलरूपत्वादल्पमपि बहु मेनेतरां नितरां बह्वमन्यत । यद्यस्माद्धेतोरेको मुख्यः श्रेष्ठो वराटको बीजकोशो यस्य तं पद्ममेकमेव लक्षं नयनविषयो यस्य यस्या वा तद्भावेनान्यवस्तुविलोकनपरित्यागेन तदेकपरतयात्यादरेण दध्यावचिन्तयत् । शोभां पुनः पुनरपश्यदित्यर्थः । अथ च—यदल्पमपि दत्तं बहुतरं न मन्ये तदेकश्चासौ वराटकश्च तमेकं कपर्दकमपि एकलक्षसंख्यापरिमितद्रव्यत्वेन न ध्यायेदिति श्लेषप्रतिभोत्थार्थापत्तिः । तेन प्रेम्णा स्वर्णकमलदानात् 'वसन्ति हि प्रेम्णि गुणा न वस्तुनि' इति न्यायेन तत्स्वर्णकमलं लक्षकोटिपरार्धद्रव्यादपि नितरामधिकं मेन इति भावः । प्रियपदेन प्रेमभरः सूचितः । पद्मस्य पुंलिङ्गत्वात्तमिति पुंनिर्देशः ॥

प्रेयसावादि सा तन्वि त्वदालिङ्गनविघ्नकृत् ।
समाप्यतां विधिः शेषः क्लेशश्चेतसि चेन्न ते ॥६॥

प्रेयसेति ॥ प्रेयसा नलेन सा भैमी इत्यवाद्युक्ता । इति किम्—हे तन्वि कृशाङ्गि, तवालिङ्गनविघ्नं करोतीति कृत् शेषः स्नानसंध्यानन्तरकरणीयत्वेनावशिष्टः श्रुतिस्मृत्युक्तोऽनतिक्रमणीयो नित्याग्निहोत्रादिरूपो विधिर्मया समाप्यतां परिपूर्णक्रियतां वदेति सामप्रभः । परं यदि ते चेतस्याश्लेषविलम्बवशात्क्लेशः खेदश्चेन्न भवेत् । समागतेनाश्लेषलोलुपेन मया भवदाश्लेषः कर्तव्यः, परमन्तरायरूपःशेषो विधिरस्ति स पुनः प्रसन्नचित्तत्वेन यद्यनुजानासि तर्ह्येव समाप्तिं नेष्यते नान्यथेत्यर्थः । भैमीकर्मकालिङ्गनविषयमेतत् । भैमीकर्तृकालिङ्गनविषये अनालिङ्गनखिन्नां तां प्रत्येवं तेन प्रार्थना कृतेति भावः । 'विधेः शेषः' इत्यपि पाठः ॥

क्वैतावान्नर्ममर्माविद्विधते विधिरद्य ते ।
इति तं मनसा रोषादवोचद्वचसा न सा ॥ ७ ॥

क्वेति ॥ सा भैमी इति रोषादीर्ष्यया तं मनसैवावोचन्मनस्येवैवमचिन्तयत, न वचसा साक्षान्न वाचा । इति किम्—हे प्रिय, नर्ममर्माविदालिङ्गनादिकेलिरहस्यभेदी एतावानतिबहुरद्यापि ते तव विधिः क्व कुतः कियति वा काले विद्यते, अपि तु नास्त्येव सर्वोपि विधिस्त्वया कृत एव केवलं ममालिङ्गनार्थम् । जात्युत्तरमेतत् । यद्वा—अद्यैतावान्क्व विद्यते, अपि तु नास्त्येव । पूर्वं कदाप्येतावतो विधेरदर्शनात् । इदमपि जात्युत्तरमेवेत्यर्थः । रोषवशाल्लज्जावशाद्वा साक्षान्न बभाष इत्यर्थः । प्रतारणमेव मम करोषीति रुष्टाभूदिति भावः । नर्ममर्म विध्यतीति व्यधेः क्विपि संप्रसारणे च 'नहिवृति-' इति पूर्वपदस्य दीर्घः ॥

१ शर्ममर्माविदिति पठित्वा शर्मणः क्रीडासुखस्येति व्याख्यातं जीवातौ ।

क्षणविच्छेदकादेव विधेर्मुग्धे विरज्यसि ।
विच्छेत्ता न चिरं त्वेति हृदाह स्म तदा कलिः ८

क्षणेति ॥ तदा भैमीचिन्तावसरे गृहारामस्थविभीतकनिवासी कलिः हृदा मनसा इत्याह स्मावोचत् । इति किम्—हे मुग्धे मूढे भैमि, क्षणविच्छेदकात्क्षणमात्रमेव वियोगकारिणो विधेर्नित्यकर्मण एव हेतोस्त्वं विरज्यस्युद्विग्ना भवसीति काकुप्रभः । एतावतैवोद्वेगो न कार्य इत्यर्थः । यतोऽहं कलिस्त्वां चिरं न विच्छेत्ता विच्छेदनशीलो भवामि, अपि तु वियोजयिष्याम्येवेति । एवमहं करिष्यामि न जानासीति सप्रतिभं मनोरथमकरोदित्यर्थः । भावी वियोगः सूचितः । विच्छेत्ता, ताच्छील्ये तृन् । त्वेति, 'त्वामौ' इति त्वादेशः ॥

सावज्ञेवाथ सा राज्ञः सखीं पद्ममुखीमगात् ।
लक्ष्मीः कुमुदकेदारादारादम्भोजिनीमिव ॥ ९ ॥

सावज्ञेति ॥ अथैवं नलवाक्यश्रवणोद्वेगानन्तरं सा भैमी नलेनानालिङ्गनात्स्वयमारब्धालिङ्गनानङ्गीकाराद्वा सावज्ञेव सापमानेव सती पद्ममुखीं नलात्सकाशाद्भैम्यागमनसंजातहर्षत्वाद्विकसितकमलतुल्यवदनां सखीमगात्प्रतिजगाम । का कस्मात्कामिव—लक्ष्मीः कुमुदानां केदारात्क्षेत्रादारान्निकटे पद्मरूपवदनामम्भोजिनीं कमलिनीमिवेत्युपमा । लक्ष्मीनिर्गमे च कुमुदक्षेत्रस्य यथा म्लानत्वं, तथा भैमीनिर्गमे नलस्य, अम्भोजिन्याश्च लक्ष्म्यागमनानन्तरं यथा हर्षः, तथा भैम्यागमनानन्तरं सख्याः, इति सूचितमुपमया ॥

ममासावपि मा संभूत्कलिद्वापरवत्परः ।
इतीव नित्यसत्रे तां स त्रेतां पर्यतूतुपत् ॥ १० ॥

ममेति ॥ स नल इतीव हेतोर्नित्यसत्रे नित्याग्निहोत्रे विषये तामाहवनीयगार्हपत्यदक्षिणाग्निरूपेण प्रसिद्धां त्रेताम् । अथ च—त्रेतारूपं द्वितीयं युगम् । आज्यादिना पर्यतूतुपत्परितोषितवान्पूजितवांश्च । इति किम्—असौ त्रेतापि कलिद्वापरवन्मम परः शत्रुर्मा संभूदिति । अग्नित्रयमप्यपूजनेऽहितकारित्वाच्छत्रुरेव भवति । एतेन चाकरणे प्रत्यवायभियैव नित्याग्निहोत्रमकरोत्, तत्त्वतस्तु भैमीपर(वश) एवाभूदिति भावः । 'त्रेता स्वग्नित्रये युगे' इत्यमरः । अतूतुपत्, 'णौ चङि-' इत्युपधाह्रस्वः ॥

क्रियां प्राङ्केतनीं कृत्वा निषेधन्पाणिना सखीम् ।
कराभ्यां पृष्ठगस्तस्या न्यमिमीलदसौ दृशौ ॥११॥
दमयन्त्या वयस्याभिः सहास्याभिः समीक्षितः ।
प्रसृतिभ्यामिवायामं मापयन्प्रेयसीदृशोः ॥१२॥

क्रियामिति ॥ दमयन्त्या इति ॥ युग्मम् । असौ नलः पृष्ठगः सन् कराभ्यां तस्या दृशौ न्यमीमिलत्पिदधौ । किं कृत्वा प्राङ्केतनीं प्राभातिकीमग्निहोत्रादिक्रियां कृत्वा । किं कुर्वन्—पाणिनाहमागत इति तस्या अग्रे न कथनीयमिति करसंज्ञयैव सखीं निषेधन् । तथा—अत एव सहास्याभिर्नलस्य संमुखीभिर्दमयन्त्या वयस्याभिः समीक्षितः । तथा किं कुर्वन्निव—प्रसृतिभ्यां करद्वयचुलुकाभ्यां प्रेयसीदृशोरियत्परिमाणमेतयोर्दैर्घ्यमायामं मापयन्निव । क्रीडा-

कारिणामियं जातिः । प्रसृतिप्रमाणे दशाविति सूचितम् । प्राह्णे-तनीं, 'सायंचिरम्–' इति ट्युस्तुट् च, टित्त्वान्ङीप् । मीलेरकर्मकत्वात् 'गतिबुद्धि–' इत्यादिनाऽणौ कर्तुर्णौ कर्मत्वाद्दृशाविति द्वितीया । मापयन्, 'मा माने' अस्माद्धेतुमण्णिचि शता ॥

तर्कितालि त्वमित्यर्धवाणीका पाणिमोचनात् ।
ज्ञातस्पर्शान्तरा मौनमानशे मानसेविनी ॥ १३ ॥

तर्कितेति ॥ हे आलि सखि मया नेत्रपिधायिनी त्वं तर्किता ज्ञातासीत्येवंरूपाऽर्धा मां मुञ्चेत्याद्यवचनादपरिपूर्णपदा वाणी यस्याः सा, तथा—स्वकराभ्यां नलपाण्योर्मोचनाद्धेतोः ज्ञातं स्पर्शान्तरं स्वीयस्पर्शाद्विलक्षणो नलस्पर्श इति यया । ज्ञातस्पर्शमान्तरं चेतो यस्या इति वा । सा मौनमानशे प्राप । यतो मानसेविनी मानिनी । स्पर्शेन नलं ज्ञात्वा मामवज्ञाय त्रेतायामनुरक्तोऽधुना वृथैव किमित्यागत इत्यभिमानान्किमपि नावददित्यर्थः । वाणीकेति, नद्यन्तत्वात्कप् ॥

सावादि सुतनुस्तेन कोपस्ते नायमौचिती ।
त्वां प्रापं यत्प्रसादेन प्रिये तन्नाद्रिये तपः ॥ १४ ॥

सेति ॥ तेन नलेन सुतनुः शुभाङ्गी सा इत्यवादि उक्ता । (इति किम्—) अयि प्रिये भैमि, ते तवायं मयि कोपो नौचिती । औचितीशब्दस्याविष्टलिङ्गत्वादुचितोयं नेत्यर्थः । अहं यस्य तपसः प्रसादेन त्वां प्रापं प्राप्तवानास्मि, तत्तपोऽग्निहोत्रादि नाद्रिये आदरेण न कुर्यामित्याक्षेपकाकुप्रश्नः । एवंविधमहाफलस्य तपसोत्यादरो युक्त एवेत्यर्थः । त्वत्प्रापकत्वादेवास्यादरः क्रियते, न त्वन्यथा, तस्मात्कोपं मा कार्षीरिति भावः ॥

निशि दास्यं गतोपि त्वां स्नात्वा यन्नाभ्यवीवदम् ।
तं प्रवृत्तासि मन्तुं चेन्मन्तुं तद्वद वन्द्यसे ॥ १५ ॥

निशीति ॥ हे भैमि, अहं निशि तव दास्यमालिङ्गनचुम्बनादि चरणपर्यन्तसेवाकारित्वं गतोपि सन् प्रातः स्नात्वा त्वां नाभ्यवीवदं न नमस्कृतवानिति यत्, तं मन्तुमपराधं मन्तुमक्रीकर्तुं त्वं प्रवृत्तासि चेत्, तर्हि वद तदपराधमार्जनायेदानीमेव वन्द्यसे नमस्क्रियसे । रात्रौ दास्यं प्राप्त इत्यनेन सख्यौ भैमीरात्रिवृत्तमपि सूचितम् । अभ्यवीवदमभिपूर्वान्नमस्कारार्थाच्चौरादिकाद्वदेः स्वार्थेणिचि चङि च 'णौ चङि–' इत्युपधाह्रस्वः ॥

इत्येतस्याः पदासन्ने पत्यैष प्रेरितौ करौ ।
रुद्ध्वा सकोपं सातङ्कं तं कटाक्षैरमूमुहत् ॥ १६ ॥

इतीति ॥ एष इत्येवमुक्तप्रकारेणैतस्याः भैम्याः पदासन्ने चरणनिकटीभावाय प्रणामार्थं पत्या प्रेरितौ करौ नमस्कारारम्भानौचित्याद्व्यावृत्तस्य प्रकटनेन वा सरोषं पतित्वात्स्वीयचरणयोः पतिकरस्पर्शस्यानौचित्याद्वा आतङ्को भयं तेन च सह यथा तथा चरणस्पर्शात्पूर्वमेव स्वकराभ्यां रुद्ध्वा निवार्य तं कटाक्षैरमूमुहत्कामाधीनं चकार । एवं तया विलोकित एव कामवशो जात इति भावः । पदासन्ने, तादर्थ्यमात्रे चतुर्थी । मुहेरकर्मकत्वात् 'गतिबुद्धि–' इत्यादिनाऽणौ कर्तुर्णौ कर्मत्वात्तमिति द्वितीया । अमूमुहत्, हेतुमण्णिचि चङ्युपधाह्रस्वादि ॥

अवोचत ततस्तन्वीं निषधानामधीश्वरः ।
तदपाङ्गचलत्तारझलत्कारवशीकृतः ॥ १७ ॥

अवोचतेति ॥ ततस्तस्यास्तादृशकटाक्षविलोकानन्तरं निषधानामधीश्वरस्तन्वीं वक्ष्यमाणमवोचत । किंभूतः—तारशब्दस्य कनीनिकावाचित्वे नपुंसकलिङ्गत्वात्तस्या अपाङ्गे चलतस्तारस्य कनीनिकायाः किरणोल्लासलक्षणदर्शनचमत्काररूपो झलत्कारस्तेन वशीकृतः । यद्वा—चलन्ती तरला तारा यत्र तादृशश्चासौ झलत्कारश्च ततः पूर्वेण षष्ठीसमासः । झलत्कार इति वैश्यपदम् ॥

कटाक्षकपटारब्धदूरलङ्घनरंहसा ।
दृशा भीत्या निवृत्तं ते कर्णकूपं निरूप्य किम् १८

कटाक्षेति ॥ हे प्रिये कटाक्षकपटेन नेत्रप्रान्तवक्रविलोकनव्याजेनारब्धं कर्तुं व्यवसितं दूरलङ्घनेऽतिदूरदेशातिक्रमणे रंहो वेगो यया एतादृश्या ते दृशा कर्णरूपं कूपमग्रे निरूप्य विलोक्य भीत्या पुनर्निवृत्तं परावृत्तं किमित्युत्प्रेक्षा । दूरं गन्तुमुपक्रान्ता हि महान्तं कूपं पुरो दृष्ट्वा भयेन शीघ्रं परावर्तन्त एव । दृशेत्यनेन स्त्रीत्वं युज्यते । स्त्रिया हि भीतिर्युक्ता ॥

सरोपापि सरोजाक्षि त्वमुदेपि मुदे मम ।
तन्नापि शतपत्त्रस्य सौरभायैव सौरभा ॥ १९ ॥

सरोपेति ॥ हे सरोजाक्षि, सरोपापि त्वं मम मुदे हर्षायैवोदेपि भवसि । अङ्गानामालिङ्गनार्थं दुरापत्वेन स्पृहणीयतरत्वासौंदर्यातिशयाच्चेत्यर्थः । यस्मात्तस्मादुष्णस्पर्शापि सूरः सूर्यसम्बन्धिनी सौरी भा दीप्तिः शतपत्रस्य कमलस्य विकासपूर्वं सौरभायैव भवति, न तु म्लान्यै । सौरभेत्यत्र 'पुंवत्कर्मधारय–' इति पुंवत् ॥

छेत्तुमिन्दो भवद्वक्त्रबिम्बविभ्रमविभ्रमम् ।
'शङ्के शशाङ्कमानङ्के भिन्नभिन्नविधिर्विधिः ॥ २० ॥

छेत्तुमिति ॥ हे भैमि, विधिर्ब्रह्मा पूर्वं निष्कलङ्केऽपीन्दौ विषयेऽतिसादृश्यात्प्रतिक्षणं भवदुपचीयमानो भवत्या यो वक्त्रबिम्बस्य विभ्रमो विशिष्टा भ्रान्तिस्तस्य विभ्रमं विलासं छेत्तुं शशाङ्कमानङ्के शशरूपेण कलङ्केन चिह्नितवानित्यहं शङ्के । यतो भिन्नभिन्नो भिन्नप्रकारः किंचिद्भेदयुक्तो विधिर्घटपटादिविधानं यस्य तादृशः । तस्माद्भवन्मुखमृगाङ्कयोरुपचीयमानसादृश्यभ्रान्तिनिरासाय चन्द्रं कलङ्केन चिह्नितवानित्यर्थः । इत्यहं मन्ये । निष्कलङ्कं भवन्मुखं चन्द्रादप्यधिकमिति भावः । आनङ्के, चौरादिकालक्षणार्थाद्दृङ्लिट्, भिन्नभिन्नेति प्रकारे द्विरुक्तिः ॥

---

१ 'इतः परं लिखितपुस्तकेषु 'युग्मम्' इति कलिकातामुद्रितपुस्तके 'युग्मपाणिनिकरप्रसृतिरित्यमरः' इत्यस्ति । २ 'अवाचि' इति जीवानुसंमतः पाठः । ३ 'प्रापेति पाठे परोक्षोत्तमैकवचनम्' इति सुखावबोधा । ४ 'प्रेषितौ' इति पाठः सुखावबोधासंमतः ।

२ 'दृशाभ्यत्येति पाठे—श्रोत्रकृपमभ्येत्य प्रयातस्य भूयो व्यावृत्तिं किमित्यर्थः । अभि-पाठे कनकपमित्यनेन भयं व्यक्तमिति' सुखावबोधा । २ 'दृशान्वाक्षीत्' इति जीवानुः ।

ताम्रपर्णीतटोत्पन्नैर्मौक्तिकैरिन्दुकुक्षिजैः ।
बद्धस्पर्धतरा वर्णाः प्रसन्नाः स्वादवस्तव ॥ २१ ॥

ताम्रपर्णीति ॥ तव वर्णास्त्वद्वदननिर्गता वर्णाः प्रसन्नाः स्पष्टतरा निर्दोषत्वादुज्ज्वलाश्च, तथा—स्वादवो मधुराः सुश्राव्याः क्रमेण मलयनिर्गतदक्षिणसमुद्रगामिताम्रपर्ण्याख्यनद्यास्तटे उत्पन्नैः, तथा—अमृतमयस्येन्दोः कुक्षौ जातैर्मौक्तिकैः सह बद्ध्वा धृता स्पर्धा सादृश्यदर्पो यैस्तेऽतिशयेन बद्धस्पर्धा बद्धस्पर्धतराः । 'इक्षुकुक्षिजैः' इति पाठे—इक्षुकुक्षेर्जातैर्मौक्तिकैः । ताम्रपर्णीजातस्य मौक्तिकस्य सौन्दर्यम्, न माधुर्यम् । इक्षुकुक्षौ यदि मौक्तिकानि जायेरन्, तदा माधुर्यातिशयास्तैः सह बद्धस्पर्धतरा इत्यभूतोपमा । इक्षुर्वंशविशेषः, तत्रोत्पन्नस्य मौक्तिकस्य वैद्यकनिघण्टौ शैत्यं माधुर्यं पित्तोपशमकत्वं चोक्तम् । वंशान्मौक्तिकोत्पत्तिः प्रसिद्धा पूर्वमुक्ता च ॥

त्वद्गिरः क्षीरपाथोधेः सुधयैव सहोत्थिताः ।
अद्ययावदहो धावद्दुग्धलेपलवस्मिताः ॥ २२ ॥

त्वदिति ॥ तव गिरः क्षीरपाथोधेः क्षीरसमुद्रात्सकाशात्सुधयैव सहोत्थिता उत्पन्नाः । यस्माद्—अद्ययावदद्यतनदिनमवधीकृत्याद्याप्यहो चित्रं धावत्प्रसरद्दुग्धलेपलवरूपं स्मितं हास्यं यासु तादृशः । अमृतेन सह निर्गतत्वादमृतवन्मधुराः, क्षीरसमुद्राच्च निर्गतत्वात्स्मितव्याजेन तद्दुग्धलेपलेश एवाद्याप्यनुवर्तते । तद्बन्धुवत्स्मिताश्चेति भावः । धावत्, 'धावु गतिशुद्ध्योः' इत्यस्माच्छता॥

पूर्वपर्वतमाश्लिष्टचन्द्रिकश्चन्द्रमा इव ।
अलंचक्रे स पर्यङ्कमङ्कसंक्रमितप्रियः ॥ २३ ॥

पूर्वेति ॥ स नलः पर्यङ्कमलंचक्रे । किंभूतः—अङ्के संक्रमिता समारोपिता प्रिया येन सः । कः कमिव—आश्लिष्टा चन्द्रिका कौमुदी येन स चन्द्रमाः पूर्वपर्वतमिव ॥

प्रावृडारम्भणाम्भोदः स्निग्धां द्यामिव स प्रियाम् ।
परिरभ्य चिरायास विश्लेषायासमुक्तये ॥ २४ ॥

प्रावृडिति ॥ स प्रियां विश्लेषः प्रातःस्नानादिनित्यकर्मानुष्ठानवशेन तावन्मात्रभिन्नदेशावस्थायितया वा वियोगस्तज्जनितो (य) आयासः खेदस्तस्योभयोर्वा मुक्तये निवृत्तये परिरभ्य चिरायास तस्थौ शुशुभे वा । कः कामिव—प्रावृडारम्भणे वर्षारम्भेऽम्भोदो मेघो द्यामिव । (किंभूतो मेघः—) स्निग्धः सजलत्वाद्रूक्षः श्यामः । मेघो यथा वीनां श्लेषो योगः शरदादौ सदा गगने क्रीडद्भिः पक्षिभिर्यः श्लेषः संबन्धस्तज्जनितदुःखपरिहाराय जलभिया पक्षिणां नीडनिवेशित्वात्तद्योगे क्लेशमुक्तये दिवमालिङ्ग्य चिरं तिष्ठति । किंभूतः । सः—स्निग्धोतिप्रीतिमान् । आस, 'अस गतिदीप्त्यादानेषु' ॥

चुचुम्बास्यमसौ तस्या रसमग्नः श्रितस्मितम् ।
नभोमणिरिवाम्भोजं मधुमध्यानुबिम्बितः ॥२५॥

चुचुम्बेति ॥ असौ रसमग्नः प्रेमभरपरवशः सन् तस्या गतरोषत्वादालिङ्गनसुखाच्च श्रितस्मितमास्यं चुचुम्ब । कः किमिव—मधुमध्येऽनुबिम्बितः प्रतिफलितः, अत एव रसमग्नो नभोमणिः सूर्योऽम्भोजमिव । तदपि श्रितविकासम् । सूर्यपद्मयोर्दूरदेशत्वात्कथं चुम्बनमिति प्रश्ने मधुमध्यानुबिम्बित इत्युत्तरम् ॥

अथाहूय कलां नाम पाणिना स प्रियासखीम् ।
पुरस्ताद्वेशितामूचे कर्तुं नर्मणि साक्षिणीम् ॥२६॥

अथेति ॥ अथ चुम्बनानन्तरं स पाणिना हस्तसंज्ञया कलां नाम प्रियायाः सखीमाहूय ऊचे । किंभूताम्—नर्मण्यन्योन्यरहःक्रीडाहासे साक्षिणीं कर्तुं पुरस्तादग्रे वेशितां स्थापिताम् । वेशिताम्, ण्यन्तान्निष्ठा ॥

कस्मादस्माकमज्ञास्या वयस्या दयते न ते ।
आसक्ता भवतीष्वन्यं मन्ये न बहु मन्यते ॥२७॥

कस्मादिति ॥ हे कले, अज्ञास्या पद्ममुखी ते वयस्या भैमी कस्मात्कारणादस्माकं न दयते कृपां न करोति, कथय पृच्छ वेति शेषः । स्वयमेव कारणमाशङ्कते—भवतीषु भवादृशीषु सखीषु मध्य आसक्ता सामस्त्येनानुरक्ता सती हितकारिणमप्यन्यं मादृशं बहु यथा तथा नितरां न मन्यत इत्यहं मन्ये । तेन मयि कृपां न करोतीत्यर्थः । रात्रावात्मानं मम हस्तेन स्प्रष्टुमपि नादादिति तां प्रति सूच्यते । भवदासक्तेरस्माकमियं दशाऽनया कृतेति कलां प्रत्यपि सोलुण्ठम् । अथ च—नवपरिचयेऽप्यस्माकं दयते, चिरपरिचयेपि ते तुभ्यं न दयते । कुतः—भवतीषु नासक्ता सती अन्यं मल्लक्षणं बहु मन्यते यत इत्युत्तरानुरोधेन व्याख्येयम् । अस्माकम्, 'अधीगर्थ-' इति षष्ठी, 'अस्मदो द्वयोश्च' इत्येकत्वेपि बहुवचनम्॥

अन्वग्राहि मया प्रेयान्निशि स्वोपनयादिति ।
न विप्रलभते तावदालीरियमलीकवाक् ॥ २८ ॥

अन्विति ॥ अलीकाऽसत्या वाग्यस्याः सेयं इत्युक्त्वातिविश्वासस्थानभूता भवादृशीरालीः सखीस्तावन्न विप्रलभते प्रतारयति । इति किम्—मया निशि आलिङ्गनचुम्बनादिना स्वस्यात्मशरीरस्योपनयाद्दानादानुकूल्येन रमणान्मया प्रेयान्नलोऽन्वकम्पीति (विप्रलभते प्रतारयति) । मादृशान्यद्यपि वञ्चयति, तथापि भवादृशीः कथं वञ्चयेदिति तावच्छब्दार्थः । अलीकवाङ्न प्रतारयतीति विपरीतलक्षणया सोलुण्ठभाषणाद्विप्रलभत एवेत्यर्थः । आलीस्तावन्न विप्रलभते, अपि तु ता अपि वञ्चयत्येव, अस्मादृशां तु का कथेति काकुर्वा । तस्मादियमस्माकं न दयत इत्येव तथ्यं जानीत, सर्वथा वास्या वचसि भवतीभिर्न विश्वसनीयमिति भावः । एतेन भेदोपायप्रयोगः कृत इति सूचितम् ॥

पुनरप्यलीकतामेवाह—

आह स्मैषा नलादन्यं न जुषे मनसेति यत् ।
यौवनानुमितेनास्यास्तन्मृषाभून्मनोभुवा ॥ २९ ॥

आहेति ॥ एषा भवादृशीनां पुर इति यदाह स्म । इति किम्—अहं नलादन्यं मनसापि न जुषे भज इति । तदेतस्याः प्रतिज्ञावाक्यं यौवने प्रस्तुते सत्यनुमितेन प्रकटीभूतेन मन एव

१ 'संक्रमितप्रिय इत्यत्र प्रियादित्वात्पूर्वपदस्य न पुंवद्भावः' इति जीवातुसुखावबोधे ।

भूः स्थानं यस्य तेन कामेन कृत्वा मृषा मिथ्याभूत् । मदन्यस्य कामस्य मनसि धारणादसत्यप्रतिज्ञेयमिति निन्दा । वस्तुतस्तु तारुण्यमारभ्य मय्येवानुरक्तेति स्तुतिरेवास्याः कृता । व्याजस्तुतिः ॥

आस्यसौन्दर्यमेतस्याः शृणुमो यदि भाषसे ।
तद्धि लज्जानमन्मौलेः परोक्षमधुनापि नः ॥३०॥

आस्येति ॥ हे कले, त्वमेतस्या आस्यसौन्दर्यं चिरपरिशीलनज्ञाताशेषविशेषत्वाद्यदि भाषसे तर्हि वयं शृणुमः। आदर्शे हस्तकङ्कणदर्शनवदसंगतमेतदित्याशङ्क्य हेतुमाह—हि यस्मात्तदेतदास्यसौन्दर्यमधुनापि विवाहमारभ्याद्यतनक्षणपर्यन्तं नोऽस्माकं परोक्षमप्रत्यक्षम् । नेत्रविषयो न जातमित्यर्थः । यतः—लज्जया नम्रमौलेर्नम्रमस्तकायाः । नम्रमौलित्वादेतन्मुखं कदापि मया न दृष्टम् । तस्मादेतदास्यसौन्दर्यं त्वं कथयेत्यर्थः । एतस्या मुखमपि न दृष्टं संभोगकथा तु दूरापास्ता । तस्मादेतदीयवचने सर्वथा न विश्वसनीयमिति भावः । अधुनेत्यस्य वर्तमानार्थत्वात्परोक्षस्य भूतार्थत्वाद्वर्तमानस्य भूतत्वविरोधात्परोक्षाधुनाशब्दयोरर्थान्तरपरिग्रहाद्विरोधाभासोपि ॥

पूर्णयैव द्विलोचन्या सैषालीरवलोकते ।
द्राग्दृगन्ताणुना मां तु मन्तुमन्तमिवेक्षते ॥३१॥

पूर्णयेति ॥ सैषा आलीर्भवादृशीः पूर्णयैव द्विलोचन्या नेत्रद्वयेनावलोकते, मां तु पुनः मन्तुमन्तमिव सापराधमिव एकस्या अपि दृशोऽन्तः प्रान्तदेशस्तस्याप्यणुर्लेशस्तेनापि द्राक् झटिति क्षणमात्रमेवेक्षते। पूर्णद्विलोचन्या चिरकालविलोकनस्य का कथेत्यर्थः। सापराधोपि सरोषया दृशा विलोक्यते । प्रियया च प्रेयान्दृगन्तेनैव विलोक्यते । सख्यादिबान्धवजनस्तु सरलैः सकलैर्नेत्रैः । द्विलोचन्या, समाहारद्विगौ 'द्विगोः' इति ङीप् ॥

न[1] लोकते यथेदानीं मामियं तेन कल्पये ।
योऽहं दृत्येऽनया दृष्टः सोपि व्यस्मारिषीदृशा ३२

नेति ॥ हे सखि, यथा येन प्रकारेण । यत इति यावत् । यस्मादिदानीमियं मां न लोकते तेन हेतुना योऽहं दृत्यावसरेऽनया दृष्टोप्यहमीदृशा सर्वथानवलोकिन्याऽनयैव व्यस्मारिषि विस्मृत इति कल्पये संभावयामि । संप्रति जिज्ञासिताशेषविशेषं मां द्रक्ष्यतीति तु कथा दूरे । किंतु सर्वथा नावलोकयत्यपीत्यर्थः । स एवायमिति प्रत्यभिज्ञानं यद्यभविष्यत्, तर्हि तादृगेव व्यलोकयिष्यदपि, नत्वेवं तस्माद्विस्मृत एवाहमनयेति कल्पना युक्तेति सोलुण्ठम् । पूर्ववद्वक्रोक्तिः । कल्पये चिन्तार्थाद्धौरादिकात्कृपेः 'णिचश्च' इति तङ् । व्यस्मारिषि, स्मरतेः कर्मणि लुङुत्तमैकवचन इटि 'स्यसिचसीयुट्–' इत्यादिना सिच इडागमे तस्य चिण्वद्भावे 'अचो ञ्णिति' इति वृद्धिः ॥

रागं दर्शयते सैषा वयस्याः सूनृतामृतैः ।
मम त्वमिति वक्तुं मां मौनिनी मानिनी पुनः॥३३

रागमिति ॥ हे कले, सैषा वयस्या भवादृशीः सूनृतानि प्रियसत्यानि वचनानि तदूपैरमृतैः कृत्वा रागं निजां प्रीतिं दर्शयते बोधयते । भवतीष्वतितमां मम प्रीतिरिति ज्ञापयतीत्यर्थः । मां पुनः त्वं ममेत्येतावन्मात्रमपि वक्तुं मौनिनी । तूष्णीं भवतीत्यर्थः । यतो वृथैव मानिनी धृताभिमाना । नहि मया किमप्यपराद्धमित्यर्थः । त्वं मदीय इत्येतावतैव वचनेनाहं सनाथः, परं तावदपि न वदति, मय्यस्याः कृपा नास्त्येवेति सोलुण्ठम् । लज्जावशाच्च वदतीति व्याजेन स्तुतिर्वा । दर्शयते, 'णिचश्च' इति तङ् । वयस्याः, दृशेर्वध्यर्थत्वात् 'गतिबुद्धि–' इति अर्णौ कर्तुर्णौ कर्मत्वम् ॥

कां नामत्रयते नाम नामग्राहमियं सखीम् ।
कले नलेति नास्माकीं स्पृशत्याहां न जिह्वया ३४

कामिति ॥ हे कले, इयं कां नाम सखीं नामग्राहं नाम गृहीत्वा नामत्रयते संबोधनपूर्वं नाह्वयति। अपितु सर्वामपि । नाम शिरश्चालने । अस्माकीमस्मत्संबन्धिनीं तु पुनर्नलेति संबुध्यस्माकां संज्ञां जिह्वया न स्पृशति नोच्चारयत्यपि । रहस्यभाषणं तु दूरापास्तमित्यर्थः । स्त्रीणां भर्तृनामग्रहणस्य निषिद्धत्वादनौचित्यारोपेणोपालम्भाद्व्याजस्तुतिः। आह्वानमाह्वा, 'आतश्चोपसर्गे' इत्यङ्॥

अस्याः पीनस्तनव्याप्ते हृदयेऽस्मासु निर्दये ।
अवकाशलवोप्यस्ति नात्र कुत्र बिभर्तु नः ॥ ३५ ॥

अस्या इति ॥ अस्याः परिदृश्यमानेऽग्रहृदये अवकाशलवः स्थापनलेशोपि नास्ति । तस्मान्नोऽस्मान्कुत्र कस्मिन्स्थाने बिभर्तु धारयतु । अवकाशलेशाभावे हेतुमाह—यस्मात्पीनाभ्यामाबाद्दमूलप्रसृताभ्यां स्तनाभ्यां व्याप्ते समन्तादावृतेऽतिसंकटे । संकटेऽपि दयया समावेशो भवतीत्याशङ्क्य सापि नास्तीत्याह—अस्मासु निर्दयेऽस्मद्विषये कृपारहिते । एतेन नास्याः कश्चिदपराध इति सोलुण्ठम् । उच्चकुचाभ्यामहमुपर्येव स्थिते, ननु मम हृदयस्पर्शः कदापि दीयत इत्यौचित्येप्यनौचित्यारोपाद्वक्रोक्त्या व्याजस्तुतिर्वा ॥

अधिगत्येदृगेतस्या हृदयं मृदुतामुचोः ।
प्रतीम एव वैमुख्यं कुचयोर्युक्तवृत्तयोः ॥ ३६ ॥

अधिगत्येति ॥ हे कले, वयमीदृगेवं पूर्वोक्तप्रकारेण कठिनमेतस्या हृदयमधिगत्य प्राप्य ज्ञात्वा वा मृदुतामुचोः कठिनाश्रयवशात्काठिन्यं भजतोः । कदाप्यनालिङ्गनान्मयि विषये निर्दययोरिति यावत् । तथा—युक्तमुचितं वृत्तमाचरणं ययोः । कदाचिदप्यालिङ्गनाकरणाद्विरुद्धलक्षणयाऽनाचारशीलयोरिति यावत् । एवंभूतयोरस्याः स्तनयोः कदाचिदप्यालिङ्गनादानार्द्धमुख्यं पराङ्मुखत्वमेव प्रतीमो जानीमः । आलिङ्गने कुचौ संमुखौ भवतः, निर्दयहृदयत्वादेतस्याः पराङ्मुखत्वादेवंभूतायेतत्कुचावपि सदा मम पराङ्मुखावेव जातावित्यर्थः । अथ च—स्त्रीणां हृदयस्यातिमृदुत्वादेतस्या हृदयमीदृगतिमृदु ज्ञात्वापि सर्वस्य तस्यावरणाद्विर्दयत्वं भजतोः । अत एव विपरीतलक्षणया युक्तवृत्तयोरनाचारशीलयोः । मृदुं प्रति मृदुनैव भवितव्यम्, विशेषतस्तु स्त्रीं प्रति । तथा च विपरीताचरणादनाचारयोः । अत एव वैमुख्यं पराङ्मुखत्वम् । अथ च विरुद्धमुखत्वं जानीम एव । अनाचारशीलो हि कस्मैचिदपि स्वमुखं न दर्शयति मलिनमुखश्च भवति । एतयो-

१ 'नालोकते' इति पाठो जीवातुसुखावबोधासंमतः ।

रप्युक्तप्रकारेण पराङ्मुखत्वं चूचुकयोः श्यामत्वान्मलिनमुखत्वं जानीम इति सोल्लुण्ठम्। अथ च—एतस्या हृदयं कठिनं ज्ञात्वा 'आर्जवं हि कुटिलेषु न नीतिः' इति न्यायेन निष्ठुरत्वमङ्गीकुर्वतोः। यस्मादुचितं वृत्तं स्थितिर्ययोः। अथ च—युक्ताचारयोः। पराङ्मुखत्वं प्रतीम एव। हृदयस्योपर्यूर्ध्वमुखेन वर्तमानत्वाद्धृदयं प्रति कुचौ सदा पराङ्मुखावेवेत्यर्थः। युक्ताचारो हि कठिनहृदयं प्रति निर्दयो भूत्वा तस्मात्पराङ्मुख एव भवति, तं न पश्यति। अथच—ईदृक्सुन्दरतरं रुयन्तरपरित्यागेनास्या हृदयं प्राप्य कठिनतरत्वं गुणं भजतोः, तथा—पीवरत्वादन्योन्यसंश्लिष्टयोर्वर्तुलयोश्च विगतमुखत्वं निमग्नचूचुकत्वं गौरत्वविरुद्धश्याममुखत्वं च जानीम एव। अथ च—ईदृगतिकोमलमेतदीयं हृदयं ज्ञात्वा प्राप्य वा मूढतामुञ्चतोरालिङ्गनादिना मयि विषये सकृपयोः, अत एव युक्ताचारयोर्विशिष्टमत्युन्नतं मुखमग्रं ययोस्तादृक्त्वं प्रसन्नमुखत्वं च जानीम एवेति। इत्यादि ज्ञातव्यम्॥

इति मुद्रितकण्ठेऽस्मिन्सोल्लुण्ठमभिधाय ताम्।
दमयन्तीमुखाधीतस्मितयाऽसौ तया जगे ॥३७॥

इतीति॥ अस्मिन्नले इत्युक्तप्रकारेण सोल्लुण्ठं वक्रोक्त्यादिसहितं यथातथा तां भैमीं कलां वाऽभिधायोक्त्वा मुद्रितकण्ठे मौनिनि सति दमयन्तीमुखादधीतं स्मितं यया नलवक्रोक्तिमाकर्ण्य हसद्भैमीमुखं दृष्ट्वा संजातहासया, भैमीमुखेनाधीतं स्मितं यस्याः सकाशात्। नलीयसोत्प्रासवचनात्स्वयं हसन्तीं भैमीमपि हासयतीत्यर्थः। तादृश्या वा तया कलया असौ नलो जगेऽभाणि। 'सोल्लुण्ठनं तु सोत्प्रासम्' इत्यमरः। उल्लुण्ठनमुल्लुण्ठः भावे घञ्। तेन सह यथा स्यादिति क्रियाविशेषणम्। मुखाधीतेति 'पञ्चमी' इति योगविभागात्समासः। '(स्मितया)ऽस्मै तया' इति पाठे—'क्रियया यमभिप्रैति–' इति संप्रदानत्वम्॥

'कस्मादस्माकम्—' (२०।२७) इत्यस्योत्तरमाह—

भावितेयं त्वयासाधु नवरागा खलु त्वयि।
चिरंतनानुरागार्हं वर्तते नः सखीः प्रति ॥ ३८ ॥

भावितेति॥ हे राजन्, त्वयेयं साधु सम्यग्भाविता तर्किता। या त्वयि विषये खलु निश्चितं नवरागा नवप्रीतिर्वर्तते। नवोढत्वादधार्ष्ट्येन सलज्जा वर्तत इत्यर्थः। त्वयि नवरागा सती नः सखीः प्रति चिरंतनो योऽनुरागस्तस्यार्हं योग्यं यथा तथा वर्तते। बहुकालीनस्नेहवशान्निःशङ्कं वर्तत इत्यर्थः। त्वयि नवरागा सती नः प्रति चिरंतनानुरागार्हमतिदृढप्रीति (यथा तथा) वर्तते, नतु त्वयीत्येकवाक्यता वा। तस्मालज्जावशादधार्ष्ट्यान्मय्युदासीना, भवतीषु तु प्रीतिमतीति तव बुद्धिरुत्पन्नेत्यर्थः। अथ च—त्वयेयं साधु तर्किता। साध्विति काक्वा विपरीतलक्षणया वा साध्वेव विपरीतमेव तर्कितेत्यर्थः। यद्वाऽकारप्रश्लेषेणासाधु तर्किता। खलु यस्मात्त्वयीयं नूतनानुरागाऽतिदृढप्रीतिर्वर्तते, अस्मासु तु जीर्णानुरागयोग्यं यथा तथाऽतिशिथिलप्रीतिर्वर्तते, नतु त्वयि। 'अतिपरिचयादवज्ञा' इति न्यायादित्यर्थः। यतो मह्यं दयते तुभ्यं न दयते इति वदता त्वया सत्यमुक्तमित्यर्थः। यद्वा—सम्यग्भाविता भावं प्रापिता। त्वयीत्यर्थः। यस्मात्त्वयि नवरागत्वादृढप्रीतिः सती अस्मान्प्रति पुराणप्रीतिसदृशमतिशिथिलप्रीति (यथा तथा) वर्तते, नतु त्वयि। तथा सम्यग्भाविता यथा त्वय्येव दृढप्रीतिः सत्यस्मान्सर्वथा न गणयत्यपीत्यर्थः। तस्मादस्मान्वृथैवोपहससीति भावः। इति सोल्लुण्ठम्॥

'अन्वग्राहि—' (२०।२८) इत्यादेरुत्तरमाह—

स्मरशास्त्रविदा सेयं नवोढा नस्त्वया सखी।
कथं संभुज्यते बाला कथमस्मासु भाषताम् ॥३९॥

स्मरेति॥ 'बालां बलान्न भुञ्जीत विरागोत्पत्तिशङ्कया। भुञ्जीत चेन्नपाभीतित्याजनक्रमसंगताम्॥' इत्यादिस्मरशास्त्रविदा कामशास्त्ररहस्यज्ञेन त्वया नवोढा नवपरिणीता सेयं बाला नोऽस्माकं सखी कथं संभुज्यते। अपि तु विरागोत्पत्तिभिया बलादुपमर्द्य न कथंचिद्रम्यते, अत एव त्वया संभुक्तत्वादेवास्मासु कथं केन प्रकारेण भाषतां कथयतु, अपि तु—त्वत्कृततरतत्वादेव किंचिदपि न कथयतीति स्पष्टोर्थः। अथ चैवं वक्रोक्तिः। कामशास्त्रज्ञेन त्वयेयं नवोढा बाला कथं किंवा संभुज्यते, अपितु सामस्त्येन भोगो न क्रियत एव, किंतु स्मरशास्त्रविरुत्वात्स्वल्पमेव भुक्त्वा मुच्यते इत्यर्थः। अत एवास्मासु किं भाषताम्, अपितु—अतिपीडनाभावान्न किंचिदप्यस्मासु भाषते। या हि बाला सुरते नितरां पीड्यते, सैव सखीषु ममातिपीडा भवति मया सोढुं न शक्यते इत्यादि वदति, नतु सामि भुक्तमुक्तेत्यर्थः। अथ च—कामशास्त्रज्ञेन त्वया बालापीयमेतन्मनोनुकूलमेव भुक्ता, अतः कथमस्मासु भाषताम्, अपितु न कथंचिद्भाषते। बाला हि कामशास्त्रकौशलवशाद्यथानुरागं भुक्ता यद्यपि भोगं सहते, तथाप्यतीव लज्जालुत्वात्संभोगरहस्यं कस्याप्यग्रे न कथयतीत्यर्थः। तस्मादुभावपि वञ्चकौ युवामस्मान्वञ्चयथ इति भावः। अथ च—सामर्थ्याच्छास्त्रविदा कामशास्त्रज्ञेन त्वया नवोढेयं बाला केन प्रकारेण संभुज्यते स्मर चिन्तय। तं प्रकारमित्यर्थात्। रात्रौ कृतमेव संभोगमकृतमेव कथयति। संभोगः प्रायेण विस्मृतः, अतः स्मरेति काकूक्तिः। कथं चेयमस्मासु भाषताम्, अपितु नास्मासु कथयतीत्यर्थः। अथ च विपरीतलक्षणया त्वयेयं भुक्ता, अनया रहस्यमस्मासु कथितम्, किमिति नः प्रतारयसीत्यर्थः। अथ च—त्वयेयं बाला परिणीता कथं समन्ताद्भुज्यते, अपि त्वनुचितमेतत् विदुषापि त्वया क्रियते अस्मासु कथं नाभाषत एवेत्यादि ज्ञातव्यम्॥

'आलीरियमलीकवाक्—' (२०।२८) इत्यंशस्य 'आह स्म–' (२०।२९)इत्यत्र 'तन्मृषाभूत्–' (२०।२९)इत्यंशस्य चोत्तरमाह—

नासत्यवदनं देव त्वां गायन्ति जगन्ति यम्।
प्रिया तस्य सरूपा स्यादन्यथालपना न ते ॥४०॥

नासत्येति॥ हे देव राजन् जगन्ति त्रयोपि लोका यं त्वामसत्यं वदनं भाषणं यस्य तादृशं न गायन्ति, किंतु सत्यवादिनमेव वदन्ति। यद्वा—न असत्यं नासत्यं सत्यमेव भाषणं यस्य तम्। तस्य तादृशस्य सत्यभाषिणस्ते तव प्रिया अन्यथा विपरीतार्थमलीकमालपनं भाषणं यस्यास्तादृश्यसत्यवादिनी सरूपा तुल्यस्वभावा योग्या न स्यात् किंतु सत्यवादिन्येव प्रिया तव योग्या स्यादित्यर्थः। तस्मादस्मासु यदनया कथितं सत्यमेवेति भावः। अथ च—वक्रोक्तिः। त्रयो लोका यं त्वामसत्यं भाषणं यस्य तं

सदानृतवादिनं त्वां वदन्ति तस्यानृतवादिनस्तवान्यथालपनाऽसत्यवादिनी सदृशी योग्या न स्यात् किंत्वसत्यवादिन्येवोचिता । कृतमपि संभोगमहं न कृतवानिति वदसि, तथेयमपि रात्रौ कृतमपि संभोगं नेति वदति । 'योग्यं योग्येन संबध्यते' इति न्यायो युक्तः । इति द्वावपि प्रति सोल्लुण्ठम् । भो राजन्, त्रयोपि लोका नासत्यवदश्विनीकुमारवन्मुखं यस्य तमतिसुन्दरमुखं वदन्ति तस्य तव प्रियाऽन्यथा कुरूपं लपनं मुखं यस्यास्तादृशी तुल्यरूपा न स्यात्, किंतु सुन्दरतरवदनैव योग्या स्यात् । तथा च त्वन्मुखवदेवैतस्या अपि मुखं सुन्दरमिति जानीहीति भावः ॥

'आह स्म-' (२०।२९) इत्यादेः श्लोकत्रयेणोत्तरमाह—

मनोभूरस्ति चित्तेऽस्याः किंतु देव त्वमेव सः ।
त्वदवस्थितिभूर्यस्मान्मनः सख्या दिवानिशम् ॥ ४१ ॥

मनोभूरिति ॥ अस्याश्चित्ते मनोभूः कामोऽस्ति सत्यम् । हे देव, किंतु त्वमेव स मनोभूः । नतु त्वदन्यः कश्चिदित्यर्थः । कुतः—यस्मात्कारणात् सख्या भैम्या मनो दिवानिशं तवावस्थितेर्भूः स्थानम् । कामपरत्वे मनसि भवति, नलपरत्वे मनो भूस्थानं यस्य । अस्याश्चेतसि सुन्दरतरो मनोभूस्त्वमेव वर्तसे नान्य इति ॥

यद्यहमेव कामस्तर्हि मद्विषयेऽस्याः कामो नास्तीति नलीयावान्तरच्छलाशङ्कानिराकरणव्याजेन प्रकारान्तरेण तस्यैवोत्तरमाह—

सतस्तेऽथ सखीचित्ते प्रतिच्छाया स मन्मथः ।
त्वयास्य समरूपत्वमतनोरन्यथा कथम् ॥ ४२ ॥

सत इति ॥ अथाथवा स मन्मथो(थः) सख्या भैम्याश्चित्ते सतो वर्तमानस्य तव प्रतिच्छाया प्रतिबिम्ब एव, नतु स्वतन्त्रो बिम्बरूपः । प्रतिबिम्बश्च स्वच्छ एव मुकुरादौ भवतीति भैमीमनसः स्वच्छतरत्वं द्योतितम् । कुत एतदित्याशङ्क्यान्यथानुपपत्तिं प्रमाणयति—अन्यथा यदि प्रतिच्छाया न भवेत्, तर्ह्यतनोरशरीरस्यास्य कामस्य त्वया सह समरूपत्वं कथं स्यात्, अपि तु न कथंचित् । एतेनासत्यादीनां सशरीरत्वात्त्वया सह सारूप्यं (न) युज्यते । अथ त्वतनुः तस्मादस्य प्रतिबिम्बत्व एव त्वत्सारूप्यं युज्यते । प्रतिबिम्बमेव ह्यशरीरमपि तुल्यरूपं भवति तस्मात्प्रतिबिम्बस्य बिम्बं विना स्थातुमशक्तत्वान्मनसि तव धारणात्सारूप्यम् । त्वत्प्रतिबिम्बभूतं त्वदेकविषयं कामं नान्तरीयकतया धारयतीत्यर्थः । बिम्बत्वेऽनङ्गत्वेन सारूप्यानुपपत्तेः प्रतिबिम्ब एवायमित्यनुमानम् ॥

कः स्मरः कस्त्वमत्रेति संदेहे शोभयोभयोः ।
त्वय्येवार्थितया सेयं धत्ते चित्तेऽथवा युवाम् ॥ ४३ ॥

क इति ॥ अथवोभयोर्द्वयोर्भवतोस्तुल्यया शोभया कृत्वात्र द्वयोर्मध्ये स्मरः कः, त्वं नलश्च कः, इति सादृश्यात्संदेहे सति अत्रास्मिन्संदेहे सति वा त्वय्येव विषयेऽर्थितया साभिलाषतया सेयं भैमी युवां द्वावपि स्मरनलौ चित्ते धत्ते । सर्वो ह्यतिसदृशयोः काचमण्यादिपदार्थयोः संदेहे एकतरपरित्यागे मणिरेव परित्यक्तः स्यात्, तन्मा भूदिति मण्यर्थित्वेनैव यावन्निर्णयं काचमपि न मुञ्चति, तथा तुल्यशोभत्वेन निश्चेतुमशक्यत्वात्स्मरपरित्यागे भवानेव परित्यक्तः स्यात् तन्मा भूदिति त्वय्येव साभिलाषतया द्वावपि न मुञ्चतीत्यर्थः । त्वदर्थमेव कामं धारयति, न तु कामार्थं त्वामिति भावः । त्वयेति पाठे—त्वया हेतुना यार्थिता तयेत्यर्थः ॥

'पूर्णया-' (२०।३१) इत्यादेरुत्तरमाह—

त्वयि न्यस्तस्य चित्तस्य दुराकर्षत्वदर्शनात् ।
शङ्कया पङ्कजाक्षी त्वां दृगंशेन स्पृशत्यसौ ॥ ४४ ॥

त्वयीति ॥ पङ्कजाक्षी असौ त्वयि न्यस्तचित्तस्य दुराकर्षत्वस्याप्रत्यावर्तमानत्वस्य दर्शनाद्धेतोः शङ्कया चित्तवत् पुनरप्रत्यावृत्तिभिया त्वां दृगंशेन नेत्रप्रान्तेन स्पृशति पश्यति, नतु पूर्णया द्विलोचन्या । त्वयि न्यस्तस्येति अनुरागातिशयः, पङ्कजाक्षीति च दृशोरतिसौन्दर्यं सूचितम् । सुन्दरस्य वस्तुनः पुनरप्रत्यावृत्तौ महद्भयमिति च सूचितम् । शङ्कयेवेति प्रतीयमानोत्प्रेक्षा ।

'नालोकते-' (२०।३२) इत्यादेरुत्तरमाह—

विलोकनात्प्रभृत्यस्या लग्न एवासि चक्षुषोः ।
स्वेनालोकय शङ्का चेत्प्रत्ययः परवाचि कः ॥ ४५ ॥

विलोकनादिति ॥ विलोकनात्प्रभृति अनया त्वं यदा दृष्टोसि तदारभ्य त्वमस्याश्चक्षुषोः संलग्न एवासि । त्वामेवेयं सदा पश्यति नान्यत्किंचिदपीत्यस्यास्त्वयि महती नेत्रप्रीतिरित्यर्थः । एवं सति मद्वचने इयं मिथ्या वदतीति शङ्काऽविश्वासश्चेत्, तर्हि एतदीयचक्षुषोर्मध्येऽहं वर्ते नवेति निश्चेतुं स्वेनात्मनैवालोकय । एतदीयचक्षुषी पश्य, अहमत्र वर्त इत्यनुभवेनैव निर्धारयिष्यसीत्यर्थः । स्वेनालोकने हेतुमाह—परवाचि को नाम प्रत्ययो विश्वासः, अपित्वनुभवयोग्येऽर्थे परवचनमप्रमाणमेवेत्यर्थः । दृश्यकनीनिकायां संमुखं द्रष्टुरवश्यं प्रतिबिम्बो भवत्येवेति छलोक्तिः । अथ च—नेत्रलग्नत्वादेव नेत्रकज्जलवदीक्षितुमसामर्थ्यान्नालोकत इति त्वया सत्यमेवोक्तमित्यर्थः । अथ चेत् शङ्का तर्हि स्वनेत्रगतमेव गोलकादि स्वयमालोकय तदा ज्ञास्यसि परवाचि कः प्रत्ययः । विलोकनात्, 'आरभ्यार्थयोगेपि' इति पञ्चमी ॥

'रागं दर्शयते-' (२०।३३) इत्यादेरुत्तरमाह—

परीरम्भेऽनयारभ्य कुचकुङ्कुमसंक्रमम् ।
त्वयि मे हृदयस्यैवं राग इत्युदितैव वाक् ॥ ४६ ॥

परीति ॥ अनया परीरम्भे गाढालिङ्गने क्रियमाणे तव हृदये कुचकुङ्कुमस्य संक्रममारभ्योपक्रम्य तद्व्याजेन मे हृदयस्य मनसः । अथ च—वक्षसः । त्वय्येवमनेन प्रकारेण रागः । अथ च—रक्तिमा । एतादृशी वागुदितैव । साक्षाद्यद्यपि नोक्तं तथाप्युक्तप्रायमेवेत्यर्थः । गाढालिङ्गनं ह्यनुरागं विना न घटत इति गाढालिङ्गने कुचकुङ्कुमाङ्गरागलेपनव्याजेन मम त्वय्येवमनुरागो वर्तत इत्यन्तगतोऽनुरागभर एव प्रकटीकृत इति भावः । 'हृदयस्यैव' इति पाठे त्वय्येवेति योजना । त्वयि मे हृदयस्यैव रागो नतु वाचिकः, सख्यादौ तु वाङ्मात्रेणैव रागो नतु हृदयस्येति वा । 'उदितेव' इति पाठे—उत्प्रेक्षा । अनया गाढालिङ्गनेन तव हृदये लग्नमिदं परिदृश्यमानं कुचकुङ्कुमादिकमेव सर्वमपि रात्रिवृत्तान्तमस्मान्बोधयतीति वृथैव वञ्चयसीति सूचितम् ॥

'कां नामश्रयते–' (२०।३४) इत्यादेरुत्तरमाह—

मनसायं भवन्नामकामसूक्तजपव्रती ।
अक्षसूत्रं सखीकण्ठश्चुम्बत्येकावलिच्छलात् ॥ ४७ ॥

मनसेति ॥ अयं सख्या भैम्याः कण्ठः मनसैव भवतो नलेति नाम तदेव कामसूक्तं स्मररहस्यप्रकाशको मन्त्रस्तस्य जपः स एव व्रतमस्यास्तीति तादृशः सन् एकावलिच्छलादेकयष्टिकमुक्ताहारविशेषव्याजादक्षसूत्रं पद्माक्षादिरचितां जपमालां चुम्बति । भर्तृनामग्रहणनिषेधात् 'साहस्रो मानसो जपः' इति मानसजपे फलविशेषश्रवणाच्च मुक्ताहारजपमालिकया त्वन्नामैव मनसा जपतीति भावः । नलेति स्मरणमात्रेणैव कामोद्रेकान्नान्नः कामसूक्तत्वम् ॥

'अस्याः पीनस्तन–' (२०।३५) इत्यादेरुत्तरमाह—

अध्यासिते वयस्याया भवता महता हृदि ।
स्तनावन्तरसंमान्तौ निष्क्रान्तौ ब्रूमहे बहिः ॥ ४८ ॥

अध्यासित इति ॥ महता नितरां गौरवयुक्तेन । अथ च—महापरिमाणेन भवता त्वया वयस्याया भैम्या हृदि अध्यासिते समावृते सति अन्तर्हृदयमध्येऽसंमान्तौ स्थातुमशक्तौ स्तनौ हृदयाद्बहिर्देशे निष्क्रान्तौ इति वयं ब्रूमहे संभावयामः । यदाप्रभृति त्वं चित्ते लग्नः, तदाप्रभृत्येवैतौ बहिर्दृश्येते, तस्मात्पूर्वमन्तरेव स्थितत्वाद्बहिर्न दृश्येते । त्वदधिष्ठानानन्तरं तु बहिर्निर्गतौ इति तवैवावकाशोऽभूत् नतु कुचयोः, तस्मादस्मानेव प्रतारयसीति भावः । अन्योपि महताधिष्ठिते स्थाने स्थातुमशक्तो बहिर्निर्गच्छत्येव । बहिरपि यदादि त्वया हृदयं स्पृष्टं तदादि साटोपं निर्गतावित्यर्थः । अध्यासिते हृद्यन्तरसंमान्ताविति वान्वयः ॥

'अधिगत्य–' (२०।३६) इत्यादेरुत्तरमाह—

कुचौ दोषोज्झितावस्याः पीडितौ व्रणितौ त्वया ।
कथं दर्शयतामास्यं बृहन्तावावृतौ ह्रिया ॥ ४९ ॥

कुचाविति ॥ दोषेणोज्झितौ निर्दोषौ, अथ च—दोषायां रात्र्यां (अर्थात्) कूर्पासकेन त्यक्तौ, तथा—बृहन्तावतिपीवरौ, अत एव—त्वया पाणिभ्यां पीडितौ मर्दितौ व्रणितौ नखैश्च क्षतयुक्तौ कृतौ अस्याः कुचौ दिने ह्रिया हेतुना आवृतौ वस्त्रेणाच्छादितौ आस्यं चूचुकाग्रं कथं दर्शयताम्, अपि तु न कथंचित् । रात्रौ हि संभोगसमये निर्विघ्नं स्तनदर्शनं भवेत्, दिवा तु नखक्षतादिसंभोगचिह्नदर्शनभिया वस्त्रावृतत्वात्कथं नाम चूचुकाग्रस्यापि दर्शनं स्यात्, न कथंचिदित्यर्थः । दोषया रात्र्या त्यक्तौ रात्रेर्गतत्वादिनप्रकाशसंबद्धौ, अत एव ह्रिया वस्त्रावृतत्वादिवा वैमुख्यमेव तयोर्युक्तमित्यर्थ इति वा । बहिःस्थितं त्वां प्रति वैमुख्यासंभवाद्धृदयस्थितस्य तव स्वमुखं कथं दर्शयतामिति । ह्रिया भैम्याः पराङ्मुखत्वाद्वा कुचौ स्वमुखं नलस्य न दर्शयतः । स्वाभ्यभूतस्य भैमीहृदयस्य वा कुचौ स्वमुखं न दर्शयतः । नहि कुचौ हृदयस्य संमुखौ भवतः । अन्योपि दोषोज्झितो निरपराधो लब्धप्रतिष्ठो धनादिग्रहणेन पीडितो नासादिकर्तनेन कृतव्रणो लज्जितः कस्याप्यग्रे मुखं न दर्शयति । व्रणितौ, तारकादित्वादितच् ॥

१ 'यदि वा दोषा बाहुना उद्यत्वात्पीनत्वादुज्झितौ' इत्यपि सुखावबोधायाम् ।

इत्यसौ कलया सूक्तैः सिक्तः पीयूषवर्षिभिः ।
ईदृगेवेति पप्रच्छ प्रियामुन्नमिताननाम् ॥ ५० ॥

इतीति ॥ कलया पीयूषवर्षिभिरमृतं क्षरद्भिरतिमधुरैः सूक्तैः शोभनवक्रोक्त्यादिरूपैर्वाक्यैः सिक्तः संजातगाढप्रेमभरोऽसौ नलः उन्नमितं पाणिना चिबुकं धृत्वोर्ध्वीकृतमाननं यस्यास्तां प्रियां भैमि, इदं कलावचनमीदृगेवमेवेति सत्यमिति पप्रच्छ । उन्नमितेति 'ज्वलह्वल–' इति मित्त्वपक्षे ह्रस्वः ॥

बभौ च प्रेयसीवक्त्रं पत्युरुन्नमयन्करः ।
चिरेण लब्धसंधानमरविन्दमिवेन्दुना ॥ ५१ ॥

बभाविति ॥ पत्युः करोऽरविन्दमिव बभौ च । किंभूतः—प्रेयसीवक्त्रमुन्नमयन् । किंभूतमरविन्दम्—चिरेण कालेन वैरं विस्मृत्य निवृत्तवैरतया इन्दुना सह लब्धं संधानं येन । अभूतोपमा । चन्द्रकमलयोः सदा वैरम् ॥

ह्रीणा च स्मयमाना च नमयन्ती पुनर्मुखम् ।
दमयन्ती मुदे पत्युरुच्चैरप्यभवत्तदा ॥ ५२ ॥

ह्रीणेति ॥ नलोक्तैः कलोक्तयक्तिप्रत्युक्तिपरिहासेन ह्रीणा च स्मयमाना च, अत एव लज्जावशेन स्मितं च नलेन द्रष्टव्यमिति बुद्ध्याऽत्युच्चैर्नितरामुन्नमितमपि मुखं पुनर्नमयन्ती दमयन्ती सदा तस्मिन्मुखोन्नमनसमये पत्युर्मुदेऽभवत् । अत्युच्चैर्मुदेऽभूदिति वा तादृशीं तां दृष्ट्वा हृष्टोभूदिति भावः ॥

भूयोपि भूपतिस्तस्याः सखीमाह स्म सस्मितम् ।
परिहासविलासाय स्पृहयालुः सहप्रियः ॥ ५३ ॥

भूय इति ॥ सह प्रियया वर्तमानो भूयोपि पुनरपि वक्रोक्त्यादिपरिहासविलासाय स्पृहयालुरभिलाषुको भूपतिस्तस्याः सखीं कलां सस्मितं यथा तथा आह स्म । विलासाय 'स्पृहेरीप्सितः' इति संप्रदानत्वम् । सहप्रियः, 'वोपसर्जनस्य' इति पाक्षिकत्वात्सादेशाभावः ॥

क्षन्तुं मन्तुं दिनस्यास्य वयस्येयं व्यवस्यतात् ।
निशीव निशिधात्वर्थं यदाचरति नात्र नः ॥ ५४ ॥

क्षन्तुमिति ॥ हे कले, इयं तव वयस्याऽस्य वर्तमानस्य दिनस्य मन्तुमपराधं क्षन्तुं सोढुं व्यवस्यतात्प्रथयतात् । कोपराधो दिनस्येत्यत आह—यद्यस्मादियं भैमी निशीव रात्राविव नोऽस्मासकं 'निशि चुम्बने' इति पठितस्य धातोरर्थमत्र दिने नाचरति । रात्रौ यथा निःशङ्कं मां चुम्बति तथा भवतीभ्यो लज्जया दिने नेति दिनस्यैवापराधः, तस्मात्तस्यापराधं क्षमस्वेति प्रार्थ्यत इत्यर्थः । 'व्यवस्यताम्' इति पाठे आत्मनेपदं चिन्त्यम् ॥

१ 'आभरणकारस्तु तालव्यान्तोऽयमिति बभ्राम' इति सिद्धान्तकौमुदी । अतएव भाष्ये 'निसेः (षत्वस्य) प्रतिषेधो वाच्यः । निस्से निस्स्व' इत्युक्तम् । 'तालव्यान्तरस्याप्यङ्गीकारे न बाधकमित्यन्ये' इति शब्दरत्नम् । प्राचीनलिखितप्रकाशटीकापुस्तकयोस्तु 'णिसि–' इत्येव पाठो दृश्यते ।

२—'इयं वयस्याऽस्य दिनस्य मन्तुं क्षन्तुं त्वया व्यवस्यतां व्यवसायं प्रार्थ्यतामिति कर्मण्यात्मनेपदमिति केचित् । तदपीत्वप्राप्तौ व्यवसीयतामिति प्राप्तेरुपेक्ष्यम्' इति सुखावबोधा ।

दिनेनास्या मुखस्येन्दुः सखा यदि तिरस्कृतः ।
तत्कृता शतपत्राणां तन्मित्राणामपि श्रियः ॥ ५५ ॥

दिनेनेति ॥ दिनेनास्या मुखस्य सखा इन्दुर्यदि तिरस्कृतः निष्प्रभीकृत्य पराभूतः । एनमपराधं चेन्मन्येत तर्ताहं तस्य भैमीमुखस्य सादृश्यान्मित्रभूतानां बहूनां शतपत्राणां कमलानां श्रियो विकासलक्ष्म्यः, अथच—संपदोऽपि, कृताः । अनेकापकारकारिण्येकस्मिन्पराभूते यदि बहूनां क्षेमं भवति तदा महानुपकार एवेति । त्वन्मुखमित्रभूतानां कमलानां प्रकाशकरत्वाद्दिनेनोपकार एव कृतः, नापकारः । तस्मादेतस्यापराधो नास्तीति मन्मुखचुम्बनं दिनेपि कुर्विति भावः । 'एकस्मिन्धर्षिते पापे बहूनामपकारिणि । बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः ॥' इत्युक्तेः । 'कृता' इति पाठे—दिनस्य मित्रभूतानां तत्संबन्धात्सलक्ष्मीकानां(णां) कमलानाम्, अथच—शतसंख्याकानि बहूनि पद्माणि वाहनानि येषां मित्राणां श्रियोऽपि तेन चन्द्रेण कृताश्छिन्नाः रात्रौ संकोचकरणात् । दिनेन तु त्वन्मुखमित्रं चन्द्रो धर्षितः, चन्द्रेण तु दिनमित्राणि बहूनि कमलानि धर्षितानीति चन्द्रेण स्वयं वैरनिर्यातनं कृतमेवेति दिनस्यापराधोऽनया न गणनीय इत्यर्थः । त्वन्मुखमित्राणां कमलानां श्रियोऽपि च्छिन्नाः, अपि तु—न । किंत्वभिवृद्धिमेव प्रापिताः । तस्मात्पूर्ववदेवापराधो नास्तीति काकुर्वा । त्वन्मुखमित्रं चन्द्रो यदि तिरस्कृतः, तर्हि दिनमित्राणां कमलानामपि श्रियस्तेन त्वन्मुखेन छिन्नाः स्वकान्त्या तेषां निष्प्र(शो)भीकरणात् । वैरं निर्यातितमेवेति दिनस्यापराधो न गणनीय इति भाव इति वा ॥

लज्जितानि जितान्येव मयि क्रीडितयाऽनया ।
प्रत्यावृत्तानि तत्तानि पृच्छ संप्रति कं प्रति ॥ ५६ ॥

लज्जितानीति ॥ हे कले, अनया मयि विषये तावल्लज्जितानि लज्जाविशेषा जितान्येव निरस्तान्येव । यतो रात्रौ क्रीडितया कृतसुरतक्रीडया मयि प्रदर्शितबहुविधसुरतचातुर्यया तत् तस्मात्संप्रति तानि लज्जितानि यत्पुनः प्रत्यावृत्तानि तत्कं प्रत्युद्दिश्येति त्वमेनां पृच्छ । मयास्याः सुरतचातुर्यधार्ष्ट्यं बहु बहुवारं दृष्टमेव त्वामेव प्रतीयं लज्जत इति जानीहीति भावः ॥

इदानीं श्लोकचतुष्टयेन स्वापराधमाशङ्क्य परिहरति—

निशि दष्टाधरायापि सैषा मह्यं न रुष्यतु ।
क्व फलं दशते बिम्बीलता कीराय कुप्यति ॥ ५७ ॥

निशीति ॥ सैषा निशि दष्टोऽधरो येन तस्या अपि मह्यं न रुष्यतु कुप्यतु । यस्मात् बिम्बीलता फलं पक्वं बिम्बीफलं दशते आस्वादितवते कीराय क्व कुप्यति, अपि तु न कुतोपि । किंतु स्वसंबन्धेन शोभाहेतवे तस्मै स्निह्यत्येवेत्यर्थः । दन्तक्षते कृतेऽपि व्रणसंबन्धवशाच्चिरतरामधरशोभाकारित्वेन मह्यं प्रसाद एव युक्तः, नतु कोप इति भावः । 'रुष्यति' इति पाठे—सिद्धवत्कारेणोक्तिः । मह्यं कीराय च 'क्रुधद्रुह-' इति (संप्रदानत्वे) चतुर्थी ॥

१ 'दृष्टान्तालंकारः' इति जीवातुः ।

स्तनीपदसुचिह्ना श्रीश्चोरिता कुम्भिकुम्भयोः ।
पश्यैतस्याः कुचाभ्यां तत्तृपस्तौ पीडयानि न ॥ ५८ ॥

स्तनीति ॥ एतस्याः स्तनीपदमङ्कुशाघातक्षतमेव शोभनं चिह्नं यस्याः, अथच—अङ्कुशाकारनखपदविशेष एव शोभनं चिह्नं यस्याः सा कुम्भिनः करिणः कुम्भयोः श्रीः शोभा संपच्च यस्माच्चोरिता । पश्य एतत्कुचयोरङ्कुशाकारं नखं नास्ति तर्हि त्वमेव विलोकय । तत्तस्मात्कृपो दण्ड्यदण्डकरणाधिकारी अहं तौ स्तेयकारिणावेतत्कुचौ न पीडयानि, अपि तु—पीडयाम्येव । तयोः पीडनं दण्डरूपं नखक्षतादिरूपं चोचितमित्यर्थः । राज्ञा हि चोरस्य दण्डः क्रियते, ममापराधो नास्तीति भावः । 'अङ्कुशोऽस्त्री स्तनिर्द्वयोः' इत्यमरः । स्तनी, 'कृदिकारात्' ङीप् ॥

अधरामृतपानेन ममास्यमपराध्यतु ।
मूर्ध्ना किमपराद्धं यः पादौ नाप्नोति चुम्बितुम् ॥ ५९ ॥

अधरेति ॥ ममास्यं मुखमेतस्या अधरामृतस्य पानेन कृत्वाऽपराध्यतु । अयं मुखस्यापराधोऽङ्गीकृत इत्यर्थः । मम मूर्ध्ना पुनः किमपराद्धम्, यो मस्तकः प्रणामहेतुनास्याः पादौ चुम्बितुं स्प्रष्टुमपि नाप्नोति नमस्कर्तुमपि न ददाति । कोऽपराधोऽनेन कृतः, पृच्छेत्यर्थः ॥

अपराद्धं भवद्वाणीश्राविणा पृच्छ किं मया ।
वीणाह परुषं यन्मां कलकण्ठी च निष्ठुरम् ॥ ६० ॥

अपराद्धमिति ॥ भवद्वाणीश्राविणा त्वद्वचनाकर्णनशीलेन मया वीणायाः कोकिलायाश्च तव वा किमपराद्धम् को वापराधः कृत इति कले, त्वं भैमीमनेन किमपराद्धमिति पृच्छ । यद्यस्माद्वीणा सांप्रतं परुषमाह, कलकण्ठी कोकिला च मां प्रति निष्ठुरं ब्रूते । तस्मादपराधः संभाव्यते । येन हि यस्याः कश्चिदपराधः क्रियते तं प्रति सा तदीयो वा तत्सदृशः कश्चित्परुषं भाषते । अथच—वीणाकोकिलयोः स्वरे यस्मान्माधुर्यं नास्ति तस्मात्पश्चादागत्य निभृतं मयाऽसमक्षभाषमाणाया भवत्या भारती श्रुता, नास्यन्येन केनाप्याशयेनेति सोप्यपराधो न भवतीत्यर्थः । वीणाकोकिलालापापेक्षया भैमीवाणी मधुरतरा, रात्रौ एतद्वाणीमाधुर्यं मया बहूनुभूतम् । इदानीं तु त्वां दृष्ट्वा मां प्रति तृष्णीमास्ते इति । परुषं निष्ठुरं च क्रियाविशेषणम् । परुषं निःस्नेहम् निष्ठुरं सतिरस्कारम् । कलकण्ठी 'अङ्गगात्र-' इति ङीप् ॥

सेयमालिजने स्वस्य त्वयि विश्वस्य भाषताम् ।
ममताऽनुमताऽस्मासु पुनः प्रस्मर्यते कुतः ॥ ६१ ॥

सेति ॥ हे कले, सेयं स्वस्यालिजने त्वयि विषये विश्वस्य (विश्वासमधिगम्य) भाषतां कथयतु । अस्मासु विषयेऽनुमताङ्गीकृता ममता स्वीयतामतिः पुनः कुतः प्रस्मर्यते विस्मर्यते इति त्वं पृच्छ, इयं च त्वयि विश्वस्य कथयत्वित्यर्थः । रात्रौ रतानुकूल्यमाचरितमनया, इदानीं तु तव समक्षं प्रातिकूल्यं किमित्या-

१—पीडयामीति बहुत्र पाठः । २ स्त्रियामित्येव पाठस्तत्रापि द्वयोरित्यर्थकत्वं तथा मुकुटे विस्तरः ।

चरतीति भावः । इत्युपालम्भनभङ्गिः । प्रशब्दस्य गतार्थतया विस्मरणार्थता ॥

अथोपवदने भैम्याः स्वकर्णोपनयच्छलात् ।
संनिधाप्य श्रुतौ तस्या निजास्यं सा जगाद ताम् ६२

अथेति ॥ अथैवं नलोक्त्यनन्तरं सा कला भैम्या उपवदने वदनसमीपे स्वकर्णस्य उपनयच्छलात्समीपनयनव्याजात् तस्या भैम्याः श्रुतौ कर्णे निजास्यं संनिधाप्य संनिहितं कृत्वा तां जगाद । अवदन्त्या अपि भैम्या वचनं शृण्वतीव स्वकर्णं भैमीमुखसमीपे कृत्वाऽनन्तरं च तद्वचःप्रतिवचनमेकान्ते वितरन्तीव भैमीकर्णसमीपे निजमुखं कृत्वा भैमीं जगादेत्यर्थः । कथकानुकथकजातिः । उपवदने, अव्ययीभावे सप्तम्या अम्भावाभावः । संनिधाप्य, हेतुमण्ण्यन्ताल्ल्यप् ॥

अहो मयि रहोवृत्तं धूर्ते किमपि नाभ्यधाः ।
आस्स्व सभ्यमिमं तत्ते भूपमेवाभिधापये ॥ ६३ ॥

अहो इति ॥ हे धूर्ते वचनचतुरे, त्वं मयि विषये रहोवृत्तमेकान्ते निष्पन्नमालिङ्गनादि किमप्येकमप्यल्पमपि च नाभ्यधाः । अहो आश्चर्यम् । एतादृशी धूर्ता कापि न दृष्टेत्यर्थः । त्वम् आस्स्व तिष्ठ तिष्ठ । यद्यपि त्वं नाचकथः, तथापि ते तव तद्रहोवृत्तं सभ्यं मध्यस्थं सत्यवादिनमिमं भूपं नलमेवाभिधापये वादयामि । अहमपि त्वया यतो वञ्चिता तथा किंचिद्वचयिष्यामि यथा नल एव स्वयं त्वदीयसुरतप्रागल्भ्यं प्रकटयति मां वञ्चयित्वा कथंकारं स्थास्यति क्व यास्यति क्षणमात्रं स्थिरा भवेति सरोषोक्तिः । 'सत्यम्' इति पाठे–अभिधापये सत्यं जानीहीत्यर्थः । 'आश्वसभ्यम्' इति पाठे–इमं भूपमेव तवेदमसभ्यम् सभायां जनसमक्षं वक्तुमनर्हं तद्रहोवृत्तमाश्विदानीमेवाभिधापये तिष्ठ तिष्ठेत्यर्थः । भूपम्, 'अकथितं च' इति कर्मत्वं भू इत्यर्थग्रहणात् । अभिधापये, अभिपूर्वाद्भाषणार्थाद्धातेर्हेतुमण्णिचि 'णिचश्च' इति तङ् ॥

स्मरशास्त्रमधीयाना शिक्षितासि मयैव यम् ।
अगोपि सोपि कृत्वा किं दाम्पत्यव्यत्ययस्त्वया ॥६४॥

स्मरेति ॥ स्मरशास्त्रं वात्स्यायनादिप्रणीतमधीयाना पठती (ठन्ती) त्वं तत्र प्रतिपादितं यं दाम्पत्यव्यत्ययं विपरीतसंभोगं मयैव शिक्षितासि स दाम्पत्यव्यत्ययस्त्वया कृत्वापि निष्पाद्यापि मम पुरस्तात्किं किमर्थमगोपि गोपितः कथयेति प्रभः । नितरां धार्ष्टर्यमवलम्ब्य मया शिक्षितं विपरीतसुरतं कृत्वापि ममैव पुरस्तादकृतमेव कथयसीति नितरां वञ्चनचतुरासीति भावः । स्मरशास्त्रं, 'न लोका–' इति षष्ठीनिषेधः । दम्पत्योर्भावः संभोग इति यावत् । 'पत्यन्तपुरोहितादिभ्यो यक्' इति यक् ॥

मौनिन्यामेव सा तस्यां तदुक्तीरिव शृण्वती ।
वादं वादं मुहुश्चक्रे हुंहुमित्यन्तरान्तरा ॥ ६५ ॥

मौनिन्यामिति ॥ सा कला तस्यां भैम्यां मौनिन्यामवदन्त्यामेव सत्यां तदुक्तीर्भैमीवचनानि शृण्वतीव भैम्यामवदन्त्यामपि भैमी मां प्रति किमपि वदति अहं शृणोमीति नलं प्रति प्रकटयन्ती वादं वादं भैमीवचनप्रतिवचनव्याजेन स्वयमेव किंचिदुक्त्वोक्त्वा अन्तरान्तरा मध्येमध्ये हुंहुमिति शब्दं चक्रे । 'वदत्यचिह्नि–' (२०।६८) इत्यादेर्वक्ष्यमाणस्य सत्यत्वबुद्धिजननार्थं पूर्वरङ्गमलीकमेव श्रवणोत्तरदानरीतिप्रकटनमकरोदिति भावः । वादं वादम्, आभीक्ष्ण्ये णमुलि, आभीक्ष्ण्य एव द्विर्वचनम् ॥

अथासावभिसृत्यास्था रतिप्रागल्भ्यशंसिनी ।
सख्या लीलाम्बुजाघातमनुभूयालपन्नृपम् ॥ ६६ ॥

अथेति॥ अथ श्रवणप्रकारप्रकटनानन्तरमसौ कला नृपमभिसृत्य भैम्याः सकाशान्नलं प्रति गत्वा वक्ष्यमाणमवोचत् । किंभूता—अस्या भैम्या रतिप्रागल्भ्यं शंसति वर्णयति तच्छीला । विपरीतसुरतमपि करोषि सांप्रतं नितरां धृष्टा जातासीति भैमीकर्णे प्रेमभाषणं कुर्वाणा । अत एव—किंकृत्वा—सख्या भैम्या लीलाम्बुजेनाघातमनुभूय प्राप्य । रतिप्रागल्भ्यं नलेन शंसयति तच्छीलेति वा शंसिनी । केवलाद्धेतुमण्ण्यन्ताद्वा शंसेस्ताच्छील्ये णिनिः ॥

दृष्टं दृष्टं महाराज त्वदर्थाभ्यर्थनक्रुधा ।
यत्ताडयति मामेवं यद्वा तर्जयति भ्रुवा ॥ ६७ ॥

दृष्टमिति ॥ हे महाराज सार्वभौम, इयं नलाय संभोगं विस्तरेति त्वदर्थं त्वत्संभोगसंबन्धि मया क्रियमाणमभ्यर्थनं तस्माज्जातया क्रुधा कोपेन हेतुना मामेवं लीलाकमलाघातप्रकारेण यत्ताडयति, यद्वा यच्च भ्रुवा कटाक्षेण तर्जयति भीषयते तत्त्वया दृष्टं दृष्टं त्वं पश्य पश्येत्यर्थः । त्वयि परपुरुषबुद्धिं कृत्वा तत्र मां कथं प्रवर्तयसीति मां ताडयति, भ्रूक्षेपेण चेतः परं मा वादीरिति तर्जयति च, तत्त्वं पश्येति भावः । दृष्टं दृष्टं, संभ्रमे द्विरुक्तिः ॥

वदत्यचिह्नि चिह्नेन त्वया केनैष नैषधः ।
शङ्के शक्रः स्वयं कृत्वा मायामायातवानियम् ॥६८॥

वदतीति ॥ हे राजन्, इयमिति वदति । इति किं—हे कले, यदर्थमर्थनां त्वं करोषि एष नैषधः त्वया केन चिह्नेनाचिह्नि निर्धारितः । तर्हि कः—अयं शक्रः स्वयं वरणकाल इव मायां नलरूपां कृत्वा स्वयमायातवानित्यहं शङ्के । त्वदर्थमर्थनां कुर्वत्या मम कर्णे इति वदति । चिह्नवान्कृत इति, णिचि मतुब्लुक् ॥

भैमी त्वदिन्द्रत्व इदं प्रमाणमाह—

स्वर्णदीस्वर्णपद्मिन्याः पद्मदानं निदानताम् ।
नयतीयं त्वदिन्द्रत्वे दिवश्चागमनं च ते ॥ ६९ ॥

स्वर्णदीति ॥ इयं स्वर्णद्यां मन्दाकिन्यां स्वर्णपद्मिन्याः पद्मस्यात्मने दानं, दिवः स्वर्गात्ते भूमिं प्रति आगमनं च, तवेन्द्रत्वे निदानतां प्रथमकारणतां नयति प्रापयति । नहि मनुष्यस्य स्वर्णदीस्वर्णपद्मिनीसुवर्णकमलानयने स्वर्गादागमने च, सामर्थ्यं इदम् । तस्मात्तद्रूपं धृत्वा पूर्ववदिन्द्र एवायमागत इति एतदर्थं प्रत्यर्थना त्वया कर्तुमयुक्तेयं मत्कर्णे कथयतीति भावः । स्वर्णदीति, 'पूर्वपदात्संज्ञायामगः' इति णत्वम् ॥

भाषते नैषधच्छायामायामायि मया हरेः ।
आह चाहमहल्यायां तस्याकर्णितदुर्नया ॥ ७० ॥

भाषते इति ॥ हरेरिन्द्रस्य नैषधस्य छायायाः कान्तेर्माया कापट्यं मया स्वयंवरकालेऽमावि ज्ञातेतीयं मां भाषते । स्वयंवरकाले तव परस्त्रीत्वाभावाच्छलरूपं धृतम्, इदानीं तु परस्त्रीत्वभियैवं न करिष्यतीति मया प्रत्युक्ता सतीयं भैमी अहल्यायां गोतमपत्न्यां तस्येन्द्रस्याकर्णितो व्यभिचारलक्षणो दुष्टो नयो यया, एवंविधाहमिति च ब्रूते । परस्त्रीत्वभीतिरपि तस्य नास्ति, तस्मादिन्द्र एवायमिति त्वयाऽभ्यर्थना न कार्येति मां प्रति भाषत इति भावः । नैषधस्येव छाया यस्यामिति मायाविशेषणत्वेन पृथग्वा ॥

संभावयति वैदर्भी दर्भाग्राभमतिस्तव ।
जम्भारित्वं कराम्भोजाद्दम्भोलिपरिरम्भिणः ॥ ७१ ॥

समिति ॥ कुशाग्राभा मतिर्यस्याः सा वैदर्भी दम्भोलिः सार्वभौमत्वसूचकं वज्रं तत्परिरम्भिणस्तद्युक्तात्कराम्भोजाद्धेतोस्तव जम्भारित्वमिन्द्रत्वं संभावयति तर्कयति । नह्यनिन्द्रो वज्रहस्तः । रेखारूपादपि वज्रादेवमनुमानात्कुशाग्रबुद्धित्वमस्याः ॥

अनन्यसाक्षिकाः साक्षात्तदाख्याय रहःक्रियाः ।
शङ्कातङ्कं तुदैतस्या यदि त्वं तत्त्वनैषधः ॥ ७२ ॥

अनन्येति ॥ तस्माद्भो राजन्, त्वं यदि तत्त्वेन नैषधो भवसि, नतु छद्मना तर्हि न विद्यतेऽन्यो भैमीभवद्व्यतिरिक्तः साक्षी यासु । युवाभ्यामेव या ज्ञायन्त इत्यर्थः । तादृशी रहःक्रिया एकान्तक्रीडाः साक्षात् स्वयमेव, अथ च—व्यक्त्यवृत्तिं विना आख्याय प्रकटं कथयित्वा एतस्याः शङ्कातङ्कमिन्द्रमायासंशयामयं त्वं तुद निराकुरु । एतत्प्रत्यायिकां क्रीडासमयचेष्टामुक्त्वाऽस्माकमेतस्याश्च संदेहमपतुदेत्यर्थः । 'सत्यनैषधः' इति च पाठः ॥

इति तत्सुप्रयुक्तत्वनिह्नुतीकृतकैतवाम् ।
वाचमाकर्ण्य तद्भावे संशयालुः शशंस सः ॥ ७३ ॥

इतीति ॥ इत्युक्तप्रकारेण तया कलया सुप्रयुक्तत्वेन कैतवघोतकहास्यादिविकारव्यतिरेकेण सुवर्णकमलदानादीन्द्रत्वनिश्चायकोपपत्तिमत्तया च सम्यक्प्रयुक्तत्वेन निह्नुतीकृतमाच्छन्नं कैतवं छद्म यस्यास्तां कलां वाचमाकर्ण्य तद्भावे मयीन्द्रभ्रान्त्यैवेयं चुम्बनादि न करोति किमिति भैम्याशये संशयालुः संदिहानः स नलो भैमीभ्रान्तिनिरासार्थं शशंस । रहोवृत्तमित्यर्थः ॥

स्मरसि छद्मनिद्रालुर्मया नाभौ शयार्पणात् ।
यदानन्दोल्लसल्लोमा पद्मनाभीभविष्यसि ॥ ७४ ॥

स्मरसीति ॥ हे भैमि, छद्मना निद्राणाऽलीकमेवाङ्गीकृतनिद्रा त्वं मया नाभौ शयस्य करकमलस्यार्पणाद्धेतोरानन्देन सात्विकभावेनोल्लसन्ति लोमानि यस्यास्तादृशी मत्करनाभिस्पर्शेन जातरोमाञ्चा सती पद्मयुक्ता नाभिर्यस्यास्तादृशी भविष्यसि संजातासीस्तत्स्मरसि । पाणिरोमाञ्चसंबन्धात्सकण्टककमलसंबन्धसंभावनया पद्मनाभीत्वं तव यज्जातं तत्स्मरेत्यर्थः । नलपाणिः पद्मस्थानीयः, रोमाञ्चश्च तत्कण्टकस्थानीयः । अथ च—विकसितकमलदलतुल्यरोमाञ्चोद्गमात्पद्ममिव नाभिर्यस्यास्तादृशी जातासि तत्स्मर । शयार्पणं रोमाञ्चोद्गमे हेतुः । अथ च—नाभौ शयार्पणात्पद्मनाभः पद्मनाभः श्रीविष्णुर्भविष्यसि पद्मनाभीभविष्यसीति च्छेदः । तत्स्मरसि, नाभौ करकमलधारणाच्छ्रीविष्णुरूपा जातासि । नहि विष्णुं विनाऽन्यस्य नाभौ कमलमस्तीत्यर्थः । निद्रितासीति पृच्छा वस्त्रसंवरणार्थं नाभिसमीपे मया करेऽर्पिते तत्संस्पर्शाज्जातसात्विकरोमाञ्चा जातासि तत्स्मरेति भावः । आमन्दोल्लासिलोमेति निद्राया अलीकत्वं द्योतितम् । नहि निद्रायाः सत्यत्वे करस्पर्शान्नोमाञ्चोद्गमो भवति । भैमीपक्षे पद्मनाभीति च्छेदः । स्मरतियोगे त्व-(नद्यतन)भूतेपि 'अभिज्ञावचने लृट्' इति लृट् । 'तदानन्द-' इति पाठः सभ्यः ॥

जानासि ह्रीभयव्यग्रा यत्नवे मन्मथोत्सवे ।
सामिभुक्तैव मुक्तासि मृद्वि खेदभयान्मया ॥ ७५ ॥

जानासीति ॥ हे मृद्वि सुकुमाराङ्गि, शीघ्रद्राविणि च भैमि, मया नवे मन्मथोत्सवे ह्रीभयाभ्यां व्यग्रा व्याकुलचित्ता त्वं अतिमृदुत्वात्संपूर्णसंभोगोपमर्दासहतया तव खेदो भविष्यतीति भयात्सामि अर्धं भुक्तैवाप्राप्तसुरतावसानैव यन्मुक्तासि तज्जानासि स्मरसि । सामिभुक्ता, 'सामि' इति समासः ॥

स्मर जित्वाजिमेतस्त्वां करे मत्पदधाविनि ।
अङ्गुलीयुगयोगेन यदाश्लिक्षं जने घने ॥ ७६ ॥

स्मरेति ॥ हे भैमि, आजिं सङ्ग्रामं जित्वा त्वामा सामुक्येनेतः प्राप्तोऽहं नमस्कारार्थं क्षालनार्थं वा मत्पदधाविनि मच्चरणस्पर्शिनि तव करेऽङ्गुलीयुगयोगेन मदीयचरणाङ्गुलीद्वयसंबन्धेन दर्शनार्थं समागते घने भूयसि जने मध्ये यदाश्लिक्षमालिङ्गितवान् तत्स्मर । जनसमक्षं साक्षादालिङ्गनस्यानौचित्यात्प्रवासोत्कण्ठाभरतरलतया चरणाङ्गुलिद्वयेन त्वत्पाणिपीडनव्याजात्त्वदालिङ्गनवाञ्छां त्वां प्रति द्योतितवांस्तत्स्मरेत्यर्थः । आश्लिक्षं, 'श्लिष आलिङ्गने' इति लुङ्तसैकवचने क्सेः सः । 'विभाषा साकाङ्क्षे' इति वैकल्पिकत्वाल्लडभावः ॥

वेत्थ मानेपि मय्यागदूनां त्वं मां च यन्मिथः ।
मदृष्टालिख्य पश्यन्ती व्यवधा रेखयाऽन्तरा ॥७७॥

वेत्थेति ॥ हे भैमि, माने प्रीतिकलहे सत्यपि रोषावेशया कृतेन मत्कर्मैकत्यागेन दूना खिन्ना क्षणमात्रमपि मद्विरहं सोढुमशक्ता सती मिथ एकान्ते स्त्रीरूपं त्वं, पुंरूपं मां चालेख्ये आलिख्य पश्यन्ती संयुक्तपरस्परदर्शनसुखमनुभवन्ती त्वं मया दृष्टा सती यच्चित्रलिखितयोरावयोरन्तरा मध्ये तूलिकादिलिखितया रेखया व्यवधाः व्यवधानं कृतवत्यसि वेत्थ जानासि । तत्स्मरेत्यर्थः । व्यवधाः, व्यवपूर्वाद्धाञो लुङ्यध्यमः ॥

प्रस्मृतं न त्वया तावद्यन्मोहनविमोहितः ।
अतृप्तोऽधरपानेषु रसनामपिबं तव ॥ ७८ ॥

---

१ यदानन्देति पाठे यथोगमत्त्वेन 'न यदि' इति निषेधेन लृटोऽप्राप्तिमभिप्रेत्येदम् । तथा पाठेपि यदितिस्थाने यदेति पदच्छेदं कृत्वा व्याख्याने, यच्छब्दयोगेपि व्याजशयनेन लक्षणेन पद्मनाभीभवनस्य लक्ष्यत्वाल्लक्ष्यलक्षणसंबन्धे 'विभाषा साकाङ्क्षे' इति परत्वाल्लृटो विधानेन च न दोषः इति सुखावबोधावगतोर्थः ।

प्रस्मृतमिति ॥ हे भैमि, मोहनेन सुरतेन विशेषेण मोहितः सुरतपरवशः, अथ च—मोहनकारिणा कामबाणेन मोहितो निरस्तविवेकोऽहं तवाधरपानेषु अतृप्तः संस्तव रसनां जिह्वामपि यदपिबं तत्तावत्साकल्येन त्वया न प्रस्मृतम् । जिह्वाग्रलेहनमपि कामशास्त्रोक्तम् । प्रशब्दः प्रगतार्थः । 'अधरपानानाम्' इति पाठे तृप्त्यर्थानां करणे षष्ठी वा ॥

त्वत्कुचार्द्रनखाङ्कस्य मुद्रामालिङ्गनोत्थिताम् ।
स्मरेः स्वहृदि यत्स्मेरसखीः शिल्पं तवाब्रवम् ॥७९॥

त्वदिति ॥ अहं स्वहृदये तवालिङ्गनोत्थितां तव कुचे तात्कालिकत्वादार्द्रस्याशुष्करुधिरस्य मया कृतस्य नखाङ्कस्य मुद्रां नखक्षतदर्शनादेव स्मेरसखीः हास्यपरास्तव सखीः प्रति तव शिल्पं भवत्सख्या भैम्येदं नखक्षतं कृतं पश्यतेति त्वन्निर्माणं यदब्रवं तत्स्मरेश्चिन्तयेः । 'स्मेरः' इति पाठे—स्मेरः सन्नहमित्यर्थः । सखीः, मुख्यं कर्म । शिल्पमिति 'अकथितं च' इति कर्मत्वम् ॥

त्वयान्याः क्रीडयन्मध्येमधुगोष्ठि रुषेक्षितः ।
वेत्सि तासां पुरो मूर्ध्ना त्वत्पादे यत्किलास्खलम् ८०

त्वयेति ॥ मधुगोष्ठ्या मद्यशालाया मध्ये मद्यसहपानावसरे अन्याः सपत्नीः क्रीडयन् त्वया रुषा रोषरूपितया दृशा ईक्षितोऽहं तासां सपत्नीनां पुरः समक्षमेव किल मद्यमत्तत्वात्स्खलनव्याजेन त्वत्पादे मूर्ध्ना यदस्खलं स्खलित्वा यदपतं तद्वेत्सि जानासि । स्खलनव्याजेन प्रणामेन त्वां प्रसादितवानस्मि तत्स्मरेति भावः । मध्येमधुगोष्ठि, 'पारे मध्ये षष्ठया वा' इति समासः ॥

वेत्थ मय्यागते प्रोष्य यत्त्वां पश्यति हार्दिनि ।
अचुम्बीरालिमालिङ्ग्य तस्यां केलिमुदा किल ॥८१॥

वेत्थेति ॥ मयि प्रोष्य विजययात्रां कृत्वा आगते, अत एव हार्दिनि प्रेमभरतरले त्वां पश्यति सति आलिं स्वसखीमालिङ्ग्य अन्याः प्रति तस्यां केलिमुदा क्रीडाहर्षेण किल विलासप्रकटनव्याजेन यत्तामचुम्बीः तद्वेत्थ स्मरसि । कामशास्त्राभ्यासकौशलवशात्सख्यालिङ्गनचुम्बनव्याजेन मां प्रत्यालिङ्गनचुम्बनद्वारा स्वप्रेमभरं यत्सूचितवत्यसि तत्स्मरेति भावः । हे हार्दिनीति भैमीसंबुद्धिर्वा । प्रोष्य, प्रपूर्वाद्वसेः क्त्वो ल्यपि यजादित्वात्संप्रसारणम् । हार्दिनि, (युवादित्वादणि) 'हृदयस्य हृल्लेख–' इति हृद्भावे च 'अत इनिः' ॥

जागर्ति तत्र संस्कारः स्वमुखाद्भवदानने ।
विक्षिप्यायाचिषं यत्ता न्यायात्ताम्बूलफालिकाः॥८२॥

जागर्तीति ॥ अहं ताम्बूलस्य चर्वितपूगफलनागवल्लीदलस्य फालिकाः शकलानि स्वमुखात्सकाशाद्भवत्या आनने निक्षिप्य निधाय 'यदीयो निक्षेपः स तस्मै दातव्योऽन्यथा दण्ड्यः' इति न्यायाच्छास्त्रोक्तयुक्तेर्यत्तास्ताम्बूलफालिकाः (यदहमयाचिषं) पुनर्मह्यं देहीति याचितवान्, तत्र विषये स्मरणभूतो भावनाख्यः संस्कारो जागर्ति स्फुरद्रूपो वर्तते तत्स्मरसि किमित्यर्थ इति प्रभः ॥

चित्ते तदस्ति कश्चित्ते नखजं यत्क्रुधा क्षतम् ।
प्राग्भावाधिगमागःस्थे त्वया शम्बाकृतं क्षतम् ॥८३॥

चित्त इति ॥ मयि प्राक् त्वय्यप्राप्तसुरतान्त्यसुखायामेव सत्यां यो भावाधिगमः सुरतान्तसुखप्राप्तिस्तद्रूपे आगस्यपराधे तिष्ठति एवंभूते सति मयि विषये वा समरतस्यैव सुखहेतुत्वाद्विषमरतस्यासुखहेतुत्वात्क्रुधा मध्य एव सुखजन्याद्रोषाद्धेतोर्नखजं क्षतं त्वया शम्बाकृतं प्रथमं फालकृष्टे क्षेत्रे पुनरपि सा(सी)रावदारणवत्प्रथमकृतनखक्षतमध्य एव पुनरपि गाढतरं नखक्षतं यदारोपितं तत्ते चित्तेऽस्ति कश्चित् । तत्स्मरेत्यर्थः । 'शम्बाकृतं द्वितीयं स्यात्' इति निघण्टुः । शम्बाकृतं, 'कृञो द्वितीय–' इति डाच् । लक्षणया प्रयोगः ॥

स्वदिग्विनिमयेनैव निशि पार्श्वविवर्तिनोः ।
स्वप्नेष्वप्यस्तवैमुख्ये सख्ये सौख्यं स्मरावयोः ॥ ८४ ॥

स्वेति ॥ स्वीयस्वीयदिशो विनिमयेनैव परिवर्तनेनैव निशि पार्श्वविवर्तिनोर्वामदक्षिणकुक्षिपरिवर्तनशीलयोः नतु यथावस्थितयोः संमुखयोरेवंभूतयोरावयोस्तव मम च स्वप्नेष्वपि निद्रास्वपि मध्ये अस्तं त्यक्तं वैमुख्यं पराङ्मुखत्वं यत्र तादृशे सख्ये मैत्रे यत्सौख्यं सुखं सुखित्वं वा तत्स्मर । संमुखयोर्हि यथावस्थितयोरेव पार्श्वपरिवर्तने द्वयोरपि पृष्ठभागघटनात्पराङ्मुखत्वमेव स्यादिति स्वस्वदिग्विनिमयपूर्वकमेकदैव पार्श्वपरिवर्तने वैमुख्याभावान्निद्रासमयेपि सांमुख्येन यदावयोर्मैत्रीसौख्यं तत्स्मरेत्यर्थः । स्वस्वदिग्विनिमयेन पार्श्वपरिवर्तने चान्योन्यं सांमुख्यमेव भवतीति सर्वसाक्षिकम् । सौख्यम्, स्वार्थे भावे वा ष्यञ् ॥

क्षणं प्राप्य सदस्येव नृणां विमनितेक्षणम् ।
दर्शिताधरमद्दंशा ध्याय यन्मामतर्जयः ॥ ८५ ॥

क्षणमिति ॥ सदस्येव सभायामेव वर्तमानापि त्वं सभास्थानां नृणां विमनितानि कार्यान्तरदर्शनपराणि कृतानीक्षणानि यत्र येन वा तादृशं क्षणमवसरं नृत्ताद्युत्सवं वा प्राप्य मह्यमङ्गुल्यादिना दर्शितोऽधरे वर्तमानो मद्दंशो मत्कृतो दन्तव्रणो यथैवंभूता सती तर्जन्यादिना मां यत्तर्जयः, तद्ध्याय स्मर । विमनितेति, 'तत्करोति–' इति णिचि 'णाविष्ठवत्' इति टिलोपः ॥

तथावलोक्य लीलाञ्जनालभ्रमणविभ्रमात् ।
करौ योजयताध्ये(धी)हि यन्मयासि प्रसादिता॥८६॥

तथेति ॥ तथा अधरदन्तक्षतदर्शनपूर्वं तर्जनीतर्जनाप्रकारमवलोक्य लीलाञ्जनालस्य कराभ्यां भ्रमणरूपाद्विभ्रमात्तद्व्याजात्प्रणामप्रसादाञ्जलिबन्धनरूपेण करौ योजयता संयुक्तौ कुर्वता मया कोपत्याजनपूर्वं यत्प्रसादितासि तदध्ये(धी)हि । स्मरेत्यर्थः । 'इक् स्मरणे' ॥

ताम्बूलदानमन्यस्तकरजं करपङ्कजे ।
मम न स्मरसि प्रायस्तत्र नैव स्मरामि तत् ॥ ८७ ॥

ताम्बूलेति ॥ त्वं त्वदीयकरपङ्कजे मम ताम्बूलदानमन्यस्तकरजमक्षिप्तनखक्षतं प्रायो बाहुल्येन न स्मरसि । अहमपि मदीयपाणिपद्मे त्वत्कृतं तृषाच्छेदकं यथा ताम्बूलदानमक्षिप्तनखक्षतं बाहुल्येन नैव स्मरामि । किंतु—अन्योन्यबीटिकादानक्षणे प्रेम-

भरात्पाणिपद्मगर्भारोपितनखक्षतमेव सदा ताम्बूलदानमावयोः, तत्स्मरेति भावः ॥

तदध्ये(धी)हि मृषोद्यं मां हित्वा यत्त्वं गता सखीः ।
तत्रापि मे गतस्याग्रे लीलयैवाच्छिनस्तृणम् ॥ ८८ ॥

तदिति ॥ कमप्यपराधं कृत्वाप्यहमेतन्नाकार्षमित्यादिमृषोद्यमलीकभाषिणं मां कोपेन हित्वा सखीः प्रति गता त्वं तत्रापि सखीसमीपे भवदीयपृष्ठदेशानुवर्तित्वेन गतस्य मेऽग्रे लीलयैव स्वभावेनैव यत्तृणमच्छिनश्चिच्छेद (दिथ), तदध्ये(धी)हि इति पूर्ववत् । अद्यप्रभृत्यलीकभाषिणस्तवाहं न कापि, त्वं मम न कोपीति मैत्रीविच्छेदसूचकं तृणच्छेदं यथा बालकाः कुर्वन्ति, तद्वत्त्वयापि कृतमिति स्मरेत्यर्थः । मृषोद्यम्, 'राजसूय-' इति निपातः ॥

स्मरसि प्रेयसि प्रायो यद्द्वितीयरतासहा ।
शुचिरात्रीत्युपालब्धा त्वं मयापिकनादिनी ॥ ८९ ॥

स्मरसीति ॥ हे प्रेयसि, बालत्वात्सौकुमार्यविशेषाच्च द्वितीयरताभिलाषिणो मम द्वितीयस्य रतस्यासहा, तथा—पिकवन्नदति तच्छीला कोकिलतुल्यकूजना त्वं मया शुचिरात्री ग्रीष्मर्तुसंबन्धिनी रात्रीत्युपालब्धा सोपालम्भमामन्त्रितासि तत्प्रायः स्मरसि कथयेत्यर्थः । शुचिरात्रिरपि स्वल्पप्रमाणत्वादेकवारसुरतनिर्माणेनैव जातप्रभातत्वाद्द्वितीयसुरतनिर्माणासहा वसन्तनैकट्याच्च पिकनादोऽस्यां वर्तत इति । तत्रापि प्रभाते कोकिलालापो भवतीत्यर्थः । यद्वा[1]—वसन्तस्यातीतत्वात्कोकिलानामभावात्पिकव्यतिरिक्ताः पक्षिणोऽपिकाः, तन्नादयुक्ता ॥

भुञ्जानस्य नवं निम्बं परिवेविषती मधौ ।
सपत्नीष्वपि मे रागं संभाव्य स्वरुषः स्मरेः ॥ ९० ॥

भुञ्जानस्येति ॥ मधौ वसन्ते नवं नूतनसमागतपत्रपुष्पादिकं निम्बं भुञ्जानस्य मे सपत्नीष्वपि रागं प्रीतिं संभाव्यानुमाय कोपवशात् पुनःपुनः निम्बमेव मम भोजनार्थं परिवेविषती पात्रे परितः क्षिपन्ती त्वं स्वरुषः स्वीयान्कोपान् स्वकोपस्य वा स्मरेः । मधुरतरशर्करादिपरित्यागेनातिकटुरसेऽपि चेदस्यैवं रुचिस्तर्हि मदीयापेक्षयाऽतिहीनासु मत्सपत्नीष्वप्यस्य रुचिः स्यादिति संभाव्य बहुतरं निम्बमेव भुङ्क्ष्वेति वारं वारमतिकटुनिम्बातिदानेन यत्कोपान्मां प्रति व्यञ्जितवत्यसि तत्स्मरेति भावः । वसन्ते च जना निम्बं भुञ्जते । परिवेविषती, परिवेषणार्थात्परिपूर्वाद्विषेः शता 'श्लौ' इति द्विर्वचनम् । स्वरुषः, 'अधीगर्थ-' इति षष्ठी, कर्मत्वविवक्षया द्वितीया वा ॥

स्मर शार्करमास्वाद्य त्वया राद्धमिति स्तुवन् ।
स्वनिन्दारोषरक्तात्तु यदभैषं तवाधरात् ॥ ९१ ॥

स्मरेति ॥ शार्करं शर्कराविकारभूतं शर्करासंस्कृतं वा किमपि भक्ष्यमास्वाद्य एतत्सर्वातिशायिरसममृतस्राविहस्तया त्वया साधितं किमिति स्वादातिशयानतिस्तुवन् वारं वारं तदेव वर्णयन्नहं सर्वातिशायिरसमेतच्छार्करमिति स्तुतौ अधरस्यापि सर्वमधुरवर्गान्तःपातितयानिन्दापर्यवसानान्मदपेक्षयाप्येतदधिकरसमित्ययं वर्णयति, ननु तर्हि अद्यप्रभृति अयमेतदेव रसयतु मम तु कथाप्यनेन न कार्येति स्वनिन्दया रोषस्तेन रक्तात्तवाधरात्पुनर्यदभैषं भीतवानस्मि तत्स्मर । कोपेन लौहित्यं युक्तम् । त्वदधरकल्पशार्करवर्णनया कुपितया त्वयाधरस्फुरणादिना व्यञ्जितात्कोपाद्यदभैषं तत्स्मरेति भावः । शार्करम्, विकारे संस्कृतार्थे वाण् । अधरात्, 'भीत्रा-' इत्यपादानत्वम् ॥

मुखादारभ्य नाभ्यन्तं चुम्बं चुम्बमतृप्तवान् ।
न प्रापं चुम्बितुं यत्ते धन्या तच्चुम्बतु स्मृतिः ॥९२॥

मुखादिति ॥ मुखादारभ्य नाभ्यन्तं नाभिपर्यन्तं त्वदङ्गं चुम्बं चुम्बं चुम्बित्वा चुम्बित्वा अतृप्तवान् असमाप्तचुम्बनेच्छुः(च्छः) सन्नहं स्मरमन्दिरं यत्त्वदङ्गं पाण्यादिना प्रतिबन्धाल्लज्जातिशयाद्वा गोपितत्वाच्चुम्बितुं न प्रापं तत्स्मरमन्दिरं धन्या स्मृतिश्चुम्बतु । तत्स्मरमन्दिरं स्मृतिविषयीभवतु । अतिरागात्स्मरमन्दिरमपि चुम्बितुं प्रवृत्तस्य मम तन्न दत्तवती तत्स्मरेति भावः । चक्रवर्तिनापि मया यच्चुम्बितुं न प्राप्तं तत्स्मृत्या प्राप्तम्, अत एव सा धन्येति भावः । मुखाक्षिकक्षाकुचनाभिमूलवराङ्गभागाश्चुम्बनस्थानानि ॥

कमपि स्मरकेलिं तं स्मर यत्र भवन्निति ।
मया विहितसंबुद्धिर्व्रीडिता स्मितवत्यसि ॥ ९३ ॥

कमिति ॥ त्वं कमपि तमनिर्वचनीयं लोकोत्तरपुरुषायिताख्यं स्मरकेलिं स्मर । (तं कम्-) यत्र कामकेलौ पुंस्त्वारोपेण भवन्नित्येवं पुंलिङ्गोचितसंबुद्ध्या मया विहिता संबुद्धिर्यस्याः सा त्वं व्रीडिता स्मितवत्यसि । कामशास्त्राभ्यासकौशलाद्यद्विपरीतसुरतमकार्षीः, तत्स्मरेत्यर्थः । केलेः पुंस्त्वं पूर्वं दर्शितम् ॥

नीलदाचिबुकं यत्र मदाक्तेन श्रमाम्बुना ।
स्मर हारमणौ दृष्टं स्वमास्यं तत्क्षणोचितम् ॥ ९४ ॥

नीलदिति ॥ तत्रोक्तरूपे पुरुषायिते ललाटकपोललिखितपत्रवल्लीसंबन्धिना मदेन कस्तूर्याक्तेन मिश्रितेन कलुषितेन गच्छता श्रमाम्बुना आचिबुकं हनुभागमभिव्याप्य नीलन्नीलवर्णं भवदुपरिस्थितत्वादधोविलोकयतो मुखस्य कस्तूरीमिलितेन गलता श्रमजलेन चिबुकसंबन्धस्यौचित्यान्नीलं भवत् एवंभूतम्, अधोभागे वर्तमानस्य मम हृदि वर्तमाने मुक्ताहारमध्यमणौ तत्क्षणे विपरीतरताचरणसमये तल्लक्षण उत्सवे वोचितमुक्तरीत्या योग्यम्, अथ च—पुरुषायितक्षणे तादृशस्य श्रमजलस्य कूर्चकान्तिदायित्वेनोचितम्, दृष्टं स्वमास्यं स्मर । 'मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः' इत्यभिधानान्मदशब्द एकदेशलक्षणया मृगमदवाची । नीलद्, आचारक्विबन्ताच्छता । 'नील वर्णे' धातुरिति केचित् ॥

स्मर तन्नखमत्रोरौ कस्तेधा(दा)दिति ते मृषा ।
ह्रीदैवतमलुम्पं यद्व्रतं रतपरोक्षणम् ॥ ९५ ॥

१ 'यद्वा अपिशब्दः समुच्चये । वर्षाकालसांनिध्यात् कस्य जलस्य नादोऽस्यां सा कनादिनी' इत्यधिकं सुखावबोधायाम् ।

१ 'नीलज्जातश्मश्रु यत्रेति पाठो दुर्योज्यत्वाच्चिन्त्यः' इति सुखावबोधा ।

स्मरेति ॥ अहं अत्रान्तिके तवोरौ को नखमधा[दा]दत्तवानिति मृषा असत्यभाषी सन् ह्रीरेव दैवतं यस्य तत्, अत एव रतस्य परोक्षणं परोक्षकरणं ब्रह्मचर्यरूपं सुरतप्रतिबन्धकं व्रतं नियमं यदलुम्पं निवर्तितवान्, तत्स्मर । परपुरुषसंबन्धशङ्कोत्पादनार्थं मृषाभाषणेन रसान्तरमुत्पाद्य लज्जाकृतं सुरतप्रतिबन्धकमनुद्योगं यन्निवर्तितवांस्तत्स्मरेत्यर्थः । व्रतं सदैवतं भवतीति ह्रीदैवतमित्युक्तम् ॥

वनकेलौ स्मराश्वत्थदलं भूपतितं प्रति ।
देहि मह्यमुदस्येति मद्गिरा व्रीडितासि यत् ॥ ९६ ॥

यनेति ॥ त्वम् इति मद्गिरा यद्व्रीडितासि तत्स्मर । इति किम्—हे भैमि, त्वं वनकेलौ आरामविहारसमये भुवि पतितमश्वत्थदलं प्रति उद्दिश्य इदम् उदस्य पाणिनोत्क्षिप्य मह्यं देहीति । 'अश्वत्थपत्रसदृशं विपुलं च गुह्यम्' इति कामशास्त्रवचनान्नूपतिताश्वत्थदलयाचनेन वराङ्गयाचनस्य सूचितत्वाद्व्रीडितासि तत्स्मरेति भावः ॥

इति तस्या रहस्यानि प्रिये शंसति सान्तरा ।
पाणिभ्यां पिदधे सख्याः श्रवसी ह्रीवशीकृता ॥९७॥

इतीति ॥ सा भैमी प्रिये इति पूर्वोक्तप्रकारेण तस्या भैम्या रहस्यानि एकान्तरतवृत्तानि शंसति सति ह्रीवशीकृता लज्जिता सती अन्तरा मध्य एवासमाप्त एव वचने पाणिभ्यां सख्याः कलायाः श्रवसी कर्णौ पिदधे आच्छादितवती । इतः परमप्य(ति)संगुप्तमपि रहस्यमस्यै कथयिष्यति, तदनया नाकर्णनीयमिति बुद्ध्या तस्याः कर्णौ प्यधत्तेत्यर्थः ॥

कर्णपिधान एवोत्प्रेक्षते—

कर्णौ पीडयती सख्या वीक्ष्य नेत्रासितोत्पले ।
अप्यपीडयतां भैमीकरकोकनदे तु (नु) तौ ॥ ९८ ॥

कर्णाविति ॥ भैमीकरावेव कोकनदे रक्तोत्पले अपि कर्तारौ (?) सख्याः कलाया नेत्रे एवासितोत्पले तस्या एव कर्णौ पीडयती यत्नयन्ती वीक्ष्य तौ कलाकर्णौ कर्मभूतौ अपीडयतां नु कलानेत्रनीलोत्पलयोराकर्णपूर्णतया कर्णाक्रमणात्पीडाकरणमिव भैमी-करराक्तोत्पले अपि साजात्यान्नेत्रनीलोत्पलसाहायकाचरणबुद्ध्येव स्पर्धयेव वा (भैमीकरकोकनदे अपि) तत्कर्णौ पीडयामासतुः किमिति भावः । सवर्णयोः साहायकं स्पर्धा च युक्ता । पीडयती, 'वा नपुंसकस्य' इति नुमभावः ॥

पुनरप्यन्यथोत्प्रेक्षते—

तत्प्रविष्टं सखीकर्णौ पत्युरालपितं ह्रिया ।
पिदधाविव वैदर्भी स्वरहस्याभिसंधिना ॥ ९९ ॥

तदिति ॥ वैदर्भी सखीकर्णौ प्रविष्टं तत्पूर्वोक्तं रहस्यरूपं पत्युरालपितं स्वरहस्यमेतत्कर्णाभ्यां सकाशाद्बहिर्मा गादित्यभिसंधिनाभिप्रायेणेव ह्रिया पिदधौ आच्छादितवती । अन्यदपि गोप्यं वस्तु भाण्डे निक्षिप्यान्यो मा स्म ज्ञासीदिति तद्द्वारं पिधीयते ॥

तमालोक्य प्रियाकेलिं नले सोत्प्रासहासिनि ।
आरात्त्वत्त्वमबुद्ध्वापि सख्यः सिष्मियिरेऽपराः ॥१००॥

तमिति ॥ आरादूरे स्थिता अप्यपराः सख्यस्तत्त्वं नलहासकारणमबुद्ध्वापि सिष्मियिरे जहसुः । कस्मिन्सति—नले तं पूर्वोक्तं प्रियायाः केलिमालोक्य सोत्प्रासहासिनि उत्प्रासेनोपहासत्वेन सह यथा तथा हसति सति । नलाट्टहासश्रवणमात्रेण सिष्मियिर इत्यर्थः ॥

दम्पत्योरुपरि प्रीत्या ता धराप्सरसस्तयोः ।
ववृषुः स्मितपुष्पाणि सुरभीणि मुखानिलैः ॥ १०१ ॥

दम्पत्योरिति ॥ ताः सख्य एव धरायामुर्वश्याद्यप्सरसस्तयोर्दम्पत्योरुपरि प्रीत्या प्रेमातिशयेन सुरभीणि स्मितान्येव पुष्पाणि ववृषुः । सर्वा अपि सख्यस्तावुभौ क्रीडावशाज्जहसुरित्यर्थः । मुखानिलसुरभित्वेन तासां पद्मिनीत्वं सूचितम् । तयोः, 'षष्ठ्यतसर्थ–' इति षष्ठी ॥

तदास्यहसिताज्जातं स्मितमासामभासत ।
आलोकादिव शीतांशोः कुमुदश्रेणिजृम्भणम् ॥१०२॥

तदिति ॥ तस्य नलस्यास्यहसिताज्जातमासां सखीनां स्मितं शीतांशोरालोकात्प्रकाशाज्जातं कुमुदश्रेण्या जृम्भणं विकासनमिवाभासत । 'तदस्य' इति क्वचित्पाठः ॥

प्रत्यभिज्ञाय विज्ञाथ स्वरं हासविकस्वरम् ।
सख्यास्तासु स्वपक्षायाः कला जातबलाऽजनि १०३

प्रतीति ॥ अथ सखीसमूहहासानन्तरं विज्ञाऽतिचतुरा कला तासु सखीषु मध्ये स्वपक्षाया निजमित्रभूतायाः कस्याश्चित्सख्याः स्वरं हासेन विकस्वरं सुव्यक्तम्, अत एव—सोऽयं मत्सख्या एव स्वर इति प्रत्यभिज्ञाय परोक्षप्रत्यक्षोभयांशात्मकज्ञानविषयं कृत्वा जातं बलं यस्यास्तादृशी, भैमीप्रतारणार्थं ससहायोत्साहशक्तियुक्ता बाऽजनि । मत्पक्षीयाऽत्र विदग्धेऽस्मिन्नोऽस्याः सकाशान्मां मोचयिष्यति, शिष्टं वाकर्णयिष्यतीति साश्वासाभूदिति भावः । अन्योपि केनचित्प्रतिबद्धः स्वपक्षीयं दृष्ट्वा जातबलो भवति । सखीस्वरश्रवणं तु कर्णपिधानात्पूर्वमेव ज्ञातव्यम् । अन्यथा स्वरश्रवणानुपपत्तेः । भैमीकरयोः कोमलतरतया कर्णनिबिडपीडने सामर्थ्याभावेन वा श्रवणोपपत्तिः ॥

साहूयोच्चैरथोचे तामेहि स्वर्गेण वञ्चिते ।
पिब वाणी सुधावेणीर्नृपचन्द्रस्य सुन्दरि ॥ १०४ ॥

---

१ 'वनकेलौ आरामविहारसमये इति 'व्रीडिता' इत्यतः प्राग्योजनं साधिष्ठम् । २ 'अथ च—उत्क्षिप्य (उच्छित्य) देहीति याचितेन भगोपमस्य तस्योर्ध्वीभावेन पुरुषायितसुरतस्यापि सूचितत्वाद्व्रीडितासीति' इति सुखावबोधायामधिकम् ।

१ 'स्वपक्ष्याया इति दिगादित्वाद्यः । स्वपक्षाया इति पाठे—पक्षशब्दस्य नित्यपुंल्लिङ्गत्वात्तत्पुरुषासंभवाद्बहुव्रीहिः कार्यः' इति सुखावबोधा । २ 'रुवाचैताम्' इति मूलपुस्तकपाठः

...ति ॥ अथ स्वपक्षीयस्वरप्रत्यभिज्ञानानन्तरं सा कला तां स्व-...मुच्चैस्तारस्वरं यथातथाहूय इति ऊचे । इति किम्—दूरस्थ-...त् हे स्वर्गसुखेन वञ्चिते सुन्दरि, एहि समीपमागच्छ, आगत्य ...नृप एवाह्लादकत्वाच्चन्द्रस्तस्य सुधावेणीरमृतप्रवाहरूपा वाणीः ...व सादरमाकर्णयेति स्वर्गेपि चन्द्रामृतपानमेव विशिष्टं नल-...रिहासाकर्णनसुखं स्वर्गसुखमेव तदनुभवेत्यर्थः ॥

साशृणोत्तस्य वाग्भागमनत्यासत्तिमत्यपि ।
कल्पग्रामाल्पनिर्घोषं बदरीव कृशोदरी ॥ १०५ ॥

सेति ॥ कलया आहूता अनत्यासत्तिमत्यपि अत्यन्तनैकट्यर-हिताऽपि यत्र स्थितौ किंचिच्छ्रूयते किंचिन्नेति तत्र स्थिता कृशो-दरी सा कलासखी तस्य वाचो भागं शिष्टमंशमशृणोत् । कला-कर्णयोर्भैम्या पिहितत्वादाहूता सखी नलकथ्यमानरहस्यकथाशेष-मशृणोदित्यर्थः । का कमिव—कृशोदरी कृशमध्या । अल्पजनेति यावत् । एवंभूता बदरी कल्पग्रामनाम्नो ग्रामस्याल्पनिर्घोषं लोक-कलकलं तत्र पठतां वेदध्वनिं वा तमिव । बदरिकाश्रमस्थो लोकः मुनिजनस्थानभूतकल्पग्रामनिवासिनो जनस्य कोलाहलं शृणो-तीति ती(तै)र्थिकप्रसिद्धिः ॥

अथ स्वपृष्ठनिष्ठायाः शृण्वत्या निषधाभिधाः ।
नलमौलिमणौ तस्या भावमाकलयत्कला ॥१०६॥

अथेति ॥ अथ कलासख्या नलवाक्यशेषश्रवणानन्तरं कला स्वपृष्ठे निष्ठा स्थितिर्यस्याः कर्णपिधानपरतया कलापश्चाद्भागे स्थि-तायाः, तथा—कलासखीं प्रति रहस्यं ब्रुवतो नैषधस्याभिधा वच-नानि शृण्वत्यास्तस्या भैम्या भावं रहस्यकथनाद्वासकोपाद्यभिव्य-ञ्जकमुखचेष्टाविशेषं नलस्य मौलिमणौ शिरोरत्ने प्रतिबिम्बवशा-दाकलयदज्ञासीत् । ददर्शेत्यर्थः । नलेन कलासखीं प्रति रहस्ये उक्ते भैम्या हास्यकोपादिचेष्टां नलमौलिरत्ने प्रतिबिम्बितं सा कला ददर्श नत्वशृणोदित्यर्थः ॥

प्रतिबिम्बेक्षितैः सख्या मुखाकूतैः कृतानुमा ।
तद्व्रीडाद्यनुकुर्वाणा शृण्वतीवान्वमायि सा॥१०७॥

प्रतिबिम्बेति ॥ प्रतिबिम्बे ईक्षितैः सख्याः पृष्ठस्थितया भैम्याः स्वपक्षसख्या मुखाकूतैर्व्रीडाहास्यादिसूचकमुखसंकोचवि-कासादिचेष्टितैः कृत्वा कृताऽनुमितिर्यया तादृङ्मुखविकारदर्शना-त्प्रायेण नलेनैवमुक्तं स्यादित्येवंकृता नलवाक्यार्थसंभावना यया सा, तथा—तस्या भैम्याः स्वपक्षसख्या वा नलवाक्यानुरूपं व्री-डाद्यनुकुर्वती प्रतिबिम्बदर्शनादेवाङ्गसंकोचाद्यभिनयेनानुकुर्वाणा दर्शयन्ती सा कला भैमीपाणिपिहितकर्णाऽपि तद्व्रीडाद्यनुकरणादेव भैमीवत्, सखीवद्वा नलवचनं शृण्वतीवान्वमानि(यि) भैमी-नलाभ्यां संभाविता । तद्व्रीडादि, 'न लोका–' इति निषेधाद्द्विती-या । अनुकुर्वाणा, 'अनुपराभ्यां कृञः' इति परस्मैपदविधानाच्छा-नजभावे 'ताच्छील्यवयोवचनशक्तिषु चानश्' इति ताच्छील्ये शक्तौ वा चानश् ॥

कारं कारं तथाकारमूचे साऽशृणवंतमाम् ।
मिथ्या वेत्थ गिरश्चेतद्व्यर्थाः स्युर्मम देवताः ॥१०८॥

कारमिति ॥ सा कला तथा पूर्वोक्तं भैम्याः स्वपक्षसख्या वा नलमौलिमणिदृष्टं मुखव्रीडाहर्षाद्याकारं कारं कारं कृत्वा कृत्वा अनया सर्वं श्रुतमिति यथा प्रतीतिर्भवति तथाभिनयं कृत्वा इति ऊचे । इति किम्—अहं भवदीयं सर्वं वृत्तान्तमशृणवंतमां नित-रामाकर्णितवत्यस्मि । हे भैमि, त्वं भवद्वचनश्रवणसूचिका मम गिरो मिथ्या चेद्वेत्थ जानीषे । अनाकर्णितमप्याकर्णितमियं वद-तीति मन्यसे चेत्तर्हि अभीष्टसिद्ध्यर्थं प्रत्यहं पूज्यमाना मम गौर्यादीष्टदेवता निष्फलाः स्युरिष्टदायिन्यो मा भूवन्निति मया शपथः क्रियते इति नलं प्रत्यवोचद्वा । अशृणवंतमाम् 'तिङश्च' इति तमप् ॥

मत्कर्णभूषणानां तु राजन्निबिडपीडनात् ।
व्यथिष्यमाणपाणिस्ते निषेद्धुमुचिता प्रिया ॥ १०९ ॥
इति सा मोचयांचक्रे कर्णौ सख्याः करग्रहात् ।
पत्युराश्रवतां यान्त्या मुधायासनिषेधिनः ॥ ११० ॥

मदिति ॥ इतीति । युग्मम् । सा कला इति पूर्वोक्तं नलं प्रत्युक्त्वा सख्या भैम्याः करग्रहात् पाणिभ्यां पीडनात्सकाशा-त्कर्णौ मोचयांचक्रे । अर्थाद्भैम्यैव प्रयोज्यया । तृतीयान्त(पाठ)-स्तु स्पष्टार्थः । किंभूतायाः—कर्णपिधानरूपान्मुधायासाद्वृथाप्र-यासान्निषेधिनो निवारयितुः पत्युराश्रवतां वचनकारित्वं यान्त्या गच्छन्त्याः । तद्वचनकारिण्या इत्यर्थः । शपथरूपं कलावचनमा-कर्ण्य कर्णपिधानप्रयासो व्यर्थ इति निबिडपीडनात्तव पाणिपीडैव भविष्यतीति तत्कर्णौ मुञ्चेति नलवचनाद्भैमी तत्कर्णावमुञ्चदि-त्यर्थः । इति किम् । हे राजन्, मत्कर्णपिधानवशान्मत्कर्णभूषणानां निबिडपीडनाद्धेतोस्तु पुनः सौकुमार्यातिशयादितः परमपि व्यथि-ष्यमाणौ पीडां प्राप्स्यन्तौ पाणी यस्यास्तादृशी ते तव प्रिया नि-षेद्धुमुचितेति । कर्णपिधानफलं नास्ति पिधानप्रयासो व्यर्थः प्रत्यु-तास्याः पाणिपीडा भविष्यतीतीयं त्वया निषेध्येत्यर्थः ॥

श्रुतिसंरोधजध्वानसंततिच्छेदतालताम् ।
जगाम झटिति त्यागस्वनस्तत्कर्णयोस्ततः ॥ १११ ॥

श्रुतीति ॥ ततः कर्णमोचनानन्तरं ततो विस्तृतो वा तस्याः कलायाः कर्णयोः झटिति शीघ्रं त्यागस्तस्माच्छीघ्रहस्तमोचनाज्जातो यष्टादिस्वनः स श्रुत्योः संरोधान्निबिडपीडनाज्जातो यो ध्वानः शब्दस्तस्य संततिरविच्छिन्नता निरन्तरसमुत्पन्नो गुमुगुमारव इति यावत्, तस्य च्छेदे विरतौ तालतां हस्ततालद्वयवाद्यपरिच्छेद्यगी-तादिक्रियामानभूतकालतां जगाम । झटितिमुद्रितकर्णमोचनादनु-भूयमानष्टादिशब्दः, कर्णपिधानसमयेऽनुभूयमानगुमुगुमारवविरामज्ञापकोऽभूदित्यर्थः । एतच्च स्वप्रत्यक्षसिद्धम् ॥

सापसृत्य कियद्दूरं मुमुदे सिष्मिये ततः ।
इदं च तां सखीमेत्य ययाचे काकुभिः कला ॥११२॥

सेति ॥ सा कला ततोऽनन्तरं तस्माद्भैम्युपवेशनस्थानाद्वा सकाशात्कियत्किंचिद्दूरमपसृत्य गत्वा मुमुदे सिष्मिये । प्रतारणकौशलवशाज्जहास च । तां स्वसखीं श्रुतनलवचनामेत्येदं वक्ष्यमाणं काकुभिरर्थविशेषव्यञ्जकैरुच्चनीचैर्ध्वनिविकारैः कृपणभाषणैर्ययाचे च । अवोचदिति यावत् ॥

अभिधास्ये रहस्यं ते यदश्रावि मयानयोः ।
वर्णयाकर्णितं मह्यमेह्यालि विनिमीयताम् ॥ ११३ ॥

अभिधास्य इति ॥ हे सखि, मयाऽनयोर्यद्रहस्यमश्रावि, अहं तद्रहस्यं तुभ्यमभिधास्ये, मत्कर्णपिधानानन्तरमनयो रहस्यं त्वया आकर्णितं तत्त्वं मह्यं वर्णय कथय एहि शीघ्रमागच्छ विनिमीयतां परिवृत्तिः क्रियताम् । मह्यम्, 'क्रियया यमभिप्रैति–' इति संप्रदानत्वम् । भिन्नवाक्यत्वादन्वादेशाभावान्न मयादेशः ॥

वयस्याभ्यर्थनेनास्याः प्राक्कूटश्रुतिनाटने ।
विस्मितौ कुरुतः स्मैतौ दम्पती कम्पितं शिरः[2] ॥ ११४ ॥

वयस्येति ॥ अश्रुतरहस्यश्रवणार्थमाहूताया वयस्याया अभ्यर्थनेन स्वाश्रुतश्रवणप्रार्थनेन हेतुनास्याः कलायाः 'अशृणवंतमाम्' इत्यादि प्राक्कूटश्रुतिः पूर्वं कृतं मिथ्याशिरःकम्पादिपूर्वं श्रवणं तस्या नाटनेऽभिनये विस्मितौ अनया कथमावां प्रतारितौ स्वः दृष्टं दृष्टमिति मिथोवचनपूर्वं साश्चर्यौ तौ दम्पती शिरः कम्पितं कुरुतः स्म । नाटने, चौरादिकान्नाटेर्नपुंसके भावे ल्युट् ॥

तथालिमालपन्तीं तामभ्यधान्निषधाधिपः ।
आस्स्व तद्वञ्चितौ स्वश्चेन्मिथ्याशपथसाहसात् ॥ ११५ ॥

तथेति ॥ निषधाधिपः तथा रहस्यविनिमयकथनप्रार्थनरूपेण स्वपक्षभूतामालिं प्रत्यालपन्तीं तां कलामभ्यधादवोचत् । हे कले, मिथ्याशपथरूपात्साहसादविचारितकारित्वाद्धेतोश्चेदावां कर्णमोचनार्थमेव तयालीकवचनोक्त्या वञ्चितौ प्रतारितौ स्वो भवावस्तर्हि आस्स्व तिष्ठ । तत्तर्हि आस्स्वेति भिन्नं वा । प्रतारणनिमित्तां तर्जनोक्तिमूचे इत्यर्थः ॥

प्रत्यालापीत्कलापीमं कलङ्कः शङ्कितः कुतः ।
प्रियापरिजनोक्तस्य त्वयैवाद्य मृषोद्यता ॥ ११६ ॥

प्रतीति ॥ कलापीमं नलं प्रति उद्दिश्यालापीदवोचत् । हे राजन्, त्वया प्रियाया भैम्याः परिजनस्य सेवकभूताया ममोक्तस्य वचनस्यैतावत्सु दिनेषु मध्येऽद्यैव मृषोऽद्यता मिथ्याभाषणतारूपः कलङ्को दोषः कुतः कस्माद्धेतोः शङ्कितः संभावितः, तत्कारणं कथयेति । सत्यवादिन्या भैम्याः परिचारिकाया ममालीकभाषित्वं संभावयितुमप्यशक्यमित्यर्थः । भैमी रात्रिवृत्तमपि सुरतमस्मदग्रेऽवृत्तमिति कथयति । परिजनश्च प्रभुसदृशो युक्तः । तथालीकभाषणं मम गुण इव नतु कलङ्क इत्यपि । 'परिजनस्योक्तौ' इति च पाठः ॥

स्ववचनस्य सत्यतां प्रतिपादयति—

सत्यं खलु तदाश्रौषं परं गुमुगुमारवम् ।
शृणोमीत्येव चावोचं नतु त्वद्वाचमित्यपि ॥ ११७ ॥

सत्यमिति ॥ अहं तदा श्रवणपिधानकाले खलु निश्चितमश्रौषमिति सत्यम्, परं केवलं गुमुगुमारवं नतु त्वद्वचनम् । तथाच—श्रवणमात्रं सत्यमेवेत्यर्थः । शपथकरणसमये धातोः सकर्मकत्वेपि कर्माविवक्षयाहं शृणोमीत्येव चावोचम्, नतु त्वद्वाचमिति विशेषणमप्यवोचम् । शपथोपि साधारणश्रवणमात्रविषयत्वात्सत्य एवेति न कथंचिदपि ममालीकभाषित्वं त्वया शङ्कनीयमित्यर्थः । अशृणवंतमामिति तत्रोक्तत्वादत्र शृणोमीति श्रवणमात्रोपलक्षणपरं नतु भूतवर्तमानपरमिति ज्ञातव्यम् ॥

'व्यर्थाः स्युर्मम देवताः' (२०।१०८) इत्यत्र देवताशब्दस्यान्यार्थत्वेन 'शपथो मया न कृत एव' इति समर्थयते—

आमन्त्र्य तेन देव त्वां तद्वैयर्थ्यं समर्थये ।
शपथः कर्कशोदर्कः सत्यं सत्योपि दैवतः ॥ ११८ ॥

आमन्त्र्येति ॥ हे राजन्, अहं तेन 'व्यर्थाः स्युः–' (२०।१०८) इत्यादिवाक्येन देवेति त्वामामन्त्र्य संबोध्य ताः श्रवणप्रतिपादका अशृणवंतमामित्यादयो मम गिरो व्यर्था अलीकाः स्युः, यथा त्वं मिथ्याभूता वेत्थ तादृश्य एव कामं स्युरिति अशृणवंतमामित्यादीनां त्वद्वचनप्रतिपादिकानामपि गिरां वैयर्थ्यमेव समर्थये सिद्धान्तत्वेन प्रतिपादयामि । अथ च—या गुमुगुमारवरूपा अश्रौषम्, याश्च त्वं मिथ्या वेत्थ तासां गिरामनुकरणशब्दत्वादर्थशून्यत्वान्निरर्थकत्वाद्वैयर्थ्यं समर्थये । पूर्वं कृतस्य शपथस्यान्यमर्थं कृत्वा कथमपलपसीत्यत आह—'सत्येनापि शपेद्यस्तु देवाग्निगुरुसंनिधौ । तस्य वैवस्वतो राजा धर्मस्यार्धं निकृन्तति ॥' इत्यादिमन्वादिवचनप्रामाण्याद्देवतासंबन्धी सत्योपि शपथः सत्यं निश्चितं यस्मात्कर्कशोदर्कः दारुणपरिणामः, किं पुनरसत्यः तस्मादिति ज्ञात्वा मया शपथो न कृत एव परं देवस्यैव शपथभ्रान्तिर्जातेत्यर्थः । अत एव त्वां देवेत्यामन्त्रितवती । दैवतः सत्योपि शपथः कर्कशोदर्क इति यन्मन्वादिभिरुक्तम्, तत्सत्यं यस्माच्छपथभ्रान्त्या संप्रत्येव त्वया मयि कलङ्क आरोपित इत्यर्थ इति वा ॥

इदानीम् 'आर्जवं हि कुटिलेषु न नीतिः' इति न्यायादलीकभाषणेऽप्यदोषत्वमाह—

असंभोगकथारम्भैर्वञ्चयेथे कथं नु माम् ।
हन्त सेयमनर्हन्ती[1] यन्न विप्रलभे युवाम् ॥ ११९ ॥

असंभोगेति ॥ हे भैमीनलौ, युवां 'भैमी मह्यं स्प्रष्टुमपि न ददाति, नलेनाहं कदाचिदपि न स्पृष्टापि' इत्यसंभोगकथारम्भैरन्योन्यसंभोगाभावविषयवृत्तान्तारम्भैर्मिथोनुभूतसुरतभरनिह्नवैः कृत्वा मां कथं नु कथमिव वञ्चयेथे प्रतारयथः । यत् तु पुनः अहं कर्मीभूतो युवां विप्रलभे प्रतारयामि सेयमनर्हन्ती अयोग्या अनुचितकारिणी हन्त कष्टं चित्रं वेति काकुः । भवद्भ्यामहं वञ्चनीया

१ 'एह्येहि' इति पाठे—संभ्रमे द्विरुक्तिः' इति सुखावबोधा ।
२ 'शिरःकम्पं चक्रतुरिति विस्मयभावोक्तिः' इति जीवातुः ।

१ 'अनार्हन्तीतिपाठे'—यत्पुनर्युवामहं विप्रलभे सेयमनार्हन्ती अयोग्यता । अर्थान्ममेत्यर्थः' इति सुखावबोधा ।

मया तु भवन्तौ न वञ्चनीयौ का वा रीतिरियम्, वञ्चनकरणसाम्यात्समदोषगुणौ, 'युवामहं' चेति भावः । अर्हन्तीति 'अर्हः प्रशंसायाम्' इति शतरि उगित्त्वान्ङीपि नुम् । युवां कर्तृत्वेन (कर्मत्वेन) चावृत्या योज्यम् ॥

कर्णे कर्णे ततः सख्यौ श्रुतमाचख्यतुर्मिथः ।
मुहुर्विस्मयमाने च स्मयमाने च ते बहु ॥ १२० ॥

कर्ण इति ॥ ततः स्ववञ्चकत्वदोषपरिहारानन्तरं भैमीसुरतप्रागल्भ्ये मुहुर्विस्मयमाने आश्चर्यं कुर्वाणे च बहु नितरां स्मयमाने हसन्त्यौ च ते कलाकलासखीलक्षणे सख्यौ मिथो भैम्या वा सहचर्यौ मिथोन्योन्यस्य कर्णे कर्णे स्वस्वश्रुतं स्वरहस्यमाचख्यतुः । चावन्योन्यसमुच्चये । अन्योन्यकर्णापेक्षया वीप्सायां द्विर्वचनम् ॥

अथाख्यायि कलासख्या कुप्य मे दमयन्ति मा ।
कर्णाद्द्वितीयतोऽप्यस्याः संगोप्यैव यदब्रवम् ॥ १२१ ॥

अथेति ॥ अथान्योन्यकर्णे तद्रहस्यकथनानन्तरं कलायाः सख्या कलयैव सख्या वा भैमी आख्यायि इति उक्ता । हे दमयन्ति, त्वं मे मह्यं मा कुप्य । अहं यदब्रवं तदस्याः द्वितीयतोऽपि कर्णात्संगोप्यैवाब्रवम् । अस्या एकेन कर्णेन श्रुतं नतु द्वितीयेनेति लौकिकादाभाणकात्परिहासोऽपि । 'एवम्' इति पाठे—एवंप्रकारेण संगोप्येति । कुप्य मे 'क्रुधद्रुह–' इति संप्रदानत्वम् । मा निरनुबन्धकः । अब्रवम्, लङ् ॥

प्रियः प्रियामथाचष्ट दृष्टं कपटपाटवम् ।
वयस्ययोरिदं तेऽस्मान्मा सखीष्वेव विश्वसीः ॥१२२॥

प्रिय इति ॥ अथ सख्युक्तयनन्तरं प्रियः प्रियामाचष्ट इत्यूचे । इति किम्—हे भैमि, त्वं वयस्ययोः कपटपाटवमिदं वचनचातुर्यं दृष्टमनुभूतं यतः, तस्मात्सखीष्वेव मा विश्वसीः, किं तु मयि कदाचिद्विश्वसिहि । सखीषु मैव विश्वसीः, किंतु मय्येवेति वा । यद्वा—मा विश्वसीरेव ॥

आलापि कलयापीयं पतिर्नालपति क्वचित् ।
रहस्येऽसौ रहस्यं तत्सभ्ये विस्रभ्यमीदृशि ॥ १२३ ॥

आलापीति ॥ कलयापीयं भैमी मधुरकाकूक्त्या आलापि इत्युक्ता । इति किम्—हे वयस्ये, असौ तव पतिः क्वचिदपि देशे जने वा स्वद्रहस्यं नालपति, किंतु गोपायत्येव । तत्तस्मादीदृशि एतत्सदृशेऽन्यस्मिन्नपि सभ्ये साधौ विस्रभ्यं विश्वसनीयं त्वया किं पुनरेतस्मिन्निति विरुद्धलक्षणया–अयं सर्वस्याग्रे स्वद्रहस्यं प्रकटयत्येव, असभ्यत्वायमित्यस्मिन्नेतत्तुल्येऽन्यस्मिन्नपि मैव विश्वसीरिति । नालपति, अपि त्वालपति । विस्रभ्यमपि तु नेति काकुर्वा । 'अलापि' इत्यपि क्वचित्पाठः ॥

इति व्युत्तिष्ठमानायां तस्यामूचे नलः प्रियाम् ।
भण भैमि बहिः कुर्वे दुर्विनीते गृहादमुम् ॥ १२४ ॥

इतीति ॥ नलः तस्यां कलायां इत्युक्तप्रकारेण प्रतिबन्ध्या व्युत्तिष्ठमानायां प्रतिरोधकारिण्यां सख्यां प्रियां प्रतीत्यूचे । इति किम्—हे भैमि, अहं दुर्विनीते दुष्टे नितरां विश्वासघातिन्यौ अमू सख्यौ गृहाद्बहिः कुर्वे निष्कासयामि भणाज्ञापय । एतेन नलस्य संभोगेच्छुता व्यज्यते । तदर्थमेव कुर्व इति लट् । 'व्युत्थानं प्रतिरोधे च विरोधाचरणेऽपि च' इत्यभिधानाद्पूर्वकर्मत्वाभावात् 'उदोऽनूर्ध्वकर्मणि' इति तङ् । व्युत्तिष्ठमानायां विरोधाचरणे हेतोयमायां वा ॥

शिरःकम्पानुमत्याथ सुदत्या प्रीणितः प्रियः ।
चुलुकं तुच्छमुत्सर्प्य सख्योः सलिलमक्षिपत् ॥१२५॥

शिर इति ॥ अथोक्तविषयप्रभानन्तरं सुदत्या भैम्या शिरःकम्पेन या सखीनिष्कासनस्यानुमतिरनुज्ञा तया कृत्वा प्रीणितो जनितानन्दः प्रियः सख्योर्विषये तुच्छं रिक्तं चुलुकमुत्सर्प्योद्गम्य वरुणवरेण प्राप्तं सलिलं तन्निष्कासनार्थमक्षिपत् । सख्योर्दुष्टत्वाच्छिरःकम्पेन भैम्या तद्बहिःकरणमङ्गीकृतम् । नलस्तु स्वाशयानुसारेण भैम्यपि संभोगेच्छयैतौ बहिः कर्तुमिच्छति मत्संभोगानुमतोऽस्या इति संतुष्टः, अत एव तन्निर्गमनार्थं जलं निक्षिप्तवानिति भावः । शिरःकम्प एवानुमतिर्यस्यास्तया सुदत्येति वा ॥

तच्चित्रदत्तचित्ताभ्यामुर्वः सिचयसेचनम् ।
ताभ्यामलम्भि दूरेपि नलेच्छापूरिभिर्जलैः ॥ १२६ ॥

तदिति ॥ तुच्छचुलुकमोचनमात्रेण जलसेचनात् तेन नलेन चित्रे आश्चर्ये दत्तं स्थापितं चित्तं ययोस्ताभ्यां सखीभ्यां तुच्छं चुलुकं नलेच्छामात्रेण पूरयन्ति सर्वमाप्लावयन्ति तच्छीलैः परिपूर्णतरैर्जलैः कृत्वा उर्वीनितरां सिचयस्य वस्त्रस्य सेचनमार्द्रीभावः अलम्भि प्राप्ति ॥

वेरेण वरुणस्यायं मुलभैरम्भसां भरैः ।
एतयोः स्तिमितीचक्रे हृदयं विस्मयैरपि ॥ १२७ ॥

वेरेणेति ॥ अयं नलः वरुणस्य वेरेण मुलभैरनायासलभ्यैरम्भसां भरैः पूरैः, तथाकस्मिकतद्दर्शनप्रभवैर्विस्मयैराश्चर्यैरपि कृत्वा एतयोः सख्योः क्रमेण हृदयमुरःस्थलमान्तरं च स्तिमितीचक्रे पूर्वमनार्द्रमप्यार्द्रं चक्रे, तथा—अनिश्चलमपि निश्चलीचक्रे । नीरपूरसेकेनातितरां साश्चर्यं जात इत्यर्थः । 'तिम ष्टिम आर्द्रीभावे' ॥

तेनापि नापसर्पन्त्यौ दमयन्तीमयं ततः ।
हर्षेणादर्शयत्पश्य नन्विमे तन्वि मे पुरः ॥ १२८ ॥
क्लिन्नीकृत्याम्भसा वस्त्रं जैनप्रव्रजितीकृते ।
सख्यौ सक्षौमभावेपि निर्विघ्नस्तनदर्शने ॥ १२९ ॥

तेनेति ॥ क्लिन्नीकृत्येति । युग्मम् । ततो जलसेकानन्तरमयं नलस्तेन तावता जलसेकेनापि गृहाद्बहिर्नापसर्पन्त्यौ निर्गच्छन्त्यौ ते सख्यौ कुचदर्शनाज्जातेन हर्षेण[1] दमयन्तीमदर्शयत् । ननु तन्वि, त्वं मे पुरः इमे सख्यौ पश्य । किंभूते सख्यौ—अम्भसा कर्तृभूतेन, करणभूतेन कर्तृभूतेन मया वा वस्त्रं क्लिन्नीकृत्याद्रीकृत्य जैनप्रव्रजितीकृते दिगम्बरपरिव्राजिकात्वं प्रापिते । यतः—सक्षौ-

१ हर्षेणेति पाठे—'कुचदर्शनोपस्थकृपाणिचेष्टाभिनयेन' इति कलिकातामुद्रितटीकायामधिकम् ॥

मभावे दुकूलसाहित्ये सत्यपि निर्विघ्नमन्तरायरहितं स्तनदर्शनं ययोस्ते । सूक्ष्मतरे वस्त्रे जलसिक्ते निरन्तरमङ्गदर्शनं भवति । नग्नप्राये एते सख्यौ ममाग्रे विलोकयेति तयोर्लज्जात्याजनद्वारा बहिर्निर्गमनार्थं कुचदर्शनोपलक्षकपाणिचेष्टाभिनयेनादर्शयदित्यर्थः । दृशेर्वुञ्प्रत्ययस्वाद्दमयन्तीमित्यणौ कर्तुर्णौ कर्मत्वम् । जैनानां दिगम्बराणां प्रव्रजिता प्रव्राजिका । अतादृश्यौ तादृश्यौ कृते इति च्विः॥

अम्बुनः शम्बरत्वेन मायैवाविरभूदियम् ।
यत्पटावृतमप्यङ्गमनयोः कथयत्यदः ॥ १३० ॥

अम्बुन इति ॥ अदो जलं कर्तृ अनयोः सख्योः पटावृतमप्यङ्गं स्तनजघनादि कर्म यत्कथयति प्रकटयति सेयं अम्बुनः 'नीरक्षीराम्बुशम्बरम्' इत्यभिधानाच्छंबरसंज्ञत्वेन, अथ च शम्बरास्यदैत्यभावेन मायैवाविरभूत् प्रकटा अजनि । शाम्बरी हि मायाऽविद्यमानमपि वस्तु प्रकाशयति अत्रापि निर्जले जलदर्शनादनग्ने नग्नीकरणाच्चेयं शाम्बरी मायैव प्रकटाभूदिति नलवचः । कविवचो वा । एवमुत्तरश्लोकेपि ज्ञेयम् ॥

अत्रैव पक्षान्तरमाह—

वाससो वाम्बरत्वेन दृश्यतेयमुपागमत् ।
चारुहारमणिश्रेणितारवीक्षणलक्षणा ॥ १३१ ॥

वाससः इति ॥ वाऽथवा स्तनाद्यङ्गानामियं दृश्यता प्रत्यक्षगोचरता वाससोऽम्बरत्वेनातिसूक्ष्मवस्त्रविशेषत्वेन, अथ चाम्बरशब्दवाच्यत्वसादृश्याद्वाकाशत्वेनोपागमत्समागता जाता । निरावरणमम्बरे स्थितं वस्तु यथा प्रकटं दृश्यते तथैव वस्त्रावृतमपि चेद्दृश्यते तर्हि तत्राम्बरत्वमेव हेतुरित्यर्थः । किंभूता—चारवः स्थूलतरनिर्मलमनोहरा हारमणयः मौक्तिकानि तेषां श्रेणयः पङ्क्तय एव तारा नक्षत्राणि तेषां वीक्षणमेव लक्षणं स्वरूपं चिह्नं वा यस्याः सा । अम्बरे हि नक्षत्रदर्शनं भवति । तदेव चास्य लक्षणं तद्वदत्रापि वस्त्रावृतत्वेऽपि जलसेकद्वारा मुक्ताफलानि स्फुटानि दृश्यन्ते । तस्मादम्बरत्वमेव हेतुर्युक्त इत्यर्थः । तारशब्दस्य नक्षत्रवाचित्वं बहुधा दर्शितम् ॥

ते निरीक्ष्य निजावस्थां ह्रीणे निर्ययतुस्ततः ।
तयोर्वीक्षारसात्सख्यः सर्वा निश्चक्रमुः क्रमात् ॥१३२॥

ते इति ॥ ते सख्यौ नितरां जलसेकाद्बोध्याङ्गदर्शनरूपां निजावस्थां निरीक्ष्य ह्रीणे लज्जिते सत्यौ ततस्तस्माद्वतिगृहान्निर्ययतुर्बहिर्निर्जग्मतुः । अन्या अपि सर्वाः सख्यस्तयोर्जलार्द्रीकृतवस्त्रयोः सख्योर्वीक्षारसाद्दर्शनकौतुकातिशयात्तयोः पश्चात्क्रमान्निश्चक्रमुः ॥

ता बहिर्भूय वैदर्भीमूचुर्नीतावधीतिनि ।
उपेक्ष्ये[1] ते पुनः सख्यौ मर्मज्ञे नाधुनाप्यमू ॥ १३३ ॥

ता इति ॥ ताः सख्यो बहिर्भूय गृहाद्बहिः स्थित्वा वैदर्भीमूचुः । हे नीतौ नीतिशास्त्रे अधीतिनि सुतरां कृताभ्यासे भैमि, ते त्वया मर्मज्ञे त्वद्रहस्यवेदिन्यावमू सख्यौ अधुनापि पूर्वं यत्कृतं तत्कृतमेव, इतः परमपि यावद्दूरं न गमिष्यतः, तावत्पुनर्नोपेक्ष्ये । 'विरोधयेन्न सर्वज्ञं नोपेक्षेत विरोधिनम् । प्रसादयेदशक्यं तु—' इत्याद्युशनःस्मरणान्मर्मज्ञयोरेतयोस्त्वया नीतिशास्त्रप्रवीणयोपेक्षा नैव कार्या किंत्वेते पुनः प्रसादनीये आकारणीये चेत्यर्थः । 'मर्मज्ञो ह्युपेक्षितो विकरोति' इति नीतिज्ञा एवम् । तस्मादेते आकारय प्रसादय चेत्यर्थः । नीतौ, 'कृत्येष्विषयस्य—' इति कर्मणि सप्तमी । ते, 'कृत्यानाम्—' इति षष्ठी ॥

उच्चैरूचेऽथ ता राजा सखीयमिदमाह वः ।
श्रुतं मर्म ममैताभ्यां दृष्टं तत्तु मयानयोः ॥ १३४ ॥

उच्चैरिति ॥ अथ राजा ताः सखीरुच्चैर्दूरादाकर्णनयोग्यं तारस्वरं वक्ष्यमाणप्रकारेणोचे हे सख्यः, वो युष्माकमियं सखी युष्मानिदं वक्ष्यमाणमाह । एताभ्यां मम मर्म रहस्यं श्रुतमित्येतावत्, मया तु पुनरनयोः सख्योस्तन्मर्म गुह्यमङ्गं दृष्टम् । 'श्रुताद्दृष्टं बलवत्' इति न्यायादेताभ्यामहमेव बलवतीति न कापि मे भीतिरिति वक्ष्यमाणभैमीवचनानुवादरूपेण नलोऽवोचदित्यर्थः । 'राज्ञा' इति पाठे—ताःप्रति राज्ञा ऊचे इत्यर्थः । व इत्यावृत्त्या षष्ठीद्वितीयान्तम् ॥

मद्विरोधितयोर्वाचि न श्रद्धातव्यमेतयोः[2] ।
अभ्यषिञ्चदिमे मायामिथ्यासिंहासने विधिः ॥१३५॥

मदिति ॥ हे सख्यः, बहिर्निष्कासनाद्यनुमतिद्वारा मया विरोधितयोः कृतवैरयोरेतयोः सख्योर्वाचि न श्रद्धातव्यं सत्यत्वबुद्धिर्न कार्या । विरोधिनो हि प्रायेणासत्यमेव वदन्तीत्यर्थः । किंच विधिर्ब्रह्मा इमे सख्यो मायानां कपटानां मिथ्या असत्यानां च सिंहासने कपटासत्यसर्वाधिपत्येऽभ्यषिञ्चत् । योऽनयोर्जलसेको दृश्यते स ब्रह्मकृतो मायामिथ्यासिंहासनाभिषेक एवेति भैमी मन्यत इत्यर्थः । तस्माद्भवतीभिरेतयोर्वचसि न विश्वसनीयमिति भावः । श्रद्धातव्यम्, अपितु न कथंचिदिति वार्थः ॥

शत्रुवचसि न विश्वसनीयमित्येतदेवार्थान्तरन्यासेन समर्थयते—

धौतेऽपि कीर्तिधाराभिश्चरिते चारुणि द्विषः ।
मृषामषीलवैर्लक्ष्म लेखितुं के न शिल्पिनः ॥१३६॥

धौतेऽपीति ॥ कीर्तिधाराभिः कीर्तिपूरैर्धौते अत एव चारुणि मनोज्ञे धवले एवंविधेऽपि द्विषश्चरिते मृषामषीलवैरसत्यलक्षणमषीलेशैः कृत्वा लक्ष्म कलङ्कं लेखितुं के जनाः शिल्पिनश्चतुरा न भवन्ति । अपितु सर्वेऽप्यलीकदोषारोपं कुर्वन्त्येवेति मद्विरोधितयोरेतयोर्वचसि न विश्वसनीयमित्यर्थः । अन्येपि शिल्पिनो जलधाराक्षालिते रमणीये कुड्यादौ मष्यादिवर्णकैश्चित्रं लिखन्ति । के द्विषः शिल्पिनो नेति वा ॥

ते सख्यावाचचक्षाते न किंचिद्ब्रूवहे बहु ।
वक्ष्यावस्तत्परं यस्मै सर्वा निर्वासिता वयम् ॥१३७॥

ते इति ॥ ततस्ते सख्यौ इति आचचक्षाते ऊचतुः । इति किम्—आवामन्यत्किंचिद्बहुधिकं न ब्रूवहे । किंतु यस्मै प्रयोज-

---

१ 'उपेक्षेते' इति पाठः सुखावबोधासंमतः ।

१ 'विराधितयोरिति पाठेऽपि स एवार्थः । विपूर्वो राधिर्विरोधार्थ' इति । २ 'अद्धास्यध्वमिति पाठस्त्वशुद्ध एव' इति च सुखावबोधा ।

नाथ सर्वा वयं युवाभ्यां गृहाद्बहिर्निष्कासितास्तदेव परं केवलमावां वक्ष्यावो वदिष्यावः सर्वेषामग्रे 'सुरतार्थं वयं निष्कासिताः' इति कथयिष्यावो न त्वन्यत्किंचिदिति ॥

स्थापत्यैर्न स वित्तस्ते वर्षीयस्त्वचलत्करैः ।
कृतामपि तथावाचि करकम्पेन वारणाम् ॥ १३८ ॥

स्थापत्यैरिति ॥ ते सख्यौ तथावाचि सुरतार्थं वयं निष्कासिता इति वचने विषये स्थापत्यैः सौविदल्लैर्नपुंसकैः करकम्पेन कृतामपि वारणां निषेधं न वित्तः स्म जानीतः स्म । यस्माद्वर्षीयस्त्वेनातिवार्धकेन चलन्तः करा येषां तैः । वार्धकातिशयजनितवातदोषवशेन स्वाभाविककरकम्पनभ्रान्त्या कृतमपि निषेधं न वित्तः स्मेत्यर्थः । 'सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते' इत्यमरः । अतिशयेन वृद्धो वर्षीयान् । ईयसुनि 'प्रियस्थिर—' इति वर्षादेशः ॥

अपयातमितो धृष्टे धिग्वामश्लीलशीलताम् ।
इत्युक्ते चोक्तवन्तश्च व्यतिद्राते स्म ते भिया ॥१३९॥

अपेति ॥ हे धृष्टे अतिनिर्लज्जे, सख्यौ युवामितो गृहादपयातं निर्गच्छतम् । यस्माद्वां युवयोरश्लीलशीलतां ग्राम्यभाषणस्वभावत्वं धिक् निन्द्यमिति तैः स्थापत्यैरुक्ते गदिते ते सख्यौ तेभ्यो मारणभिया व्यतिद्राते स्म पलायांचक्रतुः । एवमुक्तवन्तस्ते कञ्चुकिनश्च व्यतिद्राते स्म पलायांचक्रुः । तयोः पलायमानयोः पश्चाल्लगन्ति स्म । तयोः संभोगेच्छुतां ज्ञात्वा सखीतर्जनव्याजेन तेऽपि निर्गता इति भावः । ते इति, व्यतिद्राते इति च द्विवचनबहुवचनश्लेषः । इत्युक्ते सतीति वा । व्यतिद्राते वचनत्रयेपि तुल्यं रूपम् । द्रातेः परस्मैपदित्वादात्मनेपदं चिन्त्यम् । व्यतिद्रान्ति स्मेति पठनीयम् । इत्युक्ते ते ते उक्तवन्तश्च सर्वे व्यतिद्रान्ति स्मेत्यर्थः ॥

आह स्म तद्गिरा ह्रीणां प्रियां नतमुखीं नलः ।
ईदृग्भण्डसखी कापि निस्त्रपा न मनागपि ॥ १४० ॥

आहेति ॥ नलः सुरतार्थं सर्वे वयं निर्वासिता इति सख्योर्गिरा ह्रीणां लज्जिताम्, अत एव—नतमुखीं प्रियामित्याह स्म । इति किम्—ईदृश्योऽश्लीलभाषणशीला भण्डा निर्लज्जाः सख्यो यस्यास्तादृशी कापि(श्यपि का) मनागपि निस्त्रपा निर्लज्जा न, अपितु सखीयुक्ता त्वमेव । 'समानशीलव्यसनेषु सख्यम्' इति न्यायादनुरूपयोर्हि सख्यं युक्तमिति त्वमपि लज्जां मुञ्चेति सकामस्य नलस्य वचः । भण्डसखीकापि ईदृक् कलासदृशी न । त्वं तु मनागपि निस्त्रपा नासीति वा भण्डस्य निर्लज्जत्वं भवत्येव । सखीका नद्यन्तत्वात्कप् । मनागसीति पाठः तदावृत्याऽपिशब्दो योज्यः ॥

अहो नापत्रपाकं ते जातरूपमिदं मुखम् ।
नातितापार्जनेपि स्यादितो दुर्वर्णनिर्गमः ॥ १४१ ॥

१ ''द्रा कुत्सायां गतौ' इति धातोर्लटि 'कर्तरि' कर्मव्यतिहारे इत्यात्मनेपदम्' इति जीवातुः । 'न गतिर्हिंसार्थेभ्यः' इत्यात्मनेपदनिषेधाच्चिन्त्यमेव । 'बहिर्भावमात्रविवक्षायां गत्यर्थत्वाभावादात्मनेपदमिति यथाकथंचित्समर्थनीयम् । प्रकारान्तरं वा गवेषणीयम्' इति सुखावबोधा ।

अहो इति ॥ अहो भैमि, ते इदं मुखं जातं रूपं सौन्दर्यं वर्त्तते यदपत्रपाकं गतलज्जं न भवति किंतु सलज्जमेव । स्त्रीणां तु लज्जैव महद्भूषणमित्यर्थः । नापत्रपाकमिति नसमासेनैकपदं वा । अथ च—पत्राणां नागवल्लीदलानां पाकः फलभूतः पूगादियोगसंजातो रागः स नास्ति यस्य तदपत्रपाकं तादृशं न भवति ताम्बूलरागसहितमिति यावत् । अत एव—नितरां जातलावण्यम् । अथ च—सुन्दरमपि नापत्रपाकं सलज्जम् । अहो चित्रम् । असुन्दरं हि सलज्जं भवति स्वं न दर्शयति, इदं तु सुन्दरमपि स्वं न दर्शयतीत्याश्चर्यम् । अथ च—त्रपैवाकं दुःखम्, अपगतं त्रपाकं यस्मात्तदपत्रपाकं तादृग् न भवति लज्जारूपदुःखसहितम् । अत एव न जातं रूपं यस्य । सुरतार्थं सर्वनिर्वासने ताभ्यामुक्ते लज्जातिशयान्मुखं नितरां मलिनं जातं चित्रमेतदित्यर्थः । अथ च—पत्रयोर्मृत्पुटयोर्मध्ये यः पाकः स नास्ति यस्य तादृशमपि न भवति यत्तदापत्रपाकम् । कृतपुटपाकमिति यावत् । एवंभूतं सुवर्णमेव तव मुखमहो चित्रम् । मुखस्य सुवर्णत्वमाश्चर्यकारीत्यर्थः । यतः सलज्जम्, अत एवातितरां तापस्य क्रोधाग्नेरर्जने संपादने सत्यपि समक्षमश्लीलभाषणादिना सखीभिः कोपे समुत्पादिते सत्यपीतो मुखात्सकाशाद्दुर्वर्णानां परुषाक्षराणां निर्गमो न स्यात् । कोपे सत्यपि लज्जाबाहुल्यात्सखीः प्रत्यक्षरमपि परुषं न भाषसे एतदपि चित्रमित्यर्थः । अथ च—कृतपुटपाकसुवर्णसुरूपं यतोऽत एव पुटरहितम् । नितरामग्निदाहे सत्यप्यस्मात्सुवर्णाद्दुर्वर्णस्य रजतस्य निर्गमो न स्यात् । पुटपाकादेव मिश्रितरजतनिर्गमे सति निर्दुष्टस्य शुद्धतरस्य सुवर्णस्य पश्चात्सुतरामग्निदाहे कृतेऽपि दुष्टाशयस्य पूर्वमेव गतत्वात्तस्माद्रजतनिर्गमो न भवत्येव । तथातितापार्जनेऽपि ते मुखाद्दुर्वर्णनिर्गमो नास्त्येवेत्याश्चर्यमित्यर्थः । अयुक्तमपोऽशवर्णकसुवर्णवर्णापरूपभाषिणी चासीति भावः । अपत्रपाकम्, पक्षे 'न कपि' इति ह्रस्वनिषेधः ॥

तामथैष हृदि न्यस्य ददौ तल्पतले तनुम् ।
निमिष्य च तदीयाङ्गसौकुमार्यमसिस्वदत् ॥ १४२ ॥

तामिति ॥ अथैष नलः तां हृदि न्यस्य तल्पतले शय्यायां तनुं शरीरं ददौ । पृष्ठेन शय्यां पस्पर्शेत्यर्थः । तदालिङ्गनसुखवशादेव निमिष्य नेत्रे निमील्य तदीयाङ्गसौकुमार्यमसिस्वददनुभूव च ॥

न्यस्य तस्याः कुचद्वन्द्वे मध्येनीवि निवेश्य च ।
स पाणेः सफलं चक्रे तत्करग्रहणश्रमम् ॥ १४३ ॥

न्यस्येति ॥ स तस्याः कुचद्वन्द्वे स्वकरं न्यस्य निक्षिप्य, तथा नीवीनां मध्ये च नाभिमूले निवेश्य स्थापयित्वा पाणेः स्वकरस्य तस्याः करग्रहणे (पाणि) विवाहने विषये जातं श्रमं सफलं चक्रे । स्तनजघनादिस्पर्शसुखानुभवादित्यर्थः । एतदेव विवाहफलम् । यत्स्तनादिस्पर्शसुखानुभवनम् । अथ च—तत्प्रसिद्धं करस्य राजोपदायाः ग्रहणं तज्जनितं स्वपाणेः श्रमं सफलं चक्रे । स्तनादिमर्दनं राजदण्ड इत्यर्थः । अथ च—स्वपाणेर्वैरस्याः करेण बलाद्ग्रहणं निरोधनं तज्जनितं श्रमं सफलं चक्रे । कुचनीविस्पर्शमात्रेण निवृत्तो, न स्वाङ्गान्तरे करं निवेशितवान् न च संबुभुजे । एतच्चोत्तरत्र संभोगनिषेधाल्लभ्यते ॥

स्थापितामुपरि स्वस्य तां हृदा स मुदा वहन् ।
तदुद्वहनकर्तृत्वमाचष्ट स्पष्टमात्मनः ॥ १४४ ॥

स्थापितामिति ॥ स मुदा कामाभिलाषेण स्वस्योपरि स्थापितां वक्षसि निवेशितां तां वहन् सुखातिशयाज्जहर्ष स्पष्टमुत्प्रेक्षे । आत्मनस्तस्या भैम्या उद्वहनं विवाहं प्रति, अथ च—ऊर्ध्वधारणं प्रति कर्तृत्वमाचष्टे चेति शब्दच्छलेनोत्प्रेक्षा ॥

स्विद्यत्कराङ्गुलीलुप्तकस्तूरीलेपमुद्रया ।
पूत्कार्यपीडनौ चक्रे स सखीषु प्रियास्तनौ ॥ १४५ ॥

स्विद्यदिति ॥ स प्रियास्तनौ स्विद्यन्तीभिः संजातसात्त्विकस्वेदाभिः कराङ्गुलीभिर्लुप्तया कस्तूरीलेपसंबन्धिन्या मुद्रया पत्रवल्लीरचनाविशेषेण कृत्वा सखीषु विषये पूत्कार्यं महाकलकलकथनीयं पीडनं मर्दनं ययोर्याभ्यां वा तथा चक्रे । भैमीकुचयुगले स्वरचितां कस्तूरीपत्रवल्लीरचनां प्रोञ्छितां दृष्ट्वा प्रियेण गाढमेतौ पीडिताविति अन्योन्यमुच्चैः कलकलं सख्यो यथा कुर्वन्ति वृत्तं कुचमर्दनं स्वयमेव जानन्ति तथा तत्कुचौ ममर्देति भावः । लोकेपि स्वकृतां मुद्रां लुप्तां दृष्ट्वान्यथाभावशङ्कयोच्चैः पूत्कारं कुर्वन्तीति ॥

तत्कुचे नखमारोप्य चमत्कुर्वंस्तयेक्षितः ।
सोवादीत्तां हृदिस्थं ते किं मामभिनदेप न ॥१४६॥

तदिति ॥ तस्याः कुचे नखमारोप्य निखाय स्वयमेव चमत्कुर्वन्नङ्गसंकोचाभिनयपूर्वं शङ्कमानः नखक्षतपीडाविशेषादेव तया किंचित्कोपेनेक्षितः स तामवादीत्—हे भैमि, एप नखस्ते हृदिस्थं मां किं नाभिनद्, अपितु—मामपि व्यदारयदेव अन्यथा कथं त्वदीये हृदि नखे क्षिप्ते ममाङ्गचमत्कार इति ॥

अहो अनौचितीयं ते हृदि शुद्धेऽप्यशुद्धवत् ।
अङ्कः खलैरिवाकल्पि नखैस्तीक्ष्णमुखैर्मम ॥ १४७ ॥

अहो इति ॥ हे भैमि, तीक्ष्णमुखैर्नापितकल्पितशिताग्रैर्मम नखैः शुद्धे निष्कपटे हृदि अशुद्धं रुधिरं वर्तते (कल्पते) यत्र तथा तथाऽङ्को मयूरपदादिचिह्नमकल्पि अकारीति यत्, सेयं महती अनौचिती अहो चित्रम्। कैरिव—दोषारोपरूपपरुषभाषणवशात्तीक्ष्णमुखैर्दुःसहवदनैः खलैरिव। यथा—खलैः शुद्धेऽपि पुरुषे अशुद्धवत्सदोषपुरुष इवाङ्को दोषारोपः कल्प्यते, सा यथानौचिती । नखक्षतेन रुष्टायाःस्वेनैव नखानामनौचित्यप्रकटनव्याजेन प्रसादनामकरोदित्यर्थः । अशुद्धवदिति पक्षे सप्तमीसमर्थाद्वतिः ॥

यच्चम्बति नितम्बोरु यदालिङ्गति च स्तनौ ।
भुङ्क्ते गुणमयं तत्ते वासः शुभदशोचितम् ॥ १४८ ॥

यदिति ॥ हे भैमि, गुणमयं सूक्ष्मश्लक्ष्णतरतन्तुकं ते वासः नितम्बोरु जघनमूरू च यद्यस्माच्चुम्बति स्पृशति, तथा यस्माच्च ते स्तनौ आलिङ्गति तत्तस्मात्कारणाच्छुभानां रमणीयानां दशानां प्रान्ततस्तूनां यद्योग्यमुचितं तद्भुङ्क्ते तादृशं भोगमनुभवतीत्यर्थः । यत्तदौ वासोविशेषणे वा । अथ च—यो गुणमयः शौर्यौदार्यादिगुणपूर्णः निर्दोषश्च शुभाया दशायाः पूर्वाचरितपुण्यपाकोपनतशुभग्रहयोगानुकूलसमयविशेषस्योचितं भोगं लभते स एव सुन्दररमणीनितम्बोरुचुम्बनं तत्कुचालिङ्गनं च लभते नान्य इति । त्वन्नितम्बादिचुम्बनकारिणो मस्तोपि वसनमेव धन्यमिति । नितम्बोरु, प्राण्यङ्गत्वादेकवद्भावः ॥

लीनचीनांशुकं स्वेदि दरालोक्यं विलोकयन् ।
तन्नितम्बं स निश्वस्य निनिन्द दिनदीर्घताम् ॥१४९॥

लीनेति ॥ सात्त्विकस्वेदवशादतिसूक्ष्मत्वात्समच्छवीभूय लीनं संलग्नं चीनं नेत्राख्यमंशुकं यत्र, तथा—स्वेदि सात्त्विकस्वेदयुक्तम्, अतएव—दरालोक्यमीषद्दृश्यं तस्या नितम्बं विलोकयन् स कामोन्मत्तो भूत्वा निश्वस्य दिने सुरतनिषेधाश्चिराशतया निश्वासमोचनेन दुःखमभिव्यज्य दिनस्य दीर्घतां कथं वा दिनं शीघ्रं गमिष्यतीति निनिन्द । सुरतार्थं दिनावसानमभिललाषेत्यर्थः । कामपरवशत्वात्संभोगेच्छुरभूत्, दिवा तन्निषेधाच्च सुरते सहसा न प्रवृत्त इति भावः ॥

देशमेव ददंशासौ प्रियादन्तच्छदान्तिकम् ।
चकाराधरपानस्य तत्रैवालीकचापलम् ॥ १५० ॥

देशमिति ॥ असौ प्रियाया दन्तच्छदोऽधरस्तस्यान्तिकं समीपवर्तिनं देशं कपोलचिबुकादिभागमेव पूर्वं दशनैर्ददंश । अनन्तरं तत्रैवाधरसमीपदेश एव अधरोपान्तस्थापितमुख एवाधरपानस्यालीकमेव चापलं (पुनः) पुनरोष्ठचालनचुंकारादिस्वरां चकार । चापलस्यालीकत्वं च तादृगभिनयमात्रकरणात्तात्त्विकचापलकरणेऽप्यधरसंबन्धाभावाज्ज्ञेयम्। संबुभुक्षातिशयाद्यावता क्षणेनाधरश्चुम्बितुं प्राप्यते तावन्तमपि विलम्बं सोढुमशक्तः सन्नयमधर एवेति भ्रान्त्या वाऽधरोपान्तदेश एव दंशादि चकारेति भावः । अतिरिरंसोरियं जातिः ॥

न क्षमे चपलापाङ्गि सोढुं स्मरशरव्यथाम् ।
तत्प्रसीद प्रसीदेति स तां प्रीतामकोपयत् ॥१५१॥

नेति ॥ स परिहासादिवशादालिङ्गनादिवशाच्च पूर्वं प्रीतां प्रसन्नामपि तामित्युक्त्वाऽकोपयत् । इति किम्—हे चपलापाङ्गि, अहं स्मरशरव्यथां सोढुं न क्षमे शक्तोऽस्मि यतः, तत्तस्मात्त्वं मम प्रसीद प्रसीद मह्यं सुरतं देहि देहि । दिने रन्तुमनुचितत्वात्कोपव्याजेनापि दिनं गमयितुं तामकोपयदित्यर्थः। प्रसादनमपि कोपं विना न संभवतीति कोपसंपादनम् । शरव्यतामिति च पाठः । चपलापाङ्गि 'अङ्गगात्र–' इति ङीप् ॥

नेत्रे निषधनाथस्य प्रियाया वदनाम्बुजम् ।
ततः स्तनतटौ ताभ्यां जघनं घनमीयतुः ॥ १५२ ॥

नेत्रे इति ॥ निषधनाथस्य नेत्रे पूर्वं प्रियाया वदनाम्बुजम्, ततोऽनन्तरं स्तनतटौ, ततोऽनन्तरं च ताभ्यां स्तनतटाभ्यां सका-

---

१ इदं च व्याख्यानं 'आत्मवित्सह तया दिवानिशं भोगभागपि न पापमाप सः । आहता हि विषयैकतानता ज्ञानधौतमनसं न लिम्पति' (१८ सर्गे २) इति प्रागुक्तविरोधाच्चिन्त्यम् । तस्मादस्य ग्रीष्मर्तुपरतया व्याख्यानं कल्पयित्वा यथाकथंचिद्योजना कार्या ।

शात् घनं पीवरं जघनमीयतुः प्रापतुः । सुरतौत्सुक्यात्सादरं वदनादिक्रमेणालोकयदिति भावः । अम्बुजतटघनपदैः सादरावलोकनार्हत्वं सूचितम् । घनपदं सादरावलोकनद्योतनार्थं क्रियाविशेषणत्वेन सर्वत्र वा योज्यम् ॥

इत्यधीरतया तस्य हठवृत्तिविशङ्किनी ।
झटित्युत्थाय सोत्कण्ठमसावन्वसरत्सखीः ॥१५३॥

इतीति ॥ इत्येवं वदनादिविलोकनपूर्वं जघने चिरकालं सादरदृष्टिस्थापनद्वाराऽधीरतया रतोत्सुकतया हठवृत्तौ बलात्सुरतारम्भे विशङ्किनी विशेषतः शङ्कमाना संभावयन्ती असौ झटिति मञ्चादुत्थाय चिरनिर्गतसखीगवेषणाय सोत्कण्ठं यथातथा कलाद्याः सखीरन्वसरत् । सख्यनुसरणोत्कण्ठाव्याजेन प्रियसुरतारम्भं पर्यहार्षीदिति भावः । अतितरां रसपरवशता दोषाय, रसत्यागश्च नायकस्य नीरसतामेवापादयतीति तदुभयपरिजिहीर्षया रसान्तरद्वारेण संभोगशृङ्गारं परां काष्ठां प्रापयितुं श्रीहर्षेण भैमीनलयोर्भिन्नदेशावस्थायित्वकथनोपक्रमः कृतः ॥

न्यवारीव यथाशक्ति स्पन्दं मन्दं वितन्वता ।
भैमीकुचनितम्बेन नलसंभोगलोभिना ॥ १५४ ॥

न्यवारीति ॥ नलसंभोगलोभिना भैमीकुचनितम्बेन मन्दं शनैः स्पन्दं गमनं वितन्वता स्वीयपीवरतातिशयेन शीघ्रं गन्तुमददता सता भैमि, शक्तिमनतिक्रम्य शीघ्रगमनप्रतिबन्धकस्वरूपनिजशक्त्यनुसारेणेतो रतिगृहाद्बहिस्त्वया न निर्गन्तव्यमिति न्यवारीव न्यषेधीव । निर्गतापि स्तननितम्बभराक्रान्तत्वाच्छीघ्रं गन्तुं न शशाकेति भावः । कुचनितम्बेन, प्राण्यङ्गत्वादेकवद्भावः । लोभिना, अत इनिः ॥

अपि श्रोणिभरस्वैरां धर्तुं तामशकन्न सः ।
तदङ्गसङ्गजस्तम्भो गजस्तम्भोरुदोरपि ॥ १५५ ॥

अपीति ॥ स श्रोणिभरेण नितम्बभाराक्रान्तत्वेन स्वैरां मन्दगामिनीमपि समीपे गच्छन्तीमपि तां स्वयं गजबन्धनस्तम्भवदूरू दीर्घौ पीवरौ च दोर्वौ बाहू यस्यैवंभूतोपि सङ्गकपाल्या धर्तुं नाशकत् । यतः—तस्या अङ्गसङ्गाज्जघनाद्यङ्गस्पर्शाज्जातो निष्क्रियत्वरूपसात्त्विकभावः स्तम्भो यस्य सः । सात्त्विकस्तम्भवशात्तां धर्तुं नाशकदित्यर्थः । भरास्वैरामिति पाठे—श्रोणिभरनिमित्तमस्वैरा स्वाधीना न भवति तदधीनैव तादृशीमित्यर्थः ॥

आलिङ्ग्यालिङ्ग्य तन्वङ्गि मामित्यर्धगिरं प्रियम् ।
स्मित्वा निवृत्य पश्यन्ती द्वारपारमगादसौ ॥१५६॥

आलिङ्ग्येति ॥ असौ भैमी इति पूर्वोक्तप्रकारेणार्धगिरं वाक्यशेषं वक्तुमसमर्थं प्रियं नलं स्मित्वाऽधीरतरत्वेन हसित्वा निवृत्य परावृत्य वलितग्रीवं पश्यन्ती सती द्वारस्य पारं देहलीबहिःप्रदेशमगात् । इति किम्—हे तन्वङ्गि, प्रियं मामालिङ्ग्यालिङ्ग्या-(ङ्ग्येत्यर्धांऽ)परिपूर्णा वाणी यस्य तमित्यर्थः । कामोन्मादबाहुल्येन गद्गदभिन्नस्वरतया आलिङ्ग्यालिङ्ग्य मां मुञ्च पश्चाद्गच्छेति वाक्यशेषः । स्मितादयः संभोगशृङ्गाररसाङ्गीभूततयाऽलंकाराः ॥

प्रियस्याप्रियमारभ्य तमन्तर्दूनयाऽनया ।
शेके शालीनयालिभ्यो न गन्तुं न निवर्तितुम् ॥१५७॥

प्रियस्येति ॥ प्रियस्य तत्संभोगप्रातिकूल्यलक्षणमप्रियमारभ्य कृत्वा तदृशादेवान्तर्हृदये दूनयोपतप्तया । प्राप्तपश्चात्तापेति यावत् । द्वारबहिर्देशं प्राप्तयाऽप्यनया प्रियस्यानभीप्सिताचरणानन्तरं तस्य प्रसादमकृत्वैव सखीः प्रति गन्तुमयुक्तमिति विचार्यालीभ्यः सखीः प्रति गन्तुं न शेके न समर्थीभूतम् । तत्रैव तस्थावित्यर्थः । सखीभ्यः सकाशान्निवर्तितुं मनं प्रति परावर्तितुमपि न शेके । यतः—शालीनयाऽदृष्टयाऽतिसलज्जया अस्मदुद्देशेनागतापि सुरतार्थं प्रियं प्रति पुनर्गतेति सख्यो वदिष्यन्ति, तथा च लज्जा स्यादिति प्रिया पुनर्न निवृत्तेत्यर्थः । नलविषयैव वा लज्जा क्षणमात्रं मार्गमध्ये चिन्तावशात्लूना स्थितेति भावः । आलीभ्यः 'गत्यर्थकर्मणि-' इति चतुर्थी, निवृत्तिं प्रत्यपादानत्वात्पञ्चमी च ॥

अचकथदथ बन्दिसुन्दरी द्वाः-
सविधमुपेत्य नलाय मध्यमह्नः ।
जय नृप दिनयौवनोष्मतप्ता-
प्लवनजलानि पिपासति क्षितिस्ते ॥१५८॥

अचकथदिति ॥ अथ परिहासपूर्वं भैमीबहिर्निर्गमनानन्तरं पुरुषस्यान्तःप्रवेष्टुमशक्यत्वादवसरज्ञापकवचनस्यावश्यंश्रावणीयत्वाद्बन्दिसुन्दरी विदग्धमागधवनिता द्वाःसविधं द्वारदेशसमीपमुपेत्य इति अह्नो मध्यं मध्याह्नमचकथत् । व्यज्ञापयदित्यर्थः । इति किम्—हे नृप, जय सर्वोत्कर्षेण वर्तस्व । दिनस्य यौवनं मध्याह्नसंबन्धिनोष्मणा तप्ता आतपसंतापेन कृत्वा संतापवती क्षितिस्ते आप्लवनजलानि माध्याह्निकस्नानजलानि पिपासति पातुमिच्छति । अचकथत्, व्यज्ञापयद्वा । अकथयदिति पाठे—लङ् । नलाय 'क्रियया यमभिप्रैति-' इति संप्रदानत्वम् ॥

उपहृतमधिगङ्गमम्बु कम्बु-
च्छवि तव वाञ्छति केशभङ्गिसङ्गात् ।
अनुभवितुमनन्तरं तरङ्गा-
समशमनस्वसृमिश्रभावशोभाम् ॥ १५९ ॥

उपेति ॥ अधिगङ्गं गङ्गामधिकृत्य वर्तमानमुपहृतं भागीरथ्याः सकाशादानीतं कम्बुच्छवि शङ्खधवलमम्बु तव कृष्णतरकुटिलकेशपाशस्य भङ्गिभिः कुटिलभावैः सह सङ्गात्संबन्धादनन्तरं संबन्धे जाते तरङ्गैः कृत्वाऽसमा अतुल्यरूपा विषमा वाऽतिकृष्णा शमनस्वसा यमभगिनी यमुना तया सह मिश्रभावेन मिलितत्वेन संगमे या शोभा तां गङ्गायमुनासंभूतप्रयागकमनीयकमनुभवितुं प्राप्तुं वाञ्छति । शुभ्रतरजलस्य कृष्णतरकेशपाशसङ्गे सति प्रयागजलशोभा भविष्यतीति गङ्गाजलेच्छां पूरय माध्याह्निकस्नानं कुर्विति भावः । अधिगङ्गम्, विभक्त्यर्थेऽव्ययीभावः ॥

तपति जगत एव मूर्ध्नि भूत्वा
रविरधुना त्वमिवाद्भुतप्रतापः ।

१ 'निदर्शनालंकारः' इति जीवातुः ।

पुरमथनमुपास्य पश्य पुण्यै-
रधरितमेनमनन्तरं त्वदीयैः ॥ १६० ॥

तपतीति ॥ हे राजन्, अद्भुतोऽसह्यः प्रकृष्टस्तापः करौष्ण्यं यस्य स रविरधुना मध्याह्नसमये जगत एव विश्वस्यापि मूर्ध्नि भूत्वा तपति । क इव—त्वमिव । यथाऽद्भुतः प्रतापः क्षात्रं तेजो यस्य स त्वं विश्वस्य मूर्ध्नि चरणमारोप्य तपसि राजलक्ष्म्या दीप्यसे तथेत्यर्थः । मध्याह्नसमयो निश्चितो वर्तत इत्यर्थः । अत एव पुरमथनं हरमुपास्याराध्योपार्जितैरिति शेषः । एवंभूतैस्त्वदीयैः पुण्यैर्देवपूजानन्तरं त्वमेनं सूर्यमधरितं मस्तकोपरिभागाद्व्यावितं तिर्यग्गगनभागे वर्तमानमेनं सूर्यं पश्य । देवपूजानन्तरं हि सूर्यो नमस्क्रियत इत्याचारात्त्वमप्यत्रापराह्णे सूर्यं नमस्कुर्विति भावः । अधुना तु त्वत्सदृशः, हरपूजाजनितपुण्यैस्त्वया जितोऽधोगतो भविष्यतीत्यर्थः ॥

आनन्दं हठमाहरन्निव हरध्यानार्चनादीक्षण-
स्यासत्तावपि भूपतिः प्रियतमाविच्छेदखेदालसः ।
पक्षद्वारदिशं प्रति प्रतिमुहुर्द्राङ्निर्गतप्रेयसी-
प्रत्यासत्तिधिया दिशन्दृशमसौ निर्गन्तुमुत्तस्थिवान् ॥

आनन्दमिति ॥ असौ भूपतिः स्नानार्थं बहिर्निर्गन्तुं शय्यायाः सकाशादुत्तस्थिवान् । किंभूतः—द्राक् झटिति बहिर्निर्गताया: प्रेयस्या भैम्याः प्रत्यासत्तिधिया परावृत्यागमनस्य बुद्ध्या पुनरप्यागमिष्यति किमिति संभावनया तद्विलोकनार्थं पक्षद्वारदिशं पार्श्वद्वारप्रदेशं प्रति लक्षीकृत्य प्रतिमुहुर्मुहुर्मुहुर्दृशं दिशन् ददानः । तथा—प्रियतमाया विच्छेदो वियोगस्तज्जन्येन खेदेन दुःखेनालसोऽपि । तथा—हरध्यानार्चनादेः क्षणस्य मध्याह्नस्यासत्तावतिनैकट्ये सत्यामपि हठं यथा स्यादेवं बलात्कारेण गतमप्यानन्दमाहरन्निव परावर्तयन्निव । अर्चनादिरेव क्षण उत्सवस्तदासत्तावपीति वा । विरहखेदायासे सत्यपि नित्याह्निककाललोपभिया शिवभक्त्या च सानन्दं बलाद्बहिर्निर्गत इत्यर्थः । श्लोकचतुष्टयेनोत्तरसर्गसंगतिः सूचितेति ज्ञेयम् । प्रतिमुहुर्, मुहुरित्यर्थे प्रतेर्मुहुःशब्देन 'सह सुपा' इति समासः । मुहुर्मुहुरित्यर्थः ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
अन्याक्षुण्णरसप्रमेयभणितौ विंशस्तदीये महा-
काव्येऽयं व्यगलन्मलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥

श्रीहर्षमिति ॥ अन्यैः श्रीहर्षव्यतिरिक्तैः कविभिरक्षुण्णा रसस्य शृङ्गारादेः प्रमेयस्य समासोक्त्युत्प्रेक्षादेश्च भणितिर्गुम्फना यत्र तादृशेऽपूर्वरसादिमति महाकाव्ये विंशः सर्गो विंशतेः पूरणः व्यगलत्समाप्तिमितः । भणितौ, भाषितपुंस्कम् । पूरणे डटि 'ति विंशतेः-' इति तिलोपः ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे विंशः सर्गः ॥

---

१ अन्याक्षुण्णेति पूर्वपदं भाषितपुंस्कमतः पुंवदित्यर्थः । यथाश्रुतन्यासस्तु चिन्त्यः ।

एकविंशः सर्गः ।

इदानीं पूर्वसर्गान्तप्रस्तावितमध्याह्नस्नानदेवपूजादिवर्णनार्थमेकविंशं सर्गमारभते—

तं विदर्भरमणीमणिसौधा-
दुज्जिहानमनुदर्शितसेवैः ।
अर्पणाभिजकरस्य नरेन्द्रै-
रात्मनः करदता पुनरूचे ॥ १ ॥

तमिति ॥ विदर्भरमण्या भैम्या मणिसौधान्मणिबद्धसुधाधवलितप्रासादादुज्जिहानं बहिर्निर्गच्छन्तं नलमनु लक्षीकृत्य दर्शिता अन्तःपुरद्वारि प्रणामादिना ज्ञापिता सेवा यैरवसरपर्यन्तं बहिःस्थितैरन्तरङ्गैर्नरेन्द्रनलहस्तावलम्बनार्थं निजकरस्यापणाद्धेतोरात्मनः स्वस्य करदता पुनरूचे पुनरुक्ता चक्रे इत्यर्थः । पूर्वं सर्वेपि राजानो बलिरूपकरसमर्पणात्करदा अभूवन्, इदानीं तु सोपानमार्गेणावरोहतो नलस्य हस्तावलम्बनार्थं निजपाणिसमर्पणात्करदा जाता इति च्छलेनोत्प्रेक्षा । एतेन नलस्य चक्रवर्तित्वं द्योत्यते ॥

तस्य चीनसिचयैरपि बद्धा
पद्धतिः पदयुगात्कठिनेति ।
तां व्यधत्त शिरसां खलु मालयै
राजराजिरभितः प्रणमन्ती ॥ २ ॥

तस्येति ॥ खल्वितीव हेतोरभितः पार्श्वद्वयेऽपि प्रणमन्ती राजराजिर्नृपपरम्परा तां सिचयैर्बद्धामपि पद्धतिं शिरसां माल्यैः शिरसि धृताभिः पुष्पमालाभिः व्यधत्त आच्छादयति स्म । इति किम्—चीनसिचयैर्देशविशेषोद्भवैः सूक्ष्ममृदुभिर्वस्त्रैर्बद्धा सज्जिता छादितापि सती पद्धतिस्तस्य नलस्य पदयुगात्सकाशात्कठिनेति । मृदुतरयोर्हि चरणयोर्मृदुतरपुष्पबद्धायां भुवि गमनं युक्तम् । शिरोधृतपुष्पस्रंसनं यावन्न भवति तावत्पर्यन्तं मध्येमार्गं तस्य सादरं दण्डवत्प्रणामं सर्वेपि चक्रुरित्यर्थः ॥

द्रागुपाहृियत तस्य नृपैस्त-
दृष्टिदानबहुमानकृतार्थैः ।
स्वस्य दिश्यमथ रत्नमपूर्वं
यत्नकल्पितगुणाधिकचित्रम् ॥ ३ ॥

द्रागिति ॥ अथ प्रणामानन्तरं तेन कृतं दृष्टिदानं नेत्रनिरीक्षणं तल्लक्षणेन बहुमानेन कृतार्थैः सफलश्रमैर्नृपैर्दिक्षि भवं दिश्यं स्वस्य दिश्यं स्वीयदेशभवं तत्रान्यत्र वा पूर्वं दुर्लभमत्युत्तमम्, तथा—यत्नेन बुद्धिपूर्वं शिक्षावशेन कल्पितैरारोपितैर्गुणैस्त्वोज्ज्वलत्वातिरमणीयगत्या(करत्वा)दिगुणविशेषैरधिकं नितरां चित्रमाश्चर्यरूपं सहजैराहितैश्च गुणैरतितरामाश्चर्यकारिमणिमुक्ताकरितुर-

गादिरत्नं वस्तु तस्य द्राक् शीघ्रं प्रणामानन्तरमव्यवहितमेवोपाहृियतोपदीकृतम् । तत्रोपदीकृते रत्नजाते दृष्टिदानमेव बहुमान इति वा । केनेदमानीतमित्यादरप्रश्नपूर्वं तेषु राजस्वपि दृष्टिदानमेवेति वा । स्वस्वेतिपाठे—स्वं स्वं च तद्दिश्यं चेत्यर्थः । यच्चेति पाठे—यत्कल्पितगुणाधिक्यचित्रं न भवति, किंतु स्वाभाविकगुणाधिक्यचित्रमेव, तद्रत्नमिति संबन्धः । दिश्यम्, भवार्थे दिगादिभ्यो यत् । देश्यमिति पाठेपि । स्वं, जातावेकवचनम् । एवमुत्तरश्लोकेपि ॥

अङ्गुलीचलनलोचनभङ्गि-
भूतरत्नविनिवेदितदानम् ।
रत्नमन्यनृपढौकितमन्ये
तत्प्रसादमलभन्त नृपास्तत् ॥ ४ ॥

अङ्गुलीति ॥ अन्ये चिरकालसेविनस्तदानीमेवागता वा नृपा अन्यनृपैर्ढौकितमुपदीकृतं तत्पूर्वोक्तं मणिमुक्तादिरत्नजातमेव तस्य नलस्य प्रसादं पारितोषिकं दानमलभन्त । किंभूतम्—अङ्गुलीचलनेन लोचनभङ्ग्या प्रसादसूचकनेत्रवीक्षणविशेषेण भूतरत्नेन च एतस्मै एतत्, एतस्मै एतद्देहीति सेवकान् प्रति एतत्त्वं गृहाण, एतत्त्वं गृहाणेति राज्ञः प्रत्येव वा विशेषेण निवेदितं दानं यस्य । अन्यैरानीतमन्येभ्यो दत्तवान्, न तु कोशागारे निवेशितवान् इत्यनेनौदार्यातिशयश्चातुर्यं च सूच्यते । चतुरो हि तदीयमेव तस्मै न ददाति । अङ्गुल्यादिचालनेन दाननिवेदनमीश्वरजातिः ॥

तानसौ कुशलमूनृतसेकै-
स्तर्पितानथ पितेव विसृज्य ।
अस्त्रशस्त्रखुरलीषु विनिन्ये
शैष्यकोपनमितानमितौजाः ॥ ५ ॥

तानिति ॥ अथ नूतनागतराजकृतोपदादानानन्तरं चिरागतराजभ्यो वितरणानन्तरमसौ अमितौजा अतुल्यपराक्रमो नलो नूतनागतान्राज्ञः कुशलसूनृतसेकैः कुशलप्रश्नसंबन्धिसत्यप्रियवचनामृतसेचनैः 'भवतां राष्ट्रे देहे च कुशलं, भवतां कार्यं करिष्यामि' इत्येवंरूपैः कृत्वा तर्पितान् प्रीणितान् सबहुमानं स्वशिबिरं प्रति विसृज्य शैष्यकेण शिष्यभावेन प्रयोजकेनोपनमितान्समीपमागतानस्त्रादिशिक्षार्थं समीपमागतानन्यान्नृपानस्त्राण्यास्त्रेयादीनि, शस्त्राणि बाणादीनि तेषां खुरलीषु हस्तचरणादिसंस्थानचातुरीविशेषेषु विनिन्ये । तद्विषयकौशलमशिक्षयदित्यर्थः । क इव—पितेव । शैष्यकेति भावे योपधाद्वुञ् । शिष्यतेति च पाठः ॥

मर्त्यदुष्प्रचरमन्त्रविचारं
चारुशिष्यजनतामनुशिष्य ।
स्वेदबिन्दुकितगोधिरधीरं
स श्वसन्नभवदाप्लवनेच्छुः ॥ ६ ॥

मर्त्येति ॥ स नल आप्लवनेच्छुः जलावगाहनाय साभिलाषोऽभवत् । किंभूतः—मर्त्येषु दुष्प्रचरमविद्यमानप्रसरं मर्त्यैर्दुःप्रचयंते दुःप्रचरं नलव्यतिरिक्तैर्मर्त्यमात्रैरज्ञाताशेषविशेषमाग्नेयास्त्राणां विचारं मोक्षोपसंहारोपायप्रकारविशेषं चारुः प्रौढप्रतिभः शिष्यजनतां समूहं, चारु सम्यग्वाऽनुशिष्य शिक्षयित्वा स्थितः, अनन्तरं श्रमवशाज्जाता ये स्वेदबिन्दुकास्तै संजाता यस्य तारको गोधिर्ललाटं यस्य, अत एव—धीरं दीर्घं न धीरमधीरमह्रस्वं यथा स्यात् । बिन्दुकेत्यस्यार्थे कन् । तारकादित्वादितच् । 'ललाटमलिकं गोधिः' इत्यमरः ॥

यक्षकर्दममृदून्मृदिताङ्गं
प्राकुरङ्गमदमीलितमौलिम् ।
गन्धवारिभिरनुबन्धितभृङ्गै-
रङ्गनाः सिषिचुरुच्चकुचास्तम् ॥ ७ ॥

यक्षेति ॥ उच्चकुचा अङ्गनास्तं बहलपरिमलेन अनुबन्धिता मिलन्तो भृङ्गा येषु तैर्गन्धवारिभिः कर्पूरवासितजलैः सिषिचुः । अभ्यङ्गस्नानमकारयन्नित्यर्थः । किंभूतम्—प्राक् पूर्वं कर्पूरागरुकस्तूरीचन्दनकक्कोलचूर्णरूपेण यक्षकर्दमेन सुगन्धिद्रव्येण कृत्वा मृदु यथा तथा शनैर्मृदितमङ्गं यस्य पश्चात्कुरङ्गमदेन कस्तूरिकया मीलितः संबन्धं प्रापितो मौलिर्यस्य । कस्तूरिकानिर्वासिततैलशिरसमिति यावत् । 'तथा कर्पूरमगुरुः कस्तूरी चन्दनं तथा । कक्कोलं च भवेदेभिः पञ्चभिर्यक्षकर्दमः ॥' इति गरुडपुराणम् ॥

भूभृतं पृथुतपोऽधनमाप्तस्तं शुचिः स्नपयति स्म पुरोधाः ।
संदधज्जलधरस्खलदोघस्तीर्थवारिलहरीरुपरिष्टात् ॥ ८ ॥

भूभृतमिति ॥ अभ्यङ्गस्नानानन्तरं शुचिः साचारः आप्तो हितः परम्परायातः पुरोधाः जलधराजलपूर्णात्स्वर्णकलशात्स्खलन् पतन् ओघः संततधारापरम्परा यासां ताः प्रयागादितीर्थवारीणां लहरीस्तस्यानुपरिष्टात्संदधन् प्रक्षिपन्सन् पृथुना तपसा चाम्नायणादिजन्येन पुण्येन घनं पूर्णं तं भूभृतं नलं स्नपयति स्म । पूर्वमुष्णोदकस्नानेन शरीरशुद्धिं कारयित्वा संकल्पपूर्वं शीतलोदकेन वेदोक्तमन्त्रस्नानमकारयदिति भावः । शुचिरापाढः पृथुना तपसा माघमासेनाघनं माघमारभ्य वृक्षाणां गलितपत्रत्वादगहनम्, पूर्वभूतं पर्वतमभिषिञ्चतीति वा । 'तपा माघे(ऽथ)' इत्यमरः । 'शुचिस्त्वयम् । आषाढे' इति च ॥

स्नानक्रममाह—

प्रेयसीकुचवियोगहविर्भुग्जन्मधूमविततीरिव बिभ्रत् ।
स्नायिनः करसरोरुहयुग्मं तस्य गर्भधृतदर्भमराजत् ॥ ९ ॥

प्रेयसीति ॥ स्नायिनो मन्त्रवत्तीर्थजलावगाहनस्नानविधिना स्नानं कुर्वाणस्य तस्य करसरोरुहयुग्मं गर्भयोर्मध्यमानीकनिष्ठान्तरालयोर्धृतो दर्भो येनैवंभूतमराजत् शुशुभे । किंभूतमिव—प्रेयस्याः कुचवियोग एव हविर्भुक् तस्माज्जन्म यासां ता धूमविततीर्बिभ्रदिव । दर्भाणां श्यामत्वाद्धूमततित्वं युक्तम् ॥

कल्प्यमानममुनाचमनार्थं गात्रमम्बु चुलुकोदरचुम्बि ।
निर्मलत्वमिलितप्रतिबिम्बद्यामयच्छदुपनीय करे नु ॥ १० ॥

कल्प्येति ॥ अमुना आचमनमर्थः प्रयोजनं यस्य आचमनं कर्तुं वा कल्प्यमानं स्वीक्रियमाणं चुलुकोदरचुम्बि चुलुकमध्यवर्ति गात्रमम्बु कर्तृ निर्मलत्वेन मिलितः स्वस्मिञ्जातः प्रतिबिम्बो

यस्यास्तां द्यां स्वर्गमुपनीय समीपां कृत्वा हस्तप्राप्यां कृत्वा करेऽयच्छत् । 'दाण् दाने' । नु उत्प्रेक्षायाम् । स्नानप्रारम्भाचमनं चचारेत्यर्थः । अन्यदपि दुर्लभं वस्तु हस्ते आनीय दीयते ॥

मुक्तमाप्य दमनस्य भगिन्या भूमिरात्मदयितं धृतरागा।
अङ्गमङ्गमनुकं परिरेभे तं मृदो जलमृदूर्गृहयालुम् ॥११॥

मुक्तमिति ॥ भूमिरात्मनो भूपतित्वाद्दयितं प्रियं भर्तारं नलं स्नानकाले दमनस्य भगिन्या भैम्या मुक्तं विरहितमाप्य लब्ध्वा धृतो रागो लौहित्यं यया, अथ च—सानुरागा सती ऊषरादिमृत्तिकानिषेधात्तत्परिहाराय जलस्पर्शमात्रेण मृदूः शिथिलावयवाः मृदुतरस्पर्शाः स्नानार्थमानीता मृदो गङ्गादिमृत्तिका गृहयालुं गृह्णन्तमनुकमात्मनः कामुकं तमङ्गमङ्गं परिरेभे आलिलिङ्ग । श्रौतमार्गेण ललाटाद्यङ्गेषु रक्तमृत्तिकालगनव्याजेनान्यदा दुष्प्रापं स्ववल्लभं भूमिरालिलिङ्गेति भावः । प्रतीयमानोत्प्रेक्षा । अन्यापि सपत्नीमुक्तं वल्लभं चिरात्प्राप्य सानुरागा सती प्रत्यङ्गमालिङ्गति । कं सुखं (अनु) लक्षीकृत्य सुखोद्देशेनालिलिङ्गेति वा । 'शुक्ला विप्रस्य, रक्ता क्षत्रियस्य, मिश्रा विशः, कृष्णा शूद्रस्य' इति स्मृतिः । अनुकम्, 'अनुकाभिकाभीकः कमिता' इति साधुः । 'अनु किम्' इति पाठे—सर्वाण्यङ्गानि लक्ष्यीकृत्य परिरेभे किमित्यर्थः ॥

मूलमध्यशिखरस्थितवेधःशौरिशंभुकरकाङ्घ्रिशिरःस्थैः ।
तस्य मूर्ध्नि चकरे शुचि दर्भैर्वारिवान्तमिव गाङ्गतरङ्गैः१२

मूलेति ॥ साग्रमूलैस्त्रिभिरगर्भैर्दर्भैस्तस्य मूर्ध्नि शुचि निर्मलं कुत्राप्यसंबन्धात्पवित्रतरं च मार्जनमङ्गं तत्संबन्धि वारि चकरे विक्षिप्तम् । 'कृ विक्षेपे' । किंभूतैः (किंभूतमिव)—'कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः । कुशाग्रे शंकरं विद्यात्त्रयो देवाः कुशस्थिताः ॥' इति वचनान्मूले मध्ये शिखरेऽग्रे च स्थितानां वेधःशौरिशम्भूनां ब्रह्मविष्णुहराणां क्रमेण करके कमण्डलौ, अङ्घ्रौ पादाम्बुजे, शिरसि च गङ्गा सर्वदेति पुराणप्रामाण्यात्स्थितैरेवंप्रकारेण दर्भेषु संभवद्भिर्गङ्गासंबन्धिभिस्तरङ्गैर्वान्तमिवोद्गीर्णमिव । कुशमूलस्थितब्रह्मादिदेवत्रयकरकादिनिष्ठगङ्गातरङ्गभ्रष्टैरिव पवित्रैर्दर्भाग्रजलैः स्नानाङ्गभूतमार्जनमकरोदित्यर्थः । 'कमण्डलौ च करकः' इत्यमरः । वान्तम्, उदित्वात् क्त्वायां वेट इति 'यस्य विभाषा' इति निष्ठाया इण्निषेधः ॥

प्राणमायतवतो जलमध्ये मज्जिमानमभजन्मुखमस्य ।
आपगापरिवृढोदरपूरे पूर्वकालमुषितस्य सितांशोः १३

प्राणमिति ॥ सुवर्णघटितमहापात्रस्थतीर्थत्वोपकल्पितसमग्रककरकृतावगाहनजलमध्ये 'गायत्रीं शिरसा सार्धं जपेद्व्याहृतिपूर्विकाम् । प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः' इति याज्ञवल्क्योक्तलक्षणलक्षितं प्राणं प्राणायाममायतवतः कृतवतः । जलमध्ये मुखं नम्रीकृत्य कनिष्ठाङ्गुष्ठनासामुखश्वासनिरोधपूर्वमघमर्षणं कृतवत इति यावत् । एवंभूतस्य नलस्य जलान्तर्वर्तिमुखमापगानां परिवृढस्य स्वामिनः समुद्रस्योदरपूरे गर्भप्रवाहमध्ये मन्थनात्पूर्वकालमुषितस्य कृतवासस्य सितांशोश्चन्द्रस्य मज्जिमानं सौन्दर्यम-

१ 'विकरे इति क्वाचित्कोऽपपाठः' इति सुखावबोधा ।

भजत् । सागरोदरस्थचन्द्रसदृशमभूदित्यर्थः । 'पुंसि भूम्न्यसवः प्राणाः' इत्यमरोक्तेः । प्राणशब्दस्य बहुवचनान्तत्वनियमादेकवचनं चिन्त्यम् । आयतवतः, यमेः क्तवतुः । पूर्वकालम्, अत्यन्तसंयोगे द्वितीया ॥

मर्त्यलोकमदनः सदशत्वं बिभ्रदभ्रविशदद्युतितारम् ।
अम्बरं परिदधे विधुमौलेः स्पर्धयेव दशदिग्वसनस्य १४

मर्त्येति ॥ मर्त्यलोके मदनो नलः दश दिश एव वसनं यस्य दिगम्बरस्य विधुमौलेश्चन्द्रशेखरस्य स्पर्धयेवाम्बरं वस्त्रम्, अथ च—गगनं परिदधे । अत्र कृतदशदिग्विभागं गगनमुच्यते, तेन गगनवसनस्येत्यर्थः । किंभूतम्—सदशत्वं दशाभिर्दीर्घप्रान्ततन्तुभिः सह वर्तते तद्भावम्, अथ च—दशभिः सह वर्तमानं तद्भावं दशत्वसंख्यायोगिदिग्विभागोपाधिभिरेव दशत्वसंख्यायोगित्वं बिभ्रत् । सदशत्वमुदितभाग्यत्वं बिभ्रदिति नलविशेषणं वा । तथा—अभ्रवदौचित्याच्छरन्मेघस्येव, अभ्रकापरपर्यायस्य शुभ्रतरद्रव्यविशेषस्येव वा, विशदा शुभ्रतरा द्युतिर्यस्य । अत एव—तारं सूक्ष्मतरम् । धवलद्युति च तत्तारं चेत्यैकपद्यं वा । अभ्रवद्विशदा द्युतिर्यस्य तद्भावस्तत्ता तामारात्यादत्ते तद्धवलतरं वा । शरन्मेघवदभ्रकद्रव्यवद्वा निर्मला द्युतिर्यासां तादृश्यस्तारका यत्र तद्वा । अभ्राणि मेघान्विशन्ति, अत एव मेघाच्छादितत्वाद् अद्युतयः कान्तिरहितास्तारका यत्रेति वा । अच्छिन्नं धौतं वस्त्रं परिदधे इत्यर्थः । ईश्वरोऽपि विशिष्टमाकाशमेव वस्ते । शिवकामयोर्विरोधात्स्पर्धा युक्ता । अभ्राणि विशन्तीति पक्षे 'द्वितीया' इति योगविभागात्समासः । आरातीत्यादन्तत्वात्कः ॥

भीमजामनु चलत्प्रतिवेलं संयियंसुरिव राजऋषीन्द्रः ।
आववार हृदयं न समन्तादुत्तरीयपरिवेषमिषेण ॥१५॥

भीमजामिति । राजर्षीणां सदाचारनृपाणां मध्ये इन्द्रो नल उत्तरीयस्योपरितनवस्त्रस्य परिवेषमिषेण वेष्टनव्याजेन हृदयं मनः, अथ च—वक्षःस्थलं, समन्तात् नाववार न बबन्ध पिदधे वा, अपितु बबन्ध पिदधे वा । किंभूतम्—यतः प्रतिवेलं वारंवारं भीमजामनु लक्षीकृत्यानुरागातिशयाच्चलदभिमुखं धावत्, अत एव—किंभूत इव—तद्धृदयं संयियंसुरिव सम्यक् नितरां नियन्तुमिच्छुरिव । क्षणमात्रं त्वया न गन्तव्यमिति गाढं संयतं कर्तुमिच्छन्निव । स्मृत्यादावेकवाससः कर्मानधिकारोक्तेरुत्तरीयवस्त्रधारणमुक्तम् । अन्योऽप्यन्यत्र गमनोत्सुको बलाद्रज्ज्वादिना बद्ध्वा स्थाप्यते । स समन्तादिति च पाठः । राजऋषिः, 'ऋत्यकः' इति प्रकृतिभावः ॥

स्नानवारिघटराजदुरोजा गौरमृत्तिलकबिन्दुमुखेन्दुः ।
केशशेषजलमौक्तिकदन्ता तं बभाज सुभगाप्लवनश्रीः॥

स्नानेति ॥ सुभगा मनोहरा, अथ च—सौभाग्यवती, आप्लवनश्रीः स्नानलक्ष्मीस्तं बभाज सिषेवे । स्नानेन नितरां शुशुभे इत्यर्थः । किंभूता—स्नानार्थं वारि तद्युक्ताः सुवर्णघटास्त एव

१ ('हृदि प्राणो गुदेऽपानः' इत्यादिषु) क्वचिदेषामेकत्वमपि दृश्यते इति वचनादेकत्वेपि न दोषाय' इति सुखावबोधा ।

राजन्तावुरोजौ कुचौ यस्याः सा । तथा—'ऊर्ध्ववृत्ततिर्यगर्धचन्द्राकारा वर्णानां क्रमात्तिलकाः' इति दक्षवचनाल्ललाटे एतो गौरमृत्तिलकबिन्दुर्गङ्गातीरगोपीचन्दनादिरचितो वर्तुलस्तिलकः स एव गौरवृत्तत्वान्मुखेन्दुर्यस्याः सा । तथा-'हस्तवस्त्रेन मार्जयेत्' इति व्यासवचनेन वैधस्नानानन्तरं वस्त्रादिना केशपरिमार्जनस्य निषेधात्केशेषु शेषं जलं केशप्रान्तेभ्यो गलद्यज्जलं जलबिन्दवस्त एव मौक्तिकानि दन्ताश्च यस्याः सा । यद्वा-जलमौक्तिकानि मुक्तावत्स्थूलजलबिन्दवस्त एव दन्ता यस्याः सा । एवंभूता रमणीयदशना तिलकं दधारेति भावः । अन्याप्येवंविधा तरुणी कंचिद्भजत इति ॥

श्वैत्यशैत्यजलदैवतमन्त्र-
स्वादुताप्रमुदितां चतुरक्षीम् ।
वीक्ष्य मोघधृतसौरभलोभं
घ्राणमस्य सलिलघ्रमिवासीत् ॥ १७ ॥

श्वैत्येति ॥ श्वैत्येन शैत्येन च अलं दैवतं येषां तैराप्यैः, जलदैवतं वरुणस्तत्संबन्धिभिर्वा वारुणैः मन्त्रैः शब्दात्मकैः स्वादुतया मधुररसतया च जलगतविशिष्टरूपस्पर्शशब्दरसलक्षणस्वीयस्वीयविषयलाभेन प्रमुदितामतितरां संतुष्टां चतुरक्षीं क्रमेण चक्षुस्त्वक्श्रोत्ररसनसमाहाररूपां नेत्रादिचतुष्टयीं वीक्ष्य अस्य प्राणेन्द्रियं सहजगन्धस्य पृथिव्यसाधारणगुणत्वाज्जले तदसंभवात्कर्पूरादिवासितस्य च जलस्य देवस्नपनादिधर्मकर्मसु प्रतिषेधादौपाधिकस्याप्यसंभवान्मोघो निष्फल एव धृतः सौरभे शोभनगन्धे लोभो येन, लोभसजातीयस्पर्शाविगलितविवेकं सत् 'ऋतं च-' इत्यादिसंध्याघमर्षणचुलुकोदयस्पर्शमिषेण सलिलं जिघ्रतीति सलिलघ्रं जलाघ्राणं कुर्वदिवाभूत् । लोभस्पर्धाभ्यां विगलितविवेको ह्यविषयेपि प्रवर्तते । संध्याघमर्षणं चकारेति भावः । श्वैत्यं, वर्णैवाचित्वाप्यम् । चतुरक्षीं, समाहारद्विगौ 'द्विगोः' इति ङीप्। सलिलघ्रम्, आदन्तत्वात्कः ॥

राज्ञि भानुमदुपस्थितयेऽस्मि-
न्नात्तमम्बु किरति स्वकरेण ।
भ्रान्तयः स्फुरति तेजसि चक्षु-
स्त्वष्टृतर्कुचलदर्कवितर्कम् ॥ १८ ॥

राज्ञीति ॥ अस्मिन् राज्ञि भानुमतः सूर्यस्योपस्थितये उपस्थानार्थमात्तं गृहीतमर्घ्यदानसंबन्धि अर्घ्यदानानन्तरं वा । 'असावादित्यः-' इत्यादिमन्त्रपूर्वं जलं शिरः परितः स्वपाणिना किरति सति भ्रान्तयः क्षिप्तोदकस्यैव प्रादक्षिण्यपरिभ्रमणानि लोकस्य त्वष्टुर्विश्वकर्मणः तर्कुः शाणचक्रं तत्र घर्षणवशाच्चलतो भ्राम्यतो विष्वक्पतनशीलतेजःकणस्यार्कस्य वितर्कं तद्विषयं विशिष्टमूहं चक्रुः । प्रकाशमानसौरप्रभाप्रदक्षिणप्रक्षिप्तगलद्बिन्दुजलभ्रमणदर्शनेन विश्वकर्मणा सूर्यः पुनरपि शाणचक्रे धृतः किम्, अँत एवैतेऽणवः कणाः पतन्तीति लोकस्य तदानीं बुद्धिरभूदित्यर्थः । भानुमदुपस्थितये गृहीतमम्बु स्वकरेण विक्षिपत्यस्मिन्नाज्ञि विषये लोकस्य भ्रान्तयो नक्षत्रप्रभाप्रसरे प्रकाशमाने सति निशाणचक्रपरिभ्रमस्सूर्यसंभावना लोकस्य चक्रुरिति वा । राज्ञा यदम्बु गृहीतं तस्मिन्नुक्षिप्ते जले स्फुरति प्रतिफलति रवितेजसि जायमाना भ्रान्तयो भ्रमणानि स्वधृतकुंचलदर्कवितर्कं चक्रुः । उक्षिप्ता आपो दिवि भ्रमन्त्यः पतन्ति, तत्प्रतिबिम्बिते तेजस्यपि भ्रमणानि जायन्ते, तत्रोत्प्रेक्षेति वा । अर्घ्यदानं सूर्योपस्थानं च कृतवानिति भावः । स्फुरिततेजसीति पाठे नक्षत्रविशेषणम् ॥

सम्यगस्य जपतः श्रुतिमन्त्राः
संनिधानमभजन्त कराब्जे ।
शुद्धबीजविशदस्फुटवर्णाः
स्फाटिकाक्षवलयच्छलभाजः ॥ १९ ॥

सम्यगिति ॥ श्रुतिमन्त्राः सम्यग्जपतः सावित्र्यादिमन्त्रमात्रयोपांशूच्चारयतोऽस्य कराब्जे संनिधानमलभन्त । किंभूताः—शुद्धैरागमोक्तक्रमोच्चारणनिर्मलैर्वह्निवारुणादिबीजैः कृत्वा विशदाः स्फुटा मात्रादिसाकल्योच्चारणेनासंदिग्धा वर्णा अक्षराणि येषु, अथ च—शुद्धेषु ग्रामादिदोषरहितेषु बीजेषु स्फटिकगुटिकासु विशदो धवलः प्रकटो वर्णः कान्तिर्येषाम् । यद्वा—निर्दोषस्फाटिकबीजान्येव धवलाः प्रकटा वर्णा अक्षराणि येषु । तथा—स्फाटिकाक्षाणां वलयस्य मालायाश्छलं भजन्ति ते, तदाकारेण परिणताः । भक्तयतिशयान्मूर्तीभूय तत्पाणिपद्मे वसन्ति स्मेत्यर्थः । उपस्थानानन्तरं सावित्रीजपं च कृतवानिति भावः ॥

पाणिपर्वणि यवः पुनरुक्त्य-
देवतर्पणयवार्पणमस्य ।
न्युप्यमानजलयोगितिलौघैः
स द्विरुक्तकरकालतिलोभूत् ॥ २० ॥

पाणीति ॥ अस्य पाणिपर्वणि हस्ताङ्गुलीनां ग्रन्थौ काण्डे वर्तमानो यवाकारः सामुद्रकलक्षणभूतशुभरेखाविन्यासरूपो यवो देवतर्पणजले यवार्पणं कर्मीभूतं पुनरुक्तमाख्यत् । अकरोदित्यर्थः । देवतर्पणं हि यवैः क्रियते, ते चाङ्गुलीपर्वसु पूर्वमेव वर्तन्ते, एतावतैव पौनरुक्त्यम् । तथा न्युप्यमानेन पितृभ्यो दीयमानेन जलेन योगिभिः सह क्षिप्यमाणैः कृष्णतिलौघैः कृत्वा स जलो द्विरुक्तः पुनरुक्तः, करकालतिलः करकमलमध्यवर्ती सामुद्रकलक्षणभूतः सूक्ष्मकालतिलाकारोऽङ्को यस्य तादृशोऽभूत । पितृतर्पणं हि तिलैः क्रियते । स च तिलो हस्तमध्ये वर्तत एवेति पौनरुक्त्यम् । ब्रह्मयज्ञोऽपि तेनाकारीति भावः । आद्यन्तयोर्देवपितृतर्पणोक्तमध्ये वर्तमानमृषितर्पणं कृतमिति ज्ञेयम् । न्युप्यमान, यमादित्वात्सं-प्रसारणम् ॥

पूतपाणिचरणः शुचिनोर्ध्व-
रध्वनानितरपादहृतेन ।
ब्रह्मचारिपरिचारि मृगार्चा
वेश्म राजऋषिरेष विवेश ॥ २१ ॥

---

१ 'करतालुतिलो, करतालतिलो, करमालतिलो' इति पृथक्पृथक् पाठोऽपि ।

पूतेति ॥ एष राजा चासौ ऋषिर्मुनिर्धर्माचरणशीलो नलो देवपूजागृहप्रवेशौचित्यार्थं पूतं जलक्षालितं पाणिचरणं येनैवंभूतः सन् शुचिना गोमयोपलिप्तेन पवित्रेण, तथा—न(ह)तस्य नलातिरिक्तस्य पादेन हतेन, अन्यचरणस्पर्शादूषितेनेत्यर्थः। उच्चैरूर्ध्वमध्वना सोपानबद्धमार्गेण, यद्वा—अनितरपादहतेन, अतएवोच्चैर्नितरां शुचिना, ब्रह्मचारिण उपनीता द्विजाः परिचारिणो देवसेवाकारिणो यत्रैवंभूतं सुरार्चावेश्म सुवर्णादिनिर्मितमन्त्रसंस्कृतप्रतिमागृहं देवपूजासंबन्धि वा गृहं विवेश ॥

क्वापि यन्नभसि धूपजधूमै-
र्मेचकागुरुभवैर्भ्रमराणाम् ।
भूयते स्म सुमनःसुमनःस्र-
ग्दामधामपटले पटलेन ॥ २२ ॥

क्वेति ॥ यस्य देवपूजागृहस्य नभसि अन्तरावकाशे क्वापि कस्मिन्नपि प्रदेशे सुमनसां देवानां पूजार्थमानीताः सुमनसः पुष्पाणि तासां स्रग्दामानि मालापरम्पराः, यद्वा—स्रजः कण्ठमालाः, दामानि शिरोमाल्यानि, तेषां धामानि स्थानानि मध्यस्थापितपुष्पवेणुसुवर्णादिपात्राणि तेषां पटलेषु समूहे विषये तेषामुपरिष्टान्मेचकागुरुभवैः कृष्णागुरुसमुद्भवैर्धूपजैः सौगन्ध्यार्थं रचितैर्धूपोत्पन्नैर्धूमैरेव भ्रमराणां पटलेन गणेन भूयते स्म जातम् । पुष्पाणामुपरि भ्रमरैर्भाव्यम्, तथाच—धूपजधूमा एव तत्स्थाने जाता इत्यर्थः। सुमनसो मालत्याः पुष्पाणां माला परम्पराः, तासां स्थानं । तद्रचितमिति यावत्। एवं(भूतं)पटलं वितानं यत्र तादृशो वा। देवानामुपरि पुष्पवितानमपि यत्रेत्यर्थः। देवपूजार्थमुपहृतपुष्पमालापरम्पराणां स्थानभूतं पटलं गृहप्रान्तच्छदिर्यत्र तादृशे। यदन्तरप्रदेशे। देवतागारे हि छदिः प्रान्ते सौरभरामणीयकार्थं पुष्पमाला बध्यन्ते, तासामुपरि धूमा एव भृङ्गा जाता इत्यर्थ इति वा। बहुतरा धूपाः पुष्पमालाश्च यत्र सन्तीति भावः। 'सुमना मालती जातिः' इत्यमरः। 'पटलं छदिः–' (इति च) । 'नैकवर्ण–' इति यावदादिकुलकम् ॥

साङ्कुरेव रुचिपीततमा यै-
र्यैः पुरास्ति रजनी रजनीव ।
ते धृता वितरितुं त्रिदशेभ्यो
यत्र हेमतिलका इव दीपाः ॥ २३ ॥

साङ्कुरेति ॥ यत्र गृहे ते दीपा हेमतिलका इव त्रिदशेभ्यो वितरितुं समर्पयितुं धृताः स्थापिताः सन्ति । ते के—यैर्दीपैर्हत्वा दीप्या पीतं प्रस्तं तमो यस्यास्तादृशी सती सा भूता भविष्यन्ती वा रजनी रात्रिः साङ्कुरेवोद्भिन्नप्रत्यग्रतेजोङ्कुरसहितेव पुराऽस्ति अभूत् भविष्यति वा। तथा–यैः कृत्वा कान्त्या पीततमा अतितरां पीतवर्णाऽत्यन्तगौरी रात्रिरुद्भिन्नप्रत्यग्राङ्कुरा रजनीव हरिद्रेवाभूत्भविष्यति वा। रात्रिः पीतीभूततया हरिद्रेव, प्रदीपकलिकाश्च तदङ्कुरा इवेत्युत्प्रेक्षोपमा वा। 'निशाख्या काञ्चनी पीता' इत्यमरः। पीततमा पक्षे साम्तम्, पक्षे तमवन्तम् । पुरास्तीति 'पुरि लुङ् चास्मे' इति (भूते) 'यावत्पुरा–' इति भविष्यति वा लट् ॥

यत्र मौक्तिकमणेर्विरहेण
प्रीतिकामधृतवह्निपदेन ।
कुङ्कुमेन परिपूरितमन्तः
शुक्तयः शुशुभिरेऽनुभवन्त्यः ॥ २४ ॥

यत्रेति ॥ यत्र देवागारे मौक्तिकमणेः प्रियतमस्य विरहेण कर्त्रा कुङ्कुमस्य स्वोद्दीपनहेतुतया प्रीतिस्तया कामं दत्तं कामेन कर्त्रा वा दत्तं वह्नेः पदं दाहकत्वादिरूपोऽधिकारस्तद्रूपं चिह्नं वा यस्य तेन कुङ्कुमकेसरेण परिपूरितमन्तर्मध्यभागमनुभवन्त्यो बिभ्राणाः शुक्तयः शुशुभिरे । वियोगिन्यो हि विरहाग्नितप्तं हृदयमनुभवन्ति । कुङ्कुमपूर्णाः शुक्तयो वियोगिनीरूपकेण वर्ण्यन्ते । यद्वा–मौक्तिकमणिविरहेणोपलक्षिताः शुक्तयः कुङ्कुमस्य कामोद्दीपनहेतुतया या प्रीतिस्तया युक्तेन कामेन । अन्यत्पूर्ववत् । प्रीतो हि किंचित्पदं ददाति शुक्तयो विशिष्टेन कुङ्कुमेनोपलक्षिताः सत्यो मौक्तिकमणिविरहेण पूर्णं मध्यमनुभवन्त्य इव शुशुभिर इति प्रतीयमानोत्प्रेक्षा वा। प्रीतेतिपाठे—स्वोद्दीपकत्वेन प्रीतात्कामादुत्तं वरेण लब्धं वह्निपदं येनेत्यर्थः। मुक्ताफलोत्पत्तिहेतुभूताः शुक्तयः पुत्रविरहेण मातरो यथा हृदयान्तर्दहन्ति, तथा कुङ्कुमरूपमन्तर्दाहं वहन्त्यः शुशुभिर इति वा ॥

अङ्कचुम्बिघनचन्दनपङ्कं
यत्र गारुडशिलाजममत्रम् ।
प्राप केलिकवलीभवदिन्दोः
सिंहिकासुतमुखस्य सुखानि ॥ २५ ॥

अङ्केति ॥ यत्र देवागारे अङ्कचुम्बी मध्यवर्ती घनश्चन्दनपङ्को यस्य तस्य गारुडशिलाजमतिनीलस्थूलगरुडोद्गारमणिघटितममत्रं पात्रं केल्या लीलामात्रेण कवलीभवन् ग्रासीभवन् मुखमध्यवर्त्यर्धभाग इन्दुर्यस्य सिंहिकासुतमुखस्य राहुवदनस्य शीतान्नभोजनसुखानि प्राप । तत्सममभूदित्यर्थः । गारुडमणिपात्राणि यत्र चन्दनभृतानि सन्तीति भावः । अमत्रमिति जात्येकवचनम् । भवदिन्दोः भाषितपुंस्कम् ॥

गर्भमैणमदकर्दमसान्द्रं
भाजनानि रजतस्य भजन्ति ।
यत्र साम्यमगमन्नमृतांशो-
रङ्करङ्ककलुषीकृतकुक्षेः ॥ २६ ॥

गर्भमिति ॥ यत्र देवागारे एणमदः कस्तूरी तस्य कर्दमस्तेन सान्द्रं पूर्णं गर्भं मध्यं भजन्ति बिभ्राणानि रजतघटितानि भाजनानि अङ्करङ्क कलङ्कमृगस्तेन कलुषीकृतो मलिनीकृतः कुक्षिर्यस्य तस्यामृतांशोश्चन्द्रस्य साम्यमगमत् । देवपूजार्थं रजतपात्राणि कस्तूरीपूर्णानि यत्र सन्तीति भावः ॥

उज्जिहानसुकृताङ्कुरशङ्का
यत्र धर्मगहने खलु तेने ।
भूरिशर्करकरम्भबलीना-
मालिभिः सुगतसौधसखानाम् ॥ २७ ॥

उज्जिहानेति ॥ धर्मेण गहने निबिडे, अथ च—पुण्यकानन-रूपे यत्रोच्चवर्तुलधवलतराणां सुगतसौधानां बौद्धदेवालयानां सखायः सदृशास्तेषां भूरिः शर्करा येषु तेषां करम्भबलीनां दधि-सक्तूपहाराणां दध्योदनोपहाराणां वा आलिभिः पङ्क्तिभिरुज्जिहान उद्गच्छन् सुकृताङ्कुरस्तस्य शङ्का संभावना खलु निश्चितं तेने व्यरचि आम्रादिवने ह्याम्राद्यङ्कुरा एवोद्गच्छन्ति, तथा धर्मकानने धर्माङ्कुरा एवेति । यत्र शर्करामिश्रदध्योदनबलिश्रेणय उपकल्पिताः सन्तीति भावः । सखानां, 'राजाह-' इति टच् ॥

खर्वमाख्यदमरौघनिवासं
पर्वतं क्वचन चम्पकसंपत् ।
मल्लिकाकुसुमराशिरकार्षी-
द्यत्र च स्फटिकमानुमनुच्चम् ॥ २८ ॥

खर्वमिति ॥ यत्र क्वचन प्रदेशे विकसितचम्पककुसुमानां संपदुच्चतरपुञ्जोऽमरौघानां निवासभूतपर्वतं मेरुं खर्वं ह्रस्वमाख्यत् । सुवर्णमेरुवर्णश्चम्पकराशिर्मेरोरप्युच्चतरो यत्रास्तीत्यर्थः । तथा-मल्लिकाकुसुमराशिः स्फटिका एव शिखराणि यस्य तं कैलास-पर्वतमनुच्चं खर्वमकार्षीत् । शुभ्रतरस्फटिकवर्णमल्लिकापुष्पराशिः कैलासादप्युच्चतरो यत्राम्नीत्यर्थः । पृथगन्वयात्खर्वानुच्चपदद्वयं भिन्नमिति ज्ञेयम् ॥

स्वात्मनः प्रियमपि प्रति गुप्तिं
कुर्वतो कुलवधूमवजज्ञौ ।
हृद्यदैवतनिवेद्यनिवेशा-
द्यत्र भूमिरवकाशदरिद्रा ॥ २९ ॥

स्वात्मन इति ॥ यत्र हृद्यानां वर्णरसादिना मनोहारिणां देवतासंबन्धिनां निवेद्यानां पञ्चखाद्योपहाराणां निवेशादवस्था-पनाद्धेतोस्तिलमात्रावकाशेनापि दरिद्रा रहिता भूमिः स्वात्मनः प्रियं प्रत्यपि लक्षीकृत्य गुप्तिं सर्वाङ्गसंवरणरूपं गोपनं कुर्वती शोभनस्य स्वस्य वा देहस्य गोपनं कुर्वती वा तिलमात्रमपि प्रदेशं द्रष्टुमददाना सती कुलवधूमवजज्ञौ अवमेने । कुलस्त्रीतुल्या-भूदित्यर्थः ॥

यत्र कान्तकरपीडितनील-
ग्रावरश्मिचिकुरासु विरेजुः ।
गातृमूर्धविधुतेरनुबिम्बा-
त्कुट्टिमक्षितिषु कुट्टिमितानि ॥ ३० ॥

यत्रेति ॥ यत्र वर्तमानासु कुट्टिमक्षितिषु चन्द्रकान्तादिमणि-बद्धभूमिषु देवपूजावसरे गातॄणां गायकानां गानवशान्मूर्धविधुतेः शिरःकम्पस्यानुबिम्बात्प्रतिबिम्बाद्धेतोस्तद्व्याजेन कुट्टिमितानि हठ-क्रियमाणचुम्बनादिपरिहारार्थं कामिनीशिरःकम्पविलसितानीव विरेजुः । किंभूतासु—भीमो भीमसेनवत् कान्ताः सूर्यकान्ताश्चन्द्र-कान्ता वा तेषां करैः किरणैः पीडिताः पुरस्ताद्गन्तुं प्रतिबद्धाः । त-स्मैव घनीभूता इति यावत् । नीलप्रावरश्मयो नीलमणिकिरणा एव चिकुराः सुनीलाः केशा यासां तासु । कामिन्यो हठपरिचुम्ब्यमानाः प्रियपाणिगृहीता नीलमणिरश्मितुल्याः सुनीलाः केशा यासां कृतकचग्रहाः सत्यशुम्बनादिपरिहाराय शिरःकम्पनरूपान् विला-सान् कुर्वन्ति । नानामणिबद्धा भूमयो देवसेवका गायकाश्च यत्र सन्तीति भावः ॥

नैकवर्णमणिभूषणपूर्णे
स क्षितीन्दुरनवद्यनिवेद्ये ।
अध्यतिष्ठदमलं मणिपीठं
तत्र चित्रसिचयोच्चयचारौ ॥ ३१ ॥

नेति ॥ स क्षितीन्दुर्भूचन्द्रो नलस्तत्रोक्तरूपे देवपूजागृहे अमलं मणिभी रत्नैः खचितं पीठमध्यतिष्ठत् । किंभूते—नैकवर्णा मणयो येषु देवार्थं कल्पितैर्नानावर्णैर्भूषणैः पूर्णे । तथा—अनवद्यानि मोद-कादिनिवेद्यानि यस्मिन् । तथा—चित्राणां नानावर्णानामाश्चर्यका-रिणां वा देवार्थमानीतानां सिचयानां वस्त्राणामुच्चयेन राशिना चारौ रमणीये पूर्णे । मणिपीठम्, 'अधिशीङ्-' इति कर्मत्वम् । चार्विति पाठे—पीठविशेषणम् ॥

पञ्चायतनपूजायां प्राधान्येन सूर्यपूजाया विहितत्वात्प्रथमं सूर्यपूजामाह—

सम्यगर्चति नलेऽर्कमतूर्णं
भक्तिगन्धिरमुनाकलि कर्णः ।
श्रद्दधानहृदयप्रति चातः
साम्बमम्बरमणिर्निरचैषीत् ॥ ३२ ॥

सम्यगिति ॥ नले सूर्यकान्तमणिरूपं सुवर्णादिघटितप्रतिमा-रूपं वाऽर्कं सम्यक् श्रौतस्मार्तमार्गेण अतूर्णं त्वरारहितं सावधान-तया चिरकालमर्चति सति अमुना सूर्येण कर्णो राधेयो भक्ति-गन्धिः अल्पा भक्तिर्यस्य तादृशोऽकलि व्यज्ञापि । सूर्यभक्तोऽपि कर्णो नलापेक्षयाऽतिहीन एवेति सूर्येणान्तर्निश्चित इत्यर्थः । तथा-नलेऽर्कं शनैरर्चति सति अम्बरमणिः सूर्यः श्रीकृष्णपुत्रं साम्ब-मन्तःकरणे श्रद्दधानहृदयप्रति श्रद्दधानहृदयमात्रं निरचैषीन्निश्चि-तवान् । साम्बोऽपि भक्ततया प्रसिद्धोऽयमल्पश्रद्धावान्, ननु न-लवदत्यन्तं भक्त इति निश्चिकायेत्यर्थः । उभाभ्यामपि सकाशान्न-लस्य सूर्ये महती भक्तिरभूदिति भावः । अर्चतीत्यचौरादिकादर्चतेः शता । भक्तिगन्धि, अल्पार्थायां गन्धस्येत् । हृदयप्रतीति 'सुप् प्रतिना मात्रार्थे' इत्यव्ययीभावः ॥

तत्तदर्यमरहस्यजपेषु
स्वस्वयः शयममुष्य बभाज ।
रक्तिमानमिव शिक्षितुमुच्चै
रक्तचन्दनजबीजसमाजः ॥ ३३ ॥

तदिति ॥ तेषां तेषामर्यमसंबन्धिनां सूर्यसंबन्धिनां रहस्यानां श्रौतस्मार्तमन्त्राणां जपेषु उपांशुवृत्तिषु विषये स्वस्वयो जपमाल्ति-

१ 'श्रद्दधानहृदयं प्रतीति पाठ—श्रद्धावद्धृदयममुं नलं प्रति लक्षीकृत्य भानुमान् साम्बं निरचैषीत् साम्ब एवासाविति ज्ञातवानित्यर्थः । पूर्व एव पाठः पटीयान्' इति सुखावबोधा ।

कारूपः रक्तचन्दनकाष्ठजानां बीजानां कृतच्छिद्रमणीनां फलमध्यवर्तिबीजानां वा समाजः समूहो जपतोऽमुष्य शयं हस्तं बभाज सिषेवे। उत्प्रेक्षते—तत्करे वर्तमानमुच्चैरतिशयितं रक्तिमानं रक्तत्वं रक्षितुमिव। अन्योपि शिष्य उपाध्यायं सेवत एव। रक्तचन्दनबीजजपमालिकाजपेन सौरमन्त्राणां शीघ्रफलत्वात्सौरमन्त्रान्रक्तचन्दनमालिकया जजापेत्यर्थः। स्रक्त्रयः, एकाच्त्वान्मयट् ॥

इदानीं श्लोकाष्टकेन हरपूजामाह—

हेमनामकतरुप्रसवेन
त्र्यम्बकस्तदुपकल्पितपूजः।
आत्तया युधि विजित्य रतीशं
राजितः कुसुमकाहलयेव ॥ ३४ ॥

हेमेति ॥ हेमनामकस्य धत्तूरस्य तरोः प्रसवेन विकसितकुसुमेन कृत्वा तेन नलेनोपकल्पिता पूजा यस्य स त्र्यम्बको राजितः शुशुभे। उत्प्रेक्षते—रतीशं युधि विजित्य बलादात्तया गृहीतया कुसुमरूपकाहलया धत्तूरपुष्पाकारवाद्यविशेषेणेव। कुसुमकाहलयोपलक्षित इवेति वा। शराणां कौसुमत्वाद्बाद्यित्राणामपि कौसुमतया युक्तत्वात्कामकाहलायाः कौसुमत्वमुचितमेव। पराभूतात्कामाद्बलाद्गृहीतया कौसुमकाहलयेव धत्तूरपुष्पेण राजित इत्यर्थः। अन्योपि शत्रुं जित्वा बलाद्गृहीतेन तच्छस्त्रवाद्यित्रादिना शोभते। सौन्दर्येण स्वस्पर्धितया स्वस्य शिवभक्तत्वात्कामस्य च शिवविरोधित्वात्स्वविरोधिनं स्वस्वामिविरोधिनं च स्मरं रणे जित्वा तस्माद्बलान्नलेनैव गृहीतया कुसुमकाहलयेव धत्तूरपुष्पेण कृत्वा नलेन कृतोपदः, अथच—कृतपूजः शुशुभे। सेवको हि स्वविरोधिनं स्वस्वामिविरोधिनं वा रणे जित्वा तच्छस्त्रवाद्यित्रादि बलाद्गृहीत्वा स्वामिन उपदीकरोति। तेन च स्वामी शोभते इति वा। प्रियतरेण धत्तूरपुष्पेण स नलः शिवमपूपुजदिति भावः। 'धत्तूरः कनकाह्वयः' इत्यमरः। 'वाद्यभाण्डविशेषे तु काहला' इति विश्वः ॥

अर्चयन्हरकरं स्मितभाजा
नागकेसरतरोः प्रसवेन।
सोयमापयदतिर्यगवाग्दि-
क्पालपाण्डुरकपालविभूषाम् ॥ ३५ ॥

अर्चयन्निति ॥ स्मितं विकासं भजते स्मितभाक् तेन विकसितेन नागकेसराख्यस्य तरोः प्रसवेन पुष्पेण कृत्वा हरकरं सुवर्णादिघटितदक्षिणामूर्त्यादिशिवप्रतिमापाणिमर्चयन् पूजार्थं स्थूलतरं शुभ्रतरं केसरतरुकुसुमं तत्पाणौ स्थापयन् सोयं नलस्तिरश्चया दिशः प्राच्यादिदिगष्टकाद् अवाच्या अधो दिशः सकाशादन्याऽतिर्यगवाग्दिक् ऊर्ध्वा दिक् तस्याः पालो रक्षको ब्रह्मा तस्य चिरकालघर्षणाद्गतकृत्तिं पाण्डुरं धवलतरं कपालं शिरस्तेन ब्रह्मकपालेन कृत्वा विभूषामलंकृतिं कपालरूपां विभूषामापयदलम्भयत्। हरेण ब्रह्मणः पञ्चमं शिरश्छिन्नं प्रायश्चित्तं कुर्वतो हरस्य भिक्षार्थं करे तिष्ठति। ततश्च तत्प्रतिमायामपि तेन भवितुं युक्तमिति केसरपुष्परूपेण ब्रह्मकपालेन तत्करमलंचकारेत्यर्थः। 'चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः' इत्यमरः। हरकरम्, अर्चनापेक्षया कर्मत्वम्। पक्षे आप्नोतेर्गत्यर्थत्वादणौ कर्तुर्णौ कर्मत्वम्। तिर्यगवागिति वाऽव्ययम्, अतिर्यगवाक् चासौ दिक् चेति समासः ॥

नीलनीरुहमाल्यमयीं स
न्यस्य तस्य गलनालविभूषाम्।
स्फाटिकीमपि तनुं निरमासी-
न्नीलकण्ठपदसान्वयतायै ॥ ३६ ॥

नीलेति ॥ स नलस्तस्य हरस्य स्फटिकनिर्मितामपि तनुं हरप्रतिमां नीलनीरुहाणां माल्यं माला तन्मयीं गलनालः कण्ठस्तस्य विभूषां भूषणं न्यस्य आबध्य नीलकण्ठवाचकं पदं तस्य सान्वयतायै अन्वयसाहित्याय नीलः कण्ठोऽस्येति संबन्धसार्थक्याय निरमासीन्निर्मितवान्। नीलोत्पलमालां कण्ठे बद्ध्वा स्फाटिकीमपि शिवप्रतिमां नीलकण्ठपदसहितामकरोदित्यर्थः। कण्ठे एव नीलोत्पलपूजां चकार, अन्यत्र तु चन्दनश्वेतपुष्पादिभिः पूजितवानिति भावः ॥

प्रीतिमेष्यति कृतेन ममेद-
र्कर्मणा पुररिपुर्मदनारिः।
तत्पुरः पुरमतोयमधाक्षी-
द्धूपरूपमथ कामशरं च ॥ ३७ ॥

प्रीतिमिति ॥ पुराणां दैत्यविशेषाणां रिपुः, तथा—मदनस्यारिः शिवो मम कृतेन ईदृशा कर्मणा पुरकामशरदाहरूपव्यापारेण प्रीतिमेष्यति प्रसन्नो भविष्यति। अतो हेतोरिव इति बुद्ध्येवायं नलस्तस्य पुररिपोः कामारेः पुरो धूपरूपं धूपस्वरूपम्, अथ च—धूपवेषधारिणं पुरं गुग्गुलुमधाक्षीत् ददाह। अथ तदहानन्तरं धूपविशेषरूपं कामशरं कामबाणं च ददाह। यस्यारिर्यद्दिपुशरश्च यदग्रे येन दह्यते स तस्मिन् प्रीत एव। शिवभयेन वेषान्तरधारिणं पुरं दैत्यं कामबाणं च मोहनाख्यं ददाहेत्यर्थः। धूपसमर्पणान्तां शिवपूजामकरोदिति भावः। ईदृशा पुष्पपूजान्तेन भक्तियुक्तेनापि कर्मणा पुररिपुः कामारिः शिवो मम कृते मदर्थं मयि विषये प्रीतिं न यास्यति एतावतापि संतुष्टो न भविष्यति, अतः कारणादिव तदग्रे पुरं कामशरं च ददाह। एवं कृते शंकरस्तुष्टो भविष्यतीति भाव इति वा। पुररिपुर्मदनारिरिति च योगस्यैवात्र प्राधान्यान्न पौनरुक्त्यम्। 'गुग्गुलौ कथितः पुरः' इति विश्वः। तत्पुरः शेषषष्ठी समासः। अन्यथा—अव्ययेन सह षष्ठीसमाससनिषेधः स्यात्। तदिति लुप्तषष्ठीकं विभक्तिप्रतिरूपकमव्ययं पृथक्पदं वा ॥

तन्मुहूर्तमपि भीमतनूजा-
विप्रयोगमसहिष्णुरिवायम्।
शूलिमौलिशशिभीततयाऽभू-
द्ध्यानमूर्च्छननिमीलितनेत्रः ॥ ३८ ॥

तदिति ॥ स चासौ मुहूर्तश्च तमपि तस्मिन्देवपूजाक्षणेपीत्यर्थः। भीमतनूजाविप्रयोगं वियोगमसहिष्णुरयं नलः शूलिमौलौ वर्तमानाच्छशिनो भीततयेव नेत्रध्यानेन यन्मूर्च्छनमेकाग्रताल—

क्षणः प्रलयस्तेन हेतुना निमीलिते संकोचितपक्ष्मीकृते नेत्रे येनैवंभूतोऽभूत् । विरहित्वाद्धरशिरश्चन्द्रदर्शनस्य नितरां संतापकारित्वभिया ध्यानमूर्च्छनव्याजेन नेत्रे निमीलितवानित्यर्थः । पूजानन्तरं शिवस्य ध्यानं चकारेति भावः । शूलधारिणापि यः शिरसि धृतः, तस्मादधिकं भयं युक्तमिति सूचयितुं शूलिपदं प्रायोजि । तन्मुहूर्तम्, अत्यन्तसंयोगे द्वितीया । विप्रयोगं, 'न लोका—' इति षष्ठीनिषेधाद्द्वितीया ॥

दण्डवद्भुवि लुठन्स ननाम
त्र्यम्बकं शरणभागिव कामः ।
आत्मशस्त्रविशिखासनबाणा-
स्त्र्यस्य तत्पदयुगे कुसुमानि ॥ ३९ ॥

दण्डवदिति ॥ स नलो दण्डेन तुल्यं साष्टाङ्गपातेन भुवि लुठन् सन् त्र्यम्बकं ननाम । किं कृत्वा—तस्य हरस्य पदयुगे पुष्पाञ्जलिदानार्थमञ्जलिदानाय धृतानि कुसुमानि न्यस्य समर्प्य । तत्रोत्प्रेक्षते—तान्येव कुसुमानि आत्मनः खड्गादि शस्त्रं विशिखासनं धनुः, बाणान् स्वशस्त्रभूतानि पुष्पाणि हरपदयुगे समर्प्य 'अद्यप्रभृति शस्त्रं न धारयामि दासोस्मि मां रक्ष' इत्यादि वदन् शरणं रक्षितारं शिवमेव भजमानो रूपसाम्यात्काम इव ध्यानानन्तरं पुष्पाञ्जलिदानपूर्वकं शक्त्यतिशयेन दण्डवत्प्रणाममप्यकरोदित्यर्थः । विशिखासनं तूणीरं वा । अन्योपि शरणागते एवमेव करोति ॥

त्र्यम्बकस्य पदयोः कुसुमानि
न्यस्य सैष निजशस्त्रनिभानि ।
दण्डवद्भुवि लुठन्किमु काम-
स्तं शरण्यमुपगम्य ननाम ॥ ४० ॥

त्र्यम्बकस्येति ॥ क्षेपकः । सैष इत्यत्र 'सोचि लोपे चेत्-' इति सुलोपः । पूर्वश्लोकोक्त एवार्थः ॥

व्यापृतस्य शतरुद्रियजप्तौ
पाणिमस्य नवपल्लवलीलम् ।
भृङ्गभङ्गिरिव रुद्रपराक्ष-
श्रेणिरश्रयत रुद्रपरस्य ॥ ४१ ॥

व्यापृतस्येति ॥ रुद्रशब्दात्परेषां पश्चादुच्चार्यमाणानामक्षाणां । रुद्राक्षाणामित्यर्थः । रुद्रः परः परं दैवतं येषां वा रुद्रपराः शिवभक्तास्तत्संबन्धिनां । तैर्धार्यमाणानामिति यावत् । तादृशानां वा मणीनां श्रेणिर्माला भृङ्गभङ्गिर्भ्रमरपङ्क्तिरिवास्य नलस्य नवपल्लववल्लीला यस्य तत्सदृशमित्यर्थः । एवंविधं पाणिं करमश्रयत सिषेवे । किंभूतस्य—रुद्रपरस्य शिवभक्तस्य, अत एव शतं रुद्रा देवता अस्य शतरुद्रसंबन्धिनः शतरुद्रियसंज्ञकस्य 'नमस्ते-' इत्यादि शिवसूक्तस्य जप्तौ जपे विषये व्यापृतस्य सव्यापारस्य रुद्राक्षाणां रुद्रपरत्वात् 'नमस्ते-' इत्यादिषडङ्गजपं रुद्राक्षजपमालया चकारेत्यर्थः ॥ भृङ्गमालापि नवपल्लवं सेवते । 'शतरुद्राद्यश्च' इति वक्तव्याद्धः । जप्तौ, 'तितुत्र-' इतीण्निषेधः । 'पद्माक्षैश्चैव रुद्राक्षैः-' इत्यादिहारीतोक्तो हरोक्तश्च जपमालाविधिर्द्रष्टव्यः । अणिमादिसिद्धये पाद्मो रौद्राक्षश्चेति ज्ञातव्यः ॥

उत्तमं स महति स्म महीभृ-
त्पूरुषं पुरुषसूक्तविधानैः ।
द्वादशापि च स केशवमूर्ती-
र्द्वादशाक्षरमुदीर्य ववन्दे ॥ ४२ ॥

उत्तममिति ॥ स महीभृत्तल उत्तमं परमं पूरुषं पुरुषोत्तमं पुरुषसूक्तस्य 'सहस्रशीर्षा पुरुषः-' इत्यादिषोडशर्चस्य सूक्तस्य विधानैरनुष्ठानप्रकारविशेषैः । 'दध्यात्पुरुषसूक्तेन यः पुष्पाण्यपि एव वा । अर्चितं स्याज्जगदिदं तेन सर्वं चराचरम् । आनुष्टुभस्य सूक्तस्य त्रिष्टुभ(ब)न्तस्य देवता । पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः ॥' तथा—'ॐकारपूर्वकैश्चैव षोडशर्चैः पृथक्पृथक् । आवाहनासनं पाद्यमर्घ्यमाचमनीयकम् । स्नानं वस्त्रोपवीतं च गन्धमाल्यानि च क्रमात् । धूपं दीपं च नैवेद्यं नमस्कारं प्रदक्षिणम् । षोडश्योद्वासनं कुर्यादेष नारायणो विधिः ॥' इति स्मृतिवाक्यविहितं प्रत्यृचक्रमनिर्दिष्टैः षोडशोपचारैर्महति स्मापूपुजत् । स नलः 'यवादेसुवा तेवगभ मोन ओम्' इति व्युत्क्रमोक्तद्वादशाक्षरं वासुदेवमन्त्रं वैष्णवागमोक्तक्रमेणोदीर्य सम्यगुच्चार्य द्वादशापि केशवसंबन्धिनीर्मूर्तीर्वैष्णवीर्द्वादशशालग्रामशिलामूर्तीर्ववन्दे तुष्टाव प्रणनाम वा । ता अप्यपूजयदिति भावः । 'शिला द्वादश भो वैश्य शालग्रामसमुद्भवाः । विधिवत्पूजिता येन तस्य पुण्यं वदामि ते ॥ कोटिद्वादशकैर्स्तु पूजितैः स्वर्णपङ्कजैः । यत्स्याद्वादशकल्पेषु दिनेनैकेन तद्भवेत् ॥' इति पद्मपुराणमिति भावः । पूर्वोक्तद्वादशाक्षरमुच्चार्य द्वादशसंख्याका अपि केशवसंबन्धिनीर्मूर्तीः सामर्थ्यादेतन्मन्त्राक्षरसूचिताः 'ॐ केशवाय धात्रे नमः' इति प्रकारेण 'द्वादशादित्यसहिता मूर्तीर्द्वादश विन्यसेत् । केशवाद्याः क्रमाद्देहे वक्ष्यमाणविधानतः ॥ ललाटे केशवं धात्रा कुक्षौ नारायणं पुनः । अर्यम्णा हृदि मित्रेण माधवः कण्ठदेशतः ॥ वरुणेन च गोविन्दं पुनर्दक्षिणपार्श्वके । अंशुना विष्णुमंसस्थं भगेन मधुसूदनम् ॥ गले विवस्वता युक्तं त्रिविक्रममनन्तरम् । वामपार्श्वस्थमिन्द्रेण वामनाख्यमथांसके ॥ पूष्णा श्रीधरनामानं गले पर्जन्यसंयुतम् । हृषीकेशाह्वयं पृष्ठे पद्मनाभं ततः परम् ॥ त्वष्टा दामोदरं पश्चाद्विष्णुना ककुदि न्यसेत् । द्वादशार्णं महामन्त्रं ततो मूर्ध्नि प्रविन्यसेत् ॥' इति द्वादशाक्षरगर्भितमिति ज्ञातव्यम् । प्रकारान्तरमागमोक्तं द्रष्टव्यम् । महीयानिति पाठे—नितरामागमशास्त्रकोविदः परमभक्तश्चेत्यर्थः । 'पुरुषाः पूरुषा नराः' इत्यमरः ॥

कथमपूपुजदित्याह—

मल्लिकाकुसुमदुण्डुभकेन
स भ्रमीवलयितेन कृते तम् ।
आसने निहितमैक्षत साक्षा-
त्कुण्डलीन्द्रतनुकुण्डलभाजम् ॥ ४३ ॥

मल्लिकेति ॥ स नलः भ्रमीभिर्भ्रमणैर्वेष्टनैर्वलयितेन मल्लिकाकुसुमसंबन्धिना दुण्डुभकेन निर्विषविफणस्थूलराजिलतुल्येन घनस्थूलतरदाम्ना कृत्वा नलेनैव कृते रचिते आसने निहितं स्थापितं

तं पुरुषोत्तमं साक्षात्तत्वतः कुण्डलिनौ चक्षुःश्रवसामिन्द्रः शेषस्तस्य तनुः शरीरं तस्य कुण्डलं पुच्छवेष्टितवलयाकारशरीरभागं तद्भजते इति कुण्डलाकारशेषशरीरे वर्तमानमिव ऐक्षत। दुण्डुभस्य विफणतया साम्यात्स्थूलघनतरे पुष्पदाम्नि दुण्डुभपदं लाक्षणिकम्। दुण्डुभप्रतिकृतिर्दुण्डुभकः 'इवे प्रतिकृतौ' इति कन्। 'दुडि निमज्जने' दुण्डतीति दुण्डुभ इत्यौणादिकः पृषोदरादिर्वा।

मेचकोत्पलमयी बलिबन्दु-
स्तद्वलिस्त्रगुरसि स्फुरति स्म।
कौस्तुभाख्यमणिकुट्टिमवास्तु-
श्रीकटाक्षविकटायितकोटिः ॥ ४४ ॥

मेचकेति ॥ मेचकोत्पलानि नीलोत्पलानि तन्मयी तद्वलिस्त्रक् तेन नलेन समर्पिता वलिस्त्रक् पूजामाला बलिबन्दुर्बलेर्बन्धनकारिणः श्रीविष्णोरुरसि स्फुरति स्माशोभत। उत्प्रेक्षते—कौस्तुभाख्यमणेः संबन्धि कुट्टिमं कौस्तुभमणिबद्धा भूर्यक्षोलक्षणा तद्वास्तु वसतिस्थानं यस्यास्तस्याः श्रियः कटाक्षाणां विकटायितानि विस्तारान्नीलतरनेत्रगोलकवक्त्रविस्फुरितकिरणास्तेषां कोटिः परम्परेव। नीलोत्पलमालाया वक्षस्येव वर्तमानत्वात्तत्रैव च लक्ष्म्या अपि वर्तमानत्वात्साम्यात्कटाक्षविकटायितं कोटिरिवाशोभतेति प्रतीयमानोत्प्रेक्षा। बलिबन्दुः, तृनि पूर्वेण 'द्वितीया' इति योगविभागात्समासः। विकटायितम्, आचारक्यङन्ताद्भावे निष्ठा ॥

स्वर्णकेतकशतानि स हेम्नः
पुण्डरीकघटनां रजतस्य।
मालयारुणमणेः करवीरं
तस्य मूर्ध्नि पुनरुक्तमकार्षीत् ॥ ४५ ॥

स्वर्णेति ॥ स नलस्तस्य पुरुषोत्तमस्य मूर्ध्नि हेम्नः सुवर्णघटितपुष्पाणां मालया कृत्वा स्वर्णकेतकीपुष्पाणां शतानि, तथा—रजतस्य रूप्यघटितपुष्पाणां मालया कृत्वा पुण्डरीकाणां सिताम्भोजानां घटनां समर्पणां, तथा—अरुणमणेः समर्पितमाणिक्यपद्मरागादिरक्तवर्णमणीनां मालया च कृत्वा करवीरपुष्पाणि, एतत्सर्वं पुनरुक्तमकार्षीत्। सवर्णेनान्येनैव पूजायाः सिद्धत्वात्स्वर्णकेतकादि निरर्थकं चकारेत्यर्थः। स्वर्णकेतकादिभिः। सुवर्णघटितपुष्पादिभिश्च श्रीपुरुषोत्तममपूपुजदिति भावः। विष्णुपूजायां कमलकरवीरजपाद्याणपुष्पव्यतिरिक्तानां रक्तपुष्पाणां निषेधः, गृहारोपितकरवीरकुसुमपूजानिषेधः, इत्यविरोधः। पुनरुक्तं, 'नपुंसकमनपुंसकेन—' इत्येकशेषैकवद्भावौ ॥

नाल्पभक्तबलिरत्ननिवेद्यै-
स्तस्य हारिणमदेन स कृष्णः।
शङ्खचक्रजलजातवदर्चः
शङ्खचक्रजलपूजनयाभूत् ॥ ४६ ॥

नाल्पेति ॥ स पुरुषोत्तमस्तस्य नलस्यान्ननिवेद्यैस्तेन समर्पितैर्नानाविधौदनानामुपहारैः कृत्वा नाल्पोऽतिमहान् भक्तबलिरोदनोपहारो यस्य, अथ च—अतिमहान् भक्तः श्रद्धापरो बलिर्वैरोचनिर्यस्य, एवंभूतोऽभूत्। तथा—नलसमर्पितेन हारिणमदेन कस्तूर्या कृष्णवर्णः, अथ च—कृष्णनामा, अभूत्। तथा—हेमरूप्यादिबद्धदक्षिणावर्तादिशङ्खानां चक्रं समूहस्तत्र स्थितेन जलेन कृत्वा या पूजा अभिषेकार्घदानादिरूपा तया कृत्वा शङ्खचक्रजलेन जातवती संपन्नार्चा पूजा यस्य, अथ च—शङ्खः पाञ्चजन्यः, चक्रं सुदर्शनः, जलजातं पद्मं, तानि विद्यन्ते यस्यास्तादृशी शङ्खचक्रपद्मयुक्ता अर्चा प्रतिमा यस्यैवंविधोऽभूत्। पुरुषोत्तमसंबन्धिनामेतेषां शब्दानामन्वर्थत्वमेव तत्कृतान्ननैवेद्यादिसमर्पणेनेदानीमभूदित्यर्थः। एतन्निबन्धना एवास्यैताः संज्ञा इति वा। अत्र प्रतीयमानोत्प्रेक्षा। 'प्रतिकृतिरर्चा पुंसि—' इत्यमरः। नाल्पेति नकारसमासः। हारिणेति संबन्धेऽण् ॥

राज्ञि कृष्णलघुधूपनधूमाः
पूजयत्यहिरिपुध्वजमस्मिन्।
निर्ययुर्भवधृता भुजगा भी-
र्दुर्यशोमलिनिता इव जालैः ॥ ४७ ॥

राज्ञीति ॥ कृष्णलघुः कृष्णागुरुस्तस्य धूपनधूमा धूपकरणसंबन्धिनो धूमा अस्मिन् राज्ञि नले अहिरिपुर्गरुडो ध्वजे यस्य तं गरुडध्वजं पुरुषोत्तमं धूपोपचारेण पूजयति सति जालैर्गवाक्षैर्बहिर्निर्ययुः। उत्प्रेक्षते—भीरेव दुर्यशो(?) गरुडासक्तिभयजन्येनायशसा स्वतो धवलतरा अपि मलिनिताः श्यामीकृताः देवतागारस्थितेन भयेन हरेण स्वदेहे भूषणत्वेन धृता वासुकिप्रमुखा भुजगा इव। अयमस्मद्रिपुकेतुं पूजयति, अतो रिपुनिकटे स्थातुमशक्यमिति हराश्रिताः शबला अपि सर्पा भीदुर्यशोमलिनिता इव दण्डायमानकृष्णधूमव्याजेन जालैर्निर्ययुरित्यर्थः। अन्योऽपि भीतिमलिनो जालादिद्वारेण बहिर्निर्गच्छति। 'धूपज—' इत्यपि पाठः। अगुरुपर्यायो लघुशब्दः। तेन कृष्णागुरुरित्यर्थः ॥

अर्घनिःस्वमणिमाल्यविमिश्रैः
स्मेरजातिमयदामसहस्रैः।
तं पिधाय विदधे बहुरत्न-
क्षीरनीरनिधिमग्नमिवैषः ॥ ४८ ॥

अर्घेति ॥ एष नलः अर्घेण मूल्येन निःस्वा दरिद्रास्तेषामत्युत्तमानां मणीनां माल्यैर्मालाभिर्विमिश्रैः स्मेरजातिमयदामसहस्रैर्विकसितमालतीकुसुममालासहस्रैस्तं पुरुषोत्तमं पिधायाच्छाद्यैव बहूनि रत्नानि यस्मिन्नेवंभूतो यः क्षीरनीरनिधिर्दुग्धसमुद्रस्तत्र मग्नमिव विदधे चकार। मध्ये मध्ये मणिमालाभिर्मध्ये मध्ये पुष्पमालाभिः संवेश्य बहुरत्नक्षीरसमुद्रशायिनमिव चकारेत्यर्थः। रत्नस्थाने रत्नान्येव, क्षीरस्थाने च तानि दामानि, तैराशिस्तं पर्यपूपुजदिति भावः। समृद्ध्यतिशयो भक्त्यतिशयश्च सूचितः। बहूनि रत्नानि क्षीराणि च यस्मिन्, स चासौ नीरनिधिश्चेति वा ॥

अक्षसूत्रगतपुष्करबीज-
श्रेणिरस्य करसंकरमेत्य।

१ 'आचारक्विबन्तात्' इति सर्वत्रोपलब्धोऽपि पाठो दुष्ट एव।

शौरिसूक्तजपितुः पुनराप-
त्पद्मसद्मचिरवासविलासम् ॥ ४९ ॥

अक्षेति ॥ अक्षसूत्रं जपमालां गतानि प्राप्तानि तत्र वर्तमानानि पुष्करबीजानि कमलबीजानि तेषां श्रेणिः पद्माक्षरजिता जपमालिका शौरिसूक्तजपितुः 'विष्णोर्नु कम्–' इत्यादिविष्णुसूक्तजपशीलस्यास्य नलस्य करसंकरं पाणिपद्मसंबन्धमेत्य प्राप्य पुनरपि पद्मरूपे सद्मनि स्वगृहे चिरं वासः स्थितिस्तेन कृत्वा यो विलासः शोभा तमापत्प्राप । विष्णुमन्त्रा हि पद्माक्षमालया जप्यन्ते, नलकरश्च पद्मसदृशः, तत्संबन्धात्पद्माक्षमाला पुनरपि पद्मसद्मनिवासं प्राप्ता वेति प्रतीयमानोत्प्रेक्षा । 'पुष्कराम्भोरुहाणि च' इत्यमरः । जपितुः, ताच्छील्ये तृनि 'द्वितीया' इति योगविभागात्पूर्वेण समासः ॥

कैटभारिपदयोर्नतमूर्ध्ना
सञ्चिता विचकिलस्रगनेन ।
जह्नुजेव भुवनप्रभुणाऽभा-
त्सेवितानुनयतायतमाना ॥ ५० ॥

कैटभेति ॥ अनुनयता अर्थान्मामेवं चरणसमीपं प्रापयता भुवनप्रभुणा लोकनाथेन नतमूर्ध्ना नम्रशिरसा प्रणामलक्षणं षोडशमुपचारं कुर्वताऽनेन नलेन कैटभारेः श्रीविष्णोः पदयोः सञ्चिता पुष्पाञ्जलित्वेन समर्पिता आयतमानाऽतिदीर्घा विचकिलस्रक् मल्लिकामाला जह्नुजा गङ्गेवाभात् । चरणसंबन्धादतिदैर्घ्याद्धवलतरत्वाच्च गङ्गेव शुशुभ इत्यर्थः । साऽप्येवंविधा । (अथच—) अन्यापि मानिनी नायिका एवंविधा प्रियेणैवमनुनीयते, अथच— भूलोकं प्रति गमनार्थं यतमाना सप्रयत्ना, अतएव—अनु पश्चान्नयता परावर्त्य पुनरपि ब्रह्मलोकं प्रापयता पुनरत्रागन्तव्यमिति प्रार्थ्यमानेन नतमूर्ध्ना लोकनाथेन ब्रह्मणा सेविता जाह्नवीव । भुवनप्रभुणा रुद्रेण वा । उक्तविशेषणविशिष्टेन जलप्रभुणा वरुणेन समुद्रेण वा सेवितेति वा । प्रणामान्तां षोडशोपचारपूजां समापयदिति भावः । 'स्मृतो विचकलो मल्लीप्रभेदे मदनेपि च' इति विश्वः ॥

स्वानुरागमनघः कमलायां
सूचयन्नपि हृदि न्यसनेन ।
गौरवं व्यधित वागधिदेव्याः
श्रीगृहोर्ध्वनिजकण्ठनिवेशात् ॥ ५१ ॥

इत्यवेत्य वसुना बहुनापि प्राप्नुवन्न मुदमर्चनया सः ।
सूक्तिमौक्तिकमथैरथ हारैर्भक्तिमेहत हरेरुपहारैः ॥५२॥

स्वेति ॥ इतीति ॥ युग्मम् ॥ स नल इति पूर्वोक्तं श्रीविष्णोरभिप्रायमवेत्य ज्ञात्वा बहुनापि वसुना स्वर्णमणिवसनादिना लक्ष्मीस्थानीयेन समर्पितेन कृतयाऽर्चनया मुदं न प्राप्नुवन् हर्षमलभमानः सन्, अथ पश्चात्सूक्तयः सरसशोभनपदबन्धास्तद्रूपाणि मौक्तिकानि तन्मयैर्हारैरेकावल्यादिहारैरेवोपहारैः पूजनैः कृत्वा हरेर्भक्तिमैहताकृतेत्यर्थः । सम्यगेवंविधं पूजनं कृत्वा श्रीपुरुषोत्तमदशावतारादिस्तुतिं प्रारेभ इति भावः । इति किम्—न विद्यते अघं दुःखं पापं दारिद्र्यं च यस्माद्धेतोः सोऽनघः पुण्यश्लोकः श्रीविष्णुः हृदि न्यसनेन स्थापनेन कृत्वा कमलायां लक्ष्म्यां विषये स्वस्यानुरागं प्रेमभरं तां प्रति लोकं प्रति वा सूचयन्नपि श्रीगृहाब्जहृदयादूर्ध्वे उपरिभागे वर्तमानो निजकण्ठस्रक्त्र निवेशात्स्थापनाद्धेतोर्वागधिदेव्याः सरस्वत्या गौरवं व्यधित बहु संमानमकृत । अन्योपि राजादिरेकां प्रियामधोभागे स्थापयन्नालिङ्गनादिना संभावयन्न्यां तत्सपत्नीं प्रियतमां तदीयगृहस्योर्ध्वदेशे स्थापयन् कण्ठाश्लेषं च कुर्वंस्तस्या गौरवं करोति । तथा विष्णोर्वक्षसि लक्ष्मीस्तिष्ठति, तदुपरिभागे कण्ठे सरस्वतीति विष्णोः सरस्वत्या गौरवमधिकमिति ज्ञात्वा सरस्वत्या कृत्वा स्तुतिं चक्र इत्यर्थः । मौक्तिकरूपेण सूक्तैर्नैर्मल्यं सूच्यते स्तुत्या नलस्य भक्तयतिशयश्च ॥

स्वमौद्धत्यं परिहरन्स्तुतिमाह—

दूरतः स्तुतिरवाग्विषयस्ते
रूपमस्मदभिधा तव निन्दा ।
तत्क्षमस्व यदहं प्रलपामी-
त्युक्तिपूर्वमयमेतदवोचत् ॥ ५३ ॥

दूरत इति ॥ अयं नल इति उक्तिपूर्वं यथा तथा पूर्वमेवमुक्त्वा एतदुच्यमाणमवोचत् । इति किम्—हे स्वामिन्, ते तव स्तुतिर्दूरतो नितरामवाग्विषयो वाचामगोचरः । यतस्तव रूपं 'यतो वाचो निवर्तन्ते—' इत्यादिश्रुतेः । अर्थाद्गोचरो नेति स्वदीया स्तुतिः कथंकारं कर्तुं शक्या । स्वरूपकथनेऽप्यशक्यत्वात्तव स्तुतिरप्यशक्यकरणेवेत्यर्थः । अतएव अस्माभिः कृता अभिधा भवद्गुणवर्णनविषया वाणी तव निन्दैव । अत्यन्ताल्पकस्तावकत्वात् अवाग्गोचरस्यापि वाग्गोचरकरणाच्चेत्यर्थः । एवंसत्यपि मूर्खतया यदहं प्रलपामि स्वरूपाज्ञानान्निरर्थकं वदामि तत् क्षमस्वेति । प्रलपामीत्यनेन नितरामनौद्धत्यं सूचितम् ॥

स्वप्रकाश जड एष जनस्ते
वर्णनं यदभिलप्यति कर्तुम् ।
नन्वहर्पतिमहः प्रति स स्या-
न्न प्रकाशनरमस्तमसः किम् ॥ ५४ ॥

स्वेति ॥ हे स्वप्रकाश सूर्यादिवत्प्रकाशान्तरनिरपेक्ष परमात्मन् एष मल्लक्षणो जडोविद्याच्छादितचैतन्यो जनस्ते वर्णनं कर्तुं यदभिलप्यति सोऽर्हपतेः सूर्यस्य महस्तेजः प्रति लक्षीकृत्य सूर्यतेजोऽहं प्रकाशयिष्यामीति तमसोऽन्धकारस्य प्रकाशने रसोऽनुरागः किं न स्यात्, अपिनु स्वप्रकाशस्य तव वर्णने जडस्य ममाभिलाषः सूर्यतेजःप्रकाशने तमसोऽभिलाष इवात्यन्तमनुचित एवेत्यर्थः । आत्मा स्वप्रकाश इति वेदान्तसिद्धान्तः ॥

---

१ 'प्राप्तवानित्यपि पाठे—नलविशेषणम्' इति सुखावबोधा ।
२ सूक्तेति पाठः सुखावबोधासंमतः ।

३ 'अभिधाः' इति बहुवचनान्तपाठः सुखावबोधासंमतः ।

ननु यदि त्वं जडो मदीयस्वरूपं न जानासि, तर्हि त्वदीये वाङ्मनसे कथं मत्परायणे इत्याशङ्कां परिहरन् स्तुत्यवसरं दातुमाह—

मैव वाङ्मनसयोर्विषयो भू-
स्त्वां पुनर्न कथमुद्दिशतां ते ।
उत्कचातकयुगस्य घनः स्या-
त्तृप्तये घनमनाप्नुवतोपि ॥ ५५ ॥

मैवेति ॥ हे भगवन्, त्वं 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इत्यादिश्रुतिप्रामाण्याद्वाङ्मनसयोर्विषयो गोचरो मैव भूः ताभ्यां ग्रहीतुं न शक्यः स एव यद्यपि, तथापि ते वाङ्मनसे पुनस्त्वां कथं नोद्दिशताम्, अपितु अविषयमपि त्वामुद्दिश्य प्रवर्तेतामित्यर्थः । दृष्टान्तमाह—अतिदूरवर्तित्वात् घनं मेघमनाप्नुवतोऽलभमानस्याप्युत्कस्योत्कण्ठितस्य चातकस्त्रीपुंसयुगस्य घनो मेघो जलदानेन तृप्तये स्यादेवेति दृष्टान्तेनाविषयोपि भवान् स्तुतो ध्यातश्च मोक्षहेतुः । स्वयमेवानुग्रहीष्यतीति तव स्तुतिः कर्तुं युक्तैवेति भावः । वाङ्मनसयोः, 'अचतुर—' इत्यादिना साधुः ॥

इदानीं प्रथमं मत्स्यावतारं स्तोतुमाह—

छद्ममत्स्यवपुषस्तव पुच्छा-
स्फालनाज्जलमिवोद्धतमब्धेः ।
श्वैत्यमेत्य गगनाङ्गणसङ्गा-
दाविरस्ति विबुधालयगङ्गा ॥ ५६ ॥

छद्मेति ॥ हे हरे, शङ्खासुरापहृतवेदोद्धरणरूपच्छद्मना मत्स्य एव वपुर्यस्य तस्य तव पुच्छेनास्फालनादाघातादूर्ध्वमुद्धृतं क्षिप्तमुच्छलितं सागरजलमिव गगनाङ्गणस्य सङ्गात्संबन्धाच्छैत्यं धवलतामेत्य प्राप्य विबुधालयस्य स्वर्गस्य गङ्गा मन्दाकिनी आविरस्ति प्रकटीभवति । तदेव जलं मन्दाकिनीभूय गगने स्फुरतीत्यर्थः । वेदसंरक्षणद्वारा लोकानुग्रहार्थमेव त्वया त (त्त)च्छरीरं धार्यते इति भावः । एवमुत्तरत्रापि ज्ञेयम् । श्वैत्यमेत्येवेति वान्वयः । 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत' इत्यादि श्रीकृष्णवचनमेव छद्मपदेन सूचितम् । सागरोदकस्याश्रयौपाधिकतया प्रतिभासमानस्यापि गगने क्षिप्ततया निरुपाधिकं शुक्लमेवापां रूपं प्रकटितमित्यनेनातिस्थूलतरशरीरत्वं सूचितम् । नदी चाद्यापि तथैव तिष्ठति, नत्वधः पततीति सामर्थ्यातिशयः सूच्यते । यद्यपि नलः शैव इति प्रथा तथापि शिवस्य विष्णुभक्तत्वाद्विष्णुस्तुत्यैव शिवस्य प्रीतिसंभवादैकरूप्याच्च नलस्य विष्णुस्तुतिकरणम् । श्रीहर्षस्य च परमवैष्णवत्वात्पुरुषोत्तमस्तुतिनिबन्धनं युक्तमेवेति न काचिदनुपपत्तिः । अतएवोपसंहारेपि 'हरिहरं परिपूज्य' इत्युक्तम् ॥

कूर्मं वर्णयति—

भूरिसृष्टिधृतभूवलयानां
पृष्ठसीमनि किणैरिव चक्रैः ।
चुम्बितावतु जगत्क्षितिरक्षा-
कर्मठस्य कमठस्तव मूर्तिः ॥ ५७ ॥

भूरीति ॥ हे भगवन्, तव कमठसंज्ञा मूर्तिर्जगद् अवतु । किंभूता—भूरिषु सृष्टिषु प्रतिसर्गे धृतानां भूवलयानां किणैरतिघर्षणनिष्ठुरीभूतसंजातवैवर्ण्यत्वग्व्रणैरिव चक्रैश्चक्राकाररेखाविन्यासविशेषैः पृष्ठस्य सीमनि स्थले चुम्बिता स्पृष्टा । किंभूतस्य—क्षितौ क्षये प्रलये रक्षायां च कर्मठस्य कर्मशूरस्य पृष्ठे धारणेन क्षितिरक्षणक्षमस्य । पृथ्वीधारणद्वारा लोकानुग्रहार्थमेव कमठरूपं त्वया धृतमिति भावः । सप्तपातालान्तेऽधस्तात्फणामण्डलेन शेषो भुवं बिभर्ति, ततोऽप्यधो ब्रह्माण्डाधः कटाहस्य भारं पृष्ठे वहन् ब्रह्माण्डावरण(जलावरण)रूपे जले कूर्मराजो वर्तत इति पुराणम् । एतेन प्रतिसर्गमनन्तभूमण्डलधारणेनानिर्वाच्यमहिमत्वं सूचितम् । कमठपृष्ठे च स्वभावतश्चक्राणि भवन्ति ॥

श्लोकद्वयेन वराहं वर्णयति—

दिक्षु यत्खुरचतुष्टयमुद्रा-
मभ्यवैमि चतुरोपि समुद्रान् ।
तस्य पोत्रिवपुषस्तव दंष्ट्रा
तुष्टयेऽस्तु मम वास्तु जगत्याः ॥ ५८ ॥

दिक्ष्विति ॥ अहं चतसृषु प्राच्यादिदिक्षु चतुरोपि समुद्रान् यस्य वराहस्य खुराणां चतुष्टयस्य मुद्रां विन्यासं स्थापितचरणातिभारसंजातभूगर्तमेवाभ्यवैमि जाने, तस्य पोत्रिवपुषो महावराहदेहस्य तव दंष्ट्रा मम तुष्टये कामपूर्त्यानन्दायास्तु । किंभूता दंष्ट्रा—जगत्याः पातालादुद्धरणाद्भूमेर्वास्तु वसतिगृहम् । धृतभूमिरित्यर्थः । 'कोलः पोत्री किरिः किटिः' इत्यमरः । पित्रवप्राप्तस्य स्त्रीपोऽनित्यत्वादंष्ट्रा ॥

उद्धृतिस्खलदिलापरिरम्भा-
ल्लोमभिर्बहिरितैर्बहुहृष्टैः ।
ब्राह्ममण्डमभवद्वलिनीपं
केलिकोल तव तत्र न मातः ॥ ५९ ॥

उद्धृतीति ॥ हे केल्या क्रीडामात्रेण कोल धृतवराहरूप भगवन्, हिरण्याक्षं दैत्यं हत्वा पातालात्सकाशादुद्धृतावुद्धरणसमये स्खलन्त्याः पतन्त्या इलाया भुवः परिरम्भात्समारम्भेण धारणादालिङ्गनाच्च हेतोर्बहु नितरां हृष्टैरुन्नतीभूतैः, अतएव—ब्रह्माण्डं निर्भिद्य बहिरितैर्निर्गतैर्लोमभिः कृत्वा ब्राह्ममण्डं तव बलेः पूजायाः संबन्धि नीपं तत्कालविकसितकदम्बकुसुममिवाभवत् । किंभूतस्य—तत्र ब्रह्माण्डे स्थूलतरदेहत्वान्न मातः संमातुमशक्तस्य । एवंविधकुसुमपूजायोग्यस्त्वमेव भवसीत्यर्थः । अन्योपि योषिदालिङ्गनादुदितरोमाञ्चो भवति । 'ब्राह्मोजातौ' इति साधुः । मातः, 'मा माने' इत्यस्माच्छता ॥

श्लोकद्वयेन श्रीनृसिंहं वर्णयति—

दानवाद्यगहनप्रभवस्त्वं
सिंह मामव रवैर्घनघोरैः ।

---

१ 'मातुः' इति पाठो जीवातुसंमतः ।

वैरिदारिदिविषत्सुकृतास्त्र-
ग्रामसंभवभवन्मनुजार्धः ॥ ६० ॥

दानवेति ॥ हे सिंह, दानवानामाद्यस्य प्रथमस्य हिरण्यकशिपोर्गहनं मरणरूपं संकटं तदर्थं प्रभव उत्पत्तिः प्राकट्यं यस्य तन्मारणार्थं कृतावतारः, अथच—दानवो हिरण्यकशिपुस्तद्रूपमाद्यं पुरातनं यद्गहनं वनं तत्र प्रभवो यस्य । पुरातने हि वने सिंहसंभवो युक्तः, अथच—दानवानामाद्यः श्रीहरिभक्तत्वान्मुख्यः प्रह्लादस्तस्य गहने पितृकारिततादनादिदुःखनिमित्ते हिरण्यकशिपुविदारणद्वारा भक्तप्रह्लादसंरक्षणार्थं धृतोत्पत्तिर्येन तादृशस्त्वं घनवन्मेघवद्घोरैर्गम्भीरैर्निबिडैर्भीषणैश्च वा रवैः सिंहनादैर्मामव । किंभूतः—वैरिणः शत्रून्दारयन्ति तच्छीलानि दिविषदां मुनीनां देवानां च सुकृतानि अस्त्राणि च तेषां ग्रामः समूहस्तस्मात् संभव उत्पत्तिर्यस्य तादृशो भवन् संपद्यमानो मनुजो मनुष्य एवार्ध एकदेशो यस्य । 'दानवाद्य-' इति पाठे—दानवानां पापानि तेषां गहनं लक्षणया बाहुल्यं तेन प्रभवो यस्य । दानवदुरितोद्रेकात्तिर्यग्योनिसिंहरूपत्वं, दिविषत्पुण्योद्रेकाच्चोत्तमयोनिमनुष्यरूपत्वमित्यर्थः । दानवानामाद्यस्य हिरण्यकशिपोर्गहने सभामहोद्याने प्रभवः प्रकटनं यस्य वा । एतेन स्वर्गवासिनां पुण्यैरस्त्रैश्च कृतमनुष्यार्धदेहः स्वतेजोनिर्मितसिंहार्धश्च नरहरिर्हिरण्यकशिपोर्महासभोपवने एवावततारेति सकलपुराणसंवादः प्रकटितः । स्तम्भादिति तु प्रवादमात्रमिति भागवतविरोधादुपेक्ष्यम् ॥

दैत्यभर्तुरुदरान्धुनिविष्टां
शक्रसंपदमिवोद्धरतस्ते ।
पातु पाणिशृणिपञ्चकमस्मा-
ञ्छिन्नरज्जुनिभलग्नतदभ्रम् ॥ ६१ ॥

दैत्येति ॥ हे श्रीनृसिंह, ते पाणिसंबन्धिनां शृणीनां तीक्ष्णतरनखरूपाणामङ्कुशानां पञ्चकमस्मान्पातु । किंभूतस्येव तव—दैत्यभर्तुर्हिरण्यकशिपोरुदरलक्षणेऽन्धौ कूपे निविष्टां पतितां शक्रसंपदमुद्धरत इव तस्माद्बहिर्निर्गमयत इव । किंभूतं पञ्चकम्—छिन्नरज्जुनिभानि मध्यत्रुटितपूर्वपतितदोरकतुल्यानि लग्नानि तस्य दैत्यरिपोरुदरस्य चाभ्राणि यत्र यस्य वा यथा कूपपतितं वस्तु समुद्धर्तुं लौहनिर्मिताङ्कुशपञ्चकं कूपमध्ये निक्षिप्य चालयित्वा पूर्वनिमग्नरज्जुखण्डसहितं तदादाय निर्गच्छति तथा तव रज्जुस्थानीयभुजदण्डकपाणिजशृणिपञ्चकं दैत्यराजोदरकूपपतितामिन्द्रसंपदमुद्धरच्छिन्नरज्जुनिभलग्नतदभ्रं सन्मामवत्वित्यर्थः । शृणानि हिनस्ति, शृणिरौणादिकः । 'अस्मदो द्वयोश्च' इति बहुत्वम् ॥

श्लोकचतुष्टयेन वामनं वर्णयति—

स्वेन पूर्यत इयं सकलाशा
भो बले न मम किं भवतेति ।
त्वं बटुः कपटवाचि पटीया-
न्देहि वामन मनःप्रमदं नः ॥ ६२ ॥

स्वेनेति ॥ हे वामन, इति पूर्वार्धोक्ता कपटवाक् तस्यां विषये पटीयानतिनिपुणो बटुर्ब्रह्मचारिवेषधारी चपलस्त्वं नोऽस्मदादीनां मम वा मनसः प्रमदं हर्षं देहि सर्वाभिलाषपूरणं कुर्वित्यर्थः । बटवश्च कपटवाचो भवन्ति । इति किम्—पादत्रयमात्रस्थलयाचिनि वामने 'किमेतदल्पीयस्त्वया याचितं सकलमेतद्भुवनं गृहाण, अहं ददामि' इति दानशूरत्वाद्बलिचक्रवर्तिनि भाषमाणे श्लेषवक्रोक्तिरूपच्छलेन वामनस्य प्रत्युत्तरमेतत्—भो बले चक्रवर्तिन्, भवता स्वेनात्मना हेमरत्नादिना द्रव्येण वा इयं मदीया सकलाशा सर्वाऽप्यभिलाषो न पूर्यते, अपितु परिपूर्णा करिष्यत एव परं मम (यतस्य) भिक्षोः निःस्पृहस्य वा किं प्रयोजनमिति शेषः । त्वं समर्थ एव परं तावता मम प्रयोजनं नास्ति । कुटीनिर्माणार्थं पदत्रयमितं स्थलमेव देहीत्यर्थः । स्वेनात्मीयेन बलेन च सैन्येन च निजशक्त्या वा सकला दिक् भवता पूर्यते त्रियत एव, तथापि मम किं तेन, यो यद्याचते तस्मै तद्दातीति प्रत्यक्षदर्शनाद्वस्त्वभिनयदर्शनीयेयं सकलानां जनानां तृष्णा भो बले, त्वया परिपूर्णा क्रियते यतः, अतो मम कलया लेशेन सहिता । अल्पीयसीति यावत् । एवंभूता पदत्रयमिता तृष्णा किं न पूर्यते अपि तु पूरयिष्यत एव । अथ च—भो बले, इयं सकलापि दिशा मम स्वेनात्मना न पूर्यते, अपित्वावरिष्यत एव । भवता किं कर्तुं शक्यते, अपि तु न किंचिदित्यर्थ इति वा । मया सकलाप्याशा सकला दिगात्मना पूर्यते, भवता बलेन मम किं कर्तुं शक्यत इति वा । अथ च—भो बले, पादत्रययाचनविषया मम सकला तृष्णा भवता स्वेनात्मस्वरूपेण स्वदेहेन किं न पूर्यते, अपि तु पूरयिष्यत एव । महीयःशरीरधारणेन लोकद्वये पदद्वयेन मया व्याप्ते प्रतिश्रुतं तृतीयं पादमदातुर्निरयो भविष्यतीति भिया शिष्टपदस्थापनार्थं स्वशरीरमेव त्वया दास्यते इत्यर्थः । त्वां पातालं पातयिष्यामीति भावः । भूस्वर्गरूपं लोकद्वयमेव बलेः स्वम् । नरकपतनभिया स्वशरीरमेव तृतीयपदत्वेन दत्तमिति श्रीभागवते 'पदं तृतीयं कुरु शीर्ष्णि मे निजम्' इति वचनात् । इत्यादिकपटवाग्ज्ञेया । 'प्रमदसंमदौ हर्षे' इति साधुः ॥

एवं वामनेनोक्ते बलिरुत्तरमाह—

दानवारिरसिकायविभूते-
र्वेश्मि तेस्मि सुतरां प्रतिपत्तिम् ।
इत्युदग्रपुलकं बलिनोक्तं
त्वां नमामि कृतवामनमायम् ॥ ६३ ॥

दानेति ॥ अहं कृता वामनस्य ह्रस्वपुरुषस्य माया येन तथाहमनेन ज्ञात इति ज्ञात्वा जाताश्चर्यवशादुद्ग्रपुलकं संजातरोमाञ्चं बलिना इति पूर्वार्धोक्तप्रकारेण बलिचक्रवर्तिनोक्तं भाषितं त्वां नमामि । इति किम्—हे ब्रह्मन्, अस्मि अहं दानवारिणि रसिकाय कृताभिलाषाय ते तुभ्यं विभूतेः स्वीयसंपदः सुतरां प्रतिपत्तिं संकल्पेन दानं वेश्मि इच्छामि सर्वां संपदं तुभ्यं दातुमिच्छामि । अथ च—त्वं दानवानामरिः शत्रुरसि ते तव कायविभूतेः शरीरवैभवस्य प्रतिपत्तिं ज्ञानं नितरामहमिच्छामि । कीदृशं महच्छरीरं धारयिष्यसि, तद्द्रष्टुमिच्छामीत्यर्थः । यद्वा तव कायवैभवस्य प्रतिपत्तिं रूपान्तरप्राप्तिं वेश्मि । रूपान्तरं धारयिष्यामीति त्वया सूचितम् । तत्सुखेन धारणीयमित्यहं कामय इत्यर्थः । अस्मीत्यहमर्थेऽव्ययम् ॥

एवं बलिनोक्ते वामनः प्राह—

भोगिभिः क्षितितले दिवि वासं
बन्धमेष्यसि चिरं ध्रियमाणः ।
पाणिरेष भुवनं वितरेति
छद्मवाग्भिरव वामन विश्वम् ॥ ६४ ॥

भोगिभिरिति ॥ हे वामन, इति एवंरूपाभिश्छद्मवाग्भिः कपटवचनैरुपलक्षितस्त्वं विश्वमव रक्ष । इति किम्—बले, चिरं चिरायुषेण बहुकालं क्षितितले भूलोके दिवि वा ध्रियमाणोऽवतिष्ठमानस्त्वं भोगिभिर्मित्रभ्रात्रातिथिभिः सह संयोगं प्राप्स्यसि यदि । यदि भूलोकेऽवस्थितिमिच्छसि तर्हि तत्र, यदि दिवि तर्हि तत्र वा, मित्रादिभिः सह सुखेन चिरकालमवस्थितिं प्राप्स्यसीत्यर्थः । इत्याशीः । एष प्रतिग्रहार्थं प्रसार्यमाणः प्रत्यक्षदृश्यो मम करोस्ति तस्मादत्र पाणौ पदत्रयदानसंबन्धि भुवनं जलं वितर देहीति । अथच—क्षित्यास्तले पाताललक्षणे दिवि रमणीयत्वात्स्वर्गे भोगिभिः सर्पैर्ध्रियमाणो बध्यमानः सन् चिरकालं वासं दुःखबहुलत्वाद्बन्धतिरूपं बन्धं बन्धनं प्राप्स्यसि । यद्वा—चिरं जीवन् पाताले सर्पैः सह वासं बन्धनं चैष्यसि । यद्वा—सर्पैः क्रियमाणं बन्धनं ध्रियमाणो धारयन्सन् पाताले वासमेष्यसि वा । इवार्थो वा दिवि वेत्यर्थः । यथा सुखिभिः सह स्वर्गे तिष्ठन् संबन्धं प्राप्नोपि तथेदानीमेव पाताले सर्पैः सह संबन्धमेष्यसि । यद्वा—अदिवि स्वर्गव्यतिरिक्ते पाताले तृतीयपादार्थे स्वर्गात्सकाशात्त्वामस्वर्गरूपे पाताले पातयिष्यामीत्यर्थः । एष चक्रविक्षेपतत्परो मम करोस्ति, इन्द्राद्गृहीतं भुवनं त्रैलोक्यं देहि पुनस्मभ्यं समर्पयेति । भुवनं वितरेत्यवतारप्रयोजनं सूच्यते । 'जीवनं भुवनं वनम्' 'विष्टपं भुवनम्–' इत्यमरः ॥

एवं वामनेनोक्ते बलिः पुनराह—

आशयस्य विवृतिः क्रियते किं
दित्सुरस्मि हि भवच्चरणेभ्यः ।
विश्वमित्यभिहितो बलिनास्मा-
न्वामन प्रणतपावन पायाः ॥ ६५ ॥

आशयस्येति ॥ हे वामन, प्रणतपावन, बलिना इति पूर्वोक्तप्रकारेणाभिहित उक्तस्त्वमस्मान् पाया रक्ष । इति किम्—भो वामन, त्वया शयस्य पाणेर्विवृतिः प्रसारणं किं क्रियते, अपितु तन्न कर्तव्यम् । आशब्दोऽयोग्यतया शिरःकम्पपूर्ववारणाभिनये । अनुचितमेतन्न कर्तव्यमित्यर्थः । आ सामस्त्येन नितरां शयस्य विवरणं किं क्रियते अपितु तन्न कर्तव्यमिति वा । वाक्यपूरणे वा । हि यस्माद्भवच्चरणेभ्यः पूज्येभ्यो भवद्भ्यो विश्वं सकलं हेमरत्नादि वा दित्सुर्दातुमिच्छुरस्मि । चरणशब्दः पूज्यार्थः । अहं सर्वमिदानीमेव ददामि किमिति पाणिप्रसारणेनैतदर्थैर्यं प्रकटीक्रियत इत्यर्थः । अथच—सहस्रपात्त्वाद्बहुभ्यो भवदीयपादेभ्यः सर्वं दित्सुरस्मि सर्वस्वदानेन भवच्चरणान् पूजयिष्यामि । तस्मात्करप्रसारणं किं क्रियते ॥

श्लोकत्रयेण[1] परशुरामं स्तौति—

क्षत्रजातिरुदियाय भुजाभ्यां
या तवैव भुवनं सृजतः प्राक् ।
जामदग्न्यवपुषस्तव तस्या-
स्तौ लयार्थमुचितौ विजयेताम् ॥ ६६ ॥

क्षत्रेति ॥ हे भगवन्, तव तौ भुजौ विजयेतां सर्वोत्कर्षेण वर्तेताम् । तौ कौ–प्राक् सृष्ट्यादौ भुवनं सृजतो ब्रह्मरूपिणस्तवैव 'बाहू राजन्यः कृतः' इति श्रुतिप्रामाण्याद्भुजाभ्यां सकाशाद्या क्षत्रजातिः क्षत्रियमात्रमुदियायोत्पन्नम् । तस्याः क्षत्रजातेर्लयार्थं क्षयार्थं जामदग्न्यवपुषस्तव तौ (यौ) भुजौ उचितौ । कारणे कार्यलयस्यौचित्यात् । 'अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् । एषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥' इति भारतवचनाच्च । अवतारप्रयोजनमुक्तम् । जातेर्नित्यत्वादुत्पत्तिविनाशावयुक्ताविति ये आक्षिपन्ति, ते आविर्भावतिरोभावयोर्विवक्षितत्वेनोत्तरणीयाः । वेदान्तसिद्धान्ते जातेर्नित्यत्वाभाव इत्यपि । जामदग्न्येति गर्गादिषु पाठसामर्थ्याद्यञिति ज्ञेयम् । विजयेतां, 'विपराभ्यां जेः' इति तङ् ॥

पांसुला बहुपतिर्नियतं या
वेधसारचि रुषा नवखण्डा ।
तां भुवं कृतवतो द्विजभुक्तां
युक्तकारितरता तव जीयात् ॥ ६७ ॥

पांसुलेति ॥ नियतं सर्वदा पांसुला धूलिबहुला बहवो मन्वादयः पतयो यस्याः सा मन्वादिभिः पालिता च या भूर्वेधसा रुषेव नवखण्डा भरतादिनवसंख्याविभागा अरचि निर्मिता, तां नवखण्डामपि सकलां भुवं द्विजभुक्तां काकादिपक्षिभिः कृतोपभोगां व्याप्ताम् । अथ च—ब्राह्मणैर्गृहीतफलां कृतवतस्त्रिःसप्तकृत्वः क्षत्रियमात्रं हत्वा निष्कण्टकीकृत्य प्रतिवारं ब्राह्मणेभ्यो ददतस्तव युक्तकारितरता नितरामुचितकरणशीलता जीयात्सर्वोत्कर्षेण वर्तताम् । एवंविधमतिशूरं दानशूरं च त्वां प्रति प्रणतोऽस्मीत्यर्थः । नियतमित्युत्प्रेक्षायां वा । रुषा नियतं रुषेवेत्यर्थ इति वा । अथ च—या स्वैरिणी अत एव बहुभिर्जारैर्भुक्ता सती तद्भर्त्रा कोपेन करचरणादिसंधिषु पृथक्छेदेन तत्कालं नवानि प्रत्यग्राणि खण्डितानि यस्यास्तादृशी कृतानां खण्डानामग्निसंस्कारनिवारणाद्धेतोः काकादिभिः पक्षिभिर्भक्षितां कुर्वतो भर्तुर्युक्तकारिता सर्वैः कीर्त्यते । 'स्वैरिणी पांसुला समा' इत्यमरः ॥

कार्तवीर्यभिदुरेण दशास्ये
रैणुकेय भवता सुखनाश्ये ।
कालभेदविरहादसमाधिं
नौमि रामपुनरुक्तिमहं ते ॥ ६८ ॥

कार्तवीर्येति ॥ हे रैणुकेय रेणुकापुत्र, कार्तवीर्यभिदुरेण यदीयकारागारे निबद्धो रावणोपि बहूनि वर्षाणि अतिष्ठत्, तं कार्त-

---

१ 'द्विश्लोक्या परशुरामं स्तौति' इति सुखावबोधा ।

वीर्यं सहस्रार्जुनं हतवता भवता दशास्ये सुखेन क्लेशरहितमनायासेन नाश्ये हन्तुं शक्ये सति कालभेदस्य विरहादुभयोरवतारयोरेककालावस्थानस्वादसमाधिं परिहाररहितां मनुष्यावतारेण क्षत्रियेण त्वयैव रावणे हन्तुं शक्ये सति मनुष्यावतारेण क्षत्रियेण दाशरथिना रामेण विधेयान्तराभावादहं तस्मिन्नेव काले किमर्थमवतीर्णमिति वक्तुमशक्यत्वात्प्रयोजनाभावादहं ते रामपुनरुक्तिं दाशरथिरूपां वा जामदग्न्यरूपां वा नौमि स्तौमि । अन्यत्र तु पुनरुक्तेः कार्यभेदात्कालभेदाद्वा परिहारः कर्तुं शक्यते । वीप्सायामप्येककालप्रयुक्तस्यापि शब्दस्य भयादरसंभ्रमादिना परिहारोस्त्येव । अत्र तु पूर्वेणैवोत्तरावतारकार्यस्यापि कर्तुं शक्यत्वात्कार्यभेदाभावाच्च परिहारो नास्तीत्यर्थः । स्वतश्चस्य तव केनाप्यनुपयोगः कर्तुं न शक्यते इति भावः । जामदग्न्यस्य मानुषत्वेपि दैवज्ञान(भाव)स्य तथैव तद्भावात्, देवाद्यावध्यत्वस्य रावणेन वृतत्वात्, तस्य तेन हन्तुमशक्यत्वात्, रावणवधपर्यन्तं च श्रीरामस्य दैवज्ञानाभावान्मानुषत्वेन तेनैव हन्तुं शक्यत्वात्कार्यभेदादेकस्मिन्नपि कालेऽवतारान्तरस्य युक्तत्वात्सूक्ष्मः परिहारोऽस्त्येव तथापि स्थूलदृष्ट्या परिहाराभाव उक्त इति ज्ञेयम् । नर्मदायां जलक्रीडां कुर्वता सहस्रार्जुनेन रावणः कारागारे निक्षिप्त इतीतिहासः । रैणुकेयेति क्षत्रियत्वसूचनम् । अपत्यार्थे 'स्त्रीभ्यो ढक्' ॥

अथ दशभिः श्लोकैर्दाशरथिं रामं स्तौति—

हस्तलेखमसृजत्खलु जन्म-
स्थानरेणुकमसौ भवदर्थम् ।
राम राममधरीकृततत्त-
ल्लेखकः प्रथममेव विधाता ॥ ६९ ॥

हस्तेति ॥ भो राम दाशरथे, असौ विधाता भवदर्थं स्वादृशोत्तमशिल्पनिर्माणार्थं जन्मस्थानं रेणुका एकवीरा यस्य तादृशं रामं प्रथमं स्वदपेक्षया आद्यं जामदग्न्यं खलु निश्चितं हस्तलेखमेवासृजत् चक्रे । स्वन्निर्माणार्थं जामदग्न्यं हस्ताक्षराभ्याममेवाकरोदित्यर्थः । खल्विवार्थो वा । हस्तलेखमिव चक्रे । किंभूतः—अधरीकृता एतादृशनिर्माणासमर्थत्वान्निहीनाः कृतास्ते ते प्रसिद्धा लेखा देवा इन्द्रादयो दक्षप्रभृतयोऽष्टौ प्रजापतयो वा येन तादृशः । अथवा–अनधराः स्वर्गस्था अप्यधराः कृता भूमाववतारितास्ते ते हनुमत्सुग्रीवादिरूपा इन्द्रादयो देवा येन सः । प्रथमस्यैव हस्तलेखरूपेण निहीनत्वं ननु द्वितीयस्येत्यत्रोक्तम् । प्रथममेवाद्यमेव रामं न तु द्वितीयं त्वामिति वा । उत्तमशिल्पनिर्माणार्थं हि हस्तलेखः पूर्वं क्रियते । निहीनाः कृतास्ते तेऽतिप्रसिद्धा लेखका लिपिकरा येन स इति वा । अक्षराभ्यासेऽप्येवं क्रियते । जन्मस्थाने रेणुघृष्टेष्टकादिचूर्णरूपः पांसुर्यस्यैतादृशं हस्तलेखम् । (अधरीकृततत्तल्लेखकः) 'शेषाद्विभाषा' इति कप् ॥

उद्भवाजतनुजादज कामं
विश्वभूषण न दूषणमत्र ।
दूषणप्रशमनाय समर्थं
येन देव तव वैभवमेव ॥ ७० ॥

उद्भवेति ॥ हे अज जन्मरहित श्रीरामचन्द्र, अजस्य रघुपुत्रस्य तनुजाद्दशरथात्सकशात् कामं स्वेच्छया उद्भवोत्पद्यस्व । भो विश्वभूषण जगदलंकारभूत, अत्र दशरथादपि जन्मविषये, अजस्यापि जन्मविषये दूषणं दोषलेशोऽपि नास्ति । यस्य पितामहोऽप्यजो नोत्पन्नः, तत्पुत्रः स्वपिता कुतस्तरामुत्पन्नः, तत्पुत्रपुत्रः स्वयं कुतस्तमामुत्पत्स्यते, तथा स्वयमप्यजः कथं जायते इत्याशङ्कायां स्वेच्छामात्रविलसितमित्याशङ्कापरिहारः । 'ब्रह्मैव हि स्वाविद्यया संसरति, मुच्यते च' इति न्यायात् । विश्वभूषणस्य तव दूषणरूपत्वाभावादपि दूषणलेशोऽपि तव नास्तीत्यर्थः । अथच—अजतनुजादजस्योत्पत्तिर्युक्तैव । अजो हि छगलस्तस्य पुत्रोप्यज एव जातिनामत्वादजशब्दस्येत्यपि दूषणाभावः । दूषणाभावे हेत्वन्तरमप्याह —येन कारणेन हे देव श्रीराम, तव वैभवमेव प्रभाव एव दोषाणां प्रकर्षेण शमनाय नाशाय समर्थं । यत्स्मरणादिवैभवाद्यान्येषामपि भक्तानां दोषा नश्यन्ति, तत्स्वरूपे दोषलेशसंस्पर्शोपि कथंकारं स्यात्, अपितु न कथंचिदित्यर्थः । अथच—दूषणाख्यराक्षसविनाशाय तवैव सामर्थ्यं यतः, तस्मादत्र तवैवोत्पत्तौ सत्यां दूषणाभावो युक्त एवेति छलम् । अथच—परशुरामे सत्यपि तस्मिन्नेव काले त्वं दशरथात्सुखेनोत्पद्यस्व, अत्र तवोत्पत्तौ विषये दूषणं पुनरुक्तदोषो नास्ति यतो दूषणादिरावणान्तराक्षसविनाशाय तवैव सामर्थ्यं, ननु परशुरामस्येत्यत्र दूषणशब्द उपलक्षणपरः । तस्मादेककालीनत्वेपि कार्यभेदान्न पुनरुक्तिदोष इत्यर्थः । एतेनावतारप्रयोजनमुक्तम् । 'अनुकामम्' इति पाठे—कामं लक्षीकृत्य यथेच्छमित्यर्थः ॥

नो ददासि यदि तत्त्वधियं मे
यच्छ मोहमपि तं रघुवीर ।
येन रावणचमूर्युधि मूढा
त्वन्मयं जगदपश्यदशेषम् ॥ ७१ ॥

नो ददासीति ॥ हे रघुवंश्यानां मध्ये वीर ईश्वरतम श्रीरघुनाथ, त्वं तत्त्वधियं मोक्षोपयोगिनमात्मतत्त्वसाक्षात्कारं यदि मह्यं नो ददासि तर्हि तं मोहमपि तां विशिष्टां भ्रान्तिमेव यच्छ देहि । तं कम्—येन मोहेन भयेन संजातभ्रान्तिविलासेन बुद्धिमूढा रावणचमूरशेषं सकलं जगत् त्वन्मयं श्रीरामचन्द्ररूपमपश्यत् । रावणसेनया च मोहेन जगद्रामात्मकं दृष्टमिति सर्वपुराणे ॥

आज्ञया च पितुरज्ञभिया च
श्रीरहीयत महीप्रभवा द्विः ।

---

१ सुखावबोधायां तु पूर्वश्लोकव्याख्यायाम् 'अथैकादशभिः श्लोकैर्दाशरथिं स्तौति–' इत्यभिहितम् ।

१ 'अनकामम्' इति पाठमङ्गीकृत्य 'द्वौ नञौ प्रकृतमर्थं गमयतः' इति न्यायेन यथेच्छमिति यथाव्याख्यातम्, तत्पाठापरिज्ञानविलसितत्वादुपेक्ष्यम्' इति सुखावबोधा । २ 'रघुवंश्येति' पाठो जीवातुसंमतः ।

लङ्घितश्च भवता किमु न द्वि-
र्वारिराशिरुदकाङ्गगलङ्कः ॥ ७२ ॥

आङ्क्षयेति ॥ हे श्रीरामचन्द्र, भवता महीप्रभवा कृष्याद्युपायै-र्भूलोकोत्पन्ना श्री राज्यलक्ष्मीः, अथच—भूमेरुत्पन्ना लक्ष्म्यवता-ररूपा जानकी, क्रमेण पितुराज्ञया च अज्ञेभ्यो भिया च मूर्ख-जनापवादभयेन च द्विर्द्विवारमहीयत त्यक्ता। वनवासाङ्गीकारा-द्राज्यलक्ष्मीः, जनापवादभयाच्च वह्नौ विशुद्धाऽपि सीता त्यक्तेत्येवं द्विप्रकारं त्यक्तेत्यर्थः। एवं पितुराज्ञाकारी लोकापवादभीरुश्च कोपि नास्तीति भावः। चावन्योन्यसमुच्चये। तथा—वारिराशिः, अरि-राशिर्वा द्विर्द्विवारं द्विधा च न लङ्घितः किमु, सेतुं बद्ध्वा समुद्रोपि लङ्घित एव, तथा—रावणादिः शत्रुसमूहोऽपि पराभूत एव। वा चार्थे इवार्थो वा, अरिराशिश्चारिराशिरिव वा। गन्धनार्थाद्धातेः क्विपि वातीति वाः, स चासावरिराशिश्च सकलो वैरिसंघ इत्यर्थः। किंभूतः—उदकाङ्गगा जलमध्यगा लङ्का यस्य। यदीयजलमध्ये लङ्कास्तीत्यर्थः। अरिराशिरपि—समुद्रजलमध्यवर्तिनी लङ्का यस्य। समुद्रपक्षे यस्येत्यस्योदकेन संबन्धः, अरिपक्षे तु लङ्कायाः एता-वान्विशेषः। उत्कृष्टमकं दुःखं यस्यास्तादृशी अङ्कगा लङ्का यस्येति वा। सागरस्यापि बन्धनाद्रावणस्यापि वधाच्चैतादृशो महाप्रभावः शूरतरश्च त्वदन्यः कोपि नास्तीति भावः ॥

कामदेवविशिखैः खलु नेशं
मार्पयज्जनकजामिति रक्षः।
दैवतादमरणे वरवाक्यं
तथ्ययत्स्वमपुनाद्भवदस्त्रैः ॥ ७३ ॥

कामेति ॥ रक्षो रावण इतीव हेतोर्दैवतादमरणे मरणाभाव-विषये दैवाद्धेतोर्न मरिष्यसीति ब्रह्मणो वरवाक्यं तथ्ययत् सत्यं कुर्वत् स्वमात्मानं भवदस्त्रैरपुनाद् धुतकल्मषं चकार। इति किम्—जनकजां सीतां रामायार्पयद्ददद्दहं रक्षः कामदेवस्य मोहनशो-षणादिभिर्विशिखैः खलु निश्चितं मा नेशं तद्विरहसंतापवशान्मृतो मा भूवमिति। सीताप्रत्यर्पणे कामस्य देवत्वात्तद्बाणैर्मरणे वरवा-क्यमसत्यं स्यादितीव तामददद्वरवाक्यसत्यत्वार्थं मानुषावतारका-मरूपभवद्बाणैरात्मानं नाशितवानित्यर्थः। कामबाणाच्छरीरविना-शमात्रं त्वद्बाणात्तु मरणे संसारहेतुनिःशेषकल्मषक्षय इति महा-न्विशेषः 'अपुनात्' इत्यनेन सूच्यते। नेशम्, माङ्योगादड-भावः। तथ्ययत् 'तत्करोति-' इति ण्यन्ताच्छता ॥

तद्यशो हसति कम्बुकदम्बं
शम्बुकस्य न किमम्बुधिचुम्बि।
नामशेषितससैन्यदशास्या-
दस्तमाप यदसौ तव हस्तात् ॥ ७४ ॥

तदिति ॥ हे रघुनाथ, नामशेषितः कथाशेषीकृतो हतः सेनया सहितो दशास्यो येन तस्मात्तव हस्तात् असौ शम्बुको य-दस्तं विनाशमाप। तच्छम्बुकनाम्नः शूद्रस्य अम्बुधिचुम्बि समुद्र-मध्यवर्ति यशः कम्बुकदम्बं शङ्खवृन्दं धवलतया किं न हसति, अपितु—हसत्येव, तत्तुल्यं भवतीत्यर्थः। येन त्वत्करेणातिशूरो रा-वणो हतस्तेनैवान्त्यवर्णोऽधमो दुर्बलः शम्बुकोपि हत इति मह-त्तस्य भाग्यमित्यर्थः। यो ह्युत्कृष्टं बलिनं हन्ति, तेनैव हीने दुर्बले हते दुर्बलस्य महद्यशो भवति। बालब्राह्मणपुत्रमरणनिमित्तं शूद्राणामविहितं धूम्रपानं कुर्वन्तं शम्बुकशूद्रं श्रीरघुनाथो हतवा-नितीतिहासः। अथच—शम्बुकस्य जलशुक्तेः श्वेतरूपं यशः समु-द्रमध्यस्थं शङ्खवृन्दं हसति तत्तुल्यं भवतीति युक्तमेव। नामशेषि-तेति, 'तत्करोति-' इति ण्यन्ताच्छिष्टा ॥

मृत्युभीतिकरपुण्यजनेन्द्र-
त्रासदानजमुपार्ज्य यशस्तत्।
ह्रीणवानसि कथं न विहाँय
क्षुद्रदुर्जनभिया निजदारान् ॥ ७५ ॥

मृत्युभीतीति ॥ यस्मान्मृत्योर्यमादन्येषां भीतिः, मृत्योर्भी-तिकरः पुण्यजनेन्द्रो राक्षसेन्द्रो रावणस्तस्यापि मरणपर्यन्तं त्रास-दानाद्भयोत्पादनाद्धेतोर्जातं तदतिप्रसिद्धं लोकत्रये गीयमानं यश उपार्ज्य क्षुद्रोऽत्यल्पको दुर्जनस्तस्मान्निया भयेन पामरलोका-पवादभिया निजदारानात्मनः प्रियां सीतां विहाय परित्यज्य कथं न ह्रीणवान् लज्जितवानसि। लज्जितव्यं तावत्त्वयेत्यर्थः। यो राव-णाय भयं दत्तवांस्तस्य दुर्जनभीत्या निर्दुष्टजनप्रियापरित्यागे हि लज्जैव युक्ता। अतिमाननिजस्त्रीहर्ता रावणो नाशितो लोका-पवादभीरुश्च सापि परित्यक्तेति। एतादृशः शूरोऽभिमानी लोकाप-वादभीरुश्च कोपि नास्तीति भावः। 'यातुधानः पुण्यजनः-' इत्य-मरः। भीतिं करोतीति ताच्छील्ये टः ॥

इष्टदारविरहौर्वपयोधि-
स्त्वं शरण्य शरणं स ममैधि।
लक्ष्मणक्षणवियोगकृशानौ
यः स्वजीविततृणाहुतियज्वा ॥ ७६ ॥

इष्टेति ॥ हे शरण्य शरणागतभक्तरक्षण रघुनाथ, स त्वं मम शरणं रक्षकः एधि भव। स कः—यस्त्वम् इष्टदाराणां सीतायाः विरह एव दुःसहत्वादौर्वो वडवानलस्तस्य पयोधिराश्रयः एवंविधः सन् लक्ष्मणस्य क्षणमात्रमपि वियोगः स एव दुःसहतरत्वा-त्कृशानुस्तत्र स्वजीवितानामात्मप्राणानामेव तृणानामाहुतेस्तद्रू-पहोमद्रव्यस्य यज्वा होता यो हि लक्ष्मणवियोगं क्षणमात्रं सोढु-मशक्तस्तृणवद्धेलामात्रेण स्वप्राणांस्तत्याज, स यावज्जीवं सीता-विरहानलं कथं सोढवानिति क्रिययोर्विरोधादाश्चर्यम्। यज्वन् चाहुतिरग्नौ हूयते। सीताविरहसहनेन जितेन्द्रियधुर्यत्वमुक्तम्। इन्द्रजिता शक्त्या मूर्च्छिते लक्ष्मणे स्वयमपि मुमूर्च्छ, तथा मुनि-रूपकालकृतसमयभङ्गभग्नप्रतिज्ञे लक्ष्मणे रघुनाथाज्ञया सरयूज-लप्रवेशेन कृतदेहत्यागे सति तद्वियोगमसहमानस्तत्क्षणमेव रघु-नाथोपि गोप्रतारतीर्थे जलप्रवेशेन स्वयमपि स्वस्थानं प्रापेति युद्धकाण्डोत्तरकाण्डरामायणकथा। एतेन स्त्रीवियोगदुःखादपि भ्रा-

१ 'मार्पयमिति पाठे जनकजामित्यहं मार्पयं नो ददामि। इतीति किम्—कामदेवविशिखैर्मा नेशमिति। सदृश(मध्य)पातिनो माङ उभयसंबन्धेन व्याख्येयम्' इति सुखावबोधा।

तृवियोगदुःखं दुःसहमिति सूचितम् । परमकारुणिकस्त्वं शरणागतं मामपि रक्षेति सूचितम् ॥

क्रौञ्चदुःखमपि वीक्ष्य शुचा यः
श्लोकमेकमसृजत्कविराद्यः ।
स त्वदुत्थकरुणः खलु काव्यं
श्लोकसिन्धुमुचितं प्रबबन्ध ॥ ७७ ॥

क्रौञ्चेति ॥ दैवी वाक् येन भुवं प्रति प्रथममानीता स आद्यः प्रथमः कविर्वर्णको यो वाल्मीकिः क्रौञ्चयोः पक्षिविशेषयोर्मध्ये रिरंसावेकस्मिन् व्याधेन हतेऽन्यस्य दुःखं वीक्ष्य तिर्यग्योनेरपि तस्य दुःखं दृष्ट्वा उत्पन्नया शुचा शोकेन हेतुना 'मा निषाद प्रतिष्ठां त्वम्–' इत्यादिकं श्लोकमसृजत् । स कविस्त्वयि उत्पन्नः करुणा रसो यस्य सीताविरहविह्वलमहानुभावभवदर्शनोत्पन्नशोक इव श्लोकानां सिन्धुं सागरभूतं चतुर्विंशतिसहस्रमितं रामायणाख्यं काव्यमुचितं योग्यं प्रबबन्ध । तिर्यग्योनिविषये शोकेन येन श्लोकः कृतः, तस्य उत्तमपुरुषविषये महाकाव्यनिर्माणमुचितमेव । अथ च—त्वया सिन्धुर्बद्धः, अयमपि त्वदेकचित्तः सिन्धुं बबन्धेत्युचितम् । परित्यक्तसर्वसङ्गो मुनिरपि त्वद्गुणानां कृतवानेतादृशः परपुरुषोसीति खल्वित्यर्थः ॥

विश्रवःपितृकयामुमनर्हं
सश्रवस्त्वमनयेत्युचितज्ञः ।
किं चकर्तिथ न शूर्पणखाया
लक्ष्मणेन वपुषा श्रवसी वा ॥ ७८ ॥

विश्रव इति ॥ हे रघुनाथ, इति हेतोरुचितं जानाति स उचितकारी त्वं चतुर्धावतीर्णस्त्वं लक्ष्मणलक्षणेन स्वीयेनैव वपुषा शूर्पणखायाः श्रवसी कर्णौ किं वा न चकर्तिथ कर्तितवान्, अपितु कर्तितवानेव । इति किम्—विश्रवा मुनिः पिता यस्याः, अथ च—कर्णरहितः पिता यस्यास्तस्याः शूर्पणखायाः सश्रवस्त्वं सकर्णत्वमामुमनर्हमयोग्यमिति। स्त्रीवधस्यानौचित्यात्कर्णच्छेद एवोचितो यतः, अकर्णपितृकाया अकर्णत्वस्यौचित्यात्कर्णौ लक्ष्मणेन कर्तयामासिथेत्येव विविधः समुचितकारी महाप्रभावोसीति भावः । वा इवार्थो वा । इतीव हेतोरिति योजना । विश्रवःपितृकया, 'नप्तृनप्त्र' इति कप् । शूर्पणखा 'पूर्वपदात्संज्ञायाम्–' इति णत्वम् । नखस्य स्वाङ्गत्वेपि 'नखमुखात्संज्ञायाम्' इति ङीषभावः । अन्वर्था चेयं संज्ञा ॥

नवभिः श्लोकैः श्रीकृष्णं वर्णयति—

ते हरन्तु दुरितव्रततिं मे
यैः स कल्पविटपी तव दोर्भिः ।
छद्मयादवतनोरुदपाटि
स्पर्धमान इव दानमदेन ॥ ७९ ॥

त इति ॥ कंसादितनदैत्यमारणरूपछद्मना यादवसंज्ञा तनुर्यस्य, अथ च—छद्म याति छद्मयाः एवंभूतश्चासौ यादवतनुश्च मायावान् कंसादिवंशवनवह्निरूपशरीरश्च, श्रीकृष्णरूपस्य तव यैर्दोर्भिर्भुक्तिमुक्तिप्रदैश्चतुर्भिर्हस्तैः सोऽतिप्रसिद्धः कल्पविटपी कल्पितफलदानसमर्थः पारिजातवृक्ष उद्पाटि उन्मूलितः । किं कुर्वन्निव—मादृशः कल्पितदानसमर्थः कोपि नास्त्येवेति दानस्य मदेन दर्पेण तैर्भुजैः सह स्पर्धमान इव ते बाहवो मे दुरितानां व्रततिं लतां दैन्यसंततिं हरन्तु उन्मूलयन्तु । ये पारिजातलक्षणमहावृक्षोन्मूलने समर्थास्तेषां लतोन्मूलने सुतरां सामर्थ्यम् । कपटदानलवदेहस्य च भुजानां वृक्षलताद्युन्मूलने सामर्थ्यं युक्तमेवेत्यर्थः । दानशूरो महाप्रभावश्च त्वादृशः कोपि नास्तीति भावः । सत्यभामया याचितः पारिजात इन्द्रं जित्वोन्मूल्य सत्यभामाङ्गणे श्रीकृष्णेन स्थापित इति हरिवंशोक्तिः । निर्ऋतिव्रततिमिति पाठे—'स्याद्लक्ष्मीस्तु निर्ऋतिः' इत्यमरः ॥

बालकेलिषु तदा यदलावीः
कर्परीभिरभिहत्य तरङ्गान् ।
भाविबाणभुजभेदनलीला-
सूत्रपात इव पातु तदस्मान् ॥ ८० ॥

बालेति ॥ हे कृष्ण, त्वं तदा कृष्णावतारसमये भूयसीषु बालकेलिषु मध्ये कर्परीभिः स्फुटितघटशकलैः कृत्वा यमुनाजलतरङ्गान् अभिहत्य तेषामभिघातं कृत्वा तानेकप्रयत्नेनालावीरच्छैत्सीरिति यत्, तत्कर्परीभिस्तरङ्गलवनं कर्तुं उपाहरणावसरे भावि करिष्यमाणं बाणासुरभुजभेदनं तल्लक्षणा लीला विलासस्तत्संबन्धी सूत्रपात इव प्रथममार्जवच्छेदनाभ्यासरूपमिवास्मान्रक्षतु । अक्षरपङ्क्तेर्ऋजुत्वार्थं प्रथमं खटिकादिभिरक्षितसूत्रपातनं क्रियते । तक्षादिभिरपि काष्ठस्यार्जवच्छेदनार्थं गैरिकादिभिरक्षितसूत्रपातनं क्रियते । तद्वद्बाणासुरभुजार्जवच्छेदनार्थं कर्परीभिरभिहत्य तरङ्गलवनं यदकारि तत्तव बालक्रीडनमस्मानवत्विति भावः । कर्पराघातेन तरङ्गच्छेदनं बालजातिः । अवतारप्रयोजनं चोक्तम् ॥

कर्णशक्तिमफलां खलु कर्तुं
सज्जितार्जुनरथाय नमस्ते ।
केतनेन कपिनोरसि शक्तिं
लक्ष्मणं कृतवता हृतशल्यम् ॥ ८१ ॥

कर्णेति ॥ हे श्रीकृष्ण, ते नमोस्तु । किंभूताय ते—उरसि लग्ना इन्द्रविमुक्ता शक्तिर्यस्य तं लक्ष्मणं द्रोणपर्वतानीतविशल्यौषधिप्रक्षेपेण हृतं निष्कासितं शक्तिलक्षणं शल्यं यस्य तादृशं कृतवता केतनेन ध्वजास्तम्भपताकारूपेण कपिना हनूमता कृत्वा कर्णस्य शक्तिमाङ्गिकं बलं, अथच—इन्द्रदत्तां शक्तिम्, अफलां कर्तुमिव सज्जीकृतो योजितोऽर्जुनरथो येन तस्मै । नरनारायणरूपाय । यो हि यत्र कर्मणि दृष्टशक्तिः स एव तत्र नियोक्तुमुचितः । हनूमांश्च शक्तिविफलीकरणे दृष्टप्रभावस्तस्मात्कर्णशक्तिविफलीकरणार्थमिवार्जुनरथे तं स्थापितवानसीति भक्तवत्सलाय तुभ्यं नम इत्यर्थः । यो मर्मभूतामुरःस्थां शक्तिं विफलीकरोति स श्रवणस्थां सुतरां विफलीकरोत्येवेति च्छलेनोक्तिः खलु इवार्थः । उरसि शक्तिः 'अमूर्धमस्तकात्–' इत्यलुक् ॥

नापगेयमनयः सशरीरं
द्यां वरेण नितरामपि भक्तम् ।
मा स[1] भूत्सुरवधूसुरतज्ञो
दिव्यपि व्रतविलोपभियेति ॥ ८२ ॥

नेति ॥ हे कृष्ण, त्वं नितरां भक्तमपि आपगेयं भीष्मं सशरीरं वरेण प्रसादेन कृत्वा इति विचार्य कारणाद्वा द्यां स्वर्गं नानयः न प्रापितवानसि । इति किम्—स भीष्मः अनेन शरीरेण सुरतं न करिष्यामि, अद्यप्रभृति मम ब्रह्मचर्यमेवेति व्रतविलोपाद् भिया हेतुना दिव्यपि स्वर्गेपि सुरवधूनां रम्भादीनां सुरतज्ञो मा भूत् इति । भक्तमस्य वरदानेन यद्यपि तेनैव शरीरेण स्वर्गप्रयाणमुचितम्, तथापि तस्य शरीरस्य स्वर्गप्रयाणेपि न कोप्युपयोगः, तेन तच्छरीरस्यातितुच्छत्वात्तच्छरीरं विनाश्य तं स्वर्गमनयत् नतु तच्छरीरसहितस्य प्रापणे तवाशक्तिरिति भावः । यद्वा मुक्त्यपेक्षया स्वर्गभुक्तेरप्यतितुच्छत्वात्तच्छरीरं विनाश्य तं मुक्तिमेव प्रापितवानिति हेतुः । आपगेयम्, अपत्यार्थे 'स्त्रीभ्यो ढक्' ॥

घातितार्कसुतकर्णदयालु-
र्जैत्रितेन्दुकुलपार्थकृतार्थः ।
अर्धदुःखसुखमभ्यनयस्त्वं
सास्रुभानुविहसद्विधुनेत्रः ॥ ८३ ॥

घातितेति ॥ अर्जुनेन प्रयोज्येन समरे घातितोऽर्कसुतः कर्णस्तस्मिन्विषये दयालुः सकरुणः । तथा—स्वसामर्थ्येन जैत्रितो जेता कृतो दत्तजय इन्दुकुलं सोमवंशभूतः पार्थोऽर्जुनस्तेन कृत्वा कृतार्थः संपादितावतारप्रयोजनः कृतकृत्यत्वात्सहर्षः । अत एव क्रमेण पुत्रशोकवशात्सास्रुः सबाष्पो रुदन् यः भानुः सूर्यः, पुत्रविजयाच्च विशेषेण हसन् हर्षानुभवं कुर्वन् विधुश्चन्द्रस्तावेव दक्षिणवामे नेत्रे यस्यैतादृशस्त्वं यथाक्रमम् अर्धदुःखं अर्धसुखं च अभ्यनयः अभिनयेन युगपद्दर्शितवानसि । परमार्थतोऽविद्यमानमप्यविद्याविलासाद्बहिर्नाटितवानसीत्यर्थः । सूर्यचन्द्रयोर्विष्णुनेत्रत्वात्कर्णस्य च सूर्यपुत्रत्वात्तन्नाशे शोकात्सूर्यस्य साश्रुत्वात् अर्जुनस्य च सोमवंशस्थत्वाद्विजये चन्द्रस्य हर्षेण विहसितत्वात्, ताभ्यामर्धदुःखसुखाभिनयादद्भुतरूपोसीति भावः । घातितेति हेतुमण्यन्तान्निष्ठा । जैत्रितेति, 'तत्करोति–' इति ण्यन्तान्निष्ठा पार्थेति कुरुत्वात् 'ऋष्यन्धक–' इत्यण् । अर्धं च तद्दुःखसुखं चेति द्वन्द्वगर्भः कर्मधारयः ॥

प्राणवत्प्रणयिराध न राधा-
पुत्रशत्रुसखिता सदृशी ते ।
श्रीप्रियस्य सदृगेव तव श्री-
वत्समात्महृदि धर्तुमजस्रम् ॥ ८४ ॥

प्राणेति ॥ प्राणवत् प्राण इव प्रणयिनी निरुपाधिपरप्रेमास्पदं राधाख्या गोपिका यस्यैवंभूत श्रीकृष्ण, ते तव राधापुत्रः कर्णस्तस्य शत्रुरर्जुनस्तस्य सखिता मैत्री सदृशी योग्या न । राधावल्लभस्य हि राधापुत्रशत्रुमैत्री कथंकारमुचिता, अपित्वयुक्तैव विरोधादित्यर्थः । एकत्र राधा गोपिका, अन्यत्र तु कर्णपालनकारिणी कैवर्तवधूरिति परिहारः । श्रियः प्रियस्य श्रीवल्लभा यस्य तस्य तव श्रीवत्सं ब्राह्मणपदन्यासरूपं लाञ्छनम्, अथच—श्रियो वत्सं पुत्रम्, अजस्रमात्महृदि धर्तुं सदृगेव उचितमेव यस्य हि श्रीवल्लभा, स तत्पुत्रं स्ववक्षसि सदा बिभर्तीति युक्तमेवेत्यर्थः । एतादृशः स्वपक्षपातदक्षो लोकशिक्षार्थं ब्राह्मणभक्तिपरश्च कोपि नास्तीति भावः । प्रणयिराधेति 'स्त्रियाः पुंवत्' ॥

[2]तावकी[3]परतनोः सितकेश-
स्त्वं हली किल स एव च शेषः ।
साध्वसावतरस्तव धत्ते
[4]तज्जरच्चिकुरनालविलासः ॥ ८५ ॥

तावकेति ॥ हे कृष्ण, हली लाङ्गलधरो बलभद्रः स एव च शेषोऽनन्तस्त्वमेव । शेषावताररूपोपि बलभद्रो भवानेव, नतु स त्वत्तो भिन्न इत्यर्थः । त्वं बलभद्रः स एव शेषः । त्वत्तो हली न भिद्यते, हलिनश्च शेषो न भिद्यते इति वा । यतः—कायस्य संबन्धाज्जरसा सितकेशो धवलितकचः किलेत्यागमे विष्णुपुराणादौ च यदुक्तम्—'उज्जहारात्मनः केशौ सितकृष्णौ ततः प्रभुः' इति । न विद्यते परोत्कृष्टान्या यस्याः सा तावकी अपरा तनुस्त्वत्संबन्धिनी सर्वोत्कृष्टा सत्त्वमूर्तिस्तस्याः सितकेशः श्वेतकेशरूपो हली तवावतारोंऽशावताररूपोऽसौ हली त्वं किल । त्वदवयवभूतकेशरूपत्वात्तस्य । स च हल्येव शेष इति वा । शेषरूपबलदेवलक्षणोऽसावावतरो मूर्तिः । अत एव तस्या भवदीयापरतनोर्जरतो जरसा धवलीकृतस्य चिकुरनालस्य केशदण्डस्य विलासं वर्णसारूप्यं साधु यथा तथा धत्ते। अतिगौरो बलदेवस्त्वदीयापरतनुधवलकेश इव भातीत्यर्थः । शेषस्यापि दीर्घत्वधवलत्वाभ्यां जराधवलदीर्घकेशसारूप्यधारणं युक्तमेव । 'कारणगुणा हि कार्ये गुणानारभन्ते' इति न्यायाच्च युक्तमेव । अंशावतारो बलभद्रः, इति चोक्तम् । अत्र श्वेतकेशः सहज एव, नतु जरायोगात् । इति वा । यतो हरिर्नित्यतरुण इति पुराणादिप्रसिद्धिः । वस्तुतस्तु—कस्य ब्रह्मसुखस्येशौ सुखरूपावित्यर्थः । प्रकाशकत्वेन सत्त्वस्य सितशब्दवाच्यत्वात्, मोहकत्वेन च तमसः कृष्णशब्दवाच्यत्वात्सितकृष्णौ सत्त्वतमोगुणद्वयात्मकावेताववतारौ भूभारोत्तारणार्थं प्रभुरादिनारायणः स्वस्मात्प्रकटीचकारेति विष्णुपुराणस्थसितकृष्णपदस्यार्थः । 'कृष्णस्तु भगवान्स्वयम्' इति भागवतवचनेन कृष्णस्तु लीलाविग्रहधारी परब्रह्मैव 'समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः' इति भगवद्वचनात् । बलभद्रस्त्ववतारः 'रामो रामश्च रामश्च' इति वचनात् । अन्यथा बलभद्रस्य सत्त्वमूर्तित्वम्, कृष्णस्य तमोगुणमूर्तित्वमापद्येत, नच तथास्तीति बलभद्रस्य तमःप्रधानत्वदर्शनादित्याशयः । 'शितिकेशः–' इति पाठे—'शिती धवलमेचकौ'इत्यभिधानात्त्वदीयपुराणतनोःसंबन्धी

---

१ 'मा स्म' इति पाठो **जीवातुसुखावबोधा**संमतः । २ 'सुरताज्ञः' इति पाठमाश्रित्य 'सुरतं संभोगस्तस्याज्ञोऽनभिज्ञो मा स्म भूदिति व्याख्याय 'सुरतदक्ष इति पाठस्तु दुर्योज्यत्वादुपेक्ष्यः' इति **सुखावबोधा**यामुक्तम् ।

१ अयं श्लोको **जीवातौ** नास्ति । २ 'तावकीपरतनोः' इति पाठः पुंवद्भावप्रतिप्रसवसूत्रास्फुरणविलसितत्वादुपेक्ष्यः' इति **सुखावबोधा** । ३ 'त्वज्जरत्' इति पाठे—पुराणपुरुषस्य तव जरन् यश्चिकुरनालः इति व्याख्येयमिति, **सुखावबोधा** ।

शितिकेशः श्यामकेशरूपस्त्वं, हली च धवलकेशरूपः, स एव च हली शेषः बलभद्रः शेषावतारः, इति पुराणादौ । स त्वदीयधवलकेशविलासं धत्ते तत्साधु । कृष्णस्य कृष्णवर्णत्वाद्बलिनश्चातिगौरत्वाद्यथाक्रमं श्यामसितकेशत्वमौत्प्रेक्षिकत्वेनैव व्याख्येयमित्यलमतिविस्तरेण । 'तावकापर-' इति पाठः साधीयान् । यतः 'युष्मदस्मदोः' इत्यणि तवकादेशे वृद्धौ च 'वृद्धिनिमित्तस्य-' इत्यादिना पुंवद्भावप्रतिषेधे प्रसक्तेऽपि कर्मधारयत्वात् 'पुंवत्कर्मधारय-' इति प्रतिप्रसवात्पुंवद्भावः । अवतरः पूर्ववत् ॥

हृद्यगन्धवहभोगवतीशः शेषरूपमपि बिभ्रदशेषः ।
भोगभूतिमदिरारुचिरश्रीरुल्लसत्कुमुदबन्धुरुचिस्त्वम् ॥

हृद्येति ॥ हे हृद्यो हृदयानन्दकारी गन्धश्चन्दनादिसौरभं तं वहसि धारयस्येवंविध सौरभधारिन् श्रीकृष्ण, त्वं शेषरूपं बलभद्ररूपम्, अथ च—नागाधीशरूपं बिभ्रद्धारयन्नप्यशेष उभयविधोऽप्यशेषः शेषो न भवसीति विरोधः । अथ च—न विद्यते शेषः शिष्टं भिन्नं यस्मादसावशेषः सकलजगदात्मकस्त्वमिति परिहारः । अथ च बलभद्रोऽप्यतिशुक्लत्वाद्धृद्यगन्धवहः । अत एव भोगवतीनां सुखिनीनां गोपिकादीनामीशः प्राणप्रियः, अथ च—भोगवत्या अतिशयेन सुखिन्या रेवत्या ईशः पतिः । श्रीकृष्णोऽपि हृद्यं गन्धं शारीरं स्वाभाविकं चन्दनादिजन्यं च गन्धं वहन्तीनां सुखिनीनां भोगवतीनां गोपिकादीनामीशः शेषोऽपि जलक्रीडाक्षालितचन्दनकर्पूराद्यङ्गरागसंबन्धिहृद्यसौरभधारिण्या भोगवत्याः पातालनद्याः पतिः । कर्पूरादिबहुलसौरभयुक्ताया नागनगर्या वा । तृप्तिहेतुत्वाद्धृद्यो गन्धवहो वायुर्यस्य स चासौ नागपुर्या नद्या वा पतिः । तथा कृष्णरूपस्त्वं भोगस्य सुखस्य भूतेर्हेतोर्मदिरावद्रुचिं सुखं राति जनयति तादृशी श्रीः कायकान्तिर्यस्य सः भोगः शेषफणः, तत्कायो वा स एव भूः स्थानं तस्या ऊतिरवनं स्वाधिष्ठानेन रक्षणं तेन माद्यति हृष्यतीति भोगभूतिमत् । तथा—हरायाः भूमेरिव रुचिरा रमणीया कान्तिर्यस्मादिति वा । तयोरुभयोः सपत्न्योरपि प्रीतिं ददाना समवर्तिनी श्रीर्हृदिस्था लक्ष्मीर्यस्येति वा । भोगानां कालीयफणानां भूतिरैश्वर्यजनितो दर्पम्नं मथ्नाति तादृशो वा । पृथग्वा पदम् । गोपिकादिसंभोगसुखसमृद्धिर्भोगभूतिस्तद्वांश्चासावुक्तरीत्या हरारुचिरश्रीश्चेति वा । अथ च—बलभद्ररूपस्त्वं भोगस्य सुखस्य भूतिरुत्पत्तिहेतुस्तादृशी मदिरा तया कृत्वा रमणीया सरागा कान्तिः शोभा यस्य । बलदेवो हि सर्वदा मदिरामत्तः । अथ च—शेषरूपस्त्वं भोगस्य स्वकायस्य फणानां वा भूतिः समृद्धिस्तद्वानतिदीर्घमहाकायः सहस्रफणो वा तेन माद्यति वा । स चासौ स्वशिरःसु धारणाद्भूमे रुचिं ददाना कायकान्तिर्यस्य सः । तथा—कृष्णरूपस्त्वम् उल्लसन्ती कुमुदबन्धोश्चन्द्रस्य संबन्धिनी रुचिः प्रीतिर्यस्मिन् सर्वाह्लादकारित्वाच्चन्द्र इव सर्वप्रेमास्पदभूतमित्यर्थः । कुमुद् श्वेतं कैरवं तस्या बन्धुस्तद्विरोधिनी कृष्णा रुचिः श्रीर्यस्य जलदश्याम इत्यर्थ इति वा । उल्लसन्ती कुमुदाख्ये वानररूपे सुहृदि प्रीतिर्यस्य रामावतारे इति वा । उल्लसन्ती पृष्ठे दंष्ट्रायां वा कुः पृथ्वी यस्मिन्, मोदत इति मुदः, स चासौ स च । तथा—बन्धुषु बन्धौ बलभद्रे वा प्रीतिर्यस्येति वा । उल्लसन्ती कुमुदतुल्ये अतिगौरे बन्धौ बले प्रीतिर्यस्य वा । उल्लसन्ति कुमुदानि येन स चन्द्र एवोद्दीपकत्वाद्बन्धुर्यस्य, अथ च—प्रद्युम्नावतारः कामस्तत्र प्रीतिर्यस्मिन्पुत्रत्वादिति वा । अथ च—बलभद्ररूपस्त्वम् उल्लसन्ती कुमुदस्य बन्धुः कैरवसदृशी गौरतरा, कुमुदबन्धोश्चन्द्रस्येव वा गौरतरा, कान्तिर्यस्य । उल्लसन्ती कुः पृथ्वी यस्मात्तस्मिन् मुदे सहर्षे बन्धावनुजे श्रीकृष्णे प्रीतिर्यस्य वा । उल्लसत्कुमुदबन्धावुक्तप्रकारेण प्रद्युम्ने प्रीतिर्यस्य वा । अथ च शेषरूपस्त्वम् उल्लसन्ती कुमुदनाम्नि सर्पे सुहृदि प्रीतिर्यस्य । उल्लसन्ती चन्द्रस्येव धवला कान्तिर्यस्य वा । उल्लसन्ती कुमुदस्य चन्द्रस्य बन्धुः सदृशी कान्तिर्यस्य वा । उल्लसत्पृथ्वीकः सहर्षः सुहृत्सु प्रीतिर्यस्य वा । 'कुमुदेऽपि कुमुत्प्रोक्तम्' इति विश्वः । 'गोत्रा कुः पृथिवी' इत्यमरः । 'भोगः सुखे वधे चाहेः शरीरफणयोर्मतः' इति विश्वः । 'हरा वारिसुराभूमिभारतीषु' इति च । ऊतिः, अवतेः क्तिनि 'ज्वरत्वर-' इति वस्योपधायाश्चोट् । मदिति माद्यतेर्मथ्नातेश्च क्विप् । पक्षे मतुप् । मुदः, इगुपधात्कः ॥

रेवतीशसुषमा किल नील-
स्याम्बरस्य रुचिरा तनुभासा ।
कामपाल भवतः कुमुदावि-
र्भावभावितरुचेरुचितैव ॥ ८७ ॥

रेवेति ॥ हे रेवतीनाम्न्याः प्रियायाः ईश, तथा हे कामपाल (कामपूरक, कुः पृथ्वी तस्या मुदो हर्षस्याविर्भावेन प्रादुर्भावेन भाविता संचारिता रुचिः प्रीतिरिच्छा वा यस्य तस्य भवतः श्रीकृष्णस्य तनुभासा कायकान्त्या कृत्वा नीलस्याम्बरस्य[1] । तत्तुल्यस्येत्यर्थः । तव रुचिरा शोभना, लोकानां रुचिं प्रीतिं ददाना वा । रेवतीशसुषमा चन्द्रसंबन्धिनी परमा शोभा उचितैव किल । आकाशस्य चन्द्रशोभोचितैव । अथच—बलभद्रस्वरूपत्वाद्रेवतीशसुषमा बलभद्रस्य परमा शोभोचितैव । किंभूतस्य—कुः पृथ्वी तस्या मुदस्य हर्षस्याविर्भावेन प्रकटनेन भाविनी(ना) त्रिलोकानां रुचिः प्रीतिर्येन । कुमुदस्य चन्द्रस्याविर्भावेन वा । अथच—रेवतीनाम्नी प्रियासदृशी । तथा—हे कामपाल) बलभद्र, कुः पृथ्वी तस्या मुदो हर्षस्याविर्भावेन प्रादुर्भावेन भाविता संचारिता रुचिः प्रीतिरिच्छा वा यस्य तस्य भवतस्तव तनुभासा कायकान्त्या नीलस्याम्बरस्य वस्त्रस्य रुचिं दीप्तिं राति ददाति एवंविधा सुषमा उत्कृष्टा शोभोचिता योग्यैव किल । धवलवस्तुसंपर्कान्नीलमतिशयेन शोभते । अथच—हे कामपाल कंदर्पपोषक रेवतीश चन्द्र, कैरवविकासस्फुटितकान्तेस्तव बिम्बतेजसा नीलस्य नभसः परमा शोभा युक्तैवेति ध्वनिः ॥

चतुर्भिः श्लोकैर्बुद्धं वर्णयति—

ऐकचित्ततरिद्वयवादि-
भत्रयीपरिचितोऽथ बुधस्त्वम् ।
पाहि मां विधुतकोटिचतुष्कः
पञ्चबाणविजयी षडभिज्ञः ॥ ८८ ॥

एकेति ॥ हे अद्वयंवादिन् द्वैतवाद्यघटपटादिभेदानामस-

१ कोष्ठकान्तर्गतः पाठो लिखितपुस्तकद्वये नोपलब्धः । २ इतः प्रभृति 'मां त्रिविक्रम-' इत्यन्ता दश श्लोका जीवातौ त्रुटिता उपलब्धाः ।

त्यताप्रतिपादनेनैकस्या ज्ञानाकारताया एव सत्यताङ्गीकारादद्वैतवादिन्, त्वं मां पाहि । किंभूतः—एकैव चित्ततितिर्ज्ञानसंततिर्यस्य दीपकलिकान्यायेन क्षणिकज्ञानप्रवाह एवैको यस्य मते, नतु तदतिरिक्तं किंचिदप्यस्ति, तादृशः, अत एव—अद्वयवादिन् इति योजना । तथा—त्रय्या परिचितो ज्ञातस्तादृशो न भवसीत्यत्रयीपरिचितः । नसमासो वा । नेति पृथग्वा । वेदत्रयीगम्योऽपि न भवसीत्यर्थः । अथच—वेदत्रय्यां परिचितः कृतपरिचयः वेदत्रयी परिचिताभ्यस्ता येन तादृशो वा न भवति । सर्वस्य क्षणिकताङ्गीकाराद्धर्माधर्मभोगव्यवस्थाया निरासादनङ्गीकृतवेदप्रामाण्य इत्यर्थः । अत एव बुधः पण्डितः । नहि पण्डितं विना वेदादिसर्वदूषणसमर्थोऽन्यस्य बुद्धिः संभवति । अथच—अत्रयीपरिचितोपि बुध इति विरोधाभासः । नहि वेदत्रयमजानानस्यापि पण्डितत्वं संभवति । अथच—यः पण्डितः 'एकमेवाद्वितीयं ब्रह्म' इति मन्यमानो वेदान्ती स वेदत्रयीं न मन्यत इति विरोधः । वेदान्तिना हि वेदप्रामाण्यस्य स्वीकृतत्वात्, अथच—अद्वयवादाद्वित्वसंख्यामपि नाङ्गीकरोति । स त्रित्वसंख्यां न मन्यत इति युक्तमेवेत्यर्थः । तथा—माध्यमिकानामपि कियन्मात्रमतभेदेन बौद्धसिद्धा(न्ता)न्तःपातित्वात् । 'न सन्नासन्न सदसन्न चाप्यनुभयात्मकम् । चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः ॥' इति अनिर्वचनीयप्रपञ्चवादित्वाद्विधुतं निराकृतं सदसत्सदसद्वैलक्षण्यलक्षणं कोटिचतुष्कं प्रकारचतुष्टयं येन, अथच—त्रित्वनिषेधान्निरस्तचतुष्टयः । तथा—विरक्तत्वाद्दिगम्बरत्वात्पञ्चबाणः कामस्त्वद्विजयी मारजित् । अथच—'वण शब्दे' इत्यस्माद्धञि बाणः शब्दस्तं पञ्चसंख्यावाचिनं पञ्चशब्दं न सहत इत्यर्थः । यो हि चतुष्टयं न सहते स पञ्चापि न सहते इति युक्तमेवेत्यर्थः । तथा—देशादिव्यवहितवस्तुदर्शनम्, देशादिव्यवहितशब्दश्रवणम्, अतीतजन्मस्थितिस्मरणम्, परचित्तज्ञानम्, अविद्यास्मितारागद्वेषाभिनिवेशाख्यपञ्चक्लेशक्षयः, अणिमादिसिद्धिश्चेति षडभिज्ञा ज्ञानप्रकारा यस्य । वेदानुसारिभिर्दैत्यैः पराभूता देवा ब्रह्मणः शरणं गताः, ब्रह्मणा प्रसादितो नारायणो बुद्धरूपेणावतीर्य दैत्यबुद्धिं वेदार्थेभ्यश्चयावयित्वा बौद्धमतमुपदिदेश, अतस्ते देवानां जय्याः संपन्ना इति । अतएव चैतदीयमतपरिभाषयैव स्तुतिरकारि । 'परिचिताथ बुधस्त्वम्–' इति पाठे—नेति पदं भित्त्वा त्वया वेदत्रयी न परिचिता न स्वीकृतप्रामाण्या । अथ विरोधे । तथापि बुधस्त्वमित्यर्थः । 'परिचिताध्वबुधः–' इति पाठे—त्रयीपरिचितानां वैदिकानां मार्गे पण्डितो न भवति । अवैदिकमार्गमेव जानान इत्यर्थः ॥

तत्र मारजयिनि त्वयि साक्षा-
त्कुर्वति क्षणिकतात्मनिषेधौ ।
पुष्पवृष्टिरपतत्सुरहस्ता-
त्पुष्पशस्त्रशरसंततिरेव ॥ ८९ ॥

तत्रेति ॥ तत्र तस्मिन् बुद्धावताररूपे सौन्दर्याजितेन्द्रियत्वाच्च मारजयिनि कामस्य जैत्रे त्वयि क्षणिकता सर्वं क्षणिकं सत्त्वात्, तथा—आत्मनिषेधश्च 'समनस्केन्द्रियजन्यनीलपीताद्याकारसविकल्पकनिर्विकल्पकवासनोपबृंहितचित्संततिरेवात्मा, भूतान्येव चेतयन्ते, मनसा संयोगे ज्ञानमुत्पद्यते, तस्माद्देह एवात्मा, नतु नित्योऽन्यः कश्चित्' इत्यादिप्रकारेण सर्वभावानां क्षणमात्रावस्थायिता नैरात्म्यं च स्वदर्शनोक्तं समाधिना साक्षात्कुर्वति सति पुष्पशस्त्रस्य कामस्य शरसंततिर्बाणपरम्परारूपा सुरहस्तात्पुष्पवृष्टिरेवापतत् । अतिबले हि शत्रौ करादायुधानि पतन्ति । कामोपि त्वत्तो भीतः पुष्पशरश्च । तथाच तस्य करात्त्वन्मयेन पतिता पुष्परूपबाणपरम्परा क्षणिकतात्मनिषेधौ साक्षात्कुर्वति त्वयि विषये सुरमुक्ता पुष्पवृष्टिरिवापतदित्युत्प्रेक्षा । कामेऽपि देवत्वमेव पुष्पवृष्टिमोचने हेतुः । यो हि लोकोत्तरं वस्तु प्रत्यक्षगोचरं करोति, यश्च कंचन विजहते, तयोरुपरि देवैः पुष्पवृष्टिः क्रियते इत्यादि ज्ञातव्यम् ॥

तावके हृदि निपात्य कृतेयं
मन्मथेन दृढधैर्यतनुत्रे ।
कुण्ठनादतितमां कुसुमानां
छत्रमित्रमुखतैव शराणाम् ॥ ९० ॥

तावक इति ॥ मन्मथेन दृढमभेद्यं धैर्यमेव तनुत्रं कवचं यस्य तस्मिंस्तावके हृदि मनसि, अथच—वक्षसि भर्त्राच्छरान्निपात्य नितरां दृढाघातपूर्वं यथातथा पातयित्वा दृढतनुत्रत्वादेवातितमां कुण्ठनात्तीक्ष्णकत्वागाद्धेतोः कुसुमरूपाणां स्वीयशराणां छत्रं मित्रं येषां तानि, छत्रस्य वा मित्राणि, मुखानि येषां तेषां भावस्तत्ता सूचीमुखतापरित्याजनेन छत्रतुल्यवृत्तमुखेनेयं प्रत्यक्षदृश्या कृता । दृढतनुत्रे हि पातितो बाणः कुण्ठितत्वाद्वृत्तमुखो भवति । स्मरशराः शरत्वात्पूर्वं सूचीमुखा आसन्, इदानीं तु धैर्यकञ्चुके त्वदीये हृदि निपत्य नितरां कुण्ठनादिव तेषां पुष्परूपाणां छत्राकारमुखता जातेत्युत्प्रेक्षोपमे । विकसितानि पुष्पाणि छत्रतुल्यानि भवन्ति । अथच—छत्रं छायाकारित्वात्सुखदमेव यथा नतु दुःखदम्, तथा कामशरा अपि त्वद्धृदयस्यानिर्वापका एव जाताः नतु त्वां जेतुमशकन्नित्यर्थः । एतादृशो जितेन्द्रियः कोपि नास्तीति भावः । निपात्य, ण्यन्तात्क्त्वो ल्यप् ॥

यत्तव स्तवविधौ विधिरास्ये
चातुरीं चरति तच्चतुरास्यः ।
त्वय्यशेषविदि जाग्रति शर्वः
सर्वविद्भवतया शितिकण्ठः ॥ ९१ ॥

यदिति ॥ विधिस्तव स्तुतिविधौ बहुभिर्मुखैश्चातुरी वैदग्ध्यं यद्यदि चरति प्राप्नोति नानाप्रकारैर्यदि त्वद्वर्णनं करोति तत्तर्हि चतुराणि वर्णननिपुणान्यास्यानि यस्यैतादृशो भवेत् नान्यथा । अथ च–त्वद्वर्णनविधौ यस्माच्चातुरीं प्राप्नोति तस्मादेव हेतोश्चतुराण्यास्यानि यस्येति चतुरास्यो, नतु चत्वार्यास्यानि यस्येति चतुरास्यः । आस्यानां चतुष्के सत्यपि तत्रार्थे गौरवाभावात्प्रहेण चतुरास्यः । अत्र तु गौरवसद्भावात्तथैवोच्यत इत्यर्थः । त्वदीयस्तुतिपरत्वात्क्षणो लोकत्रयेऽप्येवं कीर्तिरजनीति भावः । तथा—शर्वो हि स्वयि बुद्ध एवाशेषविदि सर्वज्ञे जाग्रति सति सर्वविदं सर्वात्मानं भूते स सर्वविद्भवत्तत्तयेव परगुणस्वात्मन्यारोपणहेतुना कलङ्केन शितिकण्ठो नीलकण्ठः, नतु कालकूटभक्षणेन नीलकण्ठः । त्वत्स्पर्धितया लोकत्रयेपि महेशस्यैवमयशो जातं

त्यर्थः । ब्रह्ममहेशाभ्यामपि सकाशात् त्वमेव परमपुरुषः सर्वज्ञ-श्रेति भावः । अन्यस्याप्यात्मस्तुत्या सर्वसंनिधौ लज्जया मालिन्यं भवति । सर्वविद्विदुषेति विदुषिद्विदुषेतिवत् ॥

श्लोकद्वयेन कल्किनं स्तौति—

धूमवत्कलयता युधि कालं
म्लेच्छकल्पशिखिना करवालम् ।
कल्किना दशतयं मम कल्कं
त्वं व्युदस्य दशमावतरेण ॥ ९२ ॥

धूमवदिति ॥ त्वं धूमवत् कालं करवालं खड्गं युधि म्लेच्छैः सह युद्धे कलयता धारयता, मृत्युरूपं खड्गं धूममिव धारयता वा, अत एव—म्लेच्छानां कल्पशिखिना प्रलयकालानलरूपेण, म्लेच्छा इव म्लेच्छाः पापिनस्तेषां वा, म्लेच्छप्रायाणां वा, एवं-भूतेन कल्किसंज्ञेन दशमावतरेण कृत्वा मम दशतयं दशावयवं कल्कं पापं व्युदस्य निराकुरु । समूलमुन्मूलयेत्यर्थः । अथच—यः स्वयं कल्की, सोऽन्यकल्कं विनाशयतीति विरोधः । कल्किश-ब्दस्य विष्णुनामत्वात्परिहारः । म्लेच्छकल्पशिखिनेत्यवतारप्रयो-जनमुक्तम् । अदत्तस्य वस्तुनः स्वयं ग्रहणम्, यागीयातिरिक्ता हिंसा, परस्त्रीगमनं च, त्रिविधं कायिकम् । पारुष्यम्, अनृतम्, पैशुन्यं, असंबद्धप्रलापश्चेति चतुर्विधं वाचिकम् । परद्रव्यग्रह-णेच्छा, परानिष्टचिन्ता, वृथैव परेषु दोषाभिध्यानं, चेति त्रिविधं मानसम् । इति दशविधं पापम् । चक्षुस्त्वक्श्रोत्रघ्राणजिह्वापाणि-पादपायूपस्थमनोजन्यं वा । दशसु मासेषु भवत्वाद्गर्भवासलक्षणं दुःखमिति वा । 'कल्कः पापाशये पापे' इति विश्वः ॥

देहिनेव यशसा भ्रमतोर्व्यां
पाण्डुरेण रणरेणुभिरुच्चैः ।
विष्णुना जनयितुर्भवताभू-
न्नाम विष्णुयशसश्च सदर्थम् ॥ ९३ ॥

देहिनेति ॥ विष्णुयशसस्तन्नामकस्य जनयितुः पितुः विष्णु-रिति नाम भवता च स्वयैव कृत्वा सदर्थं सान्वयमभूत् । किंभू-तेन भवता—रणरेणुभिरुच्चैः पाण्डुरेण धवलतरेण, तथा—दुष्ट-गवेषणार्थमुर्व्यां भ्रमता विष्णुना व्यापकेन विष्णुसंज्ञकेन च पा-ण्डुरत्वाद्व्यापित्वाच्च देहिना शरीरधारिणा यशसेव यशोरूपेण विष्णु व्यापकं यशो यस्य त्वया पुत्रेणेति यावत् । तस्य तव पितु-र्नाम सान्वयमभूत्, जातप्रायमेवेति भाविन्यपि भूतवदुपचारः । अतीतकलियुगान्तावतारापेक्षयाऽभूदिति निर्देशो वा । पूर्वं तु हित्थादिवत्तन्नामाभूत्, त्वद्व्युत्पन्ने तु तत्सार्थकमभूदित्यर्थः ॥

दत्तात्रेयं स्तौति—

सन्तमद्वयमयेऽध्वनि दत्ता-
त्रेयमर्जुनयशोर्जनबीजम् ।
नौमि योगजयितानघसंज्ञं
त्वामलर्कभवमोहतमोर्कम् ॥ ९४ ॥

सन्तमिति ॥ अहं दत्तात्रेयनामानं त्वां नौमि । किंभूतम्—

अद्वयमयेऽध्वनि अद्वैतमार्गे ऐकात्म्यवादे सन्तं वर्तमानं, तथा—अर्जुनस्य कार्तवीर्यार्जुनस्य यशसो यदर्जनं तस्य बीजं मूलम् । कार्तवीर्येणाराधितो दत्तात्रेयस्तव यशो लोकव्यापि भविष्यतीति वरं दत्तवान् । 'अर्जुन-' इति पाठे—अर्जुनयश एवार्जुनो वृक्षः, तस्य बीजम् । वृक्षस्योत्पत्तिर्बीजादेव युक्ता । अथच—अर्जुनं धवलं यशो यस्यैवंविधोऽर्जुनः कार्तवीर्यस्तस्य बीजम् । तथा—अ-ष्टाङ्गयोगेन जनितोत्पादिता पापादिराहित्यादनघ इत्यपरा संज्ञा यस्य । तदा हि देवैर्योगबाहुल्यादनघेति संज्ञा कृता । तथा—अलर्कनाम्नः शत्रुध्वजमदालसापुत्रस्य राज्ञो भवमोहो ममतादि-रूपः संसारमोहः स एव तमोऽन्धकारः तस्य विनाशहेतुत्वादर्क-स्तम् । योगमार्गोपदेशेन तस्य मोहं चिच्छेदेति पुराणकथा ॥

एवं दशावतारान्निर्वर्ण्य भक्त्यतिशयेन पुनरपि कियतस्ताने-वावतारान्विविक्रमं हरिहरौ बालमुकुन्दं च संक्षेपेण चतुर्विंशत्या श्लोकैर्वर्णयति—

भानुसूनुमनुगृह्य जय त्वं
राममूर्तिहततद्वत्रहपुत्रः ।
इन्द्रनन्दनसपक्षमपि त्वां
नौमि कृष्ण निहतार्कतनूजम् ॥ ९५ ॥

भानुसूनुमिति ॥ हे विष्णो, भानुसूनुं सूर्यपुत्रं सुग्रीवमनु-गृह्य वालिहतां तद्भूं तारां तस्मै दत्वा राज्याभिषेकद्वारा कृता-र्थीकृत्य राममूर्त्या रामावतारेण हतो मारितो वृत्रहणः (ग्रः) इन्द्रस्य पुत्रो वाली येन स त्वं रामो जय सर्वोत्कर्षेण वर्तस्व । नमस्योऽसीत्यर्थः । तथा—भोः कृष्णावतार, अहं इन्द्रनन्दनस्या-र्जुनस्य सपक्षं मित्रभूतम्, अत एव—निहतो मारितोऽर्कतनूजो येनेति वा । यो भानुसूनुमनुगृह्णाति स निहतार्कतनूजः कथम् । तथा—यो हतेन्द्रपुत्रः स इन्द्रपुत्रमित्रं कथमिति विरोधार्थोऽपि-शब्दः । निग्राह्यानुग्राह्ययोस्तत्पुत्रयो रामकृष्णावतारयोश्च भेदात्तु विरोधपरिहारः । एतादृग्विरुद्धचरितत्वाद्दुर्विज्ञेयः परमपुरुषोसीति भावः ॥

वामनादणुतमादनुजीया-
स्त्वं त्रिविक्रमतनूभृतदिक्कः ।
वीतहिंसनकथादथ बुद्धा-
त्कल्किना हतसमस्त नमस्ते ॥ ९६ ॥

वामनादिति ॥ हे विष्णो, अणुतमाद् ह्रस्वतमशरीराद्वाम-नावतारादनु पश्चात्त्रिविक्रमावतारस्य तन्वा शरीरेण त्रिविक्रमाव-ताररूपया वा तन्वा भूता व्याप्ता दिशो येन स त्वं जीयाः सर्वो-त्कर्षेण वर्तस्व । तथा—वीता निवृत्ता हिंसनकथा प्राणिवधवा-र्तापि यस्मात् एवंभूताद्बुद्धावतारात्, अथ पश्चात् कल्किना दश-मावतारेण कृत्वा हतं मारितं कलिमलदूषितं समस्तं प्राणिजातं येन तादृश विष्णो, ते तुभ्यं नमः । यो अणुतमः स एव तनूभूत-दिक्को व्यापकदेहः कथम् । तथा—यश्च वीतहिंसनकथः स एव हतसमस्त इति विरोधः, अवतारभेदेन परिहारः । दुर्विज्ञेयचरि-तोसीति भावः । वामनत्रिविक्रमौ वर्णितौ ॥

मां त्रिविक्रम पुनीहि पदे ते
किं लगन्नजनि राहुरुपानत् ।
किं प्रदक्षिणनकृद्भमिपाशं
जाम्बवानदित ते बलिबन्धे ॥ ९७ ॥

मामिति ॥ हे त्रिविक्रम, त्वं मां पुनीहि । तथा—गगनव्यापिन्यूर्ध्वीकृते ते पदे विष्णुपदे लगन् नक्षत्रमालामध्यवर्ती श्यामरूपो राहुरुपानद् अजनि किं पादरक्षिकैव जाता किम् । एतावदतिमहच्छरीरं धृतम्, यस्य चरणस्थाने गगनस्थो राहुरुपानदिव जात इत्यर्थः । सापि हि श्यामा, चरणे च लगति । तथा—प्रदक्षिणनं प्रदक्षिणाख्यं पञ्चदशमुपचारं कुर्वन् जाम्बवान् ऋक्षराजो ब्रह्मावतारो बलिनिबन्धननिमित्तं ते तुभ्यं भ्रमिपाशं परिभ्रमणरूपं वलयाकारवेष्टनमेव पाशं बन्धनरज्जुमेवादित दत्तवान् किम् । यो हि कंचिद्बन्धुमुपक्रमते तस्मै केनचित्पाशो दीयते । यद्यपि देवेन बलिर्वाग्बन्धमेव प्रापितः, नतु रज्वादिबन्धम् । तथापि लोके बद्ध इति प्रसिद्धिवशाद्बन्धशब्दच्छलेन कविः पाशशब्दं प्रायुङ्क । जाम्बवान् किल तदा त्रिविक्रमस्य षोडशोपचारपूजामकृतेति प्रवादः । अत्रापि त्रिविक्रमो वर्णितः । 'बन्धे' इति पाठे तृन्नन्ताद्बन्धेश्चतुर्थी 'ते' इत्यस्य विशेषणम् । 'बन्धः' इति तस्मादेव संबुद्धिः ॥

अर्धचक्रवपुषार्जुनबाहू-
न्योऽलुनात्परशुनाथ सहस्रम् ।
तेन किं सकलचक्रविलूने
बाणबाहुनिचयेऽश्नति चित्रम् ॥ ९८ ॥

अर्धेति ॥ यो जामदग्न्यो भवान् चक्रस्यार्धं समो भागस्तस्यैव वपुः स्वरूपं यस्य तदाकारेण परशुना कृत्वा सहस्रम् अर्जुनबाहून् शीघ्रमेवालुनात् चिच्छेद । तेनैव भवता सकलेन सुदर्शनचक्रेण विलूने बाणासुरस्य बाहुनिचये विषये लोकश्चित्रमाश्चर्यमश्नति किम्, अपितु न प्राप्नोति । अथच—किमिति प्राप्नोति, अपितु वृथैव तत् । येन पूर्वमेकस्य बाहुसहस्रं छिन्नं तेनैवान्यस्य बाहुसहस्रे छिन्ने न किंचिच्चित्रम्, तत्र क्लृप्तशक्तित्वादित्यर्थः । येन चार्धेन चक्रेण बाहुसहस्रं छिन्नम्, तेनैव समग्रेण चक्रेण बाहुसहस्रे छिन्ने सुतरां न चित्रमित्यर्थः । परशुरामकृष्णौ वर्णितौ ॥

पाञ्चजन्यमधिगत्य करेणा-
पाञ्चजन्यममुरानिति वक्षि ।
चेतनाः स्थ किल पश्यत किं ना-
चेतनोऽपि मयि मुक्तविरोधः ॥ ९९ ॥

पाञ्चजन्यमिति ॥ हे विष्णो, त्वं वामकरेण पाञ्चजन्यनामानं शङ्खमधिगत्य धृत्वा, तथा—अपां (जलानां) च जन्यमुत्पाद्यं कमलं च दक्षिणकरेण धृत्वाऽसुरान्दैत्यानिति वक्षीव प्रतिवदसीव । इति किम्—हे दैत्याः, अचेतनोऽप्ययं शङ्खो मयि मुक्तविरोधः किं न, अपितु त्यक्तविरोध एव । किल यस्मात्पाञ्चजन्यत्वे सत्यपि अपाञ्चजन्यत्वमङ्गीकरोति । यूयं पश्यत, यतः सचेतनाः स्थ चैतन्ययुक्ता वर्तध्वे, कस्मान्मयि विषये विरोधं कुरुथेति अचेतना अपि मयि विरोधं नाचरन्ति, किमुत मरणभीताः सर्वज्ञाः । तस्मान्मयि विरोधं मा स्म कृढ्वम् । शब्दत एव विरोधः । अर्थद्वयेन तत्परिहारः । अथवा—अचेतन एव मयि मुक्तविरोधः शङ्खवत् । यूयं तु सचेतनाः स्थ, तस्मान्मयि विरोधमाचरथेति शङ्खवद्भवतोऽपि यावदचेतनाश्च कुर्वे, तावद्विरोधो न त्यज्यत इति, अथवा—अचेतनोऽपि शङ्खो मयाद्यापि न मोच्यते, सचेतनास्तु शङ्खादयो भवतः कथं वा मया मोच्येरन् । अपितु मारयिष्याम्येवेति वक्षीत्यर्थः । अधिगत्य च अधिगत्यैवेति वा पक्षे संबन्धः । अचेतनोऽपि मयि मुक्तविरोधः किं न पश्यतेति वा । अपामिति कर्तरि 'कृत्यानाम्' इति षष्ठी ॥

तावकोरसि लसद्वनमाले
श्रीफलद्विफलशाखिकयेव ।
स्थीयते कमलया त्वदजस्र-
स्पर्शकण्टकितयोत्कुचया च ॥ १०० ॥

तावकेति ॥ कमलया लक्ष्म्या लसन्ती पद्मपुष्पफलमयी वनमाला यस्मिंस्तस्मिंस्तावकोरसि श्रीफलस्य बिल्ववृक्षस्य द्विफलशाखिकयेव फलद्वययुक्तया ह्रस्वकोमलशाखयेव स्थीयते । किंभूतया श्रिया—तवाजस्रमनवरतं स्पर्श आश्लेषस्तेन कण्टकितया संजातसात्त्विकरोमाञ्चया, तथा—उत्कुचया चोन्नतपीवरस्तनया च । यत्र हि वनानां माला पङ्क्तिर्विलसति तत्र सकण्टकया फलसहितया च बिल्वशाखया स्थीयते, तथात्रापि लसद्वनमालत्वाद्विशिष्टया लक्ष्म्या विशिष्टबिल्वशाखयेव स्थीयते इत्युपमोत्प्रेक्षा वा । शाखिका, अल्पत्वे ह्रस्वत्वे वा कन् ॥

त्यज्यते न जलजेन करस्ते
शिक्षितुं सुभगभूयमिवोच्चैः ।
आननं च नयनायितबिम्बः
सेवते कुमुदहासकरांशुः ॥ १०१ ॥

त्यज्यत इति ॥ जलजेन शङ्खेन, अथच—पद्मेन, ते करः कदाचिदपि न त्यज्यते, सशङ्खचक्रगदापद्मत्वात्तवेत्यर्थः । तत्रोत्प्रेक्षते—उच्चैरत्यन्तं सुभगभूयं स्वत्करकमलरक्तिमादिसौभाग्यं शिक्षितुमिव । गुरुशुश्रूषा हि विद्याप्राप्तिहेतुः । तथा—कुमुदहासकराः कैरवविकासकारिणोंऽशवो यस्य स चन्द्रः नयनायितं नेत्रमिवाचरितं बिम्बं यस्य तथाभूतः सन् त्वदीयवामनयनीभवंश्चन्द्रः परमं निष्कलङ्कत्वादि त्वन्मुखसौभाग्यं शिक्षितुमिव त्वदाननं गुरुं च सेवते । त्यज्यते सेवते इति लटा—अनयोः सौभाग्यं पद्मचन्द्रयोरद्यापि नागतमिति सूच्यते । 'पाञ्चजन्य–' इत्यादिश्लोकत्रयेण मूलप्रकृतिरेव वर्णिता । नयनायितेति आचार्क्य(ङ)जन्ताच्छिष्टा । 'हासकर–' इति ताच्छील्ये टः ॥

ये हिरण्यकशिपुं रिपुमुच्चै
रावणं च कुरुवीरचयं च ।
हन्त हन्तुमभवंस्तव योगा-
स्ते नरस्य च हरेश्च जयन्ति ॥ १०२ ॥

य इति ॥ हे विष्णो, ये तव क्रमेण नरस्य मनुष्यस्य च हरेः

सिंहस्य च । तथा—नरस्य श्रीरामचन्द्रस्य, हरेः सुग्रीवस्य । तथा—नरस्य अर्जुनस्य, हरेः श्रीकृष्णस्य च । संयोगा उच्चैरधिकं रिपुं हिरण्यकशिपुं हन्तुम्, तथा रावणं च हन्तुम्, तथा कुरुवीराणां भीष्मादीनां चयं च हन्तुमभवन् । ते तव नरस्य हरेश्च योगा जयन्ति सर्वोत्कर्षेण वर्तन्ते । हन्ताश्चर्यम् अवतारत्रयमपि नरहरियोगावलम्बनात् । योगः संश्लेषो मैत्री च ॥

केयमर्धभवता भवतोहे
मायिना ननु भवः सकलस्त्वम् ।
शेषतामपि भजन्तमशेषं
वेद वेदनयनो हि जनस्त्वाम् ॥ १०३ ॥

केति ॥ हे विष्णो, तव इयं पुराणादिषु दृश्यमाना अर्धे भवो महेशो यस्य तादृशोर्धभवस्तत्ता हरिहरमूर्तिता काप्यपूर्वाश्चर्यकारिणी मायिना भवता ऊहे (ऊढा) मुखात्प्रभृति चरणपर्यन्तं श्यामत्वादितत्तदसाधारणचिह्नयुक्तार्धस्य अर्धस्य च धवलत्वाद्यसाधारणचिह्नयुक्तता, एतादृशी लोकोत्तरा तव मायाश्चर्यकारिणीत्यर्थः । अथ च केयम्, अपित्वनुचितैव । ननु अहो यस्मात्त्वं सकलः समग्रो भवो महेशः, अथ च—चन्द्रकलासहितो यो महेशः स्वतन्त्रमूर्तिः स त्वमेव । तथा च सकलभवरूपस्यार्धभवरूपता विरोधादयुक्ता । आश्चर्यकारित्वेऽप्ययमेव हेतुः । हरिहरात्मकता चावतारान्तरमित्यवतारभेदेन तु विरोधपरिहारः । भवतेयमर्धभवता का ऊहे ऊढेत्यर्थ इति वा । अथ च—तवेयमर्धसंसारता का, अपि तु—विरुद्धा चित्ररूपा वा । यतः—समग्रः कलाभिरवयवैः सह वर्तमानश्च संसार उत्पत्तिधर्मा त्वमेवेति वा । हि यस्माद्वेदा एव नयनानि यस्य सकलवेदार्थनिश्चयदृढप्रत्ययो जनो लोकस्त्वां शेषतामेकदेशभूततां पृथग्भूततां भजन्तमपि अशेषं चराचरजगद्रूपं च वेद जानाति । 'सर्वं विष्णुमयं जगत्' इत्यादिश्रुतिस्मृतिभिस्तव चराचररूपत्वप्रतिपादनात्त्वयि सकलभवत्वं युक्तमेवेत्यर्थः । किंपुनर्हरिहरादिविचित्ररूपधारणम् । अथच शेषोऽपि विष्णोरेव मूर्तिरनन्ततां भजति, स एव कथमशेषोऽनन्तो न भवतीति च विरोधः । व्याख्यान्तरेण तत्परिहारः ॥

प्राग्भवैरुदगुदग्भवगुम्फा-
न्मुक्तियुक्तिविहताविह तावत् ।
नापरः स्फुरति कस्यचनापि
त्वत्समाधिमवधूय समाधिः ॥ १०४ ॥

प्राग्भवेति ॥ प्राग्भवैः प्राक्तनैः पूर्वजन्मोपार्जितैः कर्मभिर्हेतुभिरुदगुदग्भवस्योत्तरोत्तरस्य संसारस्य जन्मनो वा गुम्फाद्बन्धनाद्धेतोः 'आत्यन्तिकी दुःखनिवृत्तिः, अविद्यास्तमयो (वा) मोक्षः' इत्येवंलक्षणाया मुक्तेर्युक्तिर्योगः । प्राप्तिरिति यावत् । तस्या विहतावनेकजन्मसु तत्तत्सुकृतदुष्कृतरूपकर्मार्जनान्मूलसद्भावात्संसारानिवृत्तौ कथं नाम मुक्तिः संभवतीत्यादिभिर्युक्तिभिरनुपपद्यमानतायां तावन्निश्चयेन सत्यामिहैवं पूर्वपक्षे विषये कस्यचनापि वादिनस्त्वयि समाधिश्चित्तैकाग्र्यं ध्यानं संततानुचिन्तनमवधूय परिहृत्यापरोऽन्यः समाधिः परिहारः सिद्धान्तरूपो न स्फुरति प्रकाशते । उक्तरीत्या यद्यपि मुक्तिविहतिस्तथापि तव ध्यानादिद्वारा प्राप्तपरमात्मरूपसाक्षात्कारेणैव प्राचीनतत्तज्जन्मार्जितकर्मणां समुन्मूलनादिदानीमन्यकर्मारम्भे प्रारब्धकर्मणां भोगादेव क्षयात्तत्कर्म्ये संपन्ने मुक्तिर्युज्यत एवेति सर्वेषामपि वादिनां स्वत्समाधिरेव सिद्धान्त इत्यर्थः । मुक्तिहेतुस्त्वमेवेति भावः । न तावत्स्फुरतीति वा ॥

ऊर्ध्वदिक्कदलनां द्विरकार्षीः
किं तनुं हरिहरीभवनाय ।
किं च तिर्यगभिनो नृहरित्वे
कः स्वतन्त्रमनु नन्वनुयोगः ॥ १०५ ॥

ऊर्ध्वेति ॥ हे विष्णो, त्वं हरिहरीभवनाय हरेर्हरस्यापि भवनाय हरिहरमूर्तीभवितुमूर्ध्वां दिग्यस्मिन्दलने तदूर्ध्वदिक्कमेवंभूतं दलनं विभागो यस्यास्तादृशीं तनुं द्विःप्रकारां किमकार्षीः । हरिहरमूर्तौ चरणादिकमूर्ध्वपर्यन्तं तत्तद्विसदृशवर्णादिधारणादधोभागमारभ्योर्ध्वभागपर्यन्तं किमकार्षीः । नृहरित्व इव तिर्यग्विभागामेव किमिति नाकार्षीरित्यर्थः । चरणादेरारभ्य देवतावर्णनस्य कर्तुं युक्तत्वादूर्ध्वदिक्कयुक्तम् । यदि च हरिहरत्वे तनुमूर्ध्वदिक्कविभागामकार्षीस्तर्हि नृहरित्वे नरहरीभवितुं तनुं तिर्यग्यथातथा किमिति अभिनः विभक्तवानसि । कण्ठादधोभागे नरत्वेन, ऊर्ध्वभागे सिंहत्वेनैव तिर्यग्दिक्कविभागं किमित्यकार्षीः । हरिहरत्व इवोर्ध्वदिक्कविभागमेव किमिति नाकार्षीरित्यर्थः । एवमाक्षेपद्वयं स्वयमेव परिहरति—ननु विष्णो, स्वतन्त्रं त्वामनु प्रति अनुयोगः प्रश्नः कः, अपितु—न युक्तोऽयं प्रेम्णद्वारक आक्षेपः । समर्थो हि स्वेच्छया यत्किंचित्करोति, परं किमर्थमेवं करोषीत्याक्षेपार्हः स न भवतीत्यर्थः । 'न खलु परतन्त्राः प्रभुधियः' इति न्यायेन स्वेच्छामात्रेण तथातथा रूपं करोषीति भावः । अत्र हरिहर-नरहरिवर्णनम् । ऊर्ध्वदिक्केति बहुव्रीहौ कप् ॥

आप्तकाम सृजसि त्रिजगत्किं
किं भिनत्सि यदि निर्मितमेव ।
पासि चेदमवतीर्य मुहुः किं
स्वात्मनापि यदवश्यविनाश्यम् ॥ १०६ ॥

आप्तेति ॥ हे आप्तकाम अवाप्तसकलाभिलाष विष्णो, त्वं त्रिजगत् किं सृजसि । यदीदं निर्मितमेव, तर्हि निष्प्रयोजनमेव किं भिनत्सि । यदि चेदं स्वयमात्मनापि निश्चयेन संहरणीयमेव तर्हि मुहुर्वारंवारं तेनतेन प्रकारेणावतीर्य जन्मादिक्लेशमनुभूयेदं जगत् किमर्थं पासि च । यदवश्यं विनाश्यम्, तत्कोपि नहि स्वात्मना स्वयमेव पालयति । प्रयोजनाभावात् सृष्टिपालनसंहारान्किमर्थं करोषीत्यर्थः । अत्रापि 'कः स्वतन्त्रम्–' इत्यादिः पूर्व एव परिहारः । ब्रह्मादिरूपस्त्वमेवेति भावः । इष्टप्राप्तिरनिष्टनिवृत्तिश्चेति तुर्यं प्रयोजनं सर्वस्य । ततश्च—इष्टप्राप्तावनिष्टनिवृत्तेरन्तर्भावं मन्यमानः श्रीहर्षः 'आप्तकाम' इत्येव संबुद्धिमकृतेति ज्ञेयम् ॥

जाह्नवीजलजकौस्तुभचन्द्रा-
न्पादपाणिहृदयेक्षणवृत्तीन् ।

उत्थिताब्धिसलिलात्त्वयि लोला
श्रीः स्थिता परिचितान्परिचिन्त्य १०७

जाह्नवीति ॥ अब्धिसलिलात् उत्थिता निर्गता लोला स्वभावतश्चपलापि लक्ष्मीः यथाक्रमं जाह्नवी च जलजं पाञ्चजन्यश्च कौस्तुभश्च चन्द्रश्च तान् पादे पाणौ हृदये ईक्षणे वामनेत्रे च वृत्तिरवस्थानं येषामेवंभूतान्परिचितान्समुद्रैकाश्रयतासहवाससंजातस्नेहान् सुहृदस्त्वयि विष्णौ परिचिन्त्य विचार्य दृष्ट्वेव त्वयि स्थिता किम्। चाञ्चल्यं परित्यज्य त्वयि नित्यावस्थितिरभूत् किम्। जाह्नव्यादयो लक्ष्मीश्च तव सेवां कुर्वन्ति, एतादृशः परमपुरुषोऽसीति भावः ॥

वस्तु वास्तु घटते न भिदानां
यौक्तनैकविधबाधविरोधैः ।
तत्त्वदीहितविजृम्भिततत्त-
श्चेदमेतदिति तत्त्वनिरुक्तिः ॥ १०८ ॥

वस्त्विति ॥ हे विष्णो, घटपटादिवस्तुजातं यौक्तैर्युक्तिसंबन्धिभिर्युक्तिकृतैर्न्यायोत्थैर्नैकविधैर्बहुप्रकारैर्बाधैः साधारणदूषणैः तथा—विरोधैर्ब्रह्माद्वैतप्रतिपादकसर्वोपनिषद्वाक्यवैपरीत्यरूपैरसाधारणदूषणैः, यद्वा—नैकविधान् भिन्नान् घटपटादीन् बाधन्ते इति नैकविधबाधास्तथाभूतैर्विरोधैर्हेतुभिरिदमस्माद्भिन्नमित्येवं विशेषणत्वेन प्रतीयमानानां भिदानां वास्तु आधारो (वस्तु पदार्थो) न घटते न प्रयुज्यते। किंत्वभिन्नं ब्रह्माद्वैतमेव घटत इत्यर्थः। तर्हि भेदप्रतीतेः का गतिरित्यत आह—तदिति। तस्मादुक्तहेतुभिर्भेदस्तद्विशिष्टं वस्तु वा न घटते तस्मादनिर्वाच्यानाद्यविद्यारूपेण त्वदीहितेन, अनिर्वचनीयत्वादिनातिप्रसिद्धेन त्वदीहितेन वा करणेन कर्तृणा वा विजृम्भितः प्रकटीभूतः कृतो वाविद्यमानोऽप्यारोप्यत्वेन प्रत्यायितः स स घटादिरूपो भेदो यस्य तादृशमेतद्वस्तुजातमित्येवं तत्त्वस्य प्रामाणिकस्यार्थस्य निरुक्तिर्निर्वचनं निश्चितोक्तिः। अभेददर्शनोक्तयुक्तिशतबाधात्तत्तच्छ्रुतिविरोधाच्च तत्त्वतो वस्तुभेदाभावे प्रतिभासमानस्य च भेदस्य द्विचन्द्रबुद्धिवदप्रामाणिकत्वे सकलमिदं जगदभिन्नमिति श्रवणमननादिक्रमेण संजातभवत्साक्षात्कारस्य सच्चिदानन्दघनस्त्वमेकः, नतु त्वदतिरिक्तं किंचिदिति बोधः समुदेतीति तत्त्वनिर्णय इति भावः। एतेन 'तत्त्वमसि' इत्याद्युपनिषदर्थोपि संगृहीत इति ज्ञेयम्। यौक्तेति संबन्धेऽण्। युक्त्यन्तरं ग्रन्थान्तरात्सुधिया बोद्धव्यम्। विस्तरभयादत्र न लिखितम् ॥

वस्तु विश्वमुदरे तव दृष्ट्वा
बाह्यवत्किल मृकण्डुतनूजः ।
स्वं विमिश्रमुभयं न विविञ्च-
न्निर्ययौ स कतमस्त्वमवैषि ॥ १०९ ॥

वस्त्विति ॥ किलेत्यागमे। हे विष्णो, मृकण्डुतनूजो मार्कण्डेयः बाह्यवत् बाह्ये त्रिजगति यथा वर्तते तथैव तवोदरे वर्तमानं विश्वं त्रैलोक्यसंबन्धि घटपटादि सर्वं वस्तु दृष्ट्वा विशेषेण मिश्रमेकत्रैवोदरे द्वयोरपि स्थितत्वादविविक्तमुभयं पूर्वं बहिरन्तश्च वर्तमानत्वाद्विविधं स्वमात्मानं न विविञ्चन् अनिश्चिन्वन् 'बहिश्चरो योहमुदरं प्रविष्टः स कः, यश्च पूर्वमेवोदरे वर्तते स कः, इति भवन्मायोपबृंहितत्वाद्विशेषेणाजानन् स कतमो द्वयोरन्तर्बहिश्चरयोर्मध्ये क इति विवेक्तुमशक्नुवन् निर्ययौ। मायाबालको भवन्निश्वासेन सहोदरं प्रवेश्य तत्र च लोकत्रयं प्रदर्श्य मार्कण्डेयस्य वक्त्राच्छनैर्विनिर्ग(र्गि)तः स कतम इति त्वमेवावैषि जानीषे नान्य इत्यर्थः। अयमितिहासो हरिवंशादवसेय इत्यलम्। बालमुकुन्दरूपोपि त्वमेवासीति भावः। यद्वा यस्य तवोदरे बाह्यं सर्वं वस्तु दृष्ट्वा मार्कण्डेयो जठरस्थेन स्वेनैव विमिश्रमुभयं स्वमजानन्सञ्चिर्ययौ स कतमोऽनेकेष्ववतारेषु मध्ये स को वा विशिष्टस्तवावतार इति त्वमेव जानीषे, नान्यः कश्चित्वां जानाति स्वप्रकाशत्वादित्यर्थ इति व्याख्येयम्। अत्र बहुजातिपरिप्रश्नविषयत्वाद्भुतमत्र ॥

ब्रह्मणोऽस्तु तव शक्तिलतायां
मूर्ध्नि विश्वमथ पत्युरहीनाम् ।
बालतां कलयतो जठरे वा
सर्वथासि जगतामवलम्बः ॥ ११० ॥

ब्रह्मण इति ॥ भो विष्णो, स्थावरजङ्गमात्मकं विश्वं ब्रह्मणः परमात्मस्वरूपस्य तव शक्तिरूपायां सामर्थ्यरूपायां लतायां सृष्टेः प्राक् अस्तु वर्तताम्। 'सृष्टेः प्रागमूर्तं ब्रह्मणि विश्वं लीयते' इति पुराणोक्तिः। तथाच त्वन्मायालतायां विश्वं वर्तते अथ सृष्ट्यनन्तरं सृष्टं विश्वं त्वदंशस्य अहीनां पत्युः शेषस्य मूर्ध्नि वर्तताम्। प्रलये च संहारार्थं बालतां मायाशिशुत्वं कलयतोऽङ्गीकुर्वतस्तवैव जठरे चास्तु समस्तमास्तामित्येव सर्वथा सर्वप्रकारेण त्वं जगतामवलम्बोसि। वा समुच्चयार्थः। एतेन सृष्टिस्थितिलयकर्ता त्वमेवेति सूचितम्। 'अस्ति-' इत्यपि क्वचित्पाठः ॥

धर्मबीजसलिला सरिदङ्गा-
वर्थमूलमुरसि स्फुरति श्रीः ।
कामदैवतमपि प्रसवस्ते
ब्रह्म मुक्तिदमसि स्वयमेव ॥ १११ ॥

धर्मेति ॥ हे विष्णो, धर्मस्य प्रथमपुरुषार्थस्य बीजं प्ररोहकारणं सलिलं यस्याः सा सरिद्रूपा तवाङ्घ्रौ चरणे स्फुरति शोभते। तथा—अर्थस्य द्वितीयपुरुषार्थस्य मूलमादिकारणं श्रीस्तवोरसि स्फुरति। तथा—कामरूपं दैवतं कामरूपस्तृतीयपुरुषार्थोऽपि ते प्रसवः कृष्णरूपस्य तव प्रद्युम्नरूपतया पुत्र एव। सोऽपि पुत्रत्वादधीन एवेत्यर्थः। तथा—मुक्तिदं चतुर्थपुरुषार्थभूतमोक्षदानसमर्थं ब्रह्म परमात्मरूपं स्वयमेव स्वरूपेणैव त्वं भासि। चतुर्विधपुरुषार्थहेतुतया धर्मार्थकाममोक्षार्थिनां त्वदुपासनैवोचितेति भावः ॥

इदानीं कतिचिन्निः श्लोकैर्भगवन्नामसंकीर्तनमाहात्म्यं वर्णयति—

लीलयापि तव नाम जना ये
गृह्णते नरकनाशकरस्य ।
तेभ्य एव नरकैरुचिता भी-
स्ते तु बिभ्यतु कथं नरकेभ्यः ॥ ११२ ॥

लीलयेति ॥ विष्णो, ये जना नरकस्य भौमासुरस्य नाशकरस्तस्य, अथच—पुण्यश्लोकत्वाश्चिरयनाशकारिणस्तव नाम राम, विष्णो, इत्यादि संज्ञा सङ्केतपरिहासादिप्रसङ्गान्तररूपया लीलया विलासमात्रेणापि गृह्णते उच्चारयन्ति तेभ्य एव स्वनामग्राहिभ्यो नरेभ्य एव सकाशात् पातकियातनास्थानभूतैर्महारौरवादिनरकैर्भीस्तत्कर्तृका तदधिकरणिका वा भीतिरुचिता योग्या । तेभ्य एव तैर्भयं प्राप्तुमुचितमित्यर्थः । ते तु नरकनाशकारिभवन्नामग्राहिणः क्षीणपापा नराः पुनः कथं नाम बिभ्यतु भयं प्राप्नुवन्तु, भवितु न कथंचित् । तदुक्तं श्रीभागवते—'साङ्केत्यं पारिहास्यं च स्तोभं हेलनमेव वा । वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥' इति । लीलयापीत्यपिशब्देन ये तु बुद्धिपूर्वमेव भवन्नामजपमेव कुर्वन्ति तेभ्यो नरका बिभ्यतीति किमु वक्तव्यमिति सूचितम् । नरकैर्भीरिति 'कर्तृकर्मणोः कृति' इति षष्ठीप्राप्तावपि संपदादित्वात्क्विपः क्यधिकारविहितत्वात्स्त्रीप्रत्ययत्वे 'शेषे स्त्रीप्रत्यये वा' इति वार्तिकात्पक्षे 'कर्तृकरणयोः—' इति तृतीया ॥

मृत्युहेतुषु न वज्रनिपाता-
द्भीतिमर्हति जनस्त्वयि भक्तः ।
यत्तदोच्चरति वैष्णवकण्ठा-
श्लिष्टप्रयत्नमपि नाम तव द्राक् ॥ ११३ ॥

मृत्युहेतुष्विति ॥ हे विष्णो, त्वयि विषये भक्तो जनः अनेकेषु मृत्युहेतुषु मध्ये वज्रनिपातरूपान्मृत्युकारणात्सकाशाद्भीतिं नार्हति भयं प्राप्तुं योग्यो न भवति । यद्यस्मात्कारणात्तदा वज्रपातसमये तस्य वैष्णवस्य कण्ठाश्लिष्टप्रयत्नं निरन्तरहरिस्मरणाभ्यासवशेन तस्मिन्काले विशिष्टमुद्यमं विनापि तव श्रीरामकृष्णादिनाम द्राक् शीघ्रमुच्चरति निर्गच्छति । वज्रनिपातान्मरणे संजातेऽपि तस्मिन्समये उक्तरीत्या नामोच्चारणसद्भावात्तावन्मात्रेण मोक्षप्राप्तेः पुनर्जन्माभावान्मृत्योर्भयं वैष्णवस्य नास्तीति भावः । मृत्युहेतुषु मध्येन्यापेक्षया दारुणान्मृत्युहेतोर्वज्रनिपातादपि सकाशाद्वैष्णवो भयं नार्हतीति किं वाच्यमित्यर्थः । तस्मान्मृत्युसमये वैष्णवकण्ठाश्लिष्टप्रयत्नमपि तव नाम द्राङ्निर्गच्छति । व्याघ्राद्यनेकमृत्युहेतुषु हरिस्मरणादेव मृत्युभयं नास्तीति ज्ञातव्यम् । उच्चरति, सकर्मकत्वाभावात् 'उदश्चरः सकर्मकात्' इति न तङ् ॥

अथ स्मरणमाहात्म्यमाह—

सर्वथापि शुचिनि क्रियमाणे
मन्दिरोदर इवावकरा ये ।
उद्भवन्ति भविनां हृदि तेषां
शोधनी भवदनुस्मृतिधारा ॥ ११४ ॥

सर्वथेति ॥ हे विष्णो, सर्वथा मनोवाक्कायनियमनाद्यनेकप्रकारैर्निर्धूतपापतया शुचिनि शुद्धे ब्रह्मार्पितफलत्वेन बन्धककर्मरहिते वा क्रियमाणेऽपि भविनां संसारिणां हृदि मनसि येऽज्ञानप्रमादकृता अवकरा रागादिदोषा उद्भवन्ति तेषां दोषाणां भवतोऽनुस्मृतिर्ध्यानं तस्या धारा परम्परा शोधनी प्रक्षालनहेतुः, नान्यः कश्चित् । कस्मिन्निव—मन्दिरोदरे गृहमध्य इव । यथा पुनःपुनर्मार्जनेन विरजस्के क्रियमाणे गृहमध्ये ये तृणरजःपुञ्जा नवा नवा उद्भवन्ति तेषां शोधनी संमार्जनी भवति तथेत्यर्थः । भवदनुस्मृतिरेव चित्तशुद्धिसंपादनद्वारा नैष्कर्म्यसंपादनेन मोक्षहेतुरिति भावः । 'भुवि' इति पाठे—चेतस्येव भुवि स्थाने इत्यर्थः । 'संमार्जनी शोधनी स्यात्संकरोऽवकरस्तया । क्षिप्ते' इत्यमरः ॥

पुनरपि नामान्तरापेक्षया रामनाम्नो माहात्म्यमाह—

अस्मदाद्यविषयेपि विशेषे
रामनाम तव धाम गुणानाम् ।
अन्वबन्धि भवतैव तु कस्मा-
दन्यथा ननु जनुस्त्रितयेऽपि ॥ ११५ ॥

अस्मदिति ॥ अत्रैते गुणाः सन्तीति विशेषाकारेण विशेषेऽस्मदादीनामज्ञानामविषये युष्मद्गोचरे सत्यपि तव सहस्रनामसु मध्ये रामेतिनाम गुणानां धाम स्थानम् । यद्वा—हे राम, तव नाम गुणानां स्थानम् । अज्ञातेपि विशेषे कुत एतन्निर्णीतमित्याशङ्क्यार्थापत्तिं प्रमाणयति—अन्यथा तु पुनर्यद्येवं न स्यात्तर्हि ननु जनुस्त्रितयेपि जामदग्न्यदाशरथिबलभद्ररूपजन्मत्रयेपि भवतैव कस्माद्धेतोराग्रहेण पौनःपुन्येन रामेत्येव नाम अन्वबन्धि अङ्गीकृतम् । अनेकजन्मस्वेतस्य स्वयंव स्वीकारात्तत्प्रेयस्तमं किमपीति ज्ञायते । तस्माद्रामनाम गुणगणस्थानमित्यर्थापत्तिः । तथाच शिवेनापि 'राम रामेति रामेति—' इत्यादि पार्वती प्रत्युक्तम् ॥

भक्तिभाजमनुगृह्य दृशा मां
भास्करेण कुरु वीततमस्कम् ।
अर्पितेन मम नाथ न तापं
लोचनेन विधुना विधुनासि ॥ ११६ ॥

भक्तीति ॥ हे नाथ, त्वं भास्करेण सूर्यरूपया दक्षिणदृशा त्वयि भक्तिभाजं मामनुगृह्य मयि प्रसाददृष्टिपातं कृत्वा वीततमस्कं गताज्ञानं कुरु । प्रसाददृष्टिपातान्मम सकलामप्यविद्यां विनाशयेत्यर्थः । सूर्येण च तिमिरं निरस्यते तथा मयि अर्पितेन प्रसादनिहितेन विधुना चन्द्ररूपेण वामलोचनेन कृत्वा मम त्रिविधमपि तापं न विधुनासि न दूरीकरोषि, अपितु निराकुर्वीति काकुः । चन्द्रेण च शीतत्वात्तापशान्तिः क्रियते । एवं स्तुवन्तं मां प्रसादृष्ट्या विलोक्य कृतार्थीकुर्वीति भावः ॥

लङ्घयन्नहरहर्भवदाज्ञा-
मस्मि हा विधिनिषेधमयीं यः ।
दुर्लभं स तपसापि गिरेव
त्वत्प्रसादमहमिच्छुरलज्जः ॥ ११७ ॥

लङ्घयन्निति ॥ हे स्वामिन्, योऽहं 'संध्यावन्दनादि कुर्यात्' इति विधिः 'ब्रह्महननादि न कुर्यात्' इति निषेधः, तन्मयीं तद्रूपां भवदाज्ञां 'श्रुतिस्मृती ममैवाज्ञे' इति वचनाच्छ्रुतिस्मृ-

---

१ भाष्यपर्यालोचनया तु 'उभयप्राप्तौ' इत्येतद्विधीयमाननियमस्यैव वैकल्पिकत्वमनेन क्रियते इति प्रतीयते । 'नरके गदिता भीः' इति पाठे कर्तर्यधिकरणत्वविवक्षायां सप्तमी कल्पनीया । 'नरकैर्निहिता भीः' इति वा पाठः कल्पनीयः । यथाश्रुतेऽपि पाठे कर्तरि करणत्वविवक्षायां वा तृतीया ।

तिरूपामहरहः प्रतिदिनं लङ्घयन्नतिक्रामन् यत् कर्तव्यतया त्वयोपदिष्टं तन्न करोमि, यच्च न कर्तव्यमित्युपदिष्टं तत्करोम्येवेति त्वदाज्ञां लङ्घयन्सन् अस्मि वर्ते। हा कष्टमनुचितकारी। सोहं महीयसापि तपसा दुर्लभं त्वत्प्रसादमिच्छुः 'प्रसीद' इति गिरैव प्रार्थयमानः सन्नलज्जो निर्लज्जोऽस्मि। यो हि एकदापि प्रभोराज्ञां करोति सोऽपि कथंचित्स्वामिप्रसादं लभते। यस्तु कदापि स्वाम्याज्ञां न करोति स दण्ड्योपि वाङ्मात्रेण प्रसादमिच्छन्निर्लज्ज एव। प्रसीदेति भावः। त्वत्प्रसादमिति 'न लोका-' इति षष्ठीनिषेधः॥

विश्वरूप कृतविश्व कियत्ते
वैभवाद्भुतमणौ हृदि कुर्वे।
हेम नह्यति कियन्निजचीरे
काञ्चनाद्रिमधिगत्य दरिद्रः॥ ११८॥

विश्वेति॥ हे विश्वरूप स्थावरजङ्गमात्मक, तथा—कृतविश्व-स्थावरजङ्गमकारिन् विष्णो, अहं ते तव वैभवाद्भुतं सामर्थ्यातिशयजन्यं तद्रूपं वाश्चर्यमणौ परमाणुरूपे हृदि मनसि कियत् किंपरिमाणं कुर्वे। अपितु-आधारस्याल्पीयस्त्वात्, आधेयस्य च महीयस्त्वात्सर्वं वैभवाद्भुतमणौ हृदि धारयितुं न शक्नोमीत्यर्थः। यद्यपि ते सामर्थ्यं महत्, तथापि कियदल्पमेव धारयामीति वा। युक्तमेतत्। यस्माद्दरिद्रोऽकिंचनो जनः काञ्चनाद्रिं सुमेरुमधिगत्य प्राप्य स्फुरदुरुसुवर्णग्रहणाभिलाषोऽपि सन् शतधा शकलीभूतेऽत्यन्तजीर्णे निजचीरे स्वीये वस्त्रे कियत्किंपरिमाणं हेम नह्यति बध्नाति, अपित्वल्पमेव ग्रन्थौ बध्नात्यसामर्थ्यात्, तथा सकलगुणवर्णनाभिलाषे सत्यपि सामर्थ्याभावात्कियन्मात्रगुणवर्णना कृतेति भावः। इति स्तुत्युपसंहारः॥

इत्युदीर्य स हरिं प्रति संप्र-
ज्ञातवासिततमः समपादि।
भावनाबलविलोकितविष्णौ[1]
प्रीतिभक्तिसदृशानि चरिष्णुः॥ ११९॥

इतीति॥ स नलः हरिं प्रति इत्युक्तप्रकारेणोदीर्य प्रसादं संप्रार्थ्य द्विविधसमाधिमध्ये संप्रज्ञाताख्येन समाधिना तत्र वासिततमः अतितरां संभावितमनास्तदेकतानः समपादि जातः। अतएव भावनाबलेन संप्रज्ञातध्यानबलेन विलोकिते साक्षात्कृते विष्णौ विषये प्रीतेः सहजप्रेम्णः भक्तेश्च सदृशानि योग्यानि कर्माणि आनन्दबाष्पगीतनृत्यादीनि चरितं कर्तुं शीलमस्य सः। तदुक्तं श्रीभागवते—'शृण्वन्सुभद्राणि रथाङ्गपाणेर्जन्मानि कर्माणि च यानि लोके। गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसङ्गः॥' इति। एवं संप्रार्थ्य प्रतिमादिसाकारध्यानेन विष्णुं साक्षादकृतेति भावः। 'विष्णुः' इति पाठे—भावनाबलेन विलोकितो विष्णुर्येन सः। अतएव—प्रीतिभक्तिसदृशानि चरिष्णुः। ऐकपद्ये—विष्णुप्रीत्यर्थं भक्तियोग्यान्युपहारादीनि। ध्यानसमाधिर्द्विविधः—संप्रज्ञातोऽसंप्रज्ञातश्च। तत्र ध्येयध्यातृभावयुक्तसाकारध्यानसमाधिः संप्रज्ञातः, संवित्संवेद्यविलोपेन निराकारस्वप्रकाशपरमानन्दलक्षणात्मसाम्राज्यध्यानसमाधिरसंप्रज्ञात इति योगशास्त्रम्॥

विप्रपाणिषु भृशं वसुवर्षी
पात्रसात्कृतपितृक्रतुकव्यः।
श्रेयसा हरिहरं परिपूज्य
प्रह्व एष शरणं प्रविवेश॥ १२०॥

विप्रेति॥ एष नलः प्रह्वः सन् शरणं भोजनगृहं प्रविवेश। नम्रत्वं गृहप्रवेशिनो जातिः। किंभूतः-विप्रपाणिषु भृशं नित्यदानसंबन्धि वसु गोभूहिरण्यादि वर्षत्येवंशीलः तथा पात्रसात्कृतं विद्यातपोवृत्तयुक्तपात्रभूतब्राह्मणाधीनं देयं कृतं पितृक्रतुकव्यं नित्यश्राद्धपितृयज्ञसंबन्धि कव्यं येन। तथा—श्रेयसा स्नानदेवपूजादिनित्यदाननित्यश्राद्धान्तकर्मानुष्ठानजन्येन पुण्येन पुष्पादिना च हरिहरमभेदबुद्ध्या विष्णुशिवरूपं नारायणं परिपूज्य तस्मिंस्तदर्पणेन तं परितोष्य भक्तिनम्रः सन्नमस्कारं कृत्वा नित्यश्राद्धान्तं ब्रह्मार्पणं कृत्वा भोजनार्थं गृहं प्राविशदिति भावः। 'हव्यकव्ये दैवपित्र्ये' इत्यमरः। पात्रसात् 'देये त्रा च' इति सातिः॥

माध्यंदिनादनु विधेर्वसुधासुधांशु-
रास्वादितामृतमयौदनमोदमानः।
प्राञ्चं स चित्रमविदूरितवैजयन्तं
वेश्माचलं निजरुचीभिरलंचकार॥ १२१॥

माध्यंदिनादिति॥ स वसुधासुधांशुर्भूचन्द्रो नलो माध्यंदिनान्मध्यंदिने विधेयाद्विधेरनु पश्चात्पञ्चमहायज्ञनिर्वपणानन्तरमास्वादितोऽमृतमयः शाकसूपादिव्यञ्जनादिनामृतरूप ओदनः, तेन शालितण्डुलप्रभवेणौदनेन कृत्वा मोदमानः आस्वादितोऽमृतमय ओदनो येन अतएव मोदमानो हृष्यत्तमः। एवंभूतः सन् प्राञ्चं यत्र भैम्या सह परिहासविलासं कृतवांस्तं पूर्वम्। अथच-वास्तुशास्त्रे 'शयनस्थानं प्राच्यां कर्तव्यम्' इत्युक्तत्वान्मुख्यराजप्रासादात्पूर्वदिक्स्थम्, चित्रं चित्रलेख्ययुक्तमद्भुतरूपं वा। तथा अत्युच्चत्वाच्छोभासाम्याच्चाविदूरीकृतो निकटीकृतो महेन्द्रप्रासादो येन वैजयन्ततुल्यं वेश्माचलं प्रासादरूपं पर्वतं निजरुचीभिः स्वीयकायकान्तिभिरलंचकार। भोजनं कृत्वा तं प्रासादमारूढवानित्यर्थः। चन्द्रोपि उदयन्नास्वादितामृतरूपेणौदनेन मोदमानः सुधापूर्णोऽद्भुतरूपं प्राच्यां वर्तमानत्वादुच्चत्वाच्च संनिहितवैजयन्तं प्राच्यां वर्तमानमुदयाचलं निजकिरणैरलंकरोति। अथच—चित्रमिति विरोधादाश्चर्यम्। चन्द्रो हि मध्यंदिने वर्तमानं मध्यंदिनसमयानन्तरमस्ताचलमेव रुचिभिरलंकरोति, नतु प्राच्यमचलम्। अयं तु चन्द्रोपि मध्याह्नानन्तरमपि प्राञ्चमचलमलंचकारेत्याश्चर्यमित्यर्थः। 'विवस्वान्-' इति पाठे—पूर्ववदन्यत्। आस्वादितं सर्वेभ्यो गृहीतं यदमृतं जलं तद्रूपेणौदनेन मोदमानः सूर्योऽप्येवंभूतमुदयाचलं निजदीप्तिभिरलंकरोति। अथच—सूर्योऽपि मध्याह्नानन्तरमस्ताचलमेवालंकरोति, नतु प्राञ्चमचलम्। अयं तु सूर्यः प्राञ्चमचलमलंकृतवानिति चित्रमित्यर्थः। प्राञ्चम्, 'ऋत्विग्-' इत्यादिना किनि 'उगिदचाम्-' इति नुमि श्नुत्वम्॥

---

१ 'भावनावशविलोकित-' इति जीवातुसंमतः पाठः।

१ इदं त्वनुस्मारदृष्ट्या श्नुत्वस्यासिद्धत्वविस्मरणमूलकम्।

भीमात्मजापि कृतदैवतभक्तिपूजा
पत्यौ च भुक्तवति भुक्तवती ततोऽनु ।
तस्याङ्कमङ्कुरिततत्परिरिप्समध्य-
मध्यास्त भूषणभरातिभरालसाङ्गी ॥१२२॥

भीमेति ॥ ततोऽनु नलप्रासादारोहणानन्तरं भीमात्मजापि तस्याङ्कमध्यास्त । कीदृशी–कृता गौर्यादिदैवतानां भक्त्या षोडशोपचारपूजा यया । तथा–पत्यौ च भुक्तवति सति स्वयमपि भुक्तवती । अनन्तरं च भूषणभरेण अलंकारबाहुल्येन योऽतिभरो गौरवं तेनालसमङ्गं यस्याः सा । भूषणबाहुल्येनातिभरं यथा तथा वा भूषणभरमपि वोढुमसमर्थाऽतिमृद्वी तद्वशान्मन्दगतिर्वा । कीदृशमङ्कम्–अङ्कुरिता समुदिता तत्परिरिप्सा भैम्यालिङ्गनवाञ्छा यस्य तादृशो मध्यदेशो यस्य । उक्तविशेषणविशिष्टा सती नलाज्ञया तदङ्के समुपाविशदिति भावः । अपिर्नलदेवपूजापेक्षया समुच्चयार्थः । पत्यौ भुक्तवतीति पतिव्रताजातिः । 'परिरिप्सुमध्यम्' इति पाठे भैमीस्पर्शसंजातसात्विकरोमाञ्चं तदालिङ्गनेच्छु मध्यं यस्य । 'भरातिभरा' इत्येव पाठः साधीयान् । पाठान्तरं चिन्त्यम् । अङ्कम्, 'अधिशीङ्स्थासाम्—' इति कर्मत्वम् ॥

तामन्वगादशितबिम्बविपाकचञ्चो:
स्पष्टं शलाटुपरिणत्युचितच्छदस्य ।
कीरस्य कापि करवारिरुहे वहन्ती
सौन्दर्यपुञ्जमिव पञ्जरमेकमाली ॥१२३॥

तामिति ॥ काप्यनिर्दिष्टनामातिसुन्दरी बाला सखी तां भैमीमनु लक्षीकृत्य पश्चादगात् जगाम । कीदृशी–कीरस्य शुकस्यैकं पञ्जरं करवारिरुहे पाणिपद्मे वहन्ती । उत्प्रेक्षते–शुकस्यात्मनो वा सुवर्णादिघटितत्वात्पञ्जरस्यैव वा मूर्तं सौन्दर्यपुञ्जमिव पृथक्करे पञ्जररूपेण वहन्तीति संबन्धः । किंभूतस्य कीरस्य–अशितस्य भक्षितस्य पक्वस्य बिम्बस्य बिम्बीफलस्य विपाकः परिणामस्तद्रूपा चञ्चुर्यस्य । अतिप्रियभुक्तपक्वबिम्बफलमेव यदीयचञ्चुत्वाकारेण परिणतमिति यावत् । तादृशस्यातिरक्तचञ्चोः । तथा स्पष्टं सर्वथापि शलाटुरपक्वं यत्किंचिरफलं भुक्तं बिम्बीफलमेव वा, तस्य परिणतिरतिनीलता तस्या उचितास्तद्योग्या अतिनीलाश्छदाः पक्षा यस्य । अपक्वानि श्यामानि भक्षितानि फलान्तराणि बिम्बीफलान्येव वा यदीयच्छदाकारेण परिणतानीति यावत् । तादृशस्यातिहरितपक्षस्य कीरस्य रक्तचञ्चुत्वं नीलपक्षत्वं जातिः । पाठितशुकादिपञ्जरादिधारिण्याः सख्या अपि नायिकानुगमनं जातिः । भोजनानन्तरं पाठितशुकसारिकादिशब्दानां गीतस्य च श्रवणेन नृत्तादिवीक्षणेन च क्रीडनं राज्ञामपि जातिः । 'आमे फले शलाटुः स्यात्' इत्यमरः ॥

कूजायुजा बहुलपक्षशितिम्नि सीम्ना
स्पष्टं कुहूपदपदार्थमिथोऽन्वयेन ।
तिर्यग्धृतस्फटिकदण्डकवर्तिनैका
तामन्ववर्तत पिकेन मदाधिकेन ॥ १२४॥

कूजेति ॥ एका सखी पिकेन कोकिलेन सहोपलक्षिता वा तां भैमीमन्ववर्तत लक्ष्यीकृत्य जगाम । किंभूतेन पिकेन–कूजया मधुराव्यक्तेन शब्देन सहात्मानं युनक्ति युक्, तेन । कुहूशब्दं कुर्वता । तथा—बहुलो भूयान्यः पक्षाणां शितिमा कृष्णत्वं तस्मिन्सीम्नाऽवधिभूतेन । अतएव विशेषणक्रमेण (विशेषेण) 'कुहूः' इति पदस्य शब्दस्य, तथा—पदार्थस्य तत्पदवाच्यस्यामावास्यारूपस्य च मिथोऽन्वयोऽन्योन्यसंबन्धो यत्र तादृशेन च स्पष्टमुत्प्रेक्षायाम् । कुहूपदयोगित्वात्कृष्णतमत्वाच्चामावास्या(वाचि)विषये कुहूपदपदार्थयोस्तादात्म्यरूपेणेति यावत् । अमावास्यापि कृष्णपक्षसंबन्धिनी मर्यादा भवति, अतएव कुहूशब्दवाच्या च । तथा–तिर्यक् तिरश्चीनं (यथा तथा) करे धृतः स्फटिकदण्डकस्तत्र वर्तिना स्थितेन । तथा–मदाधिकेन मदोन्मत्तेन । दण्डकेति 'ह्रस्वे' इति कन् । ह्रस्वे दण्डे इत्यर्थः ॥

शिष्याः कलाविधिषु भीमभुवो वयस्या
वीणामृदुक्वणनकर्मणि याः प्रवीणाः ।
आसीनमेनमुपवीणयितुं ययुस्ता
गन्धर्वराजतनुजा मनुजाधिराजम् ॥१२५॥

शिष्या इति ॥ या भीमभुवो भैम्या वयस्याः सख्यः कलाविधिषु चतुःषष्टिकलाकर्मसु विषये भैम्या एव शिष्याः, तथा—वीणायाः मृदुक्वणनकर्मणि मधुरशब्दरूपे व्यापारे प्रवीणाः ताः गन्धर्वराजो विश्वावसुस्तस्य तनुजाः कन्यास्तत्सख्या वा प्रासादे आसीनमेनं मनुजाधिराजमेनमुपवीणयितुं वीणयोपगातुं ययुः प्रापुः । उपवीणयितुं पूर्ववत् ॥

तासामभासत कुरङ्गदृशां विपञ्ची
किंचित्पुरः कलितनिष्कलकाकलीका ।
भैमीतथामधुरकण्ठलतोपकण्ठे
शब्दायितुं प्रथममप्रतिभावतीव ॥ १२६ ॥

तासामिति ॥ तासां कुरङ्गदृशां विश्वावसुकन्यानां विपञ्ची वीणा अभासत शुशुभे । किंभूता––किंचित् पुरः ईषत्पूर्वं प्रारम्भसमये कलिताङ्गीकृता निष्कला गम्भीरमन्द्रस्वरश्रुतिवर्णविशेषाभिव्यक्तिरहिता काकली सूक्ष्ममधुराव्यक्तरागविशेषो यया । अतएव–उत्प्रेक्षते—भैम्यास्तथानिर्वचनीयमधुरस्वरयुक्तायाः कण्ठलताया उपकण्ठे निकटे शब्दायितुं तस्याः पुरस्ताच्छब्दमपि कर्तुं प्रथमं प्रारम्भेऽप्रतिभावतीव प्रतिभारहितेवाशक्तेव । अन्योऽप्यधिकविद्यस्य पुरस्ताद्गापितुं गातुं वाऽशक्तः सन् प्रथमं मन्दमेव भाषते गायति चेति । संगीतविद्याविदामियं जातिः । प्रथमं गायनाः गानप्रारम्भे काकलीमारचयन्ति । काकल्यादि संगीतशास्त्रादवगन्तव्यम् । काकलीकेति 'नद्यृतश्च' इति कप् । शब्दायितुं, 'शब्दवैर–' इति क्यङ् ॥

१—'वैदिकमन्त्राध्ययने शूद्राणामिव स्त्रीणामप्यनधिकारः' इति वदन्तरत्वार्षमूलग्रन्थानभिज्ञा एव । २ 'भूषणभरातितरालसाङ्गी' इति पाठो जीवातुसंमतः ।

सा यद्धृताखिलकलागुणभूमभूमी-
भैमीतुलाधिगतये स्वरसंगतासीत् ।
तं प्रागसावविनयं परिवादमेत्य
लोकेऽधुनापि विदिता परिवादिनीति१२७

सेति ॥ सा विपञ्ची धृतानामखिलानां गीतनृत्तादिचतुःषष्टि-कलानां सौन्दर्यादिगुणानां च भूम्नो बाहुल्यस्य भूमी स्थानभूता भैमी तस्यास्तुलाधिगतये साम्यप्राप्तये स्वयमपि पूर्वोक्तप्रकारेण तादृशी सती भैमीस्वरतुल्यत्वप्राप्तये यत् स्वरैः षड्जादिभिः संगता संबद्धा आसीत् । अथच—भैम्या सार्धं साम्यप्राप्तये स्वरसंस्वाच्छन्द्याभिलाषं गताभूत् । असौ विपञ्ची तं भैमीसाम्यस्वाच्छन्द्याभिलाषलक्षणमविनयमत्युत्तमावमाननामेव परिवादं स्फुटं दोषं प्राक् पूर्वमेत्य प्राप्य, अथच परिवादं वीणावादनसाधनं तद्रूपमविनयं प्राप्य अधुनापि अद्ययावदपि लोके परिवादिनीति विदिता ख्याता । परिवादयोगात्परिवादिनीत्यद्यापि गीयत इत्यर्थः । अथ च—वीणावादनसाधनयुक्ता । यद्वा—सप्ततन्त्रीयुक्ता वीणा परिवादिनी । 'भीतो भयानि पश्यति' इति न्यायेन पूर्वमपि लोके दुष्टतां प्राप्ता पुनरपि चोत्तमस्य पुरस्तात्प्रागल्भ्ये दोषान्तरं शङ्कमानेवाप्रतिभावतीति प्राचीनश्लोकार्थहेतुतया योज्यम् । 'परिवादः कलङ्के स्याद्वीणावादनवस्तुनि' इति विश्वः ॥

नादं निषादमधुरं ततमुज्जगार
साभ्यासभागवनिभृत्कुलकुञ्जरस्य ।
स्तम्बेरमीव कृतसश्रुतिमूर्धकम्पा
वीणा विचित्रकरचापलमाभजन्ती ॥१२८॥

नादमिति ॥ अवनिभृतां कुलं वंशस्तत्र कुञ्जरः श्रेष्ठस्तस्य नलस्याभ्यासभाक् समीपवर्तिनी सा तन्त्री वीणावाद्यरूपा निषादस्वरेण मधुरं श्रव्यं ततमत्युच्चं नादमुज्जगारोद्गीर्णवती । किंभूता—कृतः सश्रुतीनां द्वाविंशतिश्रुतियुतानां षड्जादीनां मूर्धनि नादप्रान्ते कम्पः कम्पितस्वरो यया कृतः सह श्रुतिभिर्यथातथा मूर्धनि वीणाया एवोपरितनभागे कम्पितस्वरो यया वीणोर्ध्वं समग्राङ्गुलीसंयोगाद्धि निषादस्वरो जायते तादृशी वा । कृतः सश्रुतीनां द्वाविंशतिविदां संगीतशास्त्रविदां मूर्धकम्पो यया वा । तथा—विचित्रं करचापलं नानारूपमारोहावरोहादिक्रमेणाङ्गुलीप्रान्तस्पर्शवशेन वादकपाणिचाञ्चल्यं तत्क्षणमेवानेकस्थानावस्थानलक्षणमासमस्त्येन भजन्ती निषादप्रधानं ललितादिमङ्गलगीतं प्रकटीचकारेत्यर्थः । केव—स्तम्बेरमी हस्तिनीव । सापि अवनिभृत् पर्वतः कुलं वंशः उत्पत्तिस्थानं यस्य तादृशस्य पर्वतभवस्य हस्तिभेष्ठस्य राजसंबन्धिनो वा हस्तिनः समीपवर्तिनी सकामा । तथा—जातिस्वभावात्कृतसकर्णशिरःकम्पा कृतसशब्दशिरःकम्पा वा । तथा नानाप्रकारं शुण्डादण्डताण्डवं भजमाना सती ततमत्युच्चं 'निषादं च गजो ब्रूते' इति शास्त्रप्रामाण्यान्निषादस्वरेण मञ्जुलं नादमुद्गिरन्ती । 'चापलभाग्भवन्ती' इत्यपि पाठः । स्तम्बेरमी 'स्तम्बकर्णयो रमिजपोः' इत्यत्र 'हलदन्तात्' इत्यलुकि जातिवाचित्वान्ङीपू ॥

आकृष्य सारमखिलं किमु वल्लकीनां
तस्या मृदुस्वरमसर्जि न कण्ठनालम् ।
तेनान्तरं तरलभावमवाप्य वीणा
हीणा न कोणमप्युचत्किमु वालयेषु ॥१२९॥

आकृष्येति ॥ ब्रह्मणा वल्लकीनां वीणानामखिलमान्तरं सारं श्रेष्ठं भागमाकृष्य तस्या भैम्याः कण्ठनालं ग्रीवादण्डः किमु नासर्जि सृष्टम् । अपितु तमेव सारमाहृत्य तदीयं कण्ठनालं सृष्टम् । यतो मृदुस्वरसकलवीणासारनिर्मितत्वादेव भैमीकण्ठस्य मधुरतमत्वं जातमित्यर्थः । यस्मादेवं तेनैव हेतुना हृतसारतयैवान्तरं वीणादण्डमध्यगतं तरलभावं लक्षणया मन्दशब्दत्वमवाप्य हीणा किमु लज्जितेव वीणालयेषु स्वरविश्रान्तिरूपासु मूर्च्छनासु विषये कोणं वा लीलाधनुःसदृशाकारं वीणावादनसाधनं नामुचत् । गृहीतसारोऽन्योपि निःसारतयैवागम्भीरान्तःकरणतां प्राप्य हीणः सन्नालयेषु गृहेषु कोणं कुब्जभागद्वयसंयोगस्थानं न मुञ्चति । पुष्कलच्छिद्रस्य वीणादण्डस्य स्वरोऽतिगम्भीरः प्रशस्ततरो भवति। मधुरतरं वीणा क्वणति स्मेति भावः । वीणास्वरापेक्षया भैमीस्वरस्याधिक्यमेतेन सूचितम् । वीणादण्डस्य सच्छिद्रत्वेन निःसारत्वोत्प्रेक्षा । 'वीणादिवादने कोणोऽप्येकदेशो गृहस्य च' इति विश्वः ॥

तद्दम्पतिश्रुतिमधून्यथ चाटुगाथा[1]
वीणास्तथा जगुरतिस्फुटवर्णबन्धम् ।
इत्थं यथा वसुमतीरतिगृध्रकस्ताः
कीरः किरन्मुदमुदीरयति स्म विश्वाः १३०

तदिति ॥ अथ काकल्युद्गिरणानन्तरं गन्धर्वराजकन्यानां वीणाः तयोर्दम्पत्योः श्रुतीनां कर्णानां मधूनि अमृततुल्या भैमीनलप्रियस्तुतिकारिणीश्चाटुगाथाः श्लोकान् तथा तेन प्रकारेणातिस्फुटो वर्णबन्धस्तन्त्रीनिबद्धाक्षरविन्यासो यस्मिंस्तद्यथातथा जगुः । यथा येन प्रकारेण वसुमत्यां भूमौ रतिरूपाया भैम्या गृध्रकः पञ्जरेऽवरुद्धः शुकः मुदं किरन् श्रोतॄणां हर्षमुत्पादयन् विश्वाः सर्वास्तत्तद्वर्णमात्रादिसहितास्तास्ता गाथा इत्थं वक्ष्यमाणरीत्या उदीरयति स्म तिर्यग्योनिः शुकोऽपि यथा श्रवणमात्रेण सर्वा अपि गाथा अनुवदितुं शक्नोति तथा तन्त्रीषु स्फुटतराक्षरबन्धान्भैमीनलस्तावकश्लोकान् वीणाः स्फुटं गायन्ति स्मेति भावः । एतेन गन्धर्वराजकन्यानां वीणाप्रावीण्यम्, शुकस्यापि प्रज्ञातिशयश्च सूचितम् । 'गृहासक्ताः पक्षिमृगाश्छेकास्ते गृध्रकाश्च ते' इत्यमरः ॥

'इत्थम्' इति यदुक्तं तदेवाह—

अस्माकमुक्तिभिरवैष्यथ एव बुद्धे-
र्गार्धं युवामतिमती स्तुमहे तथापि ।
ज्ञानं हि वागवसरावचनाद्भवद्भ्या-
मेतावदप्यनवधारितमेव न स्यात् ॥१३१॥

---

१ 'चारुगाथा' इति पाठेपि सुखावबोधासंमतः ।

अस्माकमिति ॥ यद्यपि अतिशयिता मतिर्ययोस्तौ युवामस्माकमुक्तिभिर्गाथारूपाभिरेवास्मद्वाग्रचनाभिरस्माकं बुद्धेर्गोचरमुत्तानार्थत्वमवैष्यथ एव ज्ञास्यथ एव, तथापि वयं युवां स्तुमहे स्तुम एव । हि यस्माद्भवद्भ्यां वागवसरे स्तावकादिवचनावसरे सत्यपि अवचनादभाषणाद्धेतोरेतावदत्युक्तार्थमत्यल्पमप्यस्मदीयं ज्ञानमनवधारितमेव न स्यात्, अज्ञातमेव न स्यात् तन्मास्तु इत्यर्थः । तस्मात्स्तुमह एव । वर्णनायां क्रियमाणायामयमल्पज्ञानो बहुज्ञान इति वा ज्ञातुरग्रे प्रसिद्धो भवति । तस्माद्वर्णयाम इति भावः । इत्येवं वीणानिबद्धगन्धर्वपुत्रीवचनं शुकोऽन्ववददित्यर्थः । एवमुत्तरत्रापि ज्ञेयम् । एतेन गन्धर्वपुत्रीभिः स्वमौद्धत्यं परिहृतम् ॥

भूभृद्भवाङ्कभुवि राजशिखामणेः सा
त्वं चास्य भोगसुभगस्य समः क्रमोऽयम् ।
यन्नाकपालकलनाकलितस्य भर्तु-
रत्रापि जन्मनि सती भवती स भेदः॥१३२

भूभृदिति ॥ सा भूभृद्भवा हिमाचलसुता पार्वती भोगिवर्योरगेन्द्रादिसर्पशरीरैः सुभगस्य भूषितस्य राजा चन्द्रः शिखामणिर्यस्य चन्द्रमौलेरङ्कभुवि उत्सङ्गदेशे । वर्तत इति शेषः । प्रियतमत्वात् । त्वं च त्वमपि भीमपुत्री चन्दनादिभोगैर्मनोहरस्य राज्ञां मुकुटमणेः श्रेष्ठतमस्यास्य नलस्योत्सङ्गदेशे वर्तस इत्ययं क्रमः समः परिपाटी उचिता । पार्वत्या महेशस्य च, तव नलस्य च, राजकन्याया राजश्रेष्ठस्यान्योन्यसंबन्धः समुचित एवेत्यर्थः । अथ च—समस्तुल्यः । यथा तयोः संबन्धस्तथा युवयोरपीत्यर्थः । अथच—अयं शब्दश्लेषरूपः संबन्धस्तुल्यः । एवं यद्यपि क्रमः समः, तथापि स पुनर्भेदो विसदृशत्वम्, यत् नाकपालस्येन्द्रस्य कलनांऽशत्वेनैकीभवनं तया कलितस्य व्याख्यातस्य राजन्वादिन्द्रांशत्वेन प्रसिद्धस्य भर्तुर्नलस्य संबन्धिनी अत्राप्यस्मिन्नपि जन्मनि भवती सती पतिव्रता । अपिशब्दान्न केवलमत्रैव किंतु जन्मान्तरेऽपि त्वं सत्येव अन्यथात्रापि सतीत्वानुपपत्तेः । पार्वती तु ब्रह्मकपालस्य कलनया करेण धारणया कलितो विदितो न भवति अकपालकलनाकलितः, तादृशोपि न भवति कपालित्वेन ख्यातस्य भर्तुर्महेशस्य संबन्धिनी, पूर्वजन्मनि दक्षापत्यत्व एव सती ननु हिमवदपत्यत्वेपीति महद्वैषम्यम् । हरस्य नलस्य चोक्तसकलश्लेषसाम्येपि पार्वत्यास्त्व च किंचिदेव शब्दश्लेषसाम्यं ननु सर्वमुक्तरीत्या तवाधिक्यादित्यर्थः । हिमवदपत्यत्वे पार्वत्या असतीत्वोक्तिर्निन्दा नाशङ्कनीया, भैमीस्तुतिपरस्य सतीशब्दस्य पार्वत्या नामपरत्वमात्र्यावर्तकत्वेनोक्तिर्निन्दापर्यवसानाभावात् ॥

एषा रतिः स्फुरति चेतसि कस्य यस्याः
सूते रतिं द्युतिरथ त्वयि वा तनोति ।
त्रैयक्षवीक्षणखिलीकृतनिर्जरत्व-
सिद्धायुरध्वमकरध्वजसंशयं कः ॥१३३॥

एषेति ॥ एषा भैमी कस्य वा चेतसि रतिः कामप्रियेति स्फुरति अपितु—न कस्यापि । यतः—यस्या एतस्या द्युतिः कायकान्तिः रतिं कामप्रियां सूते । अथच—अनुरागं प्रसूते, अर्थात्व-

६८

यि । अङ्गजत्वात्कान्तिः पुत्री, रतिश्च तत्पुत्री, सा यस्या नप्त्री, सेयं स्वयं रतिरिति कस्य वा चेतसि मतिः स्यात्, न कस्यापीत्यर्थः। अथवा—त्वय्यपि विषये त्रैयक्षेण हरसंबन्धिना वीक्षणेन तृतीयनेत्रेण खिलीकृतो न्यूनीकृतो निर्जरत्वेन देवत्वेन सिद्धोऽमरत्वरूप आयुषोऽध्वा मार्गो यस्य तादृशस्य मकरध्वजस्य कामस्य संशयं रूपसादृश्यात्किमयं काम इति संदेहं को वा तनोति, अपितु न कोपि करोति । कामस्य हरेण दग्धत्वात्संदेहनिवृत्तेरित्यर्थः। आ इत्याश्चर्ये । यस्य तवाङ्गजा कान्तिर्यतो रतिं सूते ततो रतिस्त्वापि नप्त्री सा कामस्य स्त्री । तस्मात् त्वयि कामसंशयं कोपि न करोतीत्यर्थः । इति नलं प्रति तद्वचनं शुकेनान्ववादि इति वा । रतिकामाभ्यामपि युवामतितमां सुन्दराविति भावः । त्रैयक्षेति संबन्धेऽपि 'न त्वाभ्याम्—' इति वृद्धिनिषेधे पूर्वमेजागमः ॥

एतां धरामिव सरिच्छविहारिहारा-
मुल्लासितस्त्वमिदमाननचन्द्रभासा ।
बिभ्रद्विभासि पयसामिव राशिरन्त-
र्वेदिश्रियं जनमनः प्रियमध्यदेशाम्॥१३४॥

एतामिति ॥ हे नल, त्वं विभासि । किंभूतः—एतां भैमीं बिभ्रत् अङ्के धारयन् । किंभूताम्—सरितां नदीनां छविं कान्तिं हरन्ति तच्छोभया उज्ज्वलतरा मौक्तिकहारा यस्यास्ताम् । तथा—वेद्यामन्तर्वेदि वेदिकामध्यं तद्वदतिकृशा श्रीः शोभा यस्याः । अन्तर्मध्ये वेदिवदतिकृशा श्रीर्यस्या वा । तथा—जनमनसां प्रिय आनन्ददायी मध्यदेशः शरीरमध्यभागो यस्यास्ताम् । किंभूतः—अस्या भैम्या आननमिदमाननं तल्लक्षणश्चन्द्रस्य भासा कान्त्या उल्लासितो हर्षं प्रापितः । क इव—चन्द्रभासा वृद्धिं प्रापितः पयसां राशिः समुद्र इव । कामिव—धरां भूमिमिव । यथा पृथ्वीमङ्के धारयन् समुद्रः शोभते । किंभूतां धराम्—सरितो नद्य एव छव्या कान्त्या हारिणो मनोहरा हारा यस्यास्ताम् । तथा अन्तर्वेद्याख्यया गङ्गायमुनामध्यभुवा श्रीर्यस्यास्ताम् । तथा—जनमनसां प्रियो मध्यदेशो विन्ध्यहिमाचलान्तरभूभागरूप आर्यावर्तापरपर्यायः पुण्यभूतो मध्यदेशो यस्यास्ताम् । 'हिमवद्विन्ध्ययोर्मध्यं यत्प्राक्प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः ॥' इति मनुः । इदमाननम्, षष्ठीसमासः ॥

दत्ते जयं जनितपत्रनिवेशनेयं
साक्षीकृतेन्दुवदना मदनाय तन्वी ।
मध्यस्थदुर्बलतमत्वफलं किमेत-
द्युक्तिर्यदत्र तव भर्त्समतमत्स्यकेतोः ॥१३५

दत्त इति ॥ जनितानि मत्स्यीभिः कस्तूर्यादिविरचितानि पत्रनिवेशनानि मकराद्याकारपत्रवल्लीलेखनानि यस्याः सा, पत्रवल्लीभूषिता । तथा—अक्षिभ्यां सह वर्तमानः साक्षः असाक्षः साक्षः कृतः सनेत्रतां प्रापितः साक्षीकृतः स चासाविन्दुश्च स एव वदनं यस्याः सा, चन्द्राधिकवदना । तन्वी कृशाङ्गी भैमी मदनाय जयं दत्ते । एवंविधभैमीदर्शनेन कामो नितरामुल्लसतीत्यर्थः । अथ च-कामाय जयं दत्ते। एवंविधभैमीदर्शनवशीकृतस्त्वं कामेन

१ 'यत्प्राग्विनशनात्' इति पाठ आधुनिकपुस्तकेषूपलभ्यते ।

जीयस इत्यर्थः। यच्च कायकान्त्या भर्त्सितो जितो मत्स्यकेतुः कामो येन तस्य तवात्र भैम्या विषये भुक्तिरेव तच्छरीरोपभोग एतन्मध्य उदरभागे स्थितस्य वर्तमानस्य दुर्बलतमत्वस्यातिकार्श्यस्य फलं परिपाकः किमिति प्रश्नः, संभावना वा। अतिसुन्दरस्य तवैवैतच्छरीरभोगेऽतिकृशैतदुदररामणीयकमेव प्रयोजकमित्यर्थः। अथ च-मध्यदेशवर्तिनोऽतिकार्श्यस्य फल(त्व)मेतदेव, यदतिसुन्दरस्य तवात्र भुक्तिर्नामेत्यर्थः। कामेन तव विजये एतन्मुखचन्द्रस्य च साक्षाद्द्रष्टृत्वात् साक्षित्वं युक्तम्। अथ च—कामेन जितमिति कामस्य जयदाने साक्षीकृता इन्दुवदनाः स्वसख्यो यया। ता अपि हि कामेन नलो भैमीवशः कृत इति जानन्ति। एवंसत्यपि क्रूरोक्त्यादिना तर्जितः कामो येन तस्य तवान्यस्मिन्भैमीविषये वा विवादविषये यो भोगः। लब्धजयं कामं क्रूरोक्त्या संतर्ज्य तदीयमपि विषयं बलादन्यायेनैव भुङ्क्ष इत्यर्थः। अथ च-मध्यस्थानां सभ्यानां दुर्बलतमत्वस्य ज्ञानदौर्बल्यस्य नियन्तुमसामर्थ्यस्य स्वदत्तजयनिर्वहणाशक्तत्वस्य वा फलं परिपाकः किमयमिति संभावना। अन्यत्रापि विवादपदे साक्षिवादनं कृत्वा जयपत्रदानपुरःसरमेकस्मै जयपत्रं दीयते, तत्र निर्णये कृते मध्यस्थाश्चेद्दुर्बला भवन्ति तर्हि पराजितोऽप्येको लब्धजयमपि द्वितीयं तिरस्कृत्य तदीयं विवादपदं क्षेत्रादिकं बलाद्भुङ्क्ते। कथमन्यथा ससाक्षिकजयपत्रहस्तं निर्भर्त्स्यान्योन्यदीयभुक्तिं करोतीत्यर्थापत्तिः। साक्षीकृतेति 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः 'बहुव्रीहौ सक्थ्यक्ष्णोः-' इति पचि क्विः। पक्षे 'साक्षाद्द्रष्टरि—' इतीनौ क्विः॥

चेतोभवस्य भवती कुचपत्रराज-
धानीयकेतुमकरा ननु राजधानी।
अस्यां महोदयमहस्पृशि मीनकेतोः
के तोरणं तरुणि न भ्रुवते भ्रुवौ ते ॥१३६॥

चेत इति॥ ननु भैमि, भवती चेतोभवस्य राजधानी नगरी। कीदृशी-कुचपत्रेषु राजानः श्रेष्ठाः पत्रवह्य इत्यर्थः। तेषु धानीयः स्थापनीयः। यद्वा—कुचपत्रमेव राजधानीयो राजधानीसंबन्धी केतुर्ध्वजश्चिह्नभूतो मकरो मत्स्यो यस्यां सा। राज्ञो मुख्यावस्थाननगर्यां राजधान्यां साभिज्ञानश्चिह्नरूपः पताकादिध्वजो भवति। तथा च केतुभूतस्य मकरस्य स्वत्कुचयोर्वर्तमानत्वात्त्वं कामराजस्य राजधानी। साक्षान्मदनस्त्वय्येव वर्तत इत्यर्थः। अत एव हे तरुणि आरूढयौवने भैमि, के जना मीनकेतोर्मकरध्वजस्य संबन्धिनं महोदयरूपं महमुत्सवं महानभ्युदयो यस्मिंस्तादृशं वोत्सवं स्पृशन्त्यां स्वस्वामिकामोदयोत्सववत्यामस्यां भवद्रूपायां राजधान्यां ते तव भ्रुवौ तोरणं न ब्रुवते। अपितु—सर्वेऽपि जनास्वद्भ्रूयुगं कामाभ्युदयोत्थितवक्रितशिखं वंशद्वयनिबद्धमाम्रादिमाङ्गलिकसुनीलपल्लवरूपं तोरणमेव वदन्ति। कामस्त्वदेकाश्रयः सम्सर्वोत्कर्षेण वर्तत इति भावः। 'पत्रराजी-' इत्यपि पाठः स्पष्टार्थः। राजेति पाठो मुख्यः। 'राजा-' इत्यादिना समासान्तः॥

अस्या भवन्तमनिशं भवतस्तथैनां
कामः श्रमं न कथमृच्छति नाम गच्छन्।
छायैव वामथ गतागतमाचरिष्णो-
स्तस्याध्वजश्रमहरा मकरध्वजस्य ॥१३७॥

अस्या इति॥ हे नल, अस्या भैम्याः सकाशाद्भवन्तं गच्छन्। तथा-भवतः सकाशादेनां भैमीं गच्छन् प्राप्नुवन् कामः कथं नाम श्रमं न ऋच्छतु गच्छतु, अपितु सदा यातायाते कुर्वन् श्रमं गच्छत्येव। अथवा यस्माद्वां युवयोश्छाया कायकान्तिरेवोक्तरीत्या गतागतमाचरिष्णोस्तस्य मकरध्वजस्याध्वनि जातं श्रमं हरति एवंभूता भवतीति शेषः। दृश्यमानभवच्छोभालोभादेव यातायातश्रमं न वेत्तीत्यर्थः। अथच—वृक्षच्छत्रादिनिर्मिता छाया मार्गे गतागते कुर्वतः पुरुषस्य श्रमं हरत्येव। भैम्यास्त्वय्येव कामः, तव च भैम्यामेव नान्यत्रेत्येवं परस्परानुरागः कुत्रापि नास्तीति भावः॥

स्वेदाप्लुवप्रणयिनी नवरोमराजी
रत्यै यदाचरति जागरितव्रतानि।
आभासितेन नरनाथ मधूत्थसान्द्र-
मग्नासमेषुशरकेशरदन्तुराङ्गः ॥ १३८ ॥

स्वेदेति॥ हे नरनाथ, स्वेदो घर्मजलं तस्मिंस्तेन वा आप्लुतः स्नानं तत्र प्रणयिनी प्रीतिमती सात्त्विकसंजातस्वेदपूरव्याप्ता तव रोमराजी रत्यै सुरतार्थं जागरितस्योद्बुद्धस्य व्रतानि उद्भूतरोमाञ्चनियमान्यदाचरति। उन्निद्रा भवतीति यावत्। तेन कारणेन रोमाञ्चेन वा स्वं मधुनः पुष्परसस्योत्थानेनोदयेन सान्द्राः पुष्परसपूरेण निरन्तरव्याप्ताः मग्नाः स्वच्छरीरान्तःप्रविष्टा असमेषोः कामस्य पुष्परूपाः शरास्तेषां केसरैः पिञ्छप्रायैर्दन्तुरमुच्चावचीकृतमङ्गं यस्य, स्वेदरोमाञ्चो (भय)युक्तत्वात्प्रत्यङ्गमन्तर्मग्नसमधुकामबाणसंबन्धिबहिरवस्थितपतत्रपत्ररागव्याप्ताङ्ग इवाभासि। भैमीयोगात्सस्वेदरोमाञ्चो रिरंसुः कामशास्त्र(योजितः) सुतरां शोभस इत्यर्थः। अथच—रोमराजिर्दूतीस्थानीया, तथाच—तव दूतीव रोमराजिः कृततीर्थस्नाना रत्यै कामप्रियां स्वदधीनां कर्तुं यस्माज्जागरणादिनियमान् करोति तेन कारणेन विशिष्टनिमग्नकामबाणा पिञ्छसंभृताङ्गवच्छोभसे। अन्यापि तरुणी कृतस्नाना रत्यर्थं कान्तेन सह सहस्वेदा सकलां रात्रिं जागर्ति॥

प्राप्ता तवापि नृप जीवितदेवतेयं
घर्माम्बुशीकरकरम्बनमम्बुजाक्षी।
ते ते यथा रतिपतेः कुसुमानि बाणाः
स्वेदस्तथैव किमु तस्य शरक्षतास्त्रम् ॥१३९॥

प्राप्तेति॥ हे नृप, अम्बुजाक्षी तव जीवितदेवता प्राणेश्वरी इयं भैम्यपि घर्माम्बुशीकरकरम्बनं स्वेदजलबिन्दुमिश्रणं प्राप्ता। इयमपि त्वदीयस्पर्शवशात्सात्त्विकस्वेदयुक्ताभूदित्यर्थः। न केवलं त्वमेव स्विन्नः, अपि त्वियमपीत्यपेरर्थः। अथच—देवतायाः स्वेदो नास्ति, इयंतु देवतापि सस्वेदेति विचित्रमित्यपिशब्दार्थः। अतश्च कुसुमान्येव यथा येन प्रकारेण ते ते भैमीकरचरणादिरूपेण प्रसिद्धपराक्रमा मोहनशोषणादिकामबाणास्तथैव तेनैव प्रकारेणायं स्वेदस्तस्य कामस्य संबन्धि कामेन रचितं शरक्षतास्त्रं स्वीयबाण-

व्रणरुधिरं किमु । एतस्याः कामबाणविद्धत्वात्स्वेदस्तज्जन्यव्रणरुधिरत्वेनैव संभावयितुं युक्तः । 'यादृशो यक्षस्तादृशो बलिः' इति न्यायेन पुष्पबाणानां धवलत्वात्तज्जन्यं रुधिरमपि तादृगेव युक्तम् । स्वेदजलस्य रुधिरत्वं युक्तमित्यर्थः । कुङ्कुमाङ्गरागलगनाद्वा रक्तत्वात्स्वेदजलस्य रुधिरत्वं युक्तम् । इयमपि कामविद्धा रिरंसुरस्तीति भावः ॥

रागं प्रतीत्य युवयोस्तमिमं प्रतीची
भानुश्च किं द्वयमजायत रक्तमेतत् ।
तद्वीक्ष्य वां किमिह केलिसरित्सरोजैः
कामेषुतोचितमुखत्वमधीयमानम् ॥१४०॥

रागमिति ॥ प्रतीची दिक् भानुश्चैतद्वयं युवयोस्तं सात्त्विकस्वेदरोमाञ्चसूचितमिमं प्रत्यक्षदृश्यमिवानुरागं प्रतीत्य किं ज्ञात्वेव रक्तमजायत लोहितवर्णमभूत् । भैमीनलाविदानीं रिरंसू अपि दिवा मैथुननिषेधभिया साशङ्कौ वर्तेते । तस्माद्रात्रिं करिष्यामीति सूर्यमस्तं प्रापयितुमिव प्रतीची रक्तवर्णाभूत् । इदानीं मयाप्यस्तं गन्तुं योग्यमितीव सूर्योपि रक्तवर्णोऽभूदित्यर्थः । अथ च—युवयोरेव केलिसरितः सरोजैः कमलैस्तद्भानुप्रतीचीरूपं रक्तं मिथुनं वीक्ष्य वां भैमीनलौ च रक्तौ वीक्ष्य किं द्रष्ट्वेव संध्यासमये कामस्य इषुतोचितं शरत्वयोग्यं मुखमग्रं येषां तद्भावस्तीक्ष्णाग्रत्वमधीयमानमभ्यस्यमानं 'विद्यते' इति शेषः । तद्वां च सानुरागौ दृष्ट्वा कमलैर्मुकुलीभवनव्याजेन पुष्पबाणतीक्ष्णाग्रत्वमनुभूयते किम् । कामो हि रिरंसू स्त्रीपुंसौ दृष्ट्वा तीक्ष्णमुखैः शरैर्विध्यतीत्यर्थः । अथ च—एतौ भैमीनलौ प्रतीचीभास्करौ च यदि सरागौ जातौ तर्हीदानीं रात्रिः संनिहिताऽस्तीत्यस्माभिर्मुकुलीभावः प्राप्तुमुचित इति तैरपि मुकुलीभूतम् । पद्मानां संकुचितमुखत्वं कामशरयोग्यतीक्ष्णमुखीभावेनोत्प्रेक्षितम् । संध्याकालो जातः, कमलानि मुकुलितानीति भावः ॥

अन्योन्यरागवशयोर्युवयोर्विलास-
स्वच्छन्दताच्छिदपयातु तदालिवर्गः ।
अत्याजयन्सिचयमाजिमकारयन्वा
दन्तैर्नखैश्च मदनो मदनः कथं स्यात् १४१

अन्योन्येति ॥ आलिवर्गः अन्योन्यरागेण परस्परानुरागेण रमणाभिलाषेण वशयोर्वश्ययो रिरंसयाऽन्योन्याधीनयोर्युवयोर्विलासस्य कामविलासस्य स्वच्छन्दतां निःशङ्कप्रवृत्तिं छिनत्ति कामक्रीडाविघ्नकारी यस्मात्, तस्मादपयातु गृहाद्बहिर्निर्गच्छतु । यस्मान्मदनः कामः सिचयं वसनमत्याजयन्परिहारयन्नर्थात्स्त्रीपुंसौ तथा—दन्तैर्नखैश्च करणभूतैराजिं संग्रामम्, एतैरुपलक्षितां वा नानाबन्धसुरतमल्लयुद्धं च स्त्रीपुंसावकारयन् सन् मादयतीति मदनः मदकारी कथं वा स्यात्, अपित्वेवमेव कारयन्मदनो हर्षकारी भवेदेव । तस्मात्सखीवर्गो गृहाद्बहिर्गच्छत्वित्यर्थः । मदनः, नन्द्यादित्वाल्ल्युः ॥

इति पठति शुके मृषा ययुस्ता
बहु नृपकृत्यमवेत्य सांधिवेलम् ।
कुपितनिजसखीदृशार्धदृष्टाः
कमलतयेव तदा निकोचवत्यः ॥ १४२ ॥

इतीति ॥ ता गन्धर्वपुत्र्यः सख्यश्च शुके इति पठति व्यक्तं भाषमाणे सति गन्धर्वपुत्रीवीणानिबद्धा गाथाः स्पष्टमनुवदति सति सांधिवेलं दिनरात्रिसंधिवेलाभवं बहु नृपकृत्यं संध्यावन्दनसायंहोमादिकं नलस्य नित्यं कर्मावेत्य ज्ञात्वा मृषालीकमेवात्रेदानीं भवतीभिर्न स्थातव्यमिति शुकोऽस्माभिष्काशयति तर्हि वयं याम इति मिषमात्रेण ययुः गृहाद्बहिर्निर्जग्मुः । रिरंसुरपि नलः संध्यासमये नित्यकर्मातिक्रम्य संभोगं न करोति, रिरंसुभैम्यपि स्वयं ग्रहं न करोतीति यद्यपि ता जानन्ति तथापि भैमीपरिहासार्थं तादृशं शुकवचनमेव व्याजीकृत्य बहिर्निर्गता इत्यर्थः । किंभूतास्ताः—कमलतयेव कमलरूपत्वेनेव तदा संध्यासमये निकोचवत्यः संकुचन्त्यः । कमलानि संध्यायां संकुचन्ति । तादृश्यः वृथागमनारम्भेण व्रीडाशीलासंजननात्कुपितायाः निजसख्या भैम्या दृशा अर्धेनैकदेशेन दृष्टा विलोकिताः । सकोपत्वान्नेत्रतृतीयभागतिर्यग्व्यापारेणेक्षिताः । कुपिता हि मानिनी दृगन्तेन पश्यति । निकोचः, भावे घञ् ॥

अकृत परभृतः स्तुहिस्तुहीति-
श्रुतवचनस्वगनूक्तिनुश्चुचभ्रुः ।
पठितनलनुतिं प्रतीव कीरं
तमिव नृपं प्रति जातनेत्ररागः ॥ १४३ ॥

अकृतेति ॥ सख्या पूर्वमानीतः परभृतः कोकिलोऽप्युन्मत्तत्वात्स्वभावाच्च जातो नेत्रयो रागो लौहित्यं यस्यैवंविधः सन् स्तुहि स्तुहि इत्येवंरूपं शब्दमकृत । पिकः स्वभावादेव स्तुहि स्तुहीत्येवंरूपं शब्दं चुक्रूजेत्यर्थः । तत्रोत्प्रेक्षते—पठिता समाप्तिं प्रापिता नलस्य नुतिः स्तुतिर्येन तं स्तुतिं कृत्वा तूष्णींभूतं तं कीरं शुकं प्रतीवोद्दिश्येव स्तुहि स्तुहीत्यकृत । रे कीर, किमिति तूष्णींभूतोऽसीतः परमपि नलस्य स्तुतिं कुर्वीति नलस्तुतौ बुद्धिप्रकारं प्रावर्तयदिवेत्यर्थः । एवंवचने पिकस्य कथं सामर्थ्यमित्याशङ्क्याह—श्रुता वीणानिबद्धशुकानूदितवचनस्वक् तस्या अनूक्तिः सर्वानुवादः तया विद्धा प्रसिद्धा प्रवीणा चञ्चुर्यस्य । तादृशं शुकानूदितं सर्वमप्यनूद्येतः परमपि स्तुहि स्तुहीत्याहेत्यर्थः । नेत्ररागोऽप्युत्प्रेक्षते—तं नृपं प्रतीव लक्षीकृत्येव जातनेत्रप्रीतिः सुन्दरतरनयनानन्दकारिणं नलं दृष्ट्वा जातनेत्रप्रीतिः स्तुहीत्यकृतेत्यर्थ इति रागशब्देनोत्प्रेक्षा । अनूक्तिनुश्चुरिति 'तेन विना-' इति चुञ्चुप् ॥

तुङ्गप्रासादवासादथ भृशकृशतामायतीं केलिकुल्या-
मद्राक्षीदर्कबिम्बप्रतिकृतिमणिना भीमजा राजमानाम्।
वक्रं वक्रं व्रजन्तीं फणियुवतिरिति त्रस्नुभिर्व्यक्तमुक्ता-
न्योन्यं विद्रुत्य तीरे रथपदमिथुनैः सूचितामार्तिरुत्या॥

तुङ्गेति ॥ अथैव वीणाकाणानुवादिशुकालापानन्तरं भीमजा केलिकुल्यां क्रीडाकृत्रिमनदीमद्राक्षीत् । किंभूताम्—भैम्यास्तुङ्गे उच्चतरे प्रासादे वासात्स्थितेर्हेतोर्भृशकृशतामायतीं प्राप्नुवतीम्,

१ 'मुक्ता' इति कलिकातामुद्रितपुस्तकपाठः ।

अधोदेशे स्थिता स्वयं महीयस्युच्चतरदेशे स्थितां भैमीं प्रत्यणीयस्त्वेन प्रतिभासमाना नाम्। तथा—अस्तगामिनोऽर्कबिम्बस्य प्रतिकृत्या प्रतिबिम्बरूपेण महाप्रकाशेन मणिना राजमानां प्रतिबिम्बितास्तगामिसूर्यबिम्बाम्। तथा—वक्रं वक्रं स्वभावकुटिलं व्रजन्तीं गच्छन्तीम्। अतएव—फणियुवतिः कृष्णसर्पिणीयमिति त्रस्नुभिस्त्रासशीलं रथपदमिथुनैश्चक्रवाकस्त्रीपुंसयुगलैर्व्यक्तं स्पष्टं मुक्तं त्यक्तमन्योन्यं परस्परं यथातथा तीरे विषये विद्रुत्य पलायय कर्मभूते वा द्वे तीरे प्रति गत्वा अतिरुत्या विरहपीडासंबन्धिना रुतेन कृत्वा सूचितां प्रकटीकृताम्। सांध्यतमसावृतत्वाच्च स्पष्टतरमदृश्यमानामपि नदीयमिति चक्रवाकशब्देन ज्ञापितां फणियुवतिरिति सूचितामिति वा। कृष्णसर्पिण्यपि कृशा भवति सूर्यबिम्बतुल्येन शिरःस्थेन मणिना शोभते। वक्रं वक्रं च व्रजति। तां च दृष्ट्वा जनाः पक्षिणो वा पलायय दीनस्वरोपलक्षिताः परस्परं सहवासं मुञ्चन्ति। सूर्यमस्तं जिगमिषुं दृष्ट्वा चक्रवाकमिथुनानि सांध्यविरहपीडया रुतं कृत्वान्योन्यं मुक्त्वा पलायय केलिकुल्यापारावारे तीरे निषीदन्तीति भैमी ददर्शेत्यर्थः। उष्यतेऽस्मिन्निति वासः। तुङ्गप्रासादवासमारुह्याद्राक्षीदिति ल्यब्लोपे वा॥

अथ रथचरणौ विलोक्य रक्ता-
वतिविरहासहताहताविवास्त्रैः।
अपि तमकृत पद्मसुप्तिकालं
श्वसनविकीर्णसरोजसौरभं सा॥ १४५॥

अथेति॥ केलिकुल्यादर्शनानन्तरं सा भैमी रक्तौ परस्परानुरक्तौ स्वभावेन रक्तवर्णौ च अतिविरहासहतया नितरां वियोगासहिष्णुतया हतौ कामशरविद्धौ स्मरशराघाते सति अस्त्र रुधिरैरिव रक्तौ रथचरणौ चक्रवाकौ विलोक्य तं पद्मानां सुप्तिकालं संकोचसमयं सायंसंध्यासमयमपि विरहपीडितकोकदर्शनाद्दुःखमंजातः श्वसनो निःश्वासभरस्तस्निर्गमनेन कृत्वा विकीर्णं सरोजसौरभं यस्मिंस्तादृशमकृत। संध्यासमये पद्मसंकोचात्सौरभासंभवेपि निःश्वासमोचनेन पद्मिनीत्वात्पद्मसौगन्ध्यं तदानीमपि विस्तारयति स्मेत्यर्थः। कोकौ तादृशौ दृष्ट्वा भृशं निश्वासेत्यर्थः। अन्योप्यस्मक्षतं रक्तव्याप्तं दृष्ट्वा भृशं निश्वसिति। 'विरहासहनौ हताविवास्त्रैः' इति पाठः सुयोजनः। अस्त्रैः कामस्य। रथचरणौ, 'पुमान्स्त्रिया' इत्यकेशषः॥

अभिलपति पतिं प्रति स्म भैमी
सदय विलोकय कोकयोरवस्थाम्।
मम हृदयमिमौ च भिन्दतीं हा
क इव विलोक्य नरो न रोदितीमाम् १४६

अभीति॥ भैमी पतिं प्रति इति अभिलपति स्म अवोचत्। इति किम्—हे सदय सकरुण, त्वं कोकयोरवस्थां विरहविह्वलत्वं विलोकय। हा कष्टमिमौ कोकौ भिन्दतीं पृथग्देशावस्थितौ कुर्वतीम्, अत एव—मम भैम्या अपि हृदयं च एतच्छोकेन विदारयन्तीमिमां कोकयोरवस्थां विरहविह्वलत्वं विलोक्य क इव नरः सचेता मनुष्यो न रोदिति, अपितु सर्वोपि परिदेवनं करोत्येव। सदयत्वात्तव दुःखं भविष्यतीति किं वक्तव्यमित्यर्थः॥

कुमुदमुदमुदेष्यतीममोढा
रविरविलम्बितुकामतामतानीत्।
प्रतितरु विरुवन्ति किं शकुन्ताः
स्वहृदि निवेशितकोककाकुकुन्ताः॥१४७॥

कुमुदेति॥ हे प्रिय, रविरुदेष्यतीमुत्पत्स्यमानां कुमुदानां मुदं विकासरूपं हर्षमसोढेवाशक्नुवन्निवाविलम्बितुं सत्वरं गन्तुं कामो यस्य तद्भावस्तत्तामतानीत् विस्तारितवान्। आसन्नास्तमयो वर्तत इत्यर्थः। तथा—शकुन्ताः पक्षिणः प्रतितरु विरुवन्ति विशेषेण रुतं कुर्वन्ति। आसन्ननेत्रनिमीलना वासार्थिनो विरुवन्तः सन्तः स्वस्वनिवासवृक्षं प्रति गच्छन्तीत्यर्थः। तत्रोत्प्रेक्षते—स्वहृदि निवेशिताः कोकानां काकवः शोकविकृता विरावा एवातिपीडाकारित्वात्कुन्ता भल्ला यैस्तादृशाः किम्। चक्रवाकशोकपीडिता इव पक्षिणः क्रन्दन्तीत्युत्प्रेक्षा। अन्योपि वैरिणामुदेष्यतीमभिवृद्धिमसहमानः सत्वरं कुत्रचिद्गच्छति। तथा—अपरः सकृपः कश्चिद्दुःखितं कंचिद्दृष्ट्वा क्रन्दति। सोढा, तृन्। मुदम्, 'न लोका-' इति षष्ठीनिषेधः उदेष्यतीम्, 'आच्छीनद्योः-' इति वैकल्पिकत्वान्नुमभावः॥

अपि विरहमनिष्टमाचरन्ता-
वधिगमपूर्वकपूर्वसर्वचेष्टौ।
इदमहह निदर्शनं विहंगौ
विधिवशचेतनचेष्टनानुमाने॥ १४८॥

अपीति॥ हे प्रिय, स्वस्यानिष्टमपि विरहमाचरन्तौ स्वयमेव कुर्वाणौ। तर्हि सदा स्वानिष्टाचरणस्वभावावेव भविष्यतइत्यतआह—अधिगमो ज्ञानं तत्पूर्विकाः पूर्वा विरहाचरणात्प्राचीनाः सर्वाश्चेष्टाः कर्तव्यता ययोस्तौ। अधिगमो लाभो हितमिति यावत्। तत्पूर्विकास्तदुद्देश्याः पूर्वाः सर्वाश्चेष्टा ययोस्तादृशौ वा। बुद्धिपूर्वकारी हि स्वाहिते न प्रवर्तते। कोकयोश्च दिने भोजनादयः सकलाश्चेष्टा ज्ञानपूर्विकाः स्वहिताश्च। एवंसत्यनेनैवंस्वभावावप्येतौ संध्यायामकस्मादेवान्योन्यविरहं स्वयमेव यस्मादाचरतस्तस्माद् विधिवशं दैवाधीनं चेतनानां प्राणिनां चेष्टितं पूर्वकर्माधीनं प्राणिनामाचरणमित्येवंरूपेऽनुमाने कार्यकारणविशेषज्ञाने विषये यावेतौ विशिष्टौ विहंगौ कोकौ इदमेव निदर्शनमयमेव दृष्टान्तः। अहह अद्भुते खेदे वा। तस्मात्प्राचीनकर्मानुसारेणैव प्राणी कदाचिद्धितं कदाचिच्चाहितमाचरतीति भावः। 'प्राणिनो दैवाधीनचेष्टिताः प्रतिकूलतया ज्ञातेऽपि प्रवर्तमानत्वाच्चक्रवाकवत्' इत्यनुमानम्॥

अङ्घ्रिस्थारुणिमेष्टकाविसरणैः शोणे कृपाणः स्फुटं
कालोऽयं विधिना रथाङ्गमिथुनं विच्छेत्तुमन्विच्छता।
रश्मिग्राहिगरुत्मदग्रजसमारब्धाविरामभ्रमौ
दण्डभ्राजिनि भानुशाणवलये संसज्य किं निज्यते॥

अङ्घ्रीति॥ स्फुटमुत्प्रेक्षते—हे प्रिय, रथाङ्गमिथुनं विच्छेत्तुं वियोक्तुम्, अथ च—विशेषेण विदारयितुमन्विच्छता विधिना ब्रह्मणा दैवेन वाऽयं कालः सायंसंध्यासमय एव स्फुटं स्वाङ्गगुण-

योगात्कालः कृष्णः लोहमयः कृपाणः भानुशाणवलये सूर्यरूपे शाणचक्रे संसज्य संयोज्य निज्यते किम्, तीक्ष्णीक्रियते किमित्यर्थः। किंभूते वलये—अस्तमयकालसांनिध्यादङ्गिन्थः किरणस्थोऽरुणिमा स एव इष्टकाविसरणानि इष्टकाचूर्णप्रसारणानि तैः शोणे रक्तवर्णे। तथा—रश्मिग्राहिणा गरुत्मतोऽग्रजेनारुणेन समारब्धाऽविरामा निरन्तरा भ्रमिर्भ्रमणं यस्य तस्मिन्, सदाऽरुणेन कृतभ्रमणे। अथ च—आकर्षणरज्जग्राहिभिररुणसमैस्तद्वत्तेजस्विभिर्बलिभिः पुरुषैरारब्धनिरन्तरभ्रमणे। तथा—दण्डसंज्ञकेन पारिपार्श्वकेन भ्राजिनि शोभमानशीले, अथ च—शाणचक्राधारभूतेनाकर्षणरज्जुसंयुक्तेन दारुमयेन दण्डेन शोभमाने। संनिहितास्तमयसूर्यसायंसंध्यासमयसांनिध्याच्चक्रवाकयुगं तीक्ष्णतरखड्गविदारितमिव विधिवशाद्वियुक्तं सद्व्यथत इति भावः। अन्योपि किंचिच्छेत्तुं खड्गमुक्तविशेषणविशिष्टे शाणचक्रे तीक्ष्णं करोति। 'किरणप्रग्रहौ रश्मी' 'माटरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः' इत्यमरः। भ्रमाविति भावितपुंस्कम्। निज्यते, 'णिजिर् शौचे' इत्यस्मात्कर्मणि यक्। नकारे तकारभ्रान्त्यैव तिज्यत इति पठन्ति। तदसत्[1] ॥

इति स विधुमुखीमुखेन मुग्धा-
लपितसुधासवमर्पितं निपीय।
स्मितशबलवलन्मुखोऽवदत्तां
स्फुटमिदमीदृशमीदृशं यथात्थ ॥ १५० ॥

इतीति ॥ स नलोऽपि तां भैमीमिति अवदत्। इति किम्—हे प्रिये, त्वं यथात्थ, तदिदं स्फुटं निश्चितमीदृशमीदृशं सत्यमेवेत्यर्थः। किंभूतः—इति पूर्वोक्तरीत्या विधुमुख्या भैम्या मुखेनार्पितं दत्तं मुग्धं मनोहारि आलपितं मञ्जुभाषितमेव सुधासवं रसबाहुल्यादमृतं उन्मादकत्वाच्च मद्यं निपीयास्वाद्य सादरमाकर्ण्य च स्मितेन शबलं मिश्रितम् वलत् भैमीमुखं मुखं यस्य सः। कामिनो हि कामिनीमुखार्पितमद्यं सानुरागं पिबन्ति, अनन्तरं वलितमुखाः सहासं किंचिद्वदन्ति च ॥

स्त्रीपुंसौ प्रविभज्य जेतुमखिलाबालोचितौचित्ययो-
र्नेम्रां वेद्मि रतिप्रसूनशरयोश्चापद्वयीं त्वद्भ्रुवौ।
त्वन्नासाच्छलनिह्नुतां द्विनलिकीं नालीकमुक्तयेपिणो-
स्त्वन्निश्वासलते मधुश्वसनजं वायव्यमस्त्रं तयोः ॥

स्त्रीति ॥ अयि प्रिये, अहं वक्रतरे त्वद्भ्रुवौ रतिश्च प्रसूनशरः कामश्च तयोः नम्रां स्त्रीजयाय रत्या पुंजयाय च कामेनाकर्णमाकृष्य वक्रितां चापद्वयीं वेद्मि, त्वद्भ्रुवावेव द्वयोर्धनुषी इत्यर्थः। किंभूतयोः—अखिलौ त्रिजगति वर्तमानौ तत्तज्जातीयौ स्त्रीपुंसौ प्रविभज्य विभागं कृत्वा पृथक्पृथक् जेतुमालोचितं विचारितमौचित्यं याभ्यां तयोः। स्त्रियाः रूपेण जेतुं योग्या पुंसश्च पुमानेवेत्यालोचितौचित्ययोरित्यर्थः। तथा—नालीकानां वितस्तिमात्रनालीकाख्यशरविशेषाणां मुक्तिं मोक्षणमिच्छतः एवंशीलयो रतिकामयोः संबन्धिनीं द्विनलिकीं नालीकमोचनोपायभूतसरन्ध्रवंशपर्वद्वयं त्वन्नासाच्छलेन त्वदीयवामदक्षिणनासापुटद्वयव्याजेन निह्नुतां गोपितां जानामि। त्वन्नासापुटद्वयमेतन्न भवति, किंतु नालीकद्वयमुक्त्युपायभूता द्विनलिकीत्येवाहं शङ्क इत्यर्थः। तथा—त्वन्निश्वासलते तव वामदक्षिणनासानिश्वासधाराद्वयं तयो रतिकामयोः प्रत्येकं मधुश्वसनजं वसन्तकालीनमलयानिलप्रभवं वायव्यं वायुदेवताकमस्त्रमेव वेद्मि। सुन्दरत्वद्भ्रूनासाद्यवयवदर्शनमात्रेण कामवशत्वं भवतीति भावः। द्विनलिकी, समाहारद्विगौ ङीप्। वायव्यम्, 'तास्य देवता' इत्यर्थे 'वायृतुपितृषसो यत्' इति यत् ॥

पीतो वर्णगुणः स चातिमधुरः कायेऽपि तेऽयं यथा
यं बिभ्रत्कनकं सुवर्णमिति कैरादृत्य नोत्कीर्त्यते।
का वर्णान्तरवर्णना धवलिमा राजैव रूपेषु य-
स्तद्योगादपि यावदेति रजतं दुर्वर्णतादुर्यशः ॥१५२॥

पीत इति ॥ हे भैमि, वर्णेषु शुक्लादिरूपेषु मध्ये गुणो वैशेषिकादिभिर्गुणपदार्थत्वेन निर्दिष्टः पीतो हरिद्राभो वर्णः स च स एवातिमधुरो रमणीयतरो, नतु वर्णान्तरं मधुरमित्यर्थः। यथा येन कारणेनायं पीतो वर्णस्तेऽपि काये देहे वर्तते। अन्युत्तमया त्वयापि शरीरे धार्यते तस्मादयमत्युत्तम इत्यर्थः। अथवा—रूपान्तरापेक्षया शुक्लरूपस्यैव प्रधानत्वादन्येषां चाप्रधानत्वाद्वर्णेषु मध्ये गुणोऽप्रधानभूतोपि यो हरिद्राभो वर्णः स एवातिमधुरः प्रधानभूत इत्यर्थः। यस्मादयं ते काये वर्तते। अप्रधानस्यापि केनचिदत्युत्तमेनाङ्गीकृतत्वाद्धि प्राधान्यं भवति, तथा त्वयाङ्गीकृतत्वादप्रधानस्याप्यस्य प्राधान्यं युक्तमेवेत्यर्थः। अथ च—गुणः पीत एव, नान्ये गुणाः, पीतवर्ण एव गुणरूपोऽन्ये तु दोषरूपा इत्यर्थः। स एव चातिमधुरः उभयत्रापि हेतुः—यतोऽयं तव काये वर्तते तस्मादुणोऽतिमधुरश्चेत्यर्थः। अथ च—ते तव काये वर्तमानोऽयं प्रत्यक्षगम्योऽतिमधुरो रसो यथा मया पीतस्तथाऽन्यैरन्यानचुम्बनवशेनास्वादितः, तथा तव काये सोऽतिप्रसिद्धो वर्णगुणो गौरिमापि पीतः सादरं निरीक्षितः। अथ च—हरिद्राभ इत्यर्थः। चः, अपिश्चान्योन्यसमुच्चये। सोऽतिमधुरो रसो यथा मया पीतः, तथायं वर्णगुणोऽपि पीत एवेति या संबन्धः। अथ च तवातिमधुरो वर्णगुणो वर्णात्मकशब्दलक्षणो गुणो यथा पीत आस्वादितः, अतिमधुरा तव वाणी यथा पीतेत्यादि ज्ञातव्यम्। एवं छलेनोक्त्वा प्रकृतपीतरूपवर्ण एव युक्तिमाह—त्वच्छरीराश्रयं पीतवर्णं बिभ्रत् कनकं चम्पकं शोभनो वर्णोऽस्य तत्सुवर्णमिति कैर्जनैरादरेण नोत्कीर्त्यते नोद्घोष्यते, अपितु—त्वद्भ्रूधृतवर्णतुल्यवर्णधारणादेव चम्पकं सुवर्णमित्युच्चैः कीर्त्यते। अथ च त्वच्छरीराश्रयं पीतवर्णं धारयच्चार्मीकरं शोभनो वर्णोऽस्येति व्युत्पत्त्या सुवर्णमिति कैर्जनैरादरेण नोद्घोष्यते, अपितु—त्वच्छरीराश्रितपीतवर्णतुल्यवर्णधारणादेव सुवर्णमिति कीर्तिं लेभे इत्यर्थः। अथ च—शोभनो वर्णः स्तुतिर्यस्य। त्वद्भ्रूवर्णं बिभ्रदतितरां स्तुत्यं, ननु स्वत इति। मुख्यया वृत्त्या सुवर्णमिति स्वदीयमङ्गम्, कनकं तु स्वद्भ्रुत्तिवर्णसाम्यधारणाद्गौण्या वृत्त्या लोकेन कथ्यत इत्यर्थः। अतएव पीतवर्णस्य पुरस्तादप्रधानानां वर्णान्तराणां नीलरक्तादीनां

---

१ 'तिज निशाने' इत्यस्य तीक्ष्णीकरणार्थकस्य धातोस्तादृग्रूपसंभवे 'तदसत्' इत्युक्तिश्चिन्त्या।

वर्णानां वर्णना का, अपितु—सा नैव कुत्राप्युपयुज्यते तत्कथा न कार्यैव । यावत् यतः कारणाद् यो धवलिमा शुक्लगुणः पञ्चिधेषु रूपेषु मध्ये राजैव श्रेष्ठतम एव । निर्मलत्वादभ्यर्हितत्वाद्रूपविभागवेलायां वैशेषिकैः प्रथमोच्चारितत्वाच्च प्रधानभूत एव । तस्य प्रधानभूतस्यापि योगात्संबन्धाद्रजतं दुष्टोऽमनीचीनो वर्णो यस्य तस्य भावस्त्ता दुर्वर्णशब्दवाच्यता तद्रूपं दुर्यशोऽकीर्तिमेति । नीलादिवर्णान्तरयुक्तं तु दुर्वर्णतां प्राप्नोतीति किं वाच्यमित्यर्थः । यावत्सकलं रजतमिति वा । अप्रधानस्यापि पीतरूपस्य भैमीशरीरेणानङ्गीकृतत्वादेवोत्तमत्वम् । तथोगात्काञ्चने सुवर्णमिति कीर्तिः । भैमीशरीरेणानङ्गीकृतत्वादेव चोत्तमस्यापि धवलिम्नोऽनुत्तमा । धवलिमा, वर्णवाचित्वाद्गुणवचनत्वाद्वेमनिच् ॥

इदानीं नवभिः श्लोकैर्भैमीवाणीं वर्णयति—

खण्डक्षोदमृदि स्थले मधुपयःकादम्बिनीतर्पणा-
त्कृष्टे रोहति दोहदेन पयसां पिण्डेन चेत्पुण्ड्रकः ।
स द्राक्षाद्रवसेचनैर्यदि फलं धत्ते तदा त्वद्गिरा-
मुद्देशाय ततोऽप्युदेति मधुराधारस्तमप्रत्ययः ॥१५३॥

खण्डेति ॥ हे भैमि, पुण्ड्रकः स्थूलेक्षुविशेषः पयसां पिण्डेन दुग्धानामत्यन्ताग्निपाकघनीभूतेन गोलकेनैव दोहदेन एवंभूते स्थले क्षेत्रे चेद्रोहति साङ्कुरो भवति । किंभूते स्थले—खण्डः शर्कराचूर्णमेव मृन्मृत्तिका यस्मिन् । तथा—मधु अमृतं माक्षिकमेव वा पयो यस्यास्तया कादम्बिन्या मेघमालया तर्पणात् पूर्णजलत्वकरणाद्धेतोर्द्विगुणाकृष्टे । मेघमालावृष्टजलं हि क्षेत्रं पुनः कृष्यते, तादृशे समीकृते उप्तं हि बीजमङ्कुरार्थं पुनः पयोऽपेक्षते । तत्स्थानेऽत्र दुग्धगोलकः । दोहदेनेत्यनेन निरातङ्कमभिवृद्धिः सूचिता । अनन्तरं च प्ररूढाङ्कुरः सन् पुण्ड्रकः फलोत्पत्तिसमयपर्यन्तं द्राक्षाणां द्रवः पक्वफलनिष्पीडितरसस्तस्य सेचनैः कृत्वा इक्षुदण्डादपि परिणतमाधुर्यातिशयफलं यदि धत्ते तदा तर्हि ततोपि विशिष्टेक्षुफलादपि सकाशात्त्वद्गिरां तव वाणीनामुद्देशाय निर्देशार्थं मधुरशब्द आधारो मूलप्रकृतिर्यस्य तादृशस्तमप्रत्यय उदेति उत्पद्यते । कीदृग्भैम्या वाणीति पृष्टे उक्तविशेषणविशिष्टादिक्षुफलादपि मधुरतमेति तदा निर्देष्टुं शक्येत इत्यतिशायने तमप् तदैव संगच्छते इत्यर्थः । एवंविशिष्टं फलं यदि भवेत्, तर्हि तदेव तावदतिमधुरं तस्मादप्यतिमधुरं वस्तु वियते किमिति पृष्टे निःसीममधुरतमस्यान्यस्याभावात्तमप्रत्ययान्तमधुरशब्देन भवद्वाण्येवोत्तरत्वेन दातुं योग्या नतु विशिष्टमपीक्षुफलं, निःसीममाधुर्याभावात्तमप्रत्ययानुपपत्तेः, किमुत मधुराणि द्रव्यान्तराणीति भवद्वाणीवन्मधुरतमं वस्तु किंचिदपि न दृष्टमिति भावः । एवंविधे क्षेत्रे यदि पुण्ड्रको रोहति, स च पयसां पिण्डेन दोहदेन, द्राक्षाद्रवसेचनैश्च दोहदेन, यदि फलं धत्त इति वा । 'कादम्बिनी मेघमाला' इत्यमरः । 'पुण्ड्रो दैत्यविशेषेक्षुभेदयोः—' इति विश्वः । ततः स्वार्थे कन् ॥

उन्मीलद्गुडपाकतन्तुलतया रज्ज्वा भ्रमीरर्जय-
न्दानान्तःश्रुतशर्कराचलमथः स्वेनामृतान्धाः स्मरः ।
नव्यामिक्षुरसोदधेर्यदि सुधामुत्थापयेत्सा भव-
ज्जिह्वायाः कृतिमाह्वयेत परमां मत्कर्णयोः पारणाम् ॥

उन्मीलदिति ॥ अमृतमेवान्धोऽन्नं यस्य देवत्वात्, तादृशो भवन्स्मरो यदि इक्षुरस एवोदधिस्तस्मात्सकाशान्नव्यां नूतनां देवासुरोत्थापितपूर्वसुधाया अन्यादृशीं सुधामात्मनैवोत्थापयेन्निर्गमयेत्, तर्हि सा मधुरतमा सुधा मत्कर्णयोः परमां पारणामद्वितीयतृप्तिहेतुं भवत्या जिह्वायाः कृतिं त्वद्रसनानिर्मितां वाणीमाह्वयेत् स्पर्धापूर्वमाकारयेत् । किंभूतः स्मरः—उन्मीलन्नतिप्रकाशमानोऽतिशयितो गुडस्येक्षुरसविकारस्य पाकस्तज्जन्या ये तन्तव इव तन्तव ऊर्ध्वोर्ध्वप्रसारितगुडनिर्गतदोरकास्त एव दैर्घ्यान्नता तयैव रज्ज्वा मन्थभ्रमणदोरकेण कृत्वा दानान्तस्तुलापुरुषदानादिमध्ये आयुरारोग्यादिफलकः श्रुतः शर्कराचलः स एव मन्था मन्दरस्तस्य भ्रमीर्भ्रमणानि अर्जयन् कुर्वन् । तया रज्ज्वा शर्कराचलरूपं मन्थानं चालयन् । अतिमधुरसामग्रीसंपादितं हि मधुरतमं भवतीत्येवंविधमधुरसामग्रीकत्वान्मधुरतमापि सुधा भवद्वाणीतुल्या भवेन्नवा अन्या तु नैवेत्यर्थः । 'अथातः संप्रवक्ष्यामि शर्कराचलमुत्तमम् । यस्य प्रदानाद्विष्ण्वर्करुद्रास्तुष्यन्ति सर्वदा ॥' इति दानखण्डे । आह्वयेत, 'स्पर्धायामाङः' इति तङ् ॥

आस्ये या तव भारती वसति तल्लीलारविन्दोल्लस-
द्वासे तत्कलवैणनिक्वणमिलद्वाणीविलासामृते ।
तत्केलिभ्रमणार्हगैरिकसुधानिर्माणहर्म्याधरे
तन्मुक्तामणिहार एव किमयं दन्तस्रजौ राजतः ॥

आस्येति ॥ अयि प्रिये, तवास्ये या भारती सरस्वती वसति । किंभूते आस्ये—तस्या भारत्या एव हस्तस्थितस्य लीलारविन्दस्येवोल्लसन् प्रसरन् वासो गन्धो यस्मिन् । पद्मिनीत्वात्पद्मतुल्यपरिमले । तथा—तस्या एव कलो वैणो निक्वणः मधुरास्फुटो वीणासंबन्धी नादस्तद्रूपं मिलत्संबध्यमानं वाणीविलासरूपं वक्तृत्वादिनानाविधवाग्विलासरूपममृतं यस्मिन् । तथा—तस्या एव केलिभ्रमणार्हं लीलागमनयोग्यं गैरिकेण रक्तधातुविशेषेण रञ्जितया सुधया धवलनसाधनचूर्णद्रव्येण च चित्रादिनिर्माणं यत्र तादृशं यद्धर्म्यं गृहं तद्रूपस्तत्तुल्योऽधरोष्ठो यस्मिन् तादृशे आस्ये पुरोदृश्यमाने ये दन्तस्रजौ द्वे दन्तमाले राजतः शोभेते, तद्रूपोऽयं पुरोदृश्यमानः तस्या भारत्या मुक्तामणिरचितो हार एव किम्, तद्वत्ते रेजाते इत्यर्थः । सरस्वतीवीणाक्वणिततुल्या तव वाणीत्यर्थः । अत्र प्राधान्येन वाणीवर्णनम्, अन्यत्प्रासङ्गिकम् । पद्मगन्धादिभिर्मुखे भारतीवासोऽनुमीयते । ईश्वराणां गृहं गैरिकादिविचित्रं भवति । गैरिकयुक्ता सुधेति वा ॥

वाणी मन्मथतीर्थमुज्ज्वलरससोतस्वती काप्यि ते
खण्डः खण्ड इतीदमीयपुलिनस्यालप्यते वालुका ।

---

१ इतःप्रभृति सप्त श्लोका जीवातौ नोपलब्धाः । २ 'रम्या—' इति मूलपुस्तकपाठः । ३ 'स्रोतस्विनी' इति सुखावबोधास्थः पाठः । ४ 'खण्डशब्दस्य पुंस्त्वलिङ्गतया 'खण्डं खण्डम्' इत्यपि पाठः' इति सुखावबोधा । ५ 'इदमुत्थपुलिनस्य' इति पाठोपि सुखावबोधासंमतः ।

एतत्तीरमृदैव किं विरचिताः पूताः सिताश्चक्रिकाः
किं पीयूषमिदं पयांसि किमिदंतीरे तवैवाधरौ॥१५६॥

वाणीति ॥ हे भैमि, ते वाणी कापि वर्णयितुमशक्यत्वाल्लोकोत्तरा, अथ च—अनिर्दिष्टनामा, उज्ज्वलरससस्रोतस्वती शृङ्गाररससंबन्धिनी नदी, अथ च निर्मलजला निर्मलजलसंबन्धिनी वा नदी। अत एव—मन्मथस्य तीर्थं कामोद्दीपिका। तथा-इदमीयस्य अस्या नद्याः संबन्धिनः पुलिनस्य संबन्धिनी वालुकैव इक्षुविकाररूपः खण्डं खण्डमित्यालप्यते गीयते । तथा—पूता निर्मलाः सिताः शुभ्राश्चक्रिकाः शर्कराकृतचक्राणि एतस्यास्तीरस्य मृदैव धवलमृत्तिकयैव विरचिताः किम्। तथा—पीयूषममृतमस्याः संबन्धीनि पयांसि इदंपयांसि किम्। अस्या जलान्येवामृतत्वेनालप्यन्ते किमित्यर्थः। तथा—तवाधरावेव इदंतीरे अस्या नद्यास्तीरे उभौ तटौ किम्। शृङ्गाररसप्रधाना कामोद्दीपिका भवद्वाणी मधुरतमेति भावः ॥

परभृतयुवतीनां सम्यगायाति गातुं
न तव तरुणि वाणी यं सुधासिन्धुवेणी ।
कति न रसिककण्ठे कर्तुमभ्यस्यतेऽसौ
भवदुपविपिनाम्रे ताभिराम्रेडितेन ॥ १५७ ॥

परेति ॥ हे तरुणि प्रादुर्भूतयौवने, सुधासिन्धुवेणी सुधानदीप्रवाहरूपा तवेयं वाणी परभृतयुवतीनां सम्यग्यथातथ्येन गातुं भाषितुं नायाति, यस्माद्धेतोस्ताभिः कोकिलाभिरसौ स्वद्वाणी भवत्या उपविपिने स्थितो य आम्रवृक्षस्तस्मिन्स्थित्वा रसालाङ्कुरस्वादेन रसिकेऽतिमधुरे, अथच—ममाप्येवंवाणी भवत्येवंसाभिलाषे, कण्ठे कर्तुं कण्ठस्थां कर्तुमाम्रेडितेन पुनःपुनर्घोषणेन कति वाराञ्चाभ्यस्यते, अपितु बहुवारमभ्यस्यत एव। तस्मादद्यापि तासां भवद्वाणी सम्यङ्नायातीति ज्ञायत इत्यर्थः। कोकिलालापादपि स्वद्वाणी मधुरतमेति भावः। भिक्षाटनेन विद्याभ्यासः सुकर इति सूचनार्थं परभृतपदम्। पुमपेक्षया स्त्रीणां विशेषतस्तरुणीनामिति सूचनार्थं युवतिपदम् ॥

ऊर्ध्वस्ते रदनच्छदः स्मरधनुर्बन्धूकमालामयं
मौर्वी तत्र तवाधराधरतटाधःसीमलेखालता ।
एषा वागपि तावकी ननु धनुर्वेदः प्रिये मान्मथः
सोयं कोणधनुष्मतीभिरुचितं वीणाभिरभ्यस्यते१५८॥

ऊर्ध्व इति ॥ हे प्रिये, ते ऊर्ध्वो रदनच्छद ओष्ठ एव बन्धूकमालामयं स्मरधनुः। तवाधराधरतटस्याधस्तनौष्ठभागस्याधःसीमायां पर्यन्तमर्यादायां वर्तमाना लेखा सैव दैर्घ्यलता तत्र कामचापे मौर्वी। एषा तावकी वागपि मान्मथः कामसंबन्धी कामोद्दीपकत्वात्प्रतिपादको धनुर्वेद एव। सोयं विशिष्टस्वद्वाणीरूपो मान्मथो धनुर्वेद उचितं योग्यं यथा तथा कोणधनुष्मतीभिर्वीणावादनधनुर्युक्ताभिर्वीणाभिरभ्यस्यते परमद्यापि नायातीत्यर्थः। स्वद्वाणी वीणाक्वणितादपि मधुरतमेति भावः। धनुर्वेदश्च धनुर्धरैरेवाभ्यस्यते इत्यौचित्यम्। अभ्यस्यते, एतदुचितमिति वा। यस्यस्य नायाति तदागमनार्थमभ्यासो ह्युचित एवेत्यर्थः ॥

१ कलिकातामुद्रितपुस्तके तु 'आरभ्यते' इति पाठो मूलेपि प्रतीयते।

स ग्राम्यः स विदग्धसंसदि सदा गच्छत्यपाङ्क्तेयतां
तं च स्प्रष्टुमपि स्मरस्य विशिखा मुग्धे विगानोन्मुखाः।
यः किं मध्विति नाधरं तव कथं हेमेति न त्वद्वपुः
कीदृङ्नाम सुधेति पृच्छति न ते दत्ते गिरं चोत्तरम् ॥

स इति ॥ हे मुग्धे सुन्दरि, यः पुरुषः मधु किंनामेति पृच्छति प्रभं कुर्वाणे जने विषये तवाधरमेवोत्तरं न दत्ते, स ग्राम्यः पामरोऽचतुरः, नतु नगरनिवासयोग्य इत्यर्थः । तथा—हेम किंप्रकारकमिति प्रभं कुर्वाणे यस्त्वद्वपुरेवोत्तरं न दत्ते, स विदग्धानां चतुराणां संसदि सभायां सदाऽपाङ्क्तेयतां पङ्क्तिबहिर्भूतत्वं पातित्यं गच्छति। तेषां पङ्क्तौ नोपवेश्यते सोऽप्यचतुर इत्यर्थः। तथा—सुधा नाम कीदृक् इति च प्रभं कुर्वाणे ते गिरं चोत्तरं न दत्ते, स्मरस्य विशिखास्तं च पुरुषं स्प्रष्टुमपि विगानोन्मुखा जुगुप्सायै कृतोद्यमाः, 'नीरसोयम्' इति जुगुप्सया तं न स्पृशन्ति न भिन्दन्तीति किं वाच्यम्, सोऽप्यचतुर इत्यर्थः। स्वद्वाणी सुधाया अपि मधुरतमेति भावः। अधरादिवर्णनं तु प्रासङ्गिकम्। ग्राम्यः, 'ग्रामाद्यखञौ' इति भावार्थे यः । पाङ्क्तेयः, नद्यादित्वाद्ढक् ॥

मध्ये बद्धाणिमा यत्सगरिममहिमश्रोणिवक्षोजयुग्मा
जाग्रच्चेतोवशित्वा स्मितधृतलघिमा मां प्रतीशित्वमेषि ।
मूर्क्कौप्राकाम्यरम्यादिशिविदिशियशोलब्धकामावसाया भूतीरष्टावपीशस्तददित मुदितः स्वस्य शिल्पाय तुभ्यम् ॥ १६० ॥

मध्ये इति ॥ हे प्रिये, त्वं यस्माद्धेतोर्मध्ये उदरभागे बद्धो धृतः अणिमा सौक्ष्म्यातिशयो यया सा कृशोदरी, तथा-गरिममहिम्भ्यां गुरुत्वमहत्त्वाभ्यां सह वर्तमानं श्रोणिनितम्बः, वक्षोजयुग्मं च यस्याः सा गुरुस्थूलनितम्बा महोच्चकुचा च । तथा—जाग्रत स्फुरद्रूपं चेतसि वशित्वं जितेन्द्रियता यस्याः सा पतिव्रता। तथा-स्मिते ईषद्धासेऽपि धृतो लघिमाल्पत्वं यया सा, अल्पहासा। तथा-मां प्रत्युद्दिश्य ईशित्वं स्वामितामपि मम प्राणेश्वरा। तथा मूर्क्कौ वचनचातुर्ये विषये प्राकाम्येन प्रकारबाहुल्येन रम्या वक्रोक्त्यादिनानाप्रकारां वाणीं वक्तुं यो यथा वाञ्छति तं प्रति तथा वक्तुं त्वमेव जानासि नान्या। तथा दिशि प्राच्यादौ विदिशि आग्नेय्यादौ च यशसः सौन्दर्यादिविषये कीर्तेः कीर्त्या वा कृत्वा लब्धः कामेन स्वेच्छयाऽऽप्रतिहतप्रसरोऽवसायो गतिर्यया सा त्रैलोक्यप्रसरकीर्तिरेवंविधा यस्मात्, तत्तस्मात्कारणान्मुदितो हृष्ट ईश ईश्वरस्त्वां निर्माय सौन्दर्यादिना परितुष्टः सन् अणिमादीरष्टावपि भूतीर्महासिद्धीस्तुभ्यं स्वस्य शिल्पाय स्वद्रूपाय निजनिर्माणाय अदित प्रायच्छत्। संतुष्टो हि पित्रादिरपत्यादेः स्वयंधृतमलंकारादि ददाति । तथेश्वरेण संतुष्य स्वयं धृतम् 'अणिमा, महिमा, गरिमा, लघिमा, ईशित्वम्, वशित्वम्, प्राकाम्यम्, कामावसायिता च' इत्येवमष्टविधमैश्वर्यं तुभ्यं दत्तम्। अन्यथैतत्त्वयि कथं स्यादित्यर्थः। एवं सूक्तिः कस्याश्चिदपि नास्तीति भावः। शब्दश्लेषशक्तिच्छलेनैतत्सर्वमुक्तमिति ज्ञेयम्। वाणीवर्णन एव तात्पर्यम्, मध्यादिवर्णनं प्रासङ्गिकम् । अणिमादौ, गुणवचनत्वादिमनिच् ॥

वश इन्द्रियाणां स्वाधीनत्वम्, तदस्यास्तीति वशी, तद्भावो वशित्वं जितेन्द्रियत्वम् । ईशनमीश ऐश्वर्यं तदस्यास्मि ईशी तद्भावः ॥

त्वद्वाचः स्तुतये वयं न पटवः पीयूषमेव स्तुम-
स्तस्यार्थे गरुडामरेन्द्रसमरः स्थाने स जानेऽजनि ।
द्राक्षापानकमानमर्दनसृजा क्षीरे दृढावज्ञया
यस्मिन्नाम धृतोऽनया निजपदप्रक्षालनानुग्रहः॥१६१॥

त्वदिति ॥ हे प्रिये, वयं त्वद्वाचः स्तुतये न पटवः, तस्मात्पीयूषममृतमेव स्तुमः । तस्यामृतस्यार्थेऽमृतनिमित्तं स पुराणादिप्रसिद्धो गरुडस्यामरेन्द्रस्य च समरः अजनि स्थाने युक्तं तदित्यहं जाने मन्ये । नाम यस्माद्धेतोरनया तव वाण्या यस्मिन्नमृते निजपदयोः प्रक्षालनेवानुग्रहो धृतः कृतः । किंभूतया—द्राक्षापानकस्य पक्वद्राक्षासंबन्धिनः संस्कृतरसविशेषस्य मानोऽहंकारः तस्य मर्दनं खण्डनं सृजति तया । तथा—क्षीरे दुग्धे विषये दृढा अन्येन त्याजयितुमशक्यावज्ञा यस्यास्तया । अथ च—यस्मिन्पीयूषे भवद्वाक्यभूतया वाण्या स्वीयसुप्तिङन्तरूपाणां पदानां प्रक्षालनादनु पश्चाद्ग्रहणं ग्रहः कृतोऽस्त्येव । अमृतक्षालिततयेव निर्दोषं मधुरं च त्वं वदसीत्यर्थः । द्राक्षाक्षीरे तिष्ठतां, पीयूषादपि त्वद्वाणी मधुरतमेति भावः । प्रभोर्यस्मिन्ननुग्रहातिशयः स एव चरणक्षालनादि करोति ॥

शोकश्चेत्कोकयोस्त्वां सुदति तुदति तं व्याहराज्ञाकरस्ते
गत्वा कुल्यामनस्तं व्रजितुमनुनये भानुमेतज्जलस्थम् ।
बद्धे मय्यञ्जलावप्यनुनयविमुखः स्यान्ममैकग्रहोऽयं
दृष्ट्वैवाभ्यांतदम्भोञ्जलिमिहभवतीं पश्यमामेष्यमाणम्

शोक इति ॥ हे सुदति, कोकयोर्विरहजनितः शोकः सदयस्त्वास्त्वां चेत्तुदति तर्त्तार्हि व्याहर आज्ञापय । ते आज्ञाकरोऽहं कुल्यां गत्वा एतस्याः कुल्याया जलस्थमुदकप्रतिबिम्बितं भानुं सूर्यमनस्तमस्ताभावं व्रजितुं प्राप्तुम् अस्तमगन्तुम्, यद्वा—अनस्तमस्ताचलप्रतियोगिभूतमुदयाचलं गन्तुमनुनये प्रार्थये । इदानीं त्वयास्तो न प्राप्तव्यः पुनरुदयाचलो वा गन्तव्य इत्येवं सूर्यं करसंपुटयोजनपूर्वं संप्रार्थ्य पुनः प्राचीं नेष्यामीति यावत् । यदि मयाञ्जलौ बद्धेऽप्ययं सूर्यो ममानुनये प्रार्थनायां विमुखः स्यात्, यतः—एकः केवलो ग्रहोऽभिनिवेशो यस्य, अथच—मुख्यो ग्रहो ग्रहराजः, तर्त्तार्हि सूर्यार्घ्यदानसंबन्धिनमम्भोञ्जलिमाभ्यां कोकाभ्यामेव दृष्ट्वा इह प्रासादे भवतीं प्रति पुनरेष्यमाणमागमिष्यन्तं मां पश्य । एवं कोकशोकापनोदनव्याजेन 'बहिः संध्यामुपासीत' इति वचनात्सायंसंध्योपासननिमित्तं बहिर्निर्गमनार्थमनुज्ञां याचितवानिति भावः । सुदतीत्यनेनोक्त्यनन्तरमीषद्दशनकिरणप्रकाशेन मम महानानन्दो जनिष्यते तदर्थं व्याहरेति प्रार्थ्यस इति सूच्यते । दृष्ट्वेवेति पाठे-उत्प्रेक्षा । एष्यमाणम्, गत्यर्थादीङो लृटः शानच् ॥

तदानन्दाय त्वत्परिहसितकन्दाय भवती
निजालीनां लीनां स्थितिमिह मुहूर्तं मृगयताम् ।
इति व्याजात्कृत्वालिषु चलितचित्तां सहचरीं
स्वयं सोयं सायंतनविधिविधित्सुर्बहिरभूत् ॥१६३॥

तदिति ॥ सोऽयं नलः स्वयं सायंतनं विधिं संध्याग्निहोत्रादिकं कर्म विधित्सुः कर्तुकामः सन् प्रासादाद्बहिरभूत्, निरगादित्यर्थः । किं कृत्वा—इतिव्याजादेवंप्रकारेण सूर्यानुनयसखीगवेषणमिषेण सहचरीं भैमीमालिषु सखीषु चलितं गवेषणोत्सुकं चित्तं यस्यास्तादृशीं कृत्वा । इति किम्—हे प्रिये, अहं सूर्यानुनयार्थं नदीं प्रति गमिष्यामि, भवती च निजालीनां निजसखीनामिहाग्रेव कस्मिंश्चित्प्रदेशे त्वया न द्रष्टव्यमिति लीनां गुप्तां स्थितिं त्वत्कर्तृकं त्वत्कर्मकं वा परिहसितं परिहासक्रीडैव कन्दो मूलमुत्पत्तिहेतुर्यस्य तादृशं यत्तज्जनिताय तासां सखीनामानन्दाय मुहूर्तं मृगयतां गवेषयत्विति । एवं तद्वचनाद्भैमी क्वचिल्लीनाः सखीर्गवेषयितुं निर्गता, नलोपि सायंसंध्यां कर्तुं बहिर्निरगादित्यर्थः । सायंतनेत्यादिनोत्तरसर्गसंगतिः सूचिता । विधिविधित्सुः, 'द्वितीया' इति योगविभागात्समासः ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तस्यागादयमेकविंशगणनः काव्येऽतिनव्ये कृतौ
भैमीभर्तृचरित्रवर्णनमये सर्गो निसर्गोज्ज्वलः १६४

श्रीहर्षमिति ॥ तस्य कृतौ श्रीहर्षकृते अतिशयेन नव्येऽपूर्वतरप्रमेयपरिपूर्णे भैमीभर्तुश्चरित्रवर्णनं प्राचुर्येण प्रस्तुतं यत्र तादृशे काव्ये एकविंशतेः पूरणं एकविंशं गणनं संख्यानं यस्य, यद्वा—एकविंशतेः पूरणी एकविंशी गणना संख्या यस्य स सर्गोऽगात् समाप्तः ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे एकविंशः सर्गः ॥

द्वाविंशः सर्गः ।

इदानीं पूर्वसर्गान्तप्रस्तावितं सायंकालं वर्णयिष्यन्कविर्द्वाविंशं सर्गमुपक्रमते—

उपास्य सांध्यं विधिमन्तिमाशा-
रागेण कान्ताधरचुम्बिचेताः ।
अवाप्तवान्सप्तमभूमिभागे
भैमीधरं सौधमसौ धरेन्द्रः ॥ १ ॥

उपास्येति ॥ असौ धरेन्द्रो नलः सायंसंध्याप्रान्तभवेनान्तिमाशायाः प्रतीच्या आशाया दिशो रागेण रक्तवर्णेन हेतुना कान्ताया अधरचुम्बि अधरोष्ठस्मारि चेतो यस्य तादृशः संध्यारागसदृशभैम्यधरस्मारी सन् तद्विरहासहिष्णुतया बहिरवस्थातुमशक्तो यत्र सा विद्यते तं सप्तमे भूमिभागे कक्षायां स्थितं भैम्याः धरं पर्वतरूपं सौधं हर्म्यं प्रासादस्य सप्तमीमुपकारिकामवाप्तवान् । किं कृत्वा—सांध्यं संध्यासंबन्धिनं संध्याजपादिविधिमुपास्य कृत्वा ॥

प्रत्युद्व्रजन्त्या प्रियया विमुक्तं
पर्यङ्कमङ्कस्थितसज्जशय्यम् ।
अध्यास्य तामप्यधिवास्य सोयं
सध्यामुपश्लोकयति स्म सायम् ॥ २ ॥

प्रतीति ॥ सोऽयं नलः सायंकालसंबन्धिनीं संध्यां रात्रिदि-

नसंबन्धिनं मुहूर्तं भैम्याः पुर उपश्लोकयति स्म श्लोकैः स्तौति स्म । किं कृत्वा—प्रत्युद्व्रजन्त्या संमुखमागच्छन्त्या प्रियया विमुक्तम् । अङ्के मध्ये स्थिता सज्जा आस्तृता शय्या तूलिका यत्र तं पर्यङ्कमध्यास्य स्वयमधिष्ठाय तां भैमीमप्यधिवास्य तत्रोपवेश्य । पर्यङ्कम्, 'अधिशीङ्-' इति कर्मत्वम् । अधिवास्य, ण्यन्ताद्वसतेर्ल्यप् । तस्य धात्वन्तरत्वात् 'उपान्वध्याङ्वसः' इति कर्मत्वाप्राप्तेस्तामधिवास्येत्यत्र सामर्थ्यात्तत्रैवेति ज्ञेयम् । उपश्लोकयति, 'सत्यापपाश-' इति णिच् । स्मयोगे भूते लट् ॥

विलोकनेनानुगृहाण ताव-
द्दिशं जलानामधिपस्य दारान् ।
अक्षालि लाक्षापयसेव येय-
मपूरि पङ्कैरिव कुङ्कुमस्य ॥ ३ ॥

विलोकनेनेति ॥ हे प्रिये, त्वं जलानामधिपस्य वरुणस्य दारान् भार्यां पश्चिमां दिशं विलोकनेनानुगृहाण कृतार्थीकुरु, तावदादौ विलोकनेनानुगृहाण; वर्णनया तु पश्चादित्यर्थः । यावच्चन्द्रोदयादिना प्राच्यां रामणीयकं भवति, तावत्संध्यारागेण कृतरामणीयकां पश्चिमां दिशं विलोकयेति वा तावच्छब्दार्थः । जडाधिपस्य च भार्या दुःखिता विलोकनादिनानुग्रहीतुमर्हा भवतीत्युक्तिः । येयं पश्चिमा दिक् लाक्षापयसालक्तकरसेन कृत्वा केनाप्यक्षालीव क्षालितेव । तथा—कुङ्कुमस्य पङ्कैः कृत्वा केनाप्यपूरीव पूरितेव । एवंविधा रक्ता दृश्यते, यतस्तस्माद्रमणीयामेतां विलोकयेत्यर्थः ॥

उच्चैस्तरादम्बरशैलमौले-
श्च्युतो रविर्गैरिकगण्डशैलः ।
तस्यैव पातेन विचूर्णितस्य
संध्यारजोराजिरिहोज्जिहीते ॥ ४ ॥

उच्चैरिति ॥ हे प्रिये, रविरेव गैरिकाख्यधातुविशेषसंबन्धी गण्डशैलः उच्चतरादत्युन्नतादम्बरशैलस्य गगनगिरेर्मौलेः शिखरात्सकाशाच्च्युतः पतितः स्थूलपाषाण एवाधः पतितः, अथच—संनिहितः, पातेनोच्चतरगिरिशिखरादधःपतनेन हेतुना विचूर्णितस्य विशेषेण सूक्ष्मचूर्णीकृतस्य तस्यैव गैरिकगण्डशैलस्य संबन्धिनी संध्यैव रजोराजिः । संध्यासंबन्धी राग इत्यर्थः । इह सायंकाले पश्चिमदिशि वा उज्जिहीते उपरिष्टात्प्रसरति । अस्तसमये सूर्यस्य रक्तत्वाद्गगनगिरिशिखराच्च्युतत्वाच्च गैरिकगण्डशैलत्वम् । उच्चतरात्प्रदेशात्पतितो गण्डशैलश्चूर्णीभवति चूर्णीभूतस्य च रजोराजिरूर्ध्वं प्रसरति तद्रजोराजिरेव संध्यारागः प्रायेणोर्ध्वं प्रसरतीत्यर्थः ॥

अस्ताद्रिचूडालयपक्कणालि-
च्छेकस्य किं कुक्कुटपेटकस्य ।
यामान्तकूजोल्लसितैः शिखौघै-
र्दिग्वारुणी द्रागरुणीकृतेयम् ॥ ५ ॥

अस्तेति ॥ हे प्रिये, कुक्कुटानां पेटकस्य समूहस्य यामान्ते प्रहरान्ते या कूजा शब्दितं तद्वशादुल्लसितैः प्रकाशमानैः किंचिदुच्चीभूतैरुत्फुल्लजपाकुसुमतुल्यैः शिखानां शिरसि रक्तचर्ममयकेसराणामोघैर्वृन्दैः किमियं वारुणी दिक् द्राक् अकस्मादरुणीकृता रक्तीकृता । उत्प्रेक्षा । किंभूतस्य—अस्ताद्रेश्चूडा शिखरं सैवालयः स्थानं यस्य स पक्कणः शबरगृहं तस्यालिः समूहस्तत्र च्छेकस्यासक्तस्य शबरैर्गृहेषु संगृहीतस्य । कुक्कुटानां कूजनेनोन्नमितशिखत्वं जातिः । ते च यामान्ते कूजन्ति सायंसमये कूजनादुत्फुल्लशिखावृन्दसंबन्धादरुणीभवनसंभवार्थं यामान्तेत्याद्युक्तम् । 'पक्कणः शबरालयः' 'गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते' इत्यमरः । 'पेटकं पुस्तकादीनां मञ्जूषायां कदम्बके' इति विश्वः ॥

पश्य द्रुतास्तंगतसूर्यनिर्य-
त्करावलीहैङ्गुलवेत्रयात्र ।
निषिध्यमानाहनि संध्ययापि
रात्रिप्रतीहारपदेऽधिकारम् ॥ ६ ॥

पश्येति ॥ संध्यया अत्र सायंसमये चन्द्रस्य नायिकाया रात्रेः संबन्धिनः प्रतीहारस्य दौवारिकस्य पदे अधिकारमास्पदमपि पश्य विलोकय । किंभूतया—द्रुतं शीघ्रमस्तं गतस्य सूर्यस्य निर्यती बहिर्निर्गच्छन्ती करावली किरणपरम्परैव हैङ्गुलं हिङ्गुलाख्येन रञ्जकरक्तद्रव्यविशेषेण रक्तं वेत्रं दण्डविशेषो यस्यास्तया । किंभूते पदे—निषिध्यमानं निवार्यमाणप्रवेशमहो दिनं यस्मिन् । स्त्रिया हि दौवारिकी स्त्र्येव युक्तेति संध्यैव रात्रेर्दौवारिकी जातेत्यर्थः । सूर्योऽस्तमितः, दिनं गतम्, रात्रिरागतेति सायंसंध्यया ज्ञाप्यत इति भावः । दौवारिक्यपि हैङ्गुलवेत्रपाणिः सती प्रविशन्तं कमपि प्रतिषेधयति । 'तिर्यक्करा-' इति (पाठे-) तिर्यञ्चस्तिरः प्रसारिणश्च ते कराश्चेति । अहनीत्यत्र तत्पुरुषत्वाभावाट्टजभावः ॥

इदानीं संध्यानक्षत्रसंयोगं वर्णयति—

महानटः किं नु सभानुरागे
संध्याय संध्यां कुनटीमपीशाम् ।
तनोति तन्वावियतापि तार-
श्रेणिस्रजा सांप्रतमङ्गहारम् ॥ ७ ॥

महानट इति ॥ अङ्ग हे भैमि, महान् संध्योपासनादिविषयेऽतिप्रशस्तः, तथा—अटति गच्छतीत्येवंभूतः कालः स प्रकृतः सायंतनः, यद्वा—महान्परमेश्वरो नटो नर्तको यस्मिन् । संध्याकाले हीश्वरो नृत्यति । स प्रकृतः सायंसंध्यासमयः भानोः सूर्यस्य रागे लोहितिमनि सति अस्तमयानन्तरं सूर्यस्य रागमात्रेऽवशिष्टे सति संध्यां संध्याकान्तिं किंचित्पीतरक्तवर्णत्वात्कुनटीं 'नेपाली कुनटी गोला' इत्याद्यभिधानात् मनःशिलारूपाम्, तथा—ईशामपि स्वकालस्वामिनीं च, अथ च—पितृप्रसूरूपत्वाद्ब्रह्मतनुत्वाद्देवतारूपाम्, अथ च—समृद्धिमतीं संध्याय सम्यग्विचिन्त्य सांप्रतमिदानीं तन्वा किंचिदुद्गततया संध्यारागतिरोहितकान्तितया वा कृशया किंचिद्दृश्यया । तथा—वियतापि गगनरूपया लक्षणया यावद्गगनं विस्तीर्णया, यद्वा—आ सामस्त्येन व्याप्तं वियद्यया गगनव्यापिन्या च, तारश्रेण्या नक्षत्रपरम्परारूपया स्रजा पुष्पादिमालया हारं तनोति विरचयति किं नु । यद्वा—ताराणां शुद्धमौक्तिकानां श्रेणिर्यत्र तादृश्या ग्रथितमौक्तिकया मालया हारविरचनं युक्तमिति संध्याकालः संध्यामेवंविधां संचिन्त्य नक्षत्रपरम्परामेव हारं विरचयति किमित्यर्थः । संध्यारागः कियानवशि-

ष्टोऽस्ति, मुक्तातुल्यानि नक्षत्राणि च किंचिद्दृश्यानि जातानीति भावः। तन्वा तारश्रेणिस्रजोपलक्षितेन तद्युक्तेन वियता गगनेनैव हारं तनोतीति वा। संध्यामेवंविधां विज्ञाय तूष्णींभूत इति न, किंत्वौचित्याद्विशिष्टया वारश्रेणिस्रजा हारमपि विरचयतीत्यर्थ इति वापिशब्दार्थः। अथ च—स प्रसिद्धो महानटस्ताण्डवनृत्तकर्ता शिवो भानोः सूर्यस्य रागे सति। अस्तमितार्धे सूर्ये सतीति यावत्। तत्र संध्यासमये मनःशिलातुल्यवर्णामचिरस्थास्नुत्वात्कुसितनर्तकीरूपां वा ईशां देवीं संध्यां सम्यग्ध्यात्वा सायंसंध्यावन्दनं कृत्वाष्टासु मूर्तिषु मध्ये तारापरम्परैव माला यस्यां तया गगनरूपयापि अमूर्तयापि मूर्त्या कृत्वा इदानीं संध्यावन्दनानन्तरमङ्गहारं मुखकरपार्श्वाद्यङ्गानां समतालमानं विक्षेपं करोति किंन्विति वितर्कः। अमूर्तस्याङ्गहारकरणं चित्रमिति विरोधार्थोपिशब्दः। न केवलं चन्द्रसर्पभोगादिभूषितयैव तन्वाङ्गहारं करोतिकिंतु वियतापि तन्वेति समुच्चयार्थो वा। ईश्वरो हि सायंसमये नृत्यति। भानुरागे मनःशिलातुल्यवर्णां संध्यामपीशां स्वसहचरीं पार्वतीं विचिन्त्य विशिष्टया वियद्रूपयापि तन्वाङ्गहारं तनोति। पार्वतीसमीपेपीश्वरो नृत्यति॥ ॥ अथ च—महानतिप्रवीणो नटः कुत्सितां नटीं नृत्तेऽनतिचतुरामपि संध्यां वयःसंधौ वर्तमानां तरुणीं रसभावसंधौ वर्तमानां वा रसभावज्ञाम्, अत एव—सभाया अनुरागे ईशां सभ्यानुरागजनने समर्थां संचिन्त्य वियत्तुल्ययातिविशालया शुद्धमौक्तिकपरम्परारूपया मालयोपलक्षितया तन्वाङ्गहारं तनोति तदसांप्रतं किम्, अपितु—रसभावादि जनयन्त्या तया सभ्यानुरागे समुत्पादितेऽपि नृत्तकर्मकौशलेनापि सभ्यानुरागार्थं स्वयमङ्गहारं तनोतीति युक्तमेवेत्यर्थः॥ ॥ अथ च—महानतर्को वयःसंधौ रसादिसंधौ वा वर्तमानां तथा समृद्धिमतीमपि स्त्रियं कुत्सितां नटीं नृत्तानभिज्ञां ज्ञात्वा सभानुरागे निमित्ते विशिष्टया तन्वा स्वयमङ्गहारं तनोति तदसांप्रतं किं नु, अपितु तस्या नृत्यकौशलाभावान्नृत्तेन सभानुरञ्जने सामर्थ्याभावात्सभानुरञ्जनार्थं स्वयमेव निपुणं नृत्यतीति युक्तमेवेत्यर्थः॥ ॥ अथ च—अन्योपि महानतिसमृद्धोऽटति सर्वत्र गच्छति तादृशोतिचञ्चलोऽतिप्रसिद्धो विटः कुनटीमपि नृत्तविद्यायामचतुरामपि मया कायकान्त्या कृत्वा योऽनुरागस्तद्विषये ईशां सौन्दर्यातिशयेनैव रागमुत्पादयन्तीम्, तथा—शैशवतारुण्ययोः संधौ वर्तमानां प्रादुर्भूतयौवनां रसभावसंधिस्थत्वाद्रसभावज्ञां वा संचिन्त्य कायकान्त्यानुरागे सति कुनटीमपि तरुणीं रसभावज्ञां वा तथेशां संपश्यां च विचिन्त्य तदीयशरीरस्यातिविस्तृतया शुद्धमौक्तिकमालया हारं विरचयति। तत्रानुरक्तः संस्तस्यै मुक्ताहारं वितरतीत्यर्थः। एवमन्या अपि योजनाः सुधियोहनीयाः। 'सभानुरागैः संधाय' इति पाठो बहुषु पुस्तकेष्वदृष्टत्वादुपेक्ष्यः। अटः, पचाद्यच्। संध्याम्, दिगादित्वाद्यत्। तारशब्दस्य नक्षत्रकनीनिकाभिधायित्वं दशमसर्ग एवोक्तम्॥

---

१ 'अथच—महानटोपि संध्यां वयःसंधौ वर्तमानां कौ भुवि नटीं क्षितावद्वितीयनाटककर्त्रीम्। अतएव सभानुरागे ईशां संधाय ज्ञात्वापि वियतातिविशालया तारश्रेणिस्रजोपलक्षितया तन्वा स्वकीयवपुषा यदङ्गहारं तनोति तत्किं साम्प्रतम्, अपितु नटीनृत्यावसरे तस्य नृत्यं तथाविधरसाजनकत्वेनानुचितमेवेत्यर्थः' इति सुखावबोधा।

भूषास्थिदाम्नस्त्रुटितस्य नाट्या-
त्पश्योडुकोटीकपटं वहद्भिः।
दिग्मण्डलं मण्डयतीह खण्डैः
सायंनटस्तारकराट्किरीटः॥ ८॥

भूषेति॥ हे भैमि, तारकराट् चन्द्रः किरीटो यस्य स शंभुः सायं नटति सायंनटो नर्तक उद्धृतान्नाट्यान्नृत्ताद्धेतोस्त्रुटितस्य भूषास्थां दाम्नो मालाया उच्छलितैः खण्डैः शकलैस्तैरेव उडुकोटीकपटं कोटिसंख्यनक्षत्रव्याजं वहद्भिर्धारयद्भिः सद्भिरिह सायंसमये दिग्मण्डलं मण्डयति पश्य। एतानि नक्षत्राणि न, किंतु ताण्डवत्रुटितास्थिमालोच्छलच्छकलान्येव दिक्षु शोभन्त इत्यर्थः। अन्योपि चन्द्रतुल्यकिरीटो नृत्यंस्त्रुटितहारखण्डैः स्त्रीवृन्दं मण्डयति। 'मण्डयतीव' इति पाठे—उत्प्रेक्षा॥

कालः किरातः स्फुटपद्मकस्य
वधं व्यधाद्यस्य दिनद्विपस्य।
तस्येव संध्या रुचिरासृधारा
ताराश्च कुम्भस्थलमौक्तिकानि॥ ९॥

काल इति॥ हे प्रिये, कालः संध्यासमय एव किरातः, अथच—कृष्णवर्णो हिंसकत्वान्मृगयुरूपो वा कालो गिरिमहारण्यसंचारी शबरः स्फुटानि विकसितानि पद्मानि यस्मिन्। यद्वा—विकसितकमलं कं जलं यस्मिन्, अथच—प्रकटीभूतं शुण्डादण्डाग्रे प्रकाशमानं पद्मकं रक्तबिन्दुवृन्दं यस्मिंस्तादृशस्य दिनरूपस्य द्विपस्य वधं व्यधादकरोत्। तस्यैव हतस्य करिणो रुचिराः रम्या संध्यासृधारा रुधिरधारा। ताराश्च नक्षत्राणि विदारिततदीयकुम्भस्थलमौक्तिकानि। संध्यारागो रक्तधारा ताराश्च स्थूलमुक्ता इव शोभन्त इत्यर्थः। स्फुटपद्मकस्येति, बहुव्रीहौ कप्॥

संध्यासरागः ककुभो विभागः
शिवाविवाहे विभुनायमेव।
दिग्वाससा पूर्वमवैमि पुष्प-
सिन्दूरिकापर्वणि पर्यधायि॥ १०॥

संध्येति॥ विभुना प्रभुणा हरेण पूर्वं शिवायाः पार्वत्या विवाहावसरे संध्यया सरागो रक्तवर्णोऽयमेव ककुभः पश्चिमाशाया विभागः प्रदेशः पुष्पवर्णयुक्ता सिन्दूरिका रक्तवस्त्रं तत्संबन्धिनि तद्योगात् पुष्पसिन्दूरिकाख्ये पर्वण्युत्सवे पर्यधायि परिहितः। यतो दिग्वलयमेव वासो यस्य तेन रक्तवस्त्रपरिधानावसरेऽपि दिग्वाससा औचित्याद्रक्तदिग्भाग एव परिहित इत्यवैमि शङ्के। विवाहस्य चतुर्थे दिने प्रथमदिनपरिहितानि वस्त्राणि प्रक्षालनार्थं परित्यज्य पुष्पसिन्दूरिकाख्यपर्वणि कौसुम्भादिरक्तवस्त्राणि वधूवरेण परिधीयन्त इति वृद्धाचारः। तत्रेशस्य दिग्वसनत्वाद्रक्तपश्चिमभाग एवानेन परिहित इत्यर्थः। वर्णकभूतपुष्पस्थाने ताराः, सिन्दूरिकास्थाने संध्यासरागः पश्चिमदिग्भाग इति भावः॥

प्रातःसायंसंध्ययोः प्राचीप्रतीच्योर्द्वयोरपि तुल्यवर्णत्वात्सायंसंध्यारक्तपश्चिमदिश एव पुष्पसिन्दूरिकात्वं कथं वर्ण्यत इत्याक्षेपे तत्परिहारार्थं प्राच्या अपि तद्भावमाह—

सतीमुमामुद्वहता च पुष्प-
सिन्दूरिकार्थं वसने सुनेत्रे ।
दिशौ द्विसंधीमभि रागशोभे
दिग्वाससोभे किमलम्भिषाताम् ॥ ११ ॥

सतीमिति ॥ हे सुनेत्रे, सतीं दाक्षायणीमुमां पार्वतीं चोद्वहता परिणयता दिग्वाससा हरेण पूर्वोक्तपुष्पसिन्दूरिकार्थं द्विसंधीं अभि द्वे अपि प्रातःसायंसंध्ये लक्षीकृत्य द्वे प्राचीप्रतीच्यौ दिशावेव रागेण रक्तवर्णेन शोभा ययोस्ते, रक्तवर्णेन शोभेते इति वा, तादृशे रक्ते उभे द्वे वसने अलम्भिषातां प्राप्ते किम् । विवाहद्वये संध्याद्वयरक्तदिग्द्वयमेव दिग्वसनत्वाद्रक्तवस्त्रद्वयं शिवेन लब्धमित्यहं मन्य इत्यर्थः । शिवेन द्वे दिशावेव वस्त्रे द्वे संध्ये लक्षीकृत्य रागेण रञ्जकद्रव्येण कृत्वा ये शोभे कर्मभूते ते प्रापिते किम् । विवाहे वस्त्रं रञ्जनाय कस्यचित्करे समर्प्यते, तस्माच्छिवेन दिग्वलयरूपे मम द्वे वस्त्रे भवतीभ्यां रक्तशोभे प्रापणीये इति संध्याद्वयमाज्ञप्तं सद्दिग्द्वयं रक्तशोभं चकारेत्यर्थ इति वा । सुनेत्रीति पाठे—'असंयोगोपधात्' इति निषेधान्ङीप् चिन्त्यः । द्विसंधीम्, समाहारद्विगोरेकत्वे 'आबन्तो वा' इति स्त्रीत्वे च 'द्विगोः' इति ङीपि संध्याशब्दस्य तद्धितयदन्तत्वात् 'हलस्तद्धितस्य' इति यलोपः । 'अभिरभागे' इत्यभेः कर्मप्रवचनीयत्वात्तद्योगे द्वितीया । गत्यर्थत्वादणौ कर्तुर्णौ कर्मत्वं पक्षे ॥

आदाय दण्डं सकलासु दिक्षु
योऽयं परिभ्राम्यति भानुभिक्षुः ।
अब्धौ निमज्जन्निव तापसोऽयं
संध्याभ्रकाषायमधत्त सायम् ॥ १२ ॥

आदायेति ॥ योऽयं भानुरेव भिक्षुः परिव्राड् दण्डं पारिपार्श्विकमेव वैणवयष्टिमादाय सकलासु दिक्षु परिभ्राम्यति, सोऽयं तापसः परिव्राट् सायंकाले अब्धौ निमज्जन् पातालं प्रविशन्, अथ च—बहुजले जलाशयेन स्नानं कुर्वन् संध्यायामभ्रं गगनं तदेव कषायरक्तं वस्त्रमधत्तेव उपरि स्वस्योर्ध्वभागे, अथ च—उच्चतटस्योपरि दण्डस्योपरि वा निजमस्तकोपरि वा धृतवानिव । एवं यतिरपि बहुकालावस्थानस्य निषिद्धत्वादुक्तलक्षणः सन् परिभ्रमणे काषायं वस्त्रं धारयति । काषायमिव संध्या शोभत इत्यर्थः । 'माठरः पिङ्गलो दण्डः (चण्डांशोः पारिपार्श्विकाः)' 'भिक्षुः परिव्राट् कर्मन्दी' इत्यमरः । काषायम्, 'तेन रक्तम्–' इत्यण् ॥

अस्ताचलेऽस्मिन्निकषोपलाभे
संध्याकषोल्लेखपरीक्षितो यः ।
विक्रीय तं हेलिहिरण्यपिण्डं
तारावराटानियमादित द्यौः ॥ १३ ॥

अस्तेति ॥ यः सूर्यः अस्मिन्प्रतीच्यां वर्तमाने निकषोपलाभे सुवर्णपरीक्षापाषाणतुल्येऽस्ताचले संध्याराग एव कषोल्लेखः घर्षणोल्लेखस्तेन परीक्षितः । इयं द्यौस्तं हेलिं सूर्यमेव हिरण्यपिण्डं विक्रीय विनिमयेन कस्मैचिद्दत्त्वा तारारूपान्वराटान् कपर्दकानादित जग्राह । उत्तमं सुवर्णं रक्तपीतं भवति । तथाच रक्तपीतसुवर्णगोलकस्य निकषपरीक्षितसुवर्णरेखेव संध्या दृश्यते, ताराश्च वराटा इव दृश्यन्त इत्यर्थः । द्यौरिति लोकव्यवहारानभिज्ञत्वद्योतनार्थं स्त्रीलिङ्गनिर्देशः । स्त्रीहि सुवर्णं दत्त्वा मूर्खतया वराटकान्गृह्णाति, धूर्तेन वञ्च्यते च । वराटकव्यवहारे देशे सुवर्णमपि दत्त्वा वराटका एव गृह्यन्ते ॥

पचेलिमं दाडिममर्कबिम्ब-
मुत्तार्य संध्या त्वगिवोज्झितास्य ।
तारामयं बीजभुजादसीयं
कालेन निष्ठ्यूतमिवास्थियूथम् ॥ १४ ॥

पचेलिममिति ॥ दाडिमबीजभुजा कालेन रक्तमर्कबिम्बमेव पचेलिमं तरोरुपर्येव स्वयं पक्वं दाडिमं फलमुत्तार्य गगनतरोस्त्रोटयित्वा बीजग्रहणार्थं भित्त्वा वा संध्यारुचिस्त्वगिव अस्य दाडिमस्य पक्वत्वाद्रक्तकृत्तिरिवोज्झिता परित्यक्ता । तद्बीजभक्षणार्थमुपरितनबीजकोशवत्संध्या पृथक्कृता । तथा—बीजभक्षणानन्तरं तारामयं तारारूपमदसीयममुष्य दाडिमस्य अमीषां बीजानां वा, संबन्धि अस्थ्नां बीजमध्यस्थश्वेतकणानां यूथं वृन्दं निष्ठ्यूतमिवोद्गीर्णमिव बीजानि भक्षयित्वा गृहीतरसं तदन्तर्गतश्वेतकणवृन्दं पुनस्थूत्कृतमिव । नहि कालादन्यः सूर्यदाडिमं भक्षितुं समर्थः । अन्योपि दाडिममुत्तार्य तत्त्वचं परित्यज्य बीजान्यास्वाद्य गृहीतरसान्बीजकणांस्थूत्कृत्य त्यजति ॥

तारातति र्बीजमिवादमाद-
मियं निरष्ठेवि यदस्थियूथम् ।
तन्निष्कुलाकृत्य रविं त्वगेषा
संध्योज्झिता पाकिमदाडिमं वा ॥ १५ ॥

तारेति ॥ सामर्थ्यात्कालेन कर्त्रा रविमेव तत् पक्त्रिमं दाडिमं निष्कुलाकृत्य निर्गतबीजकुलं कृत्वा बीजरूपं सारं गृहीत्वा तदीया त्वगेवैषा संध्या उज्झिता । वाशब्दः संभावनायाम् । उज्झिता किमित्याशङ्क्याह—बीजानि आदमादं भक्षयित्वा भक्षयित्वा यस्य सूर्यरूपस्य पक्वदाडिमस्य संबन्धि अस्थियूथमिवेयं तारातति र्निरष्ठेवि निष्ठ्यूता । जग्ध्वा जग्ध्वा इत्यादमादम्, अदेराभीक्ष्ण्ये णमुल् द्विर्वचनं च । निरष्ठेवि, कर्मणि चिण् । निष्कुलाकृत्य, 'निष्कुलान्निष्कोषणे' इति डाच् । क्षेपकोऽयं श्लोकः ॥

संध्यावशेषे धृतताण्डवस्य
चण्डीपतेः पत्पतनाभिघातात् ।
कैलासशैलस्फटिकाश्मखण्डै-
रमण्डि पश्योत्पतयालुभिर्द्यौः ॥ १६ ॥

संध्येति ॥ हे प्रिये, संध्यावशेषे संध्यावन्दनान्ते धृतं ताण्डवनृत्यं येन तस्य चण्डीपतेः पदोश्चरणयोर्दृढं यत्पतनं तेनाभिघाताद्धेतोरुत्पतयालुभिरुत्पतनशीलैरुच्छलितैः कैलासशैलसंबन्धिस्फटिकाश्मनां खण्डैः सकलैर्द्यौरमण्डि अलंकृता पश्य । कै-

१ 'यदि 'द्विसंध्याम्' इत्ययमेव पाठः कवेरभिमतस्तर्हि सप्तम्येकवचनम्' इति सुखावबोधा ।

१ 'तम्' इति सुखावबोधासंमतः पाठः । २ 'पूर्वेण गतार्थत्वादित्यधिकः' इति सुखावबोधायाम् ।

लामस्फटिकखण्डा एव गगने तारारूपेण शोभन्ते। उत्पतयालुभिः, 'स्पृहिगृहि–' इत्यालुच् ॥

इत्थं ह्रिया वर्णनजन्मनेव
संध्यामपक्रान्तवतीं प्रतीत्य ।
तारातमोदन्तुरमन्तरिक्षं[1]
निरीक्षमाणः स पुनर्बभाषे ॥ १७ ॥

इत्थमिति ॥ स नलः पुनर्भैमीं बभाषे । किंभूतः—इत्थमुक्तप्रकारेण वर्णनजन्मना स्तुतिजातया ह्रियेवापक्रान्तवतीं निर्गतां संध्यां प्रतीत्य निश्चित्यान्तरिक्षं गगनं तारातमोभ्यां दन्तुरितं मिश्रितं निरीक्षमाणः । अन्योप्युत्तमो निजवर्णनजातलज्जयापक्रामति ॥

रामेषुमर्मव्रणनार्तिवेगा-
द्रत्नाकरः प्रागयमुत्पपात ।
ग्राहौघकिर्मीरितमीनकम्बु
नभो न भोः कामशरासनभ्रु ॥ १८ ॥

रामेति ॥ हे कामशरासनमेव भ्रुवौ यस्याः, भ्रूदर्शनमात्रेण कामोदयकारिणि भैमि, रामस्य जामदग्न्यस्य वा इषुणा मर्मणो व्रणनाद्भेदनाद्धेतोरुत्पन्ना आर्तिः पीडा तस्या वेगादाधिक्याद्धेतोर्निजस्थाने स्थातुमशक्तः सन् भीत्या रत्नाकर एवायं प्राक् तस्मिन्नवसरे उत्पपातोर्ध्वमगात् । नेदं नभः । यः पूर्वमुत्पतितः स श्यामजलः स्फुटरत्नगर्भो रत्नाकर एवायं न त्वेतन्नभ इत्यर्थः । कीदृशः—ग्राहाणां जलचारिणां जन्तूनां वौघस्तेन किर्मीरिता मिश्रिता मीनाः कम्बवः शङ्खाश्च यस्मिन् । नभस्तु ग्रहसंबन्धी ओघः शुक्रबृहस्पत्याख्यतारामहसमूहः ध्रुवमण्डलग्रहसंबन्धी समूहो वा तेन मिश्रितो मीनाख्यो राशिः कम्बुः शङ्खाकारविशाखानक्षत्रं च यस्मिन् । रघुनाथेन किल सेतुबन्धसमये शरेण समुद्रो भेत्तुमारब्ध इति तावन्मात्रेण पीडातिशयादुत्पतित इत्युच्यते । परशुरामेणापि निजवसत्यर्थं समुद्रो बाणेन परास्तः सन्नुत्पतितः । समुद्रजलस्यैवायं कालिमा, न तु गगनस्य । उत्पतितस्य समुद्रस्याधोदेशे स्थितानि रत्नग्राहादीनि अधःस्थितेन जनेन सुखेन द्रष्टुं शक्यन्ते । मकरकर्कटादयः साक्षान्मीनादय एव नतु राश्यादिभूताः, शिष्टाश्च ताराः सामुद्रिकमौक्तिकान्येव, नतु तारा इत्यादि ज्ञातव्यम् । शरासनभ्रूरिति उवङ्स्थानत्वान्नदीत्वाभावाद्ङस्वत्वाभावः । ह्रस्वपाठस्तु 'सहैकवंशप्रभवभ्र' इतिवत्समर्थनीयः । यद्वा शिष्टकविप्रयोगदर्शनाज्ज्ञातव्यः ॥

मोहाय देवाप्सरसां विमुक्ता-
स्ताराः शराः पुष्पशरेण शङ्के ।
पञ्चास्यवत्पञ्चशरस्य नाम्नि
प्रपञ्चवाची खलु पञ्चशब्दः ॥ १९ ॥

मोहायेति ॥ हे भैमि, पुष्पशरेण कामेन देवानामप्सरसां च मोहायान्योन्यमनुरागसंजननार्थं देवादीनामुपरि वर्तमानत्वाद्विमुक्ता ऊर्ध्वं क्षिप्ताः शुभ्रपुष्परूपाः शरा एव तारा इत्यहं शङ्के । ननु कामस्य पुष्पशरत्वेपि पञ्चबाणत्वात्तारागां बहुतरत्वात्कथं कामबाणत्वमित्याशङ्क्य समर्थयते—खलु यस्मात् पञ्चशरस्य नाम्नि पूर्वपदत्वेन वर्तमानः पञ्चशब्दः प्रपञ्चवाची प्रकृष्टः पञ्चो विस्तारस्तद्वाचकः, नतु संख्यावाचकः 'पचि विस्तारवचने' इति स्वार्थणिजन्ताद्धातोः पचाद्यचि पञ्चयन्ति विस्तृता भवन्ति पञ्चाः शरा यस्येति विग्रहः, नतु पञ्चसंख्याकाः शरा यस्येति । तस्मात्पुष्पबाणत्वं ताराणां युक्तमेवेत्यर्थः । कस्येव—पञ्चास्यवत् 'सिंहो मृगेन्द्रः पञ्चास्यः' इति सिंहाभिधायिनि पञ्चास्यशब्दे सिंहस्य पञ्चसंख्यमुखत्वाभावात् पञ्चयति विस्तृतं भवति पञ्चं विस्तृतमास्यं यस्यासौ पञ्चास्य इति व्युत्पत्त्या पञ्चशब्दो यथा विस्तारवाची तथेति । 'व्यासः प्रपञ्चो विस्तारः' इति हलायुधः ॥

नभोनदीकूलकुलायचक्री-
कुलस्य नक्तं विरहाकुलस्य ।
दृशोरपां सन्ति पृषन्ति ताराः
पतन्ति तत्संक्रमणानि धाराः ॥ २० ॥

नभ इति ॥ नक्तं विरहेणाकुलस्य पीडितस्य नभोनद्या मन्दाकिन्याः कूलमेव कुलायः स्थानं यस्य तस्य चक्रीकुलस्य चक्रवाकीसमूहस्य दृशोर्नेत्रयोरपामश्रुजलानां पृषन्ति ये बिन्दवः सन्ति त एव तारका अधःस्थितैर्जनैर्दृश्यन्ते । तथा—तासां ताराणां संक्रमणानि पुण्यक्षयवशाद्भूमिं प्रत्यागमनानि गलद्बाष्पजलानां धारा एव पतन्ति । दृशोः सन्ति चिरस्थितिमन्ति यानि बाष्पपृषन्ति तानि तारा इति वा । तत्संक्रमणानि स्थितताराप्रतिबिम्बभूतानि तत्तुल्यानि पतन्ति अधःपातीनि यानि पृषन्ति तानि धारा अश्रुप्रवाहाः । तासां ताराणां संक्रमणानि वीथयो मेघादिसंक्रान्तयो वा धारा अश्रूणां प्रवाहा इति वा । स्त्रियो हि विरहमसहमाना रुदन्ति । सन्ति पतन्तीति च तिङन्तम्, पृषद्विशेषणं वा ॥

अमूनि मन्येऽमरनिर्झरिण्या
यादांसि गोधा मकरः कुलीरः ।
तत्पूरखेलत्सुरभीतिदूरो
मग्नान्यधः स्पष्टमितः प्रतीमः ॥ २१ ॥

अमूनीति ॥ हे प्रिये, गोधाख्यास्तारा गोधा, मकरराशिसंबन्धिन्यस्तारा मकरः, कुलीरः कर्कराशिस्तत्संबन्धिन्यस्ताराः कुलीरः, अमूनि प्रत्यक्षदृश्यान्यमरनिर्झरिण्या मन्दाकिन्या यादांसि जलजन्तव एव इत्यहं मन्ये । गोधा मत्स्याः कर्कटका अपि जले वर्तन्ते उपरि च दृश्यन्ते । तस्मादेवनद्या यादांस्येवैतानीत्यर्थः । तर्ह्युपरि वर्तमानेन द्रष्टुं योग्याः, नत्वधः स्थितेनेत्यत आह—तस्या नाकनद्याः पूरे खेलन्तः क्रीडन्तः सुरास्तेभ्यः सकाशाद्भीत्या दूरं तलपर्यन्तं मग्नानि अतएव जलतलगामित्वादधोभागे इतो भूदेशादपि स्पष्टं सुखेन जानीमः । भूभागे स्थिता अपि जलतलगामित्वाद्गोधादियादांसि व्यक्तं पश्याम इत्यर्थः । गोधाकारं ध्रुवमण्डलं, गोधा ज्येष्ठा वा ।

स्मरस्य कम्बुः किमयं चकास्ति
दिवि त्रिलोकीजयवादनीयः ।

१ 'अन्तरीक्षमित्यपि पाठः 'अन्तरीक्षान्तरिक्षे च स्फटिकस्फुटिकावपि' इति स्वरभेदकोशप्रामाण्यादुचित एव' इति सुखावबोधा ।

कस्यापरस्योडुमयैः प्रमूनै-
र्वादित्रशक्तिर्घटते भटस्य ॥ २२ ॥

स्मरस्येति ॥ त्रिलोकीजये वादनीयो वादनार्हः स्मरस्य संबन्धी अयं प्रत्यक्षदृश्यो विशाखानक्षत्ररूपः कम्बुः शङ्खः दिवि चकास्ति किम् । उच्चतरप्रदेशे वादितं वाद्यं सर्वत्राकर्ण्यत इति गगने स्थापितो लोकत्रयविजयवादनार्हः कामस्यैव कम्बुः किमित्यर्थः । यस्मादपरस्य कस्य भटस्योडुमयैस्तारारूपैः प्रमूनैः कृत्वा वादित्रशक्तिर्वाद्यनिर्माणं घटतेऽपि । स्मरस्यैव धनुर्बाणानां पुष्परूपत्वदर्शनात्तदीयस्यैव वाद्यस्य पुष्परूपत्वसंभावनाया युक्तत्वात् ताराकुसुमरूपः कामशङ्ख एवायं गगने शोभते, न त्वन्यदीय इत्यर्थः ॥

किं योगिनीयं रजनी रतीशं
याजीजिवत्पद्ममभूमुहच्च ।
योगर्द्धिमस्या महतीमलग्न-
मिदं वदत्यम्बरचुम्बि कम्बु ॥ २३ ॥

किमिति ॥ येयं रजनी योगिनी स्त्रीपुंसयोगवती, अथच—शाक्तमन्त्रसिद्धा मारणोच्चाटनाद्यभिज्ञा स्त्री किम् । या रतीशं दिवा निर्जीवमिव निजसंनिधेः अजीजिवत् सजीवं चक्रे । पद्मम-भूमुहत् पद्मानि च समकोचयत् । रात्रौ हि स्त्रीपुंसयोगे काम उद्दीप्तो भवति, पद्मानि च संकुचन्ति । अलग्नं निराधारमम्बरचुम्बि आकाशवर्ति तारामात्रात्मकत्वादलग्नमरालिभूतं वा इदं प्रत्यक्षदृश्यं कम्बु तारारूपः शङ्खोऽस्या रात्रियोगिन्या महतीं योगर्द्धिं योगसमृद्धिं वदति । दिवादर्शनाभावादिदानीं दृश्यमानः शङ्खो रात्रिर्जातेति कथयति । योगशक्तिं विना निराधारं वस्तु कथं स्थापयेत । योगिन्यपि हि मृतमपि कंचिज्जीवयति, कंचिच्च मोहयति मूर्च्छां प्रापयति भ्रान्तं करोति वा तस्माद्योगिनी किमित्युत्प्रेक्षा । कम्बुशब्दस्य नपुंसकत्वमप्यस्तीति पूर्वमेवोक्तं स्मर्तव्यम् । अजीजिवत्, अभूमुहदिति 'णौ चङि–' इत्युपधाह्रस्वः ॥

प्रबोधकालेऽहनि बाधितानि
ताराः खपुष्पाणि निदर्शयन्ती ।
निशा ह शून्याध्वनि योगिनीयं
मृषा जगद्दृष्टमपि स्फुटाभम् ॥ २४ ॥

प्रबोधेति ॥ हे प्रिये, प्रबोधकाले जागरणसमये, अथ च—सम्यग्ज्ञानोत्पत्तिसमये, अहनि दिने बाधितानि सूर्यदीप्तिध्वस्तकान्तीनि, अथ च—भ्रान्तिकारणनाशान्निरुपपत्तीनि, तारा नक्षत्ररूपाणि खपुष्पाणि गगनसंबन्धीनि कुसुमानि नितरां दर्शयन्ती, अथ च—दृष्टान्तीकुर्वती, शून्याध्वनि बौद्धादिशून्यवादिदर्शने विषये योगिनी तद्दर्शनरहस्यं जानती काचित्प्रव्रजितेवेयं निशा स्फुटमाभाति तादृशं दृष्टमपि प्रत्यक्षेण प्रतीयमानमपि स्थावरजङ्गमात्मकं सकलं जगन्मृषामत्यमाह वृत्ते । बौद्धादिदर्शने हि ज्ञानस्यैव बहिर्घटाद्याकारत्वाज्ज्ञानातिरिक्तं सर्वं मिथ्येति तज्ज्ञा योगिन्यपि प्रपञ्चो मिथ्येति दर्शयति, तथेयमपि रात्रिरहन्यदृश्यान्यपि पुष्पतुल्यानि नक्षत्राणि निजयोगाद्गगने दर्शयतीति भावः । निदर्शनं करोतीवेति प्रतीयमानोत्प्रेक्षा ॥

एणः स्मरेणाङ्कमयः सपत्रा-
कृतो भवद्भ्रूयुगधन्वना यः ।
मुखे तवेन्दौ लसता स तारा
पुष्पालिबाणानुगतो गतोऽयम् ॥ २५ ॥

एण इति ॥ हे भैमि, तव मुख एवेन्दावाह्लादकत्वादिगुणयोगाच्चन्द्रे लसता प्रकाशमानेन, तथा—भवद्भ्रूयुगमेव धनुर्यस्य तेन स्मरेण तव मुखेन्दौ 'विमतो मृगवांश्चन्द्रत्वात्संप्रतिपन्नवत्' इत्यनुमानप्रसिद्धो योऽङ्कमयः कलङ्करूप एणो मृगः सपत्राकृतः । मुखे तच्चापदर्शनाज्जटरावस्थितपत्रस्यैव बाणस्यापरपार्श्वे निर्गमनं यथा भवति तथा व्यथितः स एव मृगस्तारापुष्पालिर्नक्षत्ररूपपुष्पपङ्क्तिस्तल्लक्षणो बाणस्तेनानुगतः सन् सहित एव पलाय्य गतोऽयं गगने दृश्यते किम् । चन्द्रे मृगेण भाव्यम्, स चात्र नास्ति, सचापः कामश्च मुखे लसति, गगने मृगशिरो नक्षत्रं मृगाख्यं बाणाकारपुष्पतुल्यतारानुगतं दृश्यते । तर्हि कामेन विद्धोऽन्तर्गतपत्रपार्श्वद्वारिनिर्गतबाणसहितो व्यथितः पलाय्य गतः स एवायं मृगो दृश्यते किमिति प्रतीयमानोत्प्रेक्षा । 'सपत्रनिष्पत्रादतिव्यथने' इति डाच् ॥

लोकाश्रयो मण्डपमादिसृष्टि-
ब्रह्माण्डमाभात्यनुकाष्ठमस्य ।
स्वकान्तिरेणूत्करवान्तिमन्ति
घुणव्रणद्वारनिभानि भानि ॥ २६ ॥

लोकेति ॥ हे भैमि, ब्रह्माण्डमादौ सर्वस्मादपि पूर्वं सृष्टिर्निर्माणं यस्य, अथच—चिरकालनिर्मितं पुराणम् मण्डपमिति आभाति तदिदं शोभत इत्यर्थः । यतो—लोकानां त्रयाणामपि आश्रयः ब्रह्माण्डाधारत्वाज्जगताम् । मण्डपोऽपि लोकानामाश्रयः, तच्छायानिवासित्वाल्लोकानाम् । आश्रयनामत्वाच्च । अत एव—अस्य ब्रह्माण्डमण्डपस्य अनुकाष्ठं दिशि दिशि एतत्संबन्धिनीषु सर्वासु दिक्षु, अथच—एतत्संबन्धीनि काष्ठानि दारूणि लक्ष्यीकृत्य तेषु भानि नक्षत्राणि स्वकान्तिरूपस्योत्थानरेणूत्करस्य संबन्धिनी वर्त्मन्तरुद्गारस्तद्वदन्ति घुणाख्यकीटनिर्मितो व्रणश्छिद्रं तस्य द्वारं मुखं तन्निभानि तत्तुल्यानि घुणोत्कीर्णदारुजोयुक्तानि दारुच्छिद्रमुखानीव दृश्यन्त इत्यर्थः । जनाश्रयनामा मण्डपोऽत्यतिजीर्णो यदा भवति तदा तदीयकाष्ठेषु घुणाः पतन्ति घुणोत्कीर्णगलद्रजोयुक्तानि घुणकृतच्छिद्रमुखानि वृत्तानि श्वेतानि च दृश्यन्ते, तानीव भानि भान्तीति भावः । 'मण्डपोऽस्त्री जनाश्रयः' इत्यमरः । अनुकाष्ठम्, वीप्सायामव्ययीभावः, पक्षान्तरे विभक्त्यर्थे ॥

इदानीं सर्वदिग्व्यापिनमोवर्णनं प्राच्यादिक्रमेणोपक्रमते—

शचीमपत्न्यां दिशि पश्य भैमी
शङ्केभदानद्रवनिर्झरस्य ।
पोष्यते वामरसेतुनाशा-
दुच्छ्वासलः पूर इवान्धकारः ॥ २७ ॥

शचीति ॥ हे भैमि, अन्धकारः शच्याः सपत्नी दिक् प्राची

१ 'वादित्रसृष्टिः' इति सुखावबोधासमतः पाठः ।

तस्या वासररूपस्य सेतोः सूर्यप्रभामर्यादाया नाशात् उच्छृङ्खलो निरर्गलः शक्रेभस्य दानद्रवो दानोदकं तस्य निर्झरः प्रवाहस्तस्य श्यामः पूर इव पोष्यते भृशं प्रसरति । प्राच्यां व्याप्नोतीत्यर्थः । त्वं पश्य । प्राच्यामेव चैरावतदानजलप्रवाहपूरसंभवः । जलपूरोपि यन्धापगमादप्रतिहतप्रसरः सन्नतितरां प्रसरति, 'प्रुङ् सर्पणे' इत्यस्मान्नृशार्थे यङ् द्विर्वचनम् ॥

दक्षिणदिग्व्यापि तमो वर्णयति—

रामालिरोमावलिदिग्विगाहि
ध्वान्तायते वाहनमन्तकस्य ।
यद्वीक्ष्य दूरादिव विभ्यतः स्वा-
नश्वान्गृहीत्वापसृतो विवस्वान् ॥ २८ ॥

रामेति ॥ श्रीरामस्यालिः सेतुः सेतुबन्ध एव श्यामत्वाद्रोमावलिर्यस्यास्तस्या दक्षिणस्या दिशो विगाहि नितरां व्यापकम् अन्तकस्य दिक्पतित्वाद्दक्षिणदिक्स्थं तद्वाहनं महिष एव ध्वान्तायते कज्जलनीलोऽन्धकार इवाचरति । विवस्वान् सूर्यः यद्यमवाहनं दूराद्वीक्ष्य सहजाश्वमहिषवैरस्मरणाद्विभ्यतः सभयान् स्वानश्वान् गृहीत्वापसृतः पलायित इव दक्षिणदिशि तिमिरं यममहिषवच्छोभते इत्यर्थः । अन्तकपदेन तद्वाहनस्य दारुणत्वं सूचितम्, अत एव ततोप्यश्वानां भयं युक्तम् । ध्वान्तायते 'उपमानादाचारे' 'कर्तुः क्यङ्-' इति क्यङन्तात्तङ् । 'सेतुरालौ स्त्रियां पुमान्' इत्यमरः ॥

प्रतीचीव्यापितमो वर्णयति—

पक्वं महाकालफलं किलासी-
त्प्रत्यग्गिरेः सानुनि भानुबिम्बम् ।
भिन्नस्य तस्यैव दृषन्निपाता-
द्बीजानि जानामितमां तमांसि ॥ २९ ॥

पक्वमिति ॥ भानुबिम्बं प्रत्यग्गिरेः प्रतीच्यां वर्तमानस्यास्ताचलस्य सानुनि कालवशात्पक्वं महाकालस्येन्द्रवारुण्याः फलमासीत् किलाहं मन्य इत्यर्थः । तथा—अहमतिपक्वत्वाद्वृन्तश्लथत्वादुच्चतरप्रदेशादधस्ताद् दृषदि शिलायां निपातात्तदभिघाताद्भेतोर्भिन्नस्य विदीर्णस्य तस्य भानुबिम्बरूपस्य महाकालफलस्य कृष्णतमानि बीजान्येव तमांसीति जानामितमां नितरां मन्ये । पर्वतादिकठिनभूमसृणं जम्बीरवर्तुलं पक्वं सदतिरक्तं कृष्णबीजं महाकालफलं गृहोपसर्गनिवारणार्थं गृहद्वारे बृद्धैर्बध्यते । अस्तमयसमयसंबन्धात्परिणतकालं रक्तं महतः कालस्य फलभूतं च भानुबिम्बं महाकालफलमिव, तमांसि च विदीर्णस्य तस्य कृष्णतमानि बीजानीव प्रसरन्तीत्यर्थः । अन्यदिगपेक्षया प्रतीच्यां सायंसमये सूर्यसंध्यासंबन्धिनः प्रकाशस्यासन्नत्वादल्पान्धकारसूचनार्थं तमसां बीजत्वेन निरूपणम् ॥

उदीचीव्यापि तमो वर्णयति—

पत्युर्गिरीणामयशः सुमेरु-
[1]प्रदक्षिणाद्भास्वदनादृतस्य ।
दिशस्तमश्चैत्ररथान्यनाम-
पत्रच्छटाया मृगनाभिशोभि ॥ ३० ॥

पत्युरिति ॥ चैत्ररथं कुबेरवनं तदेवान्यन्नाम यस्यास्तादृशी पत्रच्छटा पत्रवल्ली यस्याश्चैत्ररथाख्यवनरूपपत्रवल्लीकाया उत्तरस्या दिशो मृगनाभिः पत्रवल्लिरचनासाधनभूता कस्तूरी तद्वच्छोभते एवंशीलं कृष्णतमं तमो गिरीणां पत्युर्हिमाचलस्यायश एव । यतः—सुमेरोः प्रदक्षिणीकरणाद्भास्वता सूर्येणादृतस्यावज्ञातस्य । हिमाद्रिर्यद्यपि गिरीणां पतिः, तथापि सूर्यानादृतत्वाद्धीन एव, मेरुरेव महान् । 'अस्योद्यानं चैत्ररथम्' इत्यमरः ॥

ऊर्ध्वदिग्व्यापितमो वर्णयति—

ऊर्ध्वं धृतं व्योम सहस्ररश्मे-
र्दिवा सहस्रेण करैरिवासीत् ।
पतत्तदेवांशुमता विनेदं
नेदिष्ठतामेति कुतस्तमिस्रम् ॥ ३१ ॥

ऊर्ध्वमिति ॥ तमालश्यामलं यद्व्योम दिवा सहस्ररश्मेः सहस्रसंख्यैः करैः किरणैः, अथ च—हस्तैः ऊर्ध्वं दूरोच्चप्रदेशे धृतमिवासीत् । तन्नभ एवेदं तमालश्यामलमंशुमता विना सायंसमये सूर्यविनाशाद् धारकेण तेन विनाधःपतत्सन् नेदिष्ठतामनितमां नैकट्यमेति । तमिस्रं कुतः कस्मादागतम्, अपितु तिमिरं नाम किमपि नास्ति, किंतु निकटीभवद्गगनमेव तमिस्रमित्यर्थः । पतद्व्योमैव तमिस्रं कुतो भूमौ निकटतामेति ननु तदतिरिक्तं तमोस्तीति वा अन्यदपि प(त)त्स्वचित्करास्याभ्यामूर्ध्वं धार्यते, तदभावेऽधः पतत्येव । नेदिष्ठताम्, अतिशायने इष्टनि 'अन्तिकबाढयोः-' इति नेदादेशः । कुतः पक्षे सार्वविभक्तिकस्तसिः ॥

अधोदिग्व्यापि तमो वर्णयति—

ऊर्ध्वार्पितन्युब्जकटाहकल्पे
व्योम्नि दीपेन दिनाधिपेन ।
न्यधायि तद्भूमिलदुरुत्वं
भूमौ तमः कज्जलमस्खलत्किम् ॥ ३२ ॥

ऊर्ध्वेति ॥ सामर्थ्याद्दिधिना ऊर्ध्वं सूर्यदीपस्यैवोपरि भागे अर्पितो न्युब्जः कज्जलधारणार्थमधोमुखो महान् कटाहः कर्परं तत्कल्पे तत्तुल्ये कृष्णतमे व्योम्नि अधिकरणे प्रकाशकारिणा कज्जलधारणार्थेन दिनाधिपेनैव दीपेन करणेन यत्कज्जलं न्यधायि न्यस्तम्, तत्कज्जलमेव तमो भूम्ना क्रमसंजातबाहुल्येन कृत्वा मिलद् युक्तं पतनाख्यकर्मकारणं गुरुत्वं यस्य तादृशं सद्भूमावस्खलत् किम् । अतिभारेण पतितं किम्, गुरुत्वाद्धि पतनं युक्तम् तत्कज्जलमेव भूमौ पतितं किम्, अपितु तमो नाम न किंचिदित्यर्थ इति वा । कज्जलमपि कर्परे धृतं क्रमेण बहु भवद्गुरुत्वादधः पतति । 'कटाहः कर्परे तथा' इति निघण्टुः । ईषदसमाप्तौ कल्पप् ॥

ध्वान्तैणनाभ्या शितिनाम्बरेण
दिशः शरैः सूनशरस्य तारैः

---

१ 'प्रदक्षिण करोतीति ण्यन्ताद्भावे घञ्' इति सुखावबोधा ।

१ 'यदुष्णरश्मेः' इति सुखावबोधासंमतः पाठः ।

मन्दाक्षलक्ष्या निशि मामनिन्दौ
सेर्ष्या भवायान्त्यभिसारिकाभाः ॥ ३३ ॥

ध्वान्तेति ॥ ध्वान्तेनैवैणनाभ्या कस्तूर्या । तथा शितिना नीलेनाम्बरेण गगनेन, अथ च—वस्त्रेण, यद्वा—ध्वान्तैणनाभ्या कृत्वा नीलेन गगनेनोपलक्षिताः । तथा—निशितस्वान्पुष्पतुल्य-रूपत्वाच्चोज्वलैः तारैर्नेक्षत्रैरेव सूनशरस्य कामस्य शरैरुपलक्षिताः, अथ च—तारैरुज्वलैः पुष्पैरुपलक्षिताः । तथा प्रकाशाभावान्मन्दाक्षैर्मन्दनयनैर्नरैर्लक्ष्या लक्षणीयाः, अथ च—मन्दाक्षस्य लज्जाया विषयभूताः सलज्जाः । अत एवाभिसारिकाभाः स्वैरिणीतुल्या दिशोऽनिन्दौ चन्द्ररहितायामनुदितचन्द्रत्वाच्छ्यामायां निशि मामायान्ति प्रत्यागच्छन्ति । तस्मात्सपत्नीभ्रान्त्या त्वं सेर्ष्या भव । अभिसारिका अपि शुभ्रायां रात्रौ शुभ्रवस्त्राद्याभरणाः, कृष्णायां च रात्रौ कृष्णवस्त्राद्याभरणाः समायान्ति, ता अपि कस्तूरीकृताङ्गरागा नीलवसनाः प्रच्छन्नधृतपुष्पाः कामबाणपीडिताः सलज्जाः सत्यः कामुकं प्रति समायान्ति, तदीयनायिका च सेर्ष्या भवति तथा दिशोपीत्यर्थः । सर्वा अपि दिश एकत्र मिलिता इति प्रतीतिः । तिर्यग्व्यापि तमो वर्णितमनेन । 'कान्तार्थिनी तु या याति संकेतं साभिसारिका' इति । 'मन्दाक्षमन्दाः' इति पाठे मन्दनयनानामल्पदृश्यात्तमोबाहुल्यात् । अथ च—तमोबाहुल्यान्मन्दाक्ष्यः, अतएव मन्दगमना इत्यर्थः । तारशब्दः पूर्ववत् । मन्दाक्षेति पुंवद्भावः ॥

भास्वन्मयीं मीलयतो दृशं द्रा-
ङ्मिथोमिलच्चञ्चलमादिपुंसः ।
आचक्ष्महे तन्वि तमांसि पक्ष्म
श्यामत्वलक्ष्मीविजितेन्दुलक्ष्म ॥ ३४ ॥

भास्वदिति ॥ हे तन्वि कृशाङ्गि, भास्वन्मयीं रविरूपां दक्षिणां दृशमस्तमयव्याजेन द्राक् शीघ्रं मीलयतः संकोचयतः आदिपुंसः श्रीविष्णोर्मिथोऽन्योन्यं मिलन्तौ द्वावप्यञ्चलावूर्ध्वाधःपुटे यस्य निमीलनवशादन्योन्यसंलग्नपुटत्वान्निबिडरोमकम्, अत एव श्यामत्वलक्ष्म्या विजितं नितरां पराभूतमिन्दुलक्ष्म येन तादृशं पक्ष्म नेत्रसंबन्ध्यूर्ध्वाधः पुटपक्ष्मीभूतरोमाण्येव तमांसि वयमाचक्ष्महे ब्रूमः, नतु ततोन्यानि तमांसीत्यर्थः । तिमिरव्याप्तत्वात्किमपि न दृश्यत इति भावः । पक्ष्मेति जात्येकवचनम् ॥

विवस्वतानायिपतेव मिश्राः
स्वगोसहस्रेण समं जनानाम् ।
गावोऽपि नेत्रापरनामधेया-
स्तेनेदमान्ध्यं खलु नान्धकारैः ॥ ३५ ॥

विवस्वतेति ॥ विवस्वता नेत्रमित्यपरं नामधेयं यासां ताश्चक्षूरूपा जनानां गावोपि स्वस्य गवां किरणानां सहस्रेण समं सह मिश्रा दिने मिलिताः सत्योऽनायिपतेव नीता इव । यस्मात्तेन खलु तेनैवेदमान्ध्यं प्रकाशाभावात्तेत्रापगमाच्च रूपाग्रहणं, नत्वन्धकारैः कृत्वेदमान्ध्यम् । तमोवशात्किमपि न दृश्यत इति भावः । अन्येनापि गोपालेन स्वगोसहस्रेण मिश्रिताः परेषामपि गावो नीयन्त इति ॥

ध्वान्तस्य वामोरु विचारणायां
वैशेषिकं चारु मतं मतं मे ।
औलूकमाहुः खलु दर्शनं त-
त्क्षमं तमस्तत्त्वनिरूपणाय ॥ ३६ ॥

ध्वान्तस्येति ॥ हे वामोरु, अतिसुन्दरोरु, ध्वान्तस्य विचारणायां तमःस्वरूपनिरूपणविषये वैशेषिकं मतं पदार्थसाधर्म्यवैधर्म्यनिरूपणात्मकं काणादं दर्शनं चारु सदुपपत्तिकं, नान्यदिति मे मतं संमतम् । खलु यस्मात्कारणात् संप्रदायविदस्तद्दर्शनं वैशेषिकं शास्त्रं औलूकमाहुर्वदन्ति । अतएव तमस्तत्त्वनिरूपणायानारोपितस्वरूपनिरूपणाय क्षमं समर्थम् । उलूकस्य घूकस्य संबन्धि दृश्यतेऽनेनेति दर्शनं नेत्रं हि तमस्यपि घटपटादिस्वरूपाणां याथात्म्यदर्शनसमर्थं भवति । वैशेषिकमप्युलूकापरनाम्ना कणादमुनिना प्रोक्तमित्यौलूकं दर्शनम् । ततश्चैतदपि तमस्तत्त्वनिरूपणाय समर्थमिति युक्तमित्यर्थ इति शब्दच्छलम् । वैशेषिकदर्शने च किमिदं तमो भावरूपम् अभावरूपं वेति संदेहे 'भासामभाव एव तमः' इति सूत्राविरोधेन व्योमशिवाचार्यादयः पदार्थवैधर्म्येणाभावरूपमेव तमो न्यरूपयन् । श्रीधराचार्यास्त्वारोपितं भूरूपमेव तम इति निर्वर्ण्य भासामभावे सत्येव तमःप्रतीतेर्भाभाव एव तम इत्युक्तमिति सूत्रविरोधं पर्यहार्षुः । एतदसहमाना श्रीमदुदयनाचार्यादयः पुनर्भासामभावमेव तमस्त्वेन निरणैषुः । यस्मात्तदौलूकं दर्शनं वैशेषिकादिशास्त्रं तमस्तत्त्वनिरूपणायां क्षमं समर्थमाहुरिति यान्वयः । महत्यन्धकारे सत्यपि घटादिपदार्थजातं को वा पश्यतीति ध्वान्तनिरूपणायां क्रियमाणायां घूकनेत्रमेव चारु सर्वेभ्योऽधिकमिति मम मतं मतं पुनः पुनः संमतमित्यर्थः । उलूकनेत्रमेव महान्धकारे घटादि विलोकयितुं समर्थम् । अन्यदीयनेत्राणां स्वान्ध्यमेव जातमिति भावः । यतो वैशेषिकं घटादीन्विशेषान्वेत्ति तादृशम् । महान्धकारे घूकनेत्रमेव घटादीन्भेदेन जानाति, नान्यदीयं नेत्रम्, तस्मात्तदेव चार्विति । तत्र वृद्धसंमत्यर्थमुत्तरार्धम् । उलूकवृत्त्या कणानत्तीति कणादः, तस्य कणादस्यैवोलूक इति नाम तेन प्रोक्तत्वादौलूकम् । 'वामं सव्ये प्रतीपे च द्रविणे चातिसुन्दरे' इति विश्वः । वामोरु, 'संहितशफ-' इत्यादिनोङि नदीत्वादूङ्त्वम् । औलूकम्, 'तेन प्रोक्तम्' इत्यण । पक्षे 'तस्येदम्' इति ॥

म्लानिस्पृशः स्पर्शनिषेधभूमेः
मेयं त्रिशङ्कोरिव संपदस्य ।
न किंचिदन्यत्प्रति कौशिकीये
दृशौ विहाय प्रियमातनोति ॥ ३७ ॥

म्लानीति ॥ म्लानिस्पृशः कालिमस्पर्शिनः श्यामस्य अथच-चण्डालत्वान्मालिन्ययुक्तस्य निःश्वाकस्य । तथा—अभावरूपत्वात्स्पर्शगुणनिषेधस्य भूमेः स्थानस्य, अथ च—चण्डालत्वादेवास्पृश्यस्यास्य तमसः राज्ञस्त्रिशङ्कोरिव मेयं प्रमिद्धा प्रत्यक्षेण गृह्यमाणा च संपत् बाहुल्येन स्वरूपलाभः; अथच—राज्यसमृद्धिः कौशिकीये औलूके, अथच—वैश्वामित्रे दृशौ नेत्रे विहायान्यत्किंचित्प्रति अपरं किमपि वस्तु लक्षीकृत्य प्रियं हितं नातनोति

करोति किंतु तदीये एव नेत्रे लक्ष्यीकृत्य हितं करोति । अन्यत्प्रति किंचिदल्पमपि प्रियं नातनोतीति वा । अन्धकारे ह्युलूकनेत्रे एव पदार्थान्पश्यत इति तत्संपत्तयोः प्रिया । त्रिशङ्कोश्च संपद्विश्वामित्रस्यैव नेत्रयोः प्रिया, नान्यस्य 'एतदुपाख्यानं रामायणादौ प्रसिद्धम् । कौशिकीये, 'वृद्धाच्छः' ॥

मूर्धाभिषिक्तः खलु यो ग्रहाणां
तद्भासमास्कन्दतऋक्षशोभम् ।
दिवान्धकारं स्फुटलब्धरूप-
मालोकतालोकमुलूकलोकः ॥ ३८ ॥

मूर्धेति ॥ यो रविः नवानां ग्रहाणां मध्ये खलु निश्चितं मूर्धाभिषिक्तो राजा । उलूकानां लोकः सङ्घस्तस्य रवेर्भया दीप्त्या समास्कन्दिता नितरां पराभूता ऋक्षशोभा नक्षत्रकान्तिर्यस्मिंस्तत् । तथा—स्फुटमुपलब्धानि अन्येन जनेन दृष्टानि घटादिस्वरूपाणि यस्मिन्तादृशमपि दिवा कर्मीभूतं दिनमन्धकारमेवालोकत । दिने तस्य दर्शनाशक्तेर्दिनमन्धकाररूपत्वेनैव मेने इत्यर्थः । तथा—व्यक्तं लब्धानि घटादिरूपाणि यत्र तादृशमन्धकारमेवालोकमपश्यद्दर्शनसहकारिप्रकाशरूपत्वेनैव मेने । अर्थाद्रात्राविति यावत् । अन्धकारं स्फुटलब्धरूपमित्यावृत्त्या योज्यम् । तेन तमसा विपरीतदृश एव भवन्तीति व्यज्यते । एवंविधमन्धकारं च स्फुटमतिप्रसिद्धं शुक्लभास्वरात्मकं लब्धं रूपं येन तादृशमालोकमेवापश्यत् । कृष्णरूपमपि तमः शुक्लभास्वरालोकत्वेनापश्यदिति विरुद्धमित्यर्थः । अथ च—यो ग्रहराजः सूर्यः, आक्रान्तनक्षत्रलक्ष्मीकां तद्भासं सूर्यदीप्तिमेवायमुलूकलोको दिवा दिनेऽन्धकारमपश्यत् । रात्रौ चान्धकारमालोकमपश्यत् । दिने सूर्यालोक एव तमः, रात्रौ च तम एव सूर्यालोक इति ददर्शेत्यर्थः । कीदृशीं तद्भासम्—कीदृशमन्धकारम्—स्फुटमुपलब्धानि घटादिरूपाणि यस्यामन्यजनेन तादृशीम्, स्फुटं संजातस्वरूपलाभं चेत्यन्धकारस्य नपुंसकत्वान्नपुंसकैकशेषैकवद्भावेन वा व्याख्येयम् । सूर्यदीप्त्याऽसमास्कन्दिताऽपराभूता नक्षत्रलक्ष्मीर्यत्र तमन्धकारविशेषणं वा । रात्रौ सूर्यदीप्तेरभावादतिरस्कृतनक्षत्रशोभमित्यर्थः । सूर्यदीप्तेरेव समास्कन्दनसामर्थ्यात्तमसैव रात्रौ यत्तिरस्करणं तेन नक्षत्रशोभा यस्मिन्निति वा इत्यादिव्याख्यानानि ज्ञातव्यानि । 'लक्ष्मीम्' इति पाठे—नदीत्वेपि समासान्तविधेरनित्यत्वात्कबभावः । 'मूर्धाभिषिक्तो राजन्यः' 'अन्धकारोऽस्त्रियाम्' इत्यमरः ॥

दिने मम द्वेषिणि कीदृगेषां
प्रचार इत्याकलनाय चारीः ।
छाया विधाय प्रतिवस्तुलग्नाः
प्रावेशयत्प्रष्टुमिवान्धकारः ॥ ३९ ॥

दिन इति ॥ अन्धकार इत्याकलनाय सामस्त्येन ज्ञानार्थं प्रतिवस्तुलग्नाः पदार्थमात्रसंबद्धाः प्रतिच्छाया एव चारीर्गूढार्थवेदिकाश्चारनारीः विधाय चारपदं ताभ्यो दत्त्वा दिनं प्रति संप्रेष्य समागतास्तास्तत्रत्यवृत्तान्तं प्रष्टुमिव पुनः प्रावेशयत् । निजनैकट्यमित्यर्थात् । इति किम्—ममान्धकारस्य द्वेषिणि मामसहमाने दिने विषये एषां वस्तूनां कीदृक् प्रचारो विहरणम् स्नेहादिव्यवहारश्चेति । दिवा प्रतिपदार्थसंबद्धाइच्छाया एव रात्रौ समागत्य मिलिता निजस्वामिनमन्धकारं प्राविशन् । रात्रौ हि प्रकाशाभावे छाया अन्धकारेण सहैकीभवतीति तत्संबन्धादेव महानन्धकारः प्रतीयत इति भावः । एतेन प्रतिच्छायापि तम एवेति वर्णितम् । अन्योपि रात्रौ लोकस्थितं ज्ञातुकामः स्त्रीणां सर्वत्र प्रवेष्टुं शक्यत्वाच्चारनारीः संप्रेष्य तत्रत्यं वृत्तान्तं विचार्य समागतास्ताः प्रष्टुमात्मसविधं प्रवेशयति । छाया एव चारीः प्रतिवस्तुलग्ना विधायेति वा । चारपदं दत्त्वा यदिनं प्रत्येव प्रेषयामास । अत एव ता दिने प्रतिवस्तुलग्ना दृश्यन्त इति वा । चारीः, पुंयोगान्ङीप् ॥

इदानीं चन्द्रोदयं वर्णयितुमुपक्रमते—

ध्वान्तस्य तेन क्रियमाणयेत्थं
द्विपः शशी वर्णनयाऽथ रुष्टः ।
उद्यन्नुपाश्लोकि जपारुणश्री-
र्नराधिपेनानुनयेच्छयेव ॥ ४० ॥

ध्वान्तस्येति ॥ तेन नराधिपेन नलेन इत्थं क्रियमाणया द्विपः शत्रुभूतस्य ध्वान्तस्य वर्णनया रुष्टः क्रुद्ध इव जपाकुसुमवदरुणा श्रीर्यस्य स उद्यन्नुदयं प्राप्नुवन् शशी तेनैव राज्ञाथानन्तरमनुनयेच्छयेव प्रसादनवाञ्छयेवोपाश्लोकि श्लोकैः स्तोतुमारम्भि । अन्योपि वैरिवर्णनया रुष्टः सन्नरुणो भवति तत्परिहारार्थमुदितः सन् वर्णकेन प्रसादनार्थं स्तूयते । प्रतीयमानोत्प्रेक्षा । इवशब्दस्योभयत्र योजना वा । उपाश्लोकि, 'सत्या–' इति णिजन्तात्कर्मणि चिण् ॥

पश्यावृतोप्येष निमेषमद्रे-
रधित्यकाभूमितिरस्करिण्या ।
प्रवर्षति प्रेयसि चन्द्रिकाभि-
श्चकोरचञ्चूचुलुकप्रमिन्दुः ॥ ४१ ॥

पश्येति ॥ हे प्रेयसि, प्राणप्रिये एष इन्दुश्चन्द्रिकाभिश्चकोराणां चन्द्रिकास्रवदमृतपायिनां पक्षिणां चञ्चव एव चुलुकास्तान्पूरयित्वा प्रकर्षेण वर्षति सुधामित्यर्थात् । यावता चकोरचञ्चुपूरणं भवति तावत्प्रमाणं वर्षतीत्यर्थः । त्वं पश्य । किंभूतः—अद्रेरुदयाचलस्याधित्यकाभूम्योर्ध्वशिखरेणैव तिरस्करिण्या जवनिकया निमेषलक्षणमत्यल्पकालमावृतोऽपि सन् । संपूर्णानुदितोऽपि प्रथमचन्द्रिकाभिरेव चकोराणामानन्दं करोति, किं पुनरुदितः सन्निति भावः । अन्योप्युपकारी दूरस्थोऽप्युदयोन्मुखोऽन्येषामुपकरोति । चुलुकप्रम्, 'वर्षप्रमाणे–' इत्यादिना पूरेर्णमुल् ऊकारलोपश्च ॥

ध्वान्ते द्रुमान्तानभिसारिकास्त्वं
शङ्कस्व सङ्केतनिकेतमाप्ताः ।
छायाच्छलादुज्झितनीलचेला
ज्योत्स्नानुकूलैश्चरिता दुकूलैः ॥ ४२ ॥

१ 'ऋक्षलक्ष्मि' इत्यत्र (पाठे) दिवाविशेषणत्वपक्षे 'क्रियाव्ययविशेषणानां स्त्रीत्वमेकवचनान्तत्वं च वाच्यम्' इति स्त्रीत्वे ह्रस्वः' इति सुखावबोधा ।

१ 'वर्णनयेव' इत्यपि पाठः–इति सुखावबोधा ।

ध्वान्त इति ॥ हे प्रिये, त्वं चन्द्रोदयात्पूर्वं ध्वान्ते सति द्रुमान्तान् तरुनिकटदेशानेव वृक्षाधोभागानेव संभोगार्थं कामुकदत्तं संकेतनिकेतमाप्ताः प्राप्ता अभिसारिकाः स्वैरिणीः शङ्कस्व संभावय । तथा इदानीं चन्द्रोदये सति वृक्षाधोभागवर्तिच्छायाच्छलादुज्झितं पूर्वं धृतं तमोनुकूलं नीलं चेलं वस्त्रं याभिस्ताहशीः सतीः सवर्णत्वाज्ज्योत्स्नानुकूलैश्चन्द्रिकानुगुणैर्धवलतरैर्दुकूलैरुपलक्षिताः सतीश्चलिताः संभोगं कृत्वा स्वगृहं प्रति पुनः परावृत्तास्त्वं संभावय । तमसि सत्येव केनापि न ज्ञातव्यमिति बुद्ध्या नीलं वस्त्रं परिधाय संकेतस्थानमागताः, चन्द्रोदये पुनर्नीलवस्त्रपरिधाने पूर्ववद्बोध्या तत्रैव विहाय श्वेतं दुकूलं सवर्णत्वात्परिधाय परावृत्ताः केनापि न ज्ञाताः । 'नीलचोलाः-' इति पाठे— चोलः कूर्पासः ॥

त्वदास्यलक्ष्मीमुकुरं चकोरैः
स्वकौमुदीमादयमानमिन्दुम् ।
दृशा निशेन्दीवरचारुभासा
पिबोरु रम्भातरुपीवरोरु[1] ॥ ४३ ॥

त्वदिति ॥ हे रम्भातरुवदतिपीवरावूरू यस्यास्तत्संबुद्धिः त्वं निशायामिन्दीवरं नीलोत्पलं तद्वच्चार्वी भा यस्यास्तया दृशा उरु सादरमिन्दुबिम्बं विलोकय । किंभूतम्—त्वदास्यलक्ष्म्या मुखशोभाया अवलोकनार्थं मुकुरं दर्पणमिव । तथा—चकोरैः प्रयोज्यैः कौमुदीमादयमानं निजकौमुदीं चकोरान् पाययमानम् । उदिते चन्द्रे चकोराः सानन्दा जाताः, नीलोत्पलानि च विकसितानीति भावः । एतेनेन्दोः परोपकारित्वं सूचितम् । विकसितेन्दीवरतुल्यया दृशा पिबेत्यनेन चन्द्रोदये हीन्दीवरं विकसति, त्वं चैवंभूतया दृशा यदा चन्द्रमवलोकयिष्यसि, तदा जनस्यदृशं चन्द्रावलोकनविकसितमिन्दीवरमेवेनदिति ज्ञास्यतीति सूचितम् । दिवा संकोचादसादृश्यमितीन्दीवरस्य विकसितत्वद्योतनार्थं निशापदम् । चकोरैः, 'गतिबुद्धि–' इति कर्मत्वप्राप्तावपि 'आदिखाद्योर्न' इति प्रतिषेधात्कर्तरि तृतीया । आदयमानं, निगरणार्थत्वात्परस्मैपदप्राप्तावपि 'अदेः प्रतिषेधो वक्तव्यः' इति निषेधात् 'णिचश्च' इति तङ् ॥

असंशयं सागरभागुदस्था-
त्पृथ्वीधरादेव मथः पुरायम् ।
अमुष्य यस्मादधुनापि सिन्धौ
स्थितस्य शैलादुदयं प्रतीमः ॥ ४४ ॥

असंशयमिति ॥ पुरा पूर्वं सागरभाक् समुद्रगर्भस्थोऽयं चन्द्रः मथो दण्डभूतात्पृथ्वीधरात्पर्वतान्मन्दराद्देरेव हेतोरुदस्थादुत्पन्न इति असंशयं निश्चितम् । पुराणादौ यदेवं श्रूयते तत्सत्यमित्यर्थः । पुरा उदस्थात्प्रथमसंभवावसरे तस्मादेव समुत्थित इति वा । तत्र हेतुमाह—यस्माद्धेतोरधुनापि संभवान्तरावसरेऽपि सिंधौ स्थितस्य सागरगर्भस्थस्याप्यमुष्य चन्द्रस्य शैलादुदयाचलादेवोदयमुत्पत्तिं प्रतीमो जानीमः । प्रत्यहं सागरस्थस्याप्यस्याचलोत्पत्तिशीलस्वरूपलिङ्गदर्शनात्समुद्रमथने प्रथमसंभवावसरे-ऽयमचलादेवोत्पन्न इति निश्चिनुम इत्यर्थः । उदयाचलशिखरं चन्द्रोऽतिक्रामतीति भावः ॥

निजानुजेनातिथितामुपेतः
प्राचीपतेर्वाहनवारणेन ।
सिन्दूरमान्द्रे किमकारि मूर्ध्नि
तेनारुणश्रीरयमुज्जिहीते ॥ ४५ ॥

निजेति ॥ निजानुजेन एकस्मात्पितुरुत्पन्नतयास्माच्चन्द्रादप्यग्रजातेन कनीयसा भ्रात्रा प्राचीपतेरिन्द्रस्य वाहनवारणेन प्राच्यां स्थितेनैरावतेनातिथितामुपेतः प्राप्तः । प्राच्यामुदितत्वात्तत्सन्निधिं प्राप्तः सन्नयं चन्द्रोऽग्रजत्वात्तेनेन्द्रेण मान्द्रे मूर्ध्नि अकारि कृतः किम् । गौरवाज्जनस्कारपूर्वं शिरस्यारोपितः किमित्यर्थः । तेन सान्द्रसिन्दूरशिरःस्थापनेन हेतुना लग्नसिन्दूरवशादयमरुणश्रीरारक्तशोभः उज्जिहीते उदेति । उज्जिहीते किमिति वा । उदितश्चन्द्रसिन्दूररक्तो दृश्यत इत्यर्थः ॥

यन्प्रीतिमद्भिर्वदनैः स्वसाम्या-
दचुम्बि नाकाधिपनायिकानाम् ।
ततस्तदीयाधरयायियोगा-
दुदेति बिम्बारुणबिम्ब एषः ॥ ४६ ॥

यदिति ॥ वृत्तत्वादिगुणयोगेन स्वसाम्यात्प्रीतिमद्भिर्नाकाधिपत्येन्द्रस्य नायिकानां वदनैर्यतस्मात्स्वसदृशमुखागत एव चन्द्रोऽचुम्बि चुम्बितः, तस्माद्धेतोस्तस्माच्चुम्बनाद्धा तदीयानां देवेन्द्रनायिकानामधरेषु न्यस्तो यावोऽलक्तकस्तस्य योगात्संबन्धाद्धेतोर्बिम्बवत्पक्वबिम्बीफलवदरुणं बिम्बं मण्डलं यस्य तादृश उदेति । अन्योऽपि समानः सखा सदृशमागतः सन् सख्या प्रीत्या चुम्ब्यते मुखैरिति बहुवचनेन तत्र प्रदेशे युगपदेव चुम्बनाद्बहुलयावकयोगात्सकलस्यापि चन्द्रबिम्बस्य रक्तत्वं युक्तमिति सूचितम् ॥

विलोमिताङ्कोत्किरणादुरुह-
दृगादिना दृश्यविलोचनादि ।
विधिर्विधत्ते विधुना वधूनां
किमाननं काञ्चनमञ्चकेन ॥ ४७ ॥

विलोमितेति ॥ विधिर्धाता विधुना चन्द्रेणैव काञ्चनस्य सञ्चकेन बिम्बकेन कृत्वा वधूनामतिरमणीयमाननं विधत्ते किम् । यतः—किंभूतेन । विलोमितः पराङ्मुखः कृतः स्वप्रभया जितः अङ्कः कलङ्को येन तादृशादुत्कृष्टादतितेजस्विनः किरणाद्धेतोरुरुहो दुस्तयो दृगादिर्नेत्रावयवयवो यस्य, अथच विपरीतीकृतानामङ्कानां नेत्रादिनिर्माणार्थं निम्नोन्नतांशचिह्नस्थानानामुत्किरणं संघटनं तस्माद्धेतोः साक्षाद्दृश्यनेत्रकर्णनासिकाद्यवयवेन । आननं तु साक्षाद्दृश्या विलोचनादयो नासाकर्णाद्यवयवा यस्य तादृशम् । तस्माद्धाता स्त्रीमुखं चन्द्ररूपेण महाराष्ट्रभाषया ढसाळयेन स्वर्णस्य सञ्चकेन निर्ममे । सञ्चके हि निष्पाद्यस्य वस्तुनो विन्नोन्नतभागा विपरीता एवोत्कीर्यन्ते । तत्र च नेत्राद्यवयवा दुर्ज्ञेया भवन्ति तन्निर्मिते मुखादौ च दृश्या भवन्ति, तस्मादेवं तत्कर्मत इत्यर्थः ।

१ 'उरुः पृथुतरो यो रम्भातरुः' इति सुखावबोधा । २ 'पीवरोरुः' इति कान्तिकः पाठ इति सुखावबोधा ।

उदितमात्रश्चन्द्रोऽप्युत्तमसुवर्णसच्चक्रवद्रक्तो दृश्यत इति भावः। उत्तमं सुवर्णं रक्तवर्णं भवति। आननमिति जात्यैकवचनम् ॥

अनेन वेधा विपरीतरूप-
विनिर्मिताङ्कोत्किरणाङ्गकेन।
त्वदाननं दृश्यदृगाद्यलक्ष्य-
दृगादिनैवाकृत सच्चकेन ॥ ४८ ॥

अनेनेति ॥ वेधाः विपरीतरूपं यथा तथा विनिर्मितमुक्तविधमङ्कोत्किरणं यत्र तादृशमङ्गं यस्य तेन। तथा—अलक्ष्यदृगादिनानेन चन्द्रेणैव सच्चकेन दृश्यं सुन्दरतरम्, अथच—प्रत्यक्षदर्शनयोग्यं दृगादि यस्य तादृशं त्वदाननमकृत त्वदाननमेवाकृत न त्वन्याननमिति वा। अयमेवात्र श्लोके विशेषः। अयं श्लोकः क्षेपकः ॥

अस्याः सुराधीशदिशः पुरासी-
द्यदम्बरं पीतमिदं रजन्या।
चन्द्रांशुचूर्णव्यतिचुम्बितेन
तेनाधुना नूनमलोहितायि ॥ ४९ ॥

अस्या इति ॥ हे भैमि, अस्याः सुराधीशस्येन्द्रस्य दिशः यदिदमम्बरं गगनं वस्त्रं च पुरा चन्द्रोदयात् पूर्वं रजन्या रात्र्या हरिद्रया च पीतं तमोव्याप्तत्वादृश्यं पीतवर्णं चासीत्। तेनाम्बरेण गगनेन वस्त्रेण चाधुना चन्द्रोदये चन्द्रांशूनां चूर्णैः श्लक्ष्णसूक्ष्मतेजोलेशैः कर्तृभिर्व्यतिचुम्बितेनातितरां स्पृष्टेन सता चन्द्रांशुवच्छुभ्रतरेण चूर्णेन ताम्बूलसाधनचूर्णद्रव्येण स्पृष्टेन सता नूनमलोहितायि आरक्तीभूतम्। यत्तमसा पूर्वं नीलमभूत्तदेवेदानीमुदयचन्द्रलोहितकरसंस्पर्शाद्रक्तं जातमित्यर्थः। हरिद्रया पीतवर्णं वस्त्रं चूर्णेन युक्तं सद्रक्तं भवति। देवेन्द्रस्त्रियाश्च वस्त्राणि नानावर्णानि युक्तानि। चन्द्रांशव एव चूर्णमिति वा। अलोहितायि, लोहितादिक्यषन्ताच्चावे चिण् ॥

तानीव गत्वा पितृलोकमेन-
मरञ्जयन्यानि स जामदग्न्यः।
छित्त्वा शिरोस्राणि सहस्रबाहो-
र्विस्राणि विश्राणितवान्पितृभ्यः ॥ ५० ॥

तानीति ॥ सोऽतिवीरो जामदग्न्यः सहस्रबाहोः शिरश्छित्त्वा विस्राण्यामगन्धीनि यान्यस्राणि रक्तानि पितृभ्यो जमदग्न्यादिभ्यो विश्राणितवान्दत्तवान्। यै रक्तैः प्रतिज्ञातं पितृतर्पणं कृतवान्। तान्येव रक्तानि मन्त्रबलात्पितृलोकं गत्वा प्राप्य पितृलोकाधीशमेनं चन्द्रमरञ्जयन् रक्तं चक्रुरिव। 'चन्द्रो वै पितृलोकः' इति श्रुतेः चन्द्रो रक्तवर्णो दृश्यत इति भावः। परशुरामः सहस्रार्जुनं हत्वा तदीयै रक्तैः पितृतर्पणं कृतवानितीतिहासः। 'विस्रं स्यादामगन्धि यत्' इत्यमरः ॥

अकर्णनासस्रपते मुखं ते
पश्यन्न सीतास्यमिवाभिरामम्।
रक्तोस्रवर्षी बत लक्ष्मणाभि-
भूतः शशी शूर्पणखामुखाभः ॥ ५१ ॥

अकर्णेति ॥ हे प्रिये, शशी सितास्यमिवाभिरामं कर्णादिकृतशोभं ते मुखं पश्यन्सन्न त्रपते न लज्जते बत चित्रम्। किंभूतः—न विद्यते कर्णनासं स्वभावादेव यस्य सः। तथा रक्ता आरक्ता उस्राः किरणास्तद्वर्षणशीलः, शोणश्रासौ किरणवर्षी च तादृशो वा। तथा—लक्ष्मणा कलङ्केनाभिभूत आक्रान्तमध्यः, अतएव शूर्पणखाया रावणभगिन्या मुखवदाभा यस्य स तद्वदनतुल्यः। एषु लज्जाकारणेषु सत्स्वपि न लज्जते तच्चित्रमित्यर्थः। त्वन्मुखं पश्यन्नप्युदयत्येव, स्वं प्रकाशयति च, तस्मादेव न लज्जते इति ज्ञायते। अन्यो ह्यकर्णनासो लज्जते, अयं तु तादृशोपि न लज्जत इत्यपि चित्रमेव। शूर्पणखामुखमपि लक्ष्मणेन पराभूतं छिन्नकर्णनासत्वाद्रुधिरवर्षि सद्रामममिलक्षीकृत्य वर्तमानम्, अत एवाभि भयरहितं च, सीतामुखं पश्यदपि न लज्जते, तदनन्तरमपि प्रौढित्वादप्रकटनात्। अभिशब्दस्यावृत्तिः कार्या। लक्ष्मशब्दो नान्तः, पक्षे [लक्ष्मणो]ऽकारान्तः ॥

आदत्त दीप्रं मणिमम्बरस्य
दत्त्वा यदस्मै खलु सायधूर्तः।
रजयुपारद्युतिकूटहेम
तत्पाण्डु जातं रजतं क्षणेन ॥ ५२ ॥

आदत्तेति ॥ हे भैमि, सायंकालरूपो धूर्तो यद् रज्यनुदयकाले रक्तीभवंस्तुपारद्युतिश्चन्द्र एव लेपवशाद्रज्यत् कूटहेम कृत्रिमं सुवर्णमस्मै गगनाय मूल्यरूपेण दत्त्वा दीप्रं प्रकाशमानमम्बरस्य मणिं सूर्यमादत्त जग्राह। तदलीकं हेम क्षणमात्रेण पाण्डु शुभ्रं रजतं खलु रूप्यमिव जातम्। धूर्तो हि रूप्यं लेपादिभिरुपलिप्तं सुवर्णीकृत्य ददाति, वस्त्रान्तरस्थमपि प्रसरद्दीप्तिकं रत्नं च गृह्णाति उदयानन्तरमतिक्रान्तकियत्कालत्वाद्रक्तिमानं परित्यज्य चन्द्रो रूप्यवद्धवलो जात इति भावः। घसन्तोऽत्र सायशब्दः सायंशब्दसमानार्थः ॥

बालेन नक्तंसमयेन मुक्तं
रौप्यं लसद्डिम्बमिवेन्दुबिम्बम्।
भ्रमिक्रमादुज्झितपट्टसूत्र-
नेत्रावृतिं[1] मुञ्चति शोणिमानम् ॥ ५३ ॥

बालेनेति ॥ हे प्रिये, रौप्यं राजतं लसद्विलसमानं डिम्बं बालक्रीडासाधनं भ्रमरकमिवेन्दुबिम्बं कर्तृ भ्रमिक्रमाद्भ्रमणपरिपाट्या, अथ च—ऊर्ध्वदेशगमनक्रमेणोज्झिता त्यक्ता या पट्टसूत्रस्य नेत्रं दोरकस्तत्कृता आवृतिर्वेष्टनं तद्रूपम्, अथ च—पट्टसूत्रजालिकावत् चन्द्रावरणं येन तं शोणिमानं रक्तिमानं मुञ्चति। किंभूतमुभयम्—नक्तंसमयरूपेण बालेन, अथ च—बालेन प्रदोषरूपेण, रात्रिसमयेन मुक्तं भ्रमणार्थं करात् कृतमोचनम्, अथ च—उद्गीर्णं जनितोदयम्। शिशुक्रीडासाधनं हि भ्रमरकं काष्ठमयं भवति। ईश्वराणां च डिम्बं समृद्ध्यतिशयाद्राजतं पट्टसूत्रवलितदोर-

१ 'नेत्रावृतेः' इत्यादिपाठः सुखावबोधाय्यः।

कस्तंसनात्तत्संबन्धजातं रक्तिमानं मुञ्चति । तथेदं चन्द्रबिम्बमपीत्यर्थः । इदानीं चन्द्रो धवलो जात इति भावः । 'नेत्रावृतेः–' इति पाठे—भ्रमिक्रमाद्धेतोरुज्झिता या पट्टसूत्रनेत्रावृतिस्तस्या हेतोः शोणिमानं मुञ्चति । उज्झिता बिम्बेनैव पट्टसूत्रनेत्रावृतिर्यत्र तादृशाद्भ्रमिक्रमाद्धेतोरिति वा डिम्बं ललडिम्बमिति वा गौडदेशभाषायां भ्रमरकस्य संज्ञा । महाराष्ट्रभाषायां कान्यकुब्जभाषायां च 'भवरा' इति संज्ञा । रौप्यं, संबन्धे विकारे वाण् । 'नेत्रं मन्थगुणे वस्त्रे' इत्यभिधानान्नेत्रशब्दो यद्यपि मन्थवेष्टनगुणे मुख्यः तथाप्यत्र गुणमात्रपर इति ज्ञेयम् ॥

ताराक्षरैर्यामसिते कठिन्या
निशालिखद्व्योम्नि तमःप्रशस्तिम् ।
विलुप्य तामल्पयतोऽरुणेपि
जातः करे पाण्डुरिमा हिमांशोः ॥ ५४ ॥

तारेति ॥ निशाऽसिते श्यामे व्योम्नि गगन एव कज्जलादिलिप्तश्यामलपट्टिकायां कठिन्याः शुभ्रधातुविशेषस्य संबन्धिभिस्ताराक्षरैः शुभ्रैरक्षरैरिव नक्षत्ररूपैरक्षरैः कृत्वा यां तमःप्रशस्तिं तमोवर्णनश्लोकादिलिपिमलिखत् । ताराक्षरैरुपलक्षितां यां तमःप्रशस्तिं रात्रिः कठिन्यालिखदिति वा । तां लिपिं विलुप्य प्रोञ्छ्याल्पयतः परिमेयताराक्षरां कुर्वतो हिमांशोरुरुणेऽपि करे किरणे, अथ च—पाणौ, पाण्डुरिमा जातः । रूढकिरणे हि चन्द्रे नक्षत्राणामल्पता भवतीति खटिकालिखिताक्षराणि मार्जयतश्चारुणेपि करः खटिकामङ्गाद्धवलो भवतीति तमसि नक्षत्राणि बहून्युज्ज्वलतराणि च दृष्टानि, चन्द्रे तूदितेऽल्पानि निष्प्रभाणि च जातानि, चन्द्रश्च धवलो जात इति भावः ॥

सितो यदात्रैव तदान्यदेशे
चकास्ति रज्यच्छविरुज्जिहानः ।
तदित्थमेतस्य निधेः कलानां
को वेद वा रागविरागतत्त्वम् ॥ ५५ ॥

सित इति ॥ एष चन्द्रो यदा यस्मिन्काले अत्र देशे सितो धवलश्चकास्ति, तदा तस्मिन्नेव काले अन्यदेशे रज्यच्छवी रक्तकान्तिरुज्जिहान उदयन् शोभते । एवमस्योदयरक्तः, अन्यत्र च श्वेत इत्यपि सामर्थ्यालभ्यम् । एतद्देशस्तं प्रतीदानीं सितो दृश्यते, द्वीपान्तरस्थं प्रति तूदयन्निदानीमेव दृश्यते यस्मात्, तस्मात्कलानां निधेः पूर्णस्य चन्द्रस्य रागविरागयोर्लोहितत्वालोहितत्वयोस्तत्त्वं याथार्थ्यमित्थममुना प्रकारेण को वा वेद, अपितु—कोपि निश्चेतुं न शक्नोतीत्यर्थः । उदयास्तमययोरतात्त्विकत्वाद्यद्वस्तुतस्य यत्र यदा प्रथमदर्शनं तदा तत्रोदय इति दूरस्थस्य प्रथमं रक्तत्वप्रत्ययः, क्रमसमीप्यात्तु धावल्यप्रत्यय इति तत्त्वम् । अन्यस्यापि चतुःषष्टिकलाभिज्ञस्यानुरागानुरागयोर्याथार्थ्यं कुत्रानुरक्तः कुत्र वा नेति कोपि न जानाति ॥

कश्मीरजैः रश्मिभिरोपसंध्यं-
मृष्टं धृतध्वान्तकुरङ्गनाभि ।
चन्द्रांशुना चन्दनचारुणाङ्गं
क्रमात्समालम्भि दिगङ्गनाभिः ॥ ५६ ॥

कश्मीरजैरिति ॥ दिग्भिरेवाङ्गनाभिः संध्यायाः समीपमुपसंध्यं तत्र जातैररुणै रश्मिभिरेव कश्मीरजैः कुङ्कुमैः कृत्वा मृष्टं पूर्वं कृतोद्वर्तनं ततः संध्यायामपगतायां पुना ध्वान्तरूपा मृगनाभिः कस्तूरी येन तादृशमङ्गं क्रमात्कस्तूरीलेपानन्तरं चन्द्रांशुनैव चन्दनेषु मध्ये चारुणोत्तमेन चन्दनेन कृत्वा समालम्भि श्लेषि । अन्या अपि युवतयः कुङ्कुमादिभिः क्रमेणाङ्गमनुलिम्पन्ति । चन्द्रनखक्षतचन्द्रकैः सर्वा अपि दिशो तिमस्काः कृता इति भावः । ओपसंध्यैः सामीप्येऽव्ययीभावाद्वतार्थेऽण् ॥

विधिस्तुषारर्तुदिनानि कर्तं
कर्तं विनिर्माति तदन्तभित्तैः ।
ज्योत्स्नीर्निचेत्तत्प्रतिमा इमा वा
कथं कथं तानि च वामनानि ॥ ५७ ॥

विधिरिति ॥ विधिस्तुषारर्तोः शिशिरर्तोर्दिनानि कर्तं कर्तं छित्वा छित्वा तेषां दिनानामन्तर्भित्तैर्मध्यसंबन्धिभिः सारभूतैः शर्करैः शुभ्रैः खण्डैः कृत्वा ज्योत्स्नीर्निशा विनिर्माति । नचेदेवं यदि नाङ्गीक्रियते, तदेमा रात्रयश्चन्द्रिकायुक्तास्तत्प्रतिमा मर्त्यदिनस्य शीतलप्रकाशवत्यस्तुल्याः शीतलप्रकाशवत्यस्तत्सदृश्य. कथम् । तानि च दिनानि वामनानि न्यूनपरिमाणानि न्यूनशीघ्रत्वादिगुणानि कथं वा । अपितु—दिनतामनता रात्रिदीर्घतान्यथानुपपत्तेः शिशिरर्तुदिनापेक्षया च ज्योत्स्नीनामर्थसिद्धानां शीतलप्रकाशवत्त्वानुपपत्तेश्च शिशिरर्तुदिनानि स्थाप्यादेव तत्सारभूतश्च शर्करश्चन्द्रिकान्विता रात्रयो ग्रहणा वर्णिता इत्यर्थः । चन्द्रचन्द्रिकया रात्रिः शीतला धवलतरा च कृतेति भावः । कर्तं कर्तम्, 'कृती छेदने' इत्यस्मादाभीक्ष्ण्ये णमुल् द्विर्वचनं च । ज्योत्स्नीः, ज्योतिरस्यास्तीत्यर्थे 'ज्योत्स्नातमिस्रा-' इति साधुकृताज्योत्स्नाशब्दाद् 'अण्प्रकरणे ज्योत्स्नादीनय उपसंख्यानम्' इत्यस्यार्थेऽण् ङीप् ॥

इत्युक्तिशेषे स वधूं बभाषे
मुक्तिश्रुतासक्तिनिबद्धमौनाम् ।
मुखाभ्यसूयानुशयादिवेन्दौ
केयं तव प्रेयसि मूकमुद्रा ॥ ५८ ॥

इतीति ॥ स नलः इत्युक्तिशेषे एवं चन्द्रवर्णनावसाने मूकीनां प्रसादादिगुणयुक्तानां शोभनवचनानां श्रुतौ श्रवणे विषये आसक्तया रसातिशयात्तदेकतानतया बद्धं स्वीकृतं मौनं यया तां तूष्णींभावमाश्रितां वधूं मौनी प्रत्यूचे बभाषे । इति किम् —हे प्रेयसि, इन्दौ विषये तवेयं मूकस्येव मुद्रा वाग्निरोधरीतिः का किंकारणिका । त्वमपि किमिति न चन्द्र वर्णयसीत्यर्थः । मौनं स्वयमेव हेतुमुत्प्रेक्षते—मुखस्य चन्द्रकृतवदनसाम्यस्याभ्यसूया स्पर्धा तज्जन्यान्मनोदुःखादिव । स्पर्धाकारिणा हि वर्णनेऽन्येन क्रियमाणेऽन्योऽपि कोपात्तूष्णीं तिष्ठति, नानुमोदते, स्वयं च न तं वर्णयति । तथा – त्वन्मुखस्पर्धाकरणसंजातकोपादियेन्दुं न वर्णयसि नानुमोदसे च किमिति प्रश्नः । तत्तूष्णीम्भावादरकृतं मौनं कोपादिहेत्युत्प्रेक्षितम् ॥

शृङ्गारभृङ्गारसुधाकरेण
वर्णस्रजानूपय कर्णकूपौ ।
त्वच्चारुवाणीरसवेणितीरं
तृणानुकारः खलु कोपकारः ॥ ५९ ॥

शृङ्गारेति ॥ हे प्रिये, त्वं शृङ्गाररससंबन्धी भृङ्गारः स्वर्णकलशस्तद्रूपेण सुधाकरेण चन्द्रेण हेतुना वर्णस्रजा कृत्वा मम कर्णकूपौ अनूपय जलपूर्णौ कुरु । वर्णस्रजः सरसत्वात्कर्णकूपयोर्जलपूर्णत्वकरणं युक्तम् । अथच—शृङ्गाररससंबन्धिस्वर्णकलशस्य भवन्मुखस्य संबन्धि यत्पीयूषं तस्याकरेण खनिभूतया सरसया वर्णस्रजा कर्णकूपावनूपय । खलु यस्मात् कोपकार इक्षुविशेषस्तव चारुवाण्या वक्रोक्त्यादिरूपाया वाचः संबन्धिनः शृङ्गारादयो रसास्तेषां वेणिः प्रवाहस्तस्यास्तीरे समुद्यत्तृणं तस्यानुकारस्तत्सदृशः । अतिस्वादुरसोपीक्षुविशेषो यदीयसरसवाणीतीरतृणमनुकरोति, नतु समो जातः । तां वाणीं श्रावय, चन्द्रं वर्णयेति भावः । 'कोपकाराद्या इक्षुविशेषाः' इति क्षीरस्वामी । अनूपय, अनूपशब्दात् 'तत्करोति–' इति णिचि लोट् ॥

अत्रैव वाणीमधुना तवापि
श्रोतुं समीहे मधुनः सनाभिम् ।
इति प्रियप्रेरितया तयाथ
प्रस्तोतुमारम्भि शशिप्रशस्तिः ॥ ६० ॥

अत्रैवेति ॥ इति प्रियेण प्रेरितया तया भैम्याथानन्तरं शशिनः प्रशस्तिर्माहात्म्यं प्रस्तोतुमारम्भि प्रारब्धा । इति किम्—हे भैमि, अहमत्रैव चन्द्रवर्णन एव विषये मधुनोऽमृतस्य सनाभिं तुल्यां तवापि वाणीमधुना श्रोतुं समीहे इच्छामीति ॥

पूरं विधुर्वर्धयितुं पयोधेः
शङ्केऽयमेणाङ्कमणिं कियन्ति ।
पयांसि दोग्धि प्रियविप्रयोग-
सशोककोकीनयने कियन्ति ॥ ६१ ॥

पूरमिति ॥ हे प्रिय, अयं विधुः पयोधेः पूरमागन्तुकजलप्रवाहं वर्धयितुमेणाङ्कमणिं चन्द्रकान्तं कियन्ति पयांसि दोग्धि तस्माद्गृह्णाति । तथा—प्रियस्य चक्रवाकस्य विप्रयोगेन सशोकायाः कोक्या नयने अपि कियन्ति जलानि दोग्धि, ताभ्यामपि सकाशाज्जलं कियद्गृह्णातीत्यहं शङ्के मन्ये । इति भैमी प्रियमवदत् । उदिते चन्द्रे सागरपूरो वृद्धिं प्राप्तः, चन्द्रकान्ताः स्रवन्ति, चक्रवाकी भृशं रोदितीति भावः । दुहिर्द्विकर्मा ॥

ज्योत्स्नामयं रात्रिकलिन्दकन्या-
पूरानुकारे प्रसृतेऽन्धकारे ।
परिस्फुरन्निर्मलदीप्तिदीपं
व्यक्तायते सैकतमन्तरीपम् ॥ ६२ ॥

ज्योत्स्नेति ॥ हे प्राणेश, तमोवसरेऽतिश्यामा रात्रिरेव कलिन्दकन्या यमुना तस्याः पूर आगन्तुकातिनीलजलप्रवाहस्तदनुकारे तत्सदृशे तद्वदतिकृष्णेऽन्धकारेऽपसृते गते सति परिस्फुरन्ती निर्मला दीप्तिर्यस्य । प्रकाशमानश्चासौ धवलद्युतिश्च तादृशो वा यश्चन्द्रः स एव दीपो यत्र तादृशं चन्द्रिकारूपं सैकतं धवलतरवालुकामयं रात्रियमुनाया एव जलमध्यस्थितमन्तरीपं द्वीपं व्यक्तायते स्फुटमिव भवति प्रकटं दृश्यते । पूरावसरेऽस्फुटमपीदानीं स्फुटीभवतीति शङ्के । चन्द्रचन्द्रिकया सकलं धवलीकृतमिति भावः । व्यक्तायते, व्यक्तमिव भवति, 'कर्तुः क्यङ्–' इति क्यङ् । अव्यक्तं व्यक्तं भवतीत्यर्थः । सैकतम्, 'सिकताशर्कराभ्यां च' इत्यस्त्यर्थेऽण् ॥

हासत्विषैवाखिलकैरवाणां
विश्वं विशङ्केऽजनि दुग्धमुग्धम् ।
यतो दिवा बद्धमुखेषु तेषु
स्थितेऽपि चन्द्रे न तथा चकास्ति ॥ ६३ ॥

हासेति ॥ अखिलकैरवाणां सकलकुमुदानां हासत्विषैव विकासदीप्त्यैव विश्वं सकलं जगत् दुग्धवत् मुग्धं धवलं शीतलं चाजनि जातम्, नतु चन्द्रेणेत्यहं विशङ्के विशेषेण मन्ये । यतो हेतोर्दिवा तेषु सकलकैरवेषु बद्धमुखेषु संकुचितेष्वविकस्वरेषु च सत्सु चन्द्रे स्थिते विद्यमानेऽपि सकलकुमुदविकासाभावात्सकलं जगत्तथा रात्राविव शीतलधवलतया न चकास्ति । तस्मादिदं जगत्कुमुदहासत्विषैव शीतलं धवलं च कृतम्, नतु चन्द्रेणेत्यर्थः । कुमुदवद्दुग्धवच्च शीतला धवला चन्द्रचन्द्रिकास्तीति भावः ॥

मृत्युंजयस्यैष वसञ्जटायां
न क्षीयते तद्भयदूरमृत्युः ।
न वर्धते च स्वसुधाप्तजीव-
स्रग्मुण्डराहूद्भवभीरतीव ॥ ६४ ॥

मृत्युमिति ॥ मृत्युंजयस्य मृत्युं जितवतः शिवस्य जटायां वसन्नेष चन्द्रः षोडशांशभूतो न क्षीयते नाल्पपरिमाणो भवति, कलामात्रस्वरूपेणैव तत्र सदा वसन्नतोपि न्यूनपरिमाणो न भवतीत्यर्थः । अथच—न क्षीयते न म्रियते यस्मात्, तस्मान्मृत्युंजयात्यकाशाद्भयेन दूरो मृत्युर्मरणहेतुर्देवता यस्य सः, मृत्युंजयजटाजूटनिवासान्मृत्युना स्प्रष्टुमपि न शक्यते तस्मान्न क्षीयतेऽयमित्यर्थः । तर्हि तत्र वसन्वर्धते किमिति नेत्याशङ्क्याह—वर्धते च न । उपचितोपि न भवतीत्यर्थः । यतः—स्वस्य सुधया आप्तो जीवश्चैतन्यं यैस्तानि स्रजो मुण्डानि शिरोमालायाः शिरःकपालानि तान्येव राहवस्तेभ्य उद्भवा समुत्पन्ना भीर्यस्य । कथम्—अतीव । नितरां भीत इत्यर्थः । सजीवमुण्डेषु बहवो राहव एवंते इति धिया भिया न वर्धते । भीतो हि सौख्याभावात्कृशतर एव भवति । अथच—पूर्णस्य राहोः सकाशाद्भयम् । अतः कारणद्वयान्न क्षीयते, न च वर्धते इत्येककल एव शिवशिरश्चन्द्र इत्यर्थः । एतेन चन्द्रस्य षोडशी कला वर्णिता । शिवशिरसि वर्तमानत्वादस्य माहात्म्यमपि वर्णितम् । मृत्युंजयेति, संज्ञायां भृतृवृजि—, इति खश्, 'अरुर्द्विष–' इति मुम् ॥

त्विषं चकोराय सुधां सुराय
कलामपि स्वावयवं हराय ।

ददज्जयत्येष समस्तमस्य
कल्पद्रुमभ्रातुरथाल्पमेतत् ॥ ६५ ॥

त्विषमिति ॥ एष चन्द्रो जयति सर्वोत्कर्षेण प्रकाशते । यतः किंभूतः—चकोराय स्वावयवं त्विषं निजांशभूतां चन्द्रिकां ददत् । तथा—सुराय अन्यादिदेवेभ्यो निजांशभूतां सुधां ददत् । तथा—हराय निजांशभूतां कलां ददत् । अथापि अस्य चन्द्रस्य तत्समस्तं परोपकारकरणमल्पमेव । अतिचमत्कारकारि न भवतीत्यर्थः । यतः—समुद्रोत्पन्नत्वात्कल्पद्रुमस्य भ्रातुः । कल्पद्रुमस्तु कल्पितं सर्वं सर्वेभ्यो ददाति, अयं तु न तथेत्यल्पमेवेत्यर्थः । एवंविधः परोपकारी कोपि नास्तीति भावः । चकोरायेति सुरायेति च जात्येकवचनम् ॥

अङ्केनाभेर्विपकृष्णकण्ठः
सुधाप्तशुद्धः कटभस्मपाण्डुः ।
अर्हन्नपीन्दोर्निजमौलिधाना-
न्मृडः कलामर्हति पोडशीं न ॥ ६६ ॥

अङ्केति ॥ मृडः शिवो निजमौलौ धानास्थापनाद्धेतोरिन्दोः षोडशीं कलामर्हन्प्राप्नुवन्, अथच—पूजयन् अपि षोडशीं कलां नार्हति न प्राप्नोति न पूजयति च । निजशिरसि धारणादेव तस्याः प्राप्तिः पूजा च संभविनी । यो ह्यनितरां पूज्यते स शिरसि धार्यते । तथा चैतस्य षोडशीं कलां मृडः प्राप्नुवन्पूजयन्नपि च तां प्राप्नोतीति विरोधपरिहारः । यतः—किंभूतस्येन्दोः—किंभूतश्च मृडः—अङ्कभूतो य एणो हरिणस्तयुक्ता नाभिर्मध्यभागो यस्य अथच—अङ्करूपा कलङ्करूपा एणनाभिः कस्तूरी यत्र । मृडस्तु—विषेण कृष्णकण्ठः । तथा—सुधयामृतेनाप्ता शुद्धिर्धावल्यं येन मृडस्तु—कटभस्मना चिताभस्मना पाण्डुः । तस्माच्चन्द्रस्याल्पमपि साम्यं शिवो न प्राप्नोति । किंच चन्द्रादधिकः शिवश्चेदभविष्यत्, तर्हि तदीयकलां मौलौ नाधारयिष्यत्, सा मौलौ धृता, तेन तस्माच्चन्द्र एव तदधिक इत्यर्थः । शुभस्याशुभस्य च महदन्तरमिति भावः । षोडशीमपि कलां नार्हतीत्यनेन पूर्णचन्द्रं नार्हतीति किं वाच्यमित्यपि सूचितम् । हरस्यापकर्षे विषं, चिताभस्म च हेतुः, चन्द्रोत्कर्षे मृगमदोऽमृतं च ॥

पुष्पायुधस्यास्थिभिरर्धदग्धैः
सितासितश्रीरघटि द्विजेन्द्रः ।
स्मरारिणा मूर्धनि यद्धृतोऽपि
तनोति तत्तौष्टिकपौष्टिकानि ॥ ६७ ॥

पुष्पेति ॥ ब्रह्मणा द्विजेन्द्रश्चन्द्रः पुष्पायुधस्य कामस्यार्धदग्धैरस्थिभिः कृत्वाऽघटि निर्मितः । अतएव सितासितश्रीरुपान्तधवलमध्यश्यामलकान्तिः । स्मरास्थिभिरेव निर्मित इत्यत्र हेतुमाह—स्मरारिणा मूर्धनि धृतोऽपि, अथच—कृतसंमानोपि, तस्य स्मरस्यैव तौष्टिकानि हर्षकारीणि, पौष्टिकानि अभिवृद्धिकारीणि च यद्यस्मात्तनोति । कामारिणा पूज्यमानोपि कामहितमेव यस्मात्करोति, तस्मात्तदस्थिभिरेव घटित इत्यर्थः । एतादृक्कामोद्दीपकं किमपि नास्तीति भावः । अस्थिभिरिवेति प्रतीयमानोत्प्रेक्षा । अन्या श्रितोपि तदीयशत्रुहितं यः करोति स तदस्थिभिर्घटित इति लौकिकयुक्तिः । तौष्टिकपौष्टिकानि, 'प्रयोजनम्' इति ठक् ॥

मृगस्य लोभात्खलु सिंहिकायाः
सूनुर्मृगाङ्कं कवलीकरोति ।
स्वस्यापि दानादमुमङ्कसुप्तं
नोज्झन्मुदा तेन च मुच्यतेऽयम् ॥ ६८ ॥

मृगस्येति ॥ सिंहिकायाः सुतो राहुर्मृगाङ्कं चन्द्रं यत्कवलीकरोति तदङ्कमृगस्य लोभात् खलु ग्रासाभिलाषादिव । सिंहिकासुतः सिंहो मृगरक्षितं स्थलं मृगग्रासाभिलाषादेव स्वाधीनं करोति । तर्हि किमर्थं मुञ्चतीत्यत आह—अङ्कसुप्तं मध्यवर्तिनम्, अथच-उत्सङ्गे विश्वासान्मुखेन निद्रितम्, अमुं मृगं स्वस्यापि दानाद्राहुदन्तकृतखण्डनादपि नोज्झन् त्यजन्, अथच —स्वशरीरस्यापि वितरणात्त्यजन्, अयं चन्द्रभेन राहुणा तेन पुण्येन च हेतुना मुदा शरणागतरक्षणनिमित्तहर्षेण कृत्वा मुच्यते त्यज्यते । अन्योपि शरणागतं मृगं जिघांसोः सिंहाद्रक्षितुमात्मानमपि ददानो हि तेन पुण्येन सिंहान्मुच्यत एव । 'नोज्झा[1]' इति पाठे—स्वस्यापि दानाङ्कसुप्तमुं यतो नामुञ्चतेन हेतुनाऽयं विमुच्यते, अथाद्राहुणेत्यर्थः ॥

सुधाभुजो यत्परिपीय तुच्छ-
मेनं वितन्वन्ति तदर्हमेव ।
पुरा निपीयास्य पितापि सिन्धु-
रकारि तुच्छः कलशोद्भवेन ॥ ६९ ॥

सुधेति ॥ सुधाभुजो देवा एनं चन्द्रं परिपीय साकल्येन पीत्वा तुच्छं रिक्तं यद्वितन्वन्ति कुर्वन्ति तदर्हमुचितमेव, यतोऽस्य पिता सिन्धुरपि कलशोद्भवेनागस्त्येन पुरा निपीय तुच्छो रिक्तः अकारि, तस्मात्कुलक्रमागतं तुच्छत्वमित्यर्थः । एतस्य पूर्वेपि परोपकारनिरताः, तस्मादयमपि तथेति भावः । कलशादुत्पन्नेनापि सागरस्य पानमित्याश्चर्यम् ॥

चतुर्दिगन्तां परिपूरयन्ती
ज्योत्स्नैव कृत्स्ना सुरसिन्धुबन्धुः ।
क्षीरोदपूरोदरधामहार्द-
वैरस्यमेतस्य निरस्यतीयम् ॥ ७० ॥

चतुरिति ॥ चतुर्णां दिगन्तानां समाहारश्चतुर्दिक्, ताम् । चतुर्दिक्प्रान्तानित्यर्थः । (तां) परिपूरयन्ती सामस्त्येन व्याप्नुवती, तथा—श्वेतत्वात्सुरसिन्धोर्मन्दाकिन्या बन्धुः सदृशी । तथा—कृत्स्ना पूर्णा इयं ज्योत्स्नैवैका क्षीरोदपूरोदरे धामः स्थितिस्तस्य हानाद्बहुकालपरित्यागाद्धेतोरेतस्य चन्द्रस्य वैरस्यं क्षीरसागरविरहजनितं दुःखं निरस्यति नाशयति । अयौ चन्द्रिकायामेव क्षीरसागरबुद्ध्या पितृवियोगदुःखं परित्यजतीत्यर्थः । सकलदिगन्तव्यापिधवलचन्द्रिकामध्यवर्ती चन्द्रः क्षीरसागरमध्यस्थ इव शोभत इति भावः । गङ्गावद्बुध्यवचेयं कौमुदीति । चतुर्दिगन्तीम्, समाहारे द्विगोर्ङीप् ॥

---

१ 'नोज्झत्' इत्यपि पाठः सुखावबोधार्थमतः ।

पुत्री विधोस्ताण्डविकास्तु सिन्धो-
रश्या चकोरस्य दृशोर्वयस्या ।
तथापि सेयं कुमुदस्य कापि
ब्रवीति नामैव हि कौमुदीति ॥ ७१ ॥

पुत्रीति ॥ इयं चन्द्रिका यद्यपि चन्द्रात्प्रसूतत्वाद्विधोः पुत्री अस्तु । सिन्धोः समुद्रस्य ताण्डविका नृत्तोपदेशिका नाटयित्री अस्तु । चन्द्रिकया हि सिन्धुरुल्लास्यते; सा च तस्य नप्त्री भवति । यद्वा—इयं विधोः पुत्री सिन्धोस्ताण्डविका भवतु । तथा चकोरस्य अश्या पेया भवतु । तथा—सकललोकस्य दृशोः प्रेमपात्रतया वयस्या सखी भवतु तथापि सेयं चन्द्रिका कुमुदस्य कापि अनिर्वचनीया संबन्धिनी भवतु । पूर्वनिर्दिष्टसर्वापेक्षया कुमुदस्यैव निरतिशयानन्दकारित्वात्केनाप्यनिर्वचनीयेन संबन्धिनी भवत्वित्यर्थः। हि यस्मात्कौमुदीति, नामैव कर्तृ ब्रवीति । सर्वेषां तत्तत्संबन्धसंभवेऽपि कुमुदानामियं कौमुदीति, 'तस्येदम्' इति संबन्धेऽण् । कुमुदानामेव प्रीत्यतिशयेन संबन्धं वदतीत्यर्थः । कौमुदीति नामैव हि स्पष्टं ब्रवीतीति वा । चन्द्रिकया सर्वेषामप्यानन्दः कृतः । कुमुदानां तु विशेषत इति भावः । कार्येण कारणानुमानम् । ताण्डविका, अर्शआद्यजन्तान्मत्वन्ताद्वा ताण्डवशब्दात् 'तत्करोति–' इति ण्यन्ताण्वुल् । अशनमशिः, 'इक्कृष्यादिभ्यः' इतीकि अशिमर्हतीति दण्डादित्वाद्यत् । 'आश्या' इति च पाठः ॥

ज्योत्स्नापयःक्ष्मातटवास्तुवस्तु-
च्छायाछलच्छिद्रधरा धरायाम् ।
शुभ्रांशुशुभ्रांशकराः कलङ्क-
नीलप्रभामिश्रविभा विभान्ति ॥ ७२ ॥

ज्योत्स्नेति ॥ शुभ्रांशोश्चन्द्रस्य शुभ्रांशा धवलभागाश्च ते कराश्च किरणास्ते धरायां भूम्यां कलङ्कस्य नीलीभिः प्रभाभिर्मिश्रा विभा कान्तिर्येषां ते कलङ्कनीलकान्तिच्छुरिता इव विभान्ति । यतः कीदृशाः—ज्योत्स्नैव पयो जलं दुग्धं वा यस्मिन्नादृशं क्ष्मातटं दुग्धधवलचन्द्रिकाधवलीकृतं भूतलं तदेव वास्तु वसतिगृहं येषां तानि वस्तूनि वृक्षादिपदार्थास्तेषां छाया छलं येषां तादृशानि छिद्राणि प्रकाशेन रिक्तत्वाद्विलानि पदार्थप्रतिच्छायारूपाणि तानि धरन्तीति तादृशाः चन्द्रिकाधवलिताः पदार्थाश्चन्द्ररश्मय एव, वृक्षादिप्रतिच्छायाश्चन्द्रकलङ्कनीलरश्मय एवेति धरायामपि निपतिताश्चन्द्रकिरणा नीलधवला एव शोभन्त इत्यर्थः । अन्यस्य करा हस्ताः कलङ्कवन्नीलस्य नीलमणेः प्रभया मिश्रकान्तयो नीलमणियुक्ताङ्गुलीयकप्रभामिश्रा विभान्ति । 'शुभ्रांशुशुभ्रांशु–' इति पाठेऽपि 'अंशुर्लेशे रवे रश्मौ' इत्यभिधानादंशुशब्दस्य लेशवाचित्वात्स एवार्थः । ज्योत्स्नैव पयो जलं तस्य क्ष्मा भूमिस्तस्यास्तटं तदेव वास्तु निवासस्थानं येषां तेषां वस्तूनां छायाया व्याजेन छिद्राणि धरन्तीति वा ॥

कियान्यथानेन वियद्विभाग-
स्तमोनिरासाद्विशदीकृतोयम् ।
अद्भिस्तथा लावणसैन्धवीभि-
रुल्लासिताभिः शितिरप्यकारि ॥ ७३ ॥

कियानिति ॥ उदितमात्रेणानेन चन्द्रेण तमोनिरासाद्धेतोः कियान् किंचिन्मात्रोयं वियद्विभागः पूर्वाकाशदेशो यथा विशदीकृतः तथा चन्द्रकिरणैरुल्लासिताभिर्वृद्धिं प्रापिताभिर्लावणसैन्धवीभिरद्भिः कियानयं वियद्विभागः शितिः श्यामोऽप्यकारि । अप्रौढप्रभे चन्द्रे पूर्वाकाशदेशस्तिमिरनिरासाद्धवलो भवति, ततो निरस्तस्य च तमसः प्रतीच्यां घनीभूतत्वात्पश्चिमाकाशदेशः श्यामलो भवतीति । तत्रेयमुत्प्रेक्षा । समुद्रजलं च नीलं, पूर्वाकाशदेश एव नीलैः समुद्रजलैः पुनर्नीलोप्यकारीति वा । लावणसैन्धवीभिः लवणसिन्धोरिमाः 'तस्येदम्' इत्यणि 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' इत्युभयपदवृद्धिः ॥

गुणौ पयोधेर्निजकारणस्य
न हानिवृद्धी कथमेतु चन्द्रः ।
चिरेण सोयं भजते तु यत्ते
न नित्यमम्भोधिरिवात्र चित्रम् ॥ ७४ ॥

गुणाविति ॥ चन्द्रो निजकारणस्य पयोधेर्हानिवृद्धिरूपौ गुणौ कथं नैतु प्राप्नोतु, अपितु कार्यगुणानां कारणगुणपूर्वकत्वनियमादवश्यमपचयोपचयौ चन्द्रं प्राप्नुत इति युक्तमेवेत्यत्र न किंचिच्चित्रमित्यर्थः । तर्हि कुत्र चित्रमित्याशङ्क्याह—सोयं चन्द्रस्ते हानिवृद्धी यच्चिरेण पक्षान्तपरिमितेन बहुना कालेन भजते, नतु अम्भोधिरिव नित्यं प्रत्यहं भजते, अत्र विषये चित्रमित्याश्चर्यम् । समुद्रो यथा प्रत्यहं हानिवृद्धी भजते, तथा पुत्रोपि चन्द्रो नेत्याश्चर्यमित्यर्थः ॥

आदर्शदृश्यत्वमपि श्रितोऽय-
मादर्शदृश्यां न बिभर्ति मूर्तिम् ।
त्रिनेत्रभूरप्ययमत्रिनेत्रा-
दुत्पादमासादयति स्म चित्रम् ॥ ७५ ॥

आदर्शेति ॥ अयं चन्द्रं आदर्शवद्दृश्यत्ववृत्तत्वादिना रमणीयत्वं श्रितो भजमानोप्यादर्शवद्दृश्यां रमणीयां मूर्तिं न बिभर्ति चित्रम् । यो ह्यादर्शवद्दृश्यो भवति स एवादर्शवद्दृश्यां मूर्तिं न बिभर्ति तद्वद्दृश्यो न भवतीति विरोधादाश्चर्यमित्यर्थः । अथच—दर्पणवद्दृश्यत्वं श्रितोप्यादर्शं दर्शमभिव्याप्य दृश्याममावास्यायां दर्शनयोग्यां मूर्तिं न बिभर्ति । इदानीं पूर्णत्वेन दृश्यमानोपि दर्शे लेशेनापि न दृश्यते इत्यर्थ इति विरोधपरिहारः । दर्पणवद्दृश्यत्वं श्रितोपि आदर्शं दर्शं मर्यादीकृत्य कृष्णचतुर्दशीमभिव्याप्य दृश्यां मूर्तिं न बिभर्ति, अपितु तावत्पर्यन्तं दृश्यो भवत्येवेति वा । तथा—अयं चन्द्रस्त्रिनेत्राद्भवति तादृस्त्रिनेत्रादुत्पन्नोपि न त्रिनेत्रोऽत्रिनेत्रः । तस्मात्त्रिनेत्रव्यतिरिक्तात्सकाशादुत्पादमुत्पत्तिमासादयति स्म प्रापेत्येतदपि चित्रम् । त्रिनेत्रादुत्पन्नोऽपि त्रिनेत्रादुत्पन्नो न भवतीत्याश्चर्यमित्यर्थः । अथ च—त्रिनेत्रादुत्पन्नोप्यत्रेर्नेत्रादुत्पत्तिमापेत्येतदपि विरुद्धम् । अथ च-त्रिनेत्रो भूर्धसतिस्थानं यस्य तादृशः, तथा—अत्रेर्मुनेर्नेत्राच्चित्रमाश्चर्यरूपमुत्पादं प्रापेति विरोधप-

रिहारः । सहजसौन्दर्यमाश्रयमाहात्म्यं कुलस्य माहात्म्यं चानेन चन्द्रस्य वर्णितम् । चन्द्रस्यात्रिनेत्रसमुद्भूतत्वं पुराणप्रसिद्धम् ॥

इज्येव देवव्रजभोज्यऋद्धिः
शुद्धा सुधादीधितिमण्डलीयम् ।
हिंसां यथा सैव तथाङ्गमेषा
कलङ्कमेकं मलिनं बिभर्ति ॥ ७६ ॥

इज्येति ॥ देवानां व्रजैः समूहैर्भोज्या पेया ऋद्धिः समृद्धिर्यस्याः सा शुद्धा धवला इयं सुधादीधितेरमृतकरस्य चन्द्रस्य मण्डली इज्येव याग इव शोभत इति शेषः । इज्यापि देवव्रजभोज्यपुरोडाशादिसमृद्धिः शुद्धा पवित्रा च भवति । तथैषा चन्द्रमण्डली कलङ्काख्यमेकं मध्यवर्तिनमङ्गमवयवं मलिनाकारं तथा बिभर्ति, यथा सैव इज्यैव पूर्वोक्तगुणविशिष्टा सत्यप्येकं पशुहिंसात्मकमङ्गं कर्मसाधनं मलिनं पापहेतुं बिभर्ति । परोपकारशीलायाः सर्वात्मना शुद्धाया अपि चन्द्रमण्डल्या दैवादेकमङ्गं मलिनं जातमित्यर्थः । यागे हि हिंसामात्रमेव मालिन्यम् । 'मुधाङ्गम्–' इति पाठे—कलङ्करूपमेकमङ्गं मलिनं वृथैव बिभर्ति । शुद्धाया मालिन्ययोगस्यानौचित्यादित्यर्थः । शुद्धस्यापि श्रौतधर्मस्य सांख्यैर्दोषारोपणान्मालिन्यं मुधैवेत्यर्थः । इज्या, 'व्रजयजोः–' इति क्यप् ॥

एकः पिपासुः प्रवहानिलस्य
च्युतो रथाद्वाहनरङ्कुरेषः ।
अस्त्यम्बरेऽनम्बुनि लेलिहास्यः
पिबन्नमुष्यामृतबिन्दुवृन्दम् ॥ ७७ ॥

एक इति ॥ एष मृगाङ्के दृश्यमानः प्रसिद्धः एकः पिपासुस्तृषाक्रान्तः सप्तवायुस्कन्धमध्यवर्तिनः प्रवहाख्यस्यानिलस्य मृगवाहनस्य गगनचारिणो रथाच्च्युतो वाहनभूतो रङ्कुर्मृगोऽनम्बुनि निर्जलेऽम्बरे लेलिहास्यो नितरां पौनःपुन्येन वास्वादनकारि मुखं यस्य तादृशो भवन्नमुष्य चन्द्रस्यामृतबिन्दुवृन्दं पिबन्सन्नस्ति । तृषाक्रान्तो रथं परित्यज्य पतितो निर्जलेपि गगने चन्द्रामृतबिन्दुवृन्दमास्वादयन्वायुवाहनमृग एवायम्, नतु कश्चित्कलङ्कमृगो नामेत्यर्थः । अस्तीति वर्तमानप्रत्ययेनामृतास्वादनेन चन्द्रं परित्यज्य गन्तुमशक्तोऽद्यापि वर्तत इति सूचितम् । एवमन्योपि तृषाक्रान्तो निर्जले देशे प्रस्रवणादेः पतज्जलबिन्दुवृन्दं पिबन्ननुपशान्तपिपासो लेलिहास्यः संस्तत्रैव चिरं तिष्ठति । सप्तवायुस्कन्धाः पुराणप्रसिद्धाः । लेलिहेति, नितरां पुनःपुनर्वा लेढीत्यर्थे यङि पचाद्यचि 'यङोचि च' इति यङो लुक् ॥

अस्मिञ्शिशौ न स्थित एव रङ्कु-
र्यूनि प्रियाभिर्विहितोपदायम् ।
आरण्यसंदेश इवौषधीभि-
रङ्के स शङ्के विधुना न्यधायि ॥ ७८ ॥

अस्मिन्निति ॥ शिशौ बाले एककलात्मकेऽस्मिंश्चन्द्रे रङ्कुर्मृगो न स्थितो नासीदेव तस्यां दशायामदर्शनात् । किंतु प्रियाभिरोषधीभिर्यूनि तरुणे पूर्णावयवेऽस्मिंश्चन्द्रेऽयं रङ्कुरुपदेवं विहिता प्रेषिता । कीदृशी—अरण्ये भवः संदिश्यते प्रस्थाप्यते संदेशस्तद्रूपा । अरण्यभवानां संदेशरूपा वा । वयं भवत्प्रिया निर्जने वने मृगैः सह वसामः, त्वं तु स्वर्गे विजयी सुखेन वर्तसे इति गूढार्थोप(पा)लम्भसूचिकेति यावत् । अनन्तरं विधुना प्रेयसीसंदेशरूपः स रङ्कुरङ्के मध्ये, अथच—उत्सङ्गे, प्रियाप्रेमभरेण न्यधायि स्थापित इत्यहं शङ्के । अन्यापि प्रिया तरुणं प्रियं प्रति कंचित्संदेशमुपदारूपेण प्रेषयति स च तं हृदयादौ धारयति । ओषध्यो हि वनवासिन्यस्तदनुरूपमेव संदेशं मृगं स्वप्रिये चन्द्रे प्रेषितवत्यः । आरण्यसंदेश इवायमुपदा प्रहितेति वा । 'यदा–' इति पाठे—यदाप्रभृति प्रेषितः, तदाप्रभृति तारुण्यदशायां चन्द्रेणायमङ्के न्यधायि, नतु पूर्वमित्यर्थः । आरण्यः, भवार्थेऽण् ॥

अस्यैव सेवार्थमुपागताना-
मास्वादयन्पल्लवमोषधीनाम् ।
धयन्नमुष्यैव सुधाजलानि
सुखं वसत्येष कलङ्करङ्कुः ॥ ७९ ॥

अस्येति ॥ एष कलङ्करङ्कुर्विरहपीडितत्वादस्यैव चन्द्रस्य सेवार्थमुपागतानामोषधीनां पल्लवमास्वादयन् । तथा—अमुष्यैव सुधारूपाणि जलानि धयन् पिबन् सुखमनायासलब्धवृत्तिरिव वसति । आहारलोभादत्रैव वसतीत्यर्थः । अन्योपि मृगो जलकिसलययुते देशे सुखेन ग्रसति कदाचिदपि न त्यजति । पल्लवम्, जात्येकवचनम् ॥

रुद्रेषुविद्रावितमार्तमारा-
त्तारामृगं व्योमनि वीक्ष्य बिभ्यत् ।
मन्येऽयमन्यः शरणं विवेश
मत्वेशचूडामणिमिन्दुमेणः ॥ ८० ॥

रुद्रेति ॥ दक्षयज्ञे वीरभद्रावतारस्य रुद्रस्येषुणा विद्रावितम् । अत एव—आर्तं तारारूपं मृगं व्योमनि आरात्समीपे दूरे वा वीक्ष्य बिभ्यत् त्रस्यन् अयमन्योऽपर एण इन्दुमीशस्य चूडामणिं ज्ञात्वा शरणं विवेश । शिवेन शिरसि स्थापितत्वादयं मान्य इत्येतदाश्रयेण रुद्रान्मामयं रक्षिष्यत्येवेत्याशयेनान्यो मृगश्चन्द्रं शरणं प्रविष्ट इत्यर्थः । इत्यहं मन्ये । अन्योपि सजातीयं कस्माच्चिद्भीतं दृष्ट्वा स्वयमपि भीतः सन्कमपि शरणं याति । 'गत्वा' इत्यपि पाठः । तारामृगस्य रुद्रेषुविद्रवणं काशीखण्डादौ ज्ञातव्यम् ॥

पृष्ठेऽपि किं तिष्ठति नाथ नाथ
रङ्कुर्विधोरङ्क इवेति शङ्का ।
तत्त्वाय तिष्ठस्व मुखे स्व एवं
यद्द्वैरथे पृष्ठमपश्यदस्य ॥ ८१ ॥

पृष्ठ इति ॥ हे नाथ, विधोरङ्क इव यथा चन्द्रस्योत्सङ्गे कलङ्कमृगो वर्तते, तथा रङ्कुः पृष्ठेपि पश्चाद्भागे किं तिष्ठति अथ न तिष्ठति इति तवाशङ्का चेद्वर्तते इति शेषः । तर्हि त्वं तत्त्वाय याथात्म्यज्ञानार्थं स्वे निजे मुखे एव विषये तिष्ठस्व । निजमुखमेव निर्णयं पृच्छेत्यर्थः । यत्त्वन्मुखं द्वैरथ समानशोभाभिलाषाद्वि-

रथसंबन्धिनि द्वन्द्वयुद्धेऽस्य त्वन्मुखादज्यमानत्वात्पलायमानस्य चन्द्रस्य पृष्ठं पश्चाद्भागमपश्यत्। तस्मात्तत्त्वमुखमेव निर्णेतृत्वेन पृच्छेत्यर्थः। त्वन्मुखं चन्द्रादधिकमिति भङ्ग्या नलमुखवर्णनं मे कृतम्। तत्त्वाय तत्त्वं ज्ञातुं, 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति चतुर्थी, तादर्थ्यमात्रे वा। तिष्ठस्व, स्थेयाख्यायां तङ्। स्वे, वैकल्पिकत्वात्स्मिन्नभावः॥

उत्तानमेवास्य वलक्षकुक्षि
देवस्य युक्तिः शशमङ्कमाह।
तेनाधिकं देवगवेष्वपि स्यां
श्रद्धालुरुत्तानगतौ श्रुतायाम्॥ ८२॥

उत्तानमिति॥ युक्तिरर्थापत्तिरनुमानं वास्य देवस्य चन्द्रस्य मध्यवर्तिनमङ्कं कलङ्करूपं शशमुत्तानं स्वर्गसंमुखमस्मदादिदृश्यमानपृष्ठभागमाह ब्रूते। यतो वलक्षकुक्षि धवलोदरम्। यद्ययं शशकोऽस्मत्संमुखोदराऽनुत्तानोऽभविष्यत्, तर्हि मध्यवर्तिशशकोदरस्य धवलत्वाच्चन्द्रमध्यभागोपि धवलोऽभविष्यत्, नच तथा दृश्यते, किंतु मलिनः। तस्मादुत्तान एव शशकश्चन्द्रेस्तीति युक्तिराहेत्यर्थः। तेन चन्द्रशशकनिश्चितोत्तानत्वेनैव हेतुनाहं देवगवेष्वपि सुरभीप्रभृतिषु विषये वेदे श्रुतायामुत्तानगतौ सुरलोकसंमुखचरणतया गमने विषये पूर्वापेक्षयाधिकमतितरां श्रद्धालुरास्तिक्ययुक्ता स्याम्। 'उत्ताना वै देवगवाश्चरन्ति' इति श्रुतिर्न्यायोपपन्नार्थतया सत्येवेयहमिदानीमधिकं मन्य इत्यर्थः। देवगवेषु 'गोरतद्धितलुकि' इति टच्। 'देवगवीषु' इति पाठे टित्त्वान्ङीप्॥

उक्तरीत्योत्तानगतौ सिद्धायामपि शशकस्य रक्तपृष्ठत्वान्नीलत्वेन प्रतीतिः कथमित्यत आह—

दूरस्थितैर्वस्तुनि रक्तनीले
विलोक्यते केवलनीलिमा यत्।
शशस्य तिष्ठन्नपि पृष्ठलोम्नां
तन्नः परोक्षः खलु रागभागः॥ ८३॥

दूरेति॥ दूरस्थितैर्द्रष्टृभी रक्तनीले मिश्रितोभयवर्णे वस्तुनि केवलस्यैवरागभागो नीलिमैव यद्यस्माद्विलोक्यते तत्तस्मात्कारणाच्छशस्य पृष्ठवर्तिरोम्णां तिष्ठन्नपि रागभागो रक्तिमांशः नोऽस्माकमतिदूरस्थितानां खलु निश्चितं परोक्षो दृग्गोचरो न भवति, किंतु नीलिमैव दृश्यत इत्यर्थः। तिष्ठन्वर्तमानोपि परोक्ष इति विरोधाभासः। दूरस्थत्वान्न दृश्यत इति तत्परिहारः। खलुप्रेक्षायां वा॥

भङ्क्तुं प्रभुर्व्याकरणस्य दर्प
पदप्रयोगाध्वनि लोक एषः।
शशो यदस्यास्ति शशी ततोऽय-
मेवं मृगोऽस्यास्ति मृगीति नोक्तः॥ ८४॥

भङ्क्तुमिति॥ एष कविर्लोकः पदानां सुप्तिङन्तानां प्रयोगाध्वनि विषये व्याकरणस्य प्रकृतिप्रत्ययविभागपूर्वं शब्दव्युत्पादनकारिणः शास्त्रस्य मदधीन एव सकलशब्दप्रयोग इति दर्पं गर्वं, यद्वा—लक्षणया वैयाकरणस्य व्याकरणाधीन एव सकलशब्दप्रयोग इति गर्वं भङ्क्तुं त्याजयितुं प्रभुः समर्थः। यद्यस्माद्धेतोरयं चन्द्रः शशोऽस्यास्ति ततो हेतोः शशी यथोक्तो लोकेनेति शेषः। एवममुनैव प्रकारेण मृगोऽस्यास्ति मृगीति नोक्तः। शशोस्यास्तीति मतुवर्थे 'अत इनिठनौ' इतीनौ यथायं शशीत्युच्यते, तथा तेनैव सूत्रेण मृगोऽस्यास्तीत्यत्रेनेः प्राप्तौ सत्यामपि मृगीति नोक्तः। तस्मादतिव्याप्त्यादिदोषाद्व्याकरणमूल एव लोकप्रयोग इति नियमो न युक्तः किंतु कृत्तद्धितसमासानामभिधानं नियामकम्। लक्ष्यमुद्दिश्य लक्षणप्रवृत्तिः, नतु लक्षणमुद्दिश्य लक्ष्यप्रवृत्तिरिति। तस्मात्प्रयोगमूलं व्याकरणमिति व्याकरणाल्लोक एव प्रयोगे बलीयानिति भावः। अप्रस्तुतप्रशंसा॥

यावन्तमिन्दुं प्रतिपत्प्रसूते
प्रासावि तावानयमब्धिनापि।
तत्कालमीशेन धृतस्य मूर्ध्नि
विधोरणीयस्त्वमिहास्ति लिङ्गम्॥ ८५॥

यावन्तमिति॥ शुक्लप्रतिपद्यावन्तं यत्प्रमाणमेककलमिन्दुं प्रसूते, अब्धिनापि तावांस्तत्प्रमाण एककल एवायं प्रासावि, ननु पूर्ण इत्यर्थः। एतत्कथं ज्ञातमित्यत आह—तत्कालं तस्मिन्काले समुद्रादुत्पत्तेरवसर एव ईशेन मूर्ध्नि धृतस्य विधोरणीयस्त्वं नितरां काश्यमेवेहैककलत्वे लिङ्गं ज्ञापकमनुमापको हेतुरस्ति। यदि समुद्रेण संपूर्णोऽयमजनिष्यत, तर्हि शिवेनापि तदानीमेव शिरसि तावानेवाधास्यत, नतु तथा, तस्मात्प्रतिपदैककलः प्रसूतः, तावान्समुद्रेणापीति प्रतिपदुत्पन्नोप्ययमेककलत्वादेव न दृश्यत इति भावः॥

आरोप्यते चेदिह केतकत्व-
मिन्दौ दलाकारकलाकलापे।
तत्संवदत्यङ्कमृगस्य नाभि-
कस्तूरिका सौरभवासनाभिः॥ ८६॥

आरोप्यत इति॥ केतकत्वमिहेन्दौ चेद्यदि आरोप्यते यतो दलाकारः केतकीपत्रसदृशः धवलः कलानां कलापः समूहो यस्य तस्मिन्। ततस्मात्केतकदलवच्छुभ्रकलाकलापत्वाच्चन्द्रः केतकमेवेति रूप्यत इत्यर्थः। तत्तर्हि अङ्कमृगस्य मृगत्वेन नाभिकस्तूरिका कर्त्री आरोपितं तत्केतकत्वं कर्मीभूतं सौरभवासनाभिः कृत्वा संवदति। चन्द्रे केतकत्वं युक्तमित्यनुमन्यत इत्यर्थः। 'नाभिः' इति पाठे—अङ्कमृगस्य नाभिः कर्त्री कस्तूरिकासंबन्धिसौरभवासनाभिः कृत्वा संवदतीति वा। केतक्यां कस्तूरीपरिमलो वर्तते, चन्द्रे कलङ्कमृगनाभिरूपा कस्तूरी वर्तते। तस्माच्चन्द्रे केतकत्वमारोपयितुं युक्तमित्यर्थः। तत्केतकत्वमङ्कमृगस्य नाभिकस्तूरिकायाः परिमलस्य वासनाभिः संक्रमणैः कृत्वा संवदति युक्तया संवादं प्राप्नोत्येवेति वा। 'ताभिः' इति पाठे—अतिप्रसिद्धाभिर्वासनाभिः॥

आसीद्यथाज्यौतिषमेष गोलः
शशी समक्षं चिपिटस्ततोऽभूत्।
स्वर्भानुदंष्ट्रायुगयन्त्रकृष्ट-
पीयूषपिण्याकदशावशेषः॥ ८७॥

आसीदिति ॥ एष शशी यथाज्यौतिषं गर्गादिमुनिप्रणीतग्रहगणितशास्त्राननिक्रमेण गोलः कपित्थफलवद्वर्तुलोपरितनभाग एव पूर्वमासीत् । तर्हीदानीं कथमन्यथा दृश्यत इत्याशङ्क्याह—ततोऽनन्तरं कालक्रमेण स्वर्भानो राहोरूर्ध्वाधोभागस्थितदंष्ट्रायुगमेव यन्त्रं निष्पीडनचक्रं तेन कृष्टं निष्कृष्य गृहीतं पीयूषममृतं यस्य, यस्माद्वा, स चासौ पिण्याकश्च तस्य दशा गृहीतरसनीरसतिलादिपिण्डीमात्ररूपतावशेष उद्धृतो भागो यस्यैवंभूतः सन् चिपिटः पर्पटप्रायोऽभूदिति समक्षमिदानीं प्रत्यक्षेणानुभूयत एवेत्यर्थः । ज्योतिरधिकृत्य कृतो ग्रन्थो ज्यौतिषम्, 'अधिकृत्य कृते ग्रन्थे' इत्यण् । ततो यथार्थेऽव्ययीभावः । ज्योतिःशास्त्रादौ त्रयोदशाङ्गुलश्चन्द्रः षोडशाङ्गुलस्य सूर्यस्याधोभागस्थो जलपूर्णकाचकूपिकाप्रायो यथोदितः, तथैव पूर्वमासीदित्युक्तम् ॥

असावसाम्याद्वितनोः सखा नो
कर्पूरमिन्दुः खलु तस्य मित्रम् ।
दग्धौ हि तौ द्वावपि पूर्वरूपा-
द्यद्वीर्यवत्तामधिकां दधाते ॥ ८८ ॥

असाविति ॥ असौ चन्द्रो वितनोरनङ्गस्य सखा नो भवति । कुतः—असाम्यादसादृश्यात् । 'विवाहमैत्रीवैराणि भवन्ति समशीलयोः' इति शास्त्रादनयोः साङ्गानङ्गयोः सादृश्याभावान्मैत्री न संगच्छत इत्यर्थः । तर्ह्यनयोर्लोकप्रसिद्धा मैत्री कथमित्यत आह—खलु निश्चितं कर्पूरापरनामैवेन्दुस्तस्यानङ्गस्य मित्रम्, तावतैव लोकप्रसिद्धिरिति विरोधाभाव इत्यर्थः । तत्र हेतुमाह—यद्यस्मात्तौ द्वावपि कामकर्पूरौ दग्धौ सन्तौ पूर्वरूपाददग्धदशायाः सकाशादधिकां वीर्यवत्तां हि स्पष्टं दधाते । पक्वो हि कर्पूरो वीर्यवत्तरो भवति, कामोपि दाहानन्तरमधिकं वीर्यवाननुभूयते । तदुक्तम्—'कर्पूर इव दग्धोपि शक्तिमान्यो जने जने । नमोस्त्ववार्यवीर्याय तस्मै कुसुमधन्वने ॥' इति । तस्मात्कामकर्पूरयोर्मैत्री युक्ता । 'अथ कर्पूरमस्त्रियाम् । घनसारश्चन्द्रसंज्ञः' इत्यमरः । अस्त्रियाम् इत्यमरवचनात्कर्पूरशब्दो नपुंसकोऽपि ॥

स्थाने विधोर्वा मदनस्य सख्यं
स शंभुनेत्रे ज्वलति प्रलीनः ।
अयं लयं गच्छति दर्शभाजि
भास्वन्मये चक्षुषि चादिपुंसः ॥ ८९ ॥

स्थान इति ॥ वाथवा विधोर्मदनस्य सख्यं स्थाने । युक्तमेवेत्यर्थः । तत्र हेतुः—स कामः ज्वलति देदीप्यमाने शंभुनेत्रे प्रलीनः प्रकर्षेण लीन एकतां प्रलयं गतः । विनष्ट इत्यर्थः । अयं चन्द्रश्च दर्शभाजि दर्शनं दर्शस्तद्व्यापारयुक्ते, अथच—अमावास्यां गते, भास्वन्मये सूर्यरूपे आदिपुंसो विष्णोश्चक्षुषि लयमेकतां गच्छति । दर्शे हि चन्द्रः सूर्यं गच्छति, अतएव दर्शस्य सूर्येन्दुसंगम इति नाम । सूर्यो विष्णोर्दक्षिणं चक्षुः । तथाच तुल्ययोर्हरिहरयोर्नेत्रयोर्द्वयोरपि चन्द्रकामयोः प्रलीनत्वाद्दर्शे चन्द्रस्याप्यनङ्गतया च समशीलत्वादुचितैव मैत्रीत्यर्थः । तथाच कामस्य चन्द्रसखिताप्रसिद्धिर्मुख्यैव युक्तेति भावः ॥

नेत्रारविन्दत्वमगान्मृगाङ्कः
पुरा पुराणस्य यदेष पुंसः ।
अस्याङ्क एवायमगात्तदानीं
कनीनिकेन्दिन्दिरसुन्दरत्वम् ॥ ९० ॥

नेत्रेति ॥ पुरा पूर्वं यदा यस्मिन्काले मृगाङ्कः पुराणस्य पुंसः श्रीविष्णोर्नेत्रारविन्दत्वं नयनकमलत्वमगात् । तदा तस्मिन्काले अस्य विष्णुनेत्रारविन्दभूतस्यास्य चन्द्रस्यायमङ्कः कलङ्क एव कनीनिकाया इन्दिन्दिरस्य भ्रमरस्य सुन्दरत्वमगात्प्रापत् । 'अदात्' इति पाठे—अयं श्रीविष्णुरस्य चन्द्रस्याङ्के विषये कनीनिकेन्दिन्दिरसुन्दरत्वमदात् । नेत्रे हि कनीनिकया भाव्यम्, अरविन्दे च भ्रमरेण । तथाचास्य नेत्रारविन्दरूपत्वादङ्कमेवोभयं श्रीविष्णुः कृतवानित्यर्थः । अङ्क एव कनीनिका कर्त्री भ्रमरेण सुन्दरत्वमस्यादादिति वा । 'इन्दिन्दिरालिषट्चरणचञ्चरीकालिनो द्विरेफाः स्युः' इति हलायुधः ॥

देवेन तेनैष च काश्यपिश्च
साम्यं समीक्ष्योभयपक्षभाजौ ।
द्विजाधिराजौ हरिणाश्रितौ च
युक्तं नियुक्तौ नयनक्रियायाम् ॥ ९१ ॥

देवेनेति ॥ तेन देवेन श्रीविष्णुना एष चन्द्रः काश्यपिर्गरुडश्चैतौ द्वावपि साम्यं समानधर्मतां समीक्ष्य तुल्यायां नयनक्रियायां क्रमेण नेत्रव्यापारे वाहनव्यापारे च यन्नियुक्तौ, तद्युक्तमुचितमित्यर्थः । चावन्योन्यसमुच्चये । साम्यमेवाह—उभयपक्षौ शुक्लपक्षकृष्णपक्षौ भजति चन्द्रः, गरुडस्तु द्वौ छदौ भजति, तादृशौ द्वावपि । तथा—द्विजानां ब्राह्मणानां राजा चन्द्रः । गरुडस्तु पक्षिणां राजा । तादृशौ । तथा हरिणेन कलङ्कमृगेणाश्रितश्चन्द्रः, गरुडस्तु हरिणा विष्णुना वाहनार्थेनाश्रितः, तादृशौ । एवमुभयोः साम्यात्सम एव व्यापारे यन्नियुक्तौ तदुचितं कृतमिति भावः । काश्यपिः, बाह्वादित्वादिञ् ॥

यैरन्वमायि ज्वलनस्तुषारे
सरोजिनीदाहविकारहेतोः ।
तदीयधूमौघतया हिमांशौ
शङ्के कलङ्कोऽपि समर्थितस्तैः ॥ ९२ ॥

यैरिति ॥ यैः पण्डितैः सरोजिन्याः दाहरूपाद्विकाराद्धेतोस्तुषारे ज्वलनोऽग्निरन्वमायि । तुषारः साग्निर्भवितुमर्हति संबन्धे सति दाहकारित्वात्, साग्निभूदेशवत्, तप्तोदकवद्वेति हिमे विषये वह्निरनुमितमित्यर्थः । तैः पण्डितैर्हिमांशौ तुषारमये चन्द्रे वर्तमानः कलङ्कोपि तदीयधूमौघतया हिमाग्निसंबन्धिधूमसमूहरूपत्वेन समर्थित इत्यहं शङ्के । वह्नौ हि धूमेन भाव्यम्, चन्द्रश्च तुषारमयत्वादुक्तरीत्या वह्निमान्, तथा च—कलङ्को धूमसमूह एवेति तैः समर्थितमित्यहं संभावयामीत्यर्थः ॥

१ [illegible] सुखावबोधा ।

स्वेदस्य धाराभिरिवापगाभि-
व्यर्याप्ता जगद्भारपरिश्रमार्ता ।
छायापदेशाद्वसुधा निमज्ज्य
सुधाम्बुधावुज्झति खेदमत्र ॥ ९३ ॥

स्वेदस्येति ॥ वसुधा छायापदेशात्स्वीयप्रतिबिम्बव्याजेन सुधाम्बुधावत्र चन्द्रे निमज्ज्यान्तः प्रविश्य खेदं जगद्भारपरिश्रमपीडामुज्झतीव । किंभूता—जगद्भारवहननिमित्तः परिश्रमस्तेनार्ता नितरां पीडिता । अत एव—स्वेदस्य धाराभिरिवापगाभिर्व्याप्ता समन्तात्पूरिता । अमृतसमुद्रनिमज्जने हि खेदो गच्छत्येव यस्माच्च तत्तन्नदीरूपः स्वेदः, तस्याः श्रमहरणे सुधासमुद्र एवोचितः । एतेन कलङ्कस्य मृगशशभूच्छायाप्रभृति मतभेदा वर्णिताः ॥

ममानुमेवं बहुकालनीली-
निपातनीलः खलु हेमशैलः ।
इन्दोर्जगच्छायमये प्रतीके
पीतोपि भागः प्रतिबिम्बितः स्यात् ॥९४॥

ममेति ॥ हेमशैलो मेरुः खलु निश्चितं सर्गमारभ्याद्ययावदतिक्रान्तेन बहुना कालेन कृत्वा नीलीनिपातः श्यामिकालगनं तेन कृत्वा वा नीलः बहुकालीनत्वान्नीलमलसंबन्धान्नीलवर्णः संजातोस्तीति, एवंप्रकारा ममानुमानुमानम्, एवमहं संभावयामीत्यर्थः । अन्यथा यदि स्वर्णाचलः कालभूयस्त्वेन न नीलीभूतः किंतु हेममयत्वात्पीत एव स्यात्, तर्हि इन्दोर्जगच्छायमये जगत्प्रतिबिम्बभूते कलङ्करूपे प्रतीकेऽवयवे मेरोः पीतोऽपि भागः प्रतिबिम्बितः स्यात्पीतोंऽशोपि दृश्येत, तस्मात्स्वर्णाचलो नील एव जातः । तथाच सकलाया अपि भूमेर्नीलवर्णत्वात्तत्प्रतिबिम्बरूपः कलङ्कोऽपि नील एव युक्त इत्यर्थः । जगच्छाये, 'विभाषा सेना–' इति पण्डत्वम् ॥

मावापदुन्निद्रसरोजपूजा
श्रियं शशी पद्मनिमीलितेजाः ।
अक्षिद्वयेनैव निजाङ्करङ्को-
रलंकृतस्तामयमेति मन्ये ॥ ९५ ॥

मेति ॥ शशी उन्निद्रैर्विकसितैः सरोजैः कृत्वा या पूजा तज्जनितां श्रियं मा अवापत् मास्म लभत । यतः—पद्मनिमीलि कमलसंकोचकं तेजो यस्य सः । विकसितानामपि कमलानां पूजार्थं चन्द्रसविधे क्रियमाणानां चन्द्रतेजसा संकोचस्यैव संभवादुन्निद्रसरोजपूजाश्रियं कथं प्राप्नोति । प्रकारान्तरेण प्राप्नोतीत्याह—निजाङ्कभूतस्य रङ्कोर्मृगस्याक्षिद्वयेनैवालंकृतोऽयं चन्द्रस्तामुन्निद्रसरोजपूजाश्रियमेति प्राप्नोति तन्नयनयोरुन्निद्रकमलरूपत्वादित्यर्थ इत्यहं मन्ये । अङ्कमृगनेत्राभ्यां कृत्वायं चन्द्रो विकसितकमलाभ्यां पूजामिव शोभां प्राप्नोतीति भावः । एतेनेति वा ॥

य एष जागर्ति शशः शशाङ्के
बुधो विधत्ते क इवात्र चित्रम् ।
अन्तः किलैतत्पितुरम्बुराशे-
रासीत्तुरङ्गोपि मतङ्गजोपि ॥ ९६ ॥

य इति ॥ एष प्रत्यक्षदृश्यः शशः शशाङ्के जागर्ति स्फुरति अत्र विषये क इव बुधश्चित्रमाश्चर्यं विधत्ते, अपितु न कोपि । किल यस्मादेतत्पितुरम्बुराशेरन्तर्मध्ये उच्चैःश्रवःसंज्ञकस्तुरङ्गोऽप्यासीत् । ऐरावताख्यो मतङ्गजोऽप्यासीत् । यदीयपितुर्मध्येऽश्वगजादिकं भवति, तदीय(पुत्र)मध्ये शशमात्रसंभवे किमाश्चर्यमित्यर्थः ॥

गौरे प्रिये भातितमां तमिस्रा
ज्यौत्स्नी च नीले दयिता यदस्मिन् ।
शोभाप्तिलोभादुभयोस्तयोर्वा
सितासितां मूर्तिमयं बिभर्ति ॥ ९७ ॥

गौर इति ॥ तमिस्रा तमोबहुलास्य दयिता रात्रिर्गौरे प्रिये चन्द्रे विषये भातितमाम् । तथा—ज्यौत्स्नी च चन्द्रिकायुक्ता धवलास्य दयिता रात्रिर्नीले प्राणेशेस्मिंश्चन्द्रे नितरां शोभते । भिन्नवर्णे हि शोभेते इत्यर्थः । तस्माद्धेतोस्तमिस्राज्योत्स्न्योरुभयोरपि विषये स्वस्य शोभाप्राप्तेर्लोभादभिलाषात्तयोरेव वा पक्षयोर्या शोभाप्राप्तिस्तदभिलाषाद्धवलश्यामलवस्संबन्धात्तमिस्राज्योत्स्न्योः शोभया भवितव्यमिति । अयं चन्द्रः सितासितां धवलां श्यामलां च मूर्तिं बिभर्ति । वा इवार्थः । शोभाप्तिलोभादिवेत्यन्वयः । नीलभागे ज्यौत्स्नीं प्रियां धारयितुं धवले च तामसीमिति यथासंख्यम् ॥

वर्षातपानावरणं चिराय
काष्ठौघमालम्ब्य समुत्थितेषु ।
बालेषु तारकवकेष्विहैकं
विकस्वरीभूतमवैमि चन्द्रम् ॥ ९८ ॥

वर्षेति ॥ अहं बालेषु तनुषु सूक्ष्मरूपेष्वविकसितेषु चेह प्रत्यक्षदृश्येषु तारासु नक्षत्रेष्वेव कवकेषु छत्राकेषु मध्ये चिरकालोत्पन्नत्वाद्विकस्वरीभूतं विकसितमेकं छत्राकमेव चन्द्रमवैमि मन्ये । किंभूतेषु तारकवकेषु—चिराय बहुकालं वर्षास्वृतौ तपे ग्रीष्मर्तौ च, वर्षेषु जलवृष्टिषु आतपेषूष्णेषु च सत्सु अनावरणमनाच्छादितं काष्ठौघं दिक्समूहमेव दारुसमूहमालम्ब्य समुत्थितेषूत्पन्नेषु । वर्षाकाले ह्यनावृतेषु जलस्तिमितेषु पश्चादुष्णतप्तेषु च काष्ठेषु सूक्ष्मस्थूलानि छत्राकाणि भवन्ति । तथाच तारा अल्पकवकानि, चन्द्रस्तु स्थूलकवकमिवेत्युत्प्रेक्षा ॥

दिनावसाने तरणेरकस्मा-
न्निमज्जनाद्विश्वविलोचनानि ।
अस्य प्रसादादुडुपस्य नक्तं
तमोविपद्वीपवतीं तरन्ति ॥ ९९ ॥

दिनेति ॥ विश्वस्य जगतो विलोचनानि दिनावसाने तरणेः सूर्यस्याकस्मादसंभावितहेतोर्निमज्जनात्प्रतीचीसागरनीरप्रवेशाद्धेतो-

र्नक्तं रात्रौ तमोनिमित्तां स्खलनादिरूपां विपदमेव द्वीपवती महानदीमस्योडुपस्य चन्द्रस्य प्रकाशरूपात्प्रसादात्तरन्ति । चन्द्रेण तमो निरस्य सर्वं प्रकाशितमिति भावः । अन्येपि रात्रौ तरणेर्नौकाया अकस्मान्मज्जनाद्धेतोर्बुडनरूपामापन्नदीमुडुपस्याकस्मादागतस्याल्पयानपात्रस्य प्रसादात्तरन्ति ॥

किं नाक्ष्णि नोऽपि क्षणिकोऽणुकोऽयं
भानस्ति तेजोमयबिन्दुरिन्दुः ।
अत्रेस्तु नेत्रे घटते यदासी-
न्मासेन नाशी महतो महीयान् ॥ १०० ॥

किमिति ॥ नोऽस्माकममहतां पामराणामपि अक्ष्णि नेत्रविषये तेजोमयस्तेजोरूपो बिन्दुरेवायमिन्दुरकुल्या नयनप्रान्तचिपिटीकरणे धवलवर्तुलाकारेण भान् शोभमानः किं नास्ति, अपित्वस्मदादिनेत्रेऽपीन्दुर्वर्तत एव, परम्–अणुकोऽल्पीयान्, तथा क्षणिकः क्षणमात्रावस्थायी । यावच्चिपिटीकरणमेव दृश्यत इत्यर्थः । तस्मात्तस्य चन्द्रात्तस्य वैलक्षण्यं कथमत आह—अत्रेर्मुनेर्नेत्रे तु पुनस्तेजोमयबिन्दुरयमिन्दुर्महीयानितरापेक्षया नितरां महापरिमाण आसीत् । तथा मासेन कृत्वा नाशी प्राप्तविनाशश्चाभूदिति यत्, तद्घटते । एतद्युज्यत इत्यर्थः । यतः—कीदृशस्यात्रेः—महतो महानुभावस्य । 'सर्वं हि महतां महत्' इति न्यायेन महतोऽत्रेस्तेजोमयबिन्दुरप्ययमिन्दुर्महापरिमाणश्चिरकालस्थायी चेत्यस्मन्नेत्रवर्तितेजोमयबिन्दोरिन्दोर्वैलक्षण्यं युक्तमेवेति भावः । अणुकः 'अल्पे' इति कन् । नाशीति अस्त्यर्थे इनिः ॥

त्रातुं पतिं नौषधयः स्वशक्त्या
मन्त्रेण विप्राः क्षयिणं न शेकुः ।
एनं पयोधिर्मणिभिर्न पुत्रं
सुधा प्रभावैर्न निजाश्रयं वा ॥ १०१ ॥

त्रातुमिति ॥ मृतसंजीविन्यादय ओषधयः स्वशक्त्या स्वसामर्थ्येन निजरसवीर्यविपाकाभ्यां कृत्वा ओषधीशत्वात्पतिमेनं चन्द्रं क्षयिणं प्रतिदिनं कलाक्षयवन्तम्, अथच—क्षयरोगिणं सन्तं त्रातुं न शेकुः । तथा—विप्रा द्विजराजत्वाच्चिजस्वामिनं क्षयिणं मन्त्रेण श्रुतिसामर्थ्येन कृत्वा रक्षितुं न शेकुः । तथा—पयोधिरपि पुत्रं क्षयिणमेनं मणिभिरनेकप्रकारैरन्तःस्थैः रत्नैः कृत्वा रक्षितुं न शशाकेति वचनविपरिणामः । तथा—सुधापि स्वाधारभूतं क्षयिणमेनमजरामरत्वजनकैः प्रभावैः कृत्वा त्रातुं न शशाक । वा समुच्चये । ओषध्यादयः स्वशक्त्यादिरक्षणसाधने सत्यपि पतित्वात्पुत्रत्वाच्चिजाश्रयत्वाच्च क्षयाद्रक्षितुं समर्था न बभूवुरिति विशेषोक्त्या पूर्वकर्मजो रोगो महानुभावैरप्यपनेतुं न शक्यत इति व्यज्यते । अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव इत्योषध्यादीनां सामर्थ्यं प्रसिद्धम् ॥

मृषा निशानाथमहः सुधा वा
हरेदसौ वा न जराविनाशौ ।
पीत्वा कथं नापरथा चकोरा
विधोर्मरीचीनजरामराः स्युः ॥ १०२ ॥

मृषेति ॥ निशानाथस्य चन्द्रस्य महस्तेजः सुधा वा पीयूषमेवेति लोकवादो मृषा असत्य एव वा भवेत् । वा अथवा । यदि चन्द्रतेजः सुधेयेति लौकिकप्रवादः सत्य एव, तर्ह्यसौ चन्द्रतेजोरूपा सुधा जराविनाशौ जरामरणे न हरेद्विनाशयेदित्यङ्गीकार्यम् । चन्द्रतेजः सुधा नैवेति वाङ्गीकार्यम् । अथचैतद्रूपा सुधापि जरामरणे न नाशयतीत्यङ्गीकार्यमित्यर्थः । अपरथान्यथा यदि चन्द्रतेजः सुधेति प्रवादः सत्यः, तद्रूपा सुधा जरामरणे विनाशयेत्, तर्हि चकोराख्याः पक्षिणो विधोर्मरीचीन्पीत्वापि कथं किमिति न अजरामराः स्युर्जरामरणरहिता भवेयुः । चन्द्रतेजसः सुधात्वे, एतस्याश्च सुधाया जरामरणविनाशे सामर्थ्यमङ्गीकार्ये, तत्पाने चकोराणामजरामरैर्भाव्यम्, नच ते तथा, तस्मात्तेजसः सुधात्वं वा मृषा भवेत्, सुधाभूतस्यापि वा जरामरणापहारे सामर्थ्यं नास्तीत्यन्यतरदङ्गीकार्यम् । तथा—'सुधाप्रभावैर्न निजाश्रयं वा' इति पूर्वश्लोकाशयसमाधानमित्याशयः । 'अजरामरीस्युः–' इति पाठे—चिरः ॥

वाणीभिराभिः परिपक्किमाभि-
र्नरेन्द्रमानन्दजडं चकार ।
मुहूर्तमाश्चर्यरसेन भैमी-
हैमीव वृष्टिः स्तिमितं च तं सा ॥ १०३ ॥

वाणीभिरिति ॥ सा भैमी आभिः पूर्वोक्ताभिः परिपाकेन निर्वृत्ताभिः परिणतकवित्वशक्तितया प्रसादादिगुणयुताभिर्वाणीभिः कृत्वा तं नरेन्द्रमानन्दजडं हर्षपरवशं चकार । तथा—मुहूर्तमद्भुतापरनाम्नाश्चर्येण रसेन, अथच—तदपेण जलेन, हैमी तुषारसंबन्धिनी वृष्टिरिव भैमी स्तिमितमतिस्नेहात्प्राप्तस्तम्भं च, अथच –आर्द्रं चकार । हिमवृष्टिर्यथान्यं जडमार्द्रं च करोति, तथेयमप्यानन्दजडं स्नातिस्नेहं च चकारेत्यर्थः । परिपक्किमाभिः, द्विस्वाग्निवृत्तेर्थे क्किः क्रमेण् ॥

इतो मुखाद्वागियमाविरासी-
त्पीयूषधारामधुरेति जल्पन् ।
अचुम्बदस्याः स मुखेन्दुबिम्बं
संवावदूकश्रियमम्बुजानाम् ॥ १०४ ॥

इत इति ॥ इत्येवं जल्पन् वदन् स नलोऽम्बुजानां संवावदूका नितरां संवादिनी श्रीः शोभा यस्य तादृशं कमलतुल्यशोभमस्या मुखेन्दुबिम्बमचुम्बत् । चन्द्रकमलतुल्यं भैमीमुखं प्रीत्यतिशयादचुम्बदित्यर्थः । इति किम्–हे भैमि, इयमुक्तप्रकारा पीयूषधारावन्मधुरा वाक् इतः प्रत्यक्षदृश्याद्वदन्मुखादाविरासीत् निःसृतेति । इत इत्यनेन सामीप्याभिनयकारिणा करेण भैमीमुखं चिबुके धृतमिति ध्वन्यते । मुखस्येन्दुबिम्बत्वेन च पीयूषधारासंबन्धोक्तिर्मूच्यते । तथा च पीयूषधारया मधुरत्वमपि व्याख्येयम् । संवावदूकेत्यादिना च भैम्याः पद्मिनीयं प्रसिद्धम् । चन्द्रबिम्बस्य कमलैः सह विसंवादो विरोधित्वात्, एतन्मुखचन्द्रबिम्बस्य तु कमलैः सह संवादः कमलसौभाग्यभाक्त्वादिति प्रसिद्धचन्द्रविम्बादेतन्मुखबिम्बमधिकमिति मूच्यते । अत्यर्थं संवदति संवावदूका । संपूर्वोयं वदतिर्भैम्यां वर्तते ॥

प्रियेण साथ प्रियमेवमुक्ता
विदर्भभूमीपतिवंशमुक्ता ।
स्मितांशुजालं विततार तारा
दिवः स्फुरन्तीव कृतावतारा ॥ १०५ ॥

प्रियेणेति ॥ प्रियेण एवम् 'इतो मुखात्–' इत्यादिरूपं प्रियं वचनमुक्ता भाषिता विदर्भभूमीपतेर्वंशेन कुलेन मुक्ता जनिता । तथा—स्फुरन्ती दीप्यमानकान्तिः सोल्लासा सा भैमी अथ नलवचनानन्तरं स्मितांशुजालं विततार । तदेव नलाय प्रीतिदानमिव ददावित्यर्थः । केव—दिवः सकाशात् क्षीणपुण्यतया स्वेच्छया वा कृतावतारा भूलोकमागता रोहिणी तारेव स्फुरन्ती किरणजालं वितताररेवेति उत्प्रेक्षोपमा वा । वंशः कुलमेव वंशो वेणुस्तत्र जाता देवधार्या मुक्ता मौक्तिकरूपा । कृतावतारेत्यत्र तरणं तरः 'ऋदोरप्' तदन्तात्प्रज्ञादित्वात्स्वार्थेऽणि पश्चादवशब्देन सह 'सह सुपा' इति समासः ॥

स्ववर्णना न स्वयमर्हतीति
नियुज्य मां त्वन्मुखमिन्दुरूपम् ।
स्थानेऽत्युदास्ते शशिनः प्रशस्तौ
धरातुरासाहमिति स्म साह ॥ १०६ ॥

स्वेति ॥ सा धरातुरासाहं भूमीन्द्रमित्याह स्म । इति किम्—हे प्रिय, इन्दुरूपं त्वन्मुखमिति हेतोश्चन्द्ररूपात्मस्तुतौ मां नियुज्याज्ञाप्य शशिनः प्रशस्तौ वर्णनविषयेऽत्युदास्तेऽतितरामुदासीनं भवति । एतत्स्थाने युक्तम् । हेतुमेवाह—इति किम्—'सतामेतदकर्तव्यं परनिन्दात्मनः स्तुतिः' इत्यादिवचनात्स्वयमात्मनैव स्वस्य वर्णना स्तुतिर्नार्हति न युक्तेति । इयत्पर्यन्तं मया चन्द्रो वर्णितः, इदानीं त्वया वर्णनीयः, तूष्णींभावो वा युक्त इत्याशयेन भैमी चन्द्रस्तुतौ तं सोत्प्रासं प्रावर्तयदिति भावः । तुरासाहमित्यत्र तृतीयसर्गे 'धरातुरासाहि' इत्येतच्छ्लोकस्था शङ्का ज्ञातव्या, तत्रोत्तरम्—इन्दुरूपं त्वन्मुखं, चन्द्ररूपात्मस्तुतौ मां नियुज्य शशिनः प्रशस्तौ अत्युदास्ते । साहं धरावदतुराऽनुत्तालाऽवेगा वा । पृथ्वीवद्गम्भीरेत्यर्थः । अर्थात्तमाह स्मेति ज्ञातव्यम् ॥

तयेरितः प्राणसमः सुमुख्या
गिरं परीहासरसोत्किरां सः ।
भूलोकसारः स्मितवाक् तुषार-
भानुं भणिष्यन्सुभगां बभाण ॥ १०७ ॥

तयेति ॥ स भूलोके सारः श्रेष्ठतमो नलः स्मितवाक् तुषारभानुं चन्द्रं भणिष्यन् वर्णयिष्यन् सन् सुभगां सौभाग्यवतीं भैमीं बभाण । किंभूतः—तया सुमुख्या भैम्या परिहासरसस्योत्किरामुद्भावयित्रीं गिरमीरित उक्तः । तथा—प्राणसमोऽतिप्रेयान् । तया चन्द्रवर्णने ईरितः प्रेरितः सन्परिहासरसोत्किरां गिरं बभाणेति वा । उत्किराम्, 'इगुपध–' इति कः । पूर्वेण षष्ठीसमासः । भणिष्यन्, हेतौ लृटः शता ॥

तवानने जातचरीं निपीय
गीतिं तदाकर्णनलोलुपोऽयम् ।
हातुं न जातु स्पृहयत्यवैमि
विधुं मृगस्त्वद्वदनभ्रमेण ॥ १०८ ॥

तवेति ॥ हे प्रिये, अयं मृगः तवानने जातचरीं भूतपूर्वां गीतिं स्वरमाधुरीं निपीय सादरमाकर्ण्येदानीमपि तस्या भवद्गीतेराकर्णनलोलुपोऽतितरां लुब्धोऽतिसादृश्यात्त्वद्वदनभ्रमेण विधुं हातुं जातु कदाचिदपि न स्पृहयतीत्यहमवैमि । मृगा हि गानप्रिया भवन्तीति चन्द्रं त्वन्मुखभ्रान्त्या त्यक्तुं नेच्छतीत्यहं शङ्क इत्यर्थः । जातचरीं, 'भूतपूर्वे चरट्' । लोलुपः, यङन्तात्पचाद्यचि 'यङोऽचि च' इति यङो लुक् ॥

इन्दोर्भ्रमेणोपगमाय योग्ये
जिह्वा तवास्ये विधुवास्तुमन्तम् ।
गीत्या मृगं कर्षतु भन्त्स्यता किं
पाशीवभूवे श्रवणद्वयेन ॥ १०९ ॥

इन्दोरिति ॥ अतिसादृश्यादिन्दुरेवेदमितीवेन्दोर्भ्रमेण मृगस्योपगमाय योग्ये प्राप्तुमर्हे तवास्ये वर्तमाना जिह्वा कर्त्री गीत्या वर्णस्वरमाधुर्यां कृत्वा विधुरूपं वास्तु वसतिगृहं तद्विद्यते यस्य तं विधुवास्तुमन्तं चन्द्रमध्यस्थायिनमपि मृगं कर्षतु गीतेर्मधुरतमत्वान्मृगस्य च प्रियगानत्वात्स्वसमीपमानयत्वित्यर्थः । तदाकर्षणसाधनमुत्प्रेक्षते—भन्त्स्यता आगमिष्यतो मृगस्यात्रैव निवासार्थं बन्धनं करिष्यता श्रवणद्वयेन पाशीवभूवे किम् । तद्रूपया बन्धनरज्वा समाकर्षत्वित्यर्थः । अन्यापि शबरी गीत्या मृगमाकृष्य पाशेन बध्नाति । भवन्मुखं निष्कलङ्कममृताधिकगीतियुक्तं च, चन्द्रस्तु सकलङ्क इति भावः । चन्द्रवर्णनावसरेऽपि मध्ये मध्ये भैमीमुखवर्णनानुरागातिशयसूचनार्था । अयं श्लोकः क्षेपक इति केचित् ॥

गगनस्थोपि मृगो भैमीमुखगीतिं कथमशृणोदित्याशङ्क्याह—

आप्यायनाद्वा रुचिभिः सुधांशोः
शैत्यात्तमः काननजन्मनो वा ।
यावन्निशायामथ घर्मदुःस्थ-
स्तावद्व्रजत्यद्धि न शब्दपान्थः ॥ ११० ॥

आप्यायनादिति ॥ शब्दरूपः पान्थो नित्यपथिको निशायां यावद्व्रजति तावदथ पश्चात्साकल्येन वा अह्नि न गच्छति, यस्माद्दिने घर्मेणातपेन दुःस्थः संतप्तः, तस्माद्दिनेऽल्पमेव गच्छतीत्यर्थः । रात्रौ दूरागमने हेतुमाह—सुधांशोरमृतरूपाभी रुचिभिराप्यायनादुज्जीवितबलत्वाद्वा तम एव काननं वनं तस्माज्जन्म यस्य गाढान्धकारजाताच्छैत्याद्वा तेजसोऽभावे तमसःसंभवादौष्ण्याभावाच्छैत्यम् । अतएव रात्रौ बहु गच्छति, दिने चोष्णेन श्रान्त इव बहु न गच्छति । शब्दो हि रात्रौ स्वभावादतिदूरेऽपि श्रूयते । दिवा तु न तथा ।

१ 'वितताम' इत्यपि क्वचित्कः पाठः इति सुखावबोधा ।

पथिकोपि रात्रौ शैत्याद्दूरं गच्छति, दिने चाल्पम् । दूरश्रवणप्रतिपादकोयं श्लोकः ॥

दूरेपि तत्तावकगानपाना-
ल्लब्धावधिः स्वादुरसोपभोगे ।
अवज्ञयैव क्षिपति क्षपायाः
पतिः खलु स्वान्यमृतानि भासः ॥१११॥

दूरेपीति ॥ हे प्रिये, खलु निश्चितं क्षपायाः पतिश्चन्द्रो भासश्चन्द्रिका एव स्वान्यमृतानि क्षिपति अधो मुञ्चति । किंभूतः—दूरेप्यतितरां देशव्यवधानेपि तत्प्रसिद्धं मधुरतरं तावकं गानं तस्य पानात्सादरश्रवणाद्धेतोः स्वादुरसोपभोगे माधुर्यातिशयानुभवे विषये लब्धावधिः प्राप्तमर्यादः । उत्प्रेक्षते—अवज्ञयेव अनुभूतभवद्गीतमाधुर्यापेक्षयाल्पमाधुर्यतयावमाननयेवेत्यर्थः । अयं श्लोको भिन्न एव, ननु युग्मम् ॥

अस्मिन्न विस्मापयतेऽयमस्मां-
श्चक्षुर्वभूवेष यदादिपुंसः ।
तदत्रिनेत्रादुदितस्य तन्वि
कुलानुरूपं किल रूपमस्य ॥ ११२ ॥

अस्मिन्निति ॥ हे तन्वि, एष चन्द्रः आदिपुंसः श्रीविष्णोर्वामं चक्षुर्यभूवेति यत् । अस्मिन्नेत्रभवनविषयेऽयं नेत्रभूतश्चन्द्रोऽस्मान्न विस्मापयते आश्चर्यं न प्रापयति । अत्रार्थेऽस्माकमाश्चर्यं न भवतीत्यर्थः । किल यस्माद्धेतोरत्रिनेत्रादुदितस्योत्पन्नस्यास्य तच्चक्षुर्भवनं कुलानुरूपं कुलोचितं स्वरूपम् । नेत्ररूपात्कारणाज्जातस्य नेत्रीभवनमुचितमेव । तस्मादस्य पुराणपुरुषनेत्रभवने न किंचिदस्माकं चित्रमित्यर्थः । विस्मापयते, 'नित्यं स्मयतेः' इत्यात्वम्, 'भीस्म्योर्हेतुभये' इति तङ् । अस्मान्, जनान्तरापेक्षया बहुत्वम् ॥

आभिर्मृगेन्द्रोदरि कौमुदीभिः
क्षीरस्य धाराभिरिव क्षणेन ।
अक्षालि नीली रुचिरम्बरस्था
तमोमयीयं रजनीरजक्या ॥ ११३ ॥

आभिरिति ॥ हे मृगेन्द्रोदरवत्कृशमुदरं यस्यास्तादृशि, रजन्येव रजकी तया क्षीरस्य दुग्धस्य धाराभिरिव दृश्यमानाभिर्धवलतराभिराभिः कौमुदीभिः कृत्वाऽम्बरस्था गगनस्था तमोमयीयं नीली कज्जलवत्काली रुचिः क्षणमात्रेणाक्षालि निरस्ता । यथा रजक्या वसनस्था काली कान्तिर्दुग्धधाराभिः क्षणेन क्षाल्यते । तदुक्तं कलाकोषे—'तैलं घृतेन तच्चोष्णजलैर्दुग्धेन कज्जलम् । नाशयेदम्बरस्थं तु मलं क्षारेण सोष्मणा ।' इति । चन्द्रिकाभिर्गगनं निर्मलीकृतमिति भावः । मृगेन्द्रोदरि, 'नासिकोदर–'इति ङीप् । ओषधिप्राणिवाचित्वाभावान्नीलीव नीलीति ङीप् समर्थनीयः । रजकी, प्लुतः पित्वान्ङीप् ॥

पयोमुचां मेचकिमानमुच्चै-
रुच्चाटयामास ऋतुः शरद्या ।
अपारि वामोरु तयापि किंचि-
न्न प्रोच्छितुं लाञ्छनकालिमास्य ॥ ११४॥

पय इति ॥ हे वामोरु, या शरदृतुः पयोमुचां मेघानां वर्षाकालीनमुच्चैरतिशयितमपि मेचकिमानं कालिमानमुच्चाटयामास । तया कालिमापनयने दृष्टसामर्थ्यया शरदाप्यस्य चन्द्रस्य लाञ्छनरूपः कालिमा किंचिदल्पमपि प्रोच्छितुं स्फोटयितुं नापारि । शरदच्छे चन्द्रे मलिनः कलङ्कोऽतितरां शोभत इति भावः । मेचकिमानं वर्णवाचित्वादिमनिच् ॥

एकादशैकादशरुद्रमौली-
नस्तं यतो यान्ति कलाः किमस्य ।
प्रविश्य शेषास्तु भवन्ति पञ्च-
पञ्चेषुतूणीमिषवोऽर्धचन्द्राः ॥ ११५ ॥

एकेति ॥ अस्तं यतो गच्छतोऽस्य चन्द्रस्यैकादश कला एकादशानां रुद्राणां मौलीन् प्रति यान्ति किल गच्छन्तीव । शेषाः पञ्चकलास्तु पुनः पञ्चेषोः कामस्य तूणीमल्पमिषुधिं प्रविश्यार्धचन्द्राकारत्वादर्धचन्द्राख्या इषवो भवन्ति । विनाशसमयेऽप्ययं परापकारनिरत इति ध्वन्यते । तूणीम्, अल्पत्वविवक्षया स्त्रीत्वे गौरादित्वान्ङीप् । अर्धचन्द्रशब्दो रूढः ॥

निरन्तरत्वेन निधाय तन्वि
तारासहस्राणि यदि क्रियेत ।
सुधांशुरन्यः स कलङ्कमुक्त-
स्तदा त्वदास्यश्रियमाश्रयेत ॥ ११६ ॥

निरन्तरेति ॥ हे तन्वि, ताराणां नक्षत्राणां सहस्राणि निरन्तरत्वेनान्योन्यसंबन्धितया विधायैकीकृत्य यदि अन्यः सुधांशुः क्रियेत निर्मीयेत तदा तर्हि स चन्द्रस्ताराणामकलङ्कत्वात्तन्मयत्वात्कलङ्केन मुक्तः संस्त्वदास्यस्य श्रियं शोभामाश्रयेत । क्रियातिपत्तेरविवक्षितत्वाल्लृङभावः ॥

यत्पद्ममादित्सु तवाननीयां
कुरङ्गलक्ष्मा च मृगाक्षि लक्ष्मीम् ।
एकार्थलिप्साकृत एष शङ्के
शशाङ्कपङ्केरुहयोर्विरोधः ॥ ११७ ॥

यदिति ॥ हे मृगाक्षि, यत्पद्मं तवाननीयां मुखसंबन्धिनीं लक्ष्मीमादित्सु ग्रहीतुकामम्, कुरङ्गलक्ष्मा चन्द्रश्च तव मुखशोभां ग्रहीतुकामः, तयोः शशाङ्कपङ्केरुहयोरेष विरोधस्तन्मुखशोभालक्षण एकोऽर्थस्तस्य लिप्साकृतः प्राप्तिवाञ्छानिमित्त एवेत्यहं शङ्के । एकद्रव्याभिलाषित्वेन विरोधः सुप्रसिद्धः । चन्द्रपद्मयोरपि विरोधः प्रसिद्ध एव । चन्द्रपद्माभ्यां सकाशात्ते मुखमधिकमिति भावः । आदित्सु, चन्द्रपक्षे लिङ्गविपरिणामः । लक्ष्मीं, 'न लोका–' इति षष्ठीनिषेधः ॥

लब्धं न लेभप्रभुणापि पानुं
पीत्वा मुखेन्दोरधरामृतं ते ।

निपीय देवैर्विधसीकृतायां
घृणां विधोरस्य दधे सुधायाम् ॥ ११८ ॥

लब्धमिति ॥ हे प्रिये, अहं सर्वैरपि देवैर्विधसीकृतायां निःशेषं पीत्वा भुक्तशेषीकृतायाम् अस्य विधोः सुधायां घृणां जुगुप्सां दधे धारयामि । किं कृत्वा—लेखानां देवानां प्रभुणेन्द्रेणापि पातुं न लब्धं कृतप्रयत्नस्यापि तस्यावरणात्तेन दुष्प्रापं केनाप्यनुच्छिष्टं ते मुखेन्दोरधररूपममृतं निपीय पीत्वा । चन्द्रसुधायाः सकाशात्त्वदधरामृतं स्वादुतरमिति भावः । अन्योप्युच्छिष्टभोजने जुगुप्सां धारयति ॥

एनं स बिभ्रद्विधुमुत्तमाङ्गे
गिरीन्द्रपुत्रीपतिरोषधीशम् ।
अश्नाति घोरं विषमब्धिजन्म
धत्ते भुजङ्गं च विमुक्तशङ्कः ॥ ११९ ॥

एनमिति ॥ स गिरीन्द्रपुत्रीपतिः शंभुरेनमोषधीशं विधुमुत्तमाङ्गे शिरसि बिभ्रद्धारयन् सन्नब्धिजन्म समुद्रोत्पन्नं घोरं दारुणमपि विषमश्नाति, विमुक्तशङ्की भुजङ्गं सर्पराजं वासुकिं च धत्ते । शंभोरप्युपकारकत्वेन पूज्यः श्रेष्ठोयमिति भावः । ओषधिस्वामिनोस्य शिरसि धारणादिव निःशङ्कं विषं भक्षयति सर्पांश्च धारयतीत्युत्प्रेक्षा । भुजङ्गम्, जात्यभिप्रायेणैकवचनं वा ॥

नास्य द्विजेन्द्रस्य बभूव पश्य
दारान्गुरोर्यातवतोपि पातः ।
प्रवृत्तयोऽप्यात्ममयप्रकाशा-
न्नघ्नन्ति न ह्यन्तिमदेहमाप्तान् ॥ १२० ॥

नेति ॥ हे प्रिये, द्विजेन्द्रस्य अस्य चन्द्रस्यास्य गुरोर्बृहस्पतेर्दारान् भार्यां यातवतो गच्छतोपि गुरुतल्पगामिनोपि पातः स्वर्गाद्भ्रंशः, अथच—पातित्यम्, न बभूव पश्य । चित्रमेतद्विलोकयेत्यर्थः । अथवा युक्तमेतत् । प्रवृत्तयो धर्माधर्महेतुकर्मारम्भा अपि आत्ममय आत्मस्वरूपमेव प्रकाशो येषां तान्प्रकाशान्तरनिरपेक्षान्प्रकाशरूपान्, अथच—परमात्मैव प्रकाशो येषां तान् परमात्मस्वरूपातिरिक्तप्रकाशानभिज्ञान्स्वप्रकाशात्मवादिनो ब्रह्मज्ञानिनोऽन्तिमदेहं तेजोरूपशरीरं पूर्णतां वा प्राप्तान्, अथच—अनन्तरभाविमोक्षत्वात्प्राचीनशरीरप्रवाहापेक्षया शेषं शरीरं प्राप्तान् जीवन्मुक्तान्पुरुषान्हि यस्मान्न नघ्नन्ति शुभाशुभफलबन्धेन न संबध्नन्तीत्यर्थः । 'तेषां तेजोविशेषेण प्रत्यवायो न विद्यते' इति प्रामाणिकवचनात्तेजोरूपस्यास्य चन्द्रस्य पातो नाभूदिति युक्तमेव, नात्र चित्रमिति भावः । चन्द्रोऽप्यात्ममयप्रकाशः अन्तिमदेहं संपूर्णतां प्राप्तश्च ॥

स्वधाकृतं यत्तनयैः पितृभ्यः
श्रद्धापवित्रं तिलचित्रमम्भः ।
चन्द्रं पितृस्थानतयोपतस्थे
तदङ्कुरोचिःखचिता सुधैव ॥ १२१ ॥

स्वधेति ॥ तनयैः पुत्रैः श्रद्धया परलोकास्तित्वबुद्ध्या वितीर्णस्वाप्पवित्रं कृष्णतिलैश्चित्रं मिश्रितं पितृभ्यः स्वधाकृतं यदम्भः पितृस्थानतया 'चन्द्रो वै पितृलोकः' इति श्रुतेः पितृलोकतया चन्द्रमुपतस्थे चन्द्रेण संगतमभूत् । तत्कृष्णतिलमिश्रं जलमेवाङ्कस्य कलङ्कस्य यद्रोचिः कान्तिस्तया खचिता मिश्रिता सुधा पीयूषम् । कृष्णतिला एव कलङ्कः, तत्संलग्नं जलमेव पीयूषम्, नत्वन्यः कलङ्को न चान्यत्पीयूषमित्यर्थः । श्रद्धेति, पितृलोकप्राप्तौ हेतुगर्भम् । उपतस्थे, संगतकरणं तत् ॥

पश्योच्चसौधस्थितिसौख्यलक्ष्ये
त्वत्केलिकुल्याम्बुनि बिम्बमिन्दोः ।
चिरं निमज्येह सतः प्रियस्य
भ्रमेण यच्चुम्बति राजहंसी ॥ १२२ ॥

पश्येति ॥ हे प्रिये, त्वमुच्चसौधे स्थित्या कृत्वा सौख्येन निरन्तरायं लक्ष्ये दृश्ये त्वत्केलिकुल्याया अम्बुनि तदिन्दोर्बिम्बं पश्य । तत्किम्—राजहंसी इह कुल्याजले निमज्य चिरं सतोऽन्तर्वर्तमानस्य प्रियस्य राजहंसस्य भ्रमेण यच्चन्द्रबिम्बं चुम्बति सौख्यम्, स्वार्थे सुखिनो भाव इति भावे वा ष्यञ् । 'सौक्ष्म्य-' इति पाठे—सूक्ष्मत्वेन लक्ष्ये । उच्चतरप्रदेशस्थितं प्रति ह्यधोदेशस्थितं वस्तु सूक्ष्मं प्रतिभाति ॥

सौवर्गवर्गैरमृतं निपीय
कृतोऽद्रि तुच्छः शशलाञ्छनोऽयम् ।
पूर्णोऽमृतानां निशि तेत्र नद्यां
मग्नः पुनः स्यात्प्रतिमाच्छलेन ॥ १२३ ॥

सौवर्गेति ॥ स्वर्गे भवाः सौवर्गा देवास्तेषां वर्गैर्वृन्दैरमृतं निपीयाद्रि तुच्छो रिक्तः कृतोऽयं शशलाञ्छनो निशि ते तवात्र क्रीडानद्यां प्रतिमाच्छलेन प्रतिबिम्बव्याजेन मग्नः सन्पुनरमृतानां जलैः, अथच—पीयूषैः पूर्णः स्याद्भवेदित्यहं संभावयामीत्यर्थः । एतेन नदीजलस्यामृतत्वं सूचितम् । अद्रि तुच्छः कृतोपि पुनः क्रमेणामृतैः पूर्णः सन्रात्रौ तव क्रीडानद्यां प्रतिमाव्याजेन मग्नः स्यात् पुनः पानभयादिव पलाय्य निलीनः स्यादित्यहं शङ्के इत्यर्थ इति वा । पूर्णोऽमृतानाम् । तृप्यर्थस्वात्करणे षष्ठी ॥

समं समेते शशिनः करेण
प्रसूनपाणाविह कैरविण्याः ।
विवाहलीलामनयोरिवाह
मधुच्छलत्यागजलाभिषेकः ॥ १२४ ॥

सममिति ॥ इह तव क्रीडानद्यां कैरविण्याः कुमुदिन्याः प्रसूनरूपे पाणौ शशिनः करेण रश्मिना, अथच—पाणिना, समं सह समेते संगते सति मधु पुष्परस एव च्छलं यस्य स तत्त्याजस्त्यागजलस्य कन्यादानसंकल्पोदकस्याभिषेकः कर्ता, अनयोश्चन्द्रकुमुदिन्योर्विवाहलीलामाहेव सूचयतीव । चन्द्रकरस्पर्शमात्रेण कुमुदानि विकसितानि, मकरन्दपूर्णानि च जातानीति भावः । विवाहे उभयोः पाणिमेलनं, पाणौ दानजलाभिषेकोपि भवति ॥

विकासिनीलायतपुष्पनेत्रा
मृगीयमिन्दीवरिणी वनस्था ।
विलोकते कान्तमिहोपरिष्टा-
न्मृगं तवैपाननचन्द्रभाजम् ॥ १२५ ॥

विकासीति ॥ हे प्रिये, इह तव केलिनद्यां वनस्था जलनिवासिनी, अथच—काननस्था, तथा-विकासिनीलमायतं विस्तृतं च पुष्पमेव नेत्रं यस्यास्तत्तुल्यनेत्रा चेयं प्रत्यक्षदृश्या इन्दीवरिणी, यस्मान्मृगी वनस्थत्वाद्विकासिनीलायतपुष्पनेत्रत्वाच्च हरिणी, तत्तस्मादिन्दीवरिणीरूपा मृगी, आननमिव यश्चन्द्रः सामर्थ्यात्स्वदाननतुल्यो यश्चन्द्रस्तद्भाजं तत्स्थं कान्तं सुन्दरम्, अथच—तुल्यजातीयं स्वप्रियं, मृगमुपरिष्टाद्विलोकते । विकसितकुसुमनेत्राणि ऊर्ध्वं प्रसारितानि दृश्यन्ते तर्हि प्रायेण चन्द्रस्थमुपरिवर्तमानं निजभर्तारं मृगं मृगी पश्यतीत्यर्थः । स्वदाननमेव यश्चन्द्रस्तत्रस्थं चन्द्रत्वादनुमेयं मृगमुपरिष्टात्पश्यति । त्वं प्रासादोपरि वससे, इयं चाधोदेशे वर्तते । 'न न' इति पदच्छेदं कृत्वा चन्द्रभाजं निजप्राणेशं मृगमुपरिष्टान्न पश्यतीति न, किंतु पश्यत्येवेति वा व्याख्येयम् । वनस्था मृगी हि प्रसारितनीलायतनेत्रा सती स्वकान्तं मृगमितस्ततो विलोकयति । 'शशम्' इत्यपपाठः । मृगपर एव वा व्याख्येयः ॥

तपस्यतामम्बुनि कैरवाणां
समाधिभङ्गे विबुधाङ्गनायाः ।
अवैमि रात्रेरमताधरोष्ठं
मुखं मयूखस्मितचारुचन्द्रम् ॥ १२६ ॥

तपस्यतामिति ॥ हे प्रिये, अम्बुनि सदा निवासात्तत्र तपस्यतां कैरवाणां कुमुदानां समाधेर्दिवा संकोचस्यैव ध्यानस्य भङ्गे त्याजने विषये निमित्ते वा विबुधाङ्गनाया अप्सरोरूपाया रात्रेश्चन्द्रं मुखमेवाहमवैमि मन्ये । किंभूतं मुखम्—अमृतमेवाधरोऽनूर्ध्व ओष्ठो यस्य, अथच—अमृततुल्योधरोष्ठो यस्य, यद्वा—अमृतमधरं यस्मात्पीयूषादधिकरस ओष्ठो यस्य । तथा—मयूखाः किरणा एव स्मितम्, अथच—तत्समाधिभङ्गादेव चन्द्रकरवदुज्ज्वलं यत्स्मितं, तेन चारु । चन्द्रविशेषणे लिङ्गविपरिणामः । देवाङ्गनानामप्येवंविधं मुखं रात्रौ जले तपस्यतां दुश्चरं तपश्चरतामपि मुनीनां समाधिभङ्गं करोति । तपस्यतामिति तपश्चरतीत्यर्थे 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' इति क्यप् 'तपसः परस्मैपदं च' इति शता ॥

अल्पाङ्कपङ्का विधुमण्डलीयं
पीयूषनीरा सरसी स्मरस्य ।
पानात्सुधानामजलेऽप्यमृत्युं
चिह्नं बिभर्त्यत्रभवं स मीनम् ॥ १२७ ॥

अल्पेति ॥ अल्पोऽङ्क एव पङ्को यस्यां, तथा—पीयूषमेव नीरं यस्यां सेयं विधुमण्डली स्मरस्य सरसी विशालं सर एव । अत एव—स स्मरः अत्र भवमस्यां चन्द्रमरस्यां समुत्पन्नं सुधानामेतदीयामृतानां पानादजले जलरहितेऽपि स्थले जलाभावेऽपि वाऽमृत्युं मरणरहितं मीनं चिह्नम्, अथच—सुधासरोजातत्वानुमापकं लिङ्गं बिभर्ति । मीना हि जलाद्बहिर्भूता म्रियन्त एव, अयं तु न म्रियते, तस्माच्चन्द्रामृतसरसीभवत्वात्सदामृतपानाज्जलाभावेपि मृत्युरहित इति सर्वं युक्तमित्यर्थः ॥

तारास्थिभूषा शशिजह्नुजाभृ-
च्चन्द्रांशुपांशुच्छुरितद्युतिर्द्यौः ।
छायापथच्छद्मफणीन्द्रहारा
स्वं मूर्तिमाह स्फुटमष्टमूर्तेः ॥ १२८ ॥

तारेति ॥ द्यौः स्वमात्मानमष्टमूर्तेर्हरस्य मूर्तिं शरीरं स्फुटं व्यक्तमाह ब्रवीति । यतः—किंभूता—तारा एवास्थीनि भूषा यस्याः । तथा—शशिनमेव जह्नुजां, चन्द्रं गङ्गां च, बिभर्ति भृत् । तथा—चन्द्रांशव एव पांसवो भस्मानि तैश्छुरिता कृताङ्गरागा द्युतिर्यस्याः । तथा—छायापथो गगने दण्डाकारा दक्षिणोत्तरस्था धवला रेखा छद्म यस्य छायापथच्छद्मरूपः फणीन्द्रो वासुकिः स एव मुक्ताहारो यस्याः सा । हरमूर्तिरप्युक्तविशेषणविशिष्टा । द्यौरप्येतादृशीति मूर्त्यन्तरापेक्षया व्यक्तमेव महेशस्य मूर्तिं गगनं कथयतीवेत्यर्थः ॥

एकैव तारा मुनिलोचनस्य
जाता किलैतज्जनकस्य तस्य ।
तताधिका संपदभूदियं तु
सप्तान्विता विंशतिरस्य यत्ताः ॥ १२९ ॥

एकेति ॥ एतस्य चन्द्रस्य जनकस्य तस्य प्रसिद्धस्यात्रिमुनिलोचनस्य तारा कनीनिका किलैकैव जाताभूत किल पुराणादौ । अस्य तत्पुत्रस्य तु पुनरियं दृश्यमाना संपत् तातात्रिजनकपितुरत्रिनेत्रात्सकाशादधिका । यस्मादस्य चन्द्रस्य ताराः कनीनिकाः, अथच—नक्षत्राणि, सप्तभिरन्विता विंशतिरभूदिति च्छलम् । पितुः सकाशादधिकसंपत्तित्वात्सभाग्योऽयमिति भावः । 'सप्तविंशतिमिन्दवे' इति, दक्षः सप्तविंशतिकन्याः अश्विन्यादिकाश्चन्द्राय ददाविति पुराणम् ॥

मृगाक्षि यन्मण्डलमेतदिन्दोः
स्मरस्य तत्पाण्डुरमातपत्रम् ।
यः पूर्णिमानन्तरमस्य भङ्गः
स च्छत्रभङ्गः खलु मन्मथस्य ॥ १३० ॥

मृगाक्षीति ॥ हे मृगाक्षि हरिणीनेत्रे, यदेतत्प्रत्यक्षदृश्यमिन्दोर्मण्डलं तत्स्मरस्य पाण्डुरं श्वेतं साम्राज्यसूचकमातपत्रमेव । श्वेतच्छत्रदर्शने सति सम्राजो वश्या भवन्ति । पूर्णश्वेतचन्द्रमण्डलस्य चोद्दीपकत्वात्तद्दर्शने सर्वेपि कामस्य वश्या भवन्ति । तस्मादेतत्कामस्य श्वेतातपत्रमेवेति भावः । यश्च पूर्णिमानन्तरस्य च्छत्रभूतस्येन्दुमण्डलस्य भङ्गो मोटनं कलाक्षयश्च स मन्मथस्य च्छत्रभङ्गः खलु । छत्रस्य मोटनं राजक्षयं सूचयति । कृष्णपक्षे चोद्दीपकमित्रचन्द्रक्षये कामः क्षीण एव भवति, तस्मात्कृष्णपक्षे योस्य भङ्गः स कामस्य छत्रभङ्ग इव स एव वेति भावः । खलुप्रेक्षायां निश्चये वा ॥

दशाननेनापि जगन्ति जित्वा
योयं पुरापारि न जातु जेतुम् ।
म्लानिर्विधोर्मानिनि संगतेयं
तस्य त्वदेकाननिर्जितस्य ॥ १३१ ॥

दशेति ॥ दिग्विजयोद्यतेन दशाननेनापि जगन्ति जित्वापि योऽयं चन्द्रः पुरा पूर्वं जातु कदाचिदपि जेतुं नापारि । हे मानिनि स्वमुखस्पर्धिनं चन्द्रमसहमाने भैमि, तस्य विधोरियं प्रत्यक्षदृश्या कलङ्करूपा म्लानिर्लज्जा संगता लग्ना, अथच युक्तैव । यतस्तवैकेनाननेन नितरां जितस्य । यो हि दशानेन दशभिर्मुखैर्जेतुं नाशकि, तस्य स्त्रियास्तवैकेन मुखेन विजितत्वेन लज्जया मालिन्यमुचितमेवेत्यर्थः । त्वन्मुखमेतस्मादधिकमिति भावः । प्रतीयमानोत्प्रेक्षा । लज्जयापि म्लानिर्भवति । रावणश्चन्द्रं जेतुं प्रवृत्तस्तत्तपाराग्निना दह्यमानः कम्पमानतनुस्तमजित्वैव परावृत्त इत्युत्तरकाण्डे कथा ॥

दृष्टो निजां तावदियन्त्यहानि
जयन्नयं पूर्वदशां शशाङ्कः ।
पूर्णस्त्वदास्येन तुलां गतश्चे-
दनन्तरं द्रक्ष्यसि भङ्गमस्य ॥ १३२ ॥

दृष्ट इति ॥ अयं शशाङ्क इयन्त्येतावन्ति अहानि शुक्लपक्षदिनानि तावदवधीकृत्य निजां पूर्वदशां पूर्वपूर्वदिनावस्थां जयन् निकाममुत्तरोत्तरदिनेषु कलावृद्ध्याधिकीभवंस्त्वया दृष्टः । इयन्ति दिनानि जयंस्तावत् जयन्नेव दृष्ट इत्यवधारणार्थो वा तावच्छब्दः । अनयैव परिपाट्या पूर्णबिम्बोऽयं त्वदास्येन सह तुलां साम्यम्, अथच—तोलकाष्ठं, प्राप्त आरूढश्चेत्, तर्ह्यनन्तरं निकटं त्वमेव श्वःप्रभृत्येवास्य भङ्गं पराजयं कलाक्षयं च द्रक्ष्यसि । उत्तमेन सह स्पर्धमानो हि भङ्गं प्राप्नोत्येव । तुलादिव्ये हि हीनस्य पराजयः सर्वैर्दृश्यते । अहानि, अत्यन्तसंयोगे द्वितीया । त्वदास्येन, 'अतुलोपमाभ्याम्–' इति निषेधेऽपि सहयोगे तृतीया । तथाच कालिदासः—'तुलां यदारोहति दन्तवाससा' इत्यादि ॥

क्षत्राणि रामः परिभूय रामा-
त्क्षत्राद्यथाभज्यत स द्विजेन्द्रः ।
तथैव पद्मानभिभूय सर्वा-
स्त्वद्वक्त्रपद्मात्परिभूतिमेति ॥ १३३ ॥

क्षत्राणीति ॥ द्विजेन्द्रो जमदग्न्यपत्यत्वात्सोऽतिप्रसिद्धपराक्रमो रामः परशुरामः सर्वाणि क्षत्राणि परिभूयापि क्षत्रादेव रामाद्दाशरथेः सकाशाद्यथाभज्यत पराभवं प्राप, तथा तेनैव प्रकारेणायमपि द्विजराजः सर्वान्पद्मानभिभूय संकोचकरणात्पराभूयापि त्वद्वक्त्रपद्मात्सकाशात्परिभूतिं पराभवमेति । सकलक्षत्रियाधिक्यं यथा श्रीरामस्य तथा सर्वपद्माधिक्यं त्वन्मुखपद्मस्येति भावः । 'वा पुंसि पद्मम्' इत्यमरः ॥

अन्तः सलक्ष्मीक्रियते सुधांशो
रूपेण पश्ये हरिणेन पश्य ।
इत्येष भैमीमददर्शदस्य
कदाचिदन्तं स कदाचिदन्तः ॥ १३४ ॥

अन्तरिति ॥ हे पश्ये चन्द्रदर्शनप्रवृत्ते भैमि, हरिणेन पाण्डुरेण रूपेण वर्णेन कर्त्रा सुधांशोरन्तः प्रान्तभागः पूर्वमश्रीकोऽपीदानीं सलक्ष्मीक्रियते सश्रीः क्रियते त्वं पश्य । अथच—चन्द्रस्य मध्यं हरिणेन मृगेन कर्त्रा रूपेण स्वीयनीलवर्णेन कृत्वा असलक्ष्म सलक्ष्म क्रियते सलक्ष्मीक्रियते सकलङ्कं क्रियत इत्यर्थः । पश्य । एष सनल इत्यमुना प्रकारेणास्य चन्द्रस्यान्तं पर्यन्तभागं कदाचित्क्षणमात्रं भैमीमददर्शत् दर्शयामास, कदाचिच्चान्तर्मध्यभागं दर्शयामास । अङ्गुल्यादिना चन्द्रश्वेतनीलप्रान्तमध्यभागप्रदर्शनपूर्वं श्लिष्टपदैस्तया सह क्रीडां चकारेति भाव इति मध्ये कवेरुक्तिः । 'हरिणः पाण्डुरः पाण्डुः' इत्यमरः । अन्त इत्यकारान्तमेकत्र, अन्तरित्यव्ययमपरत्र मध्यवाचि । लक्ष्मीशब्दस्य समासान्तविधेरनित्यत्वात्कबभावे सलक्ष्मीशब्दाद्विवः । पक्षे सलक्ष्मशब्दाद्विवः । पश्ये 'पाघ्रा' (इत्या)दिना कर्तर्येव शः । दृशेर्बुद्ध्यर्थत्वात् 'गतिबुद्धि–' इत्यणौ कर्तुर्णौ कर्मत्वाद्भैमीमिति द्वितीया ॥

सागरान्मुनिविलोचनोदरा-
द्यद्भुयादजनि तेन किं द्विजः ।
एवमेव च भवन्नयं द्विजः
पर्यवस्यति विधुः किमत्रिजः ॥ १३५ ॥

सागरादिति ॥ अयं चन्द्रः सागरात् मुनिविलोचनोदराच्चैतद्भूपाद्भुयात्सकाशाद्यद्यस्माद्जनि उत्पन्नः, तेन कारणेन द्वाभ्यां जातत्वाद्द्विजः किम् । एवमेव चानयैव रीत्या द्वाभ्यां जातत्वादेव द्विजो भवन्नप्ययं विधुरत्रेर्मुनेर्जातः किं कथं पर्यवस्यति । द्वाभ्यां जातत्वे सत्यपि अत्रिमुनेरेव जात इति तात्पर्यवृत्त्या कथमुच्यत इत्यर्थः । अथच—एवमेव यथानेन प्रकारेण द्विजत्वं, तथैवात्रिमुनिजो भवन्नयं द्विजः पर्यवस्यति किम् । द्वाभ्यां जातत्वाद्यथा द्विज उच्यते, तथा द्विजादत्रिमुनेर्जातत्वादपि द्विज उच्यते किम् । द्विजोत्पन्नो हि द्विज एव भवतीत्यर्थः । अथच—द्वाभ्यां जातत्वाद्द्विजो भवन्नेव न त्रिभ्यो जायत इत्यत्रिज इत्येवं तात्पर्यवृत्त्या कथ्यते किम् । यो हि द्वाभ्यां जायते स त्रिजो न भवति, एवमेवायमत्रिजः कथ्यते किमित्यर्थः । अन्योपि द्विजस्त्रिजो न भवत्येव ॥

ताराविहारभुवि चन्द्रमयीं चकार
यन्मण्डलीं हिमभुवं मृगनाभिवासम् ।
तेनैव तन्वि सुकृतेन मते जिनस्य
स्वर्लोकलोकतिलकत्वमवाप धाता ॥ १३६ ॥

तारेति ॥ हे तन्वि कृशाङ्गि, धाता ताराणां नक्षत्राणां विहारभुवि गगने चन्द्रमयीं मण्डलीं बिम्बं जिनस्य पुराणपुरुषस्य श्रीविष्णोर्मतेऽनुमतौ सत्यां तदादिष्टः सन् यच्चकार निर्ममे तेनैव सुकृतेन शोभनेन लोकोत्तरव्यापारेण कृत्वा स्वर्लोकः स्वर्गभुवनं तत्संबन्धिनां लोकानां सुराणां मध्ये तिलकत्वं श्रेष्ठ्यमवाप । किंभूतां मण्डलीम्—हिमस्य तुषारस्य भुवं स्थानभूतामतिशीत-

१ 'दृशेश्च' इति वार्तिकस्योपलक्षणमिदम् । अत्रे बुद्धिशब्दस्य ज्ञानविशेषवाचित्वाभावेन यथाश्रुतासंगतेः ।

लाम् । तथा—मृगस्य नाभौ मध्ये वासो यस्यास्तां, यस्या मध्ये मृगोस्तीति यावत्, तादृशीम् । अन्येषां सुराणामेतादृग्व्यापारकरणे सामर्थ्याभावाद्ब्रह्मैव श्रेष्ठोऽभूदित्यर्थः । अथच—तारायां बुद्धदेव्या विहारस्थाने पूजास्थाने हिमभुवं शीतलां, शुभ्रत्वाद्धिमाचलरूपां वा, तथा—मृगनाभेः कस्तूर्या वासः परिमलोऽवस्थानं वा यस्यां तां कस्तूरीमिश्रितां चन्द्रमयीं कर्पूरमयीं मण्डलीं राशिं चकार तेनैव पुण्येन जिनस्य मते बौद्धदर्शने ब्रह्मा सुरश्रेष्ठत्वमधत्त । बौद्धा हि बुद्धदेवप्रासादे यत्पूजार्थं कर्पूरकस्तूरीराशिं करोति स सर्वलोकमध्ये श्रेष्ठो भवतीति स्वदर्शने प्रत्यपादयन् । ब्रह्मा चैवमकृत तस्मादेव सर्वश्रेष्ठो जात इत्यर्थः । 'तेनेव' इति पाठे—उत्प्रेक्षा । 'बुद्धदेव्यां मता तारा' ॥

इन्दुं मुखाद्बहुतृणं तव यद्वृणन्ति
नैनं मृगस्त्यजति तन्मृगतृष्णयेव ।
अत्येति मोहमहिमा न हिमांशुबिम्ब-
लक्ष्मीविडम्बिमुखि वित्तिषु पाशवीषु[1] ३७

इन्दुमिति ॥ हे हिमांशुबिम्बस्य लक्ष्म्याः शोभाया विडम्बि स्वस्मात्ऊनत्वात्परिहासकारि ततोप्यधिकशोभं मुखं यस्यास्तादृशि भैमि, पण्डिता इन्दुं तव मुखात्सकाशात्स्वन्मुखमपेक्ष्य वा बहुतृणमीषदसमाप्तं तृणं, तृणत्वमपि यस्य पूर्णं न संपन्नं, तृणादपि निःसारमिति यावत्, अथच—बह्वधिकं तृणं यस्मात् तृणादपि निःसारं यद्यस्माद्वृणन्ति । तत्तस्माद्धेतोर्मृग एनं चन्द्रं मृगसम्बन्धिन्या तृष्णया कोमलतृणकवलनाभिलाषेणैव, अथवा चन्द्रे प्रयुक्तस्य बहुतृणशब्दस्य बहु च तत्तृणं च, बहूनि तृणानि यस्मिंस्तादृशमिति वेत्येवंरूपार्थग्रहणरूपया भ्रान्त्यव न त्यजति । मृगो हि बहु यत्तृणं बहुतृणं देशं वा न मुञ्चति । नन्वनुभवे सत्यप्यसंसारं कथं भ्रान्तिरित्याशङ्क्यार्थान्तरन्यासमाह—पाशवीषु पशुसंबन्धिनीषु वित्तिषु ज्ञानेषु विषये मोहमहिमा भ्रान्तिबाहुल्यं नात्येति बहुकालातिक्रमेपि नापयाति । पशवो हि सर्वदा मूढा एवेत्यद्यापि मृगस्य भ्रान्तिर्नापयाति, तस्मादेनं न त्यजतीति युक्तमित्यर्थः । 'वृत्तिषु' इति पाठे—व्यापारेषु । मुखात्, त्यब्लोपे पञ्चमी । बहुतृणं पक्षे ईषदसमाप्तौ 'विभाषा सुपो बहुच्-' इति बहुच् ॥

स्वर्भानुना प्रसभपानविभीषिकाभि-
र्दुःखाकृतेनमवधूय सुधा सुधांशुम् ।
स्वं निह्नुते शितिमचिह्नममुष्य रागे-
स्ताम्बूलताम्रमवलम्ब्य तवाधरोष्ठम् १३८

स्वर्भानुनेति ॥ हे प्रिये, सुधां एनं सुधांशुमवधूय त्यक्त्वा तवाधरोष्ठमवलम्ब्यामुष्य रक्तस्यौष्ठस्य रागे रक्तवर्णे[1] कृत्वा सितस्य भावः सितिमा धावल्यमेव चिह्नं यस्य तादृशं धवलरूपमपि स्वमात्मानं निह्नुते पुनः पुनः स्वर्भानुपानभिया तिरो दधाति । यतः—स्वर्भानुना वारंवारं प्रसभपानेन विभीषिकाभिर्भयोत्पादनैः कृत्वा दुःखाकृता प्रातिलोम्याचरणेनोत्पादितदुःखा । किंभूतमधरोष्ठम्—प्रसिद्धस्य ताम्बूलस्येव ताम्रो वर्णो यस्य, ताम्बूलेनैव वा ताम्रं रक्तवर्णम् । पुना राहुपानभिया स्वदधरमेव स्थानान्तरमाश्रित्य रूपान्तरेणात्मानं गोपायतीत्यर्थः । अन्योपि सभयं स्थानं हित्वा स्थानान्तरमाश्रित्य तत्रापि रूपान्तरं धृत्वा स्वं निह्नुते । सुधया चन्द्रस्य परित्यागात्स्वन्मुखाश्रयणात्स्वन्मुखं चन्द्रादधिकमिति भावः । ताम्बूलताम्रमित्युत्प्रेक्षोपमोत्प्रेक्षा वा । दुःखाकृता, 'दुःखात्प्रातिलोम्ये' इति डाच् ॥

हर्यक्षीभवतः कुरङ्गमुदरे प्रक्षिप्य यद्वा शशं
जातस्फीततनोरमुष्य हरिता मूतस्य पल्या हरेः ।
भङ्गस्त्वद्वदनाम्बुजादजनि यत्पद्मात्तदेकाकिनः
स्यादेकः पुनरस्य स प्रतिभटो यः सिंहिकायाः सुतः ॥

हर्यक्षीति ॥ हे प्रिये, मतभेदेन कलङ्करूपं कुरङ्गं, यद्वा—शशमुदरे मध्ये प्रक्षिप्य जाता स्फीता पूर्णा तनुर्यस्य, हरेरिन्द्रस्य पत्न्या हरिता प्राच्या दिशा सूतस्य तयोदितस्य पूर्णस्य, अतएव हरेः श्रीविष्णोर्वामाक्षीभवतः, यद्वा—संजातपूर्णशरीरस्य मृगं, यद्वा—शशं, कलङ्कं मध्ये निक्षिप्य मध्यस्थितकलङ्कस्य कनीनिकातुल्यत्वाच्छ्रीविष्णोर्वामनेत्रीभवतोऽमुष्य चन्द्रस्य स्वद्वदनाम्बुजात्सकाशाद्यद्भङ्गः पराजयोऽजनि, तदेकाकिनः सर्वदाऽसहायात्तदेकमात्पद्मात्, नत्वन्यस्मात्कमलात्, नह्यन्यैः पक्षैरयं पराजीयते यत्पुनरयमेव पद्मान्पराभवतीत्यर्थः । अथवा—अम्बुजतुल्यत्वाद्वदनादेव पद्माद्, अथच—पद्मसंख्याकात्स्वद्वदनरूपादम्बुजाद्यदस्य भङ्गो जातः, तदेकाकिनोऽसहायस्य स्यात्तथेत् । बहुभिरेकः पराजीयत इति युक्तमेवेत्यर्थः । यः सिंहिकायाः सुतो राहुः स पुनरेकोऽन्योऽस्य प्रतिभटः प्रतिमल्लः पराभावुको राहुरेव नत्वन्य इति । 'संप्रति' इति पाठे—अद्य पुनरस्यैकः प्रतिभटः, यः सिंहिकायाः सुतः स्यात् । एकाकिनोऽस्य स्वन्मुखपद्मः प्रतिद्वन्द्वी न भवति, अतुल्यत्वात्, किंत्वेकाकी राहुरेवास्य प्रतिभटो युक्त इत्यर्थः । किंच स्वशत्रुभूताद्राहोरप्यस्यान्यः पराजय इति महदस्य कष्टं प्राप्तमित्यर्थः । अथच—हरिद्वर्णया हरेः सिंहस्य पत्न्या सिंहिकया प्रसूतस्य, तथा—मृगं शशं वा यं कंचन पशुं जठरे निक्षिप्य भक्षयित्वा स्थितस्य, अत एव संजातपुष्टशरीरस्य, अत एव हर्यक्षीभवतः सिंहतां प्राप्नुवतोऽस्य स्वन्मुखाद्यः पराजयोऽजनि स एकाकिनः केवलात्पद्माद्भृजादेव पराजयः सिंहस्य गजाद्भङ्गो यथा तद्वदेतन्महच्चित्रमित्यर्थः । अथच—पद्मसंख्याकादेकस्य पराजयः । सिंहोऽप्येको बहुभिर्जयः पराजीयत एवेत्यर्थः । अथच—पद्मात्सरोभादष्टापदादेव भङ्गः सिंहस्य केवलमष्टापदादेव भङ्गः । पद्मचन्द्राभ्यां सकाशात्स्वन्मुखमधिकमिति भावः । 'हर्यक्षः केसरी हरिः' इत्यमरः । 'गजाष्टजन्तवः पद्माः' इत्यनेकार्थे भोजः । प्रथमपक्षे हर्यक्षिशब्दात्स्त्रियां ङीप्, द्वितीयपक्षे हर्यक्षशब्दादेव ॥

यत्पूजां नयनद्वयोत्पलमयीं वेधा व्यधात्पद्मभू-
र्वाक्पारीणरुचिः स चेन्मुखमयं पद्मः प्रिये तावकम् ।

---

१ 'स्वर्भानुरिति शुभ्रादित्वात् 'पृषोदरादि-' इति न णत्वम्' इति रायमुकुटः ।

कः शीतांशुरसौ तदा मखमृगव्याधोत्तमाङ्गस्थल-
स्थास्नुस्वस्तटिनीतटावनिवनीवानीरवासी बकः १४०

यदिति ॥ हे प्रिये, वेधा नयनद्वयमेवोत्पलं तन्मयीं तद्रूपां तद्रुचितां यस्य पद्मस्य पूजां व्यधाद्व्यरचयत् । यतः श्रीविष्णो-र्नाभौ वर्तमानात्पद्माद्भवतीति पद्मभूः । स्वजनकस्य यस्य पद्मस्य पितृभक्त्या नेत्रद्वयेनैव नीलोत्पलयुगेन महतीं पूजामकृत । वाक्पा-रीणा वाचः परतीरे भवा वाचा वर्णयितुमशक्या रुचिर्यस्य सोऽयं पद्मश्चेत्तावकं मुखं स एव भवन्मुखरूपो जातः, अनन्तरं ब्रह्मणा स्वपितृबुद्ध्या नेत्रनीलोत्पलाभ्यां कृतपूजत्वादत्र तव मुखे नेत्रनी-लोत्पले दृश्येते इत्यर्थ इति चेत् । तदा तर्हि असौ शीतांशुः को नाम, अपितु न कश्चित् । त्वन्मुखस्य पुरस्तादयं कः । स्मरणा-र्होऽपि नेत्यर्थः । तर्ह्यसौ क इति चेत्तत्राह—अयं बकः । किंभूतः—दक्षमख एव मृगस्तस्य व्याधो हरस्तस्योत्तमाङ्गं शिरस्तल्लक्षणे स्थले स्थास्नुः स्थितिशीला स्वस्तटिनी गङ्गा तस्यास्तटावन्यां तीरभूम्यां या वनी महदुपं वा यत्काननं तत्र ये वानीरा वेतसास्तन्मध्य-वासी । चन्द्रश्च हरजटाजूटवासीति प्रसिद्धम् । वाक्पारीणरुचि-रिति ब्रह्मविशेषणं वा । अत्र यदपत्यस्य ब्रह्मणोपि सौन्दर्यं वाग-गोचरः, तत्पितुः पद्मस्य सौन्दर्यं मनसोपि गोचरो न भवती-त्यर्थः । त्वन्मुखस्य चन्द्रस्य च महदन्तरम्, साम्यसंभावनापि नास्तीति भावः । एतेन चन्द्रादिसुन्दरवृन्दं ब्रह्मणा सृष्टम्, भव-दीयमुखपद्मं तु ब्रह्मणोऽपि सृष्ट्वात्सर्वाधिकमिति सूचितम् । मख-मृगेत्यादिना चन्द्रस्यातिदैन्यं सूचितम्, त्वन्मुखसाम्यप्राप्त्यर्थं तपश्चरणं च सूचितम् । अन्योपि विशिष्टवस्तुप्राप्तये शिवस्थान-युक्तनदीतीरवानीरवासी तपस्यति । नदीतीरवानीरवासित्वं बक-जातिः । वाक्पारीणा, भवार्थे 'राष्ट्रावारपाराद्घखौ' इत्यत्र 'अवार-पाराद्विपरीतादपि विगृहीतादपि' इति वचनात्खः ॥

जातंशातक्रतव्यां हरिति विहरतः काकतालीयमस्या-
मश्यामत्वैकमत्यस्थितसकलकलानिर्मितेर्निर्मलस्य ।
इन्दोरिन्दीवराभं बलविजयिगजग्रामणीगण्डपिण्ड-
द्वन्द्वापादानदानद्रवलवलगनादङ्कमङ्के विशङ्के ॥१४१॥

जातमिति ॥ अहमिन्दोरङ्के बलविजयिन इन्द्रस्य गजग्राम-णीर्हस्तिषु मध्ये प्रधानं प्राच्यामेव वर्तमानो य ऐरावतस्तस्य गण्ड-योः कपोलयोः पिण्डयोः शिरःस्थितकुम्भस्थलयोश्च ये द्वन्द्वे गण्ड-द्वन्द्वं पिण्डद्वन्द्वं च ते एवापादानं निर्गमनस्थानं येषां ते च ते दानद्रवलवा मदजललेशास्तेषां लग्नात्संपर्कात्काकतालीयमाक-स्मिकं दैवात्सिद्धमिन्दीवराभं नीलोत्पलतुल्यं जातमङ्कं कलङ्कं विशङ्के मन्ये । किंभूतस्येन्दोः—अस्यामङ्गुलीनिर्दिष्टायां पुरो-दृश्यायां शतक्रतोरियं शातक्रतवी तस्यां हरिति दिशि विहरत उच्चैश्चतः । तथा—अश्यामत्वे विषये ऐकमत्यं सर्वसंवादस्तेन तत्र वा स्थिताभिर्वर्तमानाभिः सकलाभिः पञ्चदशभिरपि कलाभिः कृत्वा निर्मितिर्यस्य । अश्यामत्वैकमत्येन स्थिता सकलकलानिर्मि-तिर्यस्य तादृशस्य वा । अतएव—निर्मलस्य प्रत्येकं कलानां धाव-ल्यस्य दृष्ट्वाद्धवलसकलकलानिर्मितत्वात्कारणधावल्याद्धवलस्य, अश्यामत्वैकमत्ये स्थिता याः सकलाः कलास्ताभिर्या निर्मितिस्तस्या वा हेतोर्धवलस्य । पूर्वं कारणधावल्यात्सकलोऽप्ययं धवल एवाभूत्, पश्चात्तु पूर्वदिग्भ्रमणवशात्तत्रैव भ्रमत ऐरावतस्य कपो-लकुम्भस्थलगलन्मदजलं दैववशाल्लग्नं तेनायं मध्ये कालः प्रति-भातीत्यर्थः । तालतरुतले यदैव काकस्योपवेशनम्, तदैव दैवात्का-कस्योपरि तालफलपात इति काकतालमिव, 'समासाच्च तद्विष-यात्' इति छः । निर्मितेः, पक्षे हेतौ पञ्चमी ॥

अंशं षोडशमामनन्ति रजनीभर्तुः कलां वृत्तय-
न्त्येनं पञ्चदशैव ताः प्रतिपदाद्याराकवर्धिष्णवः ।
या शेषा पुनरुद्धृता तिथिमृते सा किं हरालंकृति-
स्तस्याः स्थानबिलं कलङ्कमिह किं पश्यामि सश्यामिकम्

अंशमिति ॥ हे प्रिये, लोकाः रजनीभर्तुः षोडशमंशं कला-मामनन्ति सत्यं कथयन्ति, ताश्च षोडशांशरूपाः प्रतिपदादिर्यस्मि-न्कर्मणि राकां पूर्णिमामभिव्याप्य वर्धिष्णवः प्रतितिथि एकैककला-मभिवृद्ध्या वर्धमानाः पञ्चदशसंख्याका एव कला एनं चन्द्रं वृत्तय-न्ति वर्तुलं कुर्वन्ति । तिथिसंख्यासाम्यात्पूर्णमण्डलं कुर्वन्तीत्यर्थः । या पुनः कला षोडशी तिथिमृते उद्धृता प्रयोजनाभावाच्चन्द्राद्बहिः कृता सा षोडशी कला शेषा पञ्चदशकलाभ्योऽवशिष्टा सती, यद्वा षोडशीं तिथिं विना प्रयोजनाभावाद्यावशिष्टा सा निष्प्रयो-जनत्वादुद्धृता चन्द्राद्बहिर्निष्कासिता सती हरालंकृतिः शिवशिरो-भूषणं जाता किम् । चन्द्रे प्रयोजनाभावाद्धरालंकृतिरिवाभूत्कि-मित्यर्थः । अहं तस्याश्चोद्धृतायाः षोडश्याः कलायाः सश्यामिकं नभो नीलिम्ना सह वर्तमानं स्थानस्य पूर्वावस्थितेः संबन्धि बिलं विवरं तत्कलानवस्थित्या कृत्वा शून्यं नीलं नभोभागमेवेह चन्द्र-मण्डलमध्ये कलङ्कं पश्यामि किम् । मध्यवर्तिनीलं तत्स्थानं बिलमेवाहं कलङ्कत्वेन शङ्के इत्यर्थः । शेषशब्दस्याभिधेयलिङ्गत्वं पूर्वमेव दर्शितम् । 'पूर्णे राका निशाकरे' इत्यमरः । वृत्तयन्ति, 'तत्करोति–' इति णिच् । वर्धिष्णवः, 'अलंकृञ्–' इतीष्णुच् । तिथिमृते, 'ऋते नलाशाम्' इति वत् । श्यामिका, मनोज्ञादेरा-कृतिगणत्वाद्भावे वुञ् ॥

ज्योत्स्नामादयते चकोरशिशुना द्राघीयसी लोचने
लिप्सुर्मूलमिवोपजीवितुमितः संतर्पणात्मीकृतात् ।
अङ्के रङ्कुमयं करोति च परिस्प्रष्टुं तदेवादृत-
स्त्वद्वक्त्रं नयनश्रियाप्यनधिकं मुग्धे विधित्सुर्विधुः ॥

ज्योत्स्नामिति ॥ हे मुग्धे सुन्दरि, त्वद्वक्त्रं वृत्तत्वादिगुणैः समानमपि नयनश्रियापि कृत्वानधिकं समानमेव विधित्सुः, अत एव—स्वस्य द्राघीयसी अतिदीर्घे लोचने लिप्सुर्लब्धुमिच्छुर्विधु-श्चकोरशिशुना प्रयोज्येन स्वीयां ज्योत्स्नामादयते भक्षयति । तत्रो-त्प्रेक्षते—चन्द्रिकामृतपायनकृतसम्यक्तर्पणेनात्मीकृतात्स्ववशीकृ-तादितश्चकोरबालकात्सकाशान्मूलं स्वचन्द्रिकापायनहेतुभूतमेत-दीयातिदीर्घनेत्रद्वयमुपजीवितुमादातुमिव । यद्वा—यत्किंचि-त्स्वस्य चन्द्रिकां पाययित्वा ततो नेत्रद्वयलक्ष्मीप्राप्त्या मूलं चन्द्रि-कारूपधनं वर्धयितुमिव । अन्योप्युत्तमर्णोऽधमर्णस्य किंचिद्दत्वा तं वशीकृत्योत्तममिष्टं वस्तु ततो गृह्णाति । तथा—अयं चन्द्र आदृत आदरयुक्तः सन्नङ्के मध्ये, अथच—उत्सङ्गे, च रङ्कुं च करोति ।

उत्सङ्गधारणेन लालयतीत्यर्थः। किमर्थमित्याशङ्क्याह—तन्मूलभूतमतिविशालं तदीयनयनयुगलं परिस्प्रष्टुमिव स्वलग्नं कर्तुमिव। त्वन्मुखसाम्यनिमित्तरमणीयनेत्रद्वयसंपादनायायं चन्द्रश्चकोरहरिणौ वञ्चयतीत्यर्थः। चन्द्रादुत्कृष्टं त्वन्मुखमिति भावः। 'परिप्रष्टुम्' इति पाठे एतन्नेत्ररामणीयकप्राप्त्युपायं प्रष्टुमिवेत्यर्थः। शिशुः सुप्रतार्य इति सूचयितुं शिशुपदम्। आदयते, अदेर्निगरणार्थत्वेपि 'अदेः प्रतिषेधो वक्तव्यः' इति वक्तव्यात् 'निगरण–' आदि (सूत्रेण) परस्मैपदाभावे, 'णिचश्च' इति तङ्। शिशुना, 'आदिखाद्योर्न' इत्यणौ कर्तुर्णौ कर्मत्वाभावः। द्राघीयसी, अतिशायने ईयसुनि 'प्रियस्थिर–' इति द्राघादेशः। लिप्सुः, विधित्सुरिति च, 'न लोका–' इति षष्ठीनिषेधः॥

लावण्येन तवास्यमेव बहुना तत्पात्रमात्रस्पृशा
चन्द्रः प्रोञ्छनलब्धतार्धमलिनेनारम्भि शेषेण तु।
निर्माय द्वयमेतदप्सु विधिना पाणी खलु क्षालितौ
तल्लेशैरधुनापि नीरनिलयैरम्भोजमारभ्यते॥ १४४॥

लावण्येनेति॥ हे प्रिये, बहुना क्वचित्पात्रे संचितेनाखिलेन लावण्येन कृत्वा तवास्यमेवारम्भि निर्मितम्। चन्द्रस्तु पुनस्तस्य लावण्यस्याधारपात्रं स्पृशतीति स्पृक् तेन लावण्यस्थापनपात्रमात्रलग्नेन, अत एव प्रोञ्छनेन पात्रनिघर्षणेन कृत्वा या लब्धतोपार्जितत्वं तेनार्धं कियत्खण्डं मलिनं यस्य तेन किंचिन्मलिनेन शेषेण भवन्मुखनिर्माणावशिष्टेनांशेन कृत्वारम्भि निर्मितः। अत एव शबलमण्डलोऽयं शोभत इत्यर्थः। शेषेण तु निर्मित इति वा। विधिना एतत्त्वन्मुखमृगाङ्कलक्षणं द्वयं निर्माय सृष्ट्वाप्सु पाणी क्षालितौ खलु लावण्यलेपकृतजलक्षालनाविव। तस्मात्तस्य क्षालनरजोमिलितलावण्यलेपस्य लेशैरल्पैरंशैरेव कर्तृभिरधुनापि नीरनिलयैर्जलस्थायिभिः सद्भिरम्भोजमारभ्यते निर्मीयते। कमलनिर्माणे ब्रह्मणः कोपि प्रयासो नेत्यर्थः। कमलाच्चन्द्रोऽधिकः, तस्मादपि त्वन्मुखं लावण्यसाकल्येन निर्मितत्वादधिकमिति भावः। अम्भोजम्, जात्येकत्वम्॥

लावण्येन तवाखिलेन वदनं तत्पात्रमात्रस्पृशा
चन्द्रः प्रोञ्छनलब्धतार्धमलिनेनारम्भि शेषेण यः।
तल्लेखापि शिखामणिः सुषमयाहंकृत्य शंभोरभू-
दब्जं तस्य पदं यदस्पृशदतः पद्मं च सद्म श्रियाः॥१४५

लावण्येनेति॥ अखिलेन लावण्येन तव वदनमारम्भि। ततो भवद्वदनकामनीयकवर्णनातिचिन्तापि दूरे तिष्ठतु, अशक्यकरणत्वादित्यर्थः। उक्तरीत्या तत्पात्रमात्रस्पृशा प्रोञ्छनलब्धतार्धमलिनेन शेषेण तु यश्चन्द्रो विधिना निरमायि तस्य लेखाऽपि लावण्यपात्रमात्रस्थलावण्यनिर्मितस्य चन्द्रस्य षोडशांशरूपा कलापि कलामात्रत्वादेव निष्कलङ्कत्वात् सुषमया परमया शोभया कृत्वा अहंकृत्य अस्यापेक्षयाहमेव रमणीयेति दर्पमवलम्ब्य शंभोः शिखामणिः शिरोभूषणमभूच्छिवशिरोध्यरोहत्। अन्यदपि सदर्पमुत्तमशिरोऽधिरोहति। अब्जं कुमुदं कर्तृ यद्यस्मात्तस्य चन्द्रस्य पदं प्रतिबिम्बस्थानं जलमस्पृशत्। अतः श्रियः सद्माभूत् चन्द्रकरस्पर्शादेव हि कुमुदं सश्रीकं भवति। पद्मं च श्रियः सद्माभूत्। जलस्य चन्द्रकिरणसंस्पर्शात् पद्मस्य च तत्रोत्पन्नत्वाद्वर्तमानत्वात्कुमुदसाहचर्याच्च पद्ममपि लक्ष्म्याः स्थानमभूत्। यद्वा—पद्मं चातः कुमुदाद्धेतोः श्रियः सद्माभूत्। अब्जत्वजातियोगात्कुमुदाधारजलयोगाच्च कुमुदादेव परम्परया पद्मानां लक्ष्मीगृहत्वमभूदित्यर्थः। यद्वा—या तल्लेखा शंभोः शिखामणिरभूत्, तस्य शिखामणेश्चन्द्रस्य पदं स्थानं शिवमस्तकं पूजासमये यस्मात्कुमुदं पद्मं चास्पृशत्, अतस्तदुभयं श्रियः सद्माभूत्। चन्द्रसंबद्धशिरःसंबन्धादुभयं श्रीगृहमभूदित्यर्थः। यद्वा—तस्य शंभोः पदं चरणं पूजावशाद्यस्मात्कुमुदं पद्मं चास्पृशत् तस्मादुभयं श्रीसद्माभूत्, तस्य लावण्यस्य स्थानं विधिहस्तलेपक्षालनजलं यस्मात्कुमुदं पद्मं चास्पृशत्। यद्वा पद्ममेवास्पृशत्। यतोऽब्जं तस्मात्कुमुदम्, पद्मं च पद्ममेव वा श्रीसद्माभूदिति वा। त्वन्मुखलावण्यलेशपरम्परासंस्पर्शप्राप्तशोभानि चन्द्रादीनीति त्वन्मुखलावण्यं वाङ्मनसगोचरो न भवतीति भावः। अर्थान्तरस्य स्पष्टत्वात्, पूर्वार्धस्य त्वर्थान्तरप्रतिपादनार्थमनुवादरूपत्वान्नायं श्लोकः पुनरुक्तः। अहमिति विभक्तिप्रतिरूपकमव्ययं, तस्य क्तान्तेन 'सह सुपा' इति समासे क्त्वो ल्यप्॥

सपीतेः संप्रीतेरजनि रजनीशः परिषदा
परीतस्ताराणां दिनमणिमणिग्रावमणिकः।
प्रिये पश्योत्प्रेक्षाकविभिरभिधानाय सुशकः
सुधामभ्युद्धर्तुं धृतशशकनीलाश्मचषकः॥१४६॥

सपीतेरिति॥ हे प्रिये, संप्रीतेस्ताराणामेवान्योन्यं सम्यग्या प्रीतिः सौहार्दं तस्माद्धेतोर्या सपीतिः सह पानं, सुहृदो हि सह पानं कुर्वन्ति तस्माद्धेतोः, यद्वा सहपानाद्धेतोर्या सम्यक् प्रीती रुच्यभिवृद्धिः, तस्माद्धेतोस्ताराणां परिषदा सङ्घेन परीतः समन्ताद्व्याप्तोऽयं रजनीशो दिनमणिमणिः सूर्यकान्तमणिस्तस्य ग्रावा शिला तया घटितोऽतिधवलः स्थूलः पेयद्रव्याधारभूतो मणिकोऽलिंजर एवाजनि संभूतः विधिना तारापरिषदा वा व्यरचीति पश्य। कीदृशः—सादृश्येन वस्त्वन्तरसंभावनारूपायामुत्प्रेक्षायां विषये कविभिर्विशिष्टसंभावनाचतुरैः श्रीहर्षादिभिर्महाकविभिस्तारापरिषदेव सुधामभ्युद्धर्तुं धृतो यो मध्यस्थितः शशकः कलङ्कः स एव नीलाश्मा नीलमणिस्तेन घटितं चषकं पानपात्रं यस्मिन्नेवंभूत इवायमिति अभिधानाय वर्णनाय वर्णयितुं सुशकः सुखेन शक्यः। चन्द्रो धावल्याद्वृत्तत्वाच्च पीयूषपूर्णः सूर्यकान्तमणिक इव, कलङ्कश्च नीलमणिघटितं चषकमिव दृश्यते पश्येत्यर्थः। यथा मणिकस्थोदकाद्युद्धरणाय मणिकमुखे चषकः स्थाप्यते, तथा ताराभिः परस्परं मिलित्वा सुधापानं कर्तुं परिवेष्टितस्य सुधापूरितस्यास्यापि चन्द्रमणिकस्य मुखे सुधोद्धरणाय शशनामा नीलमणिचषको निक्षिप्त इत्युत्प्रेक्षितुं शक्यत इत्यर्थः। 'चषकोऽस्त्री पानपात्रम्' इत्यमरः। सपीतेः, 'वोपसर्जनस्य' इति वा 'सहस्य सः संज्ञायाम्' इत्यत्र 'सहस्य सः' इति योगविभागाद्वा सहस्य सः। कविभिः, खलर्थयोगान्न षष्ठी, सुशक इति खल्॥

आस्यं शीतमयूखमण्डलगुणानाकृष्य ते निर्मितं
शङ्के सुन्दरि शर्वरीपरिवृढस्तेनैष दोषाकरः।

आदायेन्दुमृगादपीह निहिते पश्यामि सारं दृशौ
त्वद्वक्त्रे सति वा विधौ धृतिमयं दध्यादनन्धः कुतः१४७

आस्यमिति ॥ हे सुन्दरि, विधिना शीतमयूखस्य मण्डलं बिम्बं तस्य वृत्तत्वाह्लादकत्वादिगुणानाकृष्य गृहीत्वा ते आस्य यतो निर्मितं तेन गुणगणोत्कर्षेण हेतुना शर्वर्याः परिवृढः प्रभुश्चन्द्रो दोषाणामाकर उत्पत्तिस्थानं, न तु दोषा रात्रिस्तत्कारित्वाद्दोषाकर इत्यर्थ इत्यहं शङ्के । तथा—इन्दोर्मृगात्सकाशात्सारं दृशावादाय अतिश्रेष्ठे नेत्रे गृहीत्वा इह भवन्मुखे निहिते इत्यहं जाने । कुतो ज्ञातमित्यत आह—सुन्दरतरे त्वद्वक्त्रे जागरूके सति अनन्धश्चक्षुष्मानुभयतारम्यविचारचतुरोऽयं मृगो विधौ चन्द्रे धृतिं स्थितिम्, अथच—समीचीनाधारपरितोषं, कुतो वा दध्याद्धारयेत्, अपितु न कथंचित्, तस्मान्नेत्रोद्धरणादन्धत्वेनैव त्वन्मुखरामणीयकादर्शनादन्यत्र गन्तुमशक्तेश्च त्वन्मुखं त्यक्त्वा नेत्रायं स्थित इत्यर्थः । त्वन्मुखं चन्द्रादधिकम्, नेत्रे च मृगनेत्राभ्यामधिके इति भावः । 'सारे' इति क्वचित्पाठः ॥

शुचिरुचिमुडुगणमगणनममुमति-
कलयसि कृशतनु न गगनतटमनु ।
प्रतिनिशशशितलविगलदमृतभृत-
रविरथहयचयखुरबिलकुलमिव ॥ १४८ ॥

शुचीति ॥ हे कृशतनु, त्वं गगनतटं नभःस्थलमनु लक्षीकृत्य शुचिरुचिं श्वेतकान्तिं, तथा—बहुत्वादगणनं संख्यातुमशक्यममुमङ्गुल्या निर्देश्यं प्रत्यक्षगम्यमुडुगणं प्रतिनिशं रात्रौ रात्रौ शशितलाच्चन्द्राधोभागाद्विगलता स्रवतामृतेन भृतं पूर्णं रविरथस्य हयचयस्य खुराणां ध्यानि बिलानि न्यासस्थानविवराणि तेषां कुलं वृन्दमिव नातिशयेन कलयसि, अपितु तदिवातितरां जानीहीत्यर्थः । प्रतिनिशं चन्द्रादूलता धवलेनामृतेन पूर्णाः सूर्याश्वखुरगर्ता इव तारकाः शोभन्त इति भावः । गगनतटम्, कर्मप्रवचनीययोगाद्द्वितीया । प्रतिनिशम्, वीप्सायामव्ययीभावः । सर्वलघुः ॥

उपनतमुडुपुष्पजातमास्ते
भवतु जनः परिचारकस्तवायम् ।
तिलतिलकितपर्पटाभमिन्दुं
वितर निवेद्यमुपास्य पञ्चबाणम् ॥१४९॥

उपनतमिति ॥ हे प्रिये, 'रक्तो भौमः शनिः कृष्णो गुरुः पीतः सितः कविः' इत्यादिज्योतिःशास्त्रादिप्रामाण्यान्नानावर्णाकृतीन्युडूनि नक्षत्राण्येव पुष्पजातमुपनतमुपसंपन्नमास्ते अयं मल्लक्षणो जनः प्रारब्धकामदेवपूजायास्तव परिचारकश्चन्दनाद्युपचारोपनायकः, अथच—संभोगकारी भवतु । त्वं तिलैः संजाततिलकः तिलैरेव तिलकवान्कृतो वा यः पर्पटः शालितण्डुलपिष्टरचितश्चिपिटस्तिलसंकुलीसंज्ञ उपदंशविशेषस्तद्वदाभा यस्य तत्तुल्यं सकलङ्कमध्यत्वाद्विशिष्टपर्पटसदृशमिन्दुमेव निवेद्यं कामाय वितर एवं पञ्चबाणं कामदेवमुपास्य पूजय । अन्योपि देवपूजकः पुष्पादिसामग्र्या देवं पूजयति, कश्चित्परिचारकोपि तस्य भवति । एवमत्रापि। सर्वाणि नक्षत्राण्युदितानि, कामोद्दीपकश्चन्द्रोऽप्युदितः, सुरतान्तरायकारी निषिद्धः संध्यासमयोऽतिक्रान्तः, तस्मात्काममुपास्स्व, सुरतेच्छुरस्मीति भावः । पञ्चबाणमित्यनेन कामस्यातिपीडाकारित्वं सूच्यते । 'जातिर्जातं च सामान्यम्' इत्यभिधानाज्जातशब्दः सामान्यवाची पुष्पमात्रे पर्यवस्यति । तिलकितेति तारकादिः, मतुबन्तात् 'तत्करोति-' इति ण्यन्तान्निष्ठा वा ॥

इदानीं काव्यसमाप्तिं चिकीर्षुः श्रीहर्षो नायकमुखेनाशिषमाशास्ते—

स्वर्भानुप्रतिवारपारणमिलद्दन्तौघयन्त्रोद्भव-
श्वभ्रालीपतयालुदीधितिसुधासारस्तुपारद्युतिः ।
पुष्पेष्वासनतत्प्रियापरिणयानन्दाभिषेकोत्सवे
देवः प्राप्तसहस्रधारकलशश्रीरस्तु नस्तुष्टये॥१५०॥

स्वर्भानुरिति ॥ हे प्रिये, देवः प्रकाशमानस्तुपारद्युतिर्हिमकरः, अथच हिमकर एव देवः, वर्णनां पूजां च कुर्वतां नोऽस्मदादीनाम्, आवयोर्वा तुष्टये परमानन्दायास्तु । किंभूतः । स्वर्भानोराहोः प्रतिवारं पौनःपुन्येन यत्पारणं चन्द्रस्यैव गिलनं तेन तत्र वा मिलन् संलग्नो यो दन्तौघस्तद्रूपं यन्त्रं छिद्रकरणसाधनं तस्मादुद्भवो यस्याः सा श्वभ्राली दन्तदशनकृतविवरपरम्परा तया तस्याः सकाशाद्वा पतयालुः पतनशीला दीधितिसुधा किरणामृतं तद्रूपः, दीधितिसुधाया वा सारः श्रेष्ठभागो यस्य, दीधितिसुधाया आसारो धारासंपातो दीधितिसुधारूपो वा आसारो यस्य सः । अत एव—पुष्पमेवेष्वासनं धनुर्यस्य तस्य कामस्य तत्प्रियाया रत्याश्चानयोर्यः परिणयो विवाहो लक्षणया परस्परसंमेलनं तद्रूपो य आनन्दः संतोषस्तत्संबन्धिनि 'समुद्रज्येष्ठा-' इत्यादि श्रौतेऽभिषेकाख्येऽत्सवे महाभिषेकार्थं सहस्रसंख्या धारा लोहशलाकानिर्मितजलप्रवाहमार्गा यस्य स तादृशो यः कलशस्तस्य श्रीः प्राप्ता सहस्रच्छिद्रगलज्जलधारकलशस्येव श्रीः शोभा येन सः । महोत्सवे हि सहस्रधारेण सुवर्णकलशेन महाभिषेकः क्रियते । तथाच राहुदन्तकृतच्छिद्रपरम्परागलदमृतधारश्चन्द्रो गलज्जलधारसहस्रच्छिद्रसुवर्णकलश इव शोभमानः पूर्वोक्तवर्णनयोक्तविधत्वत्कृतपूजया च सुरतप्रवृत्तयोरावयोरुद्दीपकतया परमानन्दं कुर्यादिति भावः । एतेन तत्समयोचितरतिकामविवाहोत्सवाभिधानेन 'चन्द्रोऽस्तु नस्तुष्टये' इत्यनेन च विलासिना नलेन स्वनिर्वर्त्यतृतीयपुरुषार्थपयोधिपीयूषरसास्वादनलालसाभिव्यज्यते । 'सुधाधार-' इत्यपि पाठे—दीधितिसुधाया धारा यस्य सुधाया आधार इति वा । आनन्दपदेन 'तुष्टयेस्तु' इत्याशिषा च ग्रन्थसमाप्तिं द्योतयति । महाभारतादौ वर्णितस्याप्युत्तरनलचरित्रस्य नीरसत्वान्नायकानुदयवर्णनेन रसभङ्गसद्भावाच्च काव्यस्य च सहृदयाह्लादनफलत्वाच्चात्रोत्तरचरित्रं श्रीहर्षेण न वर्णितमित्यादि ज्ञातव्यम् । न इति पक्षे 'अस्मदो द्वयोश्च' इति द्वित्वेपि बहुवचनम् ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
द्वाविंशो नवसाहसाङ्कचरिते चम्पूकृतोऽयं महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गो निसर्गोज्ज्वलः२२

श्रीहर्षमिति ॥ द्वाविंशतेः पूरणः सर्गो गतः समाप्तिं प्राप । किंभूतस्य श्रीहर्षस्य—नवो यः साहसाङ्को नाम राजा तस्य चरिते विषये चम्पूं गद्यपद्यमयीं कथां करोतीति कृत् तस्य निर्मितवतः । सोपि ग्रन्थो येन कृत इति सूच्यते । 'नृपसाहसाङ्क-' इति पाठे-नृपश्चासौ साहसाङ्कश्च तस्य गौडेन्द्रस्य चरिते विषये चम्पूकृतः भोजराजस्य विक्रमार्कस्य वेति केचित् । द्वाविंश इति पूरणे डटि 'ति विंशतेर्डिति' इति तिलोपः ॥

यथा यूनस्तद्वत्परमरमणीयापि रमणी
कुमाराणामन्तःकरणहरणं नैव कुरुते ।
मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः
किमस्या नाम स्यादरसपुरुषानादरभरैः ॥ १ ॥

यथेति ॥ यथा परमरमणीयापि रमणी यूनस्तरुणस्य कामिनोऽन्तःकरणहरणं कुरुते, तद्वत्तथा कुमाराणां बालिशानां क्षीरलाभमात्रेण परमपुरुषार्थप्राप्तिमभिमन्यमानानामननुभूतकामसुखानां चित्तं स्ववशं कैव कुरुते, अपितु---न कापि । तथेयं काव्यरचनारूपा परमरमणीया मदुक्तिरपि श्रवणमननादिवशात्सुधीभूयामृतत्वं प्राप्य सुधियः सकलदर्शनरहस्यवेदिनोऽतिसरसस्य पण्डितस्य चेतश्चेत्कि मदयति आनन्दयति, तर्ह्यस्याः सुधियाऽत्यादृताया मदुक्तेरसानां नीरसानां सर्वथैवासंस्पृष्टरसशब्दार्थानामपि चलदुपलप्रायाणामतृणादापुच्छपशूनामनादरभरैस्तत्कृतावज्ञासमूहैः किं नाम स्यात्, अपितु न किंचिदप्यस्यास्तैरपकर्तुं शक्यते । सुधीभिरादृते सति नीरसैरकृते कृते वाप्यादरे न किंचिदित्यर्थः । सुधीभिरादृतत्वात्सकलगुणपूर्णातिसरसेयं मदुक्तिरिति भावः । मदुक्तेः सुधारूपत्वाभावात्क्षोदानन्तरं च सरसत्वप्रतीतेः सुधात्वात्सुधीभूयेति च्विः । सुधिय इति जात्यभिप्रायेण । एकेनापि सुधियादरे कृते महद्गौरवम्, बहुभिरप्यज्ञैरनादरेषु कृतेष्वपि न किंचिल्लाघवमित्यभिप्रायेण वा । यून इति प्रतियोगिन एकवचनान्तत्वाच्चैकवचनम् । कवेः स्वग्रन्थमुद्दिश्येयमुक्तिः ॥

कविरर्थान्तरोक्त्या स्वीयामुक्तिं वर्णयति—

दिशि दिशि गिरिग्रावाणः स्वां वमन्तु सरस्वतीं
तुलयतु मिथस्तामापातस्फुरद्ध्वनिडम्बराम् ।
स परमपरः क्षीरोदन्वान्यदीयमुदीयते
मथितुरमृतं खेदच्छेदि प्रमोदनमोदनम् ॥ २ ॥

दिशीति ॥ गिरिग्रावाणोऽद्रिपाषाणा दिशि दिशि स्वां निजां सरस्वतीं नदीमन्तर्गतजलप्रस्रवणं वमन्तु मुञ्चन्तु । आपातः सामस्त्येन पतनं स्फुरन्प्रकाशमानो ध्वनिडम्बरः शब्दाडम्बरो यस्यां तां च नदीं मिथस्तुलयतु मिथोऽन्यनद्या समीकरोतु । अविसर्गान्तपाठे—आपातेन समन्तादूर्ध्वदेशादधःपतनेन प्रकाशमानः शब्दाडम्बरो यस्यां तामन्यनद्या समं समीकरोतु । जन इत्यर्थः । अथच—आपाते प्रथमारम्भ एव स्फुरत्प्रपानघोषां तां जनो मिथस्तुलयतु । उभयव्याख्यानेपि परिणामे तु न नदी न च तस्याःशब्दाडम्बरश्चिरंतन इत्यर्थः । स क्षीरोदन्वान् परं केवलं, अपरः न विद्यते पर उत्कृष्टो यस्मादित्युत्कृष्टः, अथच—अन्य एव । यतो यस्य क्षीरोदस्येदं यदीयममृतमेतादृशमुदीयते उत्पद्यते । कीदृशम्—मथितुर्देवादेः खेदच्छेदि मथनजनितक्लेशापहम् । तथा—प्रमोदनं नितरामानन्ददायि । तथा—ओदनं भक्तमास्वाद्यं सिद्धान्नरूपम् । अथच—एवंभूतं परमुत्कृष्टममृतं यदीयमुदीयते स क्षीरोदन्वान्परः परोऽन्यो नास्ति किंत्वेक एव । अथच—प्रतिदिशं सर्वदेशेषु गिरि वाण्यां विषये पाषाणतुल्या जडा अन्ये कवयः स्वीयां वाणीमुद्गिरन्तु । आपातेन प्रतिभामात्रेण स्फुरन्प्रबन्धाख्यकाव्यविशेषस्याडम्बरो यस्यां, प्रथमारम्भ एव स्फुरन् शब्दाडम्बरोऽनुप्रासो यत्र तां वा, वाणीमन्योन्यं जनः समीकरोतु यस्य कवेरुक्तिरस्येव, अस्य च तस्येव, इत्येवं तुलयतु । 'आपातः' इति विसर्जनीयान्तपाठे—आपातः प्रतिभामात्रां तुलयत्वित्यर्थः । एवंविधं परं काव्यामृतं यदीयमुपद्यते स क्षीरसमुद्रतुल्यः श्रीहर्षकविरपरो(न्यो) नास्ति, किंत्वेक एव । अन्ये कवयः पर्वतप्रायतुल्याः, अहं श्रीहर्षस्तु क्षीरसमुद्रतुल्य इत्यर्थः । यथा क्षीरसागरो नीरार्थिनोपि तीरमात्रस्थान्क्षीरेण तर्पयति । लक्ष्मीकौस्तुभामृतादिभिः परमानन्ददायिभिः कृतार्थयति, (तथा) मदीयकाव्यविचारकस्यैव खेदच्छेदि प्रमोदनं वचनामृतमुपद्यते, नान्यकाव्यविचारकस्येति, अन्ये प्रायतुल्याः क्षीरोदतुल्यश्चाहमिति भावः ॥

इदानीं प्रसादरूपमुख्यगुणाभावादतिदुर्बोधत्वादकाव्यमिति ये वदन्ति, तच्छङ्कामपनुदन् खलदर्पदलनार्थं गुरुसंप्रदायेन विना दुर्बोधमित्यतिगाम्भीर्यप्रतिपादनार्थं च बुद्धिपूर्वमेव मयेदं काव्यं तत्र तत्र दुर्बोधं व्यरचीत्याह—

ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया
प्राज्ञंमन्यमना हठेन पठिती मास्मिन्खलः खेलतु ।
श्रद्धाराद्धगुरुश्रुथीकृतदृढग्रन्थिः समासादय-
त्वेतत्काव्यरसोर्मिमज्जनसुखव्यासज्जनं सज्जनः ॥३॥

ग्रन्थेति ॥ आत्मानं प्राज्ञं मन्यन्ते प्राज्ञंमन्यं मनो यस्यैवंविधोऽस्मिन्काव्ये हठेन स्वीयप्रज्ञाबलेन पठितमस्यास्तीति पठिती इदं काव्यस्य पाठकः खलो मा खेलतु 'किमत्रास्ति, अश्रुतमेव व्याकर्तुं शक्यते,' इत्यवज्ञापूर्वं दर्पाभिव्यक्तिं मा कार्षीदित्येवमर्थमिह काव्ये क्वचित्क्वचिदपि तत्र तत्र स्थले मया प्रयत्नाद्बुद्धिपूर्वं ग्रन्थग्रन्थिर्ग्रथ्यमानशब्दार्थकुटिलिका न्यासि विन्यस्ता खलमुखभङ्गार्थं बुद्धिपूर्वमेवेदं काव्यं मया दुर्बोधं व्यरचि नतु प्रसन्नकाव्यकरणाशक्त्येत्यर्थः । क्वचित्क्वचिदपीत्यनेन तत्र तत्र प्रसन्नताप्यस्तीति न काव्यत्वहानिरिति सूच्यते । सज्जनस्य तु ग्रन्थविवेचनोपायमाह—श्रद्धेति । श्रद्धया गुरौ दृढभक्त्या आराद्धेन पूजितेन गुरुणा पूर्वमश्रुथा अपि श्रथाः कृता व्याख्यया सुबोधाः कृता दृढा स्वरूपतो दुर्बोधा ग्रन्थयो यस्मै स गुरुसंप्रदायावगताथैः, अत एव दर्पराहित्यात्सज्जनः साधुरेतत्काव्यस्य रसोर्मिरमृतलहरी तस्यां मज्जनमवगाहनं समासादयतु प्राप्नोतु । गुरुपरम्परया विनैकस्यापि पद्यस्यार्थो बोद्धुं न शक्यते, तस्माद्गुरुपरम्पराया एवाध्येयमिदं काव्यमित्यर्थः । यश्चेदं गुरुपरम्पराया अधीते स सततं सुखी भवत्विति महाकविस्तस्मा आशिषं ददाति । अस्मिन्पठितरि 'कर्मण्यधिपयय्य-' इति कर्मणि सप्तमी । आराद्धेति राधेरनुदात्तत्वादिडभावः ॥

इदानीं पण्डितानन्दजननद्वारा स्वकृतेरभ्युदयमाशास्ते—

ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरा-
द्यः साक्षात्कुरुते समाधिषु परं ब्रह्म प्रमोदार्णवम् ।
यत्काव्यं मधुवर्षि धर्षितपरास्तर्केषु यस्योक्तयः
श्रीश्रीहर्षकवेः कृतिः कृतिमुदे तस्याभ्युदीयादियं ॥४॥

ताम्बूलेति ॥ यः कान्यकुब्जेश्वरात्सकाशात्सकलपण्डिताधिक्यव्यञ्जनं ताम्बूलद्वयं विद्वद्योग्यमासनं च लभते । न केवलं राजपूज्य एव, किंतु—यः समाधिषु अष्टाङ्गयोगेषु ध्यानेषु वा विषये प्रमोदार्णवं परमानन्दस्वरूपं परं वागाद्यगोचरं ब्रह्म साक्षात्कुरुते । न परं पूर्वोक्तगुणविशिष्टो ब्रह्मविदेव, किंतु—यदीयं काव्यं मधुवर्षि अतिसरसास्वादमृतवर्षि । न परं पूर्वविशेषणविशिष्टोऽतिसरसो महाकविरेव, किंतु—तर्कशास्त्रेष्वपि यस्योक्तयः धर्षिताः पराभूताः परे प्रतिवादिनो याभिस्तादृश्यः । तस्य विद्वच्चक्रचूडामणेः श्रीहर्षकवेरियं काव्यरचनारूपा कृतिः कृतिनां सुधियां मुदे आनन्दायाभ्युदीयात्, कृतिनामानन्दं कुर्वती सत्याकल्पमतिवृद्धिं प्राप्नुयादित्याशीः । सर्वत्र यच्छब्दनिर्वाहो गुण एव । अभ्युदीयादिति 'ई गतौ' इत्यस्य रूपम् ॥

सन्तः सन्तु परप्रयोजनकृतः कल्पद्रुमन्तः सदा
स्वस्मिन्नेव पथि प्रवर्तनपराः सत्कीर्तयश्चापरे ।
अन्ये निस्पृहणाः श्रितश्रुतिपथा दीव्यन्तु भव्याशया
काकन्तः कलहप्रियाः खलजना जायन्तु[1] जीवन्तु वा ॥
वासनामस्य रामस्य किंकरस्य जगत्पतेः ।
नो चेत्पूरय, कल्पेशकल्पस्य तव किंकर ॥

इति श्रीबेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते
नैषधीयप्रकाशे द्वाविंशः सर्गः समाप्तः ॥
समाप्तश्चायं ग्रन्थः ॥
शुभम्

१ 'जै क्षये' इत्यस्य रूपम् ।

नैषधीयचरितस्थश्लोकानां मातृकावर्णक्रमेणानुक्रमणी ।

श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०
अंशं षोडशमाम	५२४	अथ कले कलय	१००	अदोऽयमालप्य	१८९	अनुममार न	९४	अपि स्वमस्वप्न	१९२
अकरुणादव सून	९८	अथ नगरधूर्तै	३६२	अदो निगद्यैव	१९२	अनुरूपमिम	४२	अबलस्यकुलाशिनो	३५
अकर्णधाराशुग	२७५	अथ नलस्य गुण	८०	अदोषतामेव	३२१	अनेकसंयोजनया	३५४	अबोधि तत्त्व	१९७
अकर्णनासन्नपते	५०८	अथ पथि पथि	३६२	अद्य यावदपि येन	१५४	अनेन मैमीं	१४	अबोधि नो ह्री	३५२
अकाण्डमेवात्मभुवा	७०	अथ प्रकाशं नि	१९१	अद्राक्षीत्तत्र किंचिद्म	१९४	अनेन राज्ञार्थिषु	३६५	अब्रवीत्तमनलः	१२२
अकारि तेन श्रव	१४	अथ प्रियासादन	१४६	अद्राक्षुराजिद्दान	३९६	अनेन वेधा विप	३८	अब्रवीदथ यम	१२३
अकारि नीहार	३५५	अथ भीमजया	४६	अधरं किल बिम्ब	४९१	अनेन सार्धं तव	८	अभजत चिरा	४३७
अकृत परभृतः	४९३	अथ भीमभुजेन	२१७	अधारि पद्मेषु	४५	अनैषधार्यैव	३४२	अभिधास्ये रह	४५८
अक्रोधं शिक्षय	३७६	अथ भीमभुवैव	४५	अधारि यः प्राञ्जहि	८८	अन्तःपुरान्तः स वि	३९५	अभिनवदमयन्ती	३६२
अक्षसूत्रगतपुष्कर	४७२	अथ भीमसुताव	४९४	अधावत्कापि गां	४९	अन्तःपुरे विस्तृत	९९	अभिलषति पतिं	४९४
अखानि सिन्धुः	२६३	अथ मुहुर्बहु	४९	अधित कापि मुखे	४५	अन्तःसंतोषबाष्पः	३८	अभ्यर्थनीयः स	७१
अखिल विदुषा	४४	अथ रथचरणौ	४५	अधिगत्य जगत्य	१६	अन्तः सलक्ष्मी	४४७	अभ्यागतैः कुण्डिन	२२२
अगच्छदाश्रया	३९६	अथवा भवतः	१६	अधिगत्येदृगेतस्या	३९७	अन्यदस्मि भवतीं	२०८	अभ्यागमन्मख	२४१
अगम्यार्थं तृणप्राणाः	३६५	अथ श्रिया	३९७	अधीतपञ्चाशुग	१७७	अन्येन पत्या	३	अभ्रपुष्पमपि	१२३
अग्निहोत्रं त्रयीतन्त्र	३६८	अथ सर्वोद्विदा	१७७	अधीतिबोधाचरण	४५७	अन्योन्यभाषानव	२	अमज्जदाकण्ठमगौ	१७६
अग्म्याहिता निस्य	१८०	अथ स्म राज्ञामव	२७	अधूत यद्विरहोष्म	४५९	अन्योन्यमन्यत्र	३४	अमन्यतार्या	२३
अङ्कचुम्बिघनचन्दन	४६०	अथ स्वपृष्ठनि	१६७	अध्यासिते वयस्या	१६७	अन्योन्यरागवश	८१	अमर्षादात्मनो	३९६
अङ्गेन केनापि	१६३	अथ स्वमादाय	३०१	अध्याहारः स्मर	१७	अन्योन्यसंगमवशा	८	अमर्षोद्गतिरागसा	४२७
अङ्गे विदर्भेन्द्रपुर	२२२	अथाख्यायि कला	३०१	अध्वाग्रजाग्रन्नि	२७२	अन्वग्राहि मया	४५०	अमी ततस्तस्य	४४
अङ्गैणनाभेर्विष	५११	अथाद्भुतेनास्त	१७	अनङ्गचिह्न स	२७२	अन्वयुर्द्युतिपयः	२७२	अमी तमीक्षाञ्जयु	१७
अङ्गुलीचलनलोचन	४६५	अथाधिगन्तुं	२०३	अनङ्गतापप्रशमाय	१४४	अपः प्रति स्वामि	१४४	अमीभिराकण्ठ	२२५
अङ्गुष्ठमूर्ध्ना विनि	२३५	अथान्तरेणा	२०२	अनङ्गलिलाभि	१६	अपयातमिनो वृष्टे	१६	अमी समद्वाष्प	४६१
अङ्गिस्थारुणिमेष्ट	४९४	अथान्यमुद्दिश्य	२८५	अनतिशिथिले	१७९	अपरागद्व भवद्वाणी	४५१	अमीषु तथ्यानृत	३५९
अचकथदथ	४६३	अथापरिवृढा	३१०	अनन्तरं तामवद	३२७	अपरेऽपि दिशा	४३२	अमी समीहं	२१२
अचिरादुपकर्तुं	३६	अथाभिलिख्येव	३६४	अनन्यसाधिकाः	४३२	अपरयजिनमन्विष्य	२६८	अमुष्मिन्नारामे	३९८
अचीकरच्चारु	२०	अथायमुत्थाय	३६३	अनया तव रूप	२६९	अपरयशावतो वेद	४५३	अमुष्य दौर्म्या	५
अचुम्बि या चन्दन	३३२	अथायान्तमवेक्षन्त	३२२	अनया सुरका	४२	अपह्नवानस्य	४२	अमुष्य घोरस्य	१४
अजस्रभूमीतट	१७	अथारभ्य वृथा	२८३	अनर्घ्यरत्नोपमये	२९	अपा विहारे तव	३३१	अमुष्य विद्या	३
अजस्रमभ्यास	८	अथावदद्दूतमुखः	२९	अनलभावमिय	४५२	अपाङ्गमाक्षिप्य	८४	अमुष्योर्वामनुः	२७१
अजस्रमारोहसि	७४	अथावदद्भीमसुते	४४६	अनलैः परिवेष	२७८	अपार्थयन्याजक	४९	अमूनि गच्छन्ति	२०१
अजातविच्छेदलवैः	१९७	अथावलम्ब्य	२७८	अनल्पदग्धा	२०३	अपास्तपाथेय	६	अमूनि मन्ये	५०२
अजानती कापि	३३४	अथास्रावभिमृत्या	४५२	अनाचरत्तथ्य	३२१	अपास्तपाथोरुहि	३२८	अमृतदीधितिरेष	९८
अजानती वेदमवोच	३०७	अथाहृय कलां	४४६	अनादिधाविस्वप	१२१	अपि तद्वपुषि	१४३	अमृतद्युतिलक्ष्म	५१
अजीयतावर्तशुभं	१५९	अर्थतदुर्वीपति	२७८	अनादिसर्गस्रजि	१२८	अपि द्वदीयः शृणु	१२८	अमेलयद्भीमनृपः	२२७
अतनुना नवमम्बु	८७	अथोद्भ्रमन्ती	२०३	अनार्यं देशः	३४९	अपि द्विजिह्वा	१७२	अमोघभावेन	३३१
अतितमां समपादि	८१	अथोपकार्या निज	३२१	अनार्यमप्याचरितं	४५२	अपि धयन्ति	६४	अम्बा प्रणत्योपनता	१३४
अतिथीनां पदा	३९१	अथोपकार्यामम	१२८	अनाश्रवा वः	२६८	अपि लोकयुगं	१४१	अम्बुधेः कियदनु	४१६
अतिवृत्तः स	३८३	अथोपचारोद्धुर	३४९	अनीश देशः	१०	अपि विधिः कुसुमा	१९३	अम्बुनः शबर	४६०
अतिशरव्ययता	८७	अथोपवदने भैम्याः	४५२	अनुग्रहः केवल	१८०	अपि विरहमनिष्ट	१९४	अम्भोजगर्भरुचि	२५३
अत्यर्थहेतिपटु	२८७	अदःसमित्संमुख	२६८	अनुग्रहादेव दिवो	१८७	अपि श्रोणिभर	५३	अम्लानिरामो	३१६
अत्याजि लब्ध	२९२	अदस्तदाकर्णि	१०	अनुभवति शचीत्थं	४६३	अपीडयन्नाभ्य	९५	अयं क इत्यन्य	१२८
अत्रैव वाणीमधु	५१०	अदाहि यस्तेन	१८०	अनुमवति शचीत्थं	४६३	अपुण्यभाजां	९५	अयं किलायात	२६६
अथ कनकपत्र	५२	अदृश्यमाना	१८७	अनुभवति शचीत्थं	४६३	अपुण्यभाजां	९५	अयं किलायात	२६६

श्लो०	पृ०
अयं गुणौघैरनुरज्य	२७७
अयं दरिद्रो भवितेति	७
अयमयोगिवधू	८९
अयमेकतमेन	३४
अयमेत्य तडाग	३५
अयि प्रिये कस्य	२०६
अयि ममैष	९०
अयि विधुं परि	८९
अयिं शपे हृदयाय	९९
अयि स्वयूथ्यैरशनि	३२
अये कियद्यावं	५५
अये ममोदासित	१८८
अये मयात्मा किम	२१०
अयोगजामन्वभवं	२११
अयोगभाजो	२५
अयोधि तद्धैर्य	१७७
अराधि यन्मीन	३५५
अरुणकिरणे	४३१
अरुन्धतीकामपुरं	१६५
अर्काय पत्ये खलु	१५७
अर्धनिःस्वमणि	४७२
अर्चनाभिरुचि	१०३
अर्चयन् हरकरं	४७०
अर्थना मयि	१२१
अर्थितां त्वयि	१२४
अर्थिताः प्रथमतो	१२१
अर्थिनामहृषिता	११५
अर्थिने न तृणव	११६
अर्थिनो वयममी	११४
अर्थिभ्रंशवहू	२७४
अर्थी सर्वसुपर्वणां	३३६
अर्थो विनैवार्थ	३१७
अर्धचक्रवपुषा	४८४
अर्धमीलितविलोल	४२०
अलंकृताङ्गाद्भुत	२३५
अलंकृतासन्न	१८३
अलं नलं रोदु	१६
अलं विलङ्घय	६९
अलं विलम्ब्य	७१
अलं सजन्यधर्म	५९
अलिन्नजा कुञ्जल	२३
अलीकभैमी	१२८
अल्पाङ्कपट्टा विधु	५२१
अवच्छटा कापि	३५१
अवधृत्य दिवो	४१
अवनिपतिपथा	३६२
अवलम्ब्य दिदक्ष	४५

श्लो०	पृ०
अवश्यभव्येष्वनव	२९
अवादि भैमी	३२८
अवाप सापत्रप	१६
अवापितायाः	३२५
अवाप्यते वा	६५
अवामावामार्धे	३१७
अवारितद्वारतया	६१
अविन्दतासौ	१३२
अवैमि कमला	४४१
अवैमि वादि प्रतिवा	२३०
अवैमि हंसावलयो	१७३
अवोचत ततस्तन्वीं	४४५
अशोकमर्था	२५
अश्रान्तश्रुतिपाठ	५१
अश्रौषमिन्द्रादरि	१४२
अष्टौ तदाष्टासु	२२६
असंभोगकथा	४५८
असमये मति	९०
असंशयं सागर	५०७
असंशयं सा गुण	२२९
असंशयं स त्वयि	२१४
असाम यन्नाम	२२५
असावसाम्याद्वित	५१५
असि भवान्याः क्षत	३४२
असितमेकसुरा	९१
असिस्वदयन्मधु	३४१
असुरहितमार्यादि	४२९
असेवि यस्त्यक्तदि	१९८
असेविषातां सुप	३२७
असौ महीभृद्वहुधा	३६१
असौ मुहुर्जात	३२४
अस्ताचलेऽस्मि	५०१
अस्तादिचूडालय	४९९
अस्तित्व कार्यसिद्धेः	७९
अस्ति द्विचन्द्रम	२९८
अस्ति वाम्यभर	४१०
अस्तु त्वया साधित	३१५
अस्मदाद्यविषये	४८७
अस्मत्किल श्रोत्र	५८
अस्माकमध्यासित	१८४
अस्माकमुक्तिभि	४९०
अस्मिञ्जयन्ति	२५४
अस्मिञ्छिशौ	५१३
अस्मिन्दिग्विजयोद्यते	२६७
अस्मिन्न विस्माप	५१९
अस्मिन्समाजे मनु	२३५
अस्मैकरं प्रवितरन्तु	२६१

श्लो०	पृ०
अस्य क्षोणिपतेः	२८३
अस्यां मुनीनामपि	१६४
अस्यां वपुर्व्यूहविधान	१४८
अस्याः कचानां शि	१५०
अस्याः करस्पर्धनगर्ध	१६०
अस्याः खलु ग्रन्थि	१६३
अस्याः पदौ चारुतया	१६५
अस्याः पीनस्तनव्याप्ते	४४७
अस्याः स चारुर्मधु	२३९
अस्याः सपक्षैकविधोः	१५०
अस्याः मुराधीश	५०८
अस्याधिशय्य पुर	२५५
अस्या भवन्तमनिशं	४९२
अस्या भुजाभ्यां विजि	२३७
अस्या मुखश्रीप्रति	१५७
अस्या मुखस्यास्तु	१५६
अस्या मुखेनैव	१५७
अस्या मुखेन्दावधरः	१५३
अस्या यदष्टादश	१५९
अस्या यदास्येन	१५०
अस्यारिप्रकर	२८१
अस्यासिर्भुजगः	२८१
अस्यैव सर्गाय	१६०
अस्यैव सेवार्थ	५१३
अस्योत्कण्ठितकण्ठ	३३६
अस्योर्वीरमणस्य	२७४
अहर्निशा वेति रता	३५३
अहह सह मघोना	३२०
अहो अनौचिती	४६२
अहो अहोभि	१३
अहो तपःकल्पतरु	७६
अहो नापत्रपाकं	४६१
अहो मनस्त्वामनु	१९४
अहो मयि रहो	४५२
अहो महःसहायानां	३८५
अहो महेन्द्रस्य कथं	१९१
अह्नि भानुभुवि	४०३
आः स्वभावमधुरैः	१०५
आकर्ण्य तुल्यमखि	२८७
आकल्पविच्छेद	२३१
आकस्मिकः पक्ष	५३
आकीटमाकैटभ	१४४
आकुञ्चिताभ्या	५३
आकृष्य सारम	४९०
आखण्डलो दण्ड	२१९
आख्यतैष कुरु कोप	४२३

श्लो०	पृ०
आख्यातुमक्षिव्रजं	२३९
आगःशतं विद	२५५
आगच्छदुर्वीन्द्र	२१९
आगच्छन् भणता	४४३
आघूर्णितं पक्ष्म	१५१
आचूडाग्रममज्जय	२६९
आज्ञया च पितु	४७७
आज्ञां तदीयामनु	१४१
आत्थ नेति रतया	४१२
आत्मनापि हरदार	४०५
आत्मन्यस्य समु	२७८
आत्मवित्सहतया	३९९
आत्मैव तातस्य	१५९
आदत्त दीप्रं	५०८
आदधीचि किल	१२१
आदर्शतां स्वच्छ	६३
आदर्शदृश्यत्व	५१२
आदाय दण्ड	५०१
आदेशितामप्यव	३०८
आदेहदाहं कुसुमा	१७५
आद्य विधोर्जन्म	२२४
आद्यसंगमसमाद	४१३
आननन्द निरीक्ष्या	३९५
आननस्य मम	४२२
आनन्द हठमाह	४६४
आनन्दजाश्रुभिरनु	३३
आनन्दयेन्द्रमथ	१८६
आन्तरानपि तदङ्ग	४१८
आप्तकाम सृजसि	४८५
आप्यायनाद्वा रुचि	५१८
आभिर्मृगेन्द्रोदरि	५१९
आभ्यां कुचाभ्यां	१६१
आमृश्य तेन	४५८
आरोप्यते चेदिह	५१४
आरोहणाय तव	२५०
आर्ये विचार्याल	१४०
अलापि कलया	४५९
आलिख्य सख्याः	१३७
आलिङ्गितः कमल	२५६
आलिङ्गयालिङ्गय	४६३
आलिमात्मसुभगत्व	१११
आलोकतृप्तीकृत	१७३
आलोकमाना	२२६
आलोक्य भावि	२५८
आवाहितां द्विजै	३९२
आशयस्य विवृतिः	४७६
आशीविषेण रदन	२४४

श्लो०	पृ०
आश्चर्यमस्य	२५६
आश्लेषलग्नगिरिजा	२४३
आसते शतमधि	११९
आसने मणिमरी	४०५
आसीदथर्वा त्रिवली	२२९
आसीदसौ तत्र न	२३५
आसीदासीम	२६५
आसीद्यथा ज्यौतिष	५१४
आसुंत्राममपास	३३८
आस्त भावमधि	४१९
आस्तां तदप्रस्तुत	६३
आस्तामनङ्गीकरण	१७४
आस्ते दामोदरीया	२८०
आस्य शीतमयूख	५२५
आस्यसौन्दर्य	४४७
आस्ये या तव भार	४९६
आह नाथ वदनस्य	४१७
आह स्म तद्विरा	४६१
आह स्मेषा नला	४४६
इङ्गितेन निजराग	४१३
इज्येव देव व्रज	५१३
इतरनलतुलाभा	३००
इतस्रसद्विद्रुत	२६७
इति कियद्वचसैव	९८
इति तत्सुप्रयुक्तत्व	४५३
इति तं स विमृज्य	४५
इति तस्मिन्वदत्येव	३८२
इति तस्या रहस्यानि	४५६
इति त्रिलोकीतिलके	१८२
इति द्विकृत्वः शु	३६०
इति धृतमुरसार्थं	१८६
इति पठति शुके	४९३
इति परिणयमित्थं	३६३
इति प्रतीत्यैव	१८८
इति प्रियाकाकुभि	२०६
इति मनसि विक	३००
इति मुद्रितकण्ठे	४४८
इति विधोर्विविधो	९२
इति व्युत्तिष्ठमाना	४५९
इति श्रुतिस्वादित	२६४
इति श्रुतेऽस्या	३०९
इति श्रुत्वा स रो	३८४
इति सचिक्रुरादा	१६७
इति सा विधुमुखी	४९५
इति सा मोचयाचके	४५७
इति सोऽपि विस्(पा)	४५

श्लो०	पृ०
इति स्तुवन् हुंकृति	२२८
इति स्तुवानः स	२३९
इति स्फुटं तद्वचस	१९८
इति स्मरः शीघ्र	३६०
इति स्वयं मोहमहो	२११
इतीदृशैस्त विरचय्य	३२
इतीन्द्रदूत्याः प्रति	१४३
इतीयमक्षिभ्रुव	१८६
इतीयमालेह्यगते	२१६
इतीरयन्ती नल (पा.)	१७३
इतीरयित्वा विरतां	१८७
इतीरयित्वा विरराम	६३
इतीरिणापृच्छय	२११
इतीरिता तच्चरणा	२२९
इतीरिता पत्ररथेन	६६
इतीरिते विश्व	३०९
इतीरितैर्नैषध	२१२
इतीष्टगन्धा	२६
इतोऽपि किं वीर	२६७
इतो भिया भूप	२६५
इतो मुखाद्वागिय	५१७
इत्थं पुनर्वागव	१४५
इत्थं प्रतीपोक्तिमतिं	१४४
इत्थं मधूत्थ रस	१७६
इत्थं यथेह मद	३००
इत्थं वितीर्य वर	३१९
इत्थममुं विलपन्त	३३
इत्थमाकर्ण्य दुर्वर्ण	३७७
इत्थमुक्तिमुपहृत्य	४२२
इत्थं हिया वर्णन	५०२
इत्यधीरतया तस्य	४६३
इत्यमी वसुमतीं	१०७
इत्यलीकरतका	४१५
इत्यवेत्य मनसात्म	११४
इत्यवेत्य वसुना	४७३
इत्यसौ कलया	४१०
इत्याकर्ण्य क्षितीश	१२६
इत्यालपत्यथ	७८
इत्यालेपुरनुप्रती	३३९
इत्युक्तवत्या निहिता	१४०
इत्युक्तवत्या यद	७२
इत्युक्तिशेषे स	५०९
इत्युदीर्य मघवा	१०५
इत्युदीर्य स ययौ	१०९
इत्युदीर्य स हरिं	४८८
इत्युपालभत संभु	४१०
इत्येतस्याः पदा	४४५

श्लो०	पृ०
इद निगद्य क्षिति	१९०
इदं नृपप्रार्थिभि	२७९
इदं महत्तेऽभि	२०२
इदं यदि क्ष्मापति	७२
इदं यशसि द्विष	२७९
इदमुदीर्य तदैव	९९
इन्दुं मुखाद्बहुतृणं	५२३
इन्दोर्भ्रमेणोपगमा	५१८
इन्द्राग्निदक्षिण	२०६
इमं परित्यज्य	२७२
इमां न मृद्वीम	२३८
इमा गिरस्तस्य	२०२
इयं कियच्चारु	३५६
इयं न ते नैषध	२०५
इयच्चिरस्यावद	१९०
इयत्कृतं केन मही	१७६
इयमनङ्गशरावं	८६
इयमियमविरथ्यं	२४०
इषुत्रयेणैव जगत्	५५१
इष्टदारविरहौर्वपयो	४७८
इष्टं नः प्रति ते प्रति	१२५
इष्टेन पूर्तेन नलस्य	५७
इह किमुपसि	४४१
इह न कतमश्चित्र	४३८
इहाविशद्येन पथा	१५८
ईक्षितोपदिशतीव	४१५
ईदृशं निगदति प्रिये	४२५
ईदृशानि गदितानि	१२१
ईदृशानि मुनये	१०८
ईदृशीं गिरमुदीर्य	११५
ईर्ष्यया रक्षितो	३६९
ईशः कुशेशय	२५०
ईशाणिमैश्वर्य	६५
ईशा दिशां नल	२९९
ईश्वरस्य जगत्कृत्तं	३६५
ईषत्स्मितक्षालित	१४१
उच्चलत्कलरवा	४०३
उच्चाटनीयः कर	५४
उच्चैस्तरादम्बर	४९९
उच्चैरूचेऽथ ता राजा	४६०
उज्जिहानमुकुता	४६८
उडुपरिवृढः पत्या	४३८
उडुपरिषदः किं	४३०
उत्कण्टका विलस	२८४
उत्कण्टयन्नृथ	२९७

श्लो०	पृ०
उत्तम स महति	४७१
उत्तानमेवास्य	५१४
उत्तुङ्गमङ्गल	२४१
उत्सर्पिणी न किल	२५३
उत्सज्य साम्राज्य	३१२
उदयति स्म	८३
उदयशिखरिप्रस्थान्य	४२९
उदयशिखरिप्रस्थाव	४३६
उदरं नतमध्य	४०
उदरं परिमाति	४०
उदर एव धृतः	९१
उदस्य कुम्भीरथ	३२४
उदासितेनैव	२१२
उद्देशपर्वण्यपि	२३०
उद्धृतिस्खलदिला	४७४
उद्भवाजतनुजादज	४७७
उद्विद्विरचितावासः	३९७
उद्भ्रमामि विरहा	१२०
उद्वर्तयन्त्या हृदये	१३०
उन्मत्तमासाद्य	७२
उन्मीलद्बुडपाक	४९६
उन्मीलल्लीलनीलो	२८२
उन्मूलितालान	१६२
उपचचार चिरं	१००
उपनतमुडुपुष्प	५२६
उपनम्रमया	३६
उपहरन्ति न कस्य	९६
उपहृतमधिगम्य	४६३
उपासनामेत्य	११
उपास्यमानाविव	३२९
उपास्य सांध्यं	४९८
उभयी प्रकृतिः	३१४
उरोभुवा कुम्भ,	१५
उर्वशी गुणवशी	११०
उल्लसतां स्पृष्ट	१३२
उल्लिख्य हंसेन	१३२
उवास वैदर्भभृ	३६०
उवाह यः सान्द्र	३४२
ऊचिवानुचित	१२४
ऊचे पुनर्भगवती	२४६
ऊरुप्रकाण्ड	१६४
ऊर्ध्वं धृतं व्योम	५०४
ऊर्ध्वदिक्कदलनां	४८५
ऊर्ध्वस्ते रदनच्छदः	४९७
ऊर्ध्वार्पितन्युब्ज	५०४

श्लो०	पृ०
ऋजुत्वमौनश्रुति	२७०
ऋजुदृशः कथयन्ति	९२
ऋणीकृता किं हरि	१५२
ऋद्धसर्वर्तुवृक्ष	४००
ऋषीणां स वृसीः	३९३
एकं संदिग्धयोस्ताव	३७२
एकः पिपासुः प्रव	५११
एकः प्रभावमय	२९०
एकः सुधांशुर्न	७६
एककस्य शमने	४१४
एकचित्ततिरद्वय	४८१
एकद्विकरणे हेतू	३६६
एकवृत्तिरपि	४१८
एकस्य विश्वपापेन	३७२
एकाकिभावेन	२२७
एकादशैकादश	५१९
एकेन पर्यक्षिप	२२६
एकैकमद्भुतगुणं	२५०
एकैकमेते परि	१८३
एकैकमैक्षत	२५८
एकैकवृत्तेः प्रति	३०२
एकैव तारा मुनि	५२१
एको नलः किमय	२९९
एणः स्मरेणाङ्क	५०३
एतं नलं तं दम	१३६
एतत्कीर्तिविवर्त	२८२
एतत्कुचस्पर्धितया	१६१
एतत्तरुस्तरुणि	२५४
एतत्पुरःपठदप	२४६
एतद्वन्धगजस्य	२७८
एतद्भुणश्रवण	२५२
एतद्वृत्तासिघात	२७६
एतद्वृन्तिबलैः	२६६
एतद्वृलैः क्षणिक	२६०
एतद्वीतारिनारी	२६७
एतद्भुजारणि	२५७
एतद्यशःक्षीर	२६४
एतद्यशो नवनवं	२४९
एतद्यशोभिरखिले	२५३
एतद्यशोभिरमला	२५६
एतद्वरं स्यामिति	२३४
एतन्मदीयमति	२९१
एतन्मुखा विबुध	२८८
एतस्य सावनि	२५८

श्लो०	पृ०
एतां कुमारनिपु	२५६
एतां धरामिव	४९१
एतादृशीमथ	२८८
एतादृशोरम्बुरुहैः	२३७
एतेन ते विरह	२४८
एतेन ते स्तन	२५०
एतेन संमुखमि	२५६
एतेनोत्कृष्टकण्ठ	२८२
एनसानेन तिर्य	३७५
एनं स विभ्रद्विधु	५२०
एवं यद्वदता	१०१
एवमादिस	११७
एवमुक्तवति देव	१०८
एवमुक्तवति वीत	११८
एष नैषध स	११४
एष प्रतापनिधि	२८७
एषां गिरेः सकल	२४२
एषां त्वदीक्षण	२४२
एषामकृत्वा	३०८
एषा रतिः स्फुरति	४९१
एष्यन्ति यावद्गृण	१६६
ओज्झ प्रियाणि	१४९
औदास्यमेधिद	२५६
कंदर्प एवेदम	१७३
कः कुलेऽजनि	१२२
कः शमः क्रियतां	३७४
कः स्मर कस्त्वम	४४९
कटाक्षकपटारब्ध	४४५
कटाक्षणाज्जन्य	३४८
कण्ठः किमस्याः	११५
कण्ठे वसन्ती	१५६
कतिपयदिवसै	१०१
कथं कथंचिन्निशि	३०७
कथ नु तेषां	१९१
कथं विधातर्मयि	३२
कथाप्रसङ्गेषु	१२
कथावशेषं तव	२०६
कथासु शिष्यै	२१५
कथितमपि नरेन्द्रः	८०
कथ्यते न कतमः	१०६
कन्यान्तःपुर	१०१
कपोलपत्रान्मकर	१५८
कपोलपाल्लीजनि	३३२
कमपि स्मरकेलिं	४५५
कमलकुशलाधाने	४३६

श्लो०	पृ०
कम्रं तत्रोपनम्राया	३९४
कयाचिदालोक्य	१६८
कयापि क्रीडतु	३८४
कयापि वीक्षावि	३३५
करप्रहे वाग्यम	३४५
करपदाननलोचन	८३
करस्थताम्बूल	३३५
करः स्रजा सज्जतर	३०६
कराग्रजाग्रच्छत	१६१
करिष्यसे यद्यत	१९६
करिष्येऽवश्यमि	३८८
करेण मीनं निज	२६
करेण वाञ्छेव	६५
करे विधृत्येश्वरया	३०७
करोषि नेमं फलिनं	१९०
कर्णशक्तिमफलां	४७९
कर्णाक्षिदन्तच्छद	१६६
कर्णे कर्णे ततः	४५९
कर्णोत्पलेनापि	१५२
कर्णौ पीडयति	४५६
कर्तुं शशाकाभि	२१९
कलकलः सतदा	१००
कलसे निजहेतु	४०
कलिं प्रति कलिं	३८९
कल्पद्रुमान् परिमला	२८५
कल्प्यमानममुना	४६५
कल्याणि कल्यानि	१७७
कल्लोलजालच	२४७
कविन्वगानप्रिय	१५९
कश्मीरजै रश्मि	५०९
कस्त्वं कुतो वेति	१६८
कस्मादस्माक	४४६
कस्मिन्नपि मते सत्ये	३८०
कां नामन्नयते नाम	४४७
कांसीकृतासीत्	७७
कानुजे मम निजे	१०८
कान्तमूर्ध्नि दधती	४१४
कान्तिमन्ति विमानानि	३६३
कापि कामपि	१११
कापि प्रमोदास्फुट	३१०
काभिर्न तत्राभिनव	६१
कामः कौसुमचाप	७०
कामदेवविशिखैः	४७८
कामनीयकमधः	११२
कामानुशासनशते	२६०
कामिनीवर्गसंसर्गैः	३६९
कारं कारं तथा	४५७
कारिष्यते परिभवः	२९६
कार्तवीर्यमिदुरेण	४७६
कालः किरातः	५००
काश्चिन्निर्माय चक्षुः	३३६
किं घनस्य जल	११२
किंच प्रभावन	२८९
किंचित्तिरश्चीन	६३
किं वित्त दत्त तुष्टे	३७७
किं ते तथा मति	२९३
किं ते वृन्तहृता	३७२
किं न द्रुमा जगति	२६०
किं नर्मदाया मम	१६०
किं नाद्रिण नोऽपि	५१६
किं योगिनीयं	५०३
किं वा तनोति	२९८
किं विधेयमधुनेति	११४
किमन्यदद्यापि	१४
किमसुभिर्गलपितै	८५
किमस्य लोम्नां	९
किमालियुग्मा	३३०
किमु तदन्तरुभौ	८१
किमु भवन्त	९७
कियच्चिरं दैवत	१६७
कियतापि च कालेन	३९१
कियत्त्यजन्नोदन	३५४
कियदपि कथयन्	३६२
कियद्वहु व्यञ्जन	३५८
कियान्यथानेन	५१२
कीर्तिं भैमीं वरं	३८५
कुङ्कुमैणमदपङ्क	४००
कुचौ दोषोज्झिता	४५०
कुण्डिनेन्द्रसुतया	१२१
कुतः कृतैवं वर	२७३
कुत्रचित्कनक	४००
कुमुदमुदमुदेष्यती	४९४
कुरु करे गुरुमेक	९१
कुरुध्वं कामदेवाज्ञां	३७२
कुरुसैन्यं हरेणेव	३६८
कुर्वती निचुलितं हिया	४०८
कुर्वद्भिरात्मभव	२४१
कुलं च शीलं च बलं	२२८
कुसुमचापजताप	८१
कुसुममप्यति	९६
कुसुमानि यदि	४४
कूजायुजा बहुल	४७९
कूटकायमपहाय	३१९
कृच्छ्रं गतस्यापि	३१६
कृतं यदन्यत्करणो	३५०
कृतात्र देवी वचना	२७३
कृतापराधः सुतनो	३२९
कृतावरोहस्य	३०
कृतार्थनथ्नादुभि	३१५
कृतार्थयन्नर्थिजना	३३३
कृतिः स्मरस्यैव	२३९
कृत्वा दृशौ ते	१७४
कृपा नृपाणामुपरि	२७०
कृष्णसारमृग	४०२
केदारभाजा	१५३
केनापि बोधिस	३६८
केयमर्धभवता भव	४८५
केवलं न खलु भीम	४०५
केशान्धकारादथ	१५०
कैटभारिपदयोर्नत	४७३
को हि वेदास्त्यमुष्मि	३७३
कौमारगन्धीनि	१३२
कौमारमारभ्य	१७७
क्रतोः कृते जाग्रति	२०१
क्रतौ महाव्रते पश्यन्	३९६
क्रमाद्वीयसां तेषां	३६४
क्रमाधिकामुत्तर	३२९
क्रमेलकं निन्दति	१४४
क्रमेण कूरं स्पृशतो	३५४
क्रमोद्गता पीवर	१६५
क्रियां प्राह्नेतनीं	४४४
क्रियेत चेत्साधु	५७
क्रीणीष्व मज्जी वत	७०
क्लीश्वदुःखमपि वीक्ष्य	४७९
क्लिन्नीकृत्याम्भसा	४५९
क्वचित्तदालेपन	३२३
क्व प्रयास्यसि	११४
क्व प्राप्यते स	२९७
क्वापि कामशरवृत्त	३९९
क्वापि नापश्य	३९२
क्वापि यन्नभसि	४६८
क्वापि यन्निकट	४००
क्वापि सर्वैरवैमल्या	३८१
क्वेतावन्नर्ममर्मो	४४४
क्षणं प्राप्य सद	४५४
क्षणनीरवया	४७
क्षणविच्छेदका	४४४
क्षणादयैष क्षणदा	१९
क्षत्रजातिरुदियाय	४७६
क्षत्राणि रामः	५२२
क्षन्तुं मन्तुं दिन	४५०
क्षितिगर्भधरा	४८
क्षिप्रमस्यतु रुजा	४२२
क्षीणेन मध्येपि	१६२
क्षीरार्णवस्तव	२४७
क्षीरोदन्वदपाः	२७६
क्षोणीभृतामतु	२८६
खण्डः किमु खद्रिर	१८५
खण्डक्षोदमृदि स्थले	४९६
खण्डितेन्द्रभवना	१०२
खर्वमाख्यदमर	४६९
गच्छता पथि	१०२
गतचरदिनस्यायु	४३३
गता यदुत्सङ्ग	२५
गत्वान्तरा नलं भैमीं	३८९
गर्भमणमदकर्दम	४६८
गलत्परागं	२४
गिरः श्रुता एव	१८७
गिरानुकम्पस्व	२०९
गीर्देवतागीतयशः	२२६
गुच्छालयस्वच्छ	१६१
गुणानामास्थानीं	३१८
गुणा हरन्तोऽपि	१४४
गुणेन केनापि	२२४
गुणौ पयोधेर्निज	५१२
गुम्फोगिरां शम	२९०
गुरुतल्पगतौ पाप	३६९
गुरुरीढावलीढ	३८२
गुरोरपीमां भण दो	२३९
गोत्रानुकूलत्व	३१२
गोवर्धनाचल	२५७
गौरभानुगुरुगेहि	४०३
गौरीव पत्या	१६२
गौरे प्रिये भाति	५१६
ग्रन्थग्रन्थिरिह	५९७
ग्रावोन्मज्जनवद्यत	३६८
ग्रीवाद्भुतैवावद्भु	१५९
घने समास्ताप	३३३
घनैरमीषां परि	३५७
घातितार्कसुत	४८०
घुसृणसुमनःश्रेणी	४३५
घृतप्लुते भोजन	३५८
चकास्ति बिन्दु	२०६
चकोरनेत्रैण	१५२
चक्रदारविरहे	४११
चक्रेण विश्वं युधि	१६३
चक्रे शक्रादिने	३६५
चण्डालस्ते विषम	२१६
चतुःसमुद्रीपरिखे	२२२
चतुर्दिगन्ती परि	५११
चतुष्पथे तं विनि	१३०
चन्द्राधिकैतन्मुख	१५५
चन्द्राभमाभ्रं तिलकं	१३६
चमूचरास्तस्य	१९
चरञ्चिरं शैशव	१७८
चर्म वर्म किल	१२४
चर्यैव कतमेयं वः	३८४
चलत्पदस्तत्	२६२
चलन्नलंकृत्य	१८
चलाचलप्रोथ	१७
चलीकृता यत्र	२८
चिकुरप्रकरा	३७
चित्ते तदस्ति	४५४
चित्रं तदा कुण्डिन	१२७
चित्रतत्तदनुकार्य	४०१
चित्रमत्र विवर्धे	१११
चिरंयुवाकूतशतैः	३५९
चिराद्नध्याय	१९८
चिह्नितः कतिचित्	३६८
चिह्नैरमीभिर्नल	३०६
चुचुम्ब नोर्वीवलयो	३५७
चुचुम्बास्यमसौ	४४६
चुम्बनादिषु बभूव	४१०
चुम्बनाय कलित	४१७
चुम्बितं न मुख	४११
चुम्ब्यसेयमय	४१५
चुलुकिततमः सिंधो	४३५
चूडाप्रचुम्बि	२४९
चेतोजन्मशरप्रसून	७८
चेतोभवस्य भवति	४९२
चेष्टा व्यनेशन्नि	३११
छदे सदैव छविमस्य	३४५
छद्ममत्स्यवपुष	४७४
छद्मैव तच्छम्बरजं	२३७
छायामयः प्रेक्षि	१३१
छिन्नमप्यतनु हार	४१७
छुप्तपत्रविनिमीलि	४२४
छेत्तुमिन्दो भवद्वक्त्र	४४५
जगज्जयं तेन	८

श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०
जगति तिमिरं मूर्च्छा	४३८	तं नासत्ययुगं	३८७	तथा न तापाय	१८१	तनोषि मान	२०७	तस्मिन्मलिम्लुच	२४९
जगति मिथुने चक्रा	४३४	तं पिधाय मुदिता	४१४	तथा पथि त्यागमयं	३२१	तन्नालीकनले	२८४	तस्मिन्विमृश्यैव	१४२
जगत्त्रयीपण्डित	२२९	तं विदर्भरमणी	४६४	तथापि निर्बध्नति	१८८	तन्निर्मलावय	२४०	तस्मिन्विषज्यार्ध	१३३
जगद्वधूमूर्धसु	१६५	तच्चित्रदत्तचित्ता	४५९	तथाभिधात्री	७२	तन्नैषधानूढतया	६२	तस्य तापनभिया	१०२
जग्रन्थ सेयं	३०४	तच्चिन्तनान्तर	२२८	तथालिमालपन्तीं	४५८	तन्न्यस्तमाल्य	३११	तस्य चीनसिचयै	४६४
जघनस्तनभार	५०	तच्छायसौन्दर्य	१३१	तथावलोक्य लीला	४५४	तन्मुहूर्तमपि भीम	४७०	तस्य होमाज्यगन्धेन	३९१
जज्वाल ज्वलनः	३७९	तज्जः श्रमाम्बु	२५७	तथाशनाया निरशे	३४८	तन्वीमुखं द्रागधिगत्य	१३०	तस्याः प्रियं चित्त	३०६
जनुरधत्त सती	८८	तटतरुखगश्रेणी	४३३	तथैव तत्कालमथा	३३१	तपः फलत्वेन	१४१	तस्या मनोबन्ध	३१३
जनेन जानतास्मीति	३७१	तटान्तविश्रान्त	२७	तथोत्थितं भीमवच.	३२३	तपः स्वाध्याययज्ञा	३९४	तस्या दृशो नृपति	७९
जनैर्विदग्धैर्भवनै	१२७	ततः प्रतीच्छ	१९	तदक्षरैः सस्मित	२८३	तपति जगत	४६३	तस्या हृदि व्रीडमनो	३०६
जन्यास्ततः फण	२४३	ततः प्रत्युदगाद्भैमी	४४३	तदक्षि तत्काल	४२७	तपस्यतामम्बुनि	५२१	तस्यैव वा यास्यसि	६२
जपतामक्षमाला	३९४	ततः प्रसूने	२०	तदखिलमिह	२१७	तपोनले जुह्वति	१९५	तां कुण्डिनाख्यापद	१२६
जम्बालजाला	१४८	ततः स भैम्या	२६२	तदङ्गभोगावलि	६३४	तमर्चितुं मद्वरण	१९९	तां देवतामिव	२४०
जय जय महाराज	४२६	ततस्तदप्रस्तुत	२६६	तदङ्गमुद्दिश्य	२४	तमालम्बनमासाद्य	३९७	तां दूर्वया श्यामल	३१०
जलं ददत्याः कलि	३५०	ततस्तदुर्वीन्द्रगुणा	२६८	तदद्य विश्रम्य	१९९	तमालिरूचेऽथ	१९९	तां भारती पुन	२५२
जलजभिदुरीभावं	४४१	ततान विद्युता	३६४	तदध्ये(धी)हि मृषो	४५५	तमालोक्य प्रिया	४५६	तां मत्स्यलाञ्छन	२५५
जलजे रविसे	४१	ततोऽनु देव्या	२६६	तदनुदीधिति धारया	४६	तमेव लब्धावसरं	१४	तां मिथोऽभिदधतीं	४११
जलाधिपस्त्वाम	१९०	ततोऽनुवार्ष्णेय	३३४	तदनु स तनु	१०१	तमोमयीकृत्य	१५१	तां विलोक्य विमुख	४२१
जलाननपरीक्षादौ	३७८	तत्करोमि परम	४०९	तदन्तरन्तः	३५६	तया प्रतीष्टाहुति	३४७	तादृग्दीर्घविरञ्चि	२६४
जले जलदजालानां	३६४	तत्कर्णौ भारती	३६४	तदर्थमध्याप्य	२६	तयेरितः प्राणसमः	५१८	तानसौ कुशल	४६५
जवाज्जातेन वातेन	३६२	तत्कालमानन्दमयी	१७०	तदर्पितामश्रुत	१८७	तयोः सौहार्दसान्द्रत्वं	३९६	तानीव गत्वा	५०८
जवादवारीकृत	३४४	तत्कालवेद्यैः शकुन	२३२	तदहं विदधे	४२	तरङ्गिणी भूमिभृतः	१०७	ता बहिर्भूय वैद	४६०
जागर्ति तच्छायदृशां	१३१	तत्कुचे नख	४६२	तदा तदङ्गस्य	३२५	तरङ्गिणीरङ्कजुषः	२८	ताभिर्दृश्यत एष	३३७
जागर्ति तत्र संस्कारः	४५४	तत्क्रमस्तमददी	४२०	तदात्तमात्मान	३०	तरुणतातरणि	८१	ताभ्यामभूद्युग	१००
जागर्ति मर्त्येषु	२३८	तत्क्षणावहितभाव	४१९	तदानन्दाय त्वत्परि	४९८	तरुमूरुयुगेन	४१	तामथैष हृदि	४६०
जाग्रतामपि निद्रा	३६७	तत्तज्जनकृतावेशा	३८२	तदा निसस्वान	३२४	तर्कितालित्वमित्यर्ध	४४५	तामसीष्वपि तमीषु	४०१
जातं शातक्रतव्यां	५२४	तत्तदर्थमरहस्य	४६९	तदास्यहसिता	४५६	तर्काप्रतिष्ठया साम्या	३७९	तामन्वगादशित	४८५
जातौ न वित्ते न	२१९	तत्तद्दिग्जैत्रया	२८०	तदिदं विशदं	४३	तर्का रदा यद्वदनस्य	२३०	तामिङ्गितैरप्यनु	५४
जात्या च वृत्तेन	२२९	तत्तद्विरागमुदितं	२४२	तदिहानवधौ	४४	तल यथेयुर्न तिला	२१८	तामेव सा यत्र	१३७
जानासि ह्रीभय	४५३	तत्पदाखिलनखानु	४२२	तदेकतानस्य	३६१	तव प्रवेशे सुकृता	१७२	ताम्बूलदानमन्य	४५४
जानेतिरागादिद	१५४	तत्प्रविष्टं सखी	४५६	तदेकदासीत्व	६८	तव रूपमिदं	४२	ताम्बूलद्वयमासनं	५२८
जाम्बूनदं जगति	२५४	तत्प्रसीदत विधत्त	१२१	तदेकलुब्धे हृदि	६८	तव वर्त्मनि वर्तता	४५	ताम्रपर्णीतटोत्पन्नै	४४६
जाह्नवीजलज	४८५	तत्प्राप्ते वत्सरान्ते	३१८	तदेव किं नु क्रियते	२६८	तव संमतिमेव	४२	ताराक्षरैर्यामसि	५०९
जितंजितं तत्खलु	१९६	तत्र ब्रह्महणं पश्यन्	३९४	तदोजसस्तद्यशसः	७	तवागमनमेवार्ह	३८९	तारातति र्वीजमिवा	५०१
जितस्तदास्येन	३३०	तत्र मारजयिनि	४८२	तद्गौरसारस्मित	२३४	तवाधराय स्पृह	२०९	तारा रदानां वदन	२३४
जितस्तवास्येन	२१४	तत्र यामीत्यसज्जा	३८८	तद्दम्पतिश्रुति	४९०	तवानने जातचरीं	५१८	ताराविहारभुवि	५२
जीवितावधि कि	११८	तत्र सौधसुरभू	४०४	तद्दर्शिभिः स्ववरणे	२४४	तवापि हाहा विरहात्	३३	ताराशङ्खविलोप	४४०
जीवितावधि वनी	११५	तत्र स्वयंवरेऽलम्भि	३८४	तद्द्वीपलक्ष्मपृथु	२५२	तवास्मि मां धातु	२१५	तारास्थिभूषा	५२१
जीवितेन कृत	११०	तत्रागमद्वासुकि	२२१	तद्भुजादतिवितीर्ण	१०३	तवेत्ययोगस्मर	२१२	तारुण्यपुण्या	१३३
ज्ञानाधिकासि	२५९	तत्राद्रिरस्ति	२४८	तद्यशो हसति कम्बु	४७८	तवोपवाराणसि	३१५	ताल प्रभु स्यादनु	१६०
ज्योत्स्नापयःक्ष्मा	५१२	तत्रानुतीरवन	२५४	तद्यातायातरंहच्छल	४२५	तस्माददृश्यादपि	१३१	तावकापरतनोः	४८०
ज्योत्स्नामयं	५१०	तत्रापि तत्रभवती	२९०	तद्वर्णनासमय	२६१	तस्मादिमा नरपते	२५१	तावके हृदि निपात्य	४८२
ज्योत्स्नामादयते	५२४	तत्रावनीन्द्रचय	२४१	तद्विमृज्य मम	१०५	तस्मादिय क्षिति	२५८	तावकोरसि लग	४८४
ज्वलति मन्मथ	८६	तत्रैव मग्ना यद	१६९	तद्विस्फुरत्फण	२४४	तस्मिन् गुणैरपि	२४९	तावद्गतिर्वृताटोपा	३९१
		तत्रोद्गूर्ण इवार्णौ	३६८	तनुत्विषा यस्य	३२२	तस्मिन्नलोसाविति	१६८	तासामभासत	४८९
तं कथानुकथन	१०४	तथा किमाजन्म	३६०	तनोत्यकीर्ति	२३६	तस्मिन्निय सेति	१३८	तिमिरविरहा	४३३
तं दह्यमानैरपि	१८१	तथाधिकुर्या	२७९			तस्मिन्नेतेन यूना	२८२	तिरोबलद्वक्त्रसरो	३५०

श्लो०	पृ०
तिष्ठ भोस्तिष्ठ	३८०
तीर्णः किमर्णो	१७२
तुङ्गप्रासादवासा	४९३
तुल्यावयोर्मूर्ति	७२
तुषारनिःशेषित	१६६
तूलेन तस्यास्तु	३११
तृणानीव घृणा वा	३७२
ते तत्र भैम्याश्चरि	२२३
ते तां ततोऽपि	२५३
तेन जाग्रदधृति	१०७
तेन तेन वचसैव	११९
तेन स्वदेशसंदेश	४४३
तेनादृश्यन्त वीरघ्ना	३९५
तेनापि नापस	४५९
ते निन्यिरे नृपति	२४९
ते निरीक्ष्य निजा	४६०
तेभ्यः परान्नः	२२५
तेऽवज्ञाय तम	३८३
तेषां तदा लब्धु	२२०
तेषामिदानीं	१७८
तेषु तद्विधवधू	११३
ते सह्या वाच	४६०
ते हरन्तु दुरित	४७९
तौ मिथो रतिरसाय	४२३
त्यज्यते न जलजेन	४८४
त्यागं महेन्द्रादि	३०४
त्रातुं पतिं नौषधयः	५१७
त्रपास्य न स्यात्	३२१
त्रिदशमिथुन	४२८
त्रिनेत्रमात्रेण रुषा	१७८
त्रिसंध्यं तत्र विप्राणां	३९४
त्र्यम्बकस्य पदयोः	४७१
त्वं मदीयविरहा	४२४
त्वं यार्थिनी किला	२९४
त्वं हृद्गता भैमि	७३
त्वचः समुत्तार्य	१५२
त्वच्चेतसः स्थैर्य	६६
त्वत्कान्तिमस्माभि	१८३
त्वत्कुचाद्रिनखा	४५४
त्वत्तः श्रुतं नेति	३०८
त्वत्प्रापकाश्रयति	७४
त्वदप्रसूच्या	२१
त्वदर्थिनः सन्तु	१८३
त्वदास्यनिर्यन्मद	१९९
त्वदास्यलक्ष्मी	५०७
त्वदितरोऽपि	८६
त्वद्विरःक्षीरपाथोधेः	४४६
त्वद्गुच्छालिर्मौक्तिक	७८
त्वद्गोचरस्तं खलु	१८०
त्वद्बुद्धबुद्धेर्बहि	७२
त्वद्रूपसंपदव	२४७
त्वद्वाचः स्तुतये	४९८
त्वमभिधेहि	८९
त्वमिव कोऽपि	९७
त्वमुचितं नयना	९८
त्वया जगत्युचित	१७५
त्वया निधेया न	७१
त्वयान्याः क्रीडयन्	४५४
त्वयापि किं शङ्कित	६७
त्वया विधातर्य	३५५
त्वयि न्यस्तस्य	४४९
त्वयि वीरविरा	४२
त्वयि स्मराधेः	७६
त्वयैकसत्या	१९७
त्वरस्व पश्येषु	२०३
त्विषं चकोराय	५१०
दण्डं बिभर्त्ययं	२८९
दण्डतण्डावनैः	३८०
दण्डवद्भुवि लुठन्	४७१
दत्ते जयं जनित	४९१
दत्त्वात्मजीवं त्वयि	६९
ददाम किं ते	१८५
ददासि मे तन्न	३५६
ददृशे न जनेन	४६
ददेऽपि तुभ्यं	२११
ददौ पदेन धर्मस्य	३९७
दधदम्बुदनील	४८
दमनादमना	३६
दमयन्त्या वय	४४४
दमस्वसः सेय	१८०
दमस्वसुः पाणि	३४७
दमस्वसुश्चित	२७१
दम्पत्योरुपरि	४५६
दयस्व किं घात	१८३
दयितं प्रति यत्र	४६
दयोदयश्चेतसि	१८४
दर्शस्य दर्शनात्	३९५
दलपुष्पफलैर्देव	३९७
दलोदरे काञ्चन	१३६
दशशतचतुर्वेदी	४२८
दशाननेनापि	५२२
दहति कण्ठमयं	९३
दहनजा न पृथु	८८
दहनमविशद्दीप्ति	४३६
दाक्षीपुत्रस्य तन्त्रे	४४१
दानपात्रमधर्मर्ण	११७
दानवाद्यगहनप्रभ	४७४
दानवारिरसिकाय	४७५
दारा हरिहरादीनां	३७६
दारिद्र्यदारिद्र	५८
दारुणः कूटमाश्रित्य	३८५
दासीषु नासीरचरीषु	२३२
दिक्षु यत्खुरचतुष्टय	४७४
दिगन्तरेभ्यः	२३२
दिगीशवृन्दांश	४
दिगीश्वरार्थं न	२००
दिदृक्षुरन्याविनि	३३५
दिनमिव दिवा	४३९
दिनावसाने तरणे	५१६
दिने दिने त्वं	२३
दिनेनास्या मुख	४५१
दिने मम द्वेषि	५०६
दिवस्पतेरादर	३४४
दिवारजन्यो	१५७
दिवो धवस्त्वां	२०१
दिवौकसं कामयते	१९४
दिशि दिशि गिरि	५२७
दीनेषु सत्स्वपि	२४३
दीपलोपमफलं	४२२
दुर्गे कामाशुगेनापि	३६६
दुर्लभं दिगधिपैः	११५
दूते नलश्रीभृति	१७०
दूत्यसंगतिगतं	४०४
दूत्याय दैत्यारिपतेः	१२६
दूरं गौरगुणैरहं	२७८
दूरतः स्तुतिरवा	४७३
दूरस्थितैर्वस्तुनि	५१४
दूरान्नः प्रेक्ष्य	३८४
दूरारूढस्तिमिर	४४२
दूरेऽपि तत्तावक	५१९
दूर्वाप्रजाप्रत्	३१०
दृगुपहत्यपमृत्यु	९५
दृग्गोचरोऽभूदथ	३१३
दृशा नलस्य	२८४
दृशापि सालिङ्गित	१६९
दृशास्य निर्दिश्य	२७५
दृशोरपि न्यस्त	३११
दृशोरमङ्गल्य	२०७
दृशोर्द्वयी ते	१९९
दृशोर्यथाकाम	१४७
दृशौ किमस्या	१५३
दृशौ मृषा पातकि	२०४
दृष्टं दृष्टं महाराज	४५२
दृष्टो निजां	
दृष्ट्वा पुरः पुरोडाश	३९३
देवः पतिर्विदुषि	२९४
देवः स्वयं वसति	२४५
देवदूत्यमुपगम्य	४२३
देवश्चेदस्ति सर्वज्ञः	३७५
देवानियं निषधराज	२९७
देवी कथंचित्खलु	३०८
देवी च ते च जगदु	३१९
देवी पवित्रित	२५१
देवेन तेनैष च	५१५
देवैर्द्विजैः कृता	३७४
देव्याः करे वरण	३००
देव्याः श्रुतौ नेति	३०७
देव्यापि दिव्या नु	३१४
देव्याभ्यधायि	२४४
देशमेव ददंशासौ	४६२
देहिनेव यशसा	४८३
दैत्यभर्तुरुदरान्धु	४७५
दैन्यस्तन्यमया	३६६
दैन्यस्यायुष्यम	३७७
दोग्धा द्रोग्धा च	३७७
दोर्मूलमालोक्य	१२९
दोषं नलस्य जिज्ञा	३९८
द्यामन्तरा वसुमती	२४०
द्रागुपाहियत तस्य	४६४
द्राग्दृष्टयः क्षोणि	२२४
द्रुतविगमित	१०१
द्रोणः स तत्र	२५१
द्रोहं मोहेन यस्त	३८८
द्रोहिणं द्रुहिणो	३८३
द्वापरः साधुकारेण	३८६
द्वापरैकपरीवारः	३९०
द्विकुण्डलीभूत	२३१
द्विजपतिप्रसना	९३
द्वित्रैरेव तमस्तमा	४४२
द्विपस्य शाल्मल	२५१
द्विपद्भिरेवास्य	२८
द्वीपं द्विपाधिपति	२५२
द्वीपस्य पश्य	२४८
द्वीपान्तरेभ्यः पुट	२२१
द्वेष्या कीर्तिकलि	२६४
धनिदानाम्बुवृष्टेर्यः	३६६
धनुर्मधुस्निग्ध	२१
धनुषी रतिपद्म	३९
धन्यासि वैदर्भि	७६
धयतु नलिने माध्वी	४३४
धरातुरासाहि	७१
धराधिराजं	२७३
धर्मबीजसलिला	४८६
धर्मराजसलिले	११३
धर्माधर्मौ मनुर्जल्पन्	३७३
धवेन सादर्शि	३४६
धातुर्नियोगादिह	५६
धार्यः कथंकार	५६
धिक्चापले वत्सि	६३
धिक् तं विधेः पाणि	५९
धिगस्तु तृष्णातरलं	३१
धिनोति नास्मान्	१८४
धियात्मनस्ताव	२१०
धीयतां मयि दृढा	४२४
धुतापतत्पुष्प	२०३
धूपितं यदुदरान्त	३९९
धूमवत्कलयता	४८३
धूमावलिश्मश्रु	३१५
धूलीभिर्दिवमन्ध	२८१
धृतं वतंसोत्पल	३२७
धृतलाञ्छनगो	३९
धृताङ्गरागे कलित	२२३
धृताधृतेस्तस्य	१७९
धृताल्पकोपा	५४
धृतैतया हाटक	३२६
धृत्वैकया रसनया	२४३
धौतेऽपि कीर्ति	४६०
ध्रुवं विनीतः स्मित	३५२
ध्रुवमधीतवती	८०
ध्रुवावलोकाय	३४६
ध्वान्तस्य तेन	५०६
ध्वान्तस्य वामोरु	५०५
ध्वान्ते द्रुमान्ता	५०६
ध्वान्तैणनाभ्या	५०४
न काकुवाक्यैरति	२०४
न का निशि स्वप्न	११
न केवलं प्राणिवधो	३१
न क्षमे चपला	४६२
न खलु मोहवशेन	८६
नखेन कृत्वाधरसं	३५४
न जातरूपच्छ	३१
नतभ्रुवः स्वच्छनखा	३५०

श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०
न तुलाविषये	४३	न वर्तसे मन्मथ	२०९	निजामृतोद्यन्नव	२३८	नृपानुपक्रम्य	२६२	पदे विधातुर्यदि	१४७
न तृणादुद्धारे	२७१	नवा लता गन्ध	२२	निजे सृजास्मासु	१८३	नृपाय तस्मै	२५	पदैश्चतुर्भिः सु	४
न तेन वाहेषु	३४५	न वासयोग्या	३०	नित्यं नियत्या	१४४	नृपेण पाणि	६६	पदोपहारेऽनुप	१७१
नत्वा शिरोरत्न	१७१	न विदुषितरा कापि	४३२	निपततापि न	८९	नृपेऽनुरूपे	११	पद्भ्यां नृपः संचर	१३५
न दोषं विद्वेषा	३१९	नवौ युवानौ निजभा	३५२	निपीतदूतालपित	३२३	नृणां करम्बित	२४८	पद्मान्हिमे प्रावृषि	२३७
नन्वत्र हव्य इति	२४६	न व्यहन्यत कदापि	१२३	निपीय पीयूषरसौ	२००	नेत्राणि वैदर्भसुता	५३	पद्माङ्कसद्मानमवे	१५६
न पश्यामः कले	३८७	न श्रद्दधासि यदि	२५९	निपीय यस्य	१	नेत्रारविन्दत्व	५१७	पपौ न कोऽपि/क्षण	३५१
न पाण्ड्यभूमण्डन	२६५	न श्वेततां चरतु	२४५	निमीलनभ्रंशजुषा	१०	नेत्रे निषधनाथ	४६२	पयःस्मिता मण्ड	३५९
न पाहि पाहीति	२७४	न षड्विधः पिङ्ग	३५९	निमीलनस्पष्ट	१३०	नैकवर्णमणिभूत	४६९	पयोधिलक्ष्मीमुषि	२८
न पीयतां नाम	२६३	न संनिधात्री	२०१	निमीलितादक्षि	१३	नैन त्यज क्षीरधि	१३९	पयोनिलीनाभ्र	२७
नभसः कलभै	४५	न सुवर्णमयी	४३	निरन्तरत्वेन	५१९	नैव नः प्रियतमो	११३	पयोमुचां मेचकि	५१९
नभसि महगा	४२९	न स्थली न जलधि	४१४	निरस्य दूतः स्म	१९३	नैवाल्पमेधसि	२८८	परदारनिवृत्तिर्या	३६९
नभोनदीकूल	५०२	नस्वेदिनश्चामर	२२२	निरीक्षितं चाङ्ग	१६९	नैषधाङ्गपरिमर्द	४००	परभृतयुवतीनां	४९७
न भ्रातुः किल देव्यां	३७४	नाकलोकभिषजोः	१०९	निरीक्ष्य रम्याः	३५८	नैषधेन विरोधं मे	३८६	परवति दमयन्ति	७९
नमः करेभ्योऽस्तु	२३८	नाकेऽपि दोष्य	२२७	निरीय भूपेन	३५२	नैषधे बत वृते	११४	परस्परस्पर्शरसो	१३५
न मन्मथस्त्वं	१७२	नाक्षराणि पठता	१२२	निर्दिश्य बन्धूनिति	३४०	नोददासि यदि	४७७	परस्पराकूतज	३५३
नम्रप्रत्यर्थि	२७२	नागेषु सानुरागेषु	३८३	निर्विश्य निर्विरति	२५९	न्यग्रोधनादिव	२४५	परस्य दारान् खलु	३०५
नम्रयांशुकविकर्षि	४१४	नात्र चित्रमनु	१०२	निलीयते ह्रीविधुरः	५९	न्यधित तद्धृदि	८७	परस्य न स्प्रष्टुमिमां	३६०
न यक्षलक्षैः	२२६	नात्थ नात्थ	४१२	निवारितास्तेन	६	न्यवारीव यथा	४६३	परार्ध्यवेषाभरणैः	३३९
नयति भगवान	४२८	नाद निषाद	४९०	निविशते यदि	८२	न्यवीविशत्तानथ	२२८	परिखावलयच्छलेन	५०
नय नयनयोर्द्रा	४३९	नानया पतिरना	४०८	निवेक्ष्यसे यद्यनले	१९५	न्यवेशि रत्नत्रितये	२००	परिमृज्य भुजा	४३
न यावदग्निभ्रम	३३२	नापगेयमनयः	४८०	निवेद्यता हन्त	१७२	न्यस्तं ततस्तेन	१८२	परिष्वजस्वाव	२०९
नरसुराब्जभुवा	८८	नापराधीपराधीनो	३८२	निवेशितं यावक	३२८	न्यस्य तस्याः	४६१	परिरम्भेऽनयारभ्य	४४९
न राजिकाराद्ध	३५३	नाबुद्ध बाला	३०५	निशा शशाङ्कं	६२	न्यस्य मन्त्रिषु	३९९	परेतभर्तुर्मनसेव	१४५
नल तदावेत्य	२१३	नाभूदभूमिः स्मर	२१७	निशि दशमितामा	४२५			पर्यङ्कतापन्नगर	६६
नलं प्रत्यनपेतार्ति	३९०	नाभ्यधायि नृपते	१२२	निशि दष्टाधरायापि	४५१	पक्वं महाकालफलं	५०४	पर्यभूद्दिनमणि	१०३
नलं स तत्पक्षर	२११	नामधेयसमता	१०३	निशि दास्य गतो	४४५	पङ्कसंकरविगर्हित	११६	पर्वतेन परिपीय	१०९
नलप्रणालीमि	१२६	नामभ्रमाद्यम नीता	३८०	निशि निरशनाः	४३०	पचेलिम दाडिम	५०१	पलाशदामेति	३३०
नलभीमभुवोः	३६४	नायकस्य शयना	४११	निशि शशिन् भज	९०	पञ्चेषुविजयाशक्तौ	३६६	पवनस्कन्धमारुह्य	३६४
नलभ्रमेणापि	२२०	नाल्पभक्तबलि	४७२	निश्चित्य शेष तमसौ	३०४	पण्डितः पाण्डवाना	३७४	पवित्रमत्रातनुते	२
नलविमस्तकित	९२	नावा स्मरः किं	१३७	निषधनृपमुखेन्दु	३६२	पतगश्चिरकाल	३५	पश्य द्रुतास्तंगत	४९९
नलस्य नासीरसृजां	३३९	नाविलोक्य नलमा	४०८	निषिद्धमप्याचरण	१९३	पतगेन मया	३६	पश्यन् स तस्मिन्	१२९
नलस्य पश्यत्विय	२२१	नासत्यवदनं देव	४४८	निषेधवेषो विधि	१९६	पतत्येतत्तेजो	२७०	पश्य भीरु न मयापि	४१४
नलस्य पृष्टा	९२	नासादसी मया	१५३	निष्पदस्य कलेस्तत्र	३९७	पतत्रिणां द्राघिम	३३१	पश्याः पुरंध्रीः	१३२
नलस्य भाले मणि	३३२	नासीरसीमनि	२९०	विस्त्रिंशत्त्रुटितारि	२७४	पतत्रिणा तद्रुचिरेण	३०	पश्यावृतोऽप्येष	५०६
नलात्स्ववैश्वस्त्य	३३१	नास्ति जन्यजनक	११७	नीतमेव करलभ्य	४०३	पतिंवरायाः	२०२	पश्योच्चसौध	५२०
नलानसत्यानवद	२२५	नास्पर्शि दृष्टापि	१४९	नीतयोः स्तनपिधानतां	४११	पत्युरागिरिशभा	४१४	पांसुला बहुपति	४७६
नलान्यवीक्षां	२८३	नास्माकमस्मा	१८५	नीतानां यमदूतेन	३७९	पत्युर्गिरीणामय	५०४	पाञ्चजन्यमधि	४८४
नलाय वालव्यजनं	३४९	नास्य द्विजेन्द्रस्य	५२०	नीलदाचिबुकं	४५५	पत्यौ तया वृतेऽन्य	३९०	पाणये बलरिपो	१०९
नलाश्रयेण त्रिदिवो	६२	निःशङ्कमङ्कुरित	२५५	नीलनीररुहमल्प	४७०	पत्यौ वृते भीमजया	६१३	पाणिपर्वणि यवः	४६७
नलिनं मलिनं	३८	निःशङ्कसंकोचित	१६१	नीविसीम्नि निबिडं	१४३	पथामनीयन्त	३२३	पाणिपीडनमह	११८
नलेन ताम्बूल	३४४	निजस्य वृत्तान्त	२०२	नीविसीम्नि निहितं	४०७	पथ्या तथ्यामगृ	३६७	पाणौ फणी भजति	२४३
नलेन भायाः	७६	निजांशुनिर्दग्ध	२१४	नृपः कराभ्यामुद	२७७	पदं शतेनाप	१३९	पातुर्दृशालेख्य	१७३
नले निधातुं	३०६	निजाक्षिलक्ष्मीहसितै	२७०	नृपःपुरःस्थैः प्रति	२१८	पदद्वयेस्या नव	३२९	पाथोधिमाथसं	२५०
नलेष्टापूर्तसंपूर्ते	३९१	निजादनुव्रज्य स	३६०	नृपनीलमणी	४७	पदातिथेयांल्लिखि	२१४	पापात्तापा मुदः	३७०
न लोकते यथेदानीं	४४७	निजानुजेनातिथि	५०७	नृपमानसमिष्ट	३५	पदेपदे भाविनि	५५	पार्थिवं हि निज	१०४
न वनं पथि	४६	निजा मयूखा	१८	नृपस्य तत्राधिकृता	३३१	पदेपदे सन्ति भटा	३१	पार्श्वमागमि निजं	४०६
								पिकरुतिश्रुति	८६

श्लो०	पृ०
पिकस्य वाञ्छात्र	१७८
पिकाद्वने शृण्वति	२३
पितात्मनः पुण्य	३६०
पितुर्नियोगेन	६७
पितॄणां तर्पणे वर्णैः	३९२
पिपासुरस्मीति	३५४
पीडनाय मृदुना	४१६
पीततावकमुखा.	४०९
पितावदातारुण	२३३
पीतो वर्णगुणः	४९५
पीला तवाधर	२५२
पीयूषधारानध	६१
पुंसामलब्धनि	३६७
पुंसि स्वभर्तृव्यति	१३३
पुटपाकमसौ प्राप	३९१
पुण्ये मनः कस्य	१७०
पुत्री विधोस्ताण्ड	५१२
पुत्रीमुहृद्येन	१८१
पुत्रेष्टिश्येनकारीरी	३७९
पुनः पुनः काचन	३२६
पुनः पुनर्मिलन्नीपु	३६४
पुनर्वेक्ष्यसि मामेवं	३८३
पुमांसं मुमुदे तत्र	३९२
पुमानिवास्पर्शि	१३४
पुरः सुरीणां	१९१
पुरःस्थलाङ्गूल	३४०
पुरःस्थितस्य	१३३
पुरभिदा गमित	९४
पुराकृति स्त्रैण	१४९
पुरा परित्यज्य	१७१
पुरा प्रभिन्नाम्बु	३२५
पुरा यासि वरीतुं	३८९
पुरा हठाक्षिप्त	२५
पुरीनिरीक्षान्य	३६१
पुरे पथि द्वारगृहा	२२२
पुरैव तस्मिन् समदे	३४३
पुष्पकाण्डजय	४०२
पुष्पाणि बाणाः	१६२
पुष्पायुधस्यास्थि	५११
पुष्पेषुणा ध्रुव	२४५
पुष्पेषुश्चिकुरेषु ते	७८
पुष्पैरभ्यर्च्य गन्धा	३१८
पूगभागबहुता	४१७
पूजाविधौ मरु	२५८
पूतपाणिचरणः	४६७
पूरं विधुर्वर्धयितुं	५१०
पूर्णयैव द्विलोचन्या	४४५
पूर्णेन्दुबिम्बाननु	२२७
पूर्णेन्दुमास्यं विदधुः	२२०
पूर्वं मया विरहनिः	२९८
पूर्वपर्वतमाश्लिष्ट	४४६
पूर्वपुण्यविभव	१०४
पृथक् प्रकारैरजित	३५८
पृथुबर्तुलतन्नि	४१
पृथ्वीश एप	२६०
पृष्टेऽपि किं ति	५१३
पौरस्त्यशैले जन	१७६
पौरस्त्यायां घुसृण	४४२
पौरुषं दधति योषिता	४०४
पौष्प धनुः किं	१५०
प्रकाममादित्य	२८
प्रकृतिरेष गुणः	८४
प्रक्षीण एवायुषि	१४३
प्रतिज्ञेयं नले विज्ञाः	३८६
प्रतिप्रतीकं	१४६
प्रतिबिम्बेक्षितैः	४५७
प्रतिमासमसौ	८४
प्रतिहट्टपथे	४८
प्रतीपभूपैरिव	७
प्रत्यक्षलक्ष्यामव	३१४
प्रत्यङ्गभूपाच्छ	२३४
प्रत्यङ्गमस्या	१५०
प्रत्यतिष्ठिपदिलां	११८
प्रत्यर्थिपार्थिव	२५६
प्रत्यर्थियावत	२५४
प्रत्यभिज्ञाय विज्ञा	४५६
प्रत्यालापीत्कला	४५८
प्रत्युद्व्रजन्त्या प्रिय	४९८
प्रथमं पथि लो	४५
प्रथमकुकुमः पान्थ	४३२
प्रथममुपहृत्यार्घ	४२९
प्रदक्षिणं दैवत	२२३
प्रदक्षिणप्रक्रम	३०१
प्रबोधकालेऽहनि	५०३
प्रभुत्वभूम्ना	२०७
प्रयस्यतां तद्भवितुं	२२०
प्रयातुमस्माक	१९
प्रलापमपि वेदस्य	३७३
प्रलेहजन्नेहधृता	३५५
प्रवसते भरतार्जुन	१२५
प्रवेक्ष्यतः सुन्दर	२२७
प्रशंसितु संसदु	२७९
प्रसादमासाद्य	३०२
प्रसारितापः शुचि	३१६
प्रसीद तस्मै	१९७
प्रसीद यच्छ	२१४
प्रसृतवत्तानलकू	३४३
प्रसूनता तत्कर	३४६
प्रसूनबाणा	१५५
प्रसूनमित्येव	२१३
प्रसूप्रसादाधिगता	१३४
प्रस्मृतं न त्वया	४५३
प्राक्पुष्पवर्षैर्वियतः	२३३
प्रागचुम्बदलिके	४०६
प्रागिव प्रसुवते	१०४
प्रागेतद्वपुरा	२८०
प्राग्भवैरुदगुद	४८५
प्राग्भूय कर्कोटक	२१८
प्राचीं प्रहाते विरहा	१७८
प्राणमायतवतो	४६३
प्राणवत्प्रणयि	४८०
प्रातरात्मशयना	४११
प्रातर्वर्णनयानया	४४२
प्रापितेन चटुकाकु	११६
प्राप्ता तवापि नृप	४९२
प्राभव तावत्तव	१७६
प्राव्रडारम्भणा	४४६
प्राशंसि संसद्गुरु	२२७
प्रियं न मृत्युं न	२०४
प्रियां प्रियां च	१२
प्रियः प्रियामथाच	४५९
प्रियः प्रियैकाचरण	३६१
प्रियकरग्रहमेव	८७
प्रियसखीनिव	९८
प्रियस्याप्रिय	४६३
प्रियां विकल्पोपहता	१२९
प्रियाङ्गपान्था	१४७
प्रियानखीभूत	१६३
प्रियामनोभूशर	१८२
प्रियामुखीभूय	१५६
प्रियाविवियोगक्रथिता	२२१
प्रियांशुकग्रन्थिनि	३४६
प्रियासु बालासु	२८
प्रियाह्वियालम्ब्य	२६२
प्रियेण साथ प्रिय	५१८
प्रियेणाल्पमपि	४४४
प्रिये वृणीष्वामर	१८५
प्रीतिमेष्यति कृते	४७०
प्रेयसावादि सा	४४४
प्रेयसीकुचवियोग	४६५
प्रेयसीजितसुधां	१२४
प्रेषिताः पृथगथो	१११
प्रेयरूपकविशेष	११३
प्रौञ्छि वाञ्छितम	३८३
प्लक्षे महीयसि	२५२
प्लुष्टः स्वेश्वापरोपैः	१८५
फलमलम्यत	९४
फलसीमां चतुर्वर्ग	३८७
फलानि पुष्पाणि	२१
फलेन मूलेन च	३१
बत ददासि	९५
बन्धाढ्यनानारत	७७
बन्धाय दिव्ये न	५७
बन्धूकबन्धूभव	१५३
बभाण वरुणः	३८१
बभार बीजं निज	३४५
बभूव नस्तम्भ	३४७
बभूव भैम्याः खलु	३३२
बभौ च प्रेयसी	४५०
बलस्य कृष्टेव	३३६
बलात्कुरुत पापानि	३७०
बलिमद्य दिवं	४८
बहुकम्बुमणि	४९
बहुनखरता येषां	४३९
बहुरूपकशाल	४९
बहूनि भीमस्य	३४७
बहोर्दुरापस्य	३४२
बहुमानि विधिना	४१३
बालकेलिषु तदा	४७९
बालातपैः कृत	२४७
बालां विलोक्य	२९२
बालेन नक्तं सम	५०८
बाहुवक्त्रजघन	४१०
बाहुवल्लिपरिरम्भ	४१३
बाहू प्रियाया जयतां	१५९
बिभर्ति वंशः कतमः	१८७
बिभर्ति लोकत्रि	३६५
बिभीतकमधिष्ठाय	३९७
बिभेति रुष्टास्मि	७५
बिभेमि चिन्तामपि	१९२
बिभ्रत्युपरियानाय	३७५
बुद्धिमान् व्यधित	४०७
बुधजनकथा	४३७
ब्रवीति ते किं	१७६
ब्रवीति दासीह	२७१
ब्रह्मचारिवन	३६७
ब्रह्मणोस्तु तव	४८६
ब्रह्माद्वयस्यान्व	१४६
ब्रह्मार्थकर्मार्थ	२३०
ब्राह्मण्यादिप्रसि	३७८
ब्रूमः किमस्य नल	२५३
ब्रूमः किमस्य वर	२८५
ब्रूमः शङ्के तव नल	४४०
भक्तिभाजमनुगृह्य	४८७
भक्त्या तयैव	३०२
भक्तुं प्रभुर्व्याकरणस्य	५१४
भङ्गाकीर्तिमयी	२६५
भङ्गुरं न वितथं	१२२
भजते खलु	४०
भवत्पदाङ्गुष्ठमपि	१७४
भवद्वियोगाच्छिदुर	७५
भवद्वृत्तस्तोतुर्म	३१९
भवन्नदृश्यः प्रति	१३४
भवन् मुयुग्रः स्त्री	३३६
भवलघुयुताकान्तः	४३१
भवादृशैर्दिशामीशैः	३८५
भवानपि त्वद्दयि	३१४
भविता न विचार	३६
भविनां भावयन्	३७६
भव्यानि हानीर	१४९
भव्यो न व्यवसायस्ते	३८७
भानुगृनुमनुगृह्य	४८३
भावितेय त्वया साधु	४४८
भावी करः कर	२५७
भाषते नैषध	४५२
भास्वद्वंशकरीरतां	२६४
भास्वन्मयीं मील	५०५
भिक्षिता शतमखी	१०५
भित्तिं गर्भगृह	४०१
भित्तिचित्रलिखि	४०२
भीमजा च हृदि मे	११५
भीमजामनु चल	४६६
भीमजोरुयुगलं	४१६
भीमस्तयागद्यत	२३१
भीमात्मजाऽपि	४८९
भुजगेशानसद्वेशान्	३८३
भुजेऽपि सर्पत्यपि	२७४
भुञ्जानस्य नवं	४५५
भुवनत्रयसुभ्रुवा	३७
भुवनमोहनजेन	९५
भुवि भ्रमित्वा	२६५

श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०
भूपं व्यलोकत	२५८	मण्डलं निषधेन्द्रस्य	३९१	मर्यैव सर्वोऽय	२१३	मृगया दधामि	२९९
भूतेषु तेषु न	२५३	मण्डलत्यागमेवंरूढ	३९४	महत्तत्पत्त्व	२४	मुधार्पित भूषनु	२२७
भूभर्तुरस्य रति	२६०	मतः किमैरावत	१९७	मर्त्यदुःप्रचार	२२९	मुद्रलान्यज	१०२
भूभृत पृथुतपो	४६५	मत्कर्णभूषणा	४५७	मर्त्यलोकमदनः	४८२	मुनिरथात्मान	२०९
भूभृद्भवाङ्गभुवि	४९१	मत्तपः क्व नु तनु	११८	मल्लिकाकुसुमदुष्पुग	७१	मुनिरुमा को	२४
भूभृद्भिर्लम्भितामौ	३२०	मत्प्रीतिमाधित्सत	२४	ममारमाल्यावरुद्ध	८४	मुमुदे मन्दिरादान	१८९
भूमीभृतः समिति	२८३	मदनतापभरेण	८२	महाजनाचार	२७	मुग्धतमनसश्चिन	१९९
भूयस्ततो निखिल	२४८	मदन्यदानं प्रति	३८	महानट इव नु	३८	मुहूर्तमात्र भव	३९
भूयोऽपि बाला	१७३	मदर्थमदेशमृणाल	४४०	महापराधिनः	३४	मूर्धाभिषिक्त स	१
भूयोऽपि भूपति	४५०	मदान्मदग्रे भवता	३४७	महारथस्यात्व	२०५	मूलमर्थशिरस्क	१
भूयोऽपि भूपमपरं	२५८	मदुप्रतापक्षय	२०५	महावमाननाहत	३	मृगया न विनोदनं	२८
भूयोऽर्थमेनं	१४५	मदेकपुत्रा जननी	३	महीं कृतार्थां	३	मृगस्य नेत्रदितय	१
भूरिसृष्टिधृतभू	४७४	मद्विप्रलब्धं पुन	३	महोत्सवोत्सव च	४६०	मृगस्य लोभात्त	१
भूलोकभर्तुर्मुख	१७०	मद्विरोधिनयो	४६०	महोमपोना	२२६	मृगाक्ष यन्मण्डल	६
भूशकस्य यशांसि	२७९	मध्य तनूकृत	१८२	महीमहेन्द्र स्वर्ग	६	मृतः स्मरति जन्मानि	२९
भूषणरतुपदाश्रितं	४१८	मध्ये बद्धावलिमा	४७७	महीमहेन्द्रस्तम	२९	मृत्युञ्जयस्यैष	२८
भूपाभिरुच्चैरपि	२२३	मध्ये व्रतीनां	६५	महीयसः पदाज	२२९	मृत्युभीतिकरपुण्य	२०६
भूपास्थिदाम्रमुष्टि	५००	मध्येगम सावतत्तार	१५८	महेन्द्रदत्तादि	१५८	मृत्युर्हृषु न पश्य	२४
भृश वियोगा	२०३	मध्योपकण्ठावस्थ	४५०	महेन्द्रमुखलक्षणा	८८	मृषा निशानाथ	२१५
भृशतापभृता	४२	मनसायं भवताम	८८	मा त्रिलोकम	३८	मृषाभिधादा	३०८
भृशमविभरुम्भारा	४२९	मनसि सन्तमिव	३८	मा पर्यगा	८२	मे पत्युरुत्तमगा	११९
भैमीं च दृत्यं च	१४१	मनस्तु यं नोज्झति	११३	मा भानोः विदर्भ	४४९	मेरोरुपत्यका	३०८
भैमीं निरीक्ष्याभि	३०५	मनोभुवस्ते भविना	४४९	मा मनोनं कृपण	१३	मोदयन्दिनादनु	२१९
भैमीं पत्यै भुवस्त	३६३	मनोभूरामा चित्त	४४	मा यात्रिलोकम	८८	मोहनाशमवाप्यते	२१९
भैमीक्षितानि	२५५	मनोरथेन स्व	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भैमीनिरस्त	२२८	मन्त्रैः पुर भीमपुरो	४४	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भैमीनिराशे हृदि	१२८	मन्था नगः स	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भैमीपदस्पर्श	१२७	मन्दाकिनीनन्दन	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भैमीमवापयत	२५५	मन्दाकिनीस्पन्द	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भैमीमुपावीणय	१३६	मन्दाकमन्दाकर	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भैमीविनोदाय	१३८	मन्मथाय यदया	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भैमीविवाह सहते	२१९	मन्यैऽमुना रण	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भैमीसमीपे स	१३८	मम त्वदन्तर्गत	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भैम्या सम नाजगण	१२६	मम श्रमश्चेतनया	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भैम्या स्वजःसज्जनया	३०९	ममादरादि यद	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भोगिभिः क्षितितले	४७६	ममानुभवं	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भ्रमणरयविकीर्ण	५३	ममापि किं नो	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भ्रमन्नमुष्यामु	१३०	ममाशयः स्वप्न	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भ्रमामि ते भैमि	१९६	ममागनाथे भव	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भ्रुवाह्वयन्ती	३४०	ममासावपि मा	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भ्रुवौ दलाभ्यां	२३१	मर्मव पाणीकरणे	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भ्रूभ्यां प्रियाया	१५०	मर्मव वाहर्दिन	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भ्रूवल्लिवेष्टित	२४६	मर्मव शोकेन	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
भ्रूश्चित्रलेखा	१६४	मयाऽऽ पृष्टः कुल	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
		मयापि देय प्रति	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
मग्ना सुधाया	१४६	मयि स्थितिर्नेत्र	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९
मणीसनाभौ	३२९	मयेन भीमं भगवन्	३८	मा यात्रिलोकम	३८	यत्नेन यत्नेन	२१९

श्लो०	पृ०
यदि स्वमुद्बन्धु	१९५
यद्भर्तुः कुरुते	२७९
यद्भ्रुवौ कुटिलिते तया	४१२
यद्विधूय दयितार्पि	४०९
यन्मतौ विमल	१२०
यन्मौलिरत्नमुदि	२५३
यमुपामन्त दन्तौष्ठ	३६५
यमेन जिह्वाप्रहि	३४३
यर्या विमृश्योर्ध्वं	२२०
यशः पदाङ्गुष्ठ	१६६
यशो यदस्याजनि	६०
यस्तन्वि भर्ता	१८१
यस्ते नवः पल्लवितः	७६
यस्त्रिवेदीविदां वन्द्यः	३७०
यस्मिन्नलस्पृष्ट	१३२
यस्मिन्नस्मीति	३७१
यस्या विभोरखिल	२४३
यस्येश्वरेण	२९९
यां मनोरथमयीं	१२०
याचतः स्वगयाश्राद्धं	३७९
याचते स्म परिधा	४०८
याचनान्न ददतीं	४१२
याचमानजनमान	११६
याचितश्चिरयति	१२३
याचे नलं किममरा	२९९
या दाहपाकौ	३१५
यानेन तन्व्या	१६५
यानेव देवान्न	१४०
यान्वरं प्रति परेऽर्थ	१२४
यापदृष्टिरपि	१२२
या पाशिनैवाश	३०३
यामिकाननुप	१२०
यामि यामिह	१२०
यावत्पौलस्त्य	२७०
यावदागमयतेऽथ	१०२
यावन्तमिन्दुं	५१४
या शिरोविधुति	४१२
या सर्वतोमुखतया	२९०
यासि स्म रञ्जयन्	३९०
या सोमसिद्धान्त	२३१
युगशेष तव द्वेष	३८८
युद्धा चाभिमुखं	२७१
युवद्वयीचित्त	२४
युवानमालोक्य	३५०
युवान्तरं सा वच	२६५
युवामिमे मे	३४९
युवासमादिरसु	३५५
युष्मान् वृणीते न	३०९
येन तन्मदनवह्निना	४०९
येनानुमा बहुविगा	२९३
येपुयेषु सरसा	१०७
ये हिरण्यकशिपुं	४८४
यैरन्वमायि ज्वलन	५१५
योग्यैर्यजद्भिर्नृपजां	२१८
योजनानि परि	४१८
यो मघोनि दिव	११०
यौ कुरङ्गमदकुङ्कु	४१६
रक्षःस्वरक्षणमवेक्ष्य	२४२
रक्षिलक्षवृतत्वेन	३९६
रचय चारुमते	१००
रचयति रुचिः शोणी	४३५
रजः पदं षटपद	२३७
रजनिवमधुप्राले	४२७
रज्यन्नखस्या	१६०
रज्यस्व राज्ये	१४०
रतिपतिप्रहिता	८७
रतिपतेर्विजयास्त्र	८७
रतिरतिपतिद्वैत	४३१
रतिवियुक्तमनात्म	९४
रथाङ्गभाजा	२७
रथादसौ सारथिना	१२७
रथैरथायुः कुलजा	२१७
रम्भादिलोभात्कृत	२३४
रम्भापि किं चित्र	१६४
रम्येषु हर्म्येषु	२२१
रराज दोर्मण्डन	३३३
रविकान्तमयेन	५०
रविरथहयानश्च	४३०
रविरुचिरुचा	४२७
रवैर्गुणास्फालभवैः	१७९
रसस्य शृङ्गार	२३६
रसालसालः	२३
रसैः कथा यस्य	२
रहसहचरीमेतां	४३२
रागं दर्शयते सैषा	४४७
रागं प्रतीत्ययुव	४९३
राजा द्विजानामनु	१७४
राजा स यज्वा	५८
राजौ द्विजानामिह	१५५
राज्ञां पथि स्त्यान	२१८
राज्ञामस्य शते	२७३
राशि कृष्णलघु	४७२
राशि भानुमदुप	४६७
राज्यांतराभिमुख	२४६
रामणीयकगुणा	११३
रामालिरोमावलि	५०४
रामेषुमर्मव्रण	५०२
रिपुतरा भवना	८४
रिपूनवाप्यापि	२७०
रुचयोऽस्तमितस्य	४९
रुचिरचरणः	४३७
रुद्रेषुविद्रावित	५१३
रुषा निपिद्धालि	५५
रुषारुणा सर्वगुणै	१६५
रूपं प्रतिच्छायिक	१३३
रूपं यदाकर्ण्य	२३४
रूपमस्य विनिरू	११२
रूपवेषवसनाङ्ग	४१३
रेखाभिरास्ये	६०
रेवतीशसुषमा	४८१
रोमाङ्कुरैर्दन्तु	३१०
रोमाञ्चिताङ्गीमनु	१३०
रोमाणि सर्वाण्यपि	३१०
रोमावलीदण्ड	१६३
रोमावलीभ्रू	१६३
रोमावलीरज्जु	१६३
रोमेषुमर्मव्रण	५०२
रोषकुङ्कुमविलेपना	४२१
रोषरूषितमुखी	४२१
रोहणः किमपि यः	१२३
लक्ष्मीविलासवस	२४८
लक्ष्मीलतासम	२४८
लक्ष्ये धृतं कुण्डलिके	२३६
लघौ लघावेव	२१५
लङ्घयन्नहरहर्भव	४८७
लज्जया प्रथममेत्यम	४०७
लज्जितानि चितान्येव	४५१
लतावलालास्य	२६
लब्धं न लेख	५१९
ललाटिकासीमनि	३२६
लसन्नखादर्श	३३४
लाक्षयात्मचरणस्य	४२१
लावण्येन तवाखि	५२५
लावण्येन तवास्य	५२५
लिपिं दशा भित्ति	७२
लिपिर्न दैवी सुपठा	१३९
लिलिहे स्वरुचा	५१
लीनचीनांशुकं	४६२
लीलयापि तव नाम	४८६
लेखा नितम्बिनि	२८६
लोक एष परलोक	११७
लोकत्रयीं त्रयीनेत्रां	३७७
लोकस्रजि द्यौर्दिवि	१३९
लोकाश्रयो मण्डप	५०३
लोकेशकेशवशिवा	२४४
लोकैरशेषैरवनि	२१८
वक्त्रेन्दुसंनिधि	२४२
वक्षस्त्वदुग्र	२६०
वतसनीलाम्बुरुहेण	३३५
वदत्यधिह्नि चिह्नेन	४५२
वदनगर्भगतं	९२
वद विधुंतुद	९२
वनकेलौ स्मरा	४५६
वनान्तपर्यन्त	२०
वयं कलादा इव	१८४
वयसी शिशुता	३९
वयस्ययाकूतविदा	२७३
वयस्याभ्यर्थने	४५८
वयोवशस्तोक	३५२
वरणः कनकस्य	४९
वरस्य पाणिः परघात	३४१
वराटिकोपक्रियया	७०
वरुणगृहिणीमाशा	४२६
वरेण वरुणस्यायं	४५९
वर्णाश्रमाचार	३०९
वर्णासंकीर्णतायां	३७८
वर्षातपानावरणं	५१६
वर्षेषु यद्भारत	१४२
वल्लभस्य भुजयोः	४०६
वल्लभेन परिरम्भ	४१६
वस्तु वास्तु घटते	४८६
वस्तु विश्वमुदरे	४८६
वहतो बहुशैव	३५
वाग्मिनीं जडजि	३८६
वाग्जन्मवैफल्य	१७३
वाग्देवतापि स्मित	३१६
वाचं तदीयां	६४
वाणीभिराभिः	५१७
वाणी मन्मथतीर्थ	४९६
वातोर्मिदोलन	२५०
वामनादणुतमा	४८३
वामपादतललुप्त	४१८
वारणसी निवि	२५९
वार्तापि नासत्यपि	६१
वालेधराधरित	२५७
वाल्मीकिरश्लाघत	२२६
वासः परं नेत्र	१४१
वासरे विरहनिःसहा	४०९
वाससो वाम्बरत्वे	४६०
विकासिनीलायत	५२१
विचित्रवादित्र	३२४
विचिन्वतीः पान्थ	२२
विचिन्त्य नाना	२२८
विचिन्त्य बाला	६६
विजित्य दास्या	३२४
विज्ञप्तिमन्तः	१३८
विज्ञेन विज्ञाप्य	७२
विटत वणिजापणे	४९
वित्थ चित्तमखि	११९
विदग्धबालेङ्गित	३५८
विदर्भजायाः कर	३४१
विदर्भनाम्नस्त्रिदिव	३३४
विदर्भपुत्रीश्रवणा	३२८
विदर्भराजः क्षित	३४०
विदर्भराजप्रभवा	२१३
विदर्भराजोऽपि	३२२
विदर्भसुभ्रूस्तन	२२
विधा विदर्भेन्द्र	१५४
विधाय ताम्बूल	२७६
विधाय बन्धूकपयो	३२६
विधाय मूर्ति	३०
विधाय मूर्धान	१६४
विधिं वधूसृष्टि	६२
विधिरनशम	९६
विधिस्तुषारर्तु	५०९
विधुकरपरिरम्भा	५२
विधुदीधितिजेन	५०
विधुरमानितया	८४
विधुविरोधितिथे	९९
विधेः कदाचिद्भ्रम	५७
विधोर्विधिर्बिम्ब	१५८
विनमद्भिरधःस्थित	४६
विना पतत्रं विनता	६०
विनापि भूषाम	३२५
विनिद्रपत्रालि	२१
विनिहितं परि	८५
विनेतृभर्तृद्वय	३४०
विपश्चिराच्छादि	३२४
विप्रपाणिषु भृशं	४८८
विप्रे धयत्युदधि	२५१
विभज्य	

श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०
विभिन्दता दुष्कृति	१९८	विश्वरूपकलना	१०८	व्यतरदथ	१०१	शृण्वता निभृत	४२४	संग्रामभूमीषु	६०
विभूषणस्रंसन	३१५	विश्वरूपकृतविश्व	४८८	व्यधत्त धाता	१५६	शृण्वन् सदर	५९	संघट्टयन्त्यास्त	१३१
विभूषणांशु प्रति	३३९	विषमो मल	४४	व्यधत्त सौधेरति	२३७	शेष नल प्रत्यमरेण	३०३	संचीयतामाशु	६९
विभूषणेभ्योऽवर	२३३	विष्टरं तटकुशा	१०३	व्यधुस्तमा ते	३५३	शैशवव्ययदिना	१०७	संज्ञाप्य नः स्वध्वज	६०
विभूषणैः कञ्चु	३२३	विष्वग्वृतः परि	२५४	व्यथाकृत पत्रर	५४	शोकश्चेत्कोक		सददर्शोन्नमद्ग्रीवः	३८२
विभ्रम्य तच्चारु	१४७	विस्मेयमतिरस्मासु	३८६	व्यथीभवद्भाव	१७१	शोणं पदप्रणयिन	२९१	सदेहेप्यन्यदेहा	३७०
विमुखान्द्रष्टुमप्येनं	३८२	विहस्य हस्तेऽथ	३०७	व्यलोकि लोकेन	३३४	शोभायशोभिर्जित	१७३	संध्यावशेषे धृत	५०१
वियोगबाष्पाञ्चित	१५८	विहाय हा सर्व	१९५	व्यापृतस्य शतरुद्रि	४७१	श्यामीकृता मृग	२५७	संध्यासरागः कुकु	५००
वियोगभाजां	२१	वीक्षितस्त्वमसि	१०९	व्यासस्यैव गिरा	३७३	श्रद्धामयीभूय	३०१	संनिधावपि निजे	४०६
वियोगिदाहाय	३५३	वीक्ष्य तस्य विनये	१०५	व्रजति कुमुदे दृष्ट्वा	४२८	श्रद्धालुसंकल्पित	२२८	सपदस्तव गिरा	१०५
वियोगिनीमैक्षत	२२	वीक्ष्य तस्य वरुण	११२	व्रजते दिवि यद्गृहा	४८	श्रवःप्रविष्ट इव	६७	संप्रति प्रतिमुहूर्त	१०६
विरम्यतां भूतव	१७७	वीक्ष्य भावमधिग	४१८	व्रज धृतिं त्यज	९८	श्रवणपुटयुगेन	१४५	संभावयति वैदर्भी	४५३
विरहतप्ततदङ्ग	८६	वीक्ष्य भीमतनया	४०८	व्रजन्तु ते तेऽपि	२१६	श्रवणपूरतमाल	९०	संभाषणं भगवती	२४१
विरहतापिनि	८५	वीक्ष्य पत्युरधरं	४२०	शंभुदारुवनस	४०३	श्रितपुण्यसरः	४१	संभुज्यमानाद्य	१५४
विरहपाण्डिम	८३	वीक्ष्य वीक्ष्य कर	४२०	शक्रः किमेष	२८७	श्रितास्य कण्ठं	३३३	संरम्भजम्भजत्रादे	३८२
विरहपाण्डुकपोल	८५	वीक्ष्य वीक्ष्य पुनरैक्षि	४१७	शङ्कालतातातेम	२९१	श्रियं भजन्तो	३०५	संसारसिन्धावनु	१७५
विरहिणो विमुख	९७	वीतमाल्यकचहस्त	४२०	शचीसपत्न्या	५०३	श्रियमेव परं	३७	स कंचिदूचे रचय	३४८
विरहिभिर्बहु	९१	वीरसेनसुतकण्ठ	३९९	शतक्रतुरुजाद्याख्या	३८१	श्रियस्तदालिङ्गन	५९	सकलया कलया	९३
विरहिवर्गवध	९१	वृणीष्व वर्णेन	२७२	शतशः श्रुतिमात	४३	श्रियास्य योग्या	११	स कामरूपाधिप	२७५
विराध्य दुर्वास	३४५	वृणे दिगीशानिति	२००	शरैः प्रसूनैस्तुदतः	१७९	श्रियौ नरेन्द्रस्य	६०	स कौतुकागार	३४७
विरेजिरे तच्चि	३२५	वृतः प्रतस्थे स	३३९	शरैरजस्रं कुसु	१८०	श्रीभरानतिथि	१०५	स क्षणः सुमुखि	४२३
विरोधिवर्णाभरण	२३३	वृत्ते कर्मणि कुर्मः	३८६	शर्म किं हृदि हरेः	४२४			सखा यदस्मै किल	३४२
विलम्बसे जीवि	२०४	वृथा कथेय मयि	१८८	शशंस दासीजित	२६६	श्रीहर्ष कविराज ३४, ५३,		सखि जरां परिपृच्छ	९२
विललास जलाशयो	४७	वृथा परीहास	१९१	शशकलङ्कभयं	९०	८०, १०१, १२६, १४५,		सखीं नल दर्शय	३३४
विलासवापीतट	२६	वृथार्पयन्तीमपथे	५६	शशाक निह्नोतु	१६	१६७, १८६, २१७, २४०,		सखीं प्रति स्माह	३५०
विलासवैदग्ध्य	२२२	वृद्धो वार्धिरसौ	२८२	शशिमय दहनास्त्र	८७	२६२, २८५, ३०१, ३२१,		सखीशतानां सरसै	१३५
विलेखितुं भीमभुवो	१३६	वेत्थ मय्यागते	४५४	शस्ता न हंसाभि	५५	३३९, ३६३, ३९८, ४२५,		स गरुद्वनदुर्ग	३४
विलेपनामोदमुदा	२३२	वेत्थ मानेऽपि	४५३	शाकः शुकच्छद	२४७	४४३, ४६४, ४९८, ५२६,		स गृहे गृहिभिः	३९२
विलोकके नाय	३१४	वेद यद्यपि	१०७	शारीं चरन्तीं सखि	१३८	श्रुतः स दृष्टश्च	६८	सग्राम्यः स विदग्ध	४९७
विलोकनात्प्रभृ	४४९	वेदानुद्धरतां तत्र	३९१	शिक्षव साक्षात्	२२९	श्रुति श्रद्धत्य विक्षिप्ताः	३७३	स जयत्यरि	३६
विलोकनेनानु	४९९	वेदैर्वचोभिरखिलै	२५१	शिखी विधाय	२०१	श्रुतिः सुराणा	२१५	स तं नेषत्सौधस्य	३९७
विलोकयन्तीभि	१०	वेदैस्तद्वेषिभिः	३८०	शिरःकम्पानुम	४५९	श्रुतिपाठकवक्त्रेभ्यः	३९१	स तत्कुचस्पृष्ट	३५१
विलोकितास्या	१५६	वेलातिगस्त्रैण	६२	शिरीषकोषादपि	१५५	श्रुतिमयतनोर्भानो	४३९	सतस्तेऽथ सखी	४४९
विलोकिते रागि	३५८	वेलामतिक्रम्य	१४६	शिरीषमृद्वी	१९८	श्रुतिसरोधजध्वान	४५७	सतीमुमामुद्वहता	५०१
विलोक्य तच्छाय	१३३	वेश्मपत्युरविशन्न	४०५	शिशिरजरुजां	४३८	श्रुतिस्मृत्यर्थबोधेषु	३७१	स तुतोषाश्रुतो	३९५
विलोक्य तावाप्त	३१४	वेश्मापसा धैर्य	१३५	शिष्याः कला	४८९	श्रुत्वा जन रजोजुष्ट	३९५	सत्य खलु तदा	४५८
विलोक्य यूना व्यज	३५१	वैदर्भदूतानुनयो	२२३	शीघ्रलङ्घितपथ	१११	श्लथैर्दलैः स्तम्भयुग	३४०	सत्यव प्रतियोगादौ	३७८
विलोचनाभ्यां	३२७	वैदर्भि दत्तस्तव	३१४	शुचिरुचिमुडु	५२६	श्लिष्यन्ति वाचो	३०४	सत्येव साम्ये	१४८
विलोचनेन्दीवर	२७२	वैदर्भि दर्भदल	२४९	शुद्धवंशजानतो	११९	श्लोकादिह प्रथम	२९४	सत्वस्रुतस्वेदमधूत्थ	७७
विलोमिताङ्को	५०७	वैदर्भीकेलिशैले	५२	शुद्धान्तसंभोग	७१	श्वःश्वः प्राणप्रयाणे	३६७	सदण्डमालक्त	३१३
विवस्वतानायिषते	५०५	वैदर्भीबहुजन्म	३३७	शुद्धिर्वंशद्वयीशुद्धौ	३६९	श्वस्तस्याः प्रियमाप्नु	२१७	सदा तदाशामधि	२०१
विवेश गत्वा स	२०	वैदर्भीविपुलानु	३३८	शुभाष्टवर्गस्त्वद	२०९	श्वैत्यशैत्यजलदैवत	४६७	सदूरमादर तस्या	४४३
विशति युवतित्यागे	४३४	वैराग्य यः करो	३६६	शुभ्रांशुहारगण	२८५			सदृशी तव	३९
विशेषतीर्थैरिव	३३०	वैरिणी शुचिता	३९५	शुश्रूषिताहे	१४२	षड्ऋतवः कृपया	९६	स धर्मराजः खलु	१९७
विश्रवःपितृकया	४८९	वैरिश्रियं प्रति	२५८	शूरेऽपि सूरिपरि	२४६			सनालमात्मानन	२९
विश्लथैरवयवै	४१९	वैवस्वतोपि	३१५	शृङ्गारभृङ्गार	५१०	सख्यविक्षततनु	१०६	सन्तमद्वयमये	४८३
विश्वदृश्वनयना	११९	वैशद्यहृद्यैर्म्रदि	३०२			संगमय्य विरहे	४२५	सपल्लव व्यासपरा	२३१

श्लो०	पृ०
सपाखण्डजनान्वेषी	३९४
स पार्श्वमशकद्वन्तुं	३९२
सपीतेः संप्रीतेः	५२५
स प्रसह्य हृदयाप	४१२
स प्रियोरुयुग	४०७
सभाजनं तत्र	३०१
सभा नलश्री	२२१
स भिन्नमर्मापि	२०१
स भूभृदष्टावपि	७०
समं ययोरिङ्गित	३५७
समं सपत्नीभव	१८२
समं समेते	५२०
समज्ञानाल्पभूयि	३८०
सममेणमदर्पयदा	५०
समापय प्रावृष	२०८
समाश्लिष्येव	३५७
समिति पतिनिपाता	२७६
समुन्मुखीकृत्य	२७७
सम्यगर्चति नले	४६९
सम्यगस्य जपतः	४६७
स ययौ धुतपक्षतिः	४६
सरसिजवनान्युद्य	४३४
सर्गमि नृपमय	७९
सरसीः परिशी	४१
सरोजकोशाभि	३५६
सरोजिनीमानस	६७
सरोरुहं तस्य	९
सरोषापि सरो	४४५
सर्वतः कुशल	११४
सर्वत्र संवाद्य	१३५
सर्वथापि शुचिनि	४८७
सर्वस्वं चेतरासां	२८४
सर्वाङ्गीणरसा	३१८
सर्वाणि शस्त्राणि	३१५
सलीलमालिङ्ग	१३९
सा व्यतीत्य विय	१०३
सव्यापसव्यत्यज	७५
ससंभ्रमोत्पातित	३०
स सिन्धुजं शीत	१८
सस्यन्दनैः प्रवहणैः	९१
सहचरोऽसि रते	९४
सह तया स्मर	९७
सहद्वितीय स्त्रिय	३१३
सहस्रपत्रासन	५६
सहाखिलस्त्रीषु	१९४
साक्षात्कृताखिल	२८५
साक्षात्सुधांशुर्मू	२३६
सागरान्मुनि	५२२
साङ्कुरेव रुचि	४६८
साथ नाथमनय	४२३
साधारणीं गिर	२८८
साधुकामुकता	३७४
साधु त्वयातर्कि	६८
साधु नः पतनः	११०
साधोरपि स्वः	१४३
सानन्तानाप्यतेजः	२६१
सानन्दं तनुजा	३२०
सा निर्मले तस्य	३१०
सापत्न्य किय	४५७
सापीश्वरे श्रण्वति	५९
सासुं प्रयच्छति	२९६
सा भङ्गिरस्याः	३०४
साभिशापमिव	१०४
सा भवः किमपि	१०६
सामोदपुष्पाशुग	२३३
सा यद्भुताखिल	४९०
सायुज्यमृच्छति	२५९
सारोत्थधारेव	१८२
सालीकहट्टे मदनो	१७०
सावज्ञेवाथ सा	४४४
सावर्तभावभव	२४५
सा वव्रे यं तमुत्सृज्य	३८५
सावागवाज्ञाथि	२२५
सावादि मुतनु	४४५
सा विनीततमा नमी	३८७
साविभ्रमं स्वप्न	२२३
सा शरस्य कुसु	१०६
सा शशाक परि	४१५
साशृणोत्तस्य	४५७
सा स्मरेण बलि	४१२
साहूयोच्चैरथो	४५६
सितत्विषश्चक्र	१८
सितदीप्रमणि	४७
सितांशुवर्णै	६
सिताम्बुजानां	२७
सितो यदात्रैप	५०९
सिंदूरद्युतिमुग्ध	२६८
सिन्धोर्जैत्रमयं	२६९
सिग्मिये हसति न	४०८
सीत्कृतान्यशृणुतां	४०२
सुकृते वः कथं	३७०
सुगत एव विजित्य	९४
सुताः कमाहुय	३१
सुदतीजनमज्जना	४७
सुधांशुरेष प्रथमो	२२४
सुधांशुवंशाभरणं	१८९
सुधाभुजो यत्परि	५११
सुधारसोद्वेग	२०८
सुधासरःसु त्वद	१८४
सुरपरिवृढः कर्णा	४३६
सुरापराधस्तव	२१६
सुरेषु नापश्यद	३०५
सुरेषु पश्यन्निज	२११
सुरेषु माला मम	३०५
सुरेषु संदेशयसीं	१९०
सुवर्णशैलादवतीर्य	५७
सुषमाधिपत्ये	३९
सुहृदमन्निमुदश्च	८२
सूक्ष्मे घने नैषध	१६९
सृतविश्रमद	११२
सूनुनायकनिदेश	४२१
सूरं न सौर इव	२५२
सृजन्तु पाणिग्रह	३५२
सृजामि किं विघ्न	२७५
सृणीपदसुचिह्ना	४५१
सृष्टातिविश्वा	१६७
सेयं न धत्ते नृप	१७५
सेयं ममैतद्वि	१५५
सेयं मृदुः कौसुम	१५१
सेयमालिजने स्वस्र	४५१
सेयमुच्चतरता	११९
सोमाय कुप्यन्निव	१८०
सोऽयमित्थमथ	३९९
सौधाद्रिकुट्टिमानेक	४४३
सौवर्णवर्णैरमृत	५२०
स्तनद्वये तन्वि	७६
स्तनावटे चन्दन	१६२
स्तम्भस्तथाल	३१२
स्तुता मघोन	१४१
स्त्रिया मया वाग्मिपु	१९३
स्त्रीपुंसव्यतिषञ्जन	३३७
स्त्रीपुंसौ प्रविभज्य	४९५
स्थाने विधोर्वा	५१५
स्थापितामुपरि	४६२
स्थापर्यन्न स्म	४६१
स्थित भवद्भिः परय	३८४
स्थितस्य रात्रावधि	७४
स्थितिशालिसमस्त	५१
स्थितेरियद्भिर्युव	२२८
स्थितैव कण्ठे परि	२३०
स्थिरा त्वमस्मेव	३४६
स्नातकं घातकं	३९३
स्नातॄणां तिलकै	३९२
स्नानवारिघटराज	४६६
स्निग्धत्वमायाजल	२३२
स्पर्शं तमस्याधिग	१३४
स्पर्शोतिहर्षा	१३४
स्पर्शेन तत्र किल	२४७
स्फारे तादृशि	३९८
स्फुटं सावर्णि	३६४
स्फुटति हारमणौ	९९
स्फुटत्यदः किं	२१०
स्फुटोत्पलाभ्यां	२०३
स्फुरति तिमिरस्तो	४२७
स्फुरद्धनुर्निस्वन	५
स्मरं प्रसूनेन	२३३
स्मरकृतां हृदयस्य	८३
स्मरजित्वाजिगे	४५३
स्मर तन्नग्व	४५४
स्मर नृशंसतम	९५
स्मरमुखं हरनेत्र	९३
स्मररिपोरिव	९६
स्मरशराहति	८१
स्मरशार्कर	४५५
स्मरशास्त्रमधीयाना	४५२
स्मरशास्त्रविदा	४४८
स्मरसखो रुचिभिः	९२
स्मरस्य कम्बुः	९७
स्मरस्य किर्लेव	५०२
स्मरस्य कुर्लेव	१८१
स्मरहुताशन	८५
स्मरातपासो	१२
स्मरार्धचन्द्रेषु	२२
स्मराशुगीभूय	१३७
स्मरेण निरुक्ष्य	७४
स्मरेन्धने वक्षसि	१८१
स्मरेषुमाथं सहसे	२०८
स्मरोपतप्तोऽपि	१५
स्मारं ज्वरं घोर	७५
स्मारं धनुर्यद्विधु	१५१
स्मितश्रिया सृक्कणि	२६९
स्मितस्य संभावय	२०८
स्मिताञ्चितां वाच	२१६
स्मितेच्छुदन्तच्छद	२३४
स्मितेन गौरी हरिणी	२३९
स्रग्वासनाद्दष्ट	१३४
स्रजा समालिङ्ग	३०६
स्वं च ब्रह्म च	३७५
स्वं नैषधादेश	२४०
स्वकन्यामन्यसात्	३८०
स्वकान्तिकीर्ति	१३
स्वकामसंमोह	३१३
स्वकेलिलेशस्मित	९
स्वजीवमप्यार्तमुदे	६९
स्वदिग्विनिमये	४५४
स्वदृशोर्जनयन्ति	३७
स्वधाकृतं यत्	५२०
स्वनामयन्नाम	२१०
स्वप्नेन प्रापितायाः	१८६
स्वप्नुमाप्तशय	४२३
स्वप्रकाशजड	४७३
स्वप्राणेश्वरनर्म	५२
स्वमुकुलमर्यैर्नेत्रै	४३५
स्वयं कथाभिर्वर	३४९
स्वयं तदज्ञेषु गतेषु	३२९
स्वयवरं भीमनरेन्द्र	२२०
स्वयवरमहे नमी	३८३
स्वयवरस्याजिर	२३५
स्वयंवरोद्वाहमहे	२६६
स्वरिपुतीक्ष्ण	९२
स्वरुचारुणया	५१
स्वरेण वीणेव	३२८
स्वर्गापगाहेम	५६
स्वर्गे सतां शर्म	१४२
स्वर्णकेतकशतानि	४७२
स्वर्णदीस्वर्णपद्मिन्याः	४५२
स्वर्णैर्वितीर्णैः कर	१८४
स्वर्भानुना प्रसभ	५२३
स्वर्भानुप्रतिवार	५२६
स्वर्लोकमस्मामि	५८
स्ववर्णना न	५१८
स्ववालभारस्य	९
स्वस्ति वास्तोष्पते	३८२
स्वस्यामरैर्नृपति	३२०
स्वागमार्थेऽपि	३७१
स्वाङ्गमर्पयितुमेत्य	४१३
स्वाच्छन्द्यमान	१६९
स्वात्मनः प्रिय	४६९
स्वात्मापि शीलेन	१७१

श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०	श्लो०	पृ०
स्वादूदके जलनिधौ	२४५	स्वेदाम्बुप्रणयिनी	४९२	हरिन्मणेर्भोजन	३५१	हित्वैव वर्त्मैक	१३०	हृदि विदर्भभुवोऽभ्युपति	८१
स्वानुरागमनघः	४७३	स्वेन पूर्यत इयं	४७५	हरेर्दिक्कामि	१९	हुताशक्षीनाश	१३८	हृद्गन्धवहभोग	४८१
स्वापराधमलुपत्	४२२	स्वेन भावजनने स	४१९	हर्षीभवतः	४२३	हृतसारमिवेन्दु	३८	हृद्यवान् स द्विज	३९५
स्वामिना च वहता	४०४	स्वेसितोद्गमित	४१५	हसन्भमौ दिवि	३०८	हृत्तमा यन्मन्त्रयते	७३	हेमनामकतरु	४७०
स्वारसातलभवा	१०८			हसलेगमसूजन्त	४७७	हृद्यमग्न्यधि	३०२				
स्विद्यत्करार्द्रकुलि	४६२	हसं तनौ सन्निहितं	५४८	नौ विसारयन्	३६६	हृद्य एव तवामि	९९				
स्विद्यत्प्रमोदाश्रु	१२७	हंसोऽयमौ हंसगतेः	५४	हारचारिमविलोकने	४०३	हृद्यदत्तमरोहया	८४				
स्वेदः स्वदेहस्य	३०५	हतः कयाचित्पथि	१३१	हासन्विषेवामल	५१०	हृद्यमालनये	९३				
स्वेदविन्दुकित	४२०	हताश्चेद्दिवि दीव्यन्ति	३९	हिंसामनो मर्म वीक्ष्य	३९३	हृद्यमिनन्य	१८९				
स्वेदाम्बुजि हृदये	४२१	हरि परित्यज्य	१९३	हिमगिर न	९८	हरि दमयन्त्य	८२				
स्वेदवारिपरिपूरितं	४२०	हरिप्रतीनां सदसः	१३७	हित्वा दे परिपोषरः	३६९	हरि पुरन्ति कन्या	८५				
स्वेदस्य धाराभि	५१६	हरिद्विपट्टीपिभि	३४०	हित्वैतत्सम्यापयन	१२९	हरि विदर्भसुतः प्रहर	८०				

इति नैषधीयचरितस्यश्लोकवर्णानुक्रमणी संपूर्णा ।